THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY

OU_184226

UNIVERSAL
LIBRARY

OUP—67—11-1-68—5,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294.1 V41S Accession No. G S2003

Author वेद, सामवेद

Title सामवेदीयताण्ड्य महाब्राह्मणम्

This book should be returned on or before the date last marked below.

THE

KASHI SANSKRIT SERIES

(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)

NO. 105.

(Veda Section, No. 6)

THE

TĀṆḌYAMAHABRĀHMAṆA

BELONGING TO The SĀMA VEDA

WITH THE COMMENTARY OF SĀYĀNACHĀRYA.

Edited with Notes, Introduction, etc.,

By

VEDAVIŚARADA, MĪMĀṂSĀKESARI,

Pandit. A. Chinnaswami S'astri

Professor, Benares Hindu University.

PUBLISHED & SOLD BY

JAI KRISHNADAS-HARIDAS GUPTA,

The Chowkhamba Sanskrit Series Office,

BENARES.

1935.

[*Registered According to Act XXV of 1867.*
All Rights Reserved by the Publisher.]

PRINTED BY
JAI KRISHNA DAS GUPTA
Vidya Vilas Press,
Benares City.

हरिदास संस्कृत ग्रन्थमालासमारब्ध-

काशी संस्कृत सीरिज़ ग्रन्थमालायाः

१०५

वेदविभागे (६) षष्ठं पुष्पम् ।

सामवेदीय-

ताण्ड्यमहाब्राह्मणम् ।

सायणाचार्यविरचितभाष्यसहितम् ।

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन

"वेदविशारदेन, मीमांसाकेसरिणा"

पण्डितप्रवरेण श्रीचिन्नस्वामिशास्त्रिणा भूमिकाटिप्पण्यादिभिस्संयोज्य संशोधितम् ॥

प्रकाशकः—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी।

१९४१

राजशासनानुरोधेन सर्वेऽधिकाराः प्रकाशकेन स्वाधीकृताः ।

किञ्चिन्निवेदनम् ॥

अयमिदानीं ताण्ड्यमहाब्राह्मणाख्यस्य सामवेदादिमब्राह्मणस्य द्वादशाध्यायात्मकः प्रथमो भागः पुनर्मुद्रापितः प्रकाशं नीयते। अस्य च सभाष्यस्य प्राथमिकं मुद्रणं इतश्चतुष्षष्टेर्वर्षेभ्यः पूर्वं कलिकातानगरे Asiatic Society समाख्यया समित्या कृतं प्रकाशितञ्चेति तदर्थं धन्यवादार्हा सा समितिरतीवेति नाऽत्र संशयलेशः। तथाऽपि तदानीं समीचीनादर्शपुस्तकालाभेन यथाकथञ्चित् प्रकाशनेनाऽपि ग्रन्थसंरक्षणमभिषता तदानीन्तनेन प्रकाशकेन यथोपलम्भं प्रकाशं प्रापितः। अतश्च तत्र मूलेऽशुद्धिविशेषाभावेऽपि भाष्यमशुद्धिभरितमेव मुद्रितमासीत्। मुद्रितस्याऽपि तस्याऽप्राप्तिमिदानीं पश्यता संस्कृतग्रन्थरक्षणैकदत्तचित्तेन श्रेष्ठिकुलतिलकेन श्रीचौखम्बासंस्कृतग्रन्थावलीप्रकाशकमहोदयेन पुनर्मुद्रणमस्याऽऽरभ्य अर्धाधिकभागमुद्रणानन्तरमेवाऽस्मद्धस्तं प्रापितस्संशोधनाय। अस्माभिस्तु तदनुरोधात् स्वीकृतं यद्यपि संशोधनम्, तदर्थं चाऽऽदर्शपुस्तकद्वयमानायितं अडयार् पुस्तकालयात् बडोदापुस्तकालयाच्च, तदनुसारेण कृतमपि शोधनमग्रे यथारुचि, तथाऽपि तदाऽल्पावशिष्टमुद्रणेऽस्मिन् प्रथमभागे साऽऽस्था नाऽस्माकमजनि यथा भवितव्यम्। द्वितीयभागस्तु यथामतिशक्ति परिश्रम्य सर्वाङ्गसुन्दरः प्रकाशनीय इत्यस्ति महानभिलाषः, यदि स सेत्स्यति मन्ये प्रियपाठकास्तपर्स्यन्तीति। अथ च यद्यवसरो लभ्येत पुनरपीमं भागं सर्वाङ्गरमणीयं कृत्वा प्रकाशयिष्यामः। इदानीं ग्रन्थमिममनुपलम्भयोग्यमुपलब्धिविषयं कृतवतः श्रीचौखम्बाग्रन्थावल्यधिपतीनाशीर्भिरभिपूर्य सन्तोष्टव्यमित्यभ्यर्थये विद्वन्मणीन्। ग्रन्थविषये यद्वक्तव्यं तत् सर्वं द्वितीयभागभूमिकायामभिधास्यते। अत्र त्वेतावतैव विरम्यते—

वाराणसीहनुमद्घट्टः
मार्गशीर्षकृष्णसप्तमी
व० सं० १९९१
२८-११-३४ ई०

इति विपश्चिदनुचरः
अ० चिन्नस्वामिशास्त्री।

॥ श्रीः ॥

ताण्ड्यमहाब्राह्मणगतानां

विषयाणां सूची ॥

विषयाः—	पृष्ठम्—
प्रथमाध्याये प्रथमखण्डे—	
मङ्गलाचरणम्	१
उपोद्घातत्वेनाऽनारभ्याधीतानां प्रकृतिगामित्वविचारः	२
प्रथमाध्यायगतानां मन्त्राणां द्वितीयतृतीयाध्यायगतानां विष्टुतीनाञ्च ऋक्त्वङ्गत्वम्	३
होत्रध्वर्युब्रह्मोद्गातृणामेव वरणम्	४
मन्त्रस्येयत्तापरिपादनम्	५
वृतस्योद्गातुर्जपमन्त्रः	५
देवयजनदेशं गच्छत उद्गातुर्जपमन्त्रः	६
प्रातरनुवाकावसानसमये उद्गात्रादिभिर्वेद्याक्रमणं कर्तव्यम्	८
उद्गात्रादीनां हविर्धानप्रवेशमन्त्रः	९
प्रथमाध्याये द्वितीयखण्डे—	
उद्गात्रादिभिर्मन्त्रोच्चारणपूर्वकं सोमस्पर्शनं कार्यम्	१०
उद्गात्रादिभिर्द्रोणकलशावस्थापनं कार्यम्	११
अभिषवसाधनीभूतप्राव्णां स्पर्शनम्	१२
उद्गात्रा दशापवित्रेण द्रोणकलशस्सम्मार्ष्टव्यः	१३
धाराग्रहणसमये पठनीयो मन्त्रः	१४
प्रथमाध्याये तृतीयखण्डे—	
उद्गातृप्रस्तोतृप्रतिहर्तृभिः क्रमेण प्रवृत्तहोमौ कर्तव्यौ	१५
स्तोमयोजनमन्त्रः	१६
स्तोमयोजनानन्तरं पठनीयो मन्त्रः	१७
आदित्यप्रेक्षणमन्त्रः	१८
प्रथमाध्याये चतुर्थखण्डे—	
आदित्याहवनीयाद्युपस्थानमन्त्रः	१९
सदसो द्वारि तिष्ठद्भिर्मार्जालीयौदुम्बर्यादीनामुपस्थानं कार्यम्	२०
महावेदेरुपस्थानम्	२२
प्रथमाध्याये पञ्चमखण्डे—	
औदुम्बर्या उत्तरत उपवेशने मन्त्रः	२३
चमसावेक्षणभक्षणयोर्मन्त्रः	२३
भक्षणानन्तरं चक्षुराद्यभिमर्शनमन्त्रः	२४
आप्यायनमन्त्रः	२५
माध्यन्दिनसवने स्तोमयोगमन्त्राः	२७
तृतीयसवने यजमानवाचनमन्त्रः	२८
प्रथमाध्याये षष्ठखण्डे—	
सत्रूपदशरात्रान्तर्गतषोडशिग्रहभक्षणमन्त्रः	३०
आवृतस्तोत्रेषु समाप्तेषु यजमानवाचनमन्त्रः	३१
तृतीयसवने स्तोत्रसमाप्त्यनन्तरं स्तोमविमोकमन्त्रः	३२
हारियोजनग्रहभक्षणमन्त्रः	३३
दधिभक्षणमन्त्रः	३४
प्रथमाध्याये सप्तमखण्डे—	
दक्षिणाप्रतिग्रहीतुरश्वमुखसम्मार्जनमन्त्रः	३६
रथ्याग्रहणमन्त्रः	३७

विषयाः— पृष्ठम्—

रथारोहणमन्त्रः ३७

अश्वबन्धनरज्जुग्रहणमन्त्रः ३८

प्रथमाध्याये अष्टमखण्डे—

सर्वदक्षिणाप्रतिग्रहे पठनीयो मन्त्रः ३९

हिरण्याजादिप्रतिग्रहे मन्त्रः ३९

अविप्रतिग्रहे मन्त्रः ४०

आसनशय्यादिवस्तुप्रतिग्रहे मन्त्रः ४१

तिलमाषादिप्रतिग्रहे मन्त्रः ४२

प्रथमध्याये नवमदशमखण्डयोः—

त्रिवृत्पञ्चदशादिस्तोमभागमन्त्राः ४४

प्रथमाध्यायगतमन्त्राणां विनियोग-सङ्ग्रहः ४९

द्वितीयाध्याये प्रथमखण्डे—

बहिष्पवमानसाधनीभूतत्रिवृत्स्तोमगतायाः उद्यतीविष्टुतेस्स्वरूपम् ५२

उद्यतेर्नानाविधफलसाधनत्वेन प्रशंसा ५३

द्वितीयाध्याये द्वितीयखण्डे—

त्रिवृत्स्तोमगतपरिवर्तिनीविष्टुतेस्स्वरूपम्, तत्प्रशंसा च ५४

द्वितीयाध्याये तृतीयखण्डे—

त्रिवृत्स्तोमगतकुलायिनीविष्टुतेस्स्वरूपम् ५६

बहुफलसाधनत्वेन कुलायिन्याः प्रशंसा ५७

द्वितीयाध्याये चतुर्थखण्डे—

पञ्चदशस्तोमगतपञ्चपाञ्चिनीविष्टुतः स्वरूपम्, तत्प्रशंसा च ५८

द्वितीयाध्याये पञ्चमषष्ठखण्डयोः—

पञ्चदशस्तोमस्य विष्टुत्यन्तरप्रदर्शनम् ६०

द्वितीयाध्याये सप्तमाष्टमनवमेषु खण्डेषु—

सप्तदशस्तोमस्य विष्टुतिस्वरूपवर्णनम्, तद्विभागस्तुतौ च ६२

द्वितीयाध्याये दशमखण्डे—

सप्तदशस्तोमीयविष्टुतेर्व्यूहनप्रकारः ६७

अत्राऽधिकारिनिर्देशः ६८

विषयाः— पृष्ठम्—

द्वितीयाध्याये एकादशखण्डे—

सप्तदशस्तोमस्य विष्टुत्यन्तरविधानम् ६९

द्वितीयाध्याये द्वादशखण्डे—

सप्तदशस्तोमस्योद्यत्याख्या विष्टुतिः ७०

द्वितीयाध्याये त्रयोदशखण्डे—

सप्तदशस्तोमस्य भस्त्राख्या विष्टुतिः ७१

द्वितीयाध्याये चतुर्दशखण्डे—

एकविंशस्तोमस्य विष्टुतयः ७२

तृतीयाध्याये—

त्रिणवादीनां स्तोमानां विष्टुतिप्रदर्शनम् ७७

चतुर्थाध्याये प्रथमखण्डे—

गवामयनसंज्ञाया निर्वचनम् ९१

गवामयनस्य द्वादशमासकर्तव्यता ९२

गवामयनवेदनस्य सफलत्वम् ९३

गावामयिनिकप्रथमदिनस्याऽतिरात्रसंस्थाकत्वम् ९३

अतिरात्रप्रशंसा ९४

अभिप्लवषडहपूर्वकस्यहाविधानम् ९५

तदुत्तरस्यहाविधानम् ९६

पृष्ठ्यषडहविधानम्, तत्प्रशंसा च ९७

चतुर्थाध्याये द्वितीयखण्डे—

गावामयनिकद्वितीयदिनस्य प्रायणीयसंज्ञकत्वम् ९८

प्रायणीयशब्दव्युत्पत्तिः ९८

प्रायणीयदिने सत्रिणां ऋत्विग्भावः ९८

प्रायणीये चतुर्विंशस्तोमविधानं तत्प्रशंसा च ९९

प्रायणीयदिनस्योक्थ्यसंस्थाकत्वे दोषपरिहारौ विकल्पेनाऽग्निष्टोमसंस्थाकत्वञ्च १००

प्रायणीयस्याऽग्निष्टोमसंस्थाकत्वमेवेति सिद्धान्तः पक्षः १०१

विषयाः— पृष्ठम्—

प्रायणीयदिने बहिष्पवमानस्य मतभेदेन स्तोत्रीयविधानम् १०२

तत्रैव स्वाभिमतस्तोत्रीयविधानम् १०३

चतुर्थाध्याये तृतीयखण्डे—

माध्यन्दिनसवने ब्राह्मणाच्छंसिकर्तृक पृष्ठस्तोत्रनिर्वर्तकाभीवर्तसामनिर्वचनम् १०४

अभीवर्तसाम्नो ब्रह्मसामत्वेन प्रशंसा १०५

चतुर्थाध्याये चतुर्थखण्डे—

गवामयने मासपञ्चकपर्यन्तमहःवल्लप्तिः बार्हतप्रगाथसम्पादनञ्च १०८

चतुर्थाध्याये पञ्चमखण्डे—

गवामयने षष्ठे मासि अभिजिद्विषुवन्मध्यगतस्वरसामविधानम् ११३

स्वरसङ्ख्यापूर्वकं तत्स्तुतिः ११३

स्वरसाम्नां स्तोमविधानम् ११४

तेषामनुष्ठानस्थानम् ११५

अनुष्ठानस्थानस्य प्रशंसा ११६

चतुर्थाध्याये षष्ठखण्डे—

गवामयने प्रधानभूतविषुवदाख्याहर्विधानम् ११८

तस्मिन्नहनि एकविंशस्तोमविधानम् ११९

एकविंशस्तोमस्य सफलत्वम् ११९

विषुवदहि बहिष्पवमानस्य प्रतिपद्विधानम् १२०

विषुवदहि दिवाकीर्त्यसामविधानम् १२१

दिवाकीर्त्यादिसाम्नां तृचविधानम् १२२

चतुर्थाध्याये सप्तमखण्डे—

विषुवदहि माध्यन्दिनपवमानेऽभीवर्तसामाऽपि कार्यम् १२४

अत्र प्रगाथविधानम्, तत्प्रशंसा च १२५

उत्तरस्मिन् पक्षसि प्रातिलोम्येन स्वरसामाभिप्लवादयः कार्याः १२६

विषयाः— पृष्ठम्—

चतुर्थाध्याये अष्टमखण्डे—

उत्तरस्मिन् पक्षसि अभिप्लवानन्तरं गौरायुरिति द्वे अहनी १२७

उत्तरस्मिन् पक्षसि षष्ठे मासि द्वादशाहान्तर्गतदशाहविधानम् १२८

अत्र दशमेऽहि वामदेव्याग्निष्टोमसाम्नोर्विधानम् १२९

चतुर्थाध्याये नवमखण्डे—

दशमेऽहि पत्नीसंयाजानन्तरमाहवनीयोपस्थानं कार्यम् १३१

दशमेऽहि मानसाख्यस्तोत्रविधानम् १३२

मानसस्तोत्रे प्रस्तावोद्गीथादिकं मनसैव कर्तव्यम् १३३

मानसस्तोत्रानन्तरं आनक्षत्रदर्शनाद्गृहपतेरौदुम्बर्यनुत्सर्गः १३४

अत्र सर्वैर्वाग्यमनं कर्तव्यम् १३५

आत्मनोऽवदानप्रकारः सत्रिणां वपनविधानञ्च १३६

चतुर्थाध्याये दशमखण्डे—

गवामयनस्य महाव्रताख्यमुपान्त्यमहः १३७

महाव्रतस्य पञ्चविंशस्तोमकता १३८

पञ्चमाध्याये प्रथमखण्डे—

महाव्रते वामदेव्यं साम कार्यम् १३९

अत्र शिरःपक्षादिभेदेन पञ्चविधस्य होतुः पृष्ठस्य विधानम् ”

प्रकारपञ्चके होतुः पृष्ठे पार्थक्येन स्तोमविधानम् १४०

पञ्चमाध्याये द्वितीयखण्डे—

महाव्रते प्रकारान्तरेण स्तोमसाम्नां विधानम् १४३

पञ्चमाध्याये तृतीयखण्डे—

महाव्रते इलान्दाख्यं सामाऽग्निष्टोमसाम्येन कर्तव्यम् १४६

विषयाः— पृष्ठम्—

इलान्दे सामनि ऋङ्निधनादीनां विधानम् १४७

महाव्रते वारवन्तीयं वाऽग्निष्टोमसामत्वेन कार्यमिति पक्षान्तरम् १४८

पञ्चमाध्याये चतुर्थखण्डे—

महाव्रते स्तोत्रसमाप्त्यनन्तरं प्राणसाम्नाऽऽहवनीयोपस्थानम् १४९

वसिष्ठस्यनिहवेन साम्ना चात्वालोपस्थानम् १५०

श्लोकानुश्लोकाभ्यां हविर्धानोपस्थानम् १५१

सदोगार्हपत्ययोरुपस्थानम् १५२

पञ्चमाध्याये पञ्चमखण्डे—

महाव्रते आसन्दीमारुह्योद्गात्रा गानं कर्तव्यम् १५३

आसन्द्या औदुम्बरीत्वविधानम् १५४

तत्राऽऽरोहणोपावहरणे छन्दोभिः कार्ये ,,

होत्रादीनां ऋत्विजामासनविधानम् १५५

अत्र राजपुरुषैर्देवयजनस्य परितो गमनं कर्तव्यम् १५७

पञ्चमाध्याये षष्ठखण्डे—

अध्वर्वादिभिरप्यवयवशो महाव्रतेन स्तोत्रं कर्तव्यम् १५८

पूर्वोक्तपक्षनिरसनपूर्वकमुद्गात्रैव स्तोतव्यमिति पक्षान्तरम् १५९

उद्वानसमये पत्नीनामुपगानविधानम् १६०

महाव्रतदिने सर्वयजमानगृहेषु ब्राह्मणभोजनार्थं पाकः कर्तव्यः १६१

यजमानप्रेरितानां पत्नीनामुदकुम्भधारणविधानम् १६२

विषयाः— पृष्ठम्—

पञ्चमाध्याये षष्ठमखण्डे—

गवामयने सर्वेष्वहस्सु आर्भवपवमाने गौरीवितसाम्नो विधानम् १६३

सुह्वानाख्यस्य साम्नोऽन्वहं कर्तव्यत्वेन विधानम् १६४

पञ्चमाध्याये अष्टमखण्डे—

अन्वहं कर्तव्यत्वेन श्यावाश्वाग्निहवयोस्साम्नोर्विधानम् १६६

अभिप्लवषडहस्य प्रथमेऽह्नि ओको निधनाख्यं साम कर्तव्यम् १६७

पञ्चमाध्याये नवमखण्डे—

माघकृष्णाष्टमी गवामयनस्य दीक्षाकालः १६८

अस्मिन्पक्षे दोषोद्घाटनम् १६९

फाल्गुनपौर्णमासी दीक्षाकाल इति पक्षान्तरम् ,,

चित्रापौर्णमासी दीक्षाकाल इत्यन्यः पक्षः १७०

चित्राशुक्लैकादश्यां गवामयनस्य दीक्षेति सिद्धान्तः पक्षः ,,

पञ्चमाध्याये दशमखण्डे—

गवामयने विकल्पेन प्रतिमासमेकैकम हरुत्सृष्टव्यम् १७१

तदुत्सर्गप्रकारचिन्ता १७२

उत्सृष्टदिनस्य कृत्यं तत्पूर्वतनदिवसे कार्यम् १७३

षष्ठाध्याये प्रथमखण्डे—

सर्वसोमप्रकृतिभूताग्निष्टोमस्योत्पत्तिः तत्प्रशंसा च १७५

अग्निष्टोमेन साकं मुखतः त्रिवृद्गायत्री ब्राह्मणाग्न्यादीनामुत्पत्तिः १७७

उरस्तः पञ्चदशस्तोमराजन्येन्द्रादीनामुत्पत्तिः १७८

विषयाः— पृष्ठम्—

मध्यतस्सप्तदशस्तोमवैश्यादीनामुत्पत्तिः ,,

पक्ष्यामेकविंशस्तोमशूद्रादीनामुत्पत्तिः १७९

षष्ठाध्याये द्वितीयखण्डे—

त्रिवृदादिस्तोमानां वेदनावश्यकता १८०

त्रिणवत्रयस्त्रिंशस्तोमयोर्विधानम् १८१

षष्ठाध्याये तृतीयखण्डे—

अग्निष्टोमस्य सर्वफलसाधकत्वम् १८२

अग्निष्टोमस्य ज्योतिष्टोमत्वेन व्यपदेशे प्रश्नोत्तरे १८३

त्रिवृदादिस्तोमचतुष्टयस्य यज्ञनिर्वाहकत्वेन प्रशंसा १८६

षष्ठाध्याये चतुर्थखण्डे—

अग्निष्टोमे उद्गातृकर्तृकमौदुम्बर्युच्छ्रयणम् १८७

औदुम्बर्युच्छ्रयणे मन्त्रविधानम् , तदर्थविचारश्च १८८

उद्गातृप्रस्तोत्रादीनामौदुम्बर्यास्समन्तत उपवेशनप्रकारः १९०

षष्ठाध्याये पञ्चमखण्डे—

द्रोणकलशस्योत्पत्तिप्रकारः तस्य प्रोहणविधानञ्च १९१

द्रोणकलशप्रोहणे मन्त्रविधानम् , तदर्थविचारश्च १९२

द्रोणकलशप्रोहणं हविर्धानादधः कर्तव्यम् १९३

द्रोणकलशस्योपरि दशापवित्रस्थापनम् १९४

षष्ठाध्याये षष्ठखण्डे—

उद्गात्रा प्राण्णामुपरि द्रोणकलशाध्यूहनं कर्तव्यम् १९७

द्रोणकलशसम्मार्जनार्थं मन्त्रविधानम् १९८

विषयाः— पृष्ठम्—

तत्सम्मार्जनसाधनतया शुक्लस्य दशापवित्रस्य विधानम् १९९

उद्गात्रा धारानुमन्त्रणं कर्तव्यम् २०१

षष्ठाध्याये सप्तमखण्डे—

प्रवृतहोमविधानम् २०२

अध्वर्युप्रमुखैर्बर्हिष्पवमानार्थं प्रसर्पणं कार्यम् २०३

प्रसर्पणसमये वाङ्नियमविधानम् २०४

अध्वर्वादीनां पञ्चर्त्विजां समारम्भणविधानम् ,,

तत्र प्रस्तोत्रादीनां विच्छेदे दोषस्तत्परिहारश्च २०५

प्रसर्पणसमयेऽध्वर्युणा प्रस्तरप्रहरणं कर्तव्यम् २०७

बर्हिष्पवमानस्य चात्वालसम्बन्धप्रदर्शनम् २१०

षष्ठाध्यायेऽष्टमखण्डे—

बर्हिष्पवमाने नवस्तोत्रीयाः, दशमो हिङ्कारश्च २१०

बर्हिष्पवमानस्तोत्रीयाणां दशसङ्ख्यासम्पत्तिप्रदर्शनम् २११

बर्हिष्पवमानप्रशंसा २११

बर्हिष्पवमानस्तोत्रीयास्समानदेवताकाः समानच्छन्दस्काश्च २१२

बर्हिष्पवमानस्योत्तमायां ऋचि रथन्तरवर्णां गायेत् २१४

षष्ठाध्याये नवमखण्डे—

स्तोत्रेषु काम्यप्रतिपद्विधानम् २१५

षष्ठाध्याये दशमखण्डे—

दीक्षितमरणे प्रतिपद्विशेषः २२२

अनृताभिशस्तस्य प्रतिपद्विशेषः २२३

द्वियजमानकप्रयोगे प्रतिपद्विशेषः २२४

विषयाः—	पृष्ठम्—
वैरिणोकामस्य प्रयोगे प्रतिपद्विधानम्	२२५
सप्तमाध्याये प्रथमखण्डे—	
बहिष्पवमाने गायत्रसाम्नः स्तुतिप्रकारः	२२६
गायत्रसामनि हिङ्कारस्यैव प्रतिहारस्थानीयत्वम्	२२७
गायत्रसामाऽनिरुक्तं गेयम्	२२९
गायत्रसाम्नो निधनानि	२३०
सप्तमाध्याये द्वितीयखण्डे—	
आज्यस्तोत्राणां देवताकल्पनम्	२३१
उक्तदेवतास्तुतिः	२३२
सप्तमाध्याये तृतीयखण्डे—	
माध्यन्दिनसवने माध्यन्दिनपवमानस्तुतिः	२३२
पृष्ठस्तोत्रे सामनिधनछन्दसां विधानम्	२३३
सप्तमाध्याये चतुर्थखण्डे—	
माध्यन्दिनपवमानगतबृहतीच्छन्दस्तुतिः	२३८
माध्यन्दिनसवनस्य त्रैष्टुभत्वप्राप्तिः	२४१
सप्तमाध्याये पञ्चमखण्डे—	
आमहीयवसाम्नस्स्तुतिः	२४२
रौरवयौधाजययौशनानां साम्नां स्तुतिः	२४२
सप्तमाध्याये षष्ठखण्डे—	
बृहद्रथन्तरयोः स्तुतिः	२४६
ज्योगामयाविने रथन्तरबृहतोर्विधानम्	२४९
सप्तमाध्याये सप्तमखण्डे—	
बृहद्रथन्तरयोः स्तुतिप्रकारः	२५०
बृहद्रथन्तरयोः प्रस्तावप्रतिहारभागप्रदर्शनम्	२५१
रथन्तरगाने नियमविशेषः	२५३

विषयाः—	पृष्ठम्—
सप्तमाध्याये अष्टमखण्डे—	
वामदेव्यसाम्नो निर्वचनम्, तस्य देवतासम्बन्धद्वारा स्तुतिश्च	२५५
वामदेव्यस्य योनिभूता ऋक् गायत्री	२५७
वैराजशाक्वररैवतानामुत्पत्तिप्रकारः	२५८
सप्तमाध्याये नवमखण्डे—	
वामदेव्यस्य गाननियमः	२६०
सप्तमाध्याये दशमखण्डे—	
रथन्तरपृष्ठे नौधससाम कार्यम्	२६३
नौधससाम्नो ब्रह्मवर्चसफलजनकत्वम्	२६५
बृहत्पृष्ठे श्यैतसाम कार्यम्	२६६
श्यैतस्य पशुफलार्थत्वम्	२६६
अष्टमाध्याये प्रथमखण्डे—	
अभिचारप्रयोगार्थं ब्रह्मसामविधानम्	२६७
अष्टमाध्याये द्वितीयखण्डे—	
प्रतिष्ठादिफलार्थत्वेन ब्रह्मसामविधानम्	२७१
अष्टमाध्याये तृतीयखण्डे—	
तृतीयसवने कालेयसाम्नो विधानम्, तन्निर्वचनञ्च	२७३
कालेयस्य सर्वपृष्ठकत्वेन प्रशंसा	२७४
अष्टमाध्याये चतुर्थखण्डे—	
तृतीयसवनस्याऽऽर्ष्टौ गायत्रीविधानम्	२७५
आर्भवपवमाने गायत्रसंहितादिसाम्नां विधानम्	२७७
अष्टमाध्याये पञ्चमखण्डे—	
सफपौष्कलयेरिछन्दोविधानम्	२७९
श्यावाश्वान्धीगवयोस्तुचविधानम्	२८०
श्यावाश्वस्य स्तोभप्रदर्शनम्	२८१
आन्धीगवस्य निधनप्रदर्शनम्	२८२
कावसाम्नो विधानम्	,,

विषयाः—	पृष्ठम्—
अष्टमाध्याये षष्ठखण्डे—	
यज्ञायज्ञीयसामविधानम्	२८३
यज्ञायज्ञीयस्य सर्वयज्ञात्मकत्वम्	२८४
यज्ञायज्ञीयसाम्नो गानप्रकारकथनम्	२८६
अष्टमाध्याये सप्तमखण्डे—	
यज्ञायज्ञीयसाम्नः प्रकारान्तरेण प्रशंसा	२८८
शिरः प्रावृत्य यज्ञायज्ञीयं साम गातव्यम्	२९०
अष्टमाध्यायेऽष्टमखण्डे—	
उक्थस्तोत्रीयाणामाग्नेयत्वम्	२९२
उक्थस्तोत्रीयाणां गायत्रीच्छन्दस्कत्वम्	२९३
उक्थस्तोत्रे साकमश्वं नाम साम कार्यम्	,,
उक्थस्तोत्रे सौभरं द्वितीयं साम कार्यम्	२९४
सौभरस्य निधनभेदेन फलभेदः	२९५
उक्थस्तोत्रे सौभरसामानन्तरं नार्मेधं साम कार्यम्	२९८
अष्टमाध्याये नवमखण्डे—	
हारिवर्णाख्यं साम उक्थस्तोत्रे कर्तव्यम्	२९९
उद्वंशीयाख्यं सामाऽच्छावाकसाम भवति	३००
उद्वंशीयाख्यसाम्नस्सर्वपृष्ठतेजोरूपत्वेन प्रशंसा	३०१
अष्टादंष्ट्राख्यं सामाऽच्छावाकसाम कर्तव्यम्	३०३
अष्टमाध्याये दशमखण्डे—	
कामनाभेदेन उक्थानां विधानम्	३०४
नवमाध्याये प्रथमखण्डे—	
अतिरात्रसंस्थायां रात्रिपर्यायाणां विधानम्	३०७

विषयाः—	पृष्ठम्—
रात्रिपर्यायाणां नानाप्रकारेण प्रशंसा	३०८
रात्रिपर्यायेषु वैतहव्यं साम कार्यम्	३०९
वैतहव्ये निधनविधानम्	३१०
सन्धिस्तोत्रस्य विधानम्	३१२
कामनाभेदेन वैकल्पिकसन्धिसाम्नां विधानम्	३१३
नवमाध्याये द्वितीयखण्डे—	
गौरीवितारव्यमैत्रावरुणसाम्नो विधानम्	३१५
काण्वाख्यं साम ब्राह्मणाच्छंसिना कार्यम्	३१६
नवमाध्याये तृतीयखण्डे—	
सत्रिणां साम्युत्थाने प्रायश्चित्तम्	३२०
प्रभातसमयात्पूर्वमाश्विनशस्त्रासमापने प्रायश्चित्तम्	३२१
आश्विनशस्त्रे ऋचां परिमितिः	३२२
विहितन्यूनसंस्तवे प्रायश्चित्तम्	३२३
नवमाध्याये चतुर्थखण्डे—	
प्रातरनुवाकोपाकरणस्य कालविधानम्	३२४
बर्हिष्पवमाने प्रतिपद्विधानम्	३२५
संसुतसोमे होमत्रयविधानम्	३२६
संसुतसोमे होतृशस्त्रविधानम्	३२८
नवमाध्याये पञ्चमखण्डे—	
सोमापहरणे प्रायश्चित्तम्	३३०
सोमप्रतिनिधयः	३३१
पूतीकानां सोमकार्यकरत्वम्	,,
पूतीकाभावे तत्प्रतिनिधिः	,,
अपहृतसोमप्रयोगे श्रवन्तीयादीनां साम्नां विधानम्	३३२
नवमाध्याये षष्ठखण्डे—	
द्रोणकलशस्य भेदने प्रायश्चित्तम्	३३३

विषयाः— पृष्ठम्—

नवमाध्याये सप्तमखण्डे—

प्रातःसवने सोमातिरेके प्रायश्चित्तम् ३३६
माध्यन्दिनसवने सोमातिरेके प्रायश्चित्तम् ३३८
तृतीयसवने सोमातिरेके प्रायश्चित्तम् ३३९

नवमाध्यायेऽष्टमखण्डे—

सत्रमध्ये दीक्षितानां मरणे कर्तव्यविधानम् ३४१
अत्रोद्वासनकृत्यविधानम् ३४२

नवमाध्याये नवमखण्डे—

द्रोणकलशस्थसोमक्षये प्रायश्चित्तम् ३४५
नाराशंसस्योपशोषणे प्रायश्चित्तम् ३४७
चमसमक्षणात्पूर्वमध्वर्युणा स्तोत्रोपाकरणे कृते प्रायश्चित्तम् ३४९
सोमाभिषवार्थप्राव्णां भेदने प्रायश्चित्तम् ३५०

नवमाध्याये दशमखण्डे—

प्रवर्ग्यपात्रस्य महावीरस्य भेदने प्रायश्चित्तम् ३५१
यज्ञमध्ये यूपस्य विरोहणे प्रायश्चित्तम् ३५२

दशमाध्याये दशमखण्डे—

स्यूतद्वादशाहगतत्रिवृत्स्तोमविधानम् ३५४
पञ्चदशसप्तदशस्तोमयोर्विधानम् ३५५
एकविंशत्रिणवस्तोमयोर्विधानम् ३५६
त्रयस्त्रिंशस्तोमविधानम् ३५७
चतुर्विंशादीनां छन्दोमानां विधानम् ,,

दशमाध्याये द्वितीयखण्डे—

द्वादशाहान्तर्गतदशरात्रसाधनीभूतानां त्रिवृदादिस्तोमानां गायत्र्यादिच्छन्दसाञ्च सृष्टिप्रकारः ३५९

दशमाध्याये तृतीयखण्डे—

द्वादशाहस्य ऋद्धिफलकत्वेन विधानम् ३६१

विषयाः— पृष्ठम्—

द्वादशाहगतदीक्षाणामपि समृद्धिहेतुत्वप्रतिपादनम् ३६२
द्वादशाहाधिकारिप्रतिपादनम् ३६३
द्वादशाहं बृहत्यात्मना तुष्टुवानस्य स्वाराज्यप्राप्तिः ३६४
दीक्षाणामवयुत्य प्रशंसा ३६५
द्वादशाहस्य विराड्रूपसम्पत्तिप्रतिपादनम् ३६६

दशमाध्याये चतुर्थखण्डे—

द्वादशाहगतातिरात्रयोर्विधानम् ३६७

दशमाध्याये पञ्चमखण्डे—

द्वादशाहान्तर्गतनवरात्रस्य विभज्य विधानम् ३७०
नवरात्रे गायत्र्यादिच्छन्दसां निरूपणम् ३७२
द्वादशाहस्य देवानां स्थानत्वेन स्तुतिः ३७५

दशमाध्याये षष्ठखण्डे—

द्वादशाहान्तर्गतपृष्ठ्यषडहे प्रथमदिनस्य तदीयस्तोमादेश्च विधानम् ३७७
पृष्ठ्यषडहे द्वितीयदिनस्य तदीयस्तोमादीनाञ्च स्वरूपवर्णनम् ३७८
तृतीयचतुर्थपञ्चमदिनानां तदीयस्तोमानाञ्च स्वरूपविवेचनम् ३७९
षष्ठदिनस्य तदीयस्तोमानाञ्च विधानम् ३८०

दशमाध्याये सप्तमाष्टमखण्डयोः—

पृष्ठ्यषडहस्याऽग्निशब्दविभक्तिप्रदर्शनपुरस्सरं स्तुतिः ३८१

दशमाध्याये नवमदशमैकादशेषु खण्डेषु

पृष्ठ्यषडहस्य सोमानिरूपणम् ३८४

एकादशाध्याये प्रथमखण्डे—

द्वादशाहान्तर्गतदशरात्रस्य प्रथमदिने बहिष्पवमानस्य स्तोमकल्पनिप्रदर्शनम् ३९३

विषयाः— पृष्ठम्—

एकादशाध्याये द्वितीयखण्डे—

तत्रैवाऽऽज्यस्तोत्राणां स्तोमकल्पनि-
प्रदर्शनम् ३९६

एकादशाध्याये तृतीयखण्डे—

तत्रैव माध्यन्दिनपवमानस्य स्तोत्रीया-
णां साम्नाञ्च प्रदर्शनम् ३९८

एकादशाध्याये चतुर्थखण्डे—

तत्रैव पृष्ठस्तोत्रस्य स्तोत्रीयाणां सा-
म्नाञ्च विधानम् ४०१

एकादशाध्याये पञ्चमखण्डे—

तत्रैवाऽऽर्भवपवमानस्य स्तोत्रीयाणां
साम्नाञ्च विधानम् ४०४

एकादशाध्याये षष्ठखण्डे—

दाशरात्रिकस्य द्वितीयदिने बहिष्प-
वमानस्य तृचविधानम् ४१२

एकादशाध्याये सप्तमखण्डे—

तत्रैवाऽऽज्यस्तोत्राणां विधानम् ४१४

एकादशाध्यायेऽष्टमखण्डे—

तत्रैव माध्यन्दिनपवमानस्य तृचप्र-
दर्शनम् ४१५

एकादशाध्याये नवमखण्डे—

तत्रैव होतुःपृष्ठस्य स्तोत्रीयविधानम् ४१९

एकादशाध्याये दशमखण्डे—

तत्रैवाऽऽर्भवपवमानस्य स्तोत्रीयाणां
साम्नाञ्च विधानम् ४२१

एकादशाध्याये एकादशखण्डे—

तत्रैवोक्थ्यस्तोत्राणां तत्साम्नाञ्च वि-
धानम् ४२६

द्वादशाध्याये प्रथमखण्डे—

दाशरात्रिकतृतीयदिने बहिष्पवमानस्य
स्तोभप्रदर्शनम् ४३०

विषयाः— पृष्ठम्—

द्वादशाध्याये द्वितीयखण्डे—

तत्रैवाऽऽज्यस्तोत्राणां तृचप्रदर्शनम् ४३२

द्वादशाध्याये तृतीयखण्डे—

तत्रैव माध्यन्दिनपवमानस्य स्तोत्रीया-
णां साम्नाञ्च प्रदर्शनम् ४३४

द्वादशाध्याये चतुर्थखण्डे—

तत्रैव पृष्ठस्तोत्रस्य स्तोत्रीयाणां सा-
म्नाञ्च विधानम् ४३९

द्वादशाध्याये पञ्चमखण्डे—

तत्रैवाऽऽर्भवपवमानस्य स्तोत्रीयादी-
नां विधानम् ४४५

द्वादशाध्याये षष्ठखण्डे—

तत्रैवोक्थ्यानां स्तोत्रीयविधानम् ४५२

द्वादशाध्याये सप्तमखण्डे—

दाशरात्रिकचतुर्थदिने बहिष्पवमानस्य
स्तोत्रीयविधानम् ४५५

द्वादशाध्यायेऽष्टमखण्डे—

तत्रैवाऽऽज्यस्तोत्राणां स्तोमस्तोत्रीया-
दीनां विधानम् ४५९

द्वादशाध्याये नवमखण्डे—

तत्रैव माध्यन्दिनपवमानस्य स्तोत्रीय-
प्रदर्शनम् ४६२

द्वादशाध्याये दशमखण्डे—

तत्रैव पृष्ठस्तोत्रस्य तृचप्रदर्शनम् ४६७

द्वादशाध्याये एकादशखण्डे—

तत्रैवाऽऽर्भवपवमानस्य तृचसाम्नां
प्रदर्शनम् ४७३

द्वादशाध्याये द्वादशखण्डे—

तत्रैवोक्थस्तोत्रस्य तृचप्रदर्शनम् ४८०

द्वादशाध्याये त्रयोदशखण्डे—

तत्रैव षोडशिस्तोत्रस्य स्तोत्रीयाणां
साम्नाञ्च विधानम् ४८३

ताण्डयमहाब्राह्मणगतविषयसूची समाप्ता ॥

ताण्ड्यमहाब्राह्मणप्रथमभागान्तर्गतवाक्यानां सूचीपत्रम् ॥

	पृष्ठम्—
अ	
अकूपाराङ्गिरसो	३१८
अक्षरं त्र्यक्षरं	३७४
अक्षरपाङ्क्तेषु ज्यैष्ठ्यकामाय	३०६
अग्न आयाहि वीतये	३९७
अग्न आयूंषि पवस इति प्रतिपत्	३४४
अग्न आयूंषि पवस इति प्रतिपदं	२२२
अग्न इति प्रथमस्य	३८१
अग्न इति षष्ठस्य	३८२
अग्नये हिरण्यं	३९
अग्निं दूतं वृणीमहे	४१९
अग्निं वो वृधन्तं	४८०
अग्निनाऽग्निस्समिध्यते	४३२
अग्निना पृथिव्यौषधिभिः	३४९
अग्निर्वा इदं	१४८
अग्निर्वा एतस्य	४४९
अग्निर्वै रूरः	२४४
अग्निर्वै रूरो रुद्रः	४४४
अग्निष्टोमा एव सर्वे	११८
अग्निष्टोमेन वै देवाः	३१६
अग्नीषोमाभ्यां	४०
अग्ने युङ्क्ष्वाहि	१०३
अग्ने विवस्वदुषसे	३२२
अग्नेस्तेजसेन्द्रस्य	१६
अग्नौ स्तोत्रमग्नौ शस्त्रं	१८३
अग्रं वेतर्हि	४७४
अग्रादग्रं रोहति	५२
अङ्गान्यङ्कू अभितः	३७
अङ्गिरसस्स्वर्गं···हरिवर्णः	३००
अङ्गिरसस्स्वर्गं···तिरश्च	४५५
अङ्गिरसां सङ्क्रोशः	४३९
अङ्गिरसो वै सत्रं	४५१
अच्छिन्नं पावयन्ति	२०१

	पृष्ठम्—
अजोऽस्येकपात्	२२
अतिच्छन्दस्सु	१४५
अतिजगतीषु स्तुवन्ति	४७२
अतिरिक्तं गौरीवितं	३१६
अतिरिक्तं वा	४०८
अति वा एषाऽन्यानि	१४५
अति विश्वानि दुरिता	१६७
अति श्रियो भ्रातृव्यं	४८३
अथ वा एता एकपदाः	४८९
अथ वायुरौशनं	२४५
अथर्वाणो वा एतत्	२७२
अथेन्द्रो यौधाजयं	२४५
अथैतच्छ्यैतम्	२६६
अथैतदान्धीगवं	२८२
अथैतन्नामेंधम्	२९८
अथो खल्वाहुः कथं	१९९
अथो खल्वाहुः पवस्व	१०२
अथो खल्वाहुरग्निष्टोमं	१००
अथो खल्वाहुरन्तर्हितं	३४६
अथो खल्वाहुरतिशयं	१४३
अथो खल्वाहुरिन्द्र	१२६
अथो खल्वाहुरुत्तरतः	१४१
अथो खल्वाहुरुक्थ्यमेव	१०१
अथो खल्वाहुरेकत्रिकं	१७२
अथो खल्वाहुर्दुष्प्रापः	३२९
अथो खल्वाहुर्यज्ञायज्ञीयमेव	१०३
अथो खल्वाहुस्सवनमुखे	३२५
अथो गवामेवाऽनुरूपाः	१३६
अथो तदुभयं	१९७
अथो रेत एव	२९१
अथो शमयन्त्येव	१२०
अथो श्वस्तनं	१३५
अथोऽआ श्वः श्वः	१२६

	पृष्ठम्—		पृष्ठम्—
अधरोत्तरमपावगतः	९८	अन्नमकरमन्नं	१७
अधिपतिरसि	४७	अन्नं वा अर्कः	१४०
अधिपतिस्समानानां	१८२	अन्नं विराट्	३०६
अधोऽधोऽक्षं	१९४	अन्नं वै देवाः	४७३
अध्वर्युः प्रस्तरं हरति	२०७	अन्नं वै सप्तदशः	६३
अध्वर्युश्शिरसा	१९८	अन्नस्याऽन्नपतिः	४०
अध्वनामध्वपते	१९	अन्नाद्यं वाव	४१८
अनड्वाहौ वा	४४२	अन्वाऽसि रात्र्यै त्वा	४९
अनतिवाद्येनं	३९९	अन्वितिरसि	४४
अनभिजिता वै	१९६	अपः पश्चात्	२९१
अनवपादायाऽनतिपादाय	११९	अपक्रान्तौ वा एतस्य	२२१
अनवर्त्तिः पशुतः	२६२	अपघ्नन् पवते	२२३
अनायतनं वै	१४४	अपच्छिदिव वै	४२६
अनिधनमन्ततः	२३७	अपभ्रंश इव वै	४६७
अनिरुक्तज्ञेयं	२६२	अपरिभ्रिते स्तुवन्ति	२१२
अनिरुक्तज्ञेयमेतत्	२२९	अपरुद्ध यज्ञ इव	४९२
अनुतुन्नं गायति तथा	४६४	अपशव्येव तु वा	७६
अनुतुन्नं गायति रेतोधेयाय	४७०	अपशुचं हते	४५४
अनुतोदो वैराजस्य	३०२	अपानेन पश्चात्	१४९
अनुरूप एनं	४१३, ४५८	अपां पुष्पमसि	३३
अनुष्टुच्च वै सप्तदशश्च	३६९	अपि वा एतस्य यज्ञे	३४२
अनुष्टुच्छन्दसः	११४	अपूता इव वा एते	२२२
अनुष्टुप्सु षोडशिना	४८७	अप्रतिवाद्येनं	३८२
अनुष्टुभं वै	३७३	अप्सु धौतस्य ते	३४
अनुष्टुभमुत्तमां	२८९	अबलिष्ठ इव वै	२३६
अनुष्टुभस्सत्यः	४२१	अभिक्रान्तापक्रान्तानि	१६६
अनुष्टुभि छन्दसां	४०९	अभिक्रामन्ती विष्टुतिः	६१, ६२
अन्तरिक्षदेवत्यं	४३८	अभिगरापगरौ	१९९
अन्तरिक्षदेवत्यः	४३१	अभिजिदसि	४७
अन्तरिक्षं भवति	४३८	अभिजुहोति शान्त्यै	४७१
अन्तरिक्षं वै वामदेव्यं	२६०	अभि त्वा वृषभा	३१८
अन्तो वा अष्टाचत्वारिंशः	८८	अभि त्वा शूर	४०१
अन्तो वा अष्टाचत्वारिंशो यथा	९०	अभि प्र वस्सुराधसं	४१९
अन्तो वै तृतीयं	४४६	अभिप्रियाणि पवते	२८२
अन्तो वै त्रयस्त्रिंशः	८०	अभि सोमासः	४३९
अन्तो वै त्रयस्त्रिंशो यथा	८१	अभीति रथन्तरस्य	४३९
अन्धस्वती भवति	४३९	अभीवर्तं भ्रातृव्यवते	२७२
अन्नं करिष्याम्यन्नं	१७	अभीवर्तेन वै	१०४

	पृष्ठम्—
अभीवर्तेन वै देवाः	२७२
अभीवर्तो ब्रह्मसाम	१०४
अभ्यतृणत्पवित्रं	२००
अभ्यभ्येवाऽस्य	४४९
अमुं वा एष लोकं	३४१
अमुष्मै वा एतल्लोकाय	२१३
अयं त इन्द्र सोम	३१६
अयं पूषा रयिः	४२१
अयं वां मित्रावरुणा	४५९
अयं वै लोको मध्यमः	२६०
अयं हविष्मान्	४२२
अयास्यो वै	४१७
अरिष्टं भवति	४६०
अरतिं पृथिव्या इति	१२२
अरावाणो वै	२२३
अर्कवतीषु	१४०
अर्धमास एव पञ्चदशस्य	३९९
अर्धेडया वै देवाः	३०२
अर्धेडया वै पूर्वे	३०२
अर्धेडा शक्वरीणां	३०२
अर्बुदस्सर्पः	१३२, ३४३
अवभृथादुदेत्य	३३३
अवमैस्त ऊवः	२६
अवर्धन्त ह्येतर्हि	४८०
अवषट्कृतो वा एतस्य	३३४
अश्वः कृष्ण उपतिष्ठति	४९०
अश्ववद्भवति	४४३
अश्वोऽस्यश्योऽसि	३६
अश्वो वै भूत्वा	३९९
अष्टादंष्ट्रो वैरूपः	३०३
अष्टाभिर्वा अक्षरैः	३७३
अष्टाभ्यो हिङ्करोति	८४
अष्टाक्षरा गायत्री	१८६
अष्टौ वा एताः	४०६
अष्ठीवतोपस्पृशता	२०९
असम्मितं स्तोत्रं	३४४
असंहार्यं भ्रातृव्यं	३१२
असावि सोम	४८८
असिति वै राथन्तरं	४३८
असुरा वा एषु ऊर्ध्वसद्म०	३१७
असुरा वा एषु हरिश्रियं	२९९
असुरा वै देवान्	२४९
असुरेषु वै सर्वो यज्ञः	२८४
असुर्यं वा एतस्मात्	३९२
अस्तीव वा अयं लोकः	८६
अस्तोमा वा एते	८९
अस्मै वा एतल्लोकाय	२१४
अस्या अमुष्याः	३२९
अहर्वा एतदग्लीयत	४३६
अहर्वा एतदग्लीयमानं	४३७
अहर्वै पान्तमन्धः	३०९
अहिरसि बुध्न्यः	२१

आ

आक्रमोऽस्याक्रमाय	४८
आक्षारं भवति	४०६
आज्यानां प्रथमा	८७
आज्येनाऽभिजुहोति	४७१
आतमितोणिधनं	१९१, ४७८
आतोषादीयं भवति	४७७
आ तृतीयाया स्संख्यापयन्ति	२९२
आत्मदक्षिणं वा	१३९
आत्मन्येव तदङ्गानि	१९९
आत्मा वा एष संवत्सरस्य	१२४
आत्मा वै यज्ञस्य	२३३
आ त्वेता निषीदत	३१९
आथर्वणं लोककामाय	२७२
आदित्य एवैकविंशस्य	३९६
आदित्यानां पत्माऽग्विहि	३६
आदिर्बृहत ऊर्ध्वं	३०१
आनुजावरस्स्तुवीत	६७
आनो मित्रावरुणेति	२२२
आप्नीगर्वं भवति	४७८
आपो वा ऋत्व्यं	२९९
आपो वै रेवत्यः	२६२
आप्ते त्रिरात्रे	४९६
आप्यायस्व समेतु	२९

	पृष्ठम्—
आभीशवं भवति	४६१
आमहीयवं भवति	४२७
आयतनवान् बन्धुमान् ३९४, ३९५, ३९६, ३९७, ३९८.	
आयास्ये भवतः	४१७
आया हि सोम पीतये	१२०
आयुर्णवस्तोभाभ्यां	१९२
आयुर्मे प्राणो मनसि	२९
आयुर्वा आतीषादीयं	४७७
आयुषातिमतिजीवति	१९१
आयुषे मे पवस्व	२०१
आरण्येभ्यो वा एतत्	२१२
आर्त्तं वा एते	१६९
आ वा एते संवत्सरं	१७१
आश्वं भवति	३९९
आश्विनं होता	३१३
न्द्रीमारुह्य	१९३
णिधनं···प्रतिष्ठा	२७१
णेधनं···भवति	४३८
णेधनं ···वषट्कार०	२६७
ं भवति	४६४
दंष्ट्रे ऋद्धिकामाय	३०३
ष्टादंष्ट्रे भवतः	४२८
आसन्नापात्रं	१२३
आ सोता परिषिञ्चत	४४६
आहवनीये प्रहरन्ति	४७१
इ	
इडाभिरेडं	४७३
इडां पशुकामाय	२३०
इतो वा इमे लोकाः	२६४
इतो वै प्रातरूर्ध्वानि	२८८
इदमहममुं यजमानं	१३
इदं वसो सुतमन्ध इति	३१८
इदं ह्यन्वोजसा	३१८
इन्दविन्द्रपीतस्य···अनुष्टुप्०	२८, ३१
इन्दविन्द्रपीतस्य···गायत्र०	२३
इन्दुरिन्दुमवागात्	३४८
इन्द्र ऋतुं न आभर	१२४

	पृष्ठम्—
इन्द्रमच्छ सुता इमे	४२१
इन्द्रः प्रजापतिं	४८४
इन्द्रं गोभिर्हवामहे	४०२
इन्द्रं वा अक्ष्यामथिनं	४५०
इन्द्रं विश्वा	४२६
इन्द्रं सर्वाणि	१५२
इन्द्रश्च बृहच्च	४८३
इन्द्रश्च वै नमुचिश्च	४५३
इन्द्र सुतेषु	३१९
इन्द्रस्तृतीयसवनात्···दयावाश्व०	२८१
इन्द्रस्तृतीयसवनात्···स्वादिष्टया	२७७
इन्द्राग्नीपूर्व्यस्तुतिः	४६०
इन्द्राय मद्वने	३१६
इन्द्रेण संहि दृक्षुसे	४३३
इन्द्रेति प्रथमस्य	३८३
इन्द्रो दधीचः	४६०
इन्द्रो यतीन्	२६८
इन्द्रो वृत्रममहन्	३३१
इन्द्रो वृत्राद्बिभ्यत्	४५०
इन्द्रो वै युधाजित्	२४९
इममिन्द्र सुतं	४८१
इमं वाव देवा लोकं द्रव०	३८९
इमं वाव देवा लोकं पद०	३८९
इमे वै लोका अतिछन्दाः	१३२
इमे वै लोका गायत्रं	२२६
इमे वै लोकाङ्गिरवः	१८१
इमे वै लोका एतानि	२३४
इमे वै लोकास्सह	२७०
इमौ लोकौ सह वै	२६३
इयं वामस्य मन्मन इति	४६०
इयं वै रथन्तरं	४०३
इयं वै रथन्तरमस्यामेव	३१३
इयं वै सार्पराज्ञी	१३२
इलान्दमग्निष्टोमसाम	१४६
इष ऊर्जा आयुषे	१०
इष्टयजुषस्ते देव	३१
ई	
ईनिधनं तथा	४८०
ईश्वरं वै रथन्तरं	२५४

	पृष्ठम्—
उ	
उत्तमानि पदानि	३११
उदङासीन उद्गायति	१९०
उद्गात्रा पत्नीस्संख्यापयन्ति	२९१
उद्गात्रिवदिरवत्	३५९
उद्वद्वा एतत्	४३४
उप नो हरिभिः	४८४
उप वा अन्नमन्नमेव	२१९
उप वै प्रजातां जातं	२१६
उपाकृतेऽहिङ्कृते	४७०
उपाऽस्मै गायता नरः	२१९
उपैनं पशवः	२६०
उपैनमुत्तरो यज्ञो नमति	३०३
उपोषु जातमप्तुरं	२१६
उभयतस्स्तोत्रं	४३८
उभाभ्यां बृहत्	२६९
उभाभ्यां वैरूपाभ्यां	४१४
उशना वै काव्यः	२४६
उक्षिगसि वसुभ्यः	४९
उष्णिककुभौ	२७९
उष्णिककुभ्यां वै	२७९
ऊ	
ऊनातिरिक्तौ	१२७
ऊर्गस्यूर्जं मयि	३४
ऊर्गस्यूर्जोदाः	१८९
ऊर्ध्वस्सप्त ऋषीन्	२४
ऊर्ध्वसप्तनमपि	३१७
ऊर्ध्वेडं तथा हि	४२०
ऋ	
ऋतधामाऽसि	२१
ऋतपात्रमसि	११
ऋतस्य त्वा देव	३२
ऋतस्य द्वारौ स्थः	२३
ऋतस्य सदने सीदामि	११
ऋतुभिश्च वै	४४१
ऋक्थस्य सामना	१५२
ऋषेर्वा एतत्	३०४
ए	
एकं वा अन्येन	४६४
एकविंश एव	४९८, ४९३
एकविंशं पुच्छं भवति	१४२
एकविंशायतनो वा	४८५
एकविंशो भवति	११९
एकविंशो वै स्तोमानां	१४२
एकस्मा अन्यो यज्ञः	१८२
एकस्यां स्तोत्रीयार्यां	१९४
एकां गायत्रीमेकामुपेयुः	१०९
एकादशभ्यो हिङ्करोति	८०
एकादशभ्यः···स सप्तभिः	७९
एकादशेन च वै	१७५
एकाष्टकायां	१६८
एकाक्षरनिधनः	१०४
एकाक्षरं निधनं	३९९
एकाक्षरं वै देवानां	४९१
एको दीक्षेतैकः	३६३
एत इति वै···पितृंस्तदेव	४३१
एत इति वै पितृंस्तिरः०	२१८
एत इति सर्वानेव	२१७
एतदन्यत्कुर्युरभिषुत्या	३४२
एतदन्यत्कुर्युरुक्थानि	३४०
एतद्वै यज्ञस्य ध्रुवस्तनं	१६३
एतद्वै यज्ञस्य स्वर्ग्यं	२३८
एतद्वै साक्षादन्नं	१४६
एतद्वै साक्षादन्नं यद्राजनं	१४४
एतद्धस्म वा आह	६१,७०,७२,७९,८१.
एतया वै देवा असुरान्	६२
एतस्माद्वा एतानि	२५९
एतस्मिन्वै वैराजं	४७९
एतामिर्वा इन्द्रो वृत्रं	४८९
एतामेव पुरोधाकामाय	७५
एतामेव प्रजाकामाय	६८
एतामेव बहुभ्यः	६७
एतामेव बहुभ्यो यजमानेभ्यः	६६
एतामेवाऽऽनुजावराय	६६

	पृष्ठम्—
एतामेवाऽपरुद्धराजन्याय	६८
एतामेवाऽभिषर्यमाणाय	६९
एतामेवाऽभिशस्यमानाय	७६
एतावद्वाव संवत्सरः	३६६
एतावता वाव	२३२
एतावन्ति वाव	२३३
एति प्रेत्याशुमत्	३७७
एते असुप्रमिन्दव इत्यनुरूपः	४३१
एते असुप्रमिन्दव इति बहुभ्यः	२१७
एतेन वा अङ्गिरसः	४३९
एतेन वै कण्वः	३१६
एतेन वै यमः	४२५
एतेन वै यमी	४२६
एतेन वै वसिष्ठः	४८२
एतेन ह्याग्रे	४२७
एते वा एषां लोकानां	२०२
एते वै गायत्रस्य	२३०
एते वै छन्दसी वीर्यं	११०
एतैर्वा एतानि सह	२५९
एभ्यो वै लोकेभ्यः	४१८
एभ्यो वै लोकेभ्यो आतृव्यं	२७३
एभ्यो वै लोकेभ्यो रसः	४०७
एवमेव आतृव्यात्	४९२
एवं वै विद्वांसमाहुः	३६१
एवा ह्यसि	४२६
एष एव व्यूढ उभयः	६७
एष एव व्यूढस्सप्त	६४
एष वाव यज्ञो यत्	१८२
एष वै यजमानस्य	२६६
एष वै विशालं	४८६
एष वै साम्नां रसः	२१२
एष वै स्तोमस्य	२११
एष वै सोमस्योद्गीथः	२०१
एष हि बहूनां	३३४
एष ह्येव पृष्टैः	३०१
एषा वा अग्निष्टोमस्य	३१२
एषा वै प्रतिष्ठिता	८५
एषा वै प्रतिष्ठिता त्रिवृतः	५४
एषा वै प्रतिष्ठिता सप्तदशस्य	६४
एषा वै प्रतिष्ठितैकविंशस्य	७२
एषा वै शिशुमारी	२८५
एषा वै संवत्सरस्य पत्नी	१६८
एषु लोकेषु प्रतितिष्ठति	१८१
एह्यूषु ब्रवाणि	४२६
ऐ	
ऐडेन बृहत्	२३५
ऐन्द्रं सहोऽसर्जि	३०
ऐन्द्रावैष्णवं होता	३३७
ऐरं कृत्वोद्गेयं	२८५
ऐरं वै बृहत्	२६०
ऐयाह इति वा	४२८
ओ	
ओको निधनं	१६७
ओको वै देवानां	३७५
ओज एवैताभ्यां	४२९
ओजसा वा एतत्	२२५
ओजस्येव तत	४१४
ओजोऽसि	४६
औ	
औदुम्बरी भवति	१५३
और्णायवं भवति	४७५
औशनं यत्	४००
क	
क इदं कस्मा अदात	४२
ककुप्प्रथमाऽथोष्णिक्	२९८
कण्वो वा एतत	२७१
कथमिव यज्ञायज्ञीयं	२८९
कथमिव वामदेव्यं	२६१
कया नश्चित्र आभुवत्	४०१
करोति बाहुभ्यां	१७८
करोति मुखेन	१७८
करोति वाचा वीर्यं	२०२
कल्पतेऽस्मै यः	३७६
कवतीभ्यो ह्येति	२६३
कविं सम्राजमतिथिं	१२३
कव्योऽसि कव्यवाहनः	२२

	पृष्ठम्—
कामकामं म आवर्तय	३४
कामदुघा एनं	२४६
कामसनि साम	४९०
कालेयं भवति	४०३
कालेयं पुरास्ताद्भवति	२७८
कावं भवति	४११
किं ज्योतिष्टोमस्य	१८३
कुत्सश्च लुशश्चेन्द्रं	३१९
कुले कुलेऽन्नं	१६१
कूर्चानितरेऽध्यासते	१९९
कृधी नो यशसो जनः	२२४
कृशानो सव्यान्	३८
क्लृप्तानिमान् लोकान्	१६४
क्रौञ्चं भवति	४२४
ग	
गच्छन्निन्द्रस्य	२२३
गर्भिणी विष्टुतिः	६२
गातुविद्वा एतत्साम	२९८
गायत्रं निधनवत्	२३३
गायत्रं पुरस्तात्	२३८
गायत्रं भवति ३९८, ४०९, ४१६, ४२२, ४३६, ४४७, ४६३, ४७५	
गायत्रो वा एतां	३६८
गायत्रीषु पशुकामाय	३०६
गायत्रीषु पुरुषकामाय	३०६
गायत्रीषु ब्रह्मवर्चस०	३०४
गायत्रीषु स्तुवन्ति	४६६
गायत्री सोममाहरत्	३३१
गायत्रेण स्तुत्वा	२३४
गायत्र्यस्सत्यः	४६३
गायन्ति त्वा गायत्रिणः	३०१
गावो वा एतत्सत्रं	९१
गिर्दैष ते रथः	३८
गिरिक्षिदौचामन्यव	३७३
गृहपतिरौदुम्बरी	१३४
गृहा वै देवानां	३७६
गौतमं भवति	४१०, ४३७
गौरिति निधनं	१३२
गौरीवितं भवति	४०८, ४८९
गौरीवितं भवति यदेव	४२४, ४४९
गौरीवितं ह्यावाश्वं	१६६
गौरीवितिर्वा एतत्	४८८, ४८६
गौश्चाऽऽयुश्च	१२७
ग्नास्त्वाऽकृन्तन्	४१
ग्राम्येभ्यो वा···नामारूपैः	२१३
ग्राम्येभ्यो वा···पुनरभ्यावर्तं	३३२
ग्राव्णस्संसाद्य	१९७
च	
चक्षुर्वा एतत्संवत्सरस्य	१७०
चक्षुषी अतिरात्रौ	३६७
चतसृभिर्विहिलैका	८४
चतुरस्स्तोमान्	६९
चतुरहे पुरस्तात्	१७०
चतुरक्षरणिधनं	१९१
चतुरक्षरेण बृहतः	२९१
चतुरुत्तरैरेव	१०९
चतुर्णिधनं	४६९
चतुर्दशभ्यो हिङ्करोति	८६
चतुर्विंशत्यक्षरा गायत्री	९९
चतुर्विंशं भवति	९८
चतुर्विंशं भवति···अन्नं	१३८
चतुर्विंशं भवति···साक्षादेव	९९
चतुष्पदा ऽनुष्टुभा	४६३
चतुष्टोमो भवति	१८६
चतुस्त्रिंशदक्षराः	४९०
चतुस्त्रिंशा भवन्ति	११९
चतुर्होतारं होता	१३४
चत्वारि सन्ति	२३१
चात्वालमवेक्ष्य	२१०
चित्रवच्छंसुमत्	३७९
चित्रापूर्णमासे	१७०
च्यवन्ते वा एते···पराचीभिः	२१४
च्यवन्ते वा एते···स्वर्णिधनं	१६१
छ	
छन्दसां वा अभ्यवलुप्तं	१८९
छन्दांसि वा अभिभूतयः	३२६

	पृष्ठम्—
छन्दांसि वा अन्योन्यस्य	३७६
छन्दांसि वै सोमं	२१९
छन्दांस्येव छन्दोमानां	३६७
छन्दांस्येवाऽस्याः	३७४
छन्दोभिरारोहति	१६४
छन्दोभिरुपावरोहति	१६४
छन्दोभिर्यज्ञं	२८६
छन्दोभिर्वै	४६८
छिद्रो वा एतेषां संवत्सरः	१७३
ज	
जगतो प्रतिपन्नवति	४९६
जनद्वद्वा एतत्	४९७, ४९९
जनस्य गोपाः	४९९
जनुषैकचौं भवतः	४०८
जमदग्नेश्च वा ऋषीणां	३२८
जामि वा एतद्यज्ञे	२९४
जामि वा एतत्···ग्निः	३६९
जायते वाव दीक्षया	३६६
जीवा ज्योतिरशीमहि	१२५
ज्यायोऽभ्यारम्भं	४७८
ज्येष्ठब्राह्मणं वा	२४८
ज्येष्ठयज्ञो वा एषः	१८४
ज्येष्ठो ज्यैष्ठिनेयः	५२
ज्यैष्ठ्यं वा अनुष्टुप्	३०७
ज्योतिष्मानस्य	४९३
ज्योतिष्मान्ब्रह्मवर्चसी	४७१
ज्योतिस्समानानां भवति	१८४, ३६९
त	
त उत्तमं पर्यायं	३११
तञ्चौजो बलं	३६६
तत एनयोर्मिथने	२६३
तं पत्न्योऽपघाटिलाभिः	१६०
तं पुनरुपाधावत्	४८४
तं प्रोहेद्वानस्पत्योऽसि	१९१
तं ब्रूयाद्वेपमानः	२०१
तं वो दस्ममृतीषहं	४०१
ततः पशुपुरोडाशेन	१७४
ततो बृहदनु प्राजायत	२४७
तत्र तद्यात्	३३३
तत्राऽपि त्रिणिधनं	२३९
तत्त्रिष्टुब्जगतीषु	१२३
तत्परिगृह्णन्तावब्रूतां	२९६
तदाहुः कर्त्तप्रस्कन्द इव	११६
तदाहुः को स्वस्तुमर्हति	३६८
तदाहुः पयोऽवनयेदिति	३४६
तदाहुरनवक्लृप्तानि	११०
तदाहुरपृष्ठं वै	१४४
तदाहुरीर्म इव वै	१००
तदाहुरुत्सृज्या	१७२
तदाहुरुदरं वा एषः	११६
तदाहुर्नं वा आर्त्या	३३४
तदाहुर्मध्यः	१३७
तदाहुर्यत्समौ	१४१
तदाहुर्विवीवधमिव	११७
तदाहुस्समौ कार्यौ	१४१
तदाहुस्संशर इव	१०९
तदु समानं	४२८
तदू सीदन्ति	४२३
तदूदेवा यशो व्यभजन्त	२४४
तद्य एवं वेदाऽधेंडया	३०२
तद्य एवं वेद···इमान्	३००
तद्य एवं वेद···स्वे आयतने	३१७
तद्यथाऽदः पूर्वेद्युः	४१०
तद्यद्येवं कुर्युरेकैकया	१५८
तद्वाऽऽहुयन्मध्यतः	१३७
तद्वै स पशुवीर्यं	२४४
तद्वै स प्राणवीर्यं	२४६
तन्तुरसि प्रजाभ्यः	४६
तन्ते मदक्रणीमसि	४५२
तन्म्रं वा एतत्	३७२
तम इव वा एते	३१०
तमु नाक इत्याहुः	३५७
तमु पुष्टिरित्याहुः	३५६
तमु प्रजापतिरित्याहुः	३५६

	पृष्ठम्—
तमु प्रतिष्टेत्याहुः	३९४
तमुल्लिखेत्प्राणाय	१६२
तरणिरित्सिषासति	४४०
तया पवस्व धारया	२२६
तयोरयममुष्मै	२६३
तयोरस्समानं निधनं	२४८
तवाऽहं सोम रारण	४६२
तस्माच्छिरोऽङ्गानि	१३९
तस्माच्छुक्लं पवित्रं	१९९
तस्माज्जातं पुत्रं	४७०
तस्माद्यो विराजं	३९९
तस्मात्तेषान्नाशैतव्या	२७०
तस्मात्पृष्ठानां	२९९
तस्मात्प्रजा दशमासः	१७६
तस्मात्प्रायणीयस्याऽङ्गः	९८
तस्मात्साकमश्वेन	२९३
तस्मादाग्नेयीषु	२९२
तस्मादाग्नेयं	२००
तस्मादाहुर्गायत्री	२७७
तस्मादु गायत्रीषु	२९३
तस्मादेकाष्टकायां	१६९
तस्मादेतासु कार्यं	१४७
तस्माद्धरितीषु	४८९
तस्मादूब्राह्मणो वारणेन	१४८
तस्माद्यत्रैषा यातयामा	१८९
तस्माद्यः पुरा	४०७
तस्माद्वदक्षिणीया	१७६
तस्माद्वरणो भिषज्यः	१४८
तस्माद्वा एतेन	२८४
तस्मान्न्यञ्चोऽन्ये	१८२
तस्मै जाताय	४७१
तस्य त इन्दविन्द्रपीतस्य	३४९
तस्य पराचीनातिपादात्	११५
तस्य प्राची दिक्	१४३
तस्य यत्सप्तदशमहः	११६
तस्य वसिष्ठो महिम्नः	२९९
तस्य सानिर्या यत्सम्मेघे	१७०
तस्य सानिर्या यदपः	१६८

	पृष्ठम्—
तस्यै जुहुयाद्वेकुरानामाऽसि	२०३
ता अब्रुवन्सभृतन्नः	२९६
ता अस्मात्सृष्टाः	२४२
ता ऋचोऽनुब्रुवन्तः	३४३
तानाश्विनेनाऽसंहाय्यं	३१२
तानाहुरुक्थाः	११७
तानु पुष्टिरित्याहुः	३६८
तान्त्रिष्टुप्त्रिभिः	२७७
तान्सन्धिनाऽभिपलायन्त	३११
तान्समन्तं पर्यायं	३०८
तामन्वारभत आयोष्टा	१८७
तामुच्छ्रयति श्रुतानः	१८७
तामेताङ्कुरद्विष उपासते	७३,८३
तामेतां त्रिखर्वा	६९
तामेतां प्रावाहण्यः	७९
तामेतां भाल्लवयः	५६
तामेतामभिप्रतारिणः	६७
तावत्यस्संवत्सरस्य	३२२
तां वनस्पतयः	१९४
तां वा एतां प्रतीचीं	३७४
तां वा एतामन्नाद्याय	३६९
ता वा एताश्चतस्रः	३९०
तावाहुस्समौ कार्यौ	१४१
तासाम्त्वेवाऽब्रुवन्नासामहै	९२
तासां परिगृहीतानां	१७६
तासु देवासुराः	४०७
तासु वैतहव्यं	३०९
तासु श्यावाश्वं	२८१
तासु सफं	२८०
तासु संहितं	२७८
ता हुवे ययोरिदमिति	४३४
तिष्ठन्तेऽस्म समानाः	१८४, २४३
तिसृभिरुद्गाता	१९८
तिसृभिस्तुवन्ति त्रयः	१३३
तिसृभ्यो हिङ्करोति···उद्यती	५२
तिसृभ्यो हिङ्करोति···कुलायिनी	५६
तिसृभ्यो हिङ्करोति...पञ्चदशस्य	६१
तिसृभ्यो हिङ्करोति···परिवर्त्तिनी	५४

	पृष्ठम्—
तिसृभ्यो हिङ्करोति···सप्तदशस्य	७०
तिस्र उष्णिहस्स्युः	१०९
तिस्रो वाच ईरयति	४३५
तिस्रो वाच उदीरते	४४५
तुथोऽसि जनधायः	१९
तुथोऽसि विश्ववेदाः	२०
तुरश्चवसश्च वै	३२७
तृच उत्तमो भवति	४१३,४५८
तृतीयसवनं वा एषः	३३८
तेऽग्निं मुखं कृत्वा	२९३
तेजसा वा एते	३७२
तेजसा वै गायत्री	३७१
तेजो ब्रह्मवर्चसं	३०४
ते त्रिष्टुब्जगत्यौ	२७६
ते देवा असुराणां	४९२
तेन मासान्संवसरं	९७
ते मध्यमं पर्यायं	३१०
तेषां पूर्वपक्षे	१७१
तेषामाश्विनौ	३१४
तेषामेकाष्टकायां	१७०
तेष्वाशेषु छन्दसी	१०८
तैरश्च्यं भवति	४५५
तौरश्रवसे कार्यं	३२७
त्रयः पुरस्तात्	११४
त्रयस्त्रिंशता प्रगाथैः	११२
त्रयस्त्रिंशदक्षरा	४८८
त्रयस्त्रिंशदक्षरासु	१३१
त्रयस्त्रिंशादेव	११७
त्रयोदशभ्यो हिङ्करोति	८२
त्रयो वा एते त्रिरात्राः	३७०
त्रिंशत्कृत्वो विष्टभ्नोति	४६९
त्रिंशदक्षरा वा एषा विराट्	३६६
त्रिणिधनं भवति	३१०
त्रिणिधनं भवति त्रीणि	२३६
त्रिणिधनं भवत्येतेन	२३७
त्रिभिश्च छन्दोभिः	२३२
त्रिवीर्यं वा एतत्	२६९
त्रिवृच्च त्रिणवश्च	३६०
त्रिवृच्छिरो भवति	१३९
त्रिवृता प्रैति त्रिवृता	८२
त्रिवृदसि त्रिवृते	४८
त्रिवृदेव त्रिणवस्य	३५६
त्रिवृदेव स्तोमः	३९६, ४१२
त्रिवृद्ध्येव शिरः	१३९
त्रिवृद्वै गायत्र्याः	३७१
त्रिष्टुभस्सत्यः···जगतीनां	४७४
त्रिष्टुभस्सत्यः···जागतं	४३६
त्रिष्पुरस्ताद्रथन्तरं	३६९
त्रिष्वेवोपरिष्टात्	३८०
त्रोडं भवति	४५१
त्रीण्युक्थानि	३१२
त्रीन्प्रथमायां	२५२
त्रीन्स्तोमान्	६०
त्रैककुभं पशुकामाय	२६८
त्रैशोकं ज्योगामयाविने	२६९
त्रैशोकं ब्रह्मसाम	४७२
त्वं ह्यङ्ग दैव्येति	४७३
त्वया वयं प्रवतः	१२५
त्वामिद्धि हवामहे	४१९
त्वामिदाह्वो नरः	४१९
त्वाष्ट्रं पशुं बहुरूपं	३९३
त्वाष्ट्रीसाम भवति	४४९

द

दक्षिण ऊरावुद्गातुः	४७०
दक्षिणतो बृहत्कार्यं	१४१
दक्षिणतो रथन्तरं	१४२
दक्षिणानूरूनभिषिञ्चन्ति	२९१
दधिक्राव्णो अकारिषं	३५
दध्यङ्ह्वा अङ्गिरसः	४६०
दविद्युततो वै	४३०
दविद्युतत्या रुचेति	४३०
दविद्युतत्या रुचेति वै	२२१
दविद्युतत्या रुचेति व्रताय	२२०
दशकृत्वो विष्टभ्नोति	४६९

	पृष्ठम्—
दशभिर्विहिता सित्तः	९०
दशस्तोमं भवति	१२२
दशाक्षरं मध्यतः	२८२
दासानो दक्षिणानवगृहाण	३८
दिग्वद्भवति	४४२
दिवाकीर्त्यसामा भवति	१२०
दिवेति निधनं ···पाप्मनः	४७२
दिवेति निधनं···व्युष्टिः	२७०
दिश इति निधनं	४३६, ४४४
दिशं विशमिति	४४२
दिशां वा एतत्	४४१
दीक्षायै वर्णेन	२६
दुग्ध इव एष रिरिचानः	३३९
दुग्धानीव वै तर्हि	१३९
देवकृतस्यैनसः	३३
देवक्षेत्रं वै	१६४
देवता एव त्रयस्त्रिंशस्य	३९७
देवता वाव त्रयस्त्रिंशः	१८१
देवपात्री भवति	१९३
देवरथो वै रथन्तरं	२९३
देवलोको वा एषः	११८
देवस्य त्वा	३९
देवां अनुप्रभूषत	२२९
देवातिथिस्सपुत्रः	३१९
देवानां स्वर्गं	२९९
देवा वा अग्निष्टोमं	२९२
देवा वा आदित्यस्य	११४
देवा वा उक्थानि	३०८
देवा व छन्दांसि	२३९
देवा वै पशून्	२६२
देवा व ब्रह्म व्यभजन्त तस्य	२८३
देवा वै ब्रह्म व्यभजन्त तान्	२६९
देवा वै यशस्कामाः	२४३
देवा वै वाचं	१६२
देवा वै स्वर्गं	१६९
देवा वै श्रियमैच्छन्	३८२
देवाश्च वा असुराश्च···ते देवाः	४३७
देवाश्च वा असुराश्च···यं देवान्	४९१
देवाश्च वा असुराश्चाऽऽदित्याः	१९६
देवाश्च वा असुराश्चैषु	२७३
देवेषुर्वा एषा	२६८
देवो देवमेतु	६
द्रवदिडं तथा	४०४
द्रवदिडं प्रथमस्य	३८६
द्रवन्तीमिडां	४९१
द्वात्रिंशदक्षरा वा एषा	३६६
द्वादशभिर्विहितैका	८९
द्वादश मासाः पञ्च	११९
द्वादश वैरूपाणि	४४३
द्वादश स्तोत्राणि···तेन	१०१
द्वादश स्तोत्राणि द्वादश	१८३
द्वादश स्तोत्राणि···संवत्सरं	१८३
द्वादशाहस्य दशाहानि	१२८
द्वाभ्यां लोमाऽवद्यति	१३९
द्विपाद्यजमानः	१२७
द्विरवनदेंद्धिङ्कुर्यात्	२२७
द्वे द्वे अक्षरे विभजन्ति	३९१
द्व्यक्षराणि निधनानि	२३७
द्व्यक्षरेणोत्तरयोः	२९१
द्व्युदासं भवति स्वर्गस्य	१६३
द्व्युदासं भवत्येतौ	४०९
ध	
धरुणोऽसि	४७
ध्रुव आसीनो वामदेव्येन	२६०
न	
न बृहतो न रथन्तरस्य	२६१
नमस्सखिभ्यः	२३
नमस्समुद्राय	१८८
नमो गन्धर्वाय	१८
नरो वै देवानां ग्रामः	२१९
नव बृहतः	२९२
नव भवन्ति	३९९
नवभिस्स्तुवन्ति नव	२११
नवभिस्स्तुवन्ति नव प्राणाः	२११

	पृष्ठम्—
नवभिस्स्तुवन्ति हिङ्कारः	२१०
नवभिस्त्रिवृतं	७४
नवभ्यो हिङ्करोति···तिसृभ्यः	७५
नवभ्यो हिङ्करोति···पञ्चभ्यः	७४
नवभ्यो हिङ्करोति···स एकया	८१
नवभ्यो हिङ्करोति···स पञ्चभिः	७७
न वाक्संवत्सरं	३८९
न वै बृहन्न रथन्तरं	२५१
न साम्नो हीयते	१८९
न ह तु वै पितरः	२९०
न हस्तबेष्यान्	२००
नानदं भवति	४७८
नावगतोपरुध्यते	६३
नासिके वा एते	२८०
निधनकामं भवति	४६३
निधनवता स्तुवन्ति	२३५
निधनवद्भवात	१४५
नियुत्वती भवति	१२०
निराहावन्त्याज्यानि	३९६
निराहोपस्थितानि	४१४
निरोहोऽसि	६८
निष्किरीयाः	४४८
नृमण ऊर्ध्वभरसं	८
नृमेधसमाङ्गिरसं	२९८
नैव ह्येतदृक्षो रूपं	२९८
नौधसं भवति	४०३

प

पञ्चदश एव	४१४, ४२९
पञ्चदशश्चैकविंशः	३६०
पञ्चभिः पञ्चदशं	६०
पञ्चभिर्विहितास्तिस्रः	८१
पञ्चभिर्विहितैका	७८
पञ्च दक्षिणा देयाः	३३३
पञ्चदशभ्यो हिङ्करोति···एकादशभिः	८४
पञ्चदशभ्यो हिङ्करोति···पञ्चदशभ्यः	८६
पञ्चदशभ्यो हिङ्करोति···पञ्चभिः	८३
पञ्चदशसप्तदशौ	१४०
पञ्चदश स्तोत्राणि पञ्चदश	९९
पञ्चदश स्तोत्राणि भवन्ति	९९
पञ्च निधनं भवति	१४५
पञ्चनिधनं वैरूपं	४४०
पञ्चपदा पङ्क्तिः	४४१
पञ्चभ्यो हिङ्करोति···तिसृभ्यः	६०
पञ्चभ्यो हिङ्करोति···नवभ्यः	६९
पञ्चभ्यो हिङ्करोति···पञ्चभ्यः	६२
पञ्चभ्यो हिङ्करोति···पञ्चपञ्चिनी	६८
पञ्चभ्यो हिङ्करोति···सप्तभ्यः	७२
पञ्चर्चौ भवति	४३२
पञ्चर्त्विजस्संरब्धाः	२०४
पञ्चसु मास्सु बार्हताः	१०८
पञ्चाक्षरेण रथन्तरस्य	२५१
पत्नीस्संयाज्य	१३१
पदनिधनं प्रथमस्य	३८९
पद्या वा अन्या विराट्	४८७
पन्था वै यज्ञायज्ञीयं	१०३
पन्नमिव वै चतुर्थं	४८२
पराचीभिस्स्तुवन्ति तस्मात्	२१२
पराचीभिस्स्तुवन्ति पराङ्	३४२
पराञ्चो वा एतेषां	२१४
परां वा एते	१६७
परिकुम्भिन्यः	१६२
परिप्रिया दिवः	४७३
परिमण्डलं चर्म	१६६
परिमाङ्गिश्चरन्ति	१६१
परिवत्प्रतिवत्सप्तपदा	३८०
परिश्रिते स्तुवन्ति तस्मात्	२१३
परिश्रिते स्तुवन्ति ब्रह्मणः	१३३
परिष्टुब्धेडं	४४९
परिष्टोभो वैरूपस्य	३०१
परैवं देवा आदित्यं	११४
परोक्षमनुष्टुभं	१२९
पवतेऽहर्यतः	४०४
पवन्ते वाजसातये	१०२
पवमानो अजीजनत्	४५७
पवस्व दक्षसाधनः	४६२

	पृष्ठम्—
पवस्व मधुमत्तमः	४२१
पवस्व वाचो···अग्रमेव	२१७
पवस्व वाचो ···द्वितीयस्य	४१२
पवस्व वाचो···प्रतिपदं	२१७
पवस्वेति वै राथन्तरं	४१२
पवस्वेन्दो वृषा···इति प्रतिपदं	२२४
पवस्वेन्दो वृषा···इत्यनुरूपः	४१२
पवित्रन्ते वितर्तं···इति	४४७
पवित्रन्ते वितर्तं···प्रभुः	१३
पशवो वा इडा	२३६
पशवो वा उक्थानि	११७
पशवो वा उष्णिक्	३०६
पशवो वा एतानि	३१३
पशवो वै चतुरुत्तराणि	१०९
पशवो वै छन्दोगाः	८४
पशवो वै बृहद्रथन्तरे	२६०
पशवो वै वारवन्तीयं	१४८
पशवो वै समीषन्ती	८८
पशुकाम एतेन स्तुवीत	२६६
पशुना प्रचरन्ति	१७४
पशुमान् भवति	२४४
पशुमालभन्ते	१७३
पशून् आतृव्यस्य	२७८, ३११
पशून्वा अस्यां	२३७
पशून्वा एभ्यः	२९४
पष्ठवाड्व	४४८
पाङ्क्त इतर आत्मा	१३९
पाङ्क्तः पुरुषः	५९
पाङ्क्तो यज्ञः	३३३
पात माऽग्नयो रौद्रेण	२२
पान्तमा वो अन्धसः···प्रस्तौति	३०९
पान्तमा वो अन्धसः···वैतहव्यं	३१५
पापवसीयस्त्वं भवति	५८
पापवसीयसो विधृतिः	५३
पापवसीयसो विधृत्यै	१८०
पारयन्त्येनं	११४
पाष्टौहं भवति	४४७

	पृष्ठम्—
पिता नोऽरात्सीदिति	३६२
पितरो भूः पितरः	७
पिता वै वामदेव्यं	२५९
पिबा सोममिन्द्र	४६७
पुनरभ्यावर्तमितरेण	१४०
पुनरभ्यावर्तं स्तुवन्ति	२१३
पुनानस्सोम धारया	४१६
पुनानो अक्रमीत्	४६२
पुरुषो वै ककुप्	३०५
पुरोजिती वः···पशवो	२८०
पुरोजिती वः···विराजौ	४७४
पूर्वमुचैव तद्रूपं···तदनुरूपस्य	४५८
पूर्वमुचैव तद्रूपं···यत्पूर्वं	४१३, ४३१
पूर्वं एव तदहनी	४३२
पूर्वेऽभिषुण्वुः	३२८
पूर्वो वाचं पूर्वेछन्दांसि	३२४
पृतनाषाडसि	४६
पृषदाज्येन प्रचर्य	१७४
पृष्ठानि भवन्ति वीर्यं	१२८
पृष्ठानि वा असृज्यन्त तैः	२५४
पृष्ठानि वा असृज्यन्त तेषां	३००
पौरुषमूर्गं भवति	४३७
प्रकेतोऽसि रुद्रेभ्यः	४५
प्रक्वाणा इव सर्पन्ति	२०४
प्रजननं वै रथन्तरं	२५४
प्रजाकामो व	९६
प्रजानाञ्च वा एषा सृष्टिः	२४३
प्रजापतये स्वाहेति	३४८
प्रजापतिं परिवदन्ति	१३४
प्रजापतिः पशून्···अपाक्रामन्	२६६
प्रजापतिः पशून्···अशनायन्तः	२०९
प्रजापतिः प्रजा···आशनायन्	२६६
प्रजापतिः प्रजा···ता अस्मै	१८४
प्रजापतिः प्रजा···तास्सृष्टाः	२९९
प्रजापतिः प्रजा···स दुग्धः	३३९
प्रजापतिः प्रजा···सोऽताम्यत्	३९८
प्रजापतिः प्रजा···सोऽरिच्यत	१३६

	पृष्ठम्—
प्रजापतिरकामयत···स आत्मन्	३६१
प्रजापतिरकामयत···स एतं	१७५
प्रजापतिरकामयत···स तूष्णीं	२४३
प्रजापतिरकामयत···स शोचन्	२४२
प्रजापतिरकामयत···सोऽशोचत्	१९१
प्रजापतिरुषसमध्यैत्	२७२
प्रजापतिर्देवेभ्य आत्मानं	२३०
प्रजापतिर्देवेभ्य ऊर्जं	१८७
प्रजापतिर्वा इदमेकः	९३
प्रजापतिर्वा एतत्	३१४
प्रजापतिर्वा एतां	२५७
प्रजापतिर्वाव महान्	१३७
प्रजापतिर्वै हिङ्कारः	२११
प्रजापतेर्हृदयेन	१५७
प्रजा वै प्रियाणि	२८२
प्रजायते बहुर्भवति	४०९
प्र ज्यैष्ठ्यमाप्नोति	२४८
प्र त आश्विनीः	४९६
प्रतिधिरसि पृथिव्यै	४९
प्रतिधुक्च प्रातः	३३१
प्रतिष्ठाय प्रजायते	४८८
प्रत्नवत्यः प्रायणीयस्य	३६९
प्रत्यञ्चः प्रपद्य	१३२
प्रत्यवरोहिणः	१२६
प्रथमानि पदानि	३०९
प्रथमैर्हि पदैः	३०९
प्रपरीवर्तमाप्नोति	५४
प्रमंहिष्ठाय गायत	४५२
प्रमंहिष्ठीयं भवति	४५२
प्रमंहिष्ठीयेन वा इन्द्र	४५३
प्र व इन्द्राय मादनं	३१६
प्रवसीयांसं विवाहं	२६४
प्र वो महे वृधे	४८८
प्र शुक्रैतु देवी···न वाजोत्युदगाता	२०१
प्र शुक्रैतु देवी···न वाज्यायुषे	१४
प्र सुन्वानायाऽन्धसः	४०४
प्र सोमासो अदक्युतः	४०४
प्र सोमासो विपश्चितः	३९८
प्रस्तरमासाद्य	२०९
प्रस्तावं प्रस्तुत्य	४६९
प्राञ्च उपसीदन्ति	१९६
प्राचोऽस्यङ्के त्वा	४५
प्राजापत्यं वै वामदेव्यं	१३१
प्राजापत्या वोद्गातारः	१९६
प्राण सोमपीथे मे	३४
प्राणापाना वै	२३४
प्राणापानौ वा एते	३४५
प्राणापानौ वै बृहद्रथन्तरे	२४९
प्राणा वा आपः	३४६
प्राणा वा उष्णिक्ककुभौ	२८०
प्राणेन पुरस्तात्	१४९
प्राणो गायत्रं	२२९
प्राणो बृहत्तस्मात्	२४९
प्राणो वै गायत्रं	२३८
प्राणो वै संवत्सरः	१७२
प्राणो वै त्रिवृदर्धमासः	१८०
प्रादेशमात्री भवति	१९४
प्रायणीयमेतदहः	९८
प्रायणीयेन वाऽङ्गा	९८
प्रायश्चित्यै वै ग्रहः	३४७
प्रास्य धारा···वृष्टिकामाय	२२४
प्रास्य धारा···दिवो वृष्टिं	२२५
प्रेङ्खामारुह्य होता	१६५
प्रेतिरसि धर्मणे	४४
प्रेङ्खोऽग्ने दीदिहि	४७२
प्लेवोऽम्बहं भवति	१६६
प्लवौ वा एतौ	४२४

फ, ब

फलकमारुह्य	१५९
फाल्गुने दीक्षेरन्	१६९
बह्वानामाऽसि सुतिः	७
बलवद्गोयं वज्रमेवं	२५३
बल्वला कुर्वंता	२५३
बहिष्पवमानं सर्पन्ति	२०३

	पृष्ठम्—
बहिष्पवमानेन वै	२४०
बहिस्स्तुवन्ति	२१३
बृहता वा इन्द्रः	२९४
बृहती मर्या यया	२३९
बृहत्कं भवति	४७७
बृहत्तत्पूर्वं	३९४
बृहत्यां भूयिष्ठानि	२३९
बृहत्स्वर्गकामाय	३१३
बृहदेतत्परोक्षं	४६०
बृहदेव पूर्वं समभवत्	२४८
बृहन्नवति	४१९
बृहद्रथन्तरे वै	२६४
बृहस्पतिर्वै	२०२
बेकुरा नामाऽसि	१९
ब्रह्मणो वा आयतनं···यत्प्रथमा	६४
ब्रह्मणो वा आयतनं···यत्पञ्चदक्षिण्यौ	८९
ब्रह्मणो वा एष रसः	२८३
ब्रह्म यद्देवाः व्याकुर्वत	३१९
ब्रह्मवर्चसकाम एतेन	२६९
ब्रह्मवर्चसकामः	७६
ब्रह्मवर्चसी पशुमान्	२३०
ब्रह्मवादिनो वदन्ति कस्मात्	१९०
ब्रह्मवादिनो वदन्ति यतः	१३०
ब्रह्मवादिनो वदन्ति यातयामाः	१०७
ब्रह्म वै पूर्वमहः	४२८
ब्रह्मसाम्नैव तदन्यानि	१४९
ब्रह्मोद्यं वदन्ति	१३३
ब्राह्मणं पात्रे न	१९३

भ

भरद्वाजायना वै	३८७
भवत्यात्मना परा	४९१
भारद्वाजस्य पृक्नी	४७२
भूतं पूर्वोऽतिरात्रः	३६७
भूमिदुन्दुभिर्भवति	१९७
भेषजं वाऽऽथर्वणानि	४६३
भ्राजाभ्राजे पवमान०	१२१
भ्रातृव्यवांस्तुवीत	६६

म

मदवद्वै रसवत्	४२१
मधुमन्तं भक्षं	३४
मध्यतो वा आत्मनः	१८८
मध्यमानि पदानि	३११
मध्यत एष यज्ञस्य	११९
मन इव	२१९
मनसा हिङ्करोति	१३३
मनसोपावर्तयति	१३३
मनस्तत्पूर्वं	३९४
मन्द्रमिव वाऽग्रे	२२९
मरुतो न पातः	१२
मरुत्वते च मत्सरः	२२३
महन्मे वोचः	९
महदिव प्रत्यूढं	२९१
महादिवाकीर्तिं च	१२१
महावृक्षौ वै बृहद्रथन्तरे	२४९
महावैष्टम्भं	४४३
माधुच्छन्दसं	४२०
माध्यन्दिनं वा एषः	३३७
मानो अज्ञाता	१२९
मा मा यूनर्वाहासि	१८८
मारुता वै ग्रावाणः	३९०
मित्रं हुवे	४३३
मिथुनमिव वा	१०२
मुखं वा एतत्संवत्सरस्य	१६९
मूर्धानं दिव इति	१२२
मृदा शिथिरा देवानां	९

य

य आस्तुतं कुर्वते	१०७
य एनमनुव्याहरति	१८९
य एव स्तोमा यज्ञं	७४
यं द्विष्याद्विमुखान्	१९७
यं द्विष्यात्तस्यैतामाहुः	२०३
यं द्विष्यात्तस्य कुर्यात्	७१
यं द्विष्यात्तस्यै तेषां	१९९
यः कामयेत विशा	१९८

	पृष्ठम्—
यः पशुकामस्स्यात्	२६९
यच्छ्रायन्तीयं ब्रह्म०	२७३
यजमानन्तु स्वर्गात्	२०९
यजमानो वै प्रस्तरः	२०७
यज्ज्योतिष्टोमो भवति	९४
यज्ञा यज्ञा वः	४०६
यज्ञा वो अग्नये	२८६
यज्ञायज्ञीयमग्निष्टोम०	१४७
यज्ञायज्ञीयमनुष्टुभि	३३२
यज्ञायज्ञीयं पुच्छं	१४२
यज्ञायज्ञीयं भवति	४११
यज्ञो वा आयुः	१८८
यज्ञो वा अवति	१८८
यज्ञो वै देवेभ्यः	२०८
यज्ञो वै विष्णुः	३३९
यत्कवतीषु	२५६
यत्कामो व्यूढछन्दसा	३७५
यत्पृष्ठेषु	२५७
यत्र वा इन्द्रस्य	३२७
यत्त्रिरवनर्दति	२२७
यत्त्रिवृतः पवमानाः	३४५
यत्परोक्षं निधनं	१५२
यत्पवस्वेति	४६२
यत्प्रलवत्यः	३९४
यत्त्वित्याहुर्गायत्रं	१८५
यत्त्वित्याहुष्षड्भिः	१२२
यत्संवत्सरमन्नं	१३८
यत्सामावसृजेयुः	१०५
यथाऽङ्कुली पुत्रान्	२६१
यथा मण्डूकः	४४३
यथा महावृक्षस्याऽग्रं	८२
यथा वा अह्न उक्थानि	३१२
यथा वा अह्नो माध्यन्दिनं	३१०
यथा वा इतो वृक्षं	१२६
यथा वा इमा अन्याः	४००
यथा वै इतिः	१७१
यथा वै पुत्रो ज्येष्ठः	२४७

	पृष्ठम्—
यदतोऽन्या प्रतिपत्	४५६
यदध्याहुरति	१२९
यदनिधनेनाऽग्रे	२३५
यदन्यच्छन्दोन्तरा	२३४
यदर्वाक्स्तुवन्ति	३२२
यदसृग्रमिति	२१९
यदायूंषीत्याह	२२२
यदा वै पुरुषः	१६७, ३१०
यदा वै पुरुष आत्मनः	१३९
यदा वै पुरुषोऽग्रं	४४४
यदा वै प्रजा महः	१५९
यदाह प्राजापत्य इति	१९२
यदाह बार्हस्पत्य इति	१९२
यदाह वानस्पत्य इति	१९२
यदाहात्यायुपात्रमिति	१९२
यदि कलञ्जो दीर्येत	३३३
यदि क्रीतं	३३०
यदि ग्रावाऽपि शीर्यते	३५०
यदि तृतीयसवनात्	३३९
यदिदं बहुधा अग्निः	३९१
यदि दीक्षितानां	३४१
यदिन्दव इति	२१९
यदि पञ्चविंशः	३६३
यदि पर्यायैरस्तुतं	३२१
यदि पीतापीतौ सोमौ	३४७
यदि प्रस्तोताऽवच्छिद्यते	२०६
यदि प्रतिहर्ताऽवच्छिद्यते	२०६
यदि प्रातस्सवनात्	३३६
यदि बृहत्सामाऽतिरात्रः	२९६
यदि महावीरो भिद्येत	३६१
यदि माध्यन्दिनात्	३३८
यदि रथन्तरसाम्ना	२९६
यदि व्यवान्यात्	२२९
यदि श्रायन्तीयं	३३६
यदि सत्राय दीक्षेरन्	३२०
यदि सोमं न विन्देयुः	३३१
यदि सोममक्रीतं	३३०

	पृष्ठम्—
यदि सोममभिदेहत्	३९०
यदि सोमौ संसुतौ	३२४
यदीतरोऽग्निष्टोमः	३२९
यदु चैवाऽनुष्टुभस्य	४१०
यदृचा प्रस्तौति	३८४
यदेत इति तस्मात्	२१८
यदेतत्साम भवति	३२०
यदेते चत्वारः	९७
यदेते स्तोमा भवन्ति	९६
यदेतौ द्वौ षडहौ	९६
यदेव गायत्रस्य	३९९
यदेव गौतमस्य	४३८
यदैवाष्टादंष्ट्रस्य	४६४
यदेष पृष्ठ्यषडहः	९७
यदेष षडहो भवति	९६
यदेषोऽतिरात्रो भवति	९३
यदेषोऽनुष्टुप्छिराः	३०८
यद्वायतेति	४५२
यद्वायव्रं पुरस्तात्	२३८
यद्वायव्रीषु	२६७
यद्वौरीवितेन	१६३
यद्धि पुत्रोऽशान्तं	२६०
यद्वहु देवत्यमुत्तमं	२६७
यद्यतिष्टुयुर्यावतीभिः	३२३
यद्यतिष्टुयुस्त्वारं	३२३
यद्यर्वाक्स्तुयुर्यावतीभिः	३२३
यद्यर्वाक्स्तुयुस्त्रीडं	३२३
यद्याव इन्द्र ते	४३९
यद्युत्सुजेयुः	१७२
यद्युद्वताऽवच्छद्यते	२०५
यद्रथन्तरेण स्तुवन्ति ये	२६०
यद्रथन्तरेण स्तुवन्तीमं	२६४
यदूद्रोणकलशं	१९६
यद्वा अदश्चतुर्विंशं	१३८
यद्वा अधृतं	४६४
यद्वा अन्या वाक्	१४७
यद्वा असुराणां	४६९

	पृष्ठम्—
यद्व महावृक्षौ	२६०
यद्वै यज्ञस्य स्रवति वाचं	३३६
यद्वै यज्ञस्य स्रवत्यन्ततः	३३६
यद्वै राजानोऽध्वानं	१८६
यद्वै वाचा न	१३३
यन्ति वा एते पथः	३४३
यन्ति वा एते प्राणात्	१२०
यन्म्वित्याहुरन्यानि	२४०
यन्म्वित्याहुर्गायत्रं	२४०
यन्म्वित्याहुर्बार्हा	१९६
यन्म्वित्याहुरन्तरा द्यवः	१९६
यन्म्वित्याहुरुभे	२४९
यन्निधनवत्	२३७
यन्निराह रुद्राय	२६२
यन्माध्यन्दिनेन···माध्यन्दिनं	२३३
यन्माध्यन्दिनेन···सवः	२३३
यन्मे यमं	२९
यन्मैत्रावरुणः	२६७
यमध्वर्युरन्ततः	३४७
यस्ते गोषु महिमा	२६९
यस्ते मदः	४२१
यस्मात्स्तोमात्	३३७,३३९
यस्मादन्यो न परः	४९३
यस्मादेषा समाना	३८२
यस्मादेषा समाना सती	३८१
यस्माद्वायव्रमुखः	३७०
यस्य कलश उपदस्यति	३४१
यस्य कामयेताऽसुयँ	१९९
यस्य नाराशंसः	३४७
यस्य पदेन प्रस्तौति	३८८
यस्य वै यज्ञा वागन्ताः	२८८
या इहक्षिणा ददाति	३२१
यां ताः प्रजाः	२१९
यां समां महादेवः	२१६
याज्यानां सा होतुः	८७
यात्यस्याऽन्यो निधानेन	२६१
यामं भवति	४२९

	पृष्ठम्—
यामस्मादपाहन्	२७०
यामेन मार्जालीयं	१९१
यामेन स्तुवन्ति	३४२
यावत्यश्चतुर्विंशस्य	९९
या वै पूर्वाः प्रस्नान्ति	३२८
युक्ताश्वो वै	४१६
युधा मर्या अजैष्म	२४९
युनज्मि ते पृथिवीं	१०
युवं हि स्थस्त्वः पती	२२४
येनाजिमजयत्	३०
ये नाऽस्तुतं यं कामं	१०७
येनव प्राणेन	४१४
ये रथन्तरेण	१३०
ये वा अश्वानं	१०६
ये वामदेव्येन	१३०
ये वै वाचमन्नं	१०६
यैरु कैश्च छन्दोभिः	२४१
योगे योगे	३१९
योऽद्य सौम्यो वधः	१९
योनिर्वै यज्ञायज्ञीयं	२८३
योऽपि न विगृह्णाति	२००
यो म आत्मा	१६
यो राजा चर्षणीनां	४६८
यो वा अधिपतिं वेद	१८२
यो वा अनुष्टुभं	१८९
यो वा एभ्यो लोकेभ्यः	२२८
यो वा एवं साम्ने	१८८
यो वा वृष्टिकामः	२९६
यो वै गायत्रेण	२२७
यो वै छन्दसां स्वराजं	३६४
यो वै त्रयस्त्रिंशं	८३
यो वै दीक्षितानां पापं	१६१
यो वै देवरथमनन्वालभ्य	२९३
यो वै देवानां गृहपतिं	३६४
यो वै दैवानि	१९८
यो वै द्वादशाहं	३७६
यो वै निह्नुवानं	२८७

	पृष्ठम्—
यो वै महाव्रते	१४३
यो वै सत्रस्य सद्वेद	१२९
यो वै स्तोमान्	१८०
यो वै स्वधूर्वामदेव्यं	२६१
योऽस्य प्रियस्स्यात्	१९७
यौक्ताश्वं भवति	४१६
यौधाजयं भवति	४००

र

रथन्तरं प्रतिष्ठा	३१३
रथन्तरं भवति ब्रह्म	४०२
रथन्तरमसि	३७
रथन्तरमेतत्	४३३
रथं मर्याः क्षेप्ल्या	२४७
रश्मिरसि क्षयाय	४३
रश्मी वा एतौ	२८३
रसवद्वाचा वदति	१६३
राजन्वज्जनवद्वृतः	३७९
राजर्न महाव्रतं	१४४
राजा मेधाभिरीयते	४३१
राज्ये ह्येतर्हि	४६८
राथन्तरेऽहनि बृहती	१११
राथन्तरो वा अयं	४४२
रेवतीषु बामदेव्येन	२६२
रेवदस्योषधिभ्यः	४६
रौरवमच्छावाकसाम	४४४

ल

लोकबिन्दु साम	४११

व

वज्रं भ्रातृव्याय	२४९,२७९
वज्रेण वा एतत्प्रस्तोता	२९२
वज्रो वै त्रिणवः	७८
वज्रो वै षोडशी	४८७
वत्सप्रीर्भालन्दनः	४७९
वयङ्कृत्वा सुतावन्तः	४४०
वयमु त्वा तदिदर्था	३१६
वयमु त्वामपूर्व्य	४८१

	पृष्ठम्—
वयोधा असि	४७
वरुणस्त्वा नयतु	३९
वरुणस्त्वा नयतु	४०
वरुणस्त्वा नयतु	४१
वरुणस्त्वा नयतु	४२
वर्षुकः पर्जन्यः	५७
वसवस्त्वा गायत्रेण···पुनन्तु	१९८
वसवस्त्वा गायत्रेण···संमृजन्तु	१३
वसिष्ठस्य जनित्रं	२७१
वसिष्ठस्य निहवेन	१६०
वसिष्ठस्य प्रियं	४८२
वसिष्ठो वा एतत्	२७१
वसिष्ठो वा एतं	१२५
वसिष्ठो वा एतेन	४१८
वसुकोऽसि	४८
वसुनिधनं भवति	२६७
वह्निरसि	२०
वाग्यज्ञायज्ञीयं	४११
वाग्वा अनुष्टुप्	२८९
वाग्वै देवेभ्यः···तां देवाः	२०२
वाग्वै देवेभ्यः···साऽपः	१९३
वाग्वै द्वादशाहः	४४८
वाग्वै सरस्वती	२०३
वाचं भ्रातृव्यस्य	३१०
वाचं यच्छन्ति	१३५
वाचं यच्छन्ति यज्ञं	२०४
वाचस्साम भवति	४४८
वाणं वितन्वन्त्यन्तः	१६१
वात्सप्रं भवति	४७९
वानस्पत्योऽसि	११
वामदेव्यं भवति	४०३
वामदेव्यं महाव्रतं ···तस्य	१३९
वामदेव्यं महाव्रतं	१४३
वायवे मृगं तेन	४१
वायुर्युनक्तु मनसा	२७
वायुर्वा उशनं	२४६
वायुर्वा एतं देवतानां	११९

	पृष्ठम्—
वायो शुक्रो अयामितः	११९
वायोष्ट्वा तेजसा	३६
वारवन्तीयं वै	३१३
वारवन्तीयमग्निष्टोम	१४८
वासिष्ठं भवति	४१८
विच्छन्दस ऋचो भवन्ति	२९८
विच्छिन्नं वा एते	१६९
विड्वै सप्तदशः	६३
विततमिव वै	४४७
विदद्वसु वै	२७४
विधुं दद्राणं	३३४
विधृतिः पापवसीयसः	१८०, २४३
विन्दते गातुं प्रति	२८१
विन्दते सह दीक्षिणः	३६४
विभुरसि	२०
विराजो वा एतद्रूपं	२८८
विराट्स्वन्नाद्यकामः	४८८
विराट्स्वन्नाद्यकामाय	३०९
विराड्वा एषा समृद्धा	१२८
विरूपमेनमनु प्रजायते	३८१
विरूपस्संवत्सरः	४४३
विशालं लिञ्जया	४८६
विश्वा दधान ओजसा	२२४
विश्वाः पृतनाः	४६७
विषुवानेव भवति	११८
विषेण वै तां	२१६
विष्टम्भोऽसि	४९
विष्णोश्शिरोऽसि	९
विहव्यं शस्यं	३२८
विहाय दौष्कृत्यं	७
वीतहव्यः श्रायसः	३०९
वीर्यं वा अग्निष्टोमः	११८
वीर्यं वा इन्द्रः	३३८
वीर्यं वै स्तोमाः	६०
वृषकोऽसि	२७
वृषण्वतो प्रतिपदं	३२९
वृषण्वत्यस्त्रिष्टुभः···त्रैष्टुभं	४१९

	पृष्ठम्—
वृषण्वत्यस्त्रिष्टुभः···समृद्धाः	४१६
वृषण्वत्यो गायत्र्यः	४६६
वृषवदूवृग्रहवत्	३७८
वृषा पवस्व धारया···गायत्री	४१९
वृषा पवस्व धारया···राजन्याय	२२३
वृषा मतीनां पवते	४२२
वृषा वा एतत्	४०९
वृषा वा एष रेतोधाः	१०६
वृषा शोणो अभि	४१६
वृष्टिं वा अभ्यस्तां	२९६
वैराजं साम	४६९
वैराजो भवतोऽन्नं	१२७
वैराजो वै पुरुषः	६४
वैश्वदेव्यामृचि	१९०
वैश्वानरः प्रत्नथा	३७
वैश्वानरमृत आ जातं	१२३
वैश्वानरं वा एतत्	२९०
वैश्वानरे वा एतत्	२९०
वैश्वानरे वा एततृ	२८७
वैष्टम्भं भवति	४३६
व्यृद्धं वा एतदपशव्यं	२२०
व्यृद्धं वा एत इन्द्रेण	२२१
व्रतपक्षाभ्यां	१९०
व्रतमिति निधनं	१४७

श

शक्वरीषु षोडशिना	४८०
शङ्कु भवति	४२३
शञ्जनायेति द्विपदे	२१६
शततन्त्री भवति	१६२
शतवद्वै पशूनां	४३९
शमन्नय ओषधीभ्यः	३४
शिखा अनुप्रवपन्ते	१३६
शुक्तिर्वा एतेन	४४९
शुचा वा एषः	२७०
शुद्धा अस्मा आपः	१९४
शुन्ध्युरसि	२१
शूद्रार्यौ वर्मणि	१५६
शौर्कं भवति	४४९
श्येनोऽसि गायत्रश्छन्दाः	१७
श्येनो नृचक्षा	२३
श्यैतं भवति	४२०
श्रायन्तीयं ब्रह्मसाम	३३२
श्रायन्तीयमेव कार्यं	३३४
श्रायन्तीयं यज्ञविभ्रष्टाय	२७२
श्रोत्रं वाचाऽग्रं	२१७
श्रुधीहवं तिरश्च्या	४६२
श्लक्ष्णेव तु वै	५९
श्लोकानुपश्लोकाभ्यां	१९१
श्व उत्सृष्टाः	१७३
श्वात्रोऽसि	२०

ष

षडहानि व्यक्रजन्त	३९१
षड्चौ भवतः	४५८
षड्धा विहितो यज्ञः	२३१
षष्टिञ्च त्रीणि च	३२२
षोडशभ्यो हिङ्करोति···दशभिः	८९
षोडशभ्यो हिङ्करोति···द्वादशाभि	८८
षोडशाक्षरेण	४७८

स

स आत्मानमेव	२६९
स आदधाति गर्भः	२४७
स इदं भुवनं प्रजनयित्वा	९७
स इन्द्रोऽब्रवीत्	२९३
स इन्द्रोऽवेदग्निर्वा	२३१
स उरस्त एव	१७८
स एतं त्र्यहं	९६
स एतं षडहं	९६
स एतान् स्तोमान्	९५
स एतौ द्वौ षडहौ	९६
स एवाऽब्रवीत्	२९४
स ऐत्कल्याणः	४७६
सकृद्धिङ्कृतेन शिरसा	१३९
सखाय आनिषीदत	४४६
सगरा असि	२२

	पृष्ठम्—
सजनीर्थं शस्त्यं	३२९
स तु वै यज्ञेन	२१०
सतो बृहतीषु	४४४
सत्रस्यर्ध्याऽऽग्नीध्रं	१९०
सत्रा भ्रातृव्यं सहते	४६६
सत्रासाहीयं भवति	४६९
स देवेन यज्ञेन	१८२
स नः पवस्व शङ्गव इति	२१६
सन्धिरसि	४४
सन्नद्धाः कवचिनः	१६७
स पत्त एव प्रतिष्ठायाः	१७९
सप्त ग्राम्याः पशवः	७२
सप्तदश एव स्तोमः	४३२
सप्तदशा भवन्ति	११४
सप्तभ्यो हिङ्करोति···तिसृभ्यः	६९
सप्तभ्यो हिङ्करोति···नवभ्यः	७९
सप्तभ्यो हिङ्करोति···पञ्चभ्यः	७१
सप्तभ्यो हिङ्करोति···सप्तभ्यः	७१
सफेन व देवाः	४०६
स बृहदसृजत	२६८
सम्भार्यास्तृचाः	३९६
स मध्यत एव प्रजननात्	१७८
स मनसा ध्येयः	२२८
समानं साम भवसि	१०६
समिव वा इमे लोकाः	४३३
समुद्रं वा एते प्रस्नान्ति	१६६
समुद्रो वा एतच्छन्दः	१४६
समुद्रोऽसि	२१
समेधन्ते तां समां	२९६
सम्राडसि कृशानुः	१९
सम्राड्वतीषु	१२४
स रथन्तरमसृजत	२६७
स रेवतीरसृजत	२६९
सर्पराज्ञ्या ऋग्भिः	३४३
सर्वमन्नाद्यमाप्नोति	९३
सर्वमायुरेति	२४६
सर्वाः खलु देवताः	३१४

	पृष्ठम्—
सर्वाणि रूपाणि	२७८
सर्वाणि वै रूपाणि कालेयं	२७४
सर्वाणि वै रूपाणि क्रियन्ते	१०१
सर्वाणि व रूपाण्युद्वंशीयं	१३०
सर्वाणि स्वाराणि	२३२
सर्वान् कामान्	२६२
सर्वामृद्धिमाप्नुवन्	२१८
सर्वा वाचो वदन्ति	१६७
सर्वासु स्रक्तिषु	१६७
सर्वेणाऽऽत्मना	१६४
सर्वे वै कामाः	२९६
सर्वेषां वा एतत्पृष्ठानां	३००
सर्वे सहर्त्विजः	१९८
सर्वेऽस्मिन् घोषा	२५९
संवत्सर एव सप्तदशस्य	३५५
संवत्सरस्य वा एतौ	३६७
संवत्सरेऽस्थीनि	३४४
संवत्सरेऽग्निर्वाक्	३९०
संवत्सरो वै देवानां	३६४
संवर्चसा पयसा	१७
सं वा अन्यो यज्ञः	१६४
सं वाचं व्यसृजत	२४७
सं वेशायोपवेशाय	३२६
स शर्वरीरसृजत	२६८
स वैराजमसृजत	२६८
स संवत्सरस्य रूपं	१०२
सं सर्पोऽसि	४७
सह निधनेन	१९५
संहितं भवति	४०६
साकमश्वं भवति	४२७
साध्या वै नाम···कालेयेन	२७४
साध्या वै नाम···सर्वेण	२७५
साध्या वै नाम···सवनेन	२७८
सा पुनर्त्यक्रामत्	१९४
साम देवानामन्नं	१९०
साम वा असौ लोकः	१०५
सामार्षेयवत्	४१०

	पृष्ठम्—
सामार्षेयेण	४७७
साम्नेतः प्रगाथां	१०६
साम्नेतो यन्ति	१०४
सिन्धुक्षिद्वै	४८१
सुज्ञानं भवति	४२३
सुतासो मधुमत्तमा	४४७
सुदीतिरसि	४६
सुयज्ञं भवति	१६५
सुसमिद्धे होतव्यं	३२५
सूर्यो मा दिव्याभ्यः	२०२
सूर्यो युनक्तु	२८
सैन्धुक्षितं भवति	४८१
सैषा त्रिवृत्प्रायणा	७५
सोऽकामय यज्ञं	९७७
सोमगीर्भिष्ट्वा	२४
सोमः पवते	४७४
सोपीथो वा एतस्मात्	३३१
सोमः पुनानः	४७४
सोमरारन्धि नो हृदि	२४
सोमसाम भवति	३७७
सोमेहानुमेहि	३२
सौभरं भवति	४८२
स्तुतमनुशंसति	३४३
स्तुतस्य स्तुतमसि	३१
स्तुवते यज्ञस्य	४२४
स्तृणुते तं यं	४८५
स्तोत्रीयानुरूपौ तृचौ	४१३, ४३१, ४५८
स्तोमेन यज्ञं	२७४
स्तोमो युज्यते	३९३
स्तोमो वै देवेषु	२७३
स्वघूर्वामदेव्यं गेयं	२६१
स्वः पृष्ठं तथा हि	४६५
स्वरसमान एते	११३
स्वराणां यस्मादेषां	३८४
स्वरेण वै देवेभ्यः	२३८
स्वरोऽसि गयोऽसि	२८
स्वर्गो लोको बृहत्	३१३
स्वर्यं वा एतत्	४७७
स्वर्णिधनं भवति	४२४
स्वर्णिधनमन्वहं	१६४
स्वर्भानुर्वा आसुरः	१२१
स्ववंद्वै राथन्तरं	४२६
स्वादिष्ठा वै देवेषु	२७८
स्वारं भवति	२३७
स्वारमु स्वरेण	४११

ह

हविर्धाने शिरसा	१५७
हसित्युपरिष्टात्	४४२
हारियोजनस्य	३३
हारिवर्णं भवति	२९९, ३५३
हारिवर्णस्यैव	४५३
हारिवर्णो वा एतत	३००
हाविष्मतं भवति	४२२
हिङ्कारं प्रति संख्यापयन्ति	२९२
हिङ्कुरवद्भवति	१४२
हिरण्यगर्भस्समवर्तत	३४९
हिरण्यं सम्प्रदायं	४९०
होषिति वृष्टिकामाय	२९६
हुव इति वै	४३३, ४३४

क्ष

क्षत्रं वा एतत्	४२७
क्षिप्रं गेयं	२५३
क्षिप्रं शस्यं	६१४

ताण्डयमहाब्राह्मणप्रथमभागान्तर्गतवाक्यानां सूची समाप्ता ॥

ताण्ड्यमहाब्राह्मणपूर्वार्धगतानां लोकसिद्धार्थानुवादकानां न्यायसिद्धार्थावबोधकानाञ्चाऽऽभाणक-वाक्यानां सूची ॥

१ अन्तरिक्षायतना हि प्रजा	४	८	१३
२ अन्येनाऽन्येन हि पदा पुरुषः प्रतितिष्ठत्नेति	४	४	११
३ अरावाणो वा एते येऽनृतमभिशंसन्ति	६	१०	७
४ अरेणाऽरेण हि रथः प्रतितिष्ठति	७	७	१३
५ अलोको वा एष यदानुजावरः	२	१०	२
६ एवं वै विद्वांसमाहुरपि ग्राम्याणां पशूनां वाच आजानाति	१०	२	७
७ एषा वै संवत्सरस्य पत्नी यदेकाष्टका	६	९	२
८ ओजसा वीर्येण प्रहीयते यदप्रसं भवति	६	१०	१८
९ गर्भेण संवत्सरे पर्यावृत्य प्रजायते (पशुः)	१०	१२	६
१० चक्षुर्वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः	५	९	११
११ तस्माच्छिरोऽङ्गानि मेद्यन्ति नाऽनुमेद्यति न कृश्यत्यनुकृश्यति	५	१	६
१२ तस्माच्छूद्र उत बहुपशुरयज्ञियः विदेवो हि	६	१	११
१३ तस्माज्जातं पुत्रं पशवोऽभिहिङ्कुर्वन्ति	१२	१०	१४
१४ तस्मात्तिर्यङ् वायुः पवते	१०	६	२
१५ तस्मात्तेषां (पुंश्चल्यादीनां) न आशा (धनादीच्छा) एतस्या, य एषामाशामेति तस्मा एव शुचोऽप भजते	८	१	११
१६ तस्मात्पराञ्चः प्राज्यन्ते प्रत्यञ्चः प्रजायन्ते	७	२	६
१७ तस्मात्परिगृहीता ग्राम्याः पशवः	६	८	१४
१८ तस्मात्पादावनेज्यन्नाऽति वर्धते (शूद्रः)	६	१	११
१९ तस्मात्प्रजा दशमासो गर्भं भूत्वैकादशमनुप्रजायते तस्मादूद्वादशं नाभ्यतिहरन्ति	६	१	३
२० तस्मात्प्रत्यङ्ङं तिर्यङ्ङं पराङ्ङं प्रजाः पशुमुपजीवन्ति	१०	५	१२
२१ तस्मात्प्रेत्स्वर्यः (गमनशीला गावः) प्रेत्य पुनरायन्ति	६	८	१३
२२ तस्मात्समानास्सन्तः पशवो नानारूपाः	१०	११	१
२३ तस्मात्सर्वासु दिक्ष्वङ्ङं विद्यते	६	४	१५
२४ तस्मादन्तरे सत्यौ कनीनिके भुङ्क्तः	१०	४	२

२५ तस्मादयं लोकः पुनः पुनः प्रजायते	६	८	१६
२६ तस्मादवाङादित्यस्तपति	१०	५	२
२७ तस्मादश्वः प्रस्तरेण सम्मृज्यमान उपावरमते	६	७	१८
२८ तस्मादाग्नेयं चन्द्रेण (हिरण्येन) इच्छन्ति	६	६	११
२९ तस्मादितर आत्मा मेथति च कूजयति च	५	१	७
३० तस्मादिमे लोकास्सह सन्तो नानैव	१०	१०	१
३१ तस्मादु प्रेत्य पुनरायन्ति (पशवः)	७	२	६
३२ तस्मादु बहुपशुः (वैश्यः)	६	१	१०
३३ तस्मादु बाहुवीर्यः (राजन्यः)	६	१	८
३४ तस्मादुभयतः प्राणाः पशवः	७	३	२८
३५ तस्मादूर्ध्वोऽग्निर्दीदाय	१०	६	२
३६ तस्मादेकरूपा आरण्याः पशवः	६	८	८
३७ तस्मादेषा (प्राची) दिशां वीर्यवत्तमैतां हि भूयिष्ठाः प्रीणयन्ति	६	४	१४
३८ तस्मादूग्राममाहृतैर्भुञ्जते	६	८	११
३९ तस्मादूब्राह्मणस्य च राजन्यस्य चाऽऽद्यः (वैश्यः)	६	१	१०
४० तस्मादूब्राह्मणो मुखेन वीर्यं करोति	६	१	६
४१ तस्मादूब्राह्मणो वारणेन न पिबेत्	५	३	११
४२ तस्माद्यथतुं वायुः पवते	१०	९	२
४३ तस्माद्यथर्त्वोषधयः पच्यन्ते	१०	८	१
४४ तस्माद्वनस्पतीन् स्वेन किंकुणा वज्रेण (दण्डयुक्तपरश्वादिना) वृश्चन्ति देवशला हि	६	५	१२
४५ तस्माद्वयः पुच्छेन प्रतिष्ठायोत्पतति पुच्छेन प्रतिष्ठाय निषीदति	५	१	१७
४६ तस्माद्वाचा सिद्धाः (पशवः) वाचा आहूता आयान्ति तस्मादु नाम जानते	१०	३	१३
४७ तस्माद्वैश्योऽद्यमानो न क्षीयते	६	१	१०
४८ तस्माद्वानारूपा ग्राम्याः पशवः	६	८	१२
४९ तस्माद्वाभिरनवतृण्णा दशमी प्राणानां	६	८	३
५० तस्माद्व्यघ्रोऽन्ये पशवोऽदन्ति ऊर्ध्वः पुरुषः अधिपतिर्हि सः	६	२	८
५१ तस्माद्मनुष्याः श्वः श्वः सृज्यन्ते	६	९	१८
५२ नरो वै देवानां ग्रामः	६	९	२
५३ तस्मात्समानाया नासिकायास्सप्त्या नाना प्राणावुच्चरतः	८	५	४

५४ पराङ्हीतोऽसौ लोकः (स्वर्गः)	९	८	६
५५ पक्षाभ्यां वै यजमानो वयो भूत्वा स्वर्गं लोकमेति	६	१	१०
५६ प्रजा वै प्रियाणि पशवः प्रियाणि	८	६	१५
५७ ब्रह्म हि पूर्वं क्षत्रात्	११	१	२
५८ ब्राह्मणं पात्रे न मिमांसेत यं ब्राह्मणमिव मन्यते	६	५	९
५९ मुखं वा एतत्संवत्सरस्य यदेतत्फाल्गुनः	५	९	८
६० यथाऽनड्वाहो वाऽश्वान्वाऽश्वतरान्वोह्वषस्सन्तर्पयेत्	२	१६	३
६१ यथा प्रार्थस्य (अनड्वाहः) शम्या अवदध्यात	११	१	६
६२ यथा मण्डूक आट्करोति	१२	४	१६
६३ यथा वै मनुष्या इमं लोकमाविष्टाः	१०	५	१५
६४ यथाऽऽशिष्ठान् (भक्षणसमर्थान्) वहिष्ठान् सम्भरेदेवमेवैतान् सम्भरन्ति गत्यै	११	१	५
६५ यदा वै पुरुषोऽन्नमत्त्यथाऽन्तरितो विष्टब्धः	१२	४	२०
६६ यदा वै पुरुषस्स्वमोक आगच्छति सर्वं तर्हि प्रजानाति सर्वमस्मै दिवा भवति	५	८	९
६७ यद्धि पुत्रोऽशान्तं चरति पिता तच्छमयति	७	९	४
६८ यद्धि मनसाऽभिगच्छति तद्वाचा वदति	११	१	३
६९ यद्वै वाचा न समाप्नुवन्ति मनसा तत्समाप्नुवन्ति	४	९	१०
७० यद्वै राजानोऽश्वानो धावयन्ति येऽश्वानां वीर्यवत्तमास्तान्नियुञ्जते	६	३	१५
७१ यन्ति वा एते पथ इत्याहुर्ये मृताय कुर्वन्ति (क्रियाकलापं) पुनः पन्थानमपियन्ति	९	८	११
७२ यस्माद्वडवा द्विरेताः तस्मादश्वतरी अप्रजा आत्तरेता हि	६	१	४
७३ या वै पूर्वाः प्रस्नान्ति ताः (प्रजाः) पूर्वांस्तीर्थं जयन्ति	९	४	१२
७४ यो वै दीक्षितानां पापं कीर्तयति तृतीयमेवांऽशं पाप्मनो हरति अजादस्तृतीयं पिपीलिकास्तृतीयम्	५	६	१०
७५ यो वै छन्दसां स्वराजं वेदाऽश्नुते स्वाराज्यं प्र स्वाराज्यमाप्नोति	१०	३	८
७६ विधूतमिव हि तृणं पशव उपावर्तन्ते	६	७	१९
७७ शकुन इव वै यजमानो वयो भूत्वा स्वर्गं लोकमेति	५	३	५
७८ शमलं वा एतमृच्छति यमश्लीला वागृच्छति	२	१७	४
७९ संवत्सरं हि प्रजाः पशवोऽनुप्रजायन्ते	१०	१	९
८० साचीव वै वयः पक्षौ कृत्वा पतीयः पतति	५	१	१२

ॐतत्सत् ।

ताण्ड्यमहाब्राह्मणम् ।

प्रथमाऽध्याये

प्रथमः खण्डः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलञ्जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशत्सायनाचार्य्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्व्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुर्माधवाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
व्याख्याताऽऽर्ग्यजुर्वेदौ सामवेदेपि संहिता ।
व्याख्याता ब्राह्मणव्याख्याङ्करोम्यौद्गात्रबुद्धये ॥ ५ ॥
पञ्चविंशतिरध्याया महति ब्राह्मणे स्थिताः ।
आद्येऽध्याये श्रुता मन्त्रा उद्गातुर्य्यर्ज्जुरात्मकाः ॥ ६ ॥
ये तु मन्त्राः स्तोत्ररूपा उत्तरासु तृचेषु ते ।
योनिवद्गानमूहित्वा पठ्यन्ते तद्विधेर्वशात् ॥ ७ ॥
यद्योन्यां गानमाम्नातं तदेवोत्तरयोर्ऋचोः ।
गायेदिति स्तोत्रकल्पत्यै साङ्गामूहो विधीयते ॥ ८ ॥
आवृत्तियुक्तं तत्साम स्तोम इत्यभिधीयते ।
द्वयोरध्याययोः स्तोमप्रकारा बहुधा श्रुताः ॥ ९ ॥
चतुर्थाध्यायमारभ्य गवामयनिकादयः ।
क्रतूनां विधयः प्रोक्ता एषोऽस्मिन् ब्राह्मणे क्रमः ॥ १० ॥
प्रथमाध्यायगा मन्त्रा विनियोगपुरःसरम् ।
व्याख्यायन्ते सर्व्वसोमयागेष्वेतेऽङ्गताङ्गताः ॥ ११ ॥

ननु प्रथमाध्याये समाम्नाताना'म्महन्मेवोच' इत्यादीनां मन्त्राणाङ्क्रत्वङ्गत्वमयुक्तम्, क्रतुप्रकरणमध्ये पाठाभावात्। चतुर्थाध्यायप्रभृतीनि हि क्रतुप्रकरणानि भविष्यन्ति। चतुर्थपञ्चमाध्यायौ गवामयननामकस्य संवत्सरसत्रस्य प्रकरणम्। 'गावो वा एतत्सत्रमासते'त्यारभ्य तयोरध्याययोराम्नातत्वात्। षष्ठाध्याये ऽग्निष्टोमप्रकरणं 'प्रजापतिरकामयत बहुस्यां प्रजायेयेति, स एतमग्निष्टोममपश्यदि'त्यारभ्य तस्याध्यायस्याम्नातत्वात्। एवमुत्तराण्यपि क्रतुप्रकरणान्यवगन्तव्यानि। नन्वेवं प्रथमाध्यायगता मन्त्रा द्वितीयतृतीयाध्यायगता विष्टुतयश्च न कश्चित् क्रतुमारभ्याम्नाताः, अतो नैतेषां क्रत्वङ्गत्वं युज्यत इति चेत्। मैवम्। अनारभ्याधीतानां प्रकृतिगामित्वमिति न्यायेन क्रत्वङ्गत्वावगमात्। स च न्यायस्तृतीयाध्याये षष्ठपादस्य प्रथमाधिकरणे पर्णवाक्यमुदाहृत्याभिहितः--

प्रकृतौ विकृतौ वा स्याद्यस्य पर्णेत्यसौ विधिः।
प्रकृतावेव वा तुल्याद्वचनादुभयोरसौ॥
जुहूमाश्रित्य पर्णत्वविधिः प्रकृतिमात्रगः।
चोदकेनोभयप्राप्तेर्विकृतौ विधिनात्र किम्॥

अनारभ्य श्रूयते-'यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोती'ति। तत्राव्यभिचरितक्रतुसम्बन्धवतीं जुहूमाश्रित्य तद्धेतुः पर्णवृक्षो वाक्येन विधीयते। 'या जूहुः सा पर्णमयी'ति वाक्यञ्च प्रकृतिविकृत्योस्तुल्यमेव प्रवर्त्तते, उभयत्राश्रयभूताया जुह्वाः सत्त्वात्। तस्मात्प्रकृतिविकृत्योरुभयोरप्ययं विधिरिति प्राप्ते ब्रूमः।

किमयं विधिर्विकृतौ चोदकात्पूर्वन्निविशते, पश्चाद्वा? नाद्यः, आश्रयभूताया जुह्वाः चोदकमन्त्रेणासम्भवात्। द्वितीये तु पर्णत्वमपि जुह्वा सहैव चोदकेनातिदिश्यते। तत्र पुनर्विधिवैयर्थ्यादयं विधिः प्रकृतिमात्रगः। एवं 'यस्य खादिरः स्रुवो भवती'त्युदाहरणीयम्। ननु का प्रकृतिः, का विकृतिरिति चेत्। उच्यते। यत्र कर्तव्यं सर्वं प्रकर्षेण कर्मान्तरनैरपेक्ष्येणोपदिश्यते सा प्रकृतिः। यत्र विशेषरूपमेव कर्तव्यं श्रुत्योपदिश्यते इतरत्सर्वं कर्मान्तरादतिदिश्यते, सा विकृतिः। स चातिदेशः प्रत्यक्षश्रुतिवचनाद्वा साम्याद्वा लिङ्गाद्वाऽवगन्तव्यः। तत्सर्वं सप्तमाष्टमाध्यायाभ्यां बहुधा विचारितम्। प्रकृतिश्च द्विविधा मूलप्रकृतिरवान्तरप्रकृतिश्चेति। सर्वात्मना कर्मान्तरानिरपेक्षा मूलप्रकृतिः। कतिपयेष्वङ्गेषु कर्म्मान्तरं चापेक्षते, स्वयञ्च कैश्चित् कर्म्मभिरपेक्षणीया भवति, सेयमवान्तरप्रकृतिः। तत्र तिस्रो मूलप्रकृतयः, ताश्चाष्टमाध्यायस्य प्रथम-

पादे तृतीयाधिकरणस्य द्वितीयवर्णके विचारिताः-

इष्ट्यग्निहोत्रसोमानां मूलप्रकृतिता नहि ।
अस्ति वा नालौकिकत्वादियत्तानवधारणात् ॥
लोकवत् सन्निपत्यारादुपकारिद्वयश्रुतेः ।
इयत्तायां निश्चितत्वान्मूलप्रकृतिता त्रिषु ॥

अलौकिकत्वेनैतावद्भिरङ्गैः सम्पूर्ण उपकार इति निश्चेतुमशक्यत्वात् इष्ट्यादीनां नास्ति मूलप्रकृतित्वमिति चेत् । मैवम् । लौकिकसदृशत्वात् । यथा लोके भुजिक्रियायामोदनः करणं तस्य सन्निपत्योपकारिणः शाकसूपादयः आरादुपकारिणः पीठप्रदीपादयः । तथा भावनायां यागः करणम्, अवघातादयः सन्निपातिनः प्रयाजादय आरादुपकारिणः, अतो नात्यन्तिकमलौकिकत्वम् । इयत्ता तु लौकिके यथा प्रत्यक्षेण निश्चीयते तथा श्रौते श्रुत्या निश्चीयताम्, तस्मादिष्ट्यग्निहोत्रसोमानां मूलप्रकृतित्वमस्ति । तासु प्रकृतिष्वेव 'महन्मेवोच' इत्यादिमन्त्राणामङ्गत्वेन प्रवेशोऽवगन्तव्यः । प्रकृतित्वस्य तत्रैव मुख्यत्वात् । तास्वप्येते मन्त्राः सोमयागे नेतुं योग्याः सोमं गमेयमित्यादिलिङ्गसम्भवात्, नानाविधब्राह्मणगतानामेतदीयविनियोगानामृषिभिः सूचितत्वाच्च । ते च विनियोगा अस्माभिस्तन्मात्रव्याख्यानावसरे प्रदर्शयिष्यन्ते । यस्य तु मतं सोमयागप्रकरणमिदं तस्य न कोपि सन्देहः ।

सोमयागे चार्षर्त्विजो वरणीयाः, तथा ह्यापस्तम्बेनोक्तम्-'सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीत' इति । आश्वलायनोऽपि दर्शपूर्णमासेष्टिपूर्वकत्वं सोमयागस्योक्त्वा पक्षान्तरोपन्यासपूर्वकमेवमाह-'प्रागपि सोमेनैके तस्यर्त्विजः चत्वारस्त्रिपुरुषाः तस्य तस्योत्तरे त्रयः होता मैत्रावरुणो च्छावाको ग्रावस्तुदध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्राह्मणाच्छंस्याग्नीध्रः पोतोद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इति, एतेऽहीनैकाहैर्याजयन्ति, एत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षित्वा समोप्याग्नींस्तन्मुखाः सत्राण्यासते' इति । अस्यायमर्थः । दर्शपूर्णमासाभ्यामिष्ट्वा पश्चाद्वा तद्यजमानः पुरस्ताद्वा सोमेन यजेत तस्य सोमयागस्य होताध्वर्युर्ब्रह्मोद्गातेति चत्वारः ऋत्विजो मुख्याः ते च प्रत्येकं त्रिभिः पुरुषैरुपेता अतस्तस्य तस्य एकैकस्योत्तरे त्रयः पुरुषा भवन्ति, त एते होत्रादिनामकाः षोडशर्त्विजो द्विरात्रादिभिरहीनसंज्ञकैरग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति । एत एव होत्रादयः षोडशर्त्विजः स्वयमप्याहिताग्नयः प्रथमयज्ञेनाग्नि-

ष्टोमेनेष्ट्वा गृहपतिसंज्ञकेन सप्तदशसंख्यापूरकेण सहिता द्वादशाहादि-सत्रार्थं दीक्षित्वा स्वस्वसम्बन्धिनोऽग्नीनेकत्र स्थापयित्वा तत्प्रधानाः सत्राण्युत्तिष्ठेयुरित्येकाहाहीनसत्रात्मकाय एते सोमयागास्तदीयस्यार्त्विजो होत्रादिरूपस्य सामान्यलक्षणं द्राह्यायणाभिधो महर्षिश्छन्दोगसूत्रकार आह–'ऋत्विगार्षेयोऽनुचानः साधुचरणो वाग्म्यन्यूनाङ्गो नातिरिक्ताङ्ग' इति ।

तादृशं ऋत्विजं वरीतुं यजमानः सोमप्रवाकं प्रेषयेत् । सोमयागवृत्तान्तमृत्विजे प्रकर्षेण वक्तीति सोमप्रवाकः । स च वरीष्यमाणस्य समीपं गत्वा प्रब्रूयात् अस्मदीयो यजमानः सोमेन यजते स त्वां प्रत्यार्त्विज्यमर्थयत इति । एवमुक्ते इतरो यद्यार्त्विज्यं कर्तुन्नेच्छेत् तदानीं सोमन्नमस्कृत्यार्त्विज्यं परिहरेत् तत्परिहारनिमित्तं प्रत्यवायमपनेतुं नमस्कारः । प्रत्यवायश्चैवं श्रूयते–'यशसा वा एषोभ्येति य आर्त्विज्येन चरति तद्यः प्रतिरुन्धे यशसा प्रतिरुन्ध' इति । अथासावार्त्विज्यं कर्तुमिच्छेत्तदा सोमप्रवाकं प्रति सोमयागविषयं कुशलं सर्वं पृष्ट्वा स्वकीयं हर्षं द्योतय'न्महन्मेवोच'- इति मन्त्रं जपेत् । तदेतद्द्राह्यायणः सूत्रयामास–'अकरिष्यन्नमः सोमाय राज्ञ इत्युक्त्वा प्रत्याचक्षीत महन्मेवोच इति करिष्यन् प्रतिमन्त्रयेतेति' । आपस्तम्बोपि सूत्रितवान् , ऋत्विजो वृणीते यूनः स्थविरान्वाऽनूचानानूर्द्ध्ववाचो नङ्गहीनांस्तेभ्यः सोमं सोमं पृच्छन्ति क ऋत्विजः के याजयन्ति कञ्चिन्नाहीनः कञ्चिन्नन्यस्तमामार्त्विज्यं कञ्चित् कल्याण्यो दक्षिणा' इति । छन्दोगब्राह्मणम्–'भवत्यथ जपति महन्मेवोच' इति । यद्यप्यापस्तम्ब एतन्मन्त्रजपं सर्वेषामृत्विजां साधारणमवोचत् तथाप्यत्र द्राह्यायणः स्वकीयपरिभाषानुसारेणोद्गातारमभिलक्ष्य तस्य सोमप्रवाकविषयं प्रतिमन्त्रणं विधत्ते । परिभाषा चैवमुक्ता–'एकश्रुतिविधानान्मन्त्रान् कर्माणि चोद्गातैव कुर्यादनादेश' इति । अस्यायमर्थः । महन्मेवोच इत्यादि मन्त्रानथ कर्माणि च सामवेदोक्तान्युद्गातैवानादेशे कुर्य्यात्, कुतः ? एकश्रुतिविधानात् एकस्य कर्तुः श्रवणेन निर्देशेन विधानात् । प्रतिमन्त्रयेतेत्येकवचनविधानमुद्गातृलिङ्गत्वेनात्र परिभाष्यत इति ।

ननूद्गातृपुरुषाः प्रस्तोतृप्रतिहर्तृसुब्रह्मण्या अपि सामवेदोक्तकर्माधिकारिणो न तु केवलं उद्गातैव । वाढम्, तथापि न तेषां वरणनियतं किन्तु होत्रध्वर्य्युर्ब्रह्मोद्गातृणां चतुर्णामेव नियतम्, तदाहापस्तम्बः–'तान्वृणीते चतुरः सर्वान्वैकैकश' इति । तथासति प्रस्तोत्रादीनां

वरणाभावमाश्रित्य द्राह्यायण उद्गातुरेवेदं प्रतिमन्त्रणमन्यते । यदि तेषामपि वरणमङ्गीकुर्य्यात् तदा स्वकीयपरिभाषानुसारेण प्रस्तोता प्रतिमन्त्रयेतेत्येवमादिशेत्, तदादेशाभावादुद्गातुरेव वरणं प्रतिमन्त्रणं च तन्मतमित्यवगम्यते ।

ननु तस्य मन्त्रस्य महन्म इत्येष आदिरिति प्रतीकग्रहणादेवावगम्यते अन्तन्तु कथमवगम्यत इति चेत् । उत्तरमन्त्रस्यादिग्रहणादिति ब्रूमः । उत्तरादिः पूर्वान्तलक्षणमिति सूत्रकारेण परिभाषितत्वात् । अत्र सूत्रकारो 'देवो देवमेत्वि'त्युत्तरमन्त्रादि ग्रहीष्यति, तस्मादुभुक्षिषायेत्य सौपूर्वमन्त्रस्यान्त इति द्रष्टव्यम् । मन्त्र पाठस्तु--

ॐ महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचस्तन्मावतु तन्माविशतु तेन भुक्षिषीय ॥ १ ॥

हे सोमप्रवाक ! 'मे' मह्यमुद्गात्रे यजमानस्त्वामार्त्विज्यायार्थयत इति यद्वचनं प्रायौक्षस्तत् 'महत्' पूज्यं सर्वोत्कृष्टमेव 'अवोचः' उक्तवानसि, न खल्वेतस्मात्पूज्यतमवचनं लोकेस्ति । तैत्तिरीयेऽपि वाजपेयफलत्वेनार्त्विज्यप्रशंसा कृता, तस्माद्वाजपेययाज्यः ऋत्विगधीनः सर्वा ह्यस्य वाचोवरुद्धा इति । महाभाष्यकारेणापि व्याकरणाध्ययनफलतयार्त्विज्यं प्रशंसितुमिदं वाक्यमुदाहृतम्-'यो वा इमां पदशः स्वरशो वर्णशोऽक्षरशो वा वाचं विदधाति स आर्त्विजीनो भवतीति, तस्मान्महदुक्तवानसि । तथा त्वं 'भर्गः' भर्जनं पापस्य विदारकं दीप्तं वा वचनं 'मे' मह्यं 'अवोचः । तथा 'यशः' यशस्करं वचनं मे मह्यं अवोचः । सोमार्त्विज्यस्य यशस्करत्वं प्रसिद्धं श्रूयते च-'सोमो वै यशः स एवं विद्वान् सोममागच्छति यश एवैनमृच्छति' इति । तथा 'सोमं' स्तुतिसाधनं त्रिवृदादिकं 'मे' मह्यं 'अवोचः' उद्गातृवरणस्य त्रिवृदादिप्रयोगार्थत्वादेवमुक्तम् । तथा 'भुक्तिं' भोगसाधनमेव वचनं 'मे' मह्यं 'अवोचः' आर्त्विज्यकरणेन हि भोगसाधनं गवादिद्रव्यं लभ्यते, अत एवोद्गात्रादिवरणसमये कश्चित्कल्याणो दक्षिणा इति पृच्छते । तथा 'सर्वम्मे-वोचः' किमनया महद्भर्ग इत्यादि परिगणनया यद्यदस्मदभीप्सितं तत्सर्वमपि मह्यमवोचः । त्वयोक्तम्महत्वभर्गत्वादिगुणविशिष्टं यदार्त्विज्यमस्ति 'तन्मावतु' मां रक्षतु, रक्षार्थं 'तत्' आर्त्विज्यं 'मा' मां विशतु । 'तेन' अनुष्ठितेनार्त्विज्येन 'भुक्षिषीय' भुक्षीय भोगान् भुञ्जीय ।

भुजिधातोराशिर्लिङि बहुलमिति सिप् इडागमः, उकारादेश-इछान्दसः ॥ १ ॥

अथ द्राह्यायणो द्वितीयमन्त्रस्य विनियोगमित्थमाह-'स्वयं व्रजेत् क्रय उपवसथ्येवोदङ्ङेव तु गृहेभ्यः प्रथमन्देवो देवमेत्विति' । यः सोम-क्रयस्य दिवसो यश्चोपवसथ्याख्यः सुत्यादिवसात् पूर्वो दिवसस्तयो-रन्यतरस्मिन्दिवसे उद्गाता स्वयमेव देवयजनदेशं गच्छेत्, न त्वन्यं प्रहिणुयात्, गमने त्वास्ति कश्चिद्विशेषः। यद्यपि स्वगृहाद्दक्षिणतो देव-यजनं स्यात्तथापि 'देवो देवमेत्वि'ति मन्त्रेण स्वगृहेभ्यो निर्गच्छन् प्रथमं कतिचित् पदान्यदृष्टार्थमुदङ्मुख एव गत्वा पश्चाद्देवयजनाभि-मुखो भवेत । ऋत्विग्वरणसोमक्रययोर्मध्यवर्तिनमाध्वर्यवं प्रयोगं क्रतु-सङ्ग्रहकारः सूचयामास । ग्रन्थोऽत्र बुद्धिसमाधानायोदाह्रियते ।

अथाग्निष्टोमसंस्थेन ज्योतिष्टोमेन याजयेत् ।
स पूर्वमृत्विजो वृत्वा देवभूमिविनिश्चये ॥
दीक्षणायां निर्वपेत्सोपि पत्नीसंयाजसंस्थितिः ।
कृते प्राचीनवंशेऽथ संस्कारा वपनादयः ॥
हुत्वा दीक्षाहुतीः कार्या दीक्षा कृष्णाजिनादिभिः ।
दीक्षितो नियमैर्युक्तो भवेत् क्षीरव्रतादिभिः ॥
द्वादशाहं दीक्षितोथ भिक्षित्वा द्रव्यमानयेत् ।
सोमञ्चर्मण्यवस्थाप्य विक्रेत्सोमविक्रयी ॥
शंयुवन्ता प्रायणीया स्यादुगृह्णीयात् क्रयणीपदम् ।
क्रीत्वा सोमं रथे क्षिप्त्वा प्राग्वंशाग्रे समानयेत् ॥ इति ॥

मन्त्रपाठस्तु—

देवो देवमेतु सोमः सोममेत्वृतस्य पथा ॥ २ ॥

'देवः' द्योतमानः सोमः 'देवं' दानादिगुणयुक्तं इन्द्रादिकं 'ऋतस्य' यज्ञस्य 'पथा' मार्गेणादावाहुतिप्राणादिनाङ्या 'एतु' प्राप्नोतु । यद्वा दीव्यतिस्तुतिकर्मकादेव स्तोतोद्गाता। अथवा 'पर्जन्यो म उद्गातेति' वर-णमन्त्रे श्रवणात् पर्जन्याख्यदेवतारूप उद्गाता देवं दीप्यमानं फलप्रका-शकं वातयज्ञमृतस्य सम्बन्धिना पथा देवयजनमार्गेणैतु गच्छतु । 'सोमः' अभिषवादिसंस्कृतो रसात्मकः 'सोमं' देवतारूपममृतं द्यु-स्थानं स्वमूर्त्यन्तरं 'एतु' प्राप्नोतु रसात्मकः सोम एवामृतमयो द्युस्थानः सोमो भवत्वित्यर्थः । 'तमेव खलु देवा उपजीवन्ति यम-क्षितिमः क्षितयः पिबन्ति' इति श्रुतेः ॥ २ ॥

द्राह्यायणः-'दूरं व्रजित्वा विहाय दौष्कृत्यमिती'ति। यदि दूरमध्वानं व्रजेत् तदानीमप्रयतदेशातिक्रमणादिकमवर्जनीयं स्यात् ततो यत्किञ्चित् दुष्कृतमवश्यं भवेत् तच्छान्तये विहाय दौष्कृत्यमित्येवं मन्त्रं जपेत्।

विहाय दौष्कृत्यम् ॥ ३ ॥

दुष्कृतस्य भावः दौष्कृत्यं तद्विहाय मनसा परिहृत्य देवयजनं गच्छामीति मन्त्रार्थः ॥ ३ ॥

द्राह्यायणः-'बद्वानामासीति पन्थानमापद्ये'ति। देवयजनस्य समीपवर्त्तिनं पन्थानमासाद्य बद्वेति मन्त्रं जपेत्।

मन्त्रपाठस्तु-

बद्वानामासि सृतिः सोमसरणी सोमं गमेयम् ॥ ४ ॥

हे देवयजनमार्ग! त्वं 'बद्वानामासि' नामाशब्दः प्रसिद्धः प्रसिद्ध्यर्थः। बद स्थैर्य्ये इति धातोरन्येभ्योपि दृश्यन्ते इति वनिप्। बद्वा स्थिर इतरस्माल्लौकिकान्मार्गाद्दृढतर इति प्रसिद्धो भवति, स्थिरफलप्राप्तिहेतोर्यज्ञस्य साधनत्वात्। यद्वा बद्वेत्येषा देवयजनमार्गस्य वैदिकी संज्ञा एतत्संज्ञो भवतीत्यर्थः। अथवा बवर्णस्य व्यत्ययेन यकारस्य स्थाने वकारः। यद्वा नामेत्येव सूत्रं, तदाहापस्तम्बः,-'यद्वा देवयजनं प्रति गन्ता एतत्संज्ञस्त्वमसि। 'सोमसरणी' सोमस्य प्राप्तिसाधनभूता 'सृतिः' मार्गो भवसि। तया सृत्या 'सोमं' सोमयागं 'गमेयं' प्राप्नुयां, गमिधातोर्लिङ्याशिष्यङित्यङ् ॥ ४ ॥

द्राह्यायणः-'उत्तरवेद्यन्तमाक्रम्य दक्षिणमीक्षमाणः पितरोभूरि'ति। देवयजनं प्रविश्यमाणः महावेदिपार्श्वमाक्रम्य 'पितरोभूरिति' मन्त्रेण पितॄनुपतिष्ठेत्। तथा चापस्तम्बः—'पितरोभूरिति दक्षिणावृत्तः पितॄनुपतिष्ठेत' इति। मन्त्रपाठस्तु--

पितरो भूः पितरो भूः पितरो भूः ॥ ५ ॥

हे पितरः! इयं 'भूः' दक्षिणवेद्यन्तलक्षणा भूमिर्युष्माकं निवासायेति शेषः, कर्मसमाप्तिपर्य्यन्तमत्र निवसतेति भावः। त्रिरुक्तिरादरातिशयद्योतनार्था, पितृपितामहप्रपितामहानां त्रित्वापेक्षया वा ॥ ५ ॥

द्राह्यायणः—'युयमुच्छ्रीयमाणमनुमन्त्रयेरन्नृमणऊर्ध्वभरसं त्वेती'ति। अद्धर्य्युर्य्यूपं यदोच्छ्रयेत् तदानीमुद्गातारो नृमणं इत्यनुमन्त्रयेरन्।

अत्रापि पूर्ववत् क्रतुसङ्ग्रहः—

क्रीत्वा सोमं रथे क्षिप्त्वा प्राग्वंशाग्रे समानयेत् ।
आतिथ्यां निर्वपेत्सोममासंद्यामुपसादयेत् ॥
आतिथ्येष्टिरिडन्ता स्यात्तानूनप्त्रमवद्यति ।
दीक्षामवान्तरामेति प्रवर्ग्योपसदोः कृतिः ॥
दिनत्रये तत्कृतं स्याद्वेदिर्मध्यन्दिने भवेत् ।
षट्त्रिंशत्पददीर्घैषा प्राग्वंशात् पूर्वतः स्थिता ॥
प्रातः प्रवर्ग्यमुद्वास्य पश्चादुत्तरवेदितः ।
शकटे द्वे हविर्द्धाने हविर्द्धानञ्च मण्डपम् ॥
पश्चात्सदस्तस्य मध्ये निखातौदुम्बरी मिता ।
दक्षिणस्यानसोधस्तात् गर्तानुपरवान् खनेत् ॥
विधाय फलकाम्यान्तानग्रे कुर्य्यात् मृदा खरम् ।
निर्वपेद्विष्ण्यगानग्नीषोमीयं पशुमाचरेत् ॥
प्रयुज्योचितपात्राणि दर्शवत्सर्वमाचरेत् ।
आज्यमासादिते वेद्या अन्ते यूपं समुच्छ्रयेत ॥ इति ॥

पाठस्तु—

नृमण ऊर्द्धभरसं त्वोर्द्धभरा दृशेयम् ॥ ६ ॥

हे 'नृमण'! नृषु यज्ञस्य नेतृषु यजमानेषु मनोनुग्रहबुद्धिर्यस्य विष्ण्वात्मनो यूपस्य सोऽयं नृमणः एतादृशविष्णुरूपयूप! 'ऊर्द्धभरसं त्वा' ऊर्द्धमुपरिभागेऽध्वर्य्युभिर्भ्रियमाणं त्वामहं 'ऊर्द्धभराः' सन् 'दृशेयं' अनुग्राहकेण त्वया ऊर्द्धमुन्नतगुणोयमिति धार्य्यमाण ऊर्द्धभराः, दृशिधातोर्लिङ्याशिषि अदृिप्राप्ते तदपवादत्वेन दृशेरग्वक्तव्य इत्यक् । अदि तु सति श्वदृशोऽङ्गुणः इति गुणः स्यात् ॥ ६ ॥

द्राह्यायणः—'होता प्रातरनुवाकमनूच्याभूदुषा इति यदा ब्रूयादथ वेदिमाक्रामेयुः मृदाशिथिरेती'ति । उपवसथदिवसस्य मध्यरात्रादूर्द्धं होता प्रातरनुवाकं ब्रूते । तदाहाश्वलायनः—'अथैतस्या रात्रिर्विवासकाले प्रायश्चयसां प्रवादात्प्रातरनुवाकायामन्त्रितो वाग्यतस्तीर्थेन प्रपथेत्यादि' । अध्वर्य्युणामन्त्रितो होता प्रातरनुवाकमनूच्य तस्यावसानगता 'अभूदुषा' इत्येतामृचं यदा ब्रूयात्तदानीमुद्गातृप्रस्तोतृप्रतिहर्तारो 'मृदेते' मन्त्रेण वेदिमाक्रामेयुः । क्रतुसङ्ग्रहस्तु—

यूपस्योच्छ्रयणादूर्ध्वं समाप्य्य पशुं ततः ।
वैसर्ज्जनानि हुत्वाग्निं सोमं ग्रावादि चानयेत् ॥

हविर्द्धाने स्थापयित्वा गृह्णीयाद्वसतीवरीः ।
प्रयुञ्ज्यात्सोमपात्राणि महारात्रे खरादिषु ॥
प्रावस्तुत स्थापिते सोमे पक्षिणां।ध्वनितः पुरा ।
स्यात्प्रातरनुवाकार्थमुपाकरणमादरात् ॥ इति ॥

वेद्याक्रमणमन्त्रपाठस्तु–

मृदा शिथिरा देवानां तीर्थं वेदिरसि मा मा हिंसीः ॥७॥

हे वेद्यात्मिके भूमि !'मृदा' यज्ञायुधेन खाता या मृत्तन्मया'शिथिरा' प्रशिथिलावयवा त्वं 'देवानां' उद्गात्रादीनामृत्विजां देवानामेव वा'तीर्थं' एव तरणस्थानं असि, तथा 'वेदिरसि' असुरैरपहृतानां धनानां लम्भयिष्यसि । 'यत्ताद्वित्तं वेद्यमसुराणां वेद्यमविन्दत तदेकं वेद्यैर्व्वेदित्व'मिति श्रुत्यन्तरात् । उक्तलक्षणां त्वां अधितिष्ठन्तं 'मा मार्हिंसीः'मा बाधस्व॥७॥

द्राह्यायणः–'हविर्द्धानं प्रवेश्यमाना वसतीवरीरनुप्रविशेयुस्तस्य रराट्यामालभ्य विष्णोः शिर इती'ति । अद्धर्य्युणा प्रातरनुवाक उपाकृते प्रतिप्रस्थात्रा सवनीयपुरोडाशेषु निरुप्तेषूपपन्ने जनानामिकास्वप्सु पत्नीसहितासु वसतीवरीनामिका अपोध्वर्य्युर्हाविर्द्धानप्रण्डपं प्रवेशयति । तदानीमुद्गात्रादयस्त्रयो 'विष्णोः शिर' इति मन्त्रेण रराट्यां हस्तस्पर्शं कृत्वा हविर्द्धानमण्डपं पूर्व्वया द्वारा प्रविशेयुः । रराटीनाम हविर्द्धानस्योपरि स्थिता काचित् काशमयी यष्टिरिति सत्याषाढ़ आह । पाठस्तु--

विष्णोः शिरोसि यशोधा यशो मयि धेहि ॥ ८ ॥

हविर्द्धानमण्डपो विष्णुदेवताकत्वात् विष्णुदेवता विष्णुत्वेनोपचर्य्यते, 'वैष्णवं हि देवताया हविर्द्धान'मिति श्रुतेः । विष्णुदेहत्वेनोपचरितस्य हविर्द्धानस्य पूर्व्वस्मिन् द्वारे तिर्य्यगवस्थिता यष्टिर्ललाटवद्वर्त्तते, अत एव तदवस्थानकरणभूतो मन्त्रोध्वर्य्युशाखायामेवमाम्नायते 'विष्णोरराटमसीति' ललाटस्य शिरोभागवर्त्तित्वं प्रसिद्धम् । अतो रराटीं प्रति विष्णोः शिरोसि इत्युच्यते । हे रराटि ! त्वमचेतनापि सती यशोधा असि विष्णुशिर इत्येवम्भूतस्य यशसो धारयित्री भवसि तस्मात्त्वदीयस्पर्शं कुर्वति 'मयि' 'यशः' उद्गात्रे कुशल इति तादृशन्धेहि धारय सम्पादय ॥ ८ ॥

द्राह्यायणः–इष ऊर्ज्ज इति प्रविशन्त इति । उद्गातारो हविर्द्धानं प्र-

विशन्त 'इष ऊर्ज्ज' इति मन्त्रं जपेयुः । पाठस्तु--

इष ऊर्ज्ज आयुषे वर्चसे च ॥ ९ ॥ १ ॥ १ ॥

इडन्नम्, ऊर्गासः क्षीराज्यादिः, आयुः प्रसिद्धं, वर्च्चो वेदशास्त्राणि विज्ञतत्त्वं रूपं ब्रह्मवर्च्चसं, चकारात् पुत्रपौत्रादयः, सर्वसम्पत्त्यर्थं हविर्द्धानं प्रविशामीति शेषः ॥ ९ ॥ १ ॥ १ ॥

इति ताण्ड्यब्राह्मणे प्रथमाध्यायस्य प्रथमखण्डः ।

अथ द्वितीयः खण्डः ।

द्राह्यायणः 'अन्तरेणेषे बाहूनवहृत्य पार्ष्णीरनुद्यच्छन्तो युनज्मीति राजानमभिमृशेयुर्यः प्रातःसवनीयाविभक्तश्चेत् सर्वन्न चेत्प्राप्नुयुर्देशेनैवेति । हविर्द्धानमण्डपे दक्षिणशकटस्याधस्तात् पश्चिमभागेऽभिषवार्थं सोमोवस्थापितो वर्त्तते । तं सोमं हस्तैः स्पृष्टमुद्गात्रादयो मण्डपं प्राविशन् प्रविश्य शकटस्य ये द्वे ईषे दीर्घकाष्ठे विद्येते तयोर्मध्य उद्गात्रादयः स्वकीयदक्षिणाबाहूनधः प्रसार्य्य सोमं स्पृशेयुः तदर्थोऽयं 'युनज्मीति'मन्त्रः । यदा शकटस्योन्नतत्वेनाधः प्रसारितानां बाहूनां दैर्घन्न पर्य्याप्तं स्यात् तदानीं स्वपादानां पार्ष्णिभागानुद्यम्य पादाग्रैर्भूमाववस्थानं प्रसज्यते, तन्माभूदिति पार्ष्णीरनुद्यच्छन्त इत्युक्तम । स सोमः प्रातःसवनाय विभक्तश्चेत्, तदा तावन्तमेव स्पृशेयुः, अविभागे तु सर्वस्यापि सोमस्य स्पर्शः । स्पृशन्न प्राप्नुयुश्चेत्तदा देशप्राप्तिमात्रेणैवालम्भः स्पर्शे विवक्षितः । पाठस्तु--

युनज्मि ते पृथिवीमग्निना सह युनज्मि वाचं सह सूर्य्येण युक्तो वातोन्तरिक्षेण ते सह युक्तास्तिस्रो विमृजः सूर्य्यस्य ॥ १ ॥

हे सोम ! आहवनीयादिरूपेण 'अग्निना सह' वेदिरूपामिमां 'पृथिवीं' 'ते'त्वदर्थं'युनज्मि'यकारश्छान्दसार्थः,युनज्मीत्येवं शाखान्तरपाठः,त्वया संयुक्तां करोमि । अग्निवेद्योस्त्वसंयोगे सति तद्विषयो यागो न निष्पद्यते । तथा 'सूर्य्येण सह' 'वाचं' मन्त्ररूपां युनज्मि योजयामीति अन्तर्भावितण्यर्थो युजिधातुर्द्रष्टव्यः । सूर्य्यसंयोगकालसापेक्षे प्रातःसवनादावुपयुज्यते वाक्ययोगेन स्तोत्रशस्त्रादिसिद्धिः । तथा 'अन्तरिक्षेण सह' 'वातः'वायुः 'ते'त्वदर्थं 'युक्तः'योजितः वायुसङ्गेन वह्निः प्रज्वाल्यते

अन्तरिक्षसंयोगेन प्रवर्ग्यज्वालादेरवकाशः सम्पद्यते यथा 'सूर्य्यस्य' सम्बन्धिन्यः 'विभृजः' विशेषेणान्धकारस्य भर्जने विनाशने समर्थास्तिस्रः लोकत्रयप्रकाशिकाः । यद्वा 'त्रीणि वा आदित्यस्य तेजांसि वसन्ते प्रातः ग्रीष्मे मध्यन्दिने शरदपराह्णे' इति श्रुत्यन्तरोक्तास्तिस्रो दीप्तयो 'युक्ताः' योजिताः । यद्यप्येतत्सर्वं लोके स्वत एव सिद्धं तथाप्युद्गातॄणां मन्त्रपूर्वकानुस्मरणेन सोमः संस्कृतो भवति ॥ १ ॥

द्राह्यायणः–'दक्षिणस्य हविर्द्धानस्य पश्चात् सव्यावृत उपविशेयुरृतस्य सदन' इति । सव्यावृतः सव्येन पार्श्वेनावर्त्तमानाः । पाठस्तु—

ऋतस्य सदने सीदामि ॥ २ ॥

'ऋतस्य' सोमस्य अवश्यं फलसाधनत्वात्सोमः सत्यः, सत्यसम्बन्धिनि 'सदने' समीपवर्त्तिस्थाने 'सीदामि' उपविशामि ॥ ॥

द्राह्यायणः–'अभिषुते राजन्यृतपात्रमसीति द्रोणकलशमालभ्येति' । राजनि सोमे ग्रावभिरभिषुते सत्युद्गात्रादयः ऋतपात्रमसीत्यनेन मन्त्रेण द्रोणकलशमुपस्पृश्य प्रोहेयुरिति वक्ष्यमाणेनान्वयः ।

ऋतपात्रमसि ॥ ३ ॥

हे द्रोणकलश ! त्वं 'ऋतपात्रं' सोमपात्रं 'असि' इति मन्त्रार्थः ॥ ३ ॥

द्राह्यायणः–'वानस्पत्य इति प्रोहेयुरिति' । शकटगताक्षस्य पश्चादवस्थितं द्रोणकलशं त्रय उद्गात्रादयः स्वहस्तैरधोदेशे तस्मादक्षात् प्राञ्चं प्रोहेयुः, प्राग्देशे यथावस्थितो भवति तथा कुर्य्युः । पाठस्तु–

वानस्पत्योसि बार्हस्पत्योसि प्राजापत्योसि प्रजापतेर्मूर्द्धास्यत्यायुपात्रमसीदमहं मां प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्च्चसाय ॥ ४ ॥

हे द्रोणकलश ! त्वं 'वानस्पत्योसि त्वं वृक्षसम्बन्धी भवसि काष्ठविशेषनिर्म्मितत्वात् । तथा 'बार्हस्पत्योसि' बृहस्पतेः सम्बन्धी भवसि चतुर्विंशतिरात्रकन्नाम सोमयागरूपं सत्रमनुतिष्ठता बृहस्पतिना सम्पादितत्वात् सम्बन्धो द्रष्टव्यः । तदनुष्ठानं चाध्वर्युशाखायामाम्नातम–'बृहस्पतिरकामयत सम्मोद बादधीर गच्छेयुः पुरोधामिति, स एवं चतुर्विंशतिरात्रमपश्यत्तमाहरत्तेनायतेति । यद्वा देवानां यज्ञे बृहस्पतेरुद्गातृत्वात्तत्सम्बन्धः–'बृहस्पतिर्देवानामुद्गाता तदेव तदनुकीर्तिति' । 'प्राजापत्योसि' प्रजापतेः सम्बन्धी भवसि तत्सम्बन्धश्चाध्वर्योर्द्रोण

कलशाभिमर्शनमन्त्रेऽवगम्यते । तथा चाध्वर्युशाखायामाम्नायते—'उपयामगृहीतोसि प्रजापतये वेति द्रोणकलशमभिमृशेदिति' । प्राजापत्यो ह्येष देवतया यत् द्रोणकलश इति ब्राह्मणम् । 'प्रजापतेर्मूर्द्धाऽसि' अस्य तन्मूर्द्धत्वं ब्राह्मणे समाम्नातम् । प्रजापतिरकामयत बहुस्यां प्रजायेयेति सोऽशोचत्तस्य शोचत आदित्यो मूदूर्ध्नोसृज्यत सोस्य मूर्द्धानमुदहरन् स द्रोणकलशोऽभवत् इति, अन्योर्थऽबाहुल्येनागच्छति सोमोस्मिन्द्रोणकलशपात्रे ततस्त्वं 'अत्यायु' नाम्नाभिधेयं 'पात्रमसि' 'इदं' सर्वेषां प्रत्यक्षं यथा 'अहं' उद्गाता इमं द्रोणकलसं 'प्राञ्चं' पूर्वदिग्गामिनं तन्वा 'प्रोहामि' । तच्च प्रोहणं मम 'तेजसे' शारीरकान्तये 'ब्रह्मवर्चसाय' श्रुताध्ययनसम्यत्तये च भवतु ॥ ४ ॥

द्राह्यायणः—'तानभिमृश्य जपेयुर्मरुत इती'ति । अभिषवसाधनभूता ग्रावाण उद्गात्रादिभिरेकत्र योजितत्वेन प्राक्तनत्वात्तच्छब्देन परामृश्यन्ते । तान् ग्रावाणो हस्तैरभिमृश्योद्गात्रादयो 'मरुत' इत्यादिकं मन्त्रं जपेयुः । पाठस्तु—

मरुतो नपातोऽपङ्क्षयाः पर्वतानाङ्कुभः श्येना अजिरा एन्द्रं वग्नुना वहत घोषेणामीवां चातयध्वं युक्तास्थ वहत ॥ ५ ॥

हे ग्रावाणः ! यूयं मरुद्बलात् 'नपातः' न पतीति नपात् तस्य बहुवचनं नपात इति । यथा वृक्षगतपर्णादीनि वायुबलेन पात्यन्ते न तथा ग्रावाणः । यद्वा मरुतो मितराविणः नपातो यज्ञस्य नपातयितारो रक्षकाः । 'अपां' जलानां क्षयाः निवासस्थानभूताः नदीमध्ये घर्मकालेपि तत्र पाषाणानां सन्धिषु जलन्निवसति । तथा 'पर्वतानाङ्कुभः' शृङ्गभूताः, ककुभं शृङ्गे विन्दुः प्रधानेपि च निघण्टे । 'श्येनाः' एतन्नामकपक्षिसदृशाः शंसनीयगमनाद्वा । 'अजिराः' क्षिप्रनामैतत् क्षिप्रगमना, 'एन्द्रं' 'वहत' उक्तलक्षणा यूयं सोमयागार्थमिन्द्रमाह्वयत, केन साधनेन 'वग्नुना' वचनेन वाक्यसदृशेन ध्वनिनेत्यर्थः । ग्रावाणां सोमाभिषवध्वनिं श्रुत्वा इन्द्र आहूत इव शीघ्रमागच्छति । घोषेण भवदीयेनोग्रध्वनिना 'अमीवान्' रोगवदुपद्रवकारिणोऽसुरान् 'चातयध्वं' पराभूतान् कुरुध्वम्, अत एव तैत्तिरीया आमनन्ति—'श्रद्धा देवस्य यजमानस्यासुरघ्नीवाक्रतुः यज्ञायुधेषु प्रविष्टासीत्, तेसुरायादन्तो यज्ञायुधानामुद्वहतामुपाशृण्वन् ते पराभवन्निति' 'युक्तास्थ वहत' इन्द्रमाहूयासुरांश्च पराभाव्य ततो द्रोणकलशं वोढुम्परस्परं संयुक्ता भवत संयुज्य च कलशं वहत ॥ ५ ॥

द्राह्यायणः-'पश्चाद्दक्षिणतो वा द्रोणकलशमध्यूहेयु'रिदमहममुमिती'ति। युक्तानां ग्रावाणामुपरिष्टाद् द्रोणकलशं पश्चादारभ्य प्राञ्चं दक्षिणत आरभ्योदञ्चं वा स्थापयेयुः। पाठस्तु—

इदमहममुं यजमानं पशुष्वध्यूहामि पशुषु च मां ब्रह्मवर्चसे च ॥ ६ ॥

'इदं' प्रत्यक्षं यथाभवति तथा 'अहं' उद्गाता 'अमुं' परतो दृश्यमानं, इममिति केषांचित्पाठः। 'यजमानं' 'पशुषु' गोषु 'अध्यूहामि' उपरि स्थापयामि। कलशाध्यूहनप्रसादात् मया यजमानेन च पशवो लभ्यन्तामित्यर्थः, न केवलं पशुलाभः किन्तु ब्रह्मवर्चसनिमित्तमप्येतदध्यूहनं भवतु ॥ ६ ॥

द्राह्यायणः-'पवित्रेण द्रोणकलशꣳ संमृज्याद्वसवस्त्वेति बुध्नꣳ रुद्रास्त्वेति मध्यमादित्यास्त्वेति बिलमितीति। दशापवित्रनामको यो वस्त्रखण्डस्तेनोद्गाता द्रोणकलशमूलमध्यबिलभागान् मन्त्रगतैस्त्रिभिः भागैः शोधयेत्। पाठस्तु--

वसवस्त्वा गायत्रेण छन्दसा संमृजन्तु रुद्रास्त्वा त्रैष्टुभेन छन्दसा संमृजन्त्वादित्यास्त्वा जागतेन छन्दसा संमृजन्तु ॥ ७ ॥

स्पष्टार्थः ॥ ७ ॥

द्राह्यायणः-'अवधूय पवित्रमुदग्दशमवाङ्नाभिर्वितनुयुः पवित्रन्त इती'ति। दशापवित्रस्य मध्ये शुक्ला पूर्णा स्रुवं सोमधाराश्रावणार्थं यजमान आबध्नाति सा नाभिरित्युच्यते। उदीचीनदशमवाचीननाभि च दशापवित्रं कृत्वा द्रोणकलशस्योपरिष्टादुद्गात्रादयस्त्रयो वितनुयुः वितन्य च दशापवित्रस्य कोणान् धारयेयुः। तथाच ब्राह्मणं 'पवित्रं विगृह्णाती'ति।

पाठस्तु -

पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतो तप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सन्तदाशतः ॥ ८ ॥

हे ब्रह्मणस्पते मन्त्रस्य स्वामिन् सोम! ते 'पवित्रं' शोधकमन्त्रं 'विततं' सर्वत्र विस्तृतं सः 'प्रभुः' प्रभविता त्वं 'गात्राणि' गातुरङ्गानि 'पर्येषि'

षि' परिगच्छसि। 'विश्वतः' सर्वतस्तव 'तत्' पवित्रं 'अतप्ततनूः' पयोव्रतादिना असन्तापितगात्रः 'अग्निः' अपरिपक्वः 'न अश्नुते' न व्याप्नोति। 'शृतास इत्' शृता एव परिपक्वा एव 'वहन्तः' 'तत्' पवित्रं 'आशत' व्याप्नुवन्ति८

द्राह्यायणः—'सन्तातायां धारायामुद्गाता जपेत् प्रशुक्रैत्विति'। दशापवित्रस्योपरि सोमरसस्य धारा सन्तता श्राव्यते तदानीमुद्गाता प्रशुक्रैत्विति मन्त्रं जपेत्।

पाठस्तु—

प्रशुक्रैतु देवी मनीषास्मद्रथः सुतष्टो न वाज्यायुषे मे पवस्व वर्चसे मे पवस्व विदुः पृथिव्या दिवो जनित्राच्छृण्वन्त्वापोधः क्षरन्तीः सोमेहोद्गाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्पर्ध्या अमुष्य राज्याय ॥९॥१॥२॥

'शुक्रा' शुद्धा निर्मला 'देवी' द्योतनात्मिका 'मनीषा' स्तुतिः 'अस्मत्' अस्मत्तः 'प्रैतु' प्रगच्छतु सोमम्। तत्र दृष्टान्तः 'रथो न' रथ इव कश्चिदृशः 'सुतष्टः' सुष्ठु, तत्क्षणक्रियया निष्पादितः। 'वाजी' वेगवान् उग्रबुद्धिं परित्यज्य 'मे' ममोद्गातुः 'आयुषे' आयुर्वृद्ध्यर्थं 'पवस्व' पूतो भव। तथा 'मे वर्चसे' ब्रह्मवर्चसनिमित्तं पूतो भव। 'पृथिव्या दिवः' च 'जनित्रात्' यागद्वारेण उत्पादकादृशापवित्रात् 'अधः क्षरन्तीः' क्षरन्त्यः 'आपः' सोमरसात्मिकाः 'विदुः' अस्मदीयां मनीषां जानन्तु तदर्थं 'शृण्वन्तु' हे 'सोम' त्वं 'इह' अस्मिन् कर्मणि 'उद्गाय' उद्गानं कृत्वा उरुधारया पूयमानस्य सोमस्य शब्द उद्गीथत्वेन स्तूयते। श्रूयते हि 'एष वै सोमस्योद्गीथो यत्पवन इति'। यदुद्गातृत्वं त्वया कृतं तत्र 'मम' उद्गातुरायुर्वृद्ध्यर्थं सम्पद्यते। तथा 'मम' ब्रह्मवर्चसार्थं सम्पद्यते। तथा यजमानस्य धनधान्यादिसमृद्ध्यै सम्पद्यते। 'अमुष्यराज्याय' अमुष्य राज्ञो राज्याय अमुष्येत्यस्य स्थाने तस्य राज्ञो नाम निर्देष्टव्यम्। तत्र बुद्ध्यन्यतरस्यां सोमस्य राज्ञो राज्यायेति इत्येव निर्देष्टव्यमिति सिद्धान्ततत्वात् सूत्रकार आह 'अमुष्य राज्यायेति' प्रियꣳराजानमादिशेद्राज्ञो राज्यायेति वा सोमस्येत्येवं ब्रूयात्सोमराजानो हि ब्राह्मणा इति। क्षत्रियवैश्ययोरपि दीक्षया ब्राह्मणत्वात् सोमस्येत्येव तयोरपि निर्देशः। 'ब्राह्मणो वा एष जायते यो दीक्षित' इति श्रुतेर्ब्राह्मणत्वमवसीयते। अत एव सूत्रान्तरं 'तस्माद्राजन्यवैश्यावपि ब्राह्मण इत्येवावेदयती'ति॥९॥१॥

इति द्वितीयखण्डः।

अथ तृतीयः खण्डः ।

द्राह्यायणः—'अध्वर्य्युणा हुते प्रवृत्तहोमौ जुहुयुर्गत्यानुपूर्वेण वेकुरा-णामासि सूर्य्योमेती'ति । अध्वर्य्युणा वै एषु होमेषु हुतेषूद्गातारस्त्र-योपि प्रवृत्तहोमौ जुहुयुः । प्रस्तोता प्रथमं ततः उद्गाता ततः प्रतिहर्त्तेति एवं प्रसर्पणक्रमेण जुहुयुः प्रथममन्त्रो वाग्देवत्यः । तत् पाठस्तु—

वेकुरानामासि जुष्टा देवेभ्यो नमो वाचे नमो वाच-स्पतये देवि वाग्यत्ते वाचो मधुमत्तस्मिन्माधाः सरस्व-त्यै स्वाहा ॥ १ ॥

हे सरस्वति ! त्वं 'वेकुरा' विकिर्य्यात्मिकर्मा नामशब्दः प्रसिद्धौ सर्वत्र व्यापनात् वेकुरेति प्रसिद्धा भवसि । 'देवेभ्यः' तेषामर्थाय 'जुष्टा' स्तोतृभिः स्तुता 'असि', तस्यै 'वाचे' वाग्देवतायै 'नमः' अस्तु 'वाचस्पतये' ब्रह्मणे 'नमः' अस्तु । हे 'देवि' ! द्योतमाने हे वाग्देवते ! 'ते' तव 'वाचः' शब्दराशेः 'यत् मधुमत्' अतिशयेन माधुर्य्योपेतं वस्त्विति तत् 'तस्मिन्' 'माधाः' निधेहि स्थापय तस्यै 'सरस्वत्यै' 'स्वाहा' इदं हविस्त्यजामि । स्वाहेति हविस्त्यागार्थो निपातः ॥ १ ॥

द्वितीयमन्त्रपाठस्तु—

सूर्य्यो मा दिव्याभ्यो नाष्ट्राभ्यः पातु वायुरन्तरिक्षा-भ्यो ग्निः पार्थिवाभ्यः स्वाहा ॥ २ ॥

'सूर्य्यः' सर्वस्य प्रेरको द्युस्थानो देवः 'मा' मां 'दिव्याभ्यः' दिवि भवाभ्यः 'नाष्ट्राभ्यः' नाशकारिभ्यो रक्षोजातिभ्यः 'पातु' 'वायुः' अन्तरिक्षस्थानः 'अन्तरिक्षाभ्यः' तत्रोत्पन्नाभ्यः नाष्ट्राभ्यः पातु । तथा 'अग्निः' भूस्थानः 'पार्थिवाभ्यः' नाष्ट्राभ्यः पातु 'स्वाहा' । तेभ्यः सूर्य्यादिभ्यो हविस्त्यजामि ॥ २ ॥

द्राह्यायणः 'सव्यैः पाणिभिः पृथग्दक्षिणा तृणानि निरस्येयुर्य्योद्य सौम्य इती'ति । वहिष्पवमानस्तोत्रार्थं अध्वर्य्युमनुचात्वालसमीपे प्रसर्पन्तस्त्रयोपि स्वकीयैर्वामहस्तैर्मार्गस्थितानि तृणानि दक्षिणस्यां दिशि निरस्येयुः । दक्षिणैस्तृणैरग्नारम्भविधानात् सव्यैरित्युक्तम् । पाठस्तु—

योऽद्य सौम्यो वधोघायूनामुदीरते विषूकुहस्य धन्वनाप तान् वरुणोऽपधमत् ॥ ३ ॥

'अद्य' अस्मिन्नहनि 'अघायूनां' अघं हिंसामायतस्य 'धन्वना' मार्गेण अन्यैरविज्ञायमानेन नोद्गच्छतीत्यर्थः । 'तान्' वचनव्यत्ययः इच्छतां सम्बन्धी 'सौम्यः' सोमविषयः 'वधः' हिंसा तत्साधनं वा दूषणात्मकः 'उदीरते' उद्गच्छति ईर गतौ अदादिकः 'बहुलं छन्दसी'ति शपो लुगभावः । वधप्राप्तिसाधनमाह 'विषूकुहस्य' विषू विष्वक् सर्वतः कुहना वञ्चना यस्य स तथोक्तः तादृशस्य 'वरुणः' दुष्कृतात्तारको देवः 'अपघमत्' घमतिर्वधकर्मा अपहन्त्वित्यर्थः ॥ ३ ॥

द्राह्यायणः—'चात्वालदेशं प्राप्याध्वर्य्वावुपविष्टे तस्मात् प्रत्यगुपविशेयुर्य्योम आत्मेति स्पष्टार्थः । पाठस्तु—

यो म आत्मा या मे प्रजा ये मे पशवस्तैरहं मनो वाचं प्रसीदामि ॥ ४ ॥

'मे' मनोद्गातुः सम्बन्धी 'यः आत्मा' शरीरास्थितो जीवोस्ति । 'या' च मदीया 'प्रजा' पुत्रभृत्यादिरूपा 'ये' च मदीयाः 'पशवः' गोमहिष्यादयः 'तैः' सर्वैः सहिताः 'अहं' 'मनो वाचौ' समाधाय 'प्रसीदामि' प्रसन्नो भूत्वोपविशामि ॥ ४ ॥

द्राह्यायणः—प्रस्तरं प्रतिगृह्य प्रस्तोता ब्रह्मन् स्तोष्यामः प्रशास्तरित्युद्गात्रे प्रयच्छेत्तेन दक्षिणाञ्जङ्घामुपहत्य युञ्ज्यात् स्तोममग्ने स्तेजसेती'ति । उपवेशनानन्तरमध्वर्य्युणा दत्तं प्रस्तरं प्रतिगृह्योद्गात्रे प्रयच्छेत्तेन प्रस्तरेण स्वकीयां जङ्घां उपस्पृश्य उद्गाता स्तोमं युञ्ज्यात् । मन्त्रोच्चारणमेव स्तोमयोगः । तत्पाठस्तु—

अग्नेस्तेजसेन्द्रस्येन्द्रियेण सूर्य्यस्य वर्चसा बृहस्पतिस्त्वा युनक्तु देवेभ्यः प्राणायाग्निर्युनक्तु तपसा सोमं यज्ञाय वोढवे दधात्विन्द्र इन्द्रियꣳ सत्याः कामा यजमानस्य सन्तु ॥ ५ ॥

हे सोम ! त्रिवृदादिलक्षणं 'त्वां' 'बृहस्पतिः' देवः 'देवेभ्यः' तेषामर्थायाग्नीन्द्रसूर्य्याणां सम्बन्धिभिस्तेजइन्द्रियवर्चोभिः 'युनक्तु' योजयतु । तेजआदिशब्दैरग्न्यादिदेवतानां सामर्थ्यानि विवक्षितानि । तथा 'प्राणाय'ऋत्विग्यजमानप्राणरक्षणार्थं 'अग्नेस्तपसा' प्राणघातिवैरिसन्तापसामर्थ्येन 'स्तोमं' योजयतु, किमर्थं 'यज्ञाय वोढवे' यज्ञं वोढुं तथा 'इन्द्रोपि इन्द्रियं' सामर्थ्यं 'दधातु स्तोमं स्थापयतु उक्तद्वयं सूर्य-

वर्चसा युनक्त्वित्यस्याप्युपलक्षणम् । 'यजमानस्य कामाः' काम्यमानाः आशिषः 'सत्याः' 'सन्तु' यथार्था भवन्तु ॥ ५ ॥

द्राह्यायण 'अन्नङ्करिष्यामीति जपेदिति स्तोमयोगादूर्द्ध्वमेतस्य मन्त्रस्य जपः । पाठस्तु--

अन्नं करिष्याम्यन्नं प्रविष्याम्यन्नञ्जनयिष्यामि ॥ ६ ॥

अनेन स्तोत्रेणाहमुद्गाता बहुप्राण्युपकाराय प्रसूतं 'अन्नं करिष्यामि' तच्च 'अन्नं प्रविष्यामि' भूतिः समृद्धिःसमृद्धं करिष्यामि । तत् 'अन्नञ्जनयिष्यामि' जनने व्रीह्यादिरूपेण पुनः पुनः प्ररोहणे हेतुत्वेन करिष्यामि ॥ ६ ॥

द्राह्यायणः-'अन्नमकरमिति स्तुत्वा जपेत्' । बहिष्पवमानस्तोत्रादूर्द्ध्वं अयं जपः । पाठस्तु--

अन्नमकरमन्नमभूदन्नमजीजनम् ॥ ७ ॥

स्तोत्रसामर्थ्यमन्नसमृद्धेर्निश्चितत्वाद्भूतार्थप्रयोगः ॥ ७ ॥

द्राह्यायणः-'श्येनोसीति प्रस्तरे यजमानं वाचयेदिति' । प्रस्तरे प्रस्तरे स्पर्शं कारयित्वेति शेषः । पाठस्तु—

श्येनोऽसि गायत्रछन्दा अनु त्वारभे स्वस्ति मा सम्पारयामा स्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥ ८ ॥

हे बहिष्पवमान ! त्वं गायत्राख्यं छन्दो विशिष्टः सन् 'श्येनः' श्येनाख्यपक्षिसदृशः 'असि' तथा प्रबलोसीत्यर्थः । 'त्वा' तथाविधं त्वां 'अन्वारभे' आनुकूल्येन स्पृशामि 'स्वस्ति' क्षेमो विघ्नाभावरूपो यथा भवति तथा 'मा'मां 'सम्पारय' सम्यग्यज्ञस्य पारन्नय 'स्तोत्रस्य' बहिष्पवमानरूपस्य यतः स्तोत्रमात्रमाज्यपृष्ठादिकमनन्तरभावित्वेन सम्बद्धमस्ति। यद्वा 'स्तोत्रस्य स्तोत्रं' प्रशस्तं स्तोत्रं बहिष्पवमानादिकं तन्मा 'मागम्यात् 'आगच्छतु 'इन्द्रवन्तः' बहिष्पवमानदेवतारूपेणेन्द्रेण तद्वन्तो वयं 'वनेमहि' सर्वाः स्तोत्रदेवता सम्भजेमहि । तत्प्रसादात् 'प्रजां' पुत्रादिरूपां 'इषं' इष्यमाणमन्नं च 'भक्षीमहि' न तु भजेमहि ॥ ८ ॥

द्राह्यायणः-'संवर्चसेतीक्षकान् सहकारिणश्च प्रेक्षमाणो जपे'दिति । स्तोत्रप्रयोगं द्रष्टुमागता ईक्षकाः प्रस्तोत्रादयः उपगातारः सहकारिणस्तान् सर्वान् प्रेक्ष्यमाण उद्गाता संवर्चसेति मन्त्रं जपेत् । पाठस्तु—

संवर्चसा पयसा सन्तपोभिरगन्महि मनसा सꣳ

शिवेन संविज्ञानेन मनसश्च सत्यैर्यथा वोऽहं चारुतमं वदानीन्द्रो वो दृशे भूयास॰ सूर्य्यश्चक्षुषे वातः प्राणाय सोमो गन्धाय ब्रह्म क्षत्राय ॥ ९ ॥

हे ईक्षकाः प्रस्तोत्रादय उपगातारश्च ! 'वर्चसा' ब्रह्मवर्चसेन 'समगन्महि' वयं सङ्गता अभूम, तथा 'पयसा'दक्षिणारूपाणां गवां हि क्षीरेण समगन्महि । तथा कर्मानुष्ठानरूपै'स्तपोभिः' समगन्महि । तथा 'शिवेन' मङ्गलेन आस्तिक्ययुक्तेन समगन्महि। तथा 'मनसा' सम्बन्धिभिः सत्यैर्यथार्थभूतैः संकल्पैश्च । किञ्च 'यथा वः' युष्माकं 'चारुतमं' अतिशयेन रमणीयं 'वदानि' तथा वचसो विवृत्या युज्ये । 'वः' युष्माकं 'दृशे' दर्शनाय । 'इन्द्रः' इति लुप्तोपमं इन्द्रं इन्द्र इवाहं दर्शनीयो 'भूयासं' 'सूर्य्यः' इव 'चक्षुषे' तेजसे 'वातः' वायुरिव 'प्राणाय' प्राणनाय जीवनाय 'सोमो गन्धाय' सोम इव गन्धाय सोमो रसात्मको गन्धाय भवति शुष्काणां गन्धानुपलब्धेः 'ब्रह्म' इव ब्राह्मण इव पुरोहितः 'क्षत्राय' बलाय क्षत्रियाय वा भूयासमिति सर्वशेषः ॥९॥

द्राह्यायणः—'नमो गन्धर्वायेत्यादित्यमिति' प्रेक्षमाणो जपेदिति तत्रानुषज्यते । पाठस्तु—

नमो गन्धर्वाय विष्वग्वादिने वर्चोधा असि वर्चो मयि धेहि ॥ १० ॥

'गन्धर्वाय'गावो वृष्टुदकानि रश्मयो वा तान् धारयतीति गन्धर्वः आदित्यस्तस्मै 'नमः' अस्तु । गवि वान्ध्रिशेव इति गोशब्द उपपदे ध्रिञो धातोर्घप्रत्यये उपपदस्य च गम्भावे गन्धर्वशब्दो व्युत्पन्नः । कथंभूताय च 'विष्वग्वादिने' वातिर्गतिकर्मा विष्वक् सर्वान्वा वादित्रे ईदृशस्त्वं 'वर्चोधाः' च वर्चसस्तेजसो धारयिता 'असि' अतो मयि उद्गातरि 'वर्चः' तेजः 'धेहि' निधेहि ॥ १० ॥

इति तृतीयखण्डः ।

अथ चतुर्थ खण्डः।

सवनीयपशोर्वपायाꣳ हुतायां सदः प्रविशन्तो धिष्ण्यानुपतिष्ठेरन्। अध्वनामिति सूत्रकारेण रौरुकिशाखोक्तानि यजूꣳषि यदा प्रयुञ्जीरन् तदाऽनेन मन्त्रेण आदित्योपस्थानमिति विकल्पेनोक्तम्। अन्ये तु ताण्डिशाखाधीतानां यजुषां प्रयोगेपि आम्नानसामर्थ्यात् जैमिनिना तथैव विनियुक्तत्वाच्च अनेनादित्यमुपस्थाय इत्याहुः। पाठस्तु—

अध्वनामध्वपते स्वस्ति मेऽद्यास्मिन् देवयाने पथि भूयात् ॥ १ ॥

हे अध्वनामध्वपते! हे मार्गाणां मध्यमः प्रशस्तोन्तरिक्षमार्गः तस्य स्वामिन्! यद्वा एकोध्वशब्दोऽनुवादः अध्वनां पतिरित्यर्थः। वसवो वसुपते वसूनामिति वत् 'मे'मम 'अस्मिन् देवयाने' देवान् येन यज्ञाख्येन मार्गेण यान्ति प्राप्नुवन्ति तस्मिन् यज्ञाख्ये 'पथि' मार्गे अथेदानीं 'स्वस्ति' क्षेमः भूयात् ॥ १ ॥

द्राह्यायणः-'सम्राडसीत्याहवनीयमुपस्थायेति उत्तरवेदेः पश्चादवस्थायोत्तरवेदिक्रमादाहवनीयमुपस्थायेति'। उत्तरवेदेः पश्चादवस्थायोत्तरवेदिक्रमादाहवनीयमुपतिष्ठेरन्। पाठस्तु—

सम्राडसि कृशानुः ॥ २ ॥

हे आहवनीय! त्वं 'सम्राट्' सम्यग्राजमानो दीप्यमानः सन् 'कृशानुः' सर्वस्य कर्शयिता तनूकर्त्ता दाहको भवसि कृश तनूकरणे अस्मात् उणादिको अनुक्प्रत्ययः ॥ २ ॥

द्राह्यायणः-'उदञ्चोगत्वाऽस्ताव चात्वालशामित्रान् उदङ्मुखस्तुथो नभोऽसंमृष्ट इति। उदङ्मुखाः तिष्ठन्तः ततः आस्तावदेशं चात्वालं शामित्रं स्तुत्यादिभिर्मन्त्रैर्यथाक्रममुपतिष्ठेरन्। पाठस्तु—

तुथोसि जनधायो नभोसि प्रतक्वाऽसंमृष्टोसि हव्यसूदनः ॥ ३ ॥

हे आस्तावदेश! त्वं 'जनधायः' जनानां धारकः 'तुथः' तुद्यतेर्वधकर्मणस्तुथः रक्षःप्रभृतीनां हन्ता। यद्वा तुक्षिप्रं थर्वति गच्छति देवानिति तुथः थर्वतिर्गतिकर्मा एतत्संज्ञोसि। हे चत्वाल! त्वं 'नभः' चात्वालादुत्तरवेद्यादिकान् धिष्ण्यानुपयान्ति तेन गतमृत्तिकत्वादवकाशरूपत्वेनान्तरिक्षमसि, 'प्रतक्वा' प्रकर्षेण तक्वा स्वावयवैः पांशुभिः सर्वान्

धिष्ण्यान् प्रविशन्नसि तकातिर्गतिकर्मा । हे शामित्रदेश ! त्वं 'हव्यसूदनः' हव्यानां हविषां हृदयाद्यङ्गानां सूदकः अत एव 'असंमृष्टः' हविःसंस्कारत्वेन स्वत एव शुद्धत्वात् सम्मार्जनसंस्कारानिरपेक्षोसि ॥ ३ ॥

द्राह्यायणः-'विभुरसीत्याग्नीध्रीयमुपतिष्ठेरन्' । पाठस्तु—

विभुरसि प्रवाहणः ॥ ४ ॥

हे आग्नीध्रीय ! त्वं 'विभुः' विभविता होत्रीयादिधिष्ण्यप्राप्त्या विभूतिमानसि । आग्नीध्रीयादिधिष्ण्येष्वग्नयो विधिप्रन्ते 'आग्नीध्रीयाद्धिष्णियान्निर्हरतीति' श्रुत्यन्तरम् । अत एव 'प्रवाहणः प्रकर्षेण वोढा तैर्यज्ञस्य वा धारकोऽसि ॥ ४ ॥

अत्र सूत्रम्-'पूर्वस्याꣳसदसो द्वारि प्रत्यङ्मुखास्तिष्ठन्तो बर्हिरिति होतुर्धिष्ण्यमिति उपतिष्ठेरन्निति शेषः ।

बर्हिरसि हव्यवाहनः ॥ ५ ॥

इति पाठः ।

हे होत्रीय ! 'बर्हि'र्वोढासि, एतदेव विवृणोति 'हव्यवाहनो' हविषां चरुपुरोडाशसोमानां वोढासि होत्रीयसमीपेऽवस्थितस्य होतुर्वषट्कारेण हि सर्वाणि हवीꣳषि हूयन्ते ॥ ५ ॥

अत्रम्-सूत्रं 'श्वात्र इति मैत्रावरुणस्येम् ति' ।

श्वात्रोसि प्रचेताः ॥ ६ ॥

इति पाठः ।

हे मैत्रावरुणधिष्ण्य ! त्वं 'प्रचेताः' प्रकृष्टज्ञानोसि मित्रावरुणो हि तत्कर्म स्वमजानन् सर्वानृत्विजः स्वे स्वे कर्मणि प्रशास्ति ॥ ६ ॥

अत्र सूत्रम्-'तुथ उशिगङ्गारिरवस्युरिति ब्राह्मणाछꣳसिप्रभृतीनामुदञ्च इति उदङ्मुखाः सन्तः तुथोसि विश्ववेदा इति ब्राह्मणांछꣳसि धिष्ण्यम्, उशिगसि कविः पोतुरिति होतुर्धिष्ण्यम्, अङ्गारिरसि बम्भारिरिति नेष्टुः, अवस्युरसि दुवस्वानित्यच्छावाकस्य ।

तुथोसि विश्ववेदा उशिगसि कविरङ्गारिरसि बम्भारिरवस्युरसि दुवस्वान् ॥ ७ ॥

अक्षरार्थस्तु हे ब्राह्मणाछंसि धिष्ण्य ! त्वं 'विश्ववेदाः' सर्वज्ञस्तुथनामकोसि, हे पोतृधिष्ण्य ! त्वं 'उशिक्' कमनीयः कविः क्रान्तदर्शी प्राज्ञोसि । हे नेष्टृधिष्ण्य ! त्वं अङ्गारिः आङ् अधेरुपसृष्टस्य घृक्षरणदीप्त्यो-

रिति अस्य रूपमेतत् । आसमन्तात् दीप्तसंज्ञः सोमपालोसि । भारिरिति बिभर्त्तेः रूपं बिम्भारि सर्वस्यातिशयेन भर्त्ता एतत्संज्ञः सोमपालोसि । हे अच्छावाकधिष्ण्य ! त्वम् 'अवस्युः' अवो रक्षणं यजमानानामिच्छतीति अवस्युस्तादृशोसि 'दुवस्वान्' दुवः परिचरणं तद्वांश्चासि ॥ ७ ॥

अत्र सूत्रम्-'शुन्ध्युरसि मार्जालीय तत्रैव तिष्ठन्त' इति । सदसो द्वार्यैव तिष्ठन्तो दक्षिणाभिमुखा मार्जालीयमुपातिष्ठेरन् ।

शुन्ध्युरसि मार्जालीयः ॥ ८ ॥

इति पाठः ।

हे मार्जालीय ! त्वं 'शुन्ध्युः' शोधयिता एतन्नामकोसि अत एव मार्जालीयभक्षितानां ग्रहचमसादीनां मार्ज्जालत्वेन प्रक्षालितत्वाधिकरणत्वेन शोधकोसि ॥ ८ ॥

अत्र सूत्रम्-'ऋतधामेत्यौडुम्बरीमिति' । सदसो द्वार्यैव तिष्ठन्तः प्रत्यङ्मुखा औडुम्बरीमुपातिष्ठेरन् ॥

ऋतधामासि स्वर्ज्योतिः ॥ ९ ॥

इति पाठः ।

हे औडुम्बरि ! त्वं 'ऋतधामा' ऋतं सत्यं यज्ञो वा धामावस्थानं यस्याः सा ऋतधामा ईदृश्यसि । 'स्वर्ज्योतिः' उन्नतत्वेन स्वर्गस्य प्रकाशिका भवसि ॥ ९ ॥

अत्र सूत्रम्-'समुद्र इति ब्रह्मसदनद्वार्यैव तिष्ठन्तः' पाठस्तु—

समुद्रोसि विश्वव्यचाः ॥ १० ॥

हे ब्रह्मसदन ! त्वं 'समुद्रः' समुद्रवत् पूर्णोसि वेदत्रयोक्तैः मन्त्रैः 'विश्वव्यचाः' सर्व्वत्र व्याप्तोसि ॥ १० ॥

सूत्रम्'-उत्तरेण सदो गत्वाऽन्तर्व्वेदि प्रत्यङ्मुखास्तिष्ठन्तोऽहिरिति प्रजहितमिति' । प्रजहितशब्देन पुराणो गार्हपत्योऽभिधीयते तमुपातिष्ठेरन् ।

अहिरसि बुध्न्यः ॥ ११ ॥

इति पाठः ।

'अहिरसि' हन्ता रक्षःप्रभृतीनां 'बुध्न्यो' बुध्ने मूले आदौ आधानकाल प्रथमज्ञातोसि हे प्रजहित इति ॥ ११ ॥

सूत्रम्-'अज इति गार्हपत्यमिति'। यः पुरातन आह वनीयः स इदानीमौत्तरवेदिकप्रणयनादूर्द्धं गार्हपत्यसंपन्नस्तमुपतिष्ठेरन्।

अजोस्येकपात् ॥ १२ ॥

हे नूतनगार्हपत्य! त्वं 'अजः' गमनशीलः सन्नस्य ह्यग्निः उत्तरवेदिं प्रति गच्छति। न तु प्रजहितेन सह तस्मादेकपादसि ॥ १२ ॥

तत्र सूत्रम्-'सगरा इति दक्षिणाग्नेरायतनमिति'। उपतिष्ठेरन् इति शेषः। पाठस्तु—

सगरा असि बुध्न्यः ॥ १३ ॥

'सगरा' गरसा गरणेन हविर्भक्षणेन सहितः 'बुध्न्यः' मूले भवश्चासि। हे दक्षिणाग्न्याश्रयेति ॥ १३ ॥

सूत्रम्-'कव्य इति दक्षिणवेद्यन्तमिति'। महावेदेर्दक्षिणं पार्श्वं दक्षिणमुखा उपतिष्ठेरन्। पाठस्तु,—

कव्योसि कव्यवाहनः ॥ १४ ॥

हे वेदिदक्षिणपार्श्व! त्वं 'कव्योसि' स्तुत्योसि तथा 'कव्यवाहनः' कव्यं पितृभ्यो देयं हविः तस्य वोढा चासि दक्षिणाभिमुखेन पित्र्यं हविः प्रयुज्यते ॥ १४ ॥

अत्र सूत्रम्-'तत्रैव तिष्ठन्तः सर्वान् समन्वीक्ष्यमाणः पातमेतीति'। उपस्थितः सर्वानेव धिष्ण्यान् पुनः पुनः समीक्ष्यमणाः पातमेति संहत्योपतिष्ठेरन्। पाठस्तु—

पातमाग्नयो रौद्रेणानीकेन पिष्टत मा नमो वोस्तु मा मा हिꣳसिष्ट ॥ १५ ॥

उपस्थिताः हे 'अग्नयो' धिष्ण्येष्ववस्थिता! युष्मदीयेन 'रौद्रेण' अस्मद्विरोधिविनाशकेन क्रूरेण 'अनीकेन' तेजसा 'मा' मां 'पात' रक्षत। तथा 'मा पिष्टत' ममापेक्षितैर्भोगैः पूरयत। पॄ पालनपूरणयोः। 'वो' युष्मभ्यं 'नमोस्तु' मां यूयं 'माहिꣳसिष्ट'। अथापरं विधानं आहवनीयादीन् धिष्ण्यान् स्वैः स्वैरुपस्थानमन्त्रैरुपस्थाय तदानीमेव तं तं धिष्ण्यं समन्वीक्ष्यमाणाः पातमेति मन्त्रं ऊहेन एकवचनोपेतं कृत्वा ब्रूयुः। तत्रोच्यते हि एकैकमुपस्थायैतद्ब्रूयुरिति शाण्डिल्यो बहुशब्दादेकवत्कुर्वन्त इति, तद्यथा-सूच्यते हि एकैकमुपस्थाय याहिमाग्ने रौद्रेणानीकेन पिष्टतमा नमस्तेस्तु मामाहिꣳसीरिति ॥ १५। १। ४॥

इति ताण्ड्यमहाब्राह्मणे प्रथमाध्यायस्य चतुर्थः खण्डः।

अथ पञ्चमः खण्डः।

अत्र सूत्रम्-'ऋतस्य द्वारौ स्थ इत्यपरौ द्वारबाहू संमृज्य मामा सन्तापमिति प्रविशेयुरिति'।

ऋतस्य द्वारौ स्थो मा मा सन्तापम् ॥ १ ॥

हे सदसः पश्चाद्ये द्वारशाखे ऋतस्य यज्ञस्यैव द्वारबाहू भवथ युवा-मतिक्रम्य प्रविशन्तं मा मां मा सन्तापं सन्तापयुक्तं मा कुरुत ॥१०॥

अत्र सूत्रम्-'दक्षिणेनौडुम्बरीं गत्वा तस्या उत्तरत उपविशेयुः नमः सखिभ्यः इतीति'। पाठस्तु--

नमः सखिभ्यः पूर्वसद्भ्यो नमो परसद्भ्यः ॥ २ ॥

ये सखाय ऋत्विजः पूर्वदेशे सीदन्ति उपविशन्ति ये वा परदेशे सीदन्ति। यद्वा उद्गातृसर्पणात्पूर्वं ये सदस्या उपविशन्ति ये चोत्तरकालं तेभ्यो द्विविधेभ्यः प्रत्येकं नमोऽस्तु ॥ २ ॥

अत्र सूत्रम्--'दक्षिणमनुबाहुं दण्डं कृत्वा श्येन इत्यवेक्ष्येतेति'। उपवेशानन्तरं भक्षणार्थं सोमचमसमप्रतिगृह्य आत्मनो दक्षिण-बाहुं अनुचमसस्य दण्डं कृत्वा तच्चमसान्तिर्यञ्चं धारयित्वा श्येन इति मन्त्रेण तं चमसमवेक्ष्य भक्षयेदिति वक्ष्यमाणपदेनान्वयः। पाठस्तु--

श्येनो नृचक्षा अग्नेष्ट्वा चक्षुषावपश्यामि ॥ ३ ॥

चमसस्थित हे सोम! 'त्वा' त्वामहमुद्गाता 'श्येनः' एतन्नामकप-क्षिवत् प्रबलः सूक्ष्मदर्शी वा भूत्वा 'नृचक्षा' नृणां द्रष्टा सन् 'अग्नेः' सम्बन्धिना 'चक्षुषा' प्रतिहतिवर्जितेनाऽवाङ्मुखः पश्यामि ॥ ३ ॥

सूत्रमत्र--'इन्दविति द्विरूपं भक्षयेदिति'। सकृन्मन्त्रेण सकृत तूष्णीमिति द्विर्भक्षणं स्पष्टमन्यत्।

इन्दविन्द्रपीतस्य त इन्द्रियावतो गायत्रछन्दसः सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि ॥ ४ ॥

तव सम्बन्धिनमहमुद्गाता अल्पं भागं भक्षयामि। कीदृशस्य तव 'इन्द्रपीतस्य' इन्द्रेण पीत्वाऽवशेषितस्य 'इन्द्रियावतः' चक्षुरादीन्द्रि-यपाटवहेतुत्वेन तद्वतः 'गायत्रछन्दसः' प्रातःसवने तद्योग्यछन्दो-विशेषोपेतस्य 'सर्वगणस्य' अध्वर्युप्रभृतिचतुर्भिर्ऋत्विजां गणैरुपेतस्य 'उपहूतस्य' मदीयपानार्थं अन्यैर्ऋत्विग्भिः सह भक्षैरनुज्ञातस्य। कीं

दृशोऽहं 'सर्वगणः' सर्वैः पुत्रभृत्यादिगणैः ऋत्विग्गणैर्वोपेतः 'उपहूतः' अन्यैर्ऋत्विग्भिरनुज्ञातः ॥ ४ ॥

अत्र सूत्रम्-'ऊर्ध्व इति मुख्यान् प्राणानभिमृशेतेति'। भक्षणानन्तरं ऊर्ङ्कः सप्त ऋषीनिति सप्तमुख्यान् प्राणान् चक्षुषी नासिके श्रोत्रे मुखं चाभिमृशेत। पाठस्तु--

ऊर्ङ्कस्सप्त ऋषीनुपतिष्ठस्वेन्द्रपीतो वाचस्पते सप्तर्त्विजोभ्युच्छ्रयस्व जुषस्व लोकम्माऽर्वागवगाः ॥ ५ ॥

हे भक्षितसोम! त्वं 'ऊर्ङ्कः' शिरोभागं प्राप्तः सन् 'सप्तऋषीन्' सप्तसंख्ययैतच्छिद्रवर्त्तिनः चक्षुरादीन्द्रियरूपान् 'उपतिष्ठस्व' प्राप्नुहि। तानाप्याययितुं दर्शनसाधनत्वादेषामृषित्वम्, ऋषिर्दर्शनादिति हि निरुक्तम्। यद्वा गौतमादिऋषिरूपेण मुखावस्थितच्छिद्राणां मुखस्थत्वादृषित्वम्। एतच्च बृहदारण्यके 'तस्याः सप्त ऋषयः सप्ततीरे इति मन्त्रेणैवेव गोतमभरद्वाजाविति' ब्राह्मणेन स्पष्टीकृता। हे 'वाचस्पते' मदीयस्तोत्ररूपाया वाचः पालक सोम! त्वं इन्द्रदेवतया पीतः सन् 'सप्तर्त्विजो' होतृप्रभृतीनभिलक्ष्य 'उच्छ्रयस्व' तानाप्याययितुमुच्छ्रितो भव। ततो 'लोकं' स्थानं स्वकीयजठरलक्षणं 'जुषस्व' सेवस्व 'अर्वाक्' अर्वाचीनः सन् 'मा' मां 'अवगाः' नाभेरधो न गच्छेः। 'शिवो मे सप्त ऋषीनुपतिष्ठस्व मा मेवार्वाङ्नाभिमातिगा' इति हि निगमान्तरम् ॥ ५ ॥

अत्र सूत्रम्-'सोम रारंधीति हृदयमिति। अभिमृषेदित्यनुषङ्गः।

सोमरारन्धि नो हृदि पिता नोसि मम तन्मा माहिꣳसीः ॥ ६ ॥

हे सोम! 'नो' अस्माकं 'हृदि' हृदये 'रारन्धि' रमस्व। हे भगवन्! ऐश्वर्यादिगुणविशिष्ट! त्वं नो अस्माकं 'पिता' पालयितासि 'मां' उद्गातारं 'माहिꣳसीः' वमनरेचनरूपां हिंसां माकार्षीरित्यर्थः ॥ ६ ॥

अत्र सूत्रम्-'सोमगीर्भिरिति नाभिमिति'अभिमृशेदित्यनुषङ्गः। पाठस्तु-

सोम गीर्भिष्ट्वा वयं वर्द्धयामो वाचोविदः सुमृडीको न आविश ॥ ७ ॥

हे सोम! 'वाचोविदः' मन्त्राभिज्ञा वयमुद्गातारः 'गीर्भिः' स्तुतिभिः 'त्वा' त्वां 'वर्द्धयामः' अभिवृद्धं कुर्मः। त्वञ्च 'सुमृडीकः' सुखकरो भूत्वा 'नो' अस्मान् 'आविश' ॥ ७ ॥

'तं स आप्याययेदभिमृश्याप्यायस्वेत्येतया गायत्र्येति'। यः प्रतिहर्त्ता पश्चादभक्षयत सः तच्चमसमभिमृश्याप्याययेत् द्रोणकलशात् सोमरसमादाय तेन वर्द्धनमाप्यायनं मन्त्रेणाभिमर्शनमात्रं वा । पाठस्तु—

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ ८ ॥

हे सोम ! त्वं 'आप्यायस्व' वर्द्धस्व 'ते' तव 'वृष्णियं' सेचनसमर्थं बलं 'विश्वतः' सर्वतः सर्वाभ्यो दिग्भ्यः 'समेतु' सम्यक् प्राप्नोतु । त्वं च अस्माकं 'वाजस्य' अन्नस्य बलस्य वा 'सङ्गथे' सङ्गमे हेतुर्भव ॥८॥

अत्र सूत्रम्-'तेषामनवेक्ष्य भक्षणमवमैरिति'। प्रातःसवन ऊर्वैरिति माध्यन्दिने काव्यैरिति तृतीयसवने पितृभिरिति सर्वत्रानुसंहरेदिति । नाराशंसाभिधचमसान् प्रकृत्य तच्छब्दः प्रयुज्यते । यथेतरचमसभक्षणं 'इयेनो नृचक्षा' इत्यनेन मन्त्रेणावेक्ष्य पश्चात्क्रियते, न तथा तेषान्नाराशंसचमसानां किन्त्वनवेक्ष्यैव भक्षणं अवमैरित्यादिभिस्त्रिभिर्मन्त्रैस्त्रिषु सवनेषु नाराशंसभक्षणं, न पुनः इन्दविन्द्रपीतस्येति । त्रिष्वपि मन्त्रेषु पितृभिरित्यादिवाक्यशेषोऽनुषज्यते । पाठस्तु—

अवमैस्त ऊर्वैस्ते काव्यैस्ते पितृभिर्भक्षितस्य मधुमतो नाराशंसस्य सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि ॥ ९ ॥

त्रिविधाः पितरः अवमा ऊर्वाः काव्याश्चेति । एते अनुसवनं नाराशंसदेवताः । हे सोम ! 'अवमैः' अवतेरौणादिकोऽयमच्प्रत्ययः, रक्षकैः एतत्संज्ञकैः 'पितृभिः' प्रातःसवने 'भक्षितस्य' 'ते' तव 'मधुमतो' माधुमता माधुर्योपेतस्य 'नाराशंसस्य' नरैः सन्तानभूतैः शस्यन्त इति नाराशंसाः पितरः तत्सम्बन्धाच्चमसो नाराशंसः तस्य किञ्चिद्भागं 'भक्षयामि'। सर्वगणस्येत्यादि पूर्ववत् । एवं ऊर्वैस्ते काव्यैस्त इति मन्त्रयोर्योजना। उर्वी पृथ्वी तस्यां सञ्चरन्तः ऊर्वाः काव्या स्तुत्यर्थाः एतत्संज्ञकैः पितृभिः भक्षितस्येत्येतावान् विशेषः ॥ ९ ॥

अत्र सूत्रम्-'तथैव जङ्घामुपहत्य युंज्यात् स्तोमं दीक्षायै तपसो मनसो वाच इती'ति । यथा पुरा प्रस्तरेण स्वकीयां जङ्घामुपस्पृश्य स्तोमा युक्तः तथैवेदानीमपि स्तोमयोगमुपकरणदर्भाभ्यां जङ्घास्पर्शोऽत्र विशेषः । पाठस्तु—

दीक्षायै वर्णेन तपसो रूपेण मनसो महिम्ना वाचो विभूत्या प्रजापतिस्त्वा युनक्तु प्रजाभ्योऽपानाय ॥१०॥

आदितः पदद्वयात्मकाश्चत्वारो मन्त्राः एतदेवाभिप्रेत्य दीक्षातपोमनोवाक्शब्दैश्चतुर्भिः प्रतीकग्रहणं कृतम् । प्रजापतिस्त्वेत्ययं भागः चतुर्ष्वपि मन्त्रेष्वनुषज्यते । तदाह सूत्रकृत्-'अन्तः सर्वेषां प्रजापतिस्त्वेतीति' । एतैश्चतुर्भिरपि मन्त्रैरेकस्मिन्नेव स्तोत्रे स्तोमयोग इत्येकः पक्षः । यत्र नैरन्तर्येण आवृतस्तोत्राणि चत्वारि लभ्यन्ते तेषु चतुरो मन्त्रान् क्रमेण पृथग्विभज्य स्तोमयोगः न त्वेकस्मिन्नेव स्तोत्र इत्यपरः पक्षः । द्वावपि पक्षौ सूत्रकारो दर्शयति-'नानाधानञ्ञप्यो यत्रानन्तराणि चत्वारीति'। मन्त्रार्थस्तु-हे स्तोम! 'प्रजापतिः'प्रजापालको देवः 'प्रजाभ्यः' प्रजोपकारार्थं 'दीक्षायै वर्णेन' यजमानानुष्ठितनियमरूपायाः सामर्थ्येन 'त्वा युनक्तु' त्वां योजयतु । तथा 'अपानाय' अपाननाय बहिर्गतायाः प्राणवृत्तेरन्तःप्रवेशनमपाननं तेन हि प्राणवायुः शरीरे धीयते । 'अपानेन ह्ययं यतः प्राणो न परां भवतीति' श्रुत्यन्तरम् । तदर्थमपि प्रजापतिस्त्वां युनक्तु । एवमुत्तरेष्वपि त्रिषु मन्त्रेषु योज्यम् ! हे स्तोम ! 'तपसोरूपेण' यजमानानुष्ठितस्य पयोव्रतादिलक्षणरूपेण प्रजापतिस्त्वां युनक्तु इति द्वितीयस्य विशेषः । 'मनसो' मनस्तत्त्वस्य 'महिम्ना' सर्वविषयावगाहनशक्त्या प्रजापतिर्युनक्त्विति तृतीयस्य विशेषः । तथा 'वाचो विभूत्या' विभवेन सर्वपदार्थप्रकाशनसामर्थ्येन प्रजाजातिर्युनक्त्विति चतुर्थस्य । एतस्य जप एव स्तोमयोगः। त्रिवृत् पञ्चदशसप्तदशैकविंशादयो द्वितीयतृतीयाध्यायोक्तलक्षणा स्तोमाः । तेषु बहिष्पवमानस्तोत्रे त्रिवृत्स्तोमो विहितः । तस्मात् पूर्वत्र बहिष्पवमानाङ्गत्वेनाग्नेस्तेजसेति मन्त्रः त्रिवृत्स्तोमयोगेभिहितः । तथा चतुर्ष्वाज्येषु स्तोत्रेषु पञ्चदशस्तोमो विहितः 'पञ्चदशान्याज्यानी'ति श्रुतेः । अतोऽत्राज्यास्तोत्राङ्गत्वेन पञ्चदशस्तोमयोगे दीक्षायै वर्णेनेत्यादिमन्त्रोऽभिहितः । आज्यस्तोत्रेभ्य ऊर्द्धं प्रातःसवनं समाप्यते । अत्र क्रतुसंग्रहः—

वसतीवर्यपां प्राप्तौ प्रचारः स्याद्घृतग्रहे ।
उपांशु अदाभ्यौ हुत्वा महाभिषवमाचरेत् ॥
उपांशुमन्तर्य्यागञ्च हुत्वा रिक्नन्तु सादयेत् ।
अथेन्द्रवायवं पात्रे गृहीत्वा सादयेत् खरे ॥
यो मैत्रावरुणं तन्तु श्रीणाति पयसा ग्रहम् ।
शुक्रः श्रृतो हिरण्येन श्रृतो मन्थी तु सक्तुभिः ।

गृहीत्वाग्रयणं गृह्णात्यतिग्राह्याभिधग्रहान् ।
गृहीत्वौथ्यं ध्रुवो ग्राह्यः पवमानग्रहास्त्रयः ॥
पूतभृद्रोणकलशो परश्चाधवनीयकः ।
ते बहिष्पवमानाय प्रश्रयन्त्यत्र पञ्च ते ॥
गृहीत्वाश्विनमाग्नेयपशोः कुर्यादुपाक्रतिम् ।
सवनीयपुरोडाशैश्चरित्वा ह्यैन्द्रवायवम् ॥
हुत्वा ग्रहं द्वयोर्मैत्रावरुणाश्विनयोर्हुतिः ।
शुक्रमन्थादिकान् कृत्वा चमसानपि जुह्वति ॥
संरक्ष्यर्तुग्रहेन्द्राग्निसोमप्रतिगरस्ततः ।
आज्यस्तोत्रेभ्य ऊर्द्धं हि प्रातः सवनसंस्थितिः ॥ इति ।

अथ माध्यन्दिनसवने पवमानस्तोत्रार्थं स्तोमयोगो बहिष्पवमानवत् अग्नेस्तेजसेतिमन्त्रेण कार्यः। अत एव द्राह्यायणो माध्यन्दिनार्भवपवमानयोः पूर्वोक्तमतिदिशति-'एतत्सर्वं कुर्यादुत्तरयोः पवमानयो'रिति। अग्नेस्तेजसेति मन्त्रेण पूर्वभागं तथैवोद्गानस्योत्तरभागे किञ्चिद्विशेषं द्राह्यायण आह—'स्तोमयोगेऽग्निर्युनक्त्वे'ति। एतस्य स्थाने 'वायुर्युनक्तु सूर्यो युनक्त्वति' प्रक्षिपेदिति शेषः ॥ १० ॥

तयोर्मध्ये माध्यन्दिनसवने स्तोमयोगमन्त्रस्योत्तरभाग एवमाम्नायते—

वायुर्युनक्तु मनसा स्तोमं यज्ञाय वोढवे दधात्विन्द्र इन्द्रियꣳसत्याः कामाः यजमानस्य सन्तु ॥ ११ ॥

'वायु'र्देवोऽनुग्राहकेण मनसा 'स्तोमं' पञ्चदशाख्यमाध्यन्दिनपवमानस्तोत्रार्थं 'युनक्तु' योजयतु। यज्ञाय इत्यादिपूर्ववद्याख्येयम् ॥ ११ ॥

यजमानेन वाचनीयस्य श्येनोसीत्येतस्य मन्त्रस्य स्थाने द्राह्यायणो मन्त्रद्वयमुत्तरयोः सवनयोर्दर्शयति-'वृषकोसि स्वरोसीति' यजमानवाचन' इति। तत्र प्रथममन्त्र एवमाम्नायते—

वृषकोऽसि त्रिष्टुप्छन्दा अनुत्वारभे स्वस्ति मासं पारयामास्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमिह व्रजामिषम् ॥ १२ ॥

हे मध्यन्दिन पवमान ! त्वं त्रिष्टुबाख्यं छन्दोविशिष्टः सन्'वृषकः' कामाभिवर्षणसमर्थ इन्द्रोसि। अन्यत् सर्वं श्येनमन्त्रवद्याख्येयम् ॥१२॥

'इन्दाविन्द्रपीतस्ये'त्यादिचमसभक्षणमन्त्रः, तं मन्त्रं द्राह्यायणः प्रातःसवनसम्बन्धविनियोगावसर एव तद्विशेषकथनेनार्थादित्थं वि-

नियुक्तवान्-'इन्दव इति द्विरूपं भक्षयेद्यथासवनं छन्दांस्यादिशन्ति'ति। प्रातःसवने गायत्रछन्दस इति पाठः, माध्यन्दिने त्रिष्टुप्छन्दस इति, तृतीयसवने जगतीछन्दस इत्येतावानेव विशेषः। पाठस्तु—

इन्दविन्द्रपीतस्य त इन्द्रियावतस्त्रिष्टुप्छन्दसः सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि ॥ १३ ॥

पूर्ववद्व्याख्येयम्। अत्र क्रतुसंग्रहः-

माध्यन्दिने तु सवने पुरोडाशः पशोर्भवेत् ॥
ग्रहो मरुत्वतीयः स्यात् पवमानेन संस्तुतिः।
दधिघर्म्मे हुते दद्याद्दक्षिणास्ते यथायथम् ॥
मरुत्वतीयांस्तान् हुत्वा माहेन्द्रेण समाप्यते॥ इति ॥ १३ ॥

अथ तृतीयसवने यदिदमार्भवपवमानाख्यं स्तोत्रं तदर्थमग्नेस्तेजसेति मन्त्रेण स्तोमयोगः कर्त्तव्यः, तस्य मन्त्रस्योत्तरत्र भागे यः पाठशेषः स एवमाम्नायते—

सूर्यो युनक्तु वाचा स्तोमं यज्ञाय वोढवे दधात्विन्द्र इन्द्रियꣳ सत्याः कामा यजमानस्य सन्तु ॥ १४ ॥

'सूर्यो'देवो 'वाचा'मन्त्ररूपया 'स्तोमं'सप्तदशाख्यं'युनक्तु'योजयतु। अन्यत् पूर्ववत् ॥ १४ ॥

श्येनोसीत्यस्य स्थाने तृतीयसवने यजमानेन वाचनीयो मन्त्र एवमाम्नायते--

स्वरोसि गयोसि जगछन्दा अनु त्वारभे स्वस्ति मा सं पारयामास्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥ १५ ॥

हे आर्भवपवमानाभिमानिन् सूर्य! त्वं 'जगछन्दाः' जगत्याख्येन छन्दसा युक्तः सन् 'स्वरः' स्वरणीयः स्तुत्योसि। तथा 'गयः' फलार्थिभिर्गन्तव्योसि। अन्यत् पूर्ववत् ॥ १५ ॥

तृतीयसवने चमसभक्षणमन्त्र एवमाम्नायते--

इन्दविन्द्रपीतस्य त इन्द्रियावतो जगच्छन्दसः सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि ॥ १६ ॥

पूर्ववद्व्याख्येयम् ॥ १६ ॥

द्राह्यायणः-'सौम्यमाहृतमुद्गाता वेक्षेतायुर्मे प्राण इति पुनरस्मासु

दध्न्यसीत्यन्त' इति । सौम्यं चरुं अदृध्वर्युभिराहृतं उद्गाता आयुर्म इति मन्त्रेण यजुषा यन्मे मन इत्यनुवादनावांगादावेक्षेत तस्य मन्त्रस्य दध्न्यसीत्यवसानं स्यात् । यन्मे मन इत्येतद्वक्ष्यमाणं वैकल्पिकं मन्त्रान्तरं न त्वेतेन सह तस्यैकमन्त्रत्वमस्ति तयोरुभयोस्तुल्यार्थेन विकल्पितत्वात् । तदेताद्विशदीकर्तुं मन्त्रावसानमुक्तम् । पाठस्तु--

आयुर्मे प्राणो मनसि मे प्राण आयुपत्न्यामृचि यन्मे मनोयमं गतं यद्वा मे अपरागतꣳ राज्ञा सोमेन तद्धयं पुनरस्मासु दध्नसि ॥ १७ ॥

'मे' मदीय'मायु'र्जीवनं प्राणसमाश्रितं, 'यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुरिति' कौषीतकिश्रुतेः । तथा मे 'मनसि' अन्तःकरणे स 'प्राणो' पञ्चवृत्तिर्वायुः 'समाश्रितः', स प्राणो मदीयं मन उद्गाने शक्तं कुर्य्यादित्यर्थः । अत एव 'आयुपत्न्यां' आयवो मनुष्याः तेषां पालयित्र्यामृचि साम्न आधारभूतायां स प्राणो वर्त्ततां ऋचां तदाश्रयाणां साम्नां चाहं धारयिता भूयासमित्यर्थः । किञ्च 'मे' मदीयं यदुक्तप्राणविशिष्ट'म्मनो' मानसं 'यमं गतं' मृत्युं प्राप्तम् । 'यद्वा' यदि वा मे मनः 'अपरागतं' पुनरावर्त्तयितुमशक्यं गतं नैरन्तर्येण लौकिक एव विषये आसक्तं तदुभयविधं मनः 'राज्ञा' राजमानेन ईश्वरेण वा 'सोमेन' अवस्यवो वयं अस्मास्वेव पुन'र्दध्नसि' धारयामः ॥ १७ ॥

यस्तु वैकल्पिक उत्तरो मन्त्रः स एवमाम्नायते—

यन्मे यमं वैवस्वतं मनो जगाम दूरगास्तन्म आवर्तया पुनर्जीवातवे न मर्त्तवेथो अरिष्टतातये ॥ १८ ॥

अविवाक्ये दशमेऽहनि या पूर्वा 'यन्मे मन' इत्येषा ऋक् अनुष्टुप्त्वात्सा तस्मिन्नहनि निषिद्धा, 'दशमेऽहनि परोक्षमनुष्टुभमुपयन्ति यत्प्रत्यक्षमुपेयुः प्रजापतिमृच्छेयु'रिति ब्राह्मणात् । ततः अस्या अनुष्टुभः स्थाने एषा पङ्क्तिः प्रयोक्तव्येति कोचिदिति । सूत्र्यते हि--'यन्मे मनः स्थाने यन्मे यमिति एक इति' सूत्रकारस्तु दशमेहन्यपि पूर्वस्या ऋचश्चतुर्थं पादमभ्यस्य सैवात्र प्रयोक्तव्या एषा चेति विकल्पिते चोक्तत्वात्, तथैव सूत्रान्तरं-'दशमेहन्यभ्यस्ये'दिति । मन्त्रार्थस्तु,-'मे' मम 'मनो' मानसं 'वैवस्वतं' विवस्वतः सूर्यस्य पुत्रं 'यमं जगाम' शरीरान्निष्क्रम्य प्राप्नोत्। हे सोम ! त्वं 'दूरगाः' दूरगामी यमसदनं प्राप्तः सन् 'मे' मदीयं तन्मनः 'आवर्त्तय' मदीयदेहं प्रत्यावृत्तं कुरु । किमर्थं 'पुनर्जीवातवे

जीवनायतयेपि जीवितुं 'न मर्त्तवे' मरणाभावार्थम्। 'अथो'पि च 'अरिष्टतातये'रिष्टं 'हिंसा' तद्विरुद्धं सुखेनावस्थानं अरिष्टं तस्य तातये विस्ताराय ॥ १८ ॥

द्राह्यायणः-'तस्मिन्नङ्गुष्ठानामिके अवधायाक्षिणी विमार्जीत येनाह्याजिमिंतीति'। तस्मिन्नङ्गुली अवधायाङ्गुष्ठानामिके इत्येकेऽक्षिणी विमृजीत येनाह्याजिमितीति, तस्मिन् सौम्यचरोर्ये केचित् द्वे अङ्गुली अङ्गुष्ठानामिके वा अवधाय ताभ्यामक्षिणी विमार्जीत। पाठस्तु-

येनाह्याजिमजयद्विचक्ष्य येन श्येनꣳ शाकुनꣳ सुपर्णं यदाहुश्चक्षुरदितावनन्तꣳ सोमो नृचक्षा मयि तद्दधातु १९

येन आहीति पदच्छेदः, हि शब्दो वाक्यालङ्कारे, उपसर्गस्तु व्यवहिताश्चेति व्यवहितेन विडन्तेन सम्बध्यते। 'येन' हि चक्षुषा चक्षुरिन्द्रियेण दूरदर्शिना कश्चिद्धातुश्च 'आजिं' वेधनीयां मर्यादां 'विचक्ष्य' विशेषेण बालाग्र आसञ्जयत् अभिजयेत् छन्दसि लुङ्लङ्लिट्। तथा 'येन' चक्षुषा 'सुपर्णं' शोभनपवनं एतत्संज्ञं अभिजयेत् श्येनोपि सूक्ष्मदर्शीति प्रसिद्धः तमपि सूक्ष्मदर्शित्वेनाभिजयेदित्यर्थः। 'अदितौ' पृथिव्यां अन्यदीयं तच्चक्षु 'रनन्तं' अन्तर्हितं वेश्म दिवि प्रकृष्टदर्शनसमर्थं'माहु'रभिज्ञाः कथयन्ति। 'यद्वा षष्ठ्यर्थे सप्तमी। तथैवाश्वलायनः 'दीर्घं यच्चक्षुरदितेरनन्तमिति'। अदितेर्देवमातुः सम्बन्धि यच्चक्षुरनन्तमवस्थानरहितमाहुः वेदाभिज्ञाः। 'तत्' उक्तगुणविशिष्टं चक्षुः नृणां द्रष्टा सोमः मयि 'दधातु' स्थापयतु ॥ १९ ॥

इति ताण्ड्यमहाब्राह्मणे प्रथमाध्यायस्य पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

अत्र सूत्रम्-'सत्र एव ग्रहस्य भक्षयेयुरैन्द्रꣳ सह इतीति' द्विविधो हि दशरात्रः सत्रमहीनश्चेति तयोर्मध्ये सत्ररूप एव दशरात्रे यः षोडशिग्रहोस्ति तमनेन मन्त्रेण भक्षयेयुः। पाठस्तु-

ऐन्द्रꣳ सहोऽसर्जि तस्य त इन्दविन्द्रपीतस्येन्द्रियावतोऽनुष्टुप्छन्दसो हरिवतः सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि ॥ १ ॥

हे 'इन्दो' सोम! 'ऐन्द्रं' इन्द्रसम्बन्धि 'सहो' बलं 'असर्जि' त्वया सृष्टं

'तस्य' तादृशस्य नवांशं भक्षयामीति सम्बन्धः, शिष्टं पूर्ववत्। अनुष्टुप्छन्दस इति। अनुष्टुप् छन्दस्यास्वृक्षु षोडशिसाम्ना स्तुवते होता चानुष्टुभ एव शंसति अतोऽनुष्टुप्छन्दो यस्मिन् षोडशग्रहे स तथोक्तः तस्य हरिवत इति षोडशिसाम्न आधारभूतास्वृक्षु हरिशब्दसद्भावादेवमुक्तम्। यदि हरिशब्दो हरितासु स्तुवीरन् तदा हरिवत इत्यस्य पदस्योद्धारः ॥ १ ॥

तथवै सूत्रम्-'उदस्य हरिवदहीरकासु चेत् स्तुवीरन्निति' त्रिष्टुप् छन्दस्यां वाजपेयसाम्नि भक्षयेदि'ति। 'गौतमोऽनुष्टुप्छन्दसेति धानंजशाण्डिरन्या'विति सूत्रम्। पाठस्तु—

इन्दविन्द्रपतिस्य त इन्द्रियावतोऽनुष्टुप्छन्दसः सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि ॥ २ ॥

उक्तोऽर्थः ॥ २ ॥

आवृतस्तोत्रेषु परिसमाप्तेषु स्तुतस्य स्तुतमसीति यजमानं वाचयेत्। पाठस्तु—

स्तुतस्य स्तुतमस्यूर्जस्वत्पयस्वदामास्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥ ३ ॥

हे आज्य आदिस्तोम! 'स्तुतस्य' स्तोत्रस्य स्तोत्राणामपि 'स्तुतं' प्रकृष्टं स्तोत्रमसि, तथा 'ऊर्जस्वत्' बलवत् स्तुत्यानां देवानां बलङ्करमसि, 'पयस्वत्' पयआदिकस्य रसस्य हेतुत्वेन तद्वदसि। गतमन्यत्॥३।

अत्र सूत्रम्—'इष्टयजुष इति पूर्वस्मिन् वाक्ये पृथक् तृचेभ्यः सन्धौ हिं कुर्य्यु'रिति उक्तत्वात्सन्धिस्तोत्रं तत्र प्रकृतम् तस्मिन् सन्धिस्तोत्रे इष्टयजुष इति मन्त्रेण चमसभक्षः कार्यः। पाठस्तु—

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य शस्तोक्थस्य तिरोह्नियस्य योऽश्वसनिर्गोसनिर्भक्षस्तस्योपहूत उपहूतस्य भक्षयामि ॥ ४ ॥

हे सोमदेव! 'ते' तव सम्बन्धी 'यो' भक्षो भक्षणीयो हुतशेषो रसोऽस्ति तस्य भक्षस्याल्पं भागं 'भक्षयामि'। कीदृशस्य तव 'इष्टयजुषः' इष्टं प्रयुक्तं यजुर्यस्मिन् स तथोक्तः तस्य, यजुर्मन्त्रेण हि सोमो गृह्यते तस्य, 'स्तुतस्तोमस्य' प्रयुक्तस्तोत्रस्य शस्तोक्थस्य उच्चरितशस्त्रस्य 'तिरोह्नियस्य' रात्र्या तिरोहितोऽह्न्यभिषुतस्य पूर्वेद्युरभिषुतस्येत्यर्थः, उपहूतस्य सभक्षैरन्यैर्ऋत्विग्भिरनुज्ञातस्य। कीदृशो भक्षः 'अश्वसनिः'

अश्वानां सनिर्दाता 'गोसनि'र्गवां दाता वा। कीदृशोऽहं 'उपहूतो' ऽन्यैरनुज्ञातः ॥ ४ ॥

सूत्रम्-'तृतीयसवने सर्वेषु स्तोत्रेषु समाप्तेषु भक्षयित्वा स्तोमं विमुञ्चेयुर्ऋतस्य त्वेतीति'। पाठस्तु-

ऋतस्य त्वा देव स्तोमपदे विष्णोर्द्धामनि विमुञ्चाम्येतत्त्वं देव स्तोमानवकरमगन्नशीमहि वयं प्रतिष्ठाम्॥५॥

हे स्तोम त्रिवृदादिनामक ! 'त्वा' त्वां 'ऋतस्य' यज्ञस्य 'पदे' स्थाने 'विष्णो' र्देवस्य 'धामनि' तेजासि 'विमुञ्चामि' विसृजामि। हे स्तोमदेव ! त्वं 'अनवकरं' अवकर उपहतिः तद्रहितमेतत् स्थानं 'अगन्' प्राप्तोसि गमेर्लुटि मन्त्रे घसेति सेर्लुक्, हलङ्याभ्य इति सिलोपः। मोनोधातोरिति नत्वम्। वयं च 'प्रतिष्ठां' नैश्चित्यभावं स्थितिं 'अशीमहि' व्याप्नुयामः। एतस्य मन्त्रस्य जप एव स्तोमविमोकः ॥ ५ ॥

द्राह्यायणः-'वषट् कृते हारियोजनस्य यथेतपरया द्वारा निष्क्रमन्तो जपेयुः सोमेहीति'।

सोमेहानुमेहि सोम सह सदस इन्द्रियेण ॥ ६ ॥

हे सोम ! त्वमिह 'सदसो' देशात् हे सोम त्वम् 'इन्द्रियेण' बलेन सह 'अनुमेहि' मामनुगच्छ ॥ ६ ॥

सूत्रम्-'सुभूरसीत्यादित्यमुपतिष्ठेरन्निति, अस्तमितश्चेद्गार्हपत्यं चन्द्रमसं नक्षत्राणि वेति'।

सुभूरसि श्रेष्ठो रश्मिर्देवानाꣳ सꣳसदेवानां यातुर्य्यया तन्वा ब्रह्म जिन्वसि तया मा जिन्व तया मा जनय प्रकाशं मा कुरु ॥ ७ ॥

हे आदित्य ! त्वं सुष्टु भावयिता वृष्ट्यादिद्वारेण सर्वजगत उत्पादयितासि 'श्रेष्ठः' सर्वेभ्यो देवेभ्यः प्रशस्यतमः 'रश्मिः' बहुरश्मिकानां देवानां 'संसत्' संसदनस्थानम्, तथा 'देवानां यातुः' यातयिता प्रवर्त्तयिता ईदृशः त्वं 'यया' अनुगृहीत्या 'तन्वा' 'ब्रह्म' ब्राह्मणजातिं 'जिन्वसि' प्रीणयसि 'मा' माम् 'तया' तन्वा 'जिन्व' प्रीणय, जिन्वि प्रीणनार्थः। तथा मां 'जनय' प्रादुर्भावय 'प्रकाशं' प्रकाशवन्तं 'मा' मां 'कुरु' कुशलोसावौदृगात्रेकर्म्मणीत्येवं प्रसिद्धं कुरु ॥ ७ ॥

सूत्रम्-'आग्नीध्रीये द्वे आहुती जुहुयुरपां पुष्पमिति पूर्वाꣳस्वाहाकारेणोत्तरा'मिति।

अपां पुष्पमस्योषधीनाꣳ रस इन्द्रस्य प्रियतमꣳ हविः स्वाहा ॥ ८ ॥

हे सोम ! त्वं 'अपां पुष्पं' सारभूतोसि प्रशस्तरसोपेतत्वात् । 'ओषधीनां' रसः सारश्चासि 'सोमो वा ओषधीनाꣳ राजेति' श्रुतेः, तथा 'इन्द्रस्य प्रियतम'मतिशयेन प्रियं हविश्चासि तस्मै तुभ्यं स्वाहा इदमाज्यं हविस्त्यजामि ॥ ८ ॥

'उन्नेतर्युपहवमिष्ट्वा हारियोजनस्य त इति द्विरुपघ्राय पश्चादाहवनीयस्यान्तः परिधिं निधपेयुरिति' उन्नेत उद्धयस्वेत्यनुज्ञाप्य मन्त्रेण धानाः द्विरुपघ्राय पश्चादौत्तरवेदिकस्याग्नेरन्तं परिधिधानाः निवपेयुः ।

हारियोजनस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य योऽवसानिर्गोसानिर्भक्षस्तस्योपहूत उपहूतस्य भक्षयामि ॥ ९ ॥

हे 'देव' द्योतमान सोम ! अवश्रेयाणां धनानामेव सोमसम्बन्धात् सोमेत्यामन्त्रणम्, 'हारियोजनस्य' हरी इन्द्रस्य बाहौ येन सोमेन रथे युज्यते स हार्योजनस्तत्सम्बन्धी हारियोजनः तस्य धानाख्यद्रव्यस्य 'ते' तव एकदेशं भक्षयामीति सम्बन्धः । अन्यत् पूर्ववद्व्याख्येयम् ॥ ९ ॥

सूत्रम्–'अप उपस्पृश्याष्टावष्टौ शकलान्याहवनीये प्रहरेयुर्देवकृतस्येत्येतत्प्रभृतिभिरकारान्तै'रिति । अवयजनसीत्येवमन्तैः न तत्र स्वाहाकार इत्यर्थः ।

देवकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमस्यस्मत्कृतस्यैनसोऽवयजनमसि यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि यत् स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि यद्दिद्राꣳश्चाविद्राꣳसश्चैनश्चकृम तस्यावयजनमस्येनस एनसोऽवयजनमसि ॥ १० ॥

हे अग्नौ प्रक्षिप्यमाणशकल ! त्वं 'देवकृतस्य' देवैः कृतस्य 'एनसः' पापस्य कृतापराधेष्वस्मासु देवैः यत् कृतं पापं तस्य 'अवयजनं' अपगमनसाधनमसि । एवमुत्तरत्रापि योज्यम् । 'अस्मत्कृतस्य' अस्माभिरेव कृतस्य । यद्दिवा चेत्याद्याश्चत्वारो मन्त्रा स्पष्टार्थाः । एनस एनस इति वी-

प्सया सर्वोपराधो निर्हिंश्यते सर्वस्याप्येनसा विनाशकमिति ॥ १० ॥

द्राह्यायणः-'अप्सुषो मानाम चमसाश्चात्वालदेशद्भिः पूर्णास्तेषु हरितानि तृणानि प्रास्तानि भवन्ति ते स्वं चमसं पर्य्युपविश्याप्सु धौतेत्यवमृश्य जपेयुरिति'। अप्सु षोमसंज्ञकेषु जलपूर्णेषु चमसेषु उद्गातृणा यत् चमसोस्ति तस्य परितः उपविष्टास्तिस्र उद्गातारो मन्त्रेण चमसं स्पृष्ट्वा तम्मन्त्रञ्जपेयुः। पाठस्तु-

अप्सु धौतस्य ते देव सोम नृभिः सुतस्य ॥ ११ ॥

हे सोमदेव! 'नृभिः' ऋत्विग्भिः 'सुतस्य' अभिषुतस्य अप्सु चमसेषूदकेषु 'धौतस्य' शोधितस्य 'ते' तव भक्षं करोमीत्युत्तरत्र सम्बन्धः। यद्वा स्पर्शङ्करोमीत्यत्रैवाध्याहारः ॥ ११ ॥

द्राह्यायणः-'मधुमन्तमिति पाणीनुपजिघ्रेरन्निति, स्पष्टोर्थः ॥ पाठस्तु-

मधुमन्तं भक्षं करोमि ॥ १२ ॥

'मधुमन्तं' रसवन्तमुक्तस्य सोमस्य रसं 'भक्षं' भक्षितं करोमि ॥१२॥

द्राह्यायणः-'शमद्भ्य इत्युदञ्चं चमसन्निनयेयुरिति' परासिञ्चेयुरित्यर्थः। पाठस्तु—

शमद्भ्य ओषधीभ्यः ॥ १३ ॥

'अद्भ्य ओषधीभ्यश्च' 'शं' शान्तिरस्तु ॥ १३ ॥

द्राह्यायणः-'कामेत्यध्यात्ममावर्त्तयेयुरिति' स्वात्माऽभिमुख्येन चमसानावर्त्तयेत्। पाठस्तु—

कामकामं म आवर्त्तय ॥ १४ ॥

हे कामसंज्ञक देव! 'मे' मदीयं 'कामं' काम्यं जलजातमावर्त्तय ॥१४॥

द्राह्यायणः-'ऊर्गित्युरः सुपाणीन्निदधीरन्निति'। पाठस्तु—

ऊर्गस्यूर्जम्मयि धेहि ॥ १५ ॥

हे सोमपीथ! त्वम् 'ऊर्क्' बलकरमन्नमसि अत 'ऊर्ज्जं' बलकरमन्नं 'मयि धेहि' स्थापय ॥ १५ ॥

द्राह्यायणः-'प्राण सोमेति मुख्यान् प्राणानभिमृशेरन्' इति। पाठस्तु—

प्राणसोमपीथे मे जागृहि ॥ १६ ॥

हे प्राण! 'मे' मम सोमपानार्थं 'जागृहि' प्रबुध्यस्व ॥ १६ ॥

द्राह्यायणः-'आग्नीध्रीयं गत्वा दधिभक्षं भक्षयेयुरसमुपहूय दधिक्रान्न इति' अत्र यद्यप्यस्मिन् मन्त्रे दधिक्रान्नेति अश्वरूपोऽग्निविशेष

एष देवतात्वेनाभिधीयते, तथापि दधिशब्दयोगात्सामान्येन दधिभक्षणे विनियोग इति द्रष्टव्यम्। पाठस्तु—

दधिक्राव्नो अकारिषञ्जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्प्र न आयूंषि तारिषत्॥ १७॥

दधि दधद्धारयन् क्रामतीति दधिक्रावा क्रमेर्वनिपि विड्वनोरनुनासिकः स्यादिति मकारस्याकारः, तस्य दधिक्रान्न एतत्संज्ञकस्याश्वरूपस्य देवस्य 'अकारिषं' परिरक्षणं कृतवानस्मि। कीदृशस्य 'जिष्णो'र्जयशीलस्य 'वाजिनो' वेगवतो वाजिनवतो वा 'अश्वस्य' अश्नोतेरश्वः क्षिप्रं सर्व्वं व्याप्नुवतः, स च दधिक्रावा देवः 'सुरभि' सुपांसुलुगिति शेर्लुक् सुरभीणि सुगन्धीनि 'नो'ऽस्माकं 'मुखा' मुखानि 'करत्' करोतु नोऽस्माकमायूंषि च प्रतारिषत्।

अथ क्रतुसङ्ग्रहः—

तृतीयसवनारम्भमादित्यग्रहमाचरेत्।
आर्भवेण स्तुवीताथ पश्वङ्गः प्रचरत्ययम्॥
सावित्रवैश्वदेवाख्यौ ग्रहौ सौम्यचरुस्तथा।
पात्नीवतग्रहादूर्ध्वं यज्ञा यज्ञाय संस्तवः॥
आग्निमारुतशस्त्रं स्यादुगृह्णीयाद्वारि योजनम्।
समाप्ते सवने पश्चात् कुर्य्यादवभृथं ततः॥
कुर्य्यादुदयनीयेष्टिमनुबन्ध्यां यजेत गाम्।
देविका निर्वपेद्देवसुवासापि यजूंष्यथ॥
उपोष्य वेदिमाग्नेयमिष्ट्वाग्निष्टोमसंस्थितिः॥ १७॥

इति ताण्ड्यमहाब्राह्मणे प्रथमाध्यायस्य षष्ठः खण्डः॥

अथ सप्तमः खण्डः।

अथ दक्षिणानां प्रतिग्रहाय तदङ्गभूता मन्त्रास्तूच्यन्ते, सर्व्वेषु प्रतिग्रहमन्त्रेषु 'देवस्य त्वा सवितुः प्रसव इत्यारभ्य' 'वरुणस्त्वानयतु देवि दक्षिण' इत्यन्तमुक्त्वा वरुणायाश्वं रुद्राय गामिति तत्तत्प्रतिग्राह्यद्रव्यानुसारेणातिदिश्य 'तेन।मृतत्वमशीय तैरमृतत्वमशीयेति' यथार्थमुक्त्वा 'वयोदात्र' इत्यादि 'मह्यं प्रतिग्रहीत्रे' इत्यन्तं ततः 'क इदं कस्मा अदादि कामैतत्ते' इत्यन्तं जपेत्। एतत्सर्वमुत्तरत्र वक्ष्यते।

द्राह्यायणः-'अश्वरथं चेद्ब्यात् पूर्वेणाग्नीध्रीयमवस्थाप्य पुरस्ताज्जपं जपित्वा दर्भमुष्टिनाश्वमुखानि सम्मृज्य द्वाभ्यां द्वाभ्यामश्वनामभ्यामेकैकस्याश्वोसीत्येतत्प्रभृतिभिरुदक्सꣳस्थमिति' । पुरस्ताज्जपो देवस्यत्वेत्यादिस्तं जपित्वा प्रतिग्रहीता रथसम्बन्धिनश्चतुरोऽश्वान् चतुर्भिर्नामयुग्मैर्दक्षिणमश्वमारभ्य उदगपवर्गं मुखेषु सम्मृज्यात् । पाठस्तु--

अश्वोस्यत्योसि मयोसि हयोसि वाज्यसि सप्तिरर्वागसि वृषासि ॥ १ ॥

एतान्यष्टावश्वनामानि तेषान्निर्वचनं प्रदर्श्यते-अश्नोतेर्व्याप्तिकर्म्मणोऽश्वः हे अश्व त्वं शीघ्रं व्यापनशीलोसि, 'अत्यः' सततगाम्यसि, अत सातत्यगमन इति धातुः, मयतिः शब्दकर्म्मा हेषाशब्दकार्य्यसि, हयो गन्तासि हिगताविति धातुः, 'वाजी' वेगवान् तादृशस्त्वमसि, 'सप्तिः' सर्पणशीलः 'अर्वाग्' गमनशीलस्तादृशोसि,ऋगताविति धातुः,अन्येभ्योऽपि दृश्यन्त इति वनिप्,-'वृषा' वर्षणकारी सेचनसमर्थोसि ॥ २ ॥

अत्र सूत्रम्-'आदित्यानामिति रथशिर आलभ्य जपेदिति आलम्भ उपस्पर्शः । पाठस्तु—

आदित्यानां पत्मान्विहि नमस्तेस्तु मा मा हिꣳसीः ॥२॥

एत्वान्विहीति शाखान्तरे पाठः । हेरथ 'आदित्यानां'द्वादशसंख्यानां प्रतिमासं दिवि सञ्चरतामरुणसूर्यादीनां यत् 'पत्म' पदं सङ्क्रमनमस्ति तत् 'अन्विहि' अनुगच्छ अप्रतिहतगतिर्भवेत्यर्थः, स्पष्टमन्यत्॥२॥

द्राह्यायणः-'यद्रथ्याꣳस्याद्वायोरिति चर्म्मण्यं प्रतिगृह्णीयान्नक्षत्राणामित्यस्थिमयꣳसूर्य्यस्येत्ययो लोहे हिरण्यश्चेति' तत्र च यद्रथ्यं रथं चर्म्मलोहहिरण्यादिनिर्मितं स्थानं तत्र वायोरिति चर्मविकारं प्रतिगृह्णीयादास्थिमयं गजदन्तादिनिर्मितम्, अयो लोहे हिरण्यञ्चेति आयसं ताम्रं सौवर्णञ्चेत्यर्थः । पाठस्तु—

वायोष्ट्वा तेजसा प्रतिगृह्णामि नक्षत्राणां त्वां रूपेण प्रतिगृह्णामि सूर्य्यस्य त्वा वर्चसा प्रतिगृह्णामि ॥३॥

चर्मगतदौर्गन्ध्यापनयनक्षमं वायोर्य्यदसाधारणं तेजः तेन चर्मण्यं त्वां प्रतिगृह्णामि । अस्थिमयस्य धवलत्वेन नक्षत्राणां रूपेणेत्युक्तमयोमयादीनां तैजसत्वात् सूर्य्यस्य वर्च्चसेत्युक्तम् । स्पष्टमन्यत् ॥ ३ ॥

द्राह्यायणः-'दक्षिणेन रथं गत्वा रथन्तरमसीति' दक्षिणञ्चक्रमाल-

भेत वामदेव्यमसीत्यधिष्ठानं बृहदसीत्युत्तरञ्चक्रमित्यधिष्ठानं रथोपवेशनस्थानम् ।

रथन्तरमसि वामदेव्यमसि बृहदसि ॥ ४ ॥

हे दक्षिणचक्र ! त्वं 'रथन्तरमसि' रथन्तरसामवत् स्वकार्यकुशलमिति । हे अधिष्ठान ! त्वं 'वामदेव्यमसि' यथा वामदेव्यसाम शान्तिकरत्वेन रक्षकं तथा त्वमप्युपरिष्ठानामधःपतनाद्रक्षकमसि, बृहदसीति रथन्तरवद्योज्यम् ॥ ४ ॥

अत्र सूत्रम्-'अङ्क्तान्यङ्क्तू इति रथचक्रे एव सम्मृज्यादिति' ये पूर्ववाताग्रचक्रे त एव न त्वधिष्ठानम् । पाठस्तु-

अङ्क्तान्यङ्क्तू अभितो रथं यौ ध्वान्तं वाताग्रमभिसञ्चरतौ दूरे हेतिरिन्द्रियवान् पतत्री ते नोग्रयः पप्रयः पारयन्तु ॥ ५ ॥

अङ्क्तान्यङ्क्तौ गन्तारौ, अङ्क्तो चातरिति यास्कः । 'न्यूङ्क्तू'नितरामञ्चन्तौ गच्छन्तौ, न्युदञ्चेरिति निपूर्वोदञ्चतेः कुप्रत्ययः न्यङ्क्वादीनाञ्चेति कुत्वम् । यौ वक्रूपौ पदार्थयुक्तौ रथमभितः रथस्य पार्श्वयोर्वर्त्तेते 'ध्वान्त'मन्धकारं 'वाताग्रं' वायोः पुरोभागं चाभितः संचरन्तौ प्रकाशमपेक्ष्यान्धकारेपि गच्छतः । शीघ्रगामिनौ वा वायोरपि शीघ्रं गच्छत इत्यर्थः । यश्च 'दूरे हेतिः' हननसाधनमायुधं हेतिस्तद्दूरे विप्रकृष्टप्रदेशे यस्य रथमध्यभागस्य स तथोक्तः परैः प्रयुक्तान्यायुधानि दूरत एव प्रतिहन्यन्त इत्यर्थः । 'इन्द्रियवान्'वीर्यवान् 'पतत्री' पतत्रे पक्षतौ तद्वान् ईदृश उपदेशनार्थो यो रथमध्यभागः 'अग्नयो'ऽग्रं नयन्तः । यद्वाऽग्निवद्वीर्य्योपेतास्ते 'पप्रयः'पालयितारः पूरयितारो वा सन्तो 'नो'ऽस्मान् 'पारयन्तु' गन्तव्यं प्रापयन्तु प्रापूरण इत्यस्मात् त्यृ पालनपूरणयोरित्यस्माद्वा आदृगमहनजन किप्रत्यये पप्रीति रूपम् ॥ ५ ॥

अत्र सूत्रम्-'वैश्वानर इति दक्षिणेन पादेनारोहेदिति' रथमिति शेषः । पाठस्तु—

वैश्वानरः प्रत्नथा नाकमारुह दिवः पृष्ठे मन्दमानः सुमन्मभिः सपूर्व्ववज्जनयञ्जन्तवे धनाः समानमयमन् पर्य्येति जागृविः ॥ ६ ॥

'रथप्रतिग्रहीता आत्मानं वैश्वानरात्मना ध्यायन्नारोहेत् दक्षिणां प्रतिग्रहीष्यन् न सप्तदशकृत्वो व्यावृत्य प्रतिगृह्णाया'दिति श्रुत्यन्तरात्

व्यावृत्यात्मानं देवतारूपेणात्मनि ध्यात्वेति हि-तस्य व्याख्यानम्,'वैश्वानरः' विश्वेषान्नराणां हितः एतदात्मक उद्गाता 'प्रत्नथा' प्रत्न इव पुराण इवातीतेषु युगेष्विवास्मिन्नपि युगे 'नाकं' दुःखराहित्येन सुखकरं रथं 'आरुह' आरोहेति छन्दासि लुङ् लङ्-लिट इति वर्त्तमाने लुङ् दृसृदृहेभ्य इति च्लेः परटादेशः। 'दिवो' द्योतमानस्य 'पृष्ठे' उपरिभागे 'सुमन्मभिः' शोभनस्तुतिकैः स्तोतृभि'र्मन्दमानः' स्तूयमानः मदि स्तुतौ कर्मणि यकि प्राप्ते व्यत्ययेन शप्। किञ्च स वैश्वानरात्मोद्गाता पूर्ववत्पूर्वेषां यजमानानामिव तत्र तस्यैवेति षष्ठ्यर्थे वतिः। 'जन्तवे' जनाय अस्मा अपि यजमानाय 'समानं' सदृशं यावदन्येभ्यः पूर्वं प्रादात् तत्परिमाणं धनं स्तोत्रेण जनयन्नुत्पादयन् अनित्यमागमशासनमिति तुमभावः 'अध्मन्' अध्मनि गमनसाधने रथे उपविष्टो 'जागृविः' जागरूकः सन् 'पर्य्येति' तेन रथेन परितो गच्छति ॥ ६ ॥

अत्र सूत्रम्--'आरुह्य जपेत् गिदैषत' इति। पाठस्तु—

गिदैष ते रथ एष वामश्विना रथोरिष्टो विश्वभेषजः ॥ ७ ॥

गिदो नाम रथपालकः कश्चिद्देवः, हे गिद! 'ते' त्वदीयस्तस्मादेनं पालयेत्यभिप्रायः। हे अश्विना अश्विनौ! एष रथः 'वां' युवयोः सम्बन्धी अतोयं अरिष्टो अहिंसितोऽभग्नः 'विश्वभेषजो' विश्वैः सर्व्वैर्भवदीयैर्युक्तश्च भवतु ॥ ७ ॥

अत्र सूत्रम्—'कृशेति सव्यानभीशूनायच्छेदिति'। अभीशवोऽश्वबन्धनरज्जवः।

कृशानो सव्यानायच्छ ॥ ८ ॥

कृशानुर्नाम सव्यपार्श्वस्थानां रश्मीनां धारयिता, हे कृशानो! 'सव्यान्' वामभागस्थितान् अश्वबन्धकान् पाशान् 'आयच्छ' आकर्षेण नियच्छ ॥ ८ ॥

अत्र सूत्रम्--'दासेति दक्षिणानवगृह्णीयादिति'।

दासानो दक्षिणानवगृहाण ॥ ९ ॥

दासनुर्देवविशेषो दक्षिणभागस्थितानां रश्मीनामियमिता पूर्ववद्योजना ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे प्रथमाध्यायस्य सप्तमः खण्डः।

अथ अष्टमः खण्डः ।

अत्र सूत्रम्—'सर्वासां देवस्यत्वेति पुरस्ताज्जप इति' सर्वासां दक्षिणानां प्रतिग्रहे प्रथमतो देवस्यत्वेति मन्त्रं जपेत् । पाठस्तु—

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ॥ १ ॥

'सवितुः' प्रेरकस्य देवस्य 'प्रसवे' प्रेरणे ऽनुज्ञायां सत्यां 'त्वा' त्वां दक्षिणां प्रतिगृह्णामि । तत्र बाहू च हस्तौ च साधनमंसमणिबन्धनयोर्मध्यवर्त्ती दीर्घो भागो बाहुः, मणिबन्धस्याग्रेऽवस्थितः साङ्गुलिर्भागो हस्तः, अश्विनो बाह्वोरभिमानिदेवो हस्तयोस्तु पूषा, ततस्तयोस्तत्सम्बन्धोऽभिधीयते ॥ १ ॥

अत्र सूत्रम्–'वरुणस्त्वेति यथादेवतं प्रतिगृह्णीयादिति' यस्य द्रव्यस्य या देवता प्रतिग्रहमन्त्रे पठिता तामादिश्य तद्द्रव्यं प्रतिगृह्णीयाद्वरुणायाश्वमग्नये हिरण्यं वायवे मृगमित्यादि । पाठस्तु—

वरुणस्त्वा नयतु देवि दक्षिणे वरुणायाश्वं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥२॥

हे दक्षिणे एतत्संज्ञे देवि ! 'त्वा' त्वां 'वरुणो' देवो गृहं 'नयतु' वरुणप्रीत्यर्थमश्वमहं प्रतिगृह्णामि तेनानुगृहीतेनाश्वेनामृतत्वं देवत्वमहं 'अशीय' प्राप्तवान् 'दात्रे' यजमानाय 'वयो'ऽन्नं भूयान्मह्यं प्रतिगृहीत्रे 'मयः' सुखं भूयात्, 'यद्वै शिवं तन्मय' इति श्रुत्यन्तरम् ॥ २ ॥

अश्वप्रतिग्रहे मन्त्र उक्तः गोप्रतिग्रहे मन्त्रमाह--

वरुणस्त्वा नयतु देवि दक्षिणे रुद्राय गां तयामृतत्वमशीय वयो दात्रे भूयात् मयो मह्यं प्रतिगृहीत्रे ॥ ३ ॥

रुद्रप्रीत्यर्थं 'गां'प्रतिगृह्णामि तया रुद्रानुगृहीतया गवा रुद्रस्य पशुपतित्वात् गोस्तत्सम्बन्धोऽन्यत्पूर्ववत् ॥ ३ ॥

अथाजप्रतिग्रहे मन्त्रमाह—

वरुणस्त्वा नयतु देवि दक्षिणेऽग्नयेऽजम् ॥ ४ ॥

अस्मिन्मन्त्रे तेनामृतत्वमित्यादेरुत्तरभागस्यानुषङ्गो द्रष्टव्यः । प्रजापतिमुखादग्नेरजस्य सहोत्पत्तेस्तत्सम्बन्धः । अन्यत्पूर्ववत् ॥ ४ ॥

अथ हिरण्यस्य प्रतिग्रहे मन्त्रमाह--

अग्नये हिरण्यम् ॥ ५ ॥

अस्मिन्मन्त्रे वरुणस्त्वेत्यादेः पूर्वभागस्य तेनेत्यादेः पूर्वभागस्यानुषङ्गः कार्य्यः। हिरण्यस्याग्निरेतोरूपत्वात्सम्बन्धः ॥ ५ ॥

अजायाः प्रतिग्रहे मन्त्रमाह—

अग्नीषोमाभ्यामजान्मयामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥ ६ ॥

अस्मिन्मन्त्रे वरुणस्त्वेत्यादेः पूर्वभागस्यैवानुषङ्गः,'आग्नेयी वा एषा यदजेति' श्रुत्यन्तरादजाया अग्नेः सम्बन्धः, लताभूतस्य सोमस्यौषधिषु सारभूतत्वेनाजयोपजीव्यत्वात्तत्सम्बन्धः, तथाचोक्तं-'श्यामलास्तास्तु निष्पन्ना सोमाख्यछागभोजन'मिति ॥ ६ ॥

अन्यस्येति मन्त्रो लिङ्गादन्नप्रतिग्रहे विनियोज्यः, सूत्रकारस्तु अवेः प्रतिग्रहेऽयं मन्त्रोऽधिक इति दर्शयति, अन्नस्येति प्राग् वारुणादवेः प्रतिग्रहे वरुणस्त्वेत्यतः पूर्वं वायं मन्त्रो जप्यः। तत्पाठस्तु—

अन्नस्यान्नपतिः प्रादादनमीवस्य शुष्मिणो नमो विश्वजनस्य क्षामाय भुञ्जति मा मा हिꣳसीः ॥ ७ ॥

अन्नस्येति कर्मणि शेषविवक्षायां षष्ठी, अन्नस्य पतिरन्नानां पालयिता 'अन्नस्या'न्नं मह्यं 'प्रादात्' दत्तवान् अन्नं विशेष्यते'ऽनमीवस्या'मीवा रोगः तद्रहितस्यारोग्यकरस्य 'शुष्मिणो' बलवतो बलहेतुभूतस्येमेपि कर्म्मणि षष्ठ्यौ,तस्मा अन्नपतये अग्नये नमोऽस्तु। कथम्भूताय 'विश्वजनस्य' सर्वप्राणिजातस्य 'क्षामाय' क्षेमकारिणे, भैजैक्षै क्षये, तस्मात् क्रोधिकरणे चेति कर्तरि निष्ठा क्षायो म इति तकारस्य मकारः, ईदृशाग्नये इत्यर्थः। हे भुञ्जति उपभोग्यत्वेन पालयित्रि ! तदुपभोक्तारं 'मां' मा 'हिꣳसीः' ॥ ७ ॥

अवेः पश्वन्तरोपभोगसाधनत्वेनान्नत्वेन संस्तावकन्तत्प्रतिग्राहमन्त्रैकदेशमुक्त्वा तच्छेशमन्त्रमाह—

वरुणस्त्वा नयतु देवि दक्षिणे त्वष्ट्रऽविं तया ऽमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ ८ ॥

'त्वष्टा हि रूपाणां कर्त्ता त्वष्टा वै पशूनां मिथुनानां रूपकृदिति' श्रुत्यन्तरात नानारूपा अवयो भवन्तीति त्वष्टुरवेश्च सम्बन्धः, शिष्टं पूर्ववत् ॥ ८ ॥

अत्र सूत्रम्—'ग्नास्त्वा कृन्तन्निति वसनस्येति' वस्त्रप्रतिग्रहे ग्नास्त्वा कृन्तन्निति प्राग्वारुणात्पुरस्ताज्जपाद्वा जपेद् यदि तत् वस्त्रमतन्तुनि-

र्मितं वल्कलादिजं स्यात्तत्रायं मन्त्रो न प्रयोज्यः । तत्र सूत्रम्-'तदुदस्येदतान्तव' इति । पाठस्तु--

ग्नास्त्वाऽकृन्तन्नपसोऽतन्वत वयित्र्योऽवयन् ॥ ९ ॥

गच्छन्ति पुमांस एनामिति ग्नास्त्रियः, हे वस्त्र ! 'त्वा'त्वां 'अकृन्तन्' निष्पादनानन्तरं कर्त्तनेन छेदनेन सम्पादितवन्तः 'अपसो'ऽपः कर्म तद्वन्तो वा तन्तुग्रथनकुशलाः पुरुषा 'अतन्वत' तन्तवः पटस्य दीर्घाणि सूत्राणि तान्यकुर्वन्नित्यर्थः । ता 'वयित्र्यः' वेञ् तन्तुसन्ताने वयनकर्त्र्यो योषितो 'अवयन्' तिरश्चीनानि सूत्राणि समयोजयन् ॥ ९ ॥

अथ वस्त्रप्रतिग्रहमन्त्रविशेषः—

वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वाससेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥१०॥

स्पष्टोऽर्थः ॥ १० ॥

आसनशय्यादेरचेतनवस्तुनः प्रतिग्रहे मन्त्रमाह--

वरुणस्त्वा नयतु देवि दक्षिणे उत्तानायाङ्गिरसायाप्राणत् तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ ११ ॥

'इयं वा उत्तान आङ्गिरस' इति श्रुत्यन्तरात्, उत्तान आङ्गिरस इति शब्दाभ्यामुच्यते, ऊर्ध्वमुखत्वादुत्तानोऽङ्गिरसस्तपसा लब्धत्वादाङ्गिरसो लोकाभिप्रायेण पुँल्लिङ्गता, अप्राणतो भूमेश्च निष्क्रयत्वसाम्यात्सम्बन्धोऽन्यत्पूर्ववत् ॥ ११ ॥

उष्ट्रप्रतिग्रहे मन्त्रमाह--

वरुणस्त्वा नयतु देवि दक्षिणे पूषण उष्ट्रम् ॥ १२ ॥

तेनेत्यादेर्वाक्यशेषस्यानुषङ्गः ॥ १२ ॥

मृगप्रतिग्रहमन्त्रमाह--

वायवे मृगं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ १३ ॥

वरुणस्त्वेति पूर्वभागस्यानुषङ्गः, मृगस्य शीघ्रगामित्वात् तद्वामृतत्वाद्वायुसम्बन्धः, उष्ट्रादीन्यपि सर्ववदक्षिणे देयानि ॥ १३ ॥

पुरुषहस्तिवराहव्रीहीणां प्रतिग्रहे चतुरो मन्त्रानाह—

वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये पुरुषं प्र-

जापतये हस्तिनं प्रजापतये वराहं प्रजापतये व्रीहियवाꣳस्तैरमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ १४ ॥

अत्र पुरुषमन्त्रे तेनेत्याद्युत्तरभागानुषङ्गः, हस्तिमन्त्रे पूर्वोत्तरयोर्द्वयोरप्यनुषङ्गः, तथा वराहमन्त्रे, व्रीहियवमन्त्रे तु पूर्वभागस्यैवानुषङ्गः।यत्र पुनर्व्रीहियवयोरेकएव दीयते तत्र मन्त्रो विभज्य प्रयोक्तव्यः–प्रजापतये व्रीहीन्। प्रजापतये यवान् इति। प्रजापतिना सृष्टत्वात्पुरुषादीनां तत्सम्बन्धः ॥ १४ ॥

तिलमाषप्रतिग्रहे मन्त्रमाह––

वरुणस्त्वा नयतु देवि दक्षिणे क्षेत्रपतये तिलमाषास्तैरमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ १५ ॥

तिलामाषादीनां क्षेत्रजन्यत्वात्तत्स्वामिना सम्बन्धः ॥ १५ ॥

अश्वगर्दभसङ्करजस्य प्रतिग्रहे मन्त्रमाह—

वरुणस्त्वा नयतु देवि दक्षिणे सवित्रेऽश्वतरं वाश्वतरीं वा तयाऽमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ १६ ॥

प्रेरकस्य सवितुः प्रेरणाद्विलक्षणमातापितृभ्यां विजातीयस्याश्वतरस्योत्पत्तिः ॥ १६ ॥

अत्र सूत्रम्–'तेन क इदमित्युपरिष्टाज्जप' इति, यस्मिन्मन्त्रे तेनामृतत्वमित्यादिप्रतिगृहीत्र इत्यन्त उत्तरभागो नाम्नातस्तस्मिन्मन्त्रे तं भागमनुषज्य जपेत्। पाठस्तु—

क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत्कामेन त्वा प्रतिगृह्णामि कामैतत्ते ॥ १७ ॥

कशब्दाभिधेयः प्रजापतिः'रिदं'दक्षिणाद्रव्यं'कस्मै'प्रजापतये 'अदात्' दत्तवान् प्रजापतिरेव सर्वात्मा दानप्रतिग्रहयोः कर्त्तेति भावः। एवमनेन मन्त्रेण स्मृते सति दातृप्रतिग्रहीत्रोः फलं पापराहित्यञ्च भवति। तथा 'कामः कामाय' दातृस्वर्गादिफलकामनया यजमानो दातृऋत्विजश्च धनकामनया प्रतिगृह्णन्ति, अत उभयत्र कामस्यैव प्रयोजकत्वं प्रति-

ग्रहीतृत्वं च कामस्यैवेत्येतल्लोके प्रसिद्धमिति कामो दाता कामः प्रतिग्रहीता इत्युच्यते, नहि निष्कामे परिव्राजकादौ तदस्ति । स च कामः 'समुद्रमाविशत्'मां परित्यज्य यत्र क्वापि गच्छतु इत्यर्थः । कस्यावस्थितौ तेन कामेन हेतुना त्वां प्रतिगृह्णामि । ततो हे काम ! एतद्धनं 'ते' तवैव तिष्ठतु नात्मानं मे स्पृशतित्यर्थः । सोऽयं मन्त्रोध्वर्य्युशाखायामाम्नातस्तदीयब्राह्मणान्नीत्वा, व्याख्यातश्च–क इदं कस्मादित्याह प्रजापतेर्वै कः स प्रजापतये ददाति कामः कामायेत्याह कामेन हि ददाति कामेन प्रतिगृह्णाति कामो दाता कामः । प्रतिग्रहीतेत्याह कामो हि दाता कामः प्रतिग्रहीता कामः समुद्रमाविशेत्याह समुद्र इव कामयते नहि कामस्यान्तोस्ति नहि समुद्रस्य, कामेन त्वा प्रतिगृह्णामीत्याह येन कामः प्रतिगृह्णाति स एवैनममुष्मिल्लोके दक्षिणामिच्छति न प्रतिग्रहीतुरिच्छति ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे प्रथमाध्यायस्य अष्टमः खण्डः ।



अथ नवमः खण्डः ।

अत्र सूत्रम्—'रश्मिरसीत्येतावनुकौ स्तोमभागास्तैः पृथगनुपूर्व्वं स्तोत्रान्यनुमन्त्रयेत ब्रह्मन् स्तोष्यामः प्रशस्तेरित्युक्त' इति । रश्मिरसीत्येकोनुवाकस्तन्तुरसीत्यपरस्तयोरनुवाकयोराम्नाता ये मन्त्रास्तेषां स्तोमविभाग इति नामधेयम् । त्रिवृदादिस्तोमान् भजन्त्येते मन्त्रा इति तच्छब्दव्युत्पत्तिः । उद्गातारो ब्रह्माणं प्रत्येवमनुज्ञां प्रार्थयन्ते–ब्रह्मन् स्तोष्यामः प्रशास्तरिति । इदानीं बहिष्पवमानादीन्यतिरिक्तस्तोत्रपर्य्यन्तानि यानि त्रयस्त्रिंशः स्तोत्राणि सन्ति तानि तैः स्तोमभागैस्तावत्संख्यैः क्रमेण ब्रह्मा पृथगनुमन्त्रयेत् । आपस्तम्बोऽप्याह—'ब्रह्मन् स्तोष्याम इत्युच्यमाने देवसवितरेतत्ते प्राहेत्यनुद्रुत्य रश्मिरसि क्षयाय क्षयन् जिन्व स्तुतोति स्तौति, सर्व्वस्तोत्राणामेष कल्प उत्तरमुत्तरं स्तोमभागानां दधाति, द्वादशाग्निष्टोमे पञ्चदशोक्थे षोडशषोडशिनि सप्तदशवाजपेये एकोनत्रिंशदतिरात्रे त्रयस्त्रिंशदप्तोर्य्यामिन इति । तत्रायं प्रथमस्तोमभागमन्त्रः—

रश्मिरसि क्षयाय त्वा क्षयं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ १ ॥

तैत्तिरीयाणां पञ्चमकाण्डोक्तब्राह्मणे रश्मिरिति मन्त्राणामादित्यादिसृष्टिहेतुत्वाभिधानादादित्यादिपरतया रश्म्यादिशब्दा व्याख्येयाः। तच्च ब्राह्मणमुत्तरत्रोदाहरिष्यते। हे आदित्य! त्वं 'रश्मिरसि' रश्मियुक्तोसि। देवा यस्मिन् क्षियन्ति निवसन्ति इति स्तोत्रसम्बन्धः क्षयस्तस्मै क्षयाय तत्सङ्गाय तत्प्राप्त्यर्थं हे आदित्य त्वां स्मरामि इति शेषः। ततः 'क्षयं' देवसङ्गं 'जिन्व' प्रीणय क्षयशब्दस्य देवविषयत्वं तैत्तिरीयास्तृतीयकाण्डोक्तब्राह्मणे समामनन्ति—'रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्याह देवे क्षय इति। यद्वा बहिष्पवमानादिकं स्तोत्रमेव सम्बोध्य हे स्तोत्र त्वं रश्मिर्वम्बन्धकोसि यज्ञस्य तादृशं त्वां 'क्षयाय' यजमानस्य निवासार्थं प्रयोजयामीति शेषः। क्षयन्निवासो यजमानस्य गृहं वा 'जिन्व' प्रीणय हे उद्गातारो यूयं 'सवितृप्रसूताः' सवित्राप्रेरकेणादित्यरूपेणान्तर्यामिणा प्रेरिताः सन्तो 'बृहस्पतये' बृहत्परिवृढं ब्रह्म तस्य पत्यै स्तोत्रदेवतायै तत्प्रीत्यर्थं 'स्तुत' स्तुतिं कुरुत ॥ १ ॥

अथ द्वितीयस्तोमभागमन्त्रः—

प्रेतिरसि धर्म्मणे त्वा धर्म्मं जिन्व सवितृप्रसुता बृहस्पतये स्तुत ॥ २ ॥

हे धर्म्माभिमानिन् देव! त्वं 'प्रेतिरसि' प्रेतिर्गतिः सा च प्रकृष्टा शास्त्रार्थानुरूपत्वात्प्रकृष्टा गतिर्यस्येति विग्रहः, 'धर्म्मणे' धर्म्माय तदनुष्ठातृमनुष्यार्थं 'मनुष्या वै धर्म' इति श्रुत्यन्तरे, तत्संतोषार्थं त्वां स्मरामि त्वमपि 'धर्म्मं' तदनुष्ठातृमनुष्यं 'जिन्व' प्रीणय। यद्वाऽत्रापि पूर्ववत् स्तोत्रपरतया योज्यमन्यत्पूर्ववत् ॥ २ ॥

अथ तृतीयः—

अन्वितिरसि दिवे त्वा दिवं जिन्व सवितृप्रसुता बृहस्पतये स्तुत ॥ ३ ॥

हे स्तोत्र त्वं 'अन्विति' अनुकूलनतियुक्तोसि तं त्वां 'दिवे' द्युलोकार्थं प्रयोजयामि त्वं च दिवं द्युलोकं 'जिन्व' प्रीणय ॥ ३ ॥

अथ चतुर्थः—

सन्धिरस्यन्तरिक्षाय त्वान्तरिक्षं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ४ ॥

हे स्तोत्रविशेष! त्वं 'सन्धिरसि' उभयतः स्थिताभ्यां स्तोत्राभ्यां सन्धिःसन्धीयमानोसि तादृशं त्वाम् 'अन्तरिक्षाय' अन्तरिक्षलोकार्थं प्रयोजयामि त्वं चान्तरिक्षं प्रीणय ॥ ४ ॥

अथ पञ्चमः--

प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ५ ॥

हे स्तुतिविशेष ! त्वं 'प्रतिधिः' प्रतिमुखं धीयते प्रातस्सवनसमाप्त्यर्थमिति प्रतिधिस्तादृशोसि, अन्यत्पूर्ववद्योज्यम् ॥ ५ ॥

अथ षष्ठः--

विष्टम्भोसि वृष्ट्यै त्वा वृष्टिं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ६ ॥

हे माध्यन्दिनसवनपवमान त्वं ! 'विष्टम्भो' यज्ञस्य विशेषेण स्तम्भयिता धारकोसि तं त्वां 'वृष्ट्यै' यज्ञमूलभूतायै प्रयोजयामि त्वं च वृष्टिर्यथा भवति तथा तां प्रीणय ॥ ६ ॥

अथ सप्तमः--

प्राचोस्यह्ने त्वाहर्जिन्व सवितृप्रसूता बृहस्पतये स्तुत॥७॥

हे स्तोत्रविशेष ! त्वं 'प्राचः' ऽप्रकर्षेण रक्षकोसि त्वामह्नेऽहरर्थं प्रयोजयामि त्वञ्चाह 'र्जिन्व' प्रीणय ॥ ७ ॥

अथाष्टमः--

अन्वासि राज्यै त्वा रात्रिञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ८ ॥

हे स्तोत्रविशेष ! त्व 'मन्वा' ऽनुगन्तासि अनुपूर्वाद्वातेर्वा एतद्रूपं त्वां 'राज्यै' राज्यर्थं प्रयोजयामि त्वं च रात्रिं प्रीणय, इत्थमष्टभिः स्तोमभागैरादित्यानां सृज्यमाना प्रीतिः प्रतिपादिता ॥ ८ ॥

अतःपरमग्निष्टोमस्य चत्वारि स्तोत्राणि तदीयैश्चतुर्भिः स्तोमभागैः प्रजापतिना सृज्यमानान् वसून् रुद्रानादित्यान् प्रीणयति ।

अथ नवमः--

उशिगसि वसुभ्यस्त्वा वसून् जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ९ ॥

हे स्तोत्रविशेष ! त्वं 'उशिक्' कमनीयोसि त्वं 'वसुभ्यो' वसूनां प्रीत्यर्थं त्वां प्रयोजयामि त्वं च वसून् प्रीणय ॥ ९ ॥

अथ दशमः--

प्रकेतोसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ १० ॥

हे स्तोत्रविशेष ! त्वं 'प्रकेतः' प्रकृष्टं केतो ज्ञातासि, अन्यत्पूर्ववद्योज्यम् ॥ १० ॥

अथैकादशः—

सुदीतिरस्यादित्येभ्यस्त्वादित्याञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ११ ॥

हे स्तुतिविशेष ! त्वं 'सुदीतिः' सुदीप्तिरसि त्वामादित्यानां प्रीत्यर्थं प्रयोजयामि त्वं चादित्यान् प्रीणय ॥ ११ ॥

अथ द्वादशः—

ओजोसि पितृभ्यस्त्वा पितॄञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ १२ ॥

हे स्तोत्र ! त्वं 'ओजः' सारभूतोसि सारो ह्यग्निष्टोमसाम त्वां पितॄणां प्रीत्यर्थं प्रयोजयामि त्वञ्च पितॄन्प्रीणयेति ॥ १२ ॥

अथ ताण्ड्यमहाब्राह्मणे प्रथमाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ त्रयोदशः—

तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ १ ॥

हे स्तुतिविशेष ! त्वं 'तन्तुः' संतानहेतुरसि अतस्त्वां प्रजार्थं प्रयोजयामि त्वं च प्रजा प्रीणय ॥ १ ॥

अथ चतुर्दशः—

रेवदस्योषधिभ्यस्त्वौषधीर्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ २ ॥

हे स्तोत्र ! त्वं 'रेवत्' रयिमत् धनयुक्तं धनप्रदमसि अत ओषध्यर्थं त्वा प्रयोजयामि ॥ २ ॥

अथ पञ्चदशः—

पृतनाषाड़सि पशुभ्यस्त्वा पशूञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ३ ॥

हे स्तुतिविशेष! त्वं 'पृतनाषाट्' पृतनानां शात्रवीनां सेनानां सो-

ढाभिभूतासि अतः पशुभ्यः शत्रुसम्बन्धिभ्यस्तल्लाभार्थं त्वां प्रयोजयामि त्वं च तान् पशून् मह्यं प्रदाय प्रीणय ॥ ३ ॥

अथ षोडशः--

अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ४ ॥

हे षोडशिस्तोत्र! त्वं 'अभिजित्' अभिजयहेतुरसि तया युक्तया अभिषवार्थं युक्ता ग्रावाणो येन स तथोक्तः तादृशश्चासि सर्व्वदा सोमबद्धासीत्यर्थः, अतस्त्वामिन्द्रायेन्द्रार्थं प्रयोजयामि त्वं चेन्द्रं प्रीणय ॥ ४ ॥

अथ सप्तदशः--

अधिपतिरसि प्राणाय त्वा प्राणाञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ५ ॥

हे स्तोत्रविशेष ! त्वं 'अधिपतिः' रात्रिपर्य्यायगतानां स्तोत्राणां मुख्योसि। अतस्त्वां 'प्राणाय' मुख्यप्राणवृत्त्यर्थं प्रयोजयामि, गतमन्यत् ॥५॥

अथाष्टादशः—

धरुणोस्यपानाय त्वाऽपानञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ६ ॥

हे स्तुतिविशेष ! त्वं 'धरुणोसि' सर्व्वस्य धारकोसि 'अपानाय' प्राणवायोः शरीरे धारयिता अपानः, तदर्थं त्वां प्रयोजयामि त्वं च तादृशमपानं पीणय ॥ ६ ॥

अथैकोनविंशः--

सꣳसर्पोसि चक्षुषे त्वा चक्षुर्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ७ ॥

हे स्तुतिविशेष ! त्वं 'संसर्पः'। सम्यक् सर्पणशील आदित्योसि। अतस्त्वां 'चक्षुषे' चक्षुरर्थं प्रयोजयामि आदित्यो हि त्वं चक्षुर्'जिन्व' प्रीणय ॥ ७ ॥

अथ विंशः--

वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥ ८ ॥

हे स्तोत्रविशेष ! त्वं 'वयोधाः' वयसोन्नस्य आयुषो वा धारयितासि त्वां 'श्रोत्राय' श्रवणेन्द्रियार्थं प्रयोजयामि। गतमन्यत् ॥ ८ ॥

अथैकविꣳशाद्याश्चत्वारो मन्त्राः—

त्रिवृदसि त्रिवृते त्वा सवृदसि सवृते त्वा प्रवृदसि प्रवृते त्वा ऽनुवृदस्यनुवृते त्वा सवितृप्रसूता बृहस्पतये स्तुत ॥ ९ ॥

मध्यरात्रिपर्य्यायगतानां चतुर्णाꣳ स्तोत्राणामनुमन्त्रणमन्त्रा एते सवितृप्रसूता इत्यादि सर्वशेषः। हे स्तुतिविशेष! त्वं त्रिभिः पञ्चकैर्निर्वृत्तत्वेन 'त्रिवृदसि' त्वां 'त्रिवृते' स्तोमाय प्रयोजयामि, 'सवृत्' अन्वैः सह वर्त्तत इति सवृत्, प्रवर्त्तते त्वकार्य्यं प्रति 'प्रवृत्' मध्यमपर्य्यायगतेभ्यस्त्रिभ्यः स्तोत्रेभ्यो ऽनु पश्चात् वर्त्तते इत्यनुवृत्। शिष्टं स्पष्टार्थम् ॥९॥

अथोत्तमपर्यायस्य स्तोत्रचतुष्टयस्यानुमन्त्रणाश्चत्वारो मन्त्राः—

निरोहोसि निरोहाय त्वा सꣳरोहोसि सꣳरोहाय त्वा प्ररोहोसि प्ररोहाय त्वाऽनुरोहोऽस्यनुरोहाय त्वा सवितृप्रसूता बृहस्पतये स्तुत ॥ १० ॥

उत्तमपर्यायस्य यज्ञारोहणसामत्वात्तस्य स्तोत्राणि रोह इत्युच्यते। हे स्तुतिविशेष! त्वं 'निरोहोसि' नितरां रोहहेतुरसि, अतो नितरां रोहार्थं त्वां प्रयोजयामि। एवमन्येष्वपि योजना कार्य्या। पदार्थस्तु संरोहः सम्यक् रोहणहेतुः, अनुरोहो ऽनु पश्चात् चरमभावी सन् रोहणहेतुरिति ॥ १० ॥

अथ सन्धिस्तोत्रस्य त्रिदेवत्यत्वात् त्रेधाऽनुमन्त्रणं कर्तव्यं तन्मन्त्रोऽयम्—

वसुकोऽसि वस्यष्टिरसि वेषश्रीरसि सवितृप्रसूता बृहस्पतये स्तुत ॥ ११ ॥

हे सन्धिस्तोत्र! त्वं 'वसुको' वासविता अग्निस्तादृशोसि। तथा 'वस्यष्टिः' वसनेन तमसां विवासनेनाऽनुते व्याप्नोति विश्वमिति वस्यष्टिः उषास्तादृशोसि। 'वेषश्रीः' वेषो रूपं तद्वन्तावश्विनौ तावेव वेषश्रीः वेषस्य श्रयितासि ॥ ११ ॥

आक्रमोसीत्याद्याः अक्षोर्य्यामस्य यज्ञस्यातिरिक्तस्तोत्राणाञ्चतुर्णामनुमन्त्रणमन्त्राः। तेषां पाठस्तु—

आक्रमोस्याक्रमाय त्वा संक्रमोसि संक्रमाय त्वो-

क्रमोस्युत्क्रमाय त्वोत्क्रान्तिरसि उत्क्रान्त्यै त्वा सवितृ-प्रसूता बृहस्पतये स्तुत ॥ १२ ॥

हे स्तोत्रविशेष! त्वम् 'आक्रमः' यज्ञफलस्याक्रमणाय त्वां योजयामि, स्थानात्स्थानान्तरप्राप्तिः संक्रमस्तद्धेतुरसि, उर्ध्वं स्वर्गं प्रत्युत्क्रमणमुत्क्रमः तद्धेतुरसि, उत्क्रमणरूपा या क्रिया सा उत्क्रान्तिः तद्रूपोसि, अत उत्क्रान्त्यै स्वर्गं प्रत्युत्क्रमणार्थं त्वां योजयामि ।गतमन्यत् ।१२-१-१०

अत्र विनियोगसङ्ग्रहः--

ब्राह्मणप्रथमाध्यायमन्त्राणां विनियोजनम् ।
अत्रादौ वृत उद्गाता महदित्यादिकं जपेत् ॥ १ ॥
देवो गृहाद्विनिर्गत्य दूरङ्कृत्वा विहाय जपेत् ।
यागभूम्यन्तिके बद्धा पितरः पित्रुपस्थितिम् ॥ २ ॥
नृमयूपोच्छ्रितो मन्त्रो मृदा वेद्याक्रमं जपेत् ।
रराटीस्पर्शनं विष्णोर्हविर्धानमिषे विशेत् ॥ ३ ॥
नवात्र मन्त्राः प्रथमे खण्डे सम्यगुदीरिताः ।
युनबाह्वन्नयेत्सोमे ऋतस्येत्युपवेशनम् ॥ ४ ॥
ऋतस्पृशेद्रोणकुम्भं वानप्रोहेदमुं पुरः ।
मरुद्भ्यः स्पृशेदेषु द्रोणस्य ध्रुहनं त्विदम् ॥ ५ ॥
मृज्याद्वस्त्राद्वस द्रोणं पवित्रेण पटं क्षिपेत् ।
प्रांशुधारां जपेदत्र नव मन्त्रा उदीरिताः ॥ ६ ॥
कुर्युः प्रवृत्तं होमौ द्वौ वेकुसूर्य्य इति ब्रुयात् ।
तृणापसरणं योद्य योभ स्यादुपवेशनम् ॥ ७ ॥
अग्नेरिति स्तोमयोगो ह्यन्नमन्नं जपेद्वयम् ।
स्वामिनं वाचयेच्छ्येनः सम्वर्च्छसा प्रेक्ष्य जपेत् ॥ ८ ॥
उपस्थानं नमः सूर्य्ये दश मन्त्रा इहेरिताः ।
अध्वादित्ये ह्युपस्थानं सम्राडाहवनीयके ॥ ९ ॥
तुथोस्यास्तावदेशे स्याच्चात्वाले तु नभोसि हि ।
असम्मृष्टोसि शामित्र आग्नीध्रीये विभूरसि ॥ १० ॥
होतुर्द्धिष्ण्ये वह्निरसि इडा मैत्रावरुणीयके ।
तु ब्राह्मणाच्छंसिके स्यादूशिक् स्यात् पोतृधिष्ण्यके ॥ ११ ॥
नेष्टकेङ्गारिरच्छावाकके वस्युरसीत्यथ ।
शुन्ध्युर्म्मार्ज्जालीय औदुम्बर्य्यो स्यादतधेति हि ॥ १२ ॥
सप्तद्रो ब्रह्मणः स्थाने अहिः प्रजाहिते भवेत् ।

स्याद्गार्हपत्यो जोसीति सगरा दक्षिणाग्निके ॥ १३ ॥
कव्यो दक्षिणवेद्यन्ते पातमा सर्व्वसंहतौ ।
चतुर्थखण्डे मन्त्राणां विंशतिः समुदीरिताः ॥ १४ ॥

ऋतमृज्याद्बारबाहू मामेत्यन्तः प्रवेशनम् ।
नम इत्युपविश्याथ श्येनश्चमसवीक्षणम् ॥ १५ ॥
इन्दोद्विर्भक्षयेदूर्ध्वो मुखच्छिद्राणि संस्पृशेत् ।
सोमरा हृदयस्पर्शः सोमगीर्नाभिमामृशेत् ॥ १६ ॥
चमसं पूरयेदाप्याऽवमैरद्यान्निमन्त्रतः ।
दीक्षायै स्तोमभागोयं भवेन्मन्त्रचतुष्टयात् ॥ १७ ॥
वायुर्माध्यन्दिने योगो वृषकः स्वामिवाचनम् ।
इन्दो भक्षस्तोमयोगः सूर्य्योयु सवने भवेत् ॥ १८ ॥
स्वरोसि वाचयेदिन्दो कुर्य्याच्चमसभक्षणम् ।
आयुः सौम्यं चरुं पश्येद्यन्मे तत्र विकल्प्यते ॥ १९ ॥
येन सौम्यं च संस्पृष्टाङ्गुलिभ्यामक्षिमार्ज्जनम् ।
पञ्च विंशतिमन्त्रा स्युः पञ्चमे खण्ड ईरिताः ॥ २० ॥

ऐन्द्रमन्त्रे सोमभक्ष स्तुतस्य स्वामिवाचनम् ।
इष्टसन्धौ सोमभक्षं ऋतस्य स्तोममोचनम् ॥ २१ ॥
सोमे हि निर्गमः सूर्य्यस्योपस्थानं सुभूरिति ।
अपां द्वाभ्यामाहुती द्वे धानाभक्षो हारियोजने ॥ २२ ॥

देवाष्टौ शकले होमा अप्सुधौ चमसं स्पृशेत् ।
मधु पाणीनुपघ्राय चमसोत्सेचनं शमत् ॥ २३ ॥
कामाभ्यावर्त्तवेदेतत् ऊर्गस्तदुरसि क्षिपेत् ।
प्राणेतिमुखसंस्पर्शो दधीति दधि भक्षयेत् ॥ २४ ॥
चतुर्विंशतिमन्त्रास्तु षष्ठे खण्डे प्रकीर्तिताः ।

साश्वं रथं दक्षिणार्थं प्रतिगृह्णाति चेत्तदा ॥ २५ ॥
मृज्यादश्वमुखाभ्यश्वनामयुग्मचतुष्टयम् ।
रथोर्ध्वस्पर्श आदित्या वायोश्चर्म्मप्रतिग्रहे ॥ २६ ॥
अस्त्रप्रतिग्रहे नक्ष सूर्य्य लोहप्रतिग्रहे ।
रथेति दक्षिणे चक्रे स्पर्शो वामेत्यधिष्ठितौ ॥ २७ ॥
बृहदित्युत्तरे चक्रे चक्रावंकेति संस्पृशेत् ।
वैश्वा रथं समारोहेद्विदेत्यत्र स्थितो जपेत् ॥ २८ ॥
कृशा यच्छेत्सव्यरज्जुं स्पृशेद्दासेति दक्षिणाम् ।

मन्त्रास्तु सप्तमे खण्डे षोडशेत्यवगम्यताम् ॥ २९ ॥
पुरस्तात्सर्वमन्त्राणां देवस्यत्वेत्यमुञ्जपेत् ।
वरुणेत्यादयो मन्त्रान् क्रमात्तत्तत्प्रतिग्रहे ॥ ३० ॥
अश्वो गौरप्यजः स्वर्णमजाऽविर्व्वसनां गिराः ।
उष्ट्रो मृगश्च पुरुषो हस्तिवरा व्रीह्यादयः ॥ ३१ ॥
तिला अश्वतरो मन्त्रं क इत्यन्तं जपेदथ ।
अष्टादशात्र मन्त्राः स्युरष्टमे खण्ड ईरिताः ॥ ३२ ॥
रश्मिरित्यादयस्तोमभागास्तैरनुमन्त्रणम् ।
कुर्य्यात्क्रमेण स्तोत्राणां ते त्रयस्त्रिंऽश ईरिताः ॥ ३३ ॥
वेदार्थस्य प्रकाशेन तमोहार्द्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ३४ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे तांड्यमहाब्राह्मणे प्रथमाऽध्यायस्य दशमः खण्डः ।

प्रथमाऽध्यायः समाप्तिमगमत् ।

द्वितीयोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलञ्जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रथमाध्यायगा मन्त्रा व्याख्याताः क्रतुगामिनः ।
अध्यायान्ते स्तोमभागा उक्ताः स्तोमान् ब्रवीम्यथ ॥ २ ॥

अस्मिन् ब्राह्मणे प्राधान्येन गवामयनं प्रतिपाद्यते । प्रायणीयादिभिर्म्महाव्रतान्तैः पञ्चविंऽशतिसंख्यैरहोभिर्निष्पद्यते प्रायेणैतान्येवाहानि अन्येषामपि एकाहाहीनसत्रात्मकानाऽ सोमयागानां प्रकृतीनि । द्वादशाहश्चाहर्गणानां प्रकृतिः । अतः प्राधान्यात् प्रायणीयोदयनीयौ उक्त्वा मध्ये यानि द्वादशाहानि तेषां विष्टुतयः । एवं च सति गवामयनिकानामपि त्रिवृदादयः स्तोमाः प्रदर्शिताः । ये स्तोमास्त्रिवृदादयस्तेषां विष्टुतयः क्रमेण द्वितीयतृतीयाभ्यामध्यायाभ्यां प्रदर्श्यन्ते ।

तत्र बहिष्पवमानसाधनस्य त्रिवृत्स्तोमस्य तिस्रो विष्टुतयः उद्यती परिवर्त्तिनी कुलायिनीति, आदितस्त्रिभिरनुवाकैस्ताः प्रदर्श्यन्ते। तत्र तावत् उद्यत्याः स्वरूपमाह—

तिसृभ्यो हिङ्करोति स प्रथमया तिसृभ्यो हिङ्करोति स मध्यमया तिसृभ्यो हिङ्करोति स उत्तमयोद्यती त्रिवृतो विष्टतिः ॥ १ ॥

एकैकस्य साम्नः पञ्च विभक्तयः हिङ्कारप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः। तत्र हिङ्कारस्त्रिभिरुद्गातृभिः कर्तव्यः। अत एव सूत्रकृतोच्यते—'साम्ने साम्ने हिङ्कुर्य्युरिति'। 'तिसृभ्य' इति क्रियार्थोपपदस्य च कर्म्मणि स्थानिन इति कर्म्मणि चतुर्थी। तिस्र ऋचो गातुं हिङ्कुर्य्यात् एकवचनमन्त्रम् उक्तादेव हेतोः अतस्त्रयोप्युद्गातारो हिङ्कुर्य्युरित्यर्थः। एवमुत्तरत्रापि हिङ्कारविधायकेषु वाक्येषु योजना। 'सहिङ्करोति' सहिङ्कर्त्ता 'मध्यमया' त्रिरुक्तया गायेत्। अयं द्वितीयः पर्य्यायः। पुनरपि तिसृभ्यो हिङ्करोति सहिङ्कर्त्ता तृचस्योत्तमया अन्त्यातया त्रिरुक्तया गायेत्। एषः तृतीयः पर्य्यायः। अनेन पर्य्यायेण त्रिवृत्स्तोमः सम्पद्यते। उक्तप्रकारेण त्रिधा वर्त्तते इति त्रिवृत्स्तोमः तस्य विष्टुतिरेषा उद्यती ऊर्ध्वं गच्छन्ती। उक्तेषु पर्य्यायेषु प्रथममध्यमोत्तमक्रमेण उर्ध्वगमनादन्वर्थसञ्ज्ञेयमेषा त्रिवृतः प्रथमा विष्टुतिः ॥ १ ॥

एतस्यां विष्टुतौ अधिकारिणमाह—

ज्येष्ठो ज्यैष्ठिनेय स्तुवीत ॥ २ ॥

यो यजमानो भ्रातॄणां मध्ये स्वयं ज्येष्ठो भवति सपत्नीनां मध्ये या ज्येष्ठा तस्याः पुत्रश्च भवति स यजमान एतया विष्टुत्या 'स्तुवीत' स्तौति। तत्रान्तर्णीतण्यर्थः स्तावयेत् तस्य यजमानस्य एतया विष्टुत्या स्तुयुरित्यर्थः ॥ २ ॥

एतां विष्टुतिं अन्नप्राप्त्यादिफलसाधनतया प्रशंसति—

अग्रादग्रꣳ रोहत्यभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यघ्नोति तस्मादेतया स्तोतव्य मृध्या एव ॥ ३ ॥

'अग्रादग्र'मुत्कर्षादूर्ध्वं पुनरप्युत्कर्षं 'रोहति' प्राप्नोति उत्तरोत्तराभिवृद्धिर्भवति तस्यैतया विष्टुत्या स्तुवते, तथा इयं विष्टुतिभिरभिक्राम-

न्ती त्रिषु पर्य्यायेषु प्रथममध्यमोत्तमानुपूर्व्वेणाभिमुखमाक्रामन्ती उपर्य्युपरि गन्त्री अत एषा प्रयुज्यमाना यज्ञस्याभिक्रमणायैव उपर्य्युपरि प्राप्तये एव भवति । ततश्च किमित्यत आह—यज्ञस्या 'भिक्रान्तेन' भावे निष्ठा ऽभिक्रमणेनारोहणेन परिसमापनेन 'ऋध्नोति' यजमानः समृद्धो भवति हिशब्दो हेतौ । यस्मादेवं तस्मादेतया विष्टुत्या स्तोतव्यम् ऋद्ध्या एव तत्स्तवनं यजमानस्य समृद्ध्या एव भवति ॥ ३ ॥

पुनरपि नानाविधफलसाधनत्वेन प्रशंसति—

पापवसीयसो विधृतिर्विपाप्मना वर्त्तते य एतया स्तुते नावगतो ऽपरुध्यते नापरुद्धोऽवगच्छति । न श्रेयाऽसं पापीयानभ्यारोहति न जनता जनतामभ्येति नान्योन्यस्य प्रजा आददते यथाक्षेत्रं कल्पन्ते । अवर्षुकस्तु पर्जन्यो भवतीमे हि लोकास्तृचस्तान् हिङ्कारेण व्येति ॥ ४ ॥

पापन्निकृष्टं वसीय उत्तमं पापं च वसीयश्च पापवसीयसी तयोरुभयो 'र्विधरिणी' असाङ्कर्य्यकरणी इयं विष्टुतिरेवं जानन् यएतया विष्टुत्या 'स्तुते' स्तौति, सः 'पाप्मना' पापेन 'निवर्त्तते' पाप्मनः पृथग् भवति इत्यर्थः । यत्र देशे विधरणी एषा विष्टुतिः प्रयुक्ता तत्र 'अवगतः' कर्त्तरि निष्ठायां अवगन्ता ज्ञाता 'नापरुध्यते' अज्ञानेनापरुद्धः अनाक्रान्तो भवति । यस्त्वपरुद्ध अज्ञानेनापवृतः स नावगच्छति न जानाति ज्ञानाज्ञाने तस्मिन्नधिकरणे सह न तिष्ठत इत्यर्थः । तथा 'श्रेयाऽसं' प्रशस्यतममुत्तमजातिं ब्राह्मणादिकं 'पापीया'न्निकृष्टतमः शूद्रादिर्ना 'भ्यारोहति' नाभिक्रामति न श्रेयाऽसः पापीयाऽसश्च विभक्ता एव वर्त्तन्त इत्यर्थः । तथा 'जनता' जनसमूहो 'जनतां' अन्यजनसमूहं 'नाभ्येति'नाभिगच्छति जनपदो जनपदान्तरं दौर्भिक्षादिकारणेन न प्रविशतीत्यर्थः । प्रजाश्चान्योन्यस्य धनादिकं 'नाददते' न स्वीकुर्व्वन्ति । अपि तु यथाक्षेत्रं स्वं स्वं क्षेत्रमनतिक्रम्य स्वक्षेत्रे कल्पन्ते । इत्थमस्या विष्टुतेर्बहूनि फलानि दर्शितानि, एकस्तु दोषो भवति, कोऽसौ दोष उच्यते—'पर्जन्यो' वृष्ट्यभिमानी देवः 'अवर्षुकोऽवर्षणशीलो भवति तस्मिन् देशे वृष्टिर्न स्यादित्यर्थः । यस्मिन् देशे एतया विष्टुत्या स्तुवते । कुत इत्यत आह इमे भूरादयस्त्रयो लोकाः तृचस्तिस्र ऋचो भूरादिलोकस्थानीयास्तान् लोकान् हिङ्कारेण प्रत्यृचं कृतेन

व्येति' विगमयति वियुक्तान् करोति । धयतिरत्रान्तर्गीतण्यर्थः । परस्परोपकार्य्योपकारकभावं विश्लेषयतीत्यर्थः । सति हि तस्मिन्नन्तरिक्षात्पृथिव्या उपकारात्मिका वृष्टिर्भवति नान्यथा । हि यस्मादेवं तस्मादवर्षुकः पर्जन्यो भवति ॥ ४ ॥

अथैतां प्रतिष्ठाफलतया प्रशंसति—

एषा वै प्रतिष्ठिता त्रिवृतो विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥ ५ ॥

'एषा वै' एषा खलु उद्यती त्रिवृतो विष्टुतिः प्रतिष्ठिता एकैकस्यामृचि एकैकस्य पर्य्यायस्य परिसमापनादस्यां प्रतिष्ठिता भवति । अन्नादिभिः समृद्धो भवतीत्यर्थः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ परिवर्त्तिनीं विष्टुतिं दर्शयति—

तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति स पराचीभिः परिवर्त्तिनी त्रिविष्टुतिः ॥ १ ॥

तिसृभ्यस्तिसृ ऋचो गातुं हिङ्कुर्य्यात् । स हिङ्कर्त्ता 'पराचीभि'रनावृताभिस्तिसृभिर्ऋग्भिर्गायेत् । एवमुत्तरयोरपि पर्य्याययोर्योजना । एषा त्रिवृत् स्तोमस्य विष्टुतिः 'परिवर्त्तिनी' आवर्त्तिनी । यथा प्रथमे पर्य्याये अनावृताभिर्गानं तथोत्तरयोरपीति अस्या आवृत्तिः ॥ १ ॥

अथैतां बहुफलसाधनत्वेन प्रशंसति—

प्रपरिवर्त्तमाप्नोति य एतया स्तुते सन्तता विष्टुतिः प्राणोऽपानो व्यानस्त ऋचस्तान् हिङ्कारेण सन्तनोति । सर्व्वमायुरेति न पुरायुषः प्रमीयते य एतया स्तुते वर्षुकः पर्ज्जन्यो भवतीमे हि लोकास्तृचस्तान् हिङ्कारेण सन्दधाति ॥ २ ॥

यो यजमान 'एतया' विष्टुत्या स्तुते स 'परीवर्त्त' परिवृत्य परिस्य पुनः पुनर्धनादिकं प्राप्नोति । परिपूर्व्वाद्वृतेराभीक्ष्ण्ये णमुल्वेतीति

णमुल्प्रत्ययः । यद्वा परिवर्त्तन इति परिवर्त्तन् धनं पचाद्यच् । तथा इयं विष्टुतिः 'सन्तता' पूर्ववच्च मध्ये हिङ्कारामावेनाविच्छिन्ना मुख्यप्राणस्य मुख्यप्रदेशवर्त्तिनी या प्राणनरूपा वृत्तिः स प्राणः अपानरूपा अधोगामिनी सोऽपानः । तयोरुभयोर्मध्यवर्त्तिनी विविधं सर्व्वं शरीरं व्याप्य वर्त्तमाना या वृत्तिः स व्यानः । तदेतत् त्रितयं तृचः एतास्तिस्र ऋचः प्राणादिस्थानीया इत्यर्थः । तथासति ऋचो हिङ्कारेण सन्तन्वन् तान् तान् प्राणादीनेव आदौ सकृत्प्रयुक्तेन हिङ्कारेण सन्ततानविच्छिन्नान् करोति व्यवच्छेदकस्य हिङ्कारस्य मध्ये प्रयोगाभावात्, अत एव प्राणवृत्तीनामवच्छेदात्सर्व्वं शतवर्षलक्षणमायुरेति प्राप्नोति । एतदेव व्यतिरेकेणाह आयुषः क्रमात् शतवर्षलाक्षणादेष पुरा च'न' 'प्र' मीयते न म्रियते य एतया विष्टुत्या स्तुते स यजमान उक्तविध इत्यर्थः । किञ्चास्य 'पर्জन्यो' वर्षुको वर्षणशीले भवति य इमे त्रयो लोकास्ते तृचः ऋक्त्रयस्थानीयत्रित्वसाम्यात्, तथासति आदौ प्रयुक्तेन हिङ्कारेणाविच्छेदेन तिस्रऋचः सन्तन्वन् इमानेव लोकान् सन्दधातीति उपकार्योपकारकभावेन संयुक्तान् करोति ॥२॥

अथास्यामपि विष्टुतौ एको दोषो विद्यते इत्याह—

श्लक्ष्णेव तु वा ईश्वरा पशून्निर्मृजः सैषा च पराचीत श्रेयान् भवत्युत यादृङेव तादृङ् नेत्तु पापीयान्॥३॥

'एषा' परिवर्त्तिनी विष्टुतिः 'श्लक्ष्णेव तु वै' इवशब्दोवधारणे तुशब्दो वैलक्षण्यद्योतकः श्लक्ष्णा मध्ये हिङ्कारामावेन तु श्लिष्टैव खलु ततः किं पशून् यजमानसम्बन्धिनो गवादीन् 'निर्म्मृजो' निर्म्मार्ष्टुमपगमयितुं विनाशयितु 'मीश्वराः' समर्था भवन्ति ईश्वरे तोसुन् कसुनाविति मृजेस्तुमर्थे कसुन् प्रत्ययः । अयमेको दोषः । किञ्च सैषा विष्टुतिः 'आ च पराचो'ऽभिमुखी च भवति, कथं ? यथैकस्मिन् पर्याये तथैवोत्तरयोरप्यावर्त्तते इत्याभिमुखीत्युच्यते । तथैकस्मिन् पर्य्याये पराचीभिस्तिसृभिर्ऋग्भिः स्तवनात् पराङ्मुखीति च । अस्त्वेवमुभयरूपता किन्तत इत्यत आह उतेति । उतशब्दो वाशब्दस्यार्थे, ईदृशीं विष्टुतिं प्रयुञ्जानः 'श्रेयान्' यज्ञफलप्राप्त्या वा प्रशस्ततमो वा भवति । 'उत' अथवा 'यादृङेव 'तादृक् । एवकारो भिन्नक्रमः यागानुष्ठानात्पूर्व्वं यादृक्रूपो भवति अनुष्ठितेऽपि यागे तादृगेव तादृश एव भवति प्रयोगकृतोऽतिशयस्तस्मान्न भवति इत्यर्थः । 'नेत्तु' इच्छब्दोऽवधारणे नैव तु पापीयान् पूर्वरूपान्निकृष्टो भवति ॥ ३ ॥

एषा विष्टुतिर्भाल्लविशाखिनां नित्येति दर्शयति—

तामेताम्भाल्लवय उपासते तस्मात्ते प्रतिगृह्णन्तः परिवर्त्तान्न च्यवन्ते ॥ ४ ॥

'तामेतां' परिवर्त्तिनीं विष्टुतिं भाल्लविशाखिनः 'उपासते' त्रिवृत् स्तोमे प्रयुञ्जते । अतस्ते धनादिकं प्रतिगृह्णन्तः 'परिवर्त्तात्' परिवर्त्तमानात् तस्माद्धनात् 'न च्यवन्ते' न वियुज्यन्ते ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथ कुलायिनीं विष्टुतिन्दर्शयति—

तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति या मध्यमा सा प्रथमा योत्तमा सा मध्यमा या प्रथमा सोत्तमा तिसृभ्यो हिङ्करोति योत्तमा सा प्रथमा या प्रथमा सा मध्यमा या मध्यमा सोत्तमा कुलायिनी त्रिवृतो विष्टुतिः ॥ १ ॥

परिवर्तिनी प्रथयः पर्यायः द्वितीये पर्य्याये पराचीभिः प्रयुक्तस्य तृचस्य या मध्यमा प्राक् सा प्रथमा कार्य्या । योत्तमा सा मध्यमा कार्य्या । या प्रथमा सोत्तमा कार्य्या । तृतीयपर्यायः निगदसिद्धः । कुलायिनी कुलायो नीडं पक्षिणां निवासस्थानं तद्यथा व्यस्ततृणादिनिर्म्मितम् एवं व्यत्यासयुक्ता ऋचः कुलायास्तैस्तद्वती कुलायिनी एतत्संज्ञा त्रिवृतस्तोमस्य विष्टुतिरियम् ॥ १ ॥

अस्यां विष्टुतौ कोऽधिकारीत्यत आह—

प्रजाकामो वा पशुकामो वा स्तुवीत प्रजा वै कुलायपशवः कुलायङ्कुलायमेव भवति ॥ २ ॥

प्रजानां पशूनाञ्च कुलायवदवस्थितिहेतुत्वात् कुलायत्वेन स्तुतिः । कुलायिन्या स्तुवानोपि प्रजानां पशूनां च कुलायमेव आश्रयभूतो भवत्येव ॥ २ ॥

पुनरप्यधिकारिविशेषं दर्शयति—

एतामेवानुजावराय कुर्य्यादेतासामेवाग्रं परियतीनां प्रजानामग्रम्पर्येति ॥ ३ ॥

अनु पश्चात् जायत इत्यनुजः कनीयान् स हि निकृष्टस्तस्मादप्यवरो निकृष्ट आनुजावरस्तादृशाय यजमानायेति अग्रं परियतीनां लोके याः प्रजाः अग्रं वयोगुणादिभिः श्रेष्ठपदं 'परियन्ति' परितो गच्छन्ति एतासामेव श्रैष्ठ्यं परिगच्छन्तीनां प्रजानां मध्ये स यजमान 'अग्रं' श्रेष्ठं पदं 'पर्येति' परिगच्छति सर्व्वोत्कृष्टो भवतीत्यर्थः ॥ ३ ॥

सत्रेष्वहीनेषु च बहूनां यजमानानां फलसाम्यात् कुलायिनीं विधत्ते—

एतामेव बहुभ्यो यजमानेभ्यः कुर्य्यात् यत्सर्व्वा अग्रिया भवन्ति सर्व्वा मध्ये सर्व्वा उत्तमाः सर्व्वानेवैनान् समावद्भाजः करोति नान्योन्यमपघ्नते सर्व्वे समावदिन्द्रिया भवन्ति ॥ ४ ॥

एतामेव कुलायिनीं त्रिवृतो विष्टुतिं बहुभ्यो यजमानेभ्यः उद्गाता कुर्य्यात् यत् यस्माद्धेतोः तृचगताः सर्व्वा ऋचः अग्रिया मुख्याः प्रथमा भवन्ति सर्व्वासु मध्ये वर्त्तमाना भवन्ति सर्व्वाश्चोत्तमा भवन्ति । तद्यथा प्रथमे पर्याये प्रथमैव प्रथमा भवति । मध्यमे तु मध्यमा प्रथमा भवति । उत्तमे उत्तमा प्रथमा भवति । एवꣳ सर्वासां प्राथम्यं जातम् । तथा प्रथमपर्य्याये मध्यमैव मध्यमा द्वितीयपर्य्याये उत्तमैव मध्यमा तृतीये पर्याये प्रथमैव मध्यमा । एवंसति तिस्रोपि मध्यमाः सम्पन्नाः।तथा प्रथमे पर्य्याय उत्तमोत्तमा भवति द्वितीये पर्याये प्रथमैवोत्तमा भवति। तृतीये पर्य्याये मध्यमैवोत्तमा भवति । एवꣳ सर्व्वा अप्युत्तमाः सम्पन्नाः । यस्मादेता सर्व्वा ऋचः समानरूपाः ततो हेतोरनया विष्टुत्या सर्वानेवैनान् यजमानानुद्गाता समावद्भाजः समावच्छब्दः पर्य्यायः समं फलं भजत इति समावद्भाजः साम्येन फलभाजः करोति । अत एव नान्योन्यमपघ्नते परस्परन्न हिंसन्ति । तथा सर्व्वे यजमानाः 'समावदिन्द्रियाः' समावद्वीर्य्याः समानसामर्थ्या भवन्ति ॥ ४ ॥

फलान्तरमाह—

वर्षुकः पर्जन्यो भवतीमे हि लोकास्तृचस्तान् हिङ्कारेण व्यतिषजति ॥ ५ ॥

लोकस्थानीयानां तिसृणामृचामादौ प्रयुक्तेनैकेनैव हिङ्कारेण व्यतिषञ्जनात् संयोजनात् त्रयाणां लोकानां परस्परमुपकार्य्योपकारकभावो न बाधित इति पर्जन्यो वर्षणशीलो भवतीत्यर्थः ॥ ५ ॥

अस्यामपि विष्टुतौ बहुदोषाः संभवन्तीत्याह—

पापवसीयसन्तु भवति ॥ ६ ॥

तुशब्दो फलवैलक्षण्यद्योतनार्थः।पापं प्रसिद्धं वसीयः पुण्यं तदुभयमेकाश्रयं भवति । इतरत् उद्यतीवाक्यशेषवत् व्याख्येयम् । नञः भावोत्र विशेषः । इत्थं विष्टुतयस्तिस्रो विहिताः, तिसृष्वपि तासु फलविशेषश्रवणान्निन्दादर्शनाच्च समानफलत्वात् सर्व्वा नित्याः, यत्र विशेषादेशः क्रियते निमित्तं वा कामो वा श्रूयते ततोऽन्यत्र नित्यप्रयोगे आद्याभिरेताभिरेव स्तुतिभिः स्तोमसम्पादनं कार्य्यम्, तदाह सूत्रकृत्—'प्रथमाभिर्विष्टुतिभिः स्तोमविधानमनादेशे ताः पक्षाः सर्व्वाभिप्रायाश्चेति' । पुनरपि यथाशेषं वा विदध्यादित्यादिना खण्डशेषेण बहवः पक्षाः सूत्रकृतोपन्यस्ताः । ते तत्रैव बोद्धव्याः । नन्वेतास्वपि प्रत्येकं निन्दादर्शनात् कथमासां नित्यत्वम् । नैष दोषः । उद्यत्यान्तावत् यो दोष उक्त अवर्षुकः पर्जन्यो भवतीति, स कुलायिनीपरिग्रहे परिहियते । तत्र हि वर्षुकः पर्जन्यो भवतीत्याम्नातम् । यत्तु कुलायिन्यां दोषदर्शनं 'पापवसीयसन्तु भवत्यधरोत्तर'मित्यादि तदुद्यतीप्रयोगेण विहृतं तत्र हि पापवसीयसो विधृतिरिति सा श्रूयते श्लक्ष्णेव तु पापवसीयसन्तु भवति ॥ ६ ॥

अधरोत्तरमपावगतो रुध्यतेवगच्छत्यपरुद्धः पापीयान् श्रेयाꣳसमभ्यारोहति जनता जनतामभ्येत्यन्योन्यस्य प्रजा आददते न यथाक्षेत्रं कल्पन्ते ॥ ७ ॥

प्रथमाया मध्यमायाश्चान्ते प्रयोग इति यदस्ति तदेतदधरोत्तरमनुष्ठानं यस्मिन् देशे क्रियते तत्र वा ईश्वरा पशून्निर्मृज इति परिवर्त्तिन्यां यदपशुलक्षणं दोषदर्शनं तदुद्यत्यां परिहृतं भवति—'एषा वै प्रतिष्ठिता विष्टुतिरिति' । तत्र हि वाक्यशेषः—'प्रजापशुसमृद्धा हि प्रतिष्ठितो भवती'ति ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्याये तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

अथ पञ्चदशस्तोमस्य तिस्रो विष्टुतयः । तत्र प्रथमं पञ्चपञ्चिन्यास्यां विष्टुतिं दर्शयति—

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया स एकया,

पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया,पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः, पञ्च पञ्चिनी पञ्चपञ्चदशस्य विष्टुतिः ॥ १ ॥

चतुर्ष्वाज्यस्तोत्रेष्वेकैकं तृचात्मकं सूक्तं तस्मिन् तृचे पञ्चदशसंख्या ऋचः सम्पादनीयाः । तच्च सम्पादनं आवृत्तिमन्तरेण न सम्भवतीत्यावृत्तिप्रकार इहोपदिश्यते त्रिभिः पर्यायैः स्तोत्रमावर्त्तनीयम् । अग्न आयाहीत्येषा सूत्रेण प्रथमा ऋक् , तन्त्वा समिद्भिरिति द्वितीया, स नः पृथ्विति तृतीया । तासु प्रथमामृचं प्रथमे पर्याये त्रिरावर्तयेत् इतरे द्वे सकृत्सकृत् । द्वितीये पर्याये मध्यमां त्रिरभ्यस्येत् तृतीये पर्य्याये अन्तिमां त्रिरभ्यस्येत् । एवं सत्येकैकस्य आवृत्तिः पञ्चधा सम्पद्यते । एषा पञ्चपञ्चिनी एकैकस्मिन् पर्य्याये पञ्चर्चो भवन्तीति । पञ्चपञ्चिन्येतत्संज्ञा पञ्चदशस्तोमस्यैषा विष्टुतिः ॥ १ ॥

अथैतां पुरुषपश्वादिप्राप्तिसाधनत्वेन प्रशंसति—

पाङ्क्तः पुरुषः पांक्ताः पशवस्तया पुरुषञ्च पशूंश्चाप्नोति वज्रो वै पञ्चपशो यत्पञ्चपञ्च व्यूहति वज्रमेव तद्व्यूहति शान्त्या एषा वै प्रतिष्ठिता पञ्चदशस्य विष्टुतिः प्रतिष्ठाति य एतया स्तुते ॥ २ ॥

पङ्क्त्याख्ये छन्दसि पञ्चसंख्या विद्यते तस्य पञ्चभिः पदैरुपेतत्वात्, पुरुषेपि द्वौ हस्तौ द्वौ पादौ शिरश्चेति पञ्चसंख्या विद्यते, पशुष्वपि चत्वारः पादाः पुच्छञ्चेति पञ्चसंख्यास्ति । अतः संख्याद्वारा पुरुषस्य पशूनाञ्च पाङ्क्तत्वं विष्टुतेरपि पञ्चसंख्यायोगात्पाङ्क्तत्वमस्ति तस्मादेतया विष्टुत्या पुरुषं च पशूंश्चाप्नोति यजमानः, तथा प्रजापतेरुरसः सकाशात् पञ्चदशस्तोम इन्द्रश्च सहोत्पन्नौ वज्रश्चेन्द्रसम्बद्ध इति तद्वारा वज्रत्वेनास्य स्तुतिः । योऽयं पञ्चदशस्तोमोऽसौ वज्रो वै वज्र एव ईदृशं वज्रं यत् यस्मात्कारणात् पञ्च पञ्च पञ्चशः पञ्चशः स्तोमेन व्यूहति विभजति । ततो वज्ररूपस्य पञ्चदशस्य त्रेधा शकलीकरणात् वज्राभावेन यजमानस्य शान्त्यै उपद्रवशमनायैव एषा विष्टुतिः सम्पद्यते । उक्तप्रकारेण प्रजापशुहेतुत्वात् वज्रसंख्यया विभागाच्च एषैव पञ्चदशस्तोमस्य प्रतिष्ठिता विष्टुतिः य एतया स्तुते स प्रतिष्ठां लभते ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य चतुर्थखण्डः ।

अथ पञ्चमः खण्डः ।

अथ पञ्चदशस्तोमस्यापरा विष्टुतिः प्रदर्श्यते--

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया तिसृभ्यो हिंकरोति स पराचीभिस्सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः ॥ १ ॥

स्पष्टोर्थः ॥ १ ॥

अस्यामधिकारणमाह—

त्रीन् स्तोमान् प्रतिविहिता ब्रह्मवर्च्चसकामः स्तुवीत ॥ २ ॥

एषा विष्टुतिः पञ्चदशत्रिवृत् सप्तदशसंख्याकान् स्तोमान् 'प्रतिविहिता' स्तोमत्रयप्रतिनिधित्वेन सम्पादिता तया ब्रह्मवर्च्चसकामः ब्रह्मवर्च्चसं श्रुताध्ययनजन्यन्तेजस्तत्कामः 'स्तुवीत' ॥ २ ॥

कथमस्याः स्तोमत्रयप्रतिनिधित्वमित्यत आह--

पञ्चभिः पञ्चदशं तिसृभिस्त्रिवृत्ँ सप्तभिः सप्तदशम् ॥ ३ ॥

प्रथमपर्यायगताभिः पञ्चभिर्ऋग्भिः पञ्चदशं स्तोमं प्रतिविहिता पञ्चदशस्य हि प्रथमे पर्याये पञ्चर्चो भवन्ति । द्वितीयपर्य्यायगताभिस्तिसृभिः ऋग्भिस्त्रिवृत स्तोमं प्रतिविहिता त्रिवृत्स्तोमस्य ह्येकस्मिन् पर्य्याये तिस्र ऋचो भवन्ति । तथा तृतीयपर्य्यायगताभिः सप्तभिः ऋग्भिः सप्तदशं स्तोमं प्रतिविहिता । तस्य ह्येकैकास्मिन् पर्याये सप्तर्चो भवन्ति । एवमस्याः स्तोमत्रयसाम्यं सम्पन्नम् ॥ ३ ॥

अतः किं ज्ञातमित्यत आह—

वीर्य्यं वै स्तोमा वीर्य्यमेव तदेकधा समूहते ब्रह्मवर्च्चसस्यावरुध्यै तेजस्वी ब्रह्मवर्च्चसी भवति य एतया स्तुते ॥ ४ ॥

ये उदाहृतास्त्रयः स्तोमा वीर्य्यात्मकाः पृथक् पृथक्जननहेतुत्वात् तथासति पर्य्यायत्रयेण स्तोमत्रयसदृशा एताः प्रयुञ्जानः वीर्य्यमेव एकधा एकप्रकारेण समूहते स्तोमत्रयसामर्थ्यं समूहीकरोतित्यर्थः । एतच्च वीर्य्यसमूहनं ब्रह्मवर्च्चसस्यावरुध्यै अवरोधनाय सम्पादनाय

भवति । अन्योपि यजमानः एतया 'स्तुते' स्तौति स तेजस्वी ब्रह्मवर्चस्वी भवति । शारीरं लौकिकसामर्थ्यं तेजः श्रुताध्ययनादिजन्यं ब्रह्मवर्चसम् ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

अथ पञ्चदशस्यापरामुद्यताख्यां विष्टुतिं दर्शयति—

तिसृभ्यो हिंकरोति सपराचीभिः, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया, सप्तभ्यो हिङ्करीति स तिसृभिस्स एकया स तिसृभिरुद्यती पञ्चदशस्य विष्टुतिः ॥ १ ॥

त्रिषु पर्यायेषूत्तरोत्तरसंख्योत्कर्षमेतीत्युद्यती पञ्चदशस्य विष्टुतिरिति । त्रिषु पर्यायेषूत्तरोत्तरसंख्योत्कर्षमेतीत्युद्यतीत्युच्यते ॥ १ ॥

तस्याः फलमाह—

एतया वै देवाः स्वर्गं लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ २ ॥

यस्मादेतया विष्टुत्या स्तुत्वा देवाः स्वर्गमायन्नगमन् तस्मादन्योपि यः स्वर्गं कामयते स एतया स्तुवीत । स स्तुवन् यजमानः स्वर्गलोकस्य समष्ट्यै समाप्तयै इति पाठान्तरं पुस्तकान्तरे । सम्यक् व्यापनायावकल्पते । स च स्वर्गं प्राप्य तस्मात्पुनर्न च्यवते नाधः पतति यतोऽयन्तुष्टुवानः तिसृभ्यः पञ्चभ्यः सप्तभ्य इत्यानुपूर्व्यात् स्तौति अतोऽयं न परावर्त्तते इत्यर्थः । लक्षणहेत्वोः क्रियाया इति हेतोः शानच् प्रत्ययः लुकि प्राप्ते व्यत्ययेन स्युः ॥ २ ॥

यद्वा फलान्तरमाह—

अभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥ ३ ॥

त्रिवृत् उद्यत्यामेतत् सर्वं व्याख्यातम् तद्वदत्रापि व्याख्येयम ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

अथ सप्तदशस्तोमस्य दशसप्ताख्या विष्टुतिः । सा द्विःप्रकारा सप्तास्थितेत्यपरा सा च द्विःप्रकारा । ततः पञ्चभ्यस्तिसृभ्यो नवभ्यश्चेत्येकः । तत उद्यती ततो भस्त्रेति दशसप्तसप्तास्थितयोर्भेदेन सहेत्येवं सप्त विष्टुतयः । तत्राद्यां दशसप्ताख्यां विष्टुतिं दर्शयति—

पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया, स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिर्दशसप्ता सप्तदशस्य विष्टुतिः ॥ १ ॥

स्पष्टार्थः आदितो द्वाभ्यां पञ्चर्चाभ्याꣳ हिङ्करोति पर्य्यायाभ्यां दश, उत्तरे सप्तेति दश च सप्त चास्यां विष्टुत्यामिति दशसप्तेयं सप्तदशस्तोमस्य विष्टुतिः ॥ १ ॥

एतां प्रशꣳसति—

एतया वै देवा असुरानत्यक्रामन्नाति पाप्मानं भ्रातृव्यं क्रामति य एतया स्तुते ॥ २ ॥

एतया दशसप्तया विष्टुत्या खलु देवाः पूर्वं असुरानत्यक्रामन् अतिक्रान्तवन्तः तिरस्कृतवन्त इत्यर्थः । तस्मादन्योपि यो यजमान एतया स्तुते सोऽपि पाप्मानं पापरूपं भ्रातृव्यं शत्रुं अतिक्रामति अतिक्रान्तो भवति ॥ २ ॥

पुनरपि प्रकारान्तरेण प्रशꣳसति—

अभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥ ३ ॥

उद्यत्या वाक्यशेषवदेतत् व्याख्येयम् ॥ ३ ॥

तथा प्रजापशुसाधनत्वेनैतां प्रशꣳसति—

गार्भिणी विष्टुतिः प्रप्रजया प्रपशुभिर्जायते य एतया स्तुते ॥ ४ ॥

यथेयं विष्टुतिः गर्भिणी अस्यां हि मध्यमेषु विष्टावेषु तिस्र एकैका चेति पञ्च भवन्ति, उत्तमेषु एकैका तिस्रश्चेति पञ्च, एवं द्वयोः पञ्चकयोर्मध्ये सप्त भवन्त्यधिकसंख्यया प्रविष्टत्वात् अस्या विष्टुतेर्गार्भिणीत्वम् । तस्या अपि गर्भावस्थानप्रदेशो मध्यकायस्थूलो भव-

ति तत्सामान्येन गर्भिणीस्तुतिः । अतो यो यजमान एतया स्तुते स प्रजया प्रजापतेः पुत्रपौत्रादिभिः प्रवृद्धो भवति, तथा पशुभिश्च प्रजापतेः गवाश्वादिभिश्च प्रवृद्धो भवति ॥ ४ ॥

पुनरपि प्रकारान्तरेण प्रशंसति—

विड्वै सप्तदशस्तस्या राजा गर्भो विश एव तद्राजानङ्गर्भङ्करोति ॥ ५ ॥

योऽयं सप्तदशस्तोमः स विड्वैश्य एवेति परिजन एव उभयोः प्रजापतेर्मध्यभागादुत्पत्तेः सम्बन्धः । तस्याः परिजनभूताया विशः राजा गर्भः गर्भवन्मध्ये वा स्थितो भवति विट्त्वेन संस्तुतस्य सप्तदशस्तोमस्य मध्ये प्रजायतनभूता मध्यमा स्तोत्रीया भवति गर्भङ्करोतीति यत् तत् राजानं क्षत्रियमेव विशो गर्भङ्करोति । मध्यस्तोत्रीयायाश्च ऋत्विजायतनत्वमुत्तरत्रान्नास्यते ॥ ५ ॥

ब्रह्मणो वा आयतनं प्रथमा क्षत्रस्य मध्यमेति त्रिवृत उद्यस्या इव ज्ञानाज्ञानयोर्विवेकवदस्याः फलमित्याह—

नावगतोपरुध्यते नापरुद्धोऽवगच्छति ॥ ६ ॥

पूर्ववद्व्याख्येयम् ॥ ६ ॥

तथान्नस्य साधनत्वेन क्षुन्निवारकैषा विष्टुतिरिति प्रशंसति—

अन्नं वै सप्तदशो यत्सप्त मध्ये भवन्ति पञ्च पञ्चाभितोऽन्नमेव तन्मध्यतो धीयतेऽनशनायुको यजमानो भवत्यनशनायुकाः प्रजाः ॥ ७ ॥

अयं सप्तदशस्तोमः, अन्नं वै अन्नमेव, दशसंख्याया ऊर्ध्वं सप्तसंख्यातिरिच्यते । तथा सप्तसंख्यया सप्तग्राम्या ओषधयः सप्तारण्या इति श्रुतिप्रतिपादितं अन्नं च स्मार्यते । एवं परम्परया सप्तदशस्यान्नत्वम् । यद्वा प्रजापतेरन्नायतनादुदरात् सृष्टत्वात् सप्तदशस्यान्नत्वम् । शाखान्तरे सप्तदशस्योत्पत्तिं प्रस्तुत्य स्तूयते हि तस्मात् आद्या अन्नधनाद्यसृजन्तेति । विष्टावसंनिवेशनमध्यमविष्टावे स्थिताः यत् सप्त मध्यमा भवंति, अभितः प्रथमेषूत्तमेषु च विष्टावेषु पञ्च पञ्चार्धा भवन्ति । तत्तेन पञ्चसंख्यया युक्तस्य पाङ्क्तस्य पुरुषस्य मध्यतो मध्ये उदरे अन्नमेव धीयते । यत एवं ततः कारणात् सप्तदशस्तोमस्य प्रयोक्ता यजमानः अनशनायुको अशनाया अशने वा क्षुत्पीडा तद्र-

हितो भवति । तद्देशवर्त्तिन्यो अन्या अपि प्रजाः अनशनायुकाः अशनायारहिता भवन्ति ॥ ७ ॥

तथा पशुसाधनत्वेनैतां प्रशंसति—

वैराजो वै पुरुषः सप्त ग्राम्याः पशवो यद्दशपूर्व्वा भवन्ति सप्तोत्तमा यजमानमेव तत् पशुषु प्रतिष्ठापयति ॥ ८ ॥

पर्य्यायद्वयगता दशसंख्याः पूर्व्वोत्तमा भवन्ति, प्रथमतृतीयपर्य्यायगता ऋचो भवन्तीति यत्, तत्तेन यजमानमेव पशुषु प्रतिष्ठापयति । कथमेतत् यतो वैराजः पुरुषः विराट्पादेन च दशसंख्या विद्यते । 'नव वै पुरुषे प्राणा दशमी नाभि'रिति श्रुत्यन्तरात् पुरुषेष्वास्ति दशर्चस्य स्तुतिः । सप्तसंख्याका ग्रामे भवाः पशवो गवाश्वाद्या अवशिष्टसप्तर्चस्थानीयाः । अतो यजमानं पुरुषमुद्गाता सप्तसंख्याकेषु स्थापयतीत्येतदुपपन्नम् ॥ ८ ॥

एवमुक्तेन प्रकारेणेयं विष्टुतिः प्रतिष्ठाहेतुरिति दर्शयति—

एषा वै प्रतिष्ठिता सप्तदशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

उक्तायाः एव दशसप्तायाः विष्टुतेर्व्विधानान्तरमाह—

एष एव व्यूहः सप्तैकमध्या ॥ १ ॥

दशसप्तायाः विष्टुत्याः यस्तृतीयः पर्य्यायः—'सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभि'रित्युक्तः एष एव पर्य्यायो व्यूहः व्यूहे विभजनीयः । कथमिति तदुच्यते । उत्तमपर्य्यायगता याः सप्तर्च स्तता एकमध्याः कुर्य्यात् । स एकया स तिसृभिस्स तिसृभिरिति पूर्व्वमुक्तः स तिसृभिरिति कुर्य्यात् । आद्यां तृतीयां च त्रिरावर्त्तयेदित्यर्थः ॥ १ ॥

एतां प्रशंसति—

ब्रह्मणो वा आयतनं प्रथमा क्षत्रस्य मध्यमा विश उत्तमा यत्प्रथमा भूयिष्ठा भाजयति ब्रह्मण्येव तदो-

ओजो वीर्यं दधाति ब्रह्मण एव तत् क्षत्रं च विशश्चानुगे करोति क्षत्रस्येवास्य प्रकाशो भवति य एतया स्तुते॥२॥

प्रथमा स्तोत्रीयत्यृचस्याद्या या सा ब्रह्मणो ब्राह्मणजातेरायतनं स्थानं, उभयोः प्राथम्येन सम्बन्धात् । या मध्यमा द्वितीया सा क्षत्रियस्य क्षत्रियजातेः । योत्तमा तृतीया सा विशो वैश्यजातेरायतनम् । तथासति प्रथमां ब्राह्मणजातेरायतनभूतां आद्यामृचं भूयिष्ठा बहुतरा संख्या भाजयति प्रापयति । तत् कथमित्युच्यते । पूर्वस्यां विष्टुतौ द्वयोः पर्याययोः सा प्रथमा एकैका आवृत्त्या तिस्रश्चेति पञ्चसंख्यायुक्ताऽभूत् । सैवेदानीं तृतीयेऽपि पर्य्याये त्रिरावर्त्तनात् संप्तसंख्योपेता भवति । मध्यमोत्तमे तु पञ्चसङ्ख्योपेते एवं प्रथमामधिकसंख्यां करोतीति यत् तत् तेन ब्रह्मणि ब्राह्मणजातावेव ओजो बलं वीर्यं परप्रेरणसामर्थ्यं दधाति स्थापयति । अपिच तत्तेन क्षत्रियवैश्यस्थानभूतयोर्द्वितीयतृतीययोर्जनसंङ्ख्योपेतत्वकरणेन क्षत्रं च क्षात्रियजातिं च विशं च वैश्यजातिं च ब्रह्मणो ब्राह्मणजातेरेव अनुगे अनुगत्यौ उपक्षीणे करोति स्तोता, तस्मादन्योऽपि यो यजमान एतया स्तुते क्षत्रस्येव क्षत्रियजातेरिवास्य यजमानस्य प्रकाशः कीर्तिर्भवति ॥ २ ॥

उक्ता विष्टुतिः त्रिसर्व्वशाखिनाम्नित्येत्याह—

तामेतान्त्रिखर्व्वा उपासते तस्मात्ते स्पर्द्धमाना न व्लीयन्ते ॥ ३ ॥

तामेतां दशसप्ताख्यां विष्टुतिं त्रिखर्व्वशाखिन उपासते प्रयुञ्जते । तस्मादुपासनात् ते कदाचिदपि स्पर्द्धमानाः सन्तो न व्लीयन्ते न हिंस्यन्ते । व्लीनातिर्हिंसाकर्म्मा ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथ सप्तदशस्तोमस्य सप्तास्थिताख्यां विष्टुतिमाह—

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया, तिसृभ्यो हिङ्करोति स पराचीभिस्सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभिस्सप्तास्थिता ॥१॥

सप्तसंख्या प्रथमे पर्य्याये स्थिता यस्याः सा सप्तास्थितेति नाम संपन्नम् । स्पष्टमन्यत् ॥ १ ॥

अस्यामधिकारिणमाह—

भ्रातृव्यवांस्तुवीत यथा सप्तास्थितेन मत्येन समी करोत्येवं पाप्मानं भ्रातृव्यं प्रुजति ॥ २ ॥

भ्रातृव्यः शत्रुः तद्वान्यजमानः एतया सप्तास्थितया विष्टुत्या स्तुवीत स्तावयेत्। यथा लोके सप्तास्थितेन सप्तभिरनड्वद्भिः सप्तभिस्तीक्ष्णभागैः शङ्कुभिर्वा अधिष्ठितेन मत्येन मर्त्यनाम कृष्टस्य क्षेत्रस्य समीकरणादिसाधनफलकं तेन समीकरोति समीकरणार्थं कर्षकः प्रुजति क्षेत्रम्, एवं पाप्मानं पापकर्षनहेतुं भ्रातृव्यं शत्रुं अनया प्रथमतः सप्तसंख्यया विष्टुत्या स्तुवानः प्रुजति प्रभुनक्ति। रुजो भङ्ग इति धातुः ॥ २ ॥

फलसाम्यहेतुत्वेन बहुयजमानकेष्वपि प्रयोगेषु प्रयोक्तव्येत्याह—

एतामेव बहुभ्यो यजमानेभ्यः कुर्य्याद्यः प्रथमो हिङ्कारः स प्रथमाया यत्ताꣳ सप्तभ्यो हिङ्करोति तेन सा सप्त भजते यत्सप्तैव मध्ये सम्पद्यन्ते तेन सा सप्त भजते य उत्तमो हिङ्कारः स उत्तमाया यत्ताꣳ सप्तभ्यो हिङ्करोति तेन सा सप्त भजते सर्व्वानेवैनान् समावद्वाजः करोति नान्योन्यमपघ्नते सर्वे समावदिन्द्रिया भवन्ति ॥ ३ ॥

बहुयजमानार्थं एतां विष्टुतिङ्कुर्य्यात्। तथासति त्र्यृचगतानां तिसृणामृचां समसंख्यात्वसम्पादनात् सर्व्वे यजमानाः समानफला भवन्तीति समुदायार्थः। कथं सप्तदशे तिसृणामृचां प्रत्येकं सप्तसंख्यायोग इत्याशंक्य तत्प्रकारं सम्पत्त्या दर्शयति-यः प्रथमो हिङ्कारः स प्रथमाया ऋचः स्थाने भवति उभयोः प्राथम्यात् तां प्रथमामुद्दिश्य सप्तभ्यो हिङ्करोति हिङ्कृत्य स्तौति यत् तत् तेन ऋक्स्थानीयेन हिङ्कारद्वयेन सहसा प्रथमपर्य्यायविष्टावसन्निवेशेन पञ्चधा आवर्त्यमाना सती सा सप्तसंख्यां भजते। प्रथमपर्य्याये प्रथमविष्टावे तिस्रः इतरयोस्तु पर्य्याययोः प्रथमविष्टावगता एकैकेति तस्याः पञ्चधा आवृत्तिः यत्सप्तैव मध्ये सम्पद्यते त्रयाणामपि पर्य्यायाणां मध्यमेषु विष्टावेषु क्रमेण तिस्र एका तिस्र इति सप्तानां संपत्तिः तेन तेनैव सा मध्यमा सप्तसंख्यां भजते। य उत्तमस्तृतीयपर्य्यायगतो हिंकारः स उत्तमायास्तृतीयास्थाने उभयोस्तृतीयत्वसाम्यात् यत्तामुत्तमामुद्दिश्य सप्त-

भ्यो हिङ्करोतीति हिङ्कृत्य स्तौतीति यो द्वितीयो हिङ्कारस्सोऽपि तस्याः स्थाने भवति यदेतत् हिङ्कारद्वयमृक्स्थानीयं यत्तेन हिकारद्वयेन सह पर्य्यायत्रये उत्तमविष्टावेषु क्रमेणैकैके तिस्रश्चेत्यावर्त्यमाना पञ्चेति सप्तसंख्यां भजते । इयं तिसृणां सप्तसंख्यासाम्यसम्पत्तेः सर्वानेवैनान् यजमानान्समावद्भाजः समानफलयुक्तान् करोति उद्गाता ॥ ३ ॥

एषापि केषाञ्चिन्नित्येत्याह—

तामेतामाभिप्रतारिण उपासते तस्मात्त ओजिष्ठास्वानाम् ॥ ४ ॥

अभिप्रतारी नाम कश्चिद्राजर्षिस्तद्गोत्रजा आभिप्रतारिणः ते आभिप्रतारिणः तामेतां सप्तास्थितां विष्टुतिमुपासते कर्म्मसु नित्यं प्रयुञ्जते । अतस्ते स्वानां ज्ञातीनां मध्ये ओजिष्ठा ओजसि स्थिता भवन्ति । स्वशब्दस्य ज्ञातिवचनत्वेन स्वं ज्ञातिधनाख्यायामिति सर्व्वनामसंज्ञां पर्युदस्य आमः सुडभावः ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

सप्तदशस्तोमस्य सप्तास्थितायां विष्टुतेर्व्यूहनप्रकारान्तरमाह—

एष एव व्यूह उभयस्सप्तैकमध्या निर्म्मध्या ॥ १ ॥

उक्तायाः सप्तास्थितायां एष वक्ष्यमाणो व्यूहो विभागप्रकारः । कथमिति तदुच्यते—प्रथमोत्तमयोः पर्य्याययोर्विद्यमाना उभयः उभयविधाः सप्तर्च्च एकमध्याः कार्य्याः स 'तिसृभिस्स तिसृभिस्स एकये'ति हि प्रथमे पर्य्याये समाम्नाता । स एकया स तिसृभिः स तिसृभिरिति हि उत्तमे । तत्रोभयोः पर्य्याययोः स तिसृभिः स एकया स तिसृभिरिति मध्यमा एकैव यथा स्यात् तथा कुर्य्यादित्यर्थः । एवं सति तथा सति त्रिष्वपि पर्य्यायेषु मध्यमायाः स्तोत्रीयाया ऋच आवृत्त्यभावादेषां निर्मध्या निर्गतमध्यस्थौल्या तनुमध्येत्यर्थः ॥ १ ॥

अस्यामधिकारिणमाह—

आनुजावर स्तुवीतालोको वा एष यदानुजावरो यत् सप्तप्रथमास्सप्तोत्तमास्तिस्रो मध्ये व्यक्षरः पुरुषो

लोकमेवास्मै तन्मध्यतः करोति तस्मिँल्लोके प्रतितिष्ठति ॥ २ ॥

एतया विष्टुत्या आनुजावरेति कनिष्ठो यजमानः स्तुवीत यत् यत्र आनुजावरः स एष अलोको वै लोकः स्थानं तद्रहितः खलु जनैरपरिगृहीतत्वात्, तथासति यत् यस्मात्प्रथमाः प्रथमपर्य्यायस्थाः सप्तर्च उतमाः उत्तमपर्य्यायगताश्च सप्तर्चः मध्ये मध्यमपर्य्याये तिस्रः। यद्वा त्रिषु पर्य्यायेषु प्रथमोत्तमविष्टावगताः सप्तसप्तर्चो भवन्ति। मध्यमविष्टावगास्तु तिस्रः पुरुषस्तु त्र्यक्षरवाच्यो भवत्यानुजावरोपि पुरुषः यस्मादेव तस्मात् त्र्यक्षराभिधेयपुरुषस्थानीयमृचत्रयमध्ये प्रयुञ्जानः स्तोता अस्मा आनुजावराय लोकं स्थानमेव मध्यतो मध्ये करोति। अनया विष्टुत्या तस्य लोको लभ्यत इत्यर्थः। तस्मिँल्लोके प्रतिष्ठितश्च भवति ॥ २ ॥

अधिकार्य्यन्तरमाह—

एतामेव प्रजाकामाय कुर्य्यान्मध्यतो वा एष सँरूढो यः प्रजान्न विन्दते लोकमेवास्मै तं मध्यतः करोति तं लोकं प्रजया च पशुभिश्चानु प्रजायते ॥ ३ ॥

एतामेव विष्टुतिं प्रजां पुत्रभृत्यादिकां कामयमानायोद्गाता कुर्य्यात्। यः प्रजान्न विन्दते न लभते एषः पुत्रपश्वादीनां मध्यतो मध्यदेशात् संरूढः सम्यगुत्थितः प्रजावान्हि पुत्रभृत्यादीनां मध्ये तिष्ठति तत्तथा ततोस्मै प्रजाकामाय तिस्रो मध्ये प्रयुञ्जानः स्तोता मध्यतो मध्यं लोकं स्थानं करोत्येवं तल्लोकमनुलोकं सम्पत्तेरूर्ध्वं प्रजया पशुभिश्च प्रजायते प्रवृद्धो भवति अतः पशुकामोऽप्यत्राधिकारीत्युक्तं भवति ॥ ३ ॥

पुनरप्यधिकारिविशेषं दर्शयति—

एतामेवापरुद्धराजन्याय कुर्य्याद्विड्वै सप्तदशस्तस्या राजा गर्भो विश एव तद्राजानन्निर्हन्त्यपावगतो रुध्यतेवगच्छत्यपरुद्धः ॥ ४ ॥

एतामेव विष्टुतिं अपरुद्धः परिजनैर्निरुद्धस्तादृशाय राजन्याय अभिषिक्ताय राज्ञे एतामेव विष्टुतिं प्रयुञ्जीत योऽयं सप्तदशस्तोम उक्तः स विड्वै राज्ञः परिजनभूता वैश्यजातिरेव। अनयोः प्रजापतेर्मध्यदेहादुत्पत्तेः परस्परं सम्बन्ध इति पूर्व्वमेवोक्तम् तस्य विशो राजा

गर्भस्थानीयो भवति गर्भवन्मध्येऽवस्थानात्तथासति सप्तकयोर्मध्ये तिस्रः प्रयुञ्जान उद्गाता विशो वैश्यजातेरेव मध्ये पुरुष इति अक्षराभिधेयं राजानं निर्हन्ति अपराधकारिणं निकृष्य हन्ति गमयति स्थापयतीत्यर्थः । अन्यत् पूर्ववद्व्याख्येयम ॥ ४ ॥

पुनरप्यधिकारान्तरप्राह—

एतामेवाभिचर्य्यमाणाय कुर्य्यात्प्रजापतिर्वै सप्तदशः प्रजापतिमेव मध्यतः प्रविशत्यस्तृत्यै ॥ ५ ॥

यो यजमानोऽभिचर्य्यमाणो द्वेष्टृभिः कृतमाभिचारं प्राप्तो भवति तस्मै एतामेव विष्टुतिं कुर्य्यात् योयं सप्तदशस्तोमः स प्रजापतिर्वै प्रजापतिरेव उभयोः सप्तदशसंख्यासाम्यात् । प्रजापतेः सप्तदशत्वं ऐतरेयके समाम्नातम् 'द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान् संवत्सरः संवत्सरः प्रजापति'रिति । तथासति प्रजापत्यात्मनः सप्तदशस्य मध्ये यास्तिस्रः प्रयुज्यन्ते तेन त्र्यक्षरवाच्यः पुरुषोऽभिचर्य्यमाणः प्रजापतिमेव मध्यतः प्रजापतेरेव मध्यदेशे प्रविशति अस्तृत्यै अहिंसायै । स्तृञ् हिंसायामिति धातुः ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य दशमः खण्डः ।

अथ एकादशः खण्डः ।

तस्य सप्तदशस्तोमस्यैवापरा विष्टुतिः प्रदर्श्यते—

पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया, तिसृभ्यो हिङ्करोति स पराचीभिर्नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः ॥ १ ॥

स्पष्टार्थः ॥ १ ॥

उक्तां विष्टुतिं स्तोमचतुष्टयरूपेण प्रशंसन् ब्रह्मवर्चसकामस्यैवेत्याह—

चतुरस्तोमान् प्रतिविहिता ब्रह्मवर्चसकामः स्तुवीत पञ्चभिः पञ्चदशं तिसृभिस्त्रिवृतन्नवभिस्त्रिणवꣳ स्वयꣳसप्तदशः सम्पन्नो वीर्य्यं वै स्तोमा वीर्य्यमेव तदेकधा समूहते ब्रह्मवर्चसस्यावरुध्यै तेजस्वी ब्रह्मवर्चसी भवति य एतया स्तुते ॥ २ ॥

क्रमेण त्रिभिः पर्य्यायैः पञ्चदशादिस्तोमत्रयपर्य्यायसाम्यात् स्वस्य च सप्तदशत्वादियं विष्टुतिः स्तोमचतुष्टयप्रतिनिधित्वेन कृतया एतया ब्रह्मवर्चसकामः स्तुवीत । कुत एतत्-य एते चत्वारः स्तोमास्तद्वीर्य्यं वै वीर्य्यं खलु स्तूयमानाया देवतायाः वीर्यहेतुत्वात् तत् तथासति वीर्य्यमेव एकधा समूहते एकत्र समुहीकरोति तच्च समूहनं ब्रह्मवर्चसस्य लाभाय भवति । अन्योपि यो यजमान एतया स्तुते तेजस्व्येव सन् ब्रह्मवर्चसी भवति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य एकादशः खण्डः ।

अथ द्वादशः खण्डः ।

अथोद्यत्याख्यां सप्तदशस्यापरां विष्टुतिमाह—

तिसृभ्यो हिङ्करोति स पराचीभिः पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिरुद्यती सप्तदशस्य विष्टुतिः ॥ १ ॥

तिसृभ्यः पञ्चभ्यो नवभ्य इति क्रमेण सङ्ख्यायाः उर्ध्वगमनादुद्यती उर्ध्वगच्छन्ती एतत्संज्ञा एषा सप्तदशस्तोमस्य विष्टुतिः ॥ १ ॥

अथैतां स्वर्गादिसाधनतया प्रशंसति—

एतया वै देवाः स्वर्गं लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्टयै स्वर्गाल्लोकान्न च्यवते तुष्टुवानोऽभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्द्धोति तस्मादेतया स्तोतव्यमृध्या एव ॥ २ ॥

एतया वा इत्यादि तुष्टुवान इत्यन्तं पञ्चदशस्तोमस्योद्यत्यां व्याख्यातं सर्व्वमन्यत् त्रिवृदुद्यत्याम् । तद्वदत्रापि व्याख्येयम् ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य द्वादशः खण्डः ।

अथ त्रयोदशः खण्डः ।

सप्तदशस्यैव भस्त्राख्या परा विष्टुतिः प्रदर्श्यते—

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिर्भस्त्रावाचीनबिला ॥ १ ॥

प्रथमे पर्य्याये सप्त इतरयोः पञ्च पञ्चेति हीनसंख्योत्तरत्वादवाचीनबिलत्वादवाङ्मुखद्वारा भस्त्रा तत्साम्यात् भस्त्रा एतत्संज्ञा एषा सप्तदशस्तोमस्य विष्टुतिः । अत एवावाचीनबिलत्वादेवानिकृष्टा ॥ १ ॥

अस्यां विष्टुतावधिकारिणमाह—

यं द्विष्यात्तस्य कुर्य्याद्यथावाचीनबिलया भस्त्रया प्रधूनुयादेवं यजमानस्य पशून् प्रधूनोत्यपक्रामन्ती विष्टुतिस्तया यजमानस्य पशवोऽपक्रामन्ति पापीयान् भवति य एतया स्तुते ॥ २ ॥

यं यजमानमुद्गाता द्विष्यात् तस्य यजमानस्यैतां भस्त्राख्यां विष्टुतिं कुर्य्यात्, तथासति अवाचीनबिलया भस्त्रया स्तुत्या यथा अयस्कारः प्रधूनुयात् प्रकम्पयेत् प्रधमयेदित्यर्थः । एवमेव एतया विष्टुत्या यजमानस्य पशून् प्रधूनोति प्रगमयति । तथेयं विष्टुतिरपक्रामन्ती उत्तरोत्तरहीनसंख्यात्वेनापगच्छन्ती तया विष्टुत्या यजमानस्य पशवोऽपक्रामन्ति यजमानान्निर्गच्छन्ति यो यजमान एतया स्तुते यस्यैतयोद्गाता स्तौतीत्यर्थः । स यजमानः पापीयान् अन्यैरपि फलैर्विहीनो भवति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य त्रयोदशः खण्डः ।

अथ चतुर्दशः खण्डः ।

एकविंशस्तोमस्य चतस्रो विष्टुतयः । तत्र सप्त सान्नित्याख्यां प्रथमां विष्टुतिं दर्शयति—

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृ-

भिस्सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिः सप्तसप्तिन्येकविंशस्य विष्टुतिः ॥ १ ॥

स्पष्टोर्थः ॥ २ ॥

अथैतां स्तौति--

सप्त ग्राम्याः पशवस्तानेतया स्पृणोति सप्त शीर्षन्प्राणाः प्राणा इन्द्रियाणीन्द्रियाण्येवैतयाप्नोति ॥२॥

पुरुषो गौरविरजो गवयोऽश्वोऽश्वतर इति ग्राम्याः सप्त पशवस्तानेतया 'स्पृणोति' प्राप्नोति । स्पृ प्रीतिचलनयोरत्र प्राप्त्यर्थः, धातूनामनेकार्थत्वात् । किञ्च सप्तशीर्षण्याः प्राणाः मुखनासिके अक्षिणी कर्णाविति इन्द्रियाणि तदधिष्ठानत्वात् । अत इन्द्रियाण्येवैतया सप्तसप्तिन्याप्नोति ॥ २ ॥

अथैतां पुनरपि स्तौति—

एषा वै प्रतिष्ठितैकविंशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥ ३ ॥

त्रिष्वपि पर्य्यायेषु समसंख्यासद्भावादस्याः प्रतिष्ठितत्वम् । तथासति एतां प्रयुञ्जानः पश्वादिभिः प्रतिष्ठितो भवति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य चतुर्दशः खण्डः ।

अथ पञ्चदशः खण्डः ।

अथास्यैव स्तोमस्य उद्यत्याख्यां द्वितीयां विष्टुतिमाह—

पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभिर्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिः स तिसृभिरुद्यत्येकविंशस्य विष्टुतिः ॥ १ ॥

स्पष्टोर्थः ॥ १ ॥

एतां विष्टुतिं प्रशंसति—

एतया वै देवाः स्वर्गं लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानोऽभिक्रामन्ती विष्टुतिरभिक्रामन्त्या एवाभिक्रान्तेन

हि यज्ञ स्यर्ध्नोति तस्मादेतया स्तोतव्यमृद्धया एव ॥ २ ॥

एतत्सर्वं पूर्ववद्योज्यम् ॥ २ ॥

प्रकारान्तरेण प्रशंसति—

सैषा त्रिवृत्प्रायणा त्रिवृदुदयना यत्त्रिवृद्बहिष्पवमानं भवति नवैता एकविंशस्योत्तमा भवन्ति प्राणा वै त्रिवृत्प्राणानेव तदुभयतो दधाति तस्मादयमर्धभागवाक् प्राण उत्तरेषां प्राणानाꣳ सर्वमायुरेति न पुरायुषः प्रमीयते य एतया स्तुते ॥ ३ ॥

अग्निष्टोमसंस्थस्य यज्ञायज्ञियस्तोत्रे अस्या विष्टुतेः प्रयोज्यत्वादेकविंशस्तोमस्याग्निष्टोमत्वमारोप्य स्तूयते । सैषा विष्टुतिः त्रिवृत्प्रायणा त्रिवृत् ऋक्नवकं प्रायणे प्रारम्भे यस्याः सा तथोक्ता । तथा त्रिवृदुदयना त्रिवृत् ऋक्नवकमुदयने समाप्तौ यस्याः सा उक्तरूपा । कुत इत्यत आह—यद्यस्माद्बहिष्पवमानस्तोत्रं त्रिवृत् ऋक्नवकं आदौ भवति । यस्मादेकविंशस्य स्तोमस्य उत्तमास्तृतीयपर्यायगता एता नवर्चो भवन्ति । अत एषा विष्टुतिः त्रिवृत्प्रायणा त्रिवृदुदयनेति । किमतो भवति । उच्यते—त्रिवृत्स्तोम इति यदस्ति तत्प्राणाः खलु प्राणा नवसंख्याकाः सप्तशीर्षण्या द्वौ मूत्रं पुरीषश्चेति । त्रिवृदपि ऋक्नवात्मकः तथा सति उभयत्र संख्यासाम्यात्त्रिवृत्प्राणरूपैतत्स्तुतिः तत्तथा सति प्राणानेव तत् उभयतः शिरस्यधोभागे च दधाति धारयति । तस्मादयमाद्यन्तयोः प्राणस्थानीयं ऋङ्नवकं प्रयुक्तवान् तस्मादयमर्वाग्वर्त्ती प्राणः उत्तरेषां उपरि वर्त्तमानानां शीर्षण्यानां प्राणानां यावत् कार्य्यमस्ति शरीरस्थितिहेतुमूलमर्द्धभाक् अर्द्धभागवान् तावत्कार्य्यवान् भवति यावत् कार्य्ये कर्म्मणा शरीरं ध्रियते तदर्द्धं शीर्षण्याः प्राणाः कुर्व्वन्ति । शिष्टमर्द्धमवाञ्चौ प्राणावित्यर्थः । तयोः कार्य्यं हि मूत्रपूरीषयोर्विसर्ज्जनम् । तदभावे उदवर्त्ताख्येन रोगेण म्रियते इति तयोरर्द्धभाक्त्वम् । एवं सति च य एतया विष्टुत्या स्तुते स सर्वमायुरेति प्राप्नोति आयुषः पुरा कल्पाच्छतवर्षलक्षणादायुषः पूर्वं न म्रियते ॥ ३ ॥

एषा विष्टुतिः केषाञ्चिन्नित्येत्याह—

तामेताङ्करद्विष उपासते तस्मात्ते सर्वमायुर्यन्ति ॥ ४ ॥

करद्विषो नाम गोत्रभेदाः शाखिभेदा वा ते तामेतामुद्यतीमेकवि-

ंशस्य विष्टुतिं उपासते नित्यं प्रयुञ्जते । तस्मात्ते सर्वं शतवर्षलक्षणं कृत्स्नमायुर्यन्ति प्राप्नुवन्ति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य पञ्चदशः खण्डः ।

अथ षोडशः खण्डः ।

अथास्यैव स्तोमस्य प्रतिष्टुतिर्नाम तृतीया विष्टुतिः प्रदर्श्यते—

नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिभिः पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्यो हिङ्करोति स तिसृभिः स एकया स तिसृभिः प्रतिष्टुतिः ॥ १ ॥

त्रिवृदादिस्तोमचतुष्टयप्रतिरूपकत्वात् अस्याः प्रतिष्टुतिरिति संज्ञा यौगिकी ॥ १ ॥

एतदेव दर्शयति—

नवभिस्त्रिवृतं प्रतिष्टौति पञ्चभिः पञ्चदशं सप्तभिः सप्तदशं स्वयमेकविंशः सम्पन्नः ॥ २ ॥

अस्या विष्टुतेः प्रथमपर्यायगताभिर्नवभिर्ऋग्भिस्त्रिवृतं स्तोमं प्रतिष्टौति त्रिवृत्स्तोमेन स्तुतवान् भवतीत्यर्थः । एवमुत्तरत्रापि योज्यम् ॥ २ ॥

एतां विष्टुतिं प्रशंसति—

य एव स्तोमा यज्ञं वहन्ति तानुत्तमे स्तोत्रे सन्तर्पयति यथाऽनडुहो वाश्वान्वाश्वतरान्वोह्वुषः सन्तर्पयेदेवमेतदुत्तमे स्तोत्रे स्तोमान् सन्तर्पयति तृप्यति प्रजया पशुभिर्य एतया स्तुते ॥ ३ ॥

य एव स्तोमास्त्रिवृत्पञ्चदशसप्तदशैकविंशाख्ययज्ञमग्निष्टोमं वहन्ति तान् स्तोमान् सर्व्वान् तर्पयति अन्तिमे यज्ञायज्ञियस्तोत्रे अनया विष्टुत्या स्तुवन्नुद्गाता सन्तर्पयति उक्तक्रमेण ताननुस्मरन् संतृप्तान् करोति । एतदेव दृष्टान्तेन समर्थयते । ऊहषः वहेः कसि प्रत्यये शसि रूपमेतत् । ऊहुषः ऊढवतः ऊढभारान् अनडुहादीन् यथा संतर्पयेत् उत्तमे स्तोत्रे स्तोमान् सन्तर्पयति यत् एवमेतत् य एतया स्तौति अयं तर्पयतीत्यन्वयः ॥ ३ ॥

पौरोहित्यं कामयमानस्यैषा विष्टुतिः प्रयोज्येत्याह—

एतामेव पुरोधाकामाय कुर्य्यादब्रह्म वै त्रिवृत् क्षत्रमेकविꣳशो यत्त्रिवृतैकविꣳशं प्रतिपद्यते ब्रह्म तत् क्षत्रस्य पुरस्तान्निदधाति गच्छति पुरोधान्न पुरोधायाश्च्यवते य एतया स्तुते ॥ ४ ॥

पुरोधा पौरोहित्यं तत्कामः यजमानो यस्तस्मै यजमानाय एकविꣳशस्यैतामेव विष्टुतिं कुर्य्यात् । योऽयं त्रिवृत्स्तोमः ब्रह्म वै ब्राह्मणजातिः खलु उभयोः प्रजापतिमुखजन्यत्वात् । एकविꣳशस्तोमः प्रतिष्ठाहेतुत्वात् क्षत्रं क्षत्रियजातिः । एवं सति त्रिवृता ऋक्नवके एकविꣳशस्तोमं प्रतिपद्यते प्रारभत इति यत्तत्तेन क्षत्रस्य क्षात्रियजातेः पुरस्ताद्ब्रह्म ब्राह्मणजातिं निदधाति अतः कारणात्स यजमानः पुरोधां पौरोहित्यं गच्छति प्राप्नोति कदाचिदपि तस्याः पुरोधाया न च्यवते न प्रच्युतो भवति ॥ ४ ॥

एषापि केषाञ्चिन्नित्येति दर्शयति—

तामेतां प्रावाहण्य उपासते तस्मात्ते पुरोधाया न च्यवन्ते ॥ ५ ॥

प्रावाहण्यः प्रवाहणो नाम कश्चित् ऋषिः तस्य सन्तानभूताः प्रावाहण्यः । स्पष्टमन्यत् ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य षोडशः खण्डः ।

अथ सप्तदशः खण्डः ।

अथास्यैव स्तोमस्य सूर्म्याख्याश्चतुर्थीं विष्टुतिं दर्शयति—

नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिस्तिसृभ्यो हिङ्करोति स पराचीभिर्नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः सूर्म्युभयत आदीप्ता ॥ १ ॥

उभयत आद्यन्तयोः पर्य्याययोर्ऋक्नवकान्तेन त्रिवृत्त्वादुभयत आदीप्ता, त्रिवृतश्चाग्नेश्च प्रजापतिमुखात् सहोत्पत्तेरादीप्ता, सूर्म्मी कृशामध्ये स्थूलेतरा तत्सादृश्यादस्या अप्येषा संज्ञा । अस्या अपि मध्यमपर्य्यायस्य ऋक्त्रयात्मकत्वेन ऋक्नवकाभ्यामल्पत्वात् ॥ १ ॥

अस्यामधिकारिणमाह—

ब्रह्मवर्चसकामः स्तुवीत तेजो वै त्रिवृत् त्र्यक्षरः पुरुषो यत् त्रिवृतावभितो भवतस्तिस्रो मध्ये यथा हिहिरण्यं निष्टपेदेवमेनं त्रिवृतौ निष्टपतस्तेजसे ब्रह्मवर्चसाय ॥ २ ॥

अनया ब्रह्मवर्चसकामः स्तुवीत यः त्रिवृत् स्तोमोऽस्ति स तेजो वै तेजोरूपः खलु पुरुषो यजमानोऽपि त्र्यक्षरः पुरुषः इति त्र्यक्षरैर्वाच्यस्तथासति यत् यस्मात्त्रिवृतौ तेजोरूपावुभयतः प्रथमतृतीयपर्य्याययोर्भवतः मध्ये मध्यमे पर्य्याये तिस्रः त्र्यक्षरात्मकपुरुषस्थानीयास्तिस्र ऋचो भवन्ति । तस्य यथा हिरण्यमग्निमध्ये वर्णोत्कर्षाय निष्टपेत् नितरां तापयति स्वर्णकारः एवमेनं अक्षरत्रयाभिधेययजमानं एतौ त्रिवृतौ उभयतस्त्रिवृतौ निष्टपतः निकृष्य दीपयतः एवं सति यजमानस्तेजसे ब्रह्मवर्चसाय भवति ॥ २ ॥

अस्यां विष्टुतौ दोषद्वयमप्यस्ति—

अपशव्येव तु वा ईश्वरा पशून्निर्दहः किलासत्वान्नूभयमति हि निष्टपतः ॥ ३ ॥

तु शब्दः फलवैलक्षण्यद्योतनार्थः । अपशव्येव वै पशूनां वृद्धिविघातिनी खलु अत एवैषा पशून्निर्दहो निर्दग्धुमीश्वरा समर्था 'ईश्वरे तोसुन् कसुना' विति दहेः कसुः । तथा किलासत्वात् किलासः सिद्धः त्वक्रोगविशेषः तद्धेतुत्वात् चैषा दुष्टा । उभयत्र हेतुः उभयमति हीति । हि हेतौ यस्माच्चाद्यन्तयोः प्रयुक्तौ त्रिवृतौ त्रिवृतौ त्र्यक्षराभिधेयस्य पुरुषस्य यजमानस्योभयपार्श्वद्वयन्निष्टपतः निःशेषेण दहतः अत ऊर्ध्वं दोषद्वयं सम्पद्यत इत्यर्थः ॥ ३ ॥

अधिकार्य्यन्तरमाह—

एतामेवाभिशस्यमानाय कुर्य्याच्छमलं वा एतमृच्छति यमश्लीला वागृच्छति यैवैनमसावश्लीलं वाग्वदति तामस्य त्रिवृतौ निष्टपतस्तेजस्वी भवति य एतया स्तुते ॥ ४ ॥

एतामेव सूर्म्याख्यां विष्टुतिं अभिशस्यमानाय परैर्निन्द्यमानाय यजमानायोद्गाता कुर्य्यात् यं यजमानमश्लीला निन्दारूपा वाक् ऋ-

च्छति प्राप्नोति एनं यजमानं शमलं पापमेव ऋच्छति प्राप्नोति । यैव सा वाक् एनमश्लीलमश्रीकरनिन्दारूपं वदति अस्य यजमानस्य अश्लीलवादिनीं वाचं अस्यां विष्टुतौ प्रयुज्यमानावुभयतस्निवृतौ निष्टपतो निर्दहतः अश्लीलवादिन्यो वाचो निर्दहो यजमानो निर्दोषो जायत इत्यर्थः । अन्योपि यो यजमान एतया स्तुते स्तावयति सोपि तेजस्वी भवतीति ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे द्वितीयाध्यायस्य सप्तदशः खण्डः ।

द्वितीयाध्यायः समाप्तिमगमत् ।

तृतीयोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
द्वितीये दशरात्रस्य चतुर्णां विष्टुतिक्रमः ।
प्रदर्शितस्तृतीयेऽथ वक्ष्यन्ते त्रिणवादयः ॥ २ ॥

त्रिणवस्य स्तोमस्य द्वे विष्टुती प्रतिष्ठिता उद्यती चेति । तत्र प्रतिष्ठितां विष्टुतिं प्रदर्शयति—

नवभ्यो हिङ्करोति स तिसृभिः स पञ्चभिः स एकया, नवभ्यो हिङ्करोति स एकया स तिसृभिः स पञ्चभिर्नवभ्यो हिङ्करोति स पञ्चभिः स एकया स तिसृभिः ॥ १ ॥

सप्तदशस्य स्तोमस्य त्रयस्त्रयः पर्य्यायास्तत्र प्रथमपर्य्यायस्य या प्रथमा सा तृचभागेत्यन्वर्थसंज्ञका अतस्तस्यास्त्रिर्वचनं कार्य्यम् । तस्यैव

पर्य्यायस्य या मध्यमा तस्या आवापस्थानमिति संज्ञा। अतः त्रिर्वचनावशिष्टाः प्रथमपर्य्यायसम्बन्धिनो येऽभ्यासा अन्त्यवर्ज्जितास्तेषां तेषामियमावापस्थानभूतेत्यर्थः। या तृतीया सा परिचरासंज्ञका सकृद्वचनेनैव प्रायेण परितः सर्व्वतश्चरणात्तन्नामसम्पन्नम्। तथा मध्यमपर्य्याये ता एव तिस्रः स्तोत्रीया परिचरा तृचभागा आवापस्थानमिति क्रमेण संज्ञां लभन्ते। उत्तमे पर्य्याये आवापस्थानं परिचरा तृचभागेति संज्ञां लभन्ते अतः स्तोमवृद्धौ तृचभागायाः सर्वत्र त्रिर्वचनमेव। अनावृत्तैकैव परिचरा यावताभ्यासेन पर्य्याये संख्या पूर्य्यते तावत्कृत्वो मध्यमावर्त्तनीयेत्यर्थः। तदुक्तं सूत्रकारेण—'वर्द्धमानेषु स्तोमेषु प्रथमस्य पर्य्यायस्य प्रथमा तृचभागा तस्यास्त्रिर्वचनं मध्यमावापस्थानमुत्तमा परिचरा तृचभागावापस्थानमिति मध्यमे आवापस्थानं परिचरा तृचभागेत्युत्तम' इत्यादिना। अतोऽस्यां विष्टुतावपि पर्य्यायत्रये तृचभागापरिचरयोः पूर्व्वोक्तसंख्यैव आवापस्थानभूता तु पञ्चकृत्वाऽभ्यस्यते। एषैव संख्याभिधेयत्वेन स्तोतव्या ॥ १ ॥

तं प्रशंसिष्यन्नुक्तं व्यूहनं प्रशंसति—

वज्रो वै त्रिणवो वज्रमेव तद्व्यूहति शान्त्यै ॥ २ ॥

त्रयो हि त्रिवृत्स्तोमा मिलित्वा त्रिणवः तस्य त्रिवृत एकैकस्य पर्य्यायस्य त्रित्वसंख्योपेतत्वात् 'वज्रस्य चेन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधा व्यभजदिति' श्रुत्यन्तरात् त्रेधा भावदर्शनात्, तदुभयत्र संख्यासाम्येन त्रिवृतो वज्रत्वं तत्समुदायात्मकः त्रिणवोऽपि वज्रमेव वज्रवृद्धिं संक्रमेव तथासति उक्तप्रकारेण यद्व्यूहनं त्रित्वसंख्याविभजनं तत्तेन वज्रमेव तद्व्यूहति वज्रमेव अपनयतीत्यर्थः। तद्व्यूहनं यजमानस्य शान्त्यै उपद्रवशमनाय भवति ॥ २ ॥

अथ विहितां पञ्चसंख्यां प्रशंसति।

पञ्चभिर्विहितैका परिचरा पाङ्क्ताः पशवो यजमानः परिचरा यत्पञ्चभिर्विदधात्येका परिचरा भवति यजमानमेव तत्पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिता त्रिणवस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥ ३ ॥

एषा विष्टुतिः पञ्चभिर्ऋग्भिर्विहिता विशेषेणोपदिष्टा आवापस्थानगतायाः पञ्चता एव विधेया अप्राप्तत्वात्परिचरातृचभागयोस्तु संख्यानियमस्योक्तेन प्रकारेण सर्वतः प्राप्तेस्तस्मादावापस्थानभूता पञ्चसंख्योपता परिचरा चैका। पशवश्चत्वारः पादाः पुच्छञ्चेति च त्वङ्मांसं

स्नायु चास्थि मज्जेत्येवं वा पञ्चसम्बन्धात् पाङ्क्ताः । अत आवापस्थानीयाः पञ्चर्क्षः पशव इत्युपचर्य्यते । परिचरा च यजमानस्थानीया एकत्वसाम्यात् । एवं स पञ्चभिर्ऋग्भिरावापस्थानगताभिरिमां विष्टुतिं विदधाति परिचरा चैका भवति तत्तेन यजमानमेव पशुष्ववस्थापयति । एषा तु त्रिणवस्य विष्टुतिः प्रतिष्ठिता उक्तप्रकारेण पशुषु यजमानस्यावस्थितिहेतुत्वात् अतो य एतया स्तुते स प्रतितिष्ठति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ त्रिणवस्योद्यत्याख्यां द्वितीयां विष्टुतिमाह—

सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया नवभ्यो हिङ्करोति स एकया स तिसृभिस्स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिस्स तिसृभिः स तिसृभिरुद्यती त्रिणवस्य विष्टुतिः ॥ १ ॥

तत्र सप्तभ्यो नवभ्य एकादशभ्यः प्रतिसंख्यारोहणम्, उद्यत्येषा विष्टुतिस्त्रिणवस्य ॥ १ ॥

अथ एतां प्रशंसति—

एतया वै देवाः स्वर्गं लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्टयै स्वर्गाल्लोकान्न च्यवते तुष्टुवानोऽभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥ २ ॥

त्रिवृत्पञ्चदशौरुद्यत्यर्थवादवदेतत्सर्व्वं ज्ञेयम् ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

त्रयस्त्रिंशस्तोमस्य विष्टुतयः पञ्च तत्राद्यां समञ्यंशाख्यां दर्शयति—

एकादशभ्यो हिङ्करोति स तिसृभिस्स सप्तभिस्स एकयैकादशभ्यो हिङ्करोति स एकया स तिसृभिस्स

सप्तभिरेकादशभ्यो हिङ्करोति स सप्तभिस्स एकया स तिसृभिः ॥ १ ॥

त्रयाणां पर्य्यायाणां समसंख्यात्वात् समत्र्यंशैषा विष्टुतिः ॥ १ ॥
अथैतां विष्टुतिं स्तौति—

अन्तो वै त्रयस्त्रिंशः परमो वै त्रयस्त्रिंशस्तोमानाꣳ सप्तभिर्विहितैका परिचरा सप्त ग्राम्याः पशवो यजमानः परिचरा यत्सप्तभिर्विदधात्येका परिचरा भवति यजमानमेव तदन्ततः पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिता त्रयस्त्रिंशस्य विष्टुतिः प्रातिष्ठति य एतया स्तुते ॥ २ ॥

यत्त्रयस्त्रिंशस्तोमोस्ति एष अन्तो वै चरमः खलु पृष्ठ्यषडहस्तोमापेक्षयास्यान्तत्वं तदेवमाह--परमो वै अयं त्रयस्त्रिंशः परमो वै पृष्ठ्यानामुत्तमः खलु । शिष्टं त्रिणवस्याद्यविष्टुत्यर्थवादवद्व्याख्येयम् । अन्तत इति षडहस्यान्तत इत्यर्थः ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य तृतीयः खण्डः॥

अथ चतुर्थ खण्डः ।

अथैवानेदीयःसंक्रमाख्यां द्वितीयां विष्टुतिमाह—

एकादशभ्यो हिङ्करोति स तिसृभिः स पञ्चभिः स तिसृभिरेकादशभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिः स तिसृभिः स तिसृभिर्नेदीयःसंक्रमा ॥ १ ॥

नेदीयसि अन्तिकतमे संख्याविशेषे संक्रामतीति नेदीयःसंक्रमा । तथा हि प्रथमे पर्य्याये आरोहावरोहाभ्यां तिसृभ्यः पञ्चसु पञ्चभ्यः तिसृष्वित्येवमन्तरिताः अयुक्संख्यास्तेषां संक्रामति । द्वितीयतृतीययोरपि यथासंख्यमारोहावरोहाभ्यां अन्तिकतमामेवायुक्संख्यां क्रामति । यथा पूर्व्वा विष्टुतिः तिसृभ्यस्सप्तसु सप्तभ्य एकस्यामिति व्यवहितसंक्रमा तद्वैलक्षण्यादेषा नेदीयःसंक्रमा ॥ १ ॥

अथोक्ता विष्टुतिस्त्रयस्त्रिंशेन संगतेत्याह—

अन्तो वै त्रयस्त्रिंशो यथा महावृक्षस्याग्रꣳ सृप्त्वा नेदीयःसंक्रमात् संक्रामत्येवमेतन्नेदीयःसंक्रमया नेदीयःसंक्रमात् संक्रामति ॥ २ ॥

षडहस्तोमापेक्षयास्यान्तत्वं कश्चित्पुरुषो महावृक्षस्याग्रम् अन्तिकतमां शाखामालम्ब्यारुह्य ततो नेदीयः संक्रमात्संक्रामति एवमेतया विष्टुत्या नेदीयःसंक्रमाख्यया नेदीयस्यान्तिकतमे संख्याविशेषे संक्रामति ॥ २ ॥

अथैनां प्रतिष्ठाहेतुत्वेन प्रशꣳसति—

पञ्चभिर्विहितास्तिस्रः परिचराः पाङ्क्ताः पशव एतावान् पुरुषो यदात्मा प्रजा जाया यत्पञ्चभिर्विदधाति तिस्रः परिचरा भवन्ति यजमानमेव तत्पशुषु प्रतिष्ठापयति पशुमान् भवति य एतया स्तुते ॥ ३ ॥

त्रिणवस्य प्रथमविष्टुत्यर्थवादवद्याख्येयम् । अत्र त्वयं विशेषः । परिचरास्तिस्रश्च यजमानपुत्रपत्नीस्थानीयाः तथासति प्रजया जायासहितं यजमानमेव पशुषु स्तोता स्थापितवान् भवति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथास्यैव स्तोमस्योद्यत्याख्यां विष्टुतिमाह—

नवभ्यो हिङ्करोति स तिसृभिः स पञ्चभिः स एकयैकादशभ्यो हिङ्करोति स एकया स तिसृभिः स सप्तभिस्त्रयोदशभ्यो हिङ्करोति स सप्तभिः स तिसृभिरुद्यती त्रयस्त्रिंशस्य विष्टुतिः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

स्वर्गकामस्यैषा विष्टुतिरिति प्रदर्शयन्निमां प्रशꣳसति—

एतया वै देवाः स्वर्गं लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानोऽग्रादग्रꣳरोहत्यभिकामन्ती विष्टुतिरभिका-

न्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृच्या एव ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

अथास्यैव विष्टुत्यन्तरमाह—

त्रयोदशभ्यो हिङ्करोति स तिसृभिः स पञ्चभिः स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिः स तिसृभिः स तिसृभिर्नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः प्रत्यवरोहिणी त्रयस्त्रिꣳशस्य विष्टुतिः ॥१॥

त्रयोदशभ्य एकादशभ्यो नवभ्य इति संख्याया उत्तरोत्तरमवरोहणादेषा प्रत्यवरोहिणी ॥ १ ॥

एतदेव सदृष्टान्तमुपपादयति—

यथा महावृक्षस्याग्रꣳ सृप्त्वा शाखायाः शाखामालम्भमुपावरोहेदेवमेतयेमं लोकमुपावरोहति प्रतिष्ठायै २॥

यथा काश्चिदुन्नतस्य वृक्षस्याग्रमारुह्योपरितनायाः शाखायाः शाखामालम्भमवलम्ब्यावलम्ब्य पृथिव्यामुपावरोहेत् एवमेव त्रिवृदादिक्रमेणानुष्ठाय षष्ठेऽहनि त्रयस्त्रिꣳशेनाधिकसंख्येन स्वर्गमारुह्यैतया विष्टुत्येमं लोकमुपावरोहति प्रतिष्ठायै अस्मिन् लोके चिरावस्थानार्थम् ॥ २ ॥

अथैनामायुर्हेतुत्वेन प्रशꣳसति—

त्रिवृता प्रैति त्रिवृतोदेति प्राणा वै त्रिवृत् प्राणेनैव प्रैति प्राणमभ्युदेति सर्वमायुरेति न पुरायुषः प्रमीयते य एतया स्तुते ॥ ३ ॥

पृष्ठ्यषडहस्य प्रथमेऽहनि त्रिवृत् प्रयुज्यते षष्ठेऽहनि त्रयस्त्रिꣳशः उत्तमे पर्य्याये नवभ्यो हिंकरोतीति विधानादन्ते च त्रिवृत् प्रयुज्यते । अतस्त्रिवृता प्रैति प्रक्रमते त्रिवृतैवोदेत्युद्गच्छति परिसमापयति प्राणापानव्यानरूपेण वृत्तित्रयात्मको यः प्राणोऽस्ति स त्रिवृत्स्थानीयो भवति तथासति प्राणेनैव प्रक्रमसमाप्तीकृते भवत एवं प्राणस्य त्यागात् यजमानः सर्वं सम्पूर्णमायुरेति ततः पूर्वन्न म्रियते ॥ ३ ॥

एषा केषाञ्चिन्नित्येत्याह—

तामेताङ्करद्विष उपासते तस्मात्ते सर्व्वमायुर्य्यन्ति ॥४॥

करद्विषो नाम केचित् शाखिविशेषा गोत्रविशेषा वा ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

अथ तस्यैवान्त्यां विष्टुतिमाह—

पञ्चदशभ्यो हिङ्करोति स तिसृभिः स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिः स तिसृभिः स तिसृभिः सप्तभ्यो हिङ्करोति स तिसृभिः स एकया स तिसृभिः॥१॥

स्पष्टार्थः ॥ १ ॥

अथैतां प्रशंसति—

यो वै त्रयस्त्रिंशमेकविंशे प्रतिष्ठितं वेद प्रतितिष्ठति प्रतिष्ठा वा एकविंशः स्तोमानां यदेताः सप्त त्रयस्त्रिंशस्योत्तमा भवन्ति सप्तविधैकविंशस्य विष्टुतिरेकविंश एव तत् त्रयस्त्रिंशं प्रतिष्ठापयति प्रतितिष्ठति य एतया स्तुते ॥ २ ॥

यः खलु त्रयस्त्रिंशमेकविंशे प्रतिष्ठितं जानाति स प्रतितिष्ठति । कथं तस्य प्रतिष्ठालाभः ? य एकविंशस्तोमानां मध्ये प्रतिष्ठाहेतुः खलु सर्वप्रकृतिभूतो ह्यग्निष्टोम एकविंशेन सन्तिष्ठत इति तस्य प्रतिष्ठितत्वम् । त्रयस्त्रिंशस्य कथमेकविंशे प्रतिष्ठानमित्यत आह--अस्यां विष्टुतौ त्रयस्त्रिंशस्योत्तमे पर्य्याये सप्तम्य इति विहिता एताः सप्तर्च उत्तमा भवन्ति एकविंशस्य विष्टुतिः सप्तधा एकैकस्मिन् पर्य्याये सप्तर्चो भवन्ति यद्यस्मादेवं तस्मादेकविंश एव त्रयस्त्रिंशं प्रतिष्ठापयति । अतो य एतया स्तुते स यजमानः प्रतितिष्ठति ॥ २ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

इत्थन्तु पृष्ठषडहस्य त्रिवृदादयः षट्स्तोमाः क्रमेण विहिताः । 'अथ छन्दोगानां चतुर्विंशश्चत्वारिंशोष्टचत्वारिंश इति त्रयस्तोमाः, तत्र प्रथमस्य स्तोमस्यैका विष्टुतिः सा प्रदर्श्यते—

अष्टाभ्यो हिङ्करोति स तिसृभिः स चतसृभिः स एकयाऽष्टाभ्यो हिङ्करोति स एकया स तिसृभिः स चतसृभिरष्टाभ्यो हिङ्करोति स चतसृभिस्स एकया स तिसृभिः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अथैतां प्रशंसति—

पशवो वै छन्दोगा यदष्टाभ्योऽष्टाभ्यो हिङ्करोति अष्टाशफाः पशवः शफशस्तत्पशूनाप्नोति ॥ २ ॥

पशुसाधनत्वाच्छन्दोगानां पशुत्वमेवं भवति त्रिष्वपि पर्य्यायेष्वष्टाभ्यो हिङ्करोतीति यत्तत्तेन पशवश्चाष्टाशफास्तत्पशून् शफशः शफद्वारेणाप्नोति ॥ २ ॥

अथैतां प्रकारान्तरेण स्तौति—

चतसृभिर्विहितैका परिचरा चतुष्पादाः पशवो यजमानः परिचरा यच्चतसृभिर्विदधात्येका परिचरा भवति यजमानमेव तत्पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिता चतुर्विंशस्य विष्टुतिः प्रातिष्ठति य एतया स्तुते ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथ चतुश्चत्वारिंशस्य तिस्रो विष्टुतयः तत्र प्रथमामाह—

पञ्चदशभ्यो हिङ्करोति स तिसृभिः स एकादशभिः स एकया, चतुर्दशभ्यो हिङ्करोति स एकया स

तिसृभिः स दशभिः, पञ्चदशभ्यो हिङ्करोति स एकादशभिः स एकया स तिसृभिः ॥ १ ॥

स्पष्टोऽर्थः ॥ १ ॥

अथैतां प्रशंसति ।

ब्रह्मणो वा आयतनं प्रथमा क्षत्रस्य मध्यमा विश उत्तमा यत्पञ्चदशिन्यौ पूर्वे भवतश्चतुर्दशोत्तमा ब्रह्मणि चैव तत् क्षत्रे चौजो वीर्यं दधाति ब्रह्मणे चैव तत्क्षत्राय च विशमनुगां करोति क्षत्रस्येवास्य प्रकाशो भवति य एतया स्तुते ॥ २ ॥

तृचगतास्तिस्रः स्तोत्रीयाः क्रमेण ब्रह्मक्षत्रविशामायतनभूताः, एवं सति तिसृष्वपि पर्य्यायेषु विष्टावगणनया पूर्वे प्रथममध्यमोत्तमे स्तोत्रीये पञ्चदशिन्यौ पञ्चदशसंख्योपेते भवतः । उत्तमा तृतीया चतुर्दशविष्टावगणनया चतुर्दशसंख्याका तस्मेनोक्तप्रकारेण ब्रह्मक्षत्रायतनभूतयोरधिकसंख्यात्वात् ब्रह्मक्षत्रयोरेवौजो वीर्यं च दधाति । तत्तथा ब्रह्मक्षत्रार्थं विशमनुगामनुगन्त्रीङ्करोति विशायतनाया उत्तमाया हीनसंख्यात्वादस्यां विष्टुतौ क्षत्रस्याधिक्याद्य एतया स्तुते तस्य क्षत्रियजातेरिव कीर्तिर्भवति ॥ २ ॥

तां पुनः प्रशंसति—

अस्तोमा वा एते यच्छन्दोगा अयुजो हि स्तोमा युग्मन्ति छन्दाꣳसि यदेषा युजिनी चतुश्चत्वारिꣳशस्य विष्टुतिस्तेनास्तोमाः ॥ ३ ॥

छन्दोभिर्गायत्रीत्रिष्टुप्जगतीभिर्गीयन्त इति छन्दोगाश्चतुर्विꣳशादयः यद्य इमे छन्दोगा एते अस्तोमा वै स्तोमलक्षणरहिताः खलु । कथं ? अयुजः अयुक्संख्या हि अन्ये प्रसिद्धाः त्रिवृदादयः स्तोमा उक्तानि गायत्र्यादीनि छन्दाꣳसि युग्मन्ति युक्संख्यावन्ति इति स्तोमलक्षणराहित्यम् । एवमस्तोमकत्वे प्राप्ते समाधत्ते यस्मादेतेषां मध्ये चतुश्चत्वारिꣳशस्य स्तोमस्य विहितैषा विष्टुतिरयुजिनी अयुक्संख्योपेता द्वयोः पर्य्याययोः पञ्चदशसंख्यायोगात् अतःस्तोमलक्षणसद्भावाच्चतुर्विꣳशादीनामपि स्तोमत्वं सिद्धम् ॥ ३ ॥

अथैतां पुनः प्रशंसति—

एषा वै प्रतिष्ठिता चतुश्चत्वारिꣳशस्य विष्टुतिः

प्रतितिष्ठति य एतया स्तुते ॥ ४ ॥

आद्यन्तयोः पर्य्याययोः पञ्चदशसंख्यासाम्यादस्याः प्रतिष्ठितत्वम्॥४॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

अथास्यैव द्वितीया निर्म्मध्याख्या विष्टुतिः--

चतुर्दशभ्यो हिङ्करोति स तिसृभिः स दशभिः स एकया, पञ्चदशभ्यो हिङ्करोति स एकया स तिसृभिः स एकादशभिः, पञ्चदशभ्यो हिङ्करोति स एकादशभिः स एकया स तिसृभिर्निर्म्मध्या ॥ १ ॥

अत्र प्रथमोत्तमे ऋचौ विष्टावे पञ्चदशिन्यौ मध्यमा चतुर्दशसंख्याकेति हीनमध्यत्वान्निर्म्मध्या भवति ॥ १ ॥

अथैतां प्रशंसति—

अस्तीव वा अयं लोकोस्तीवासौ छिद्रमिवेदमन्तरिक्षं यदेषा निर्म्मध्या भवतीमानेव लोकाननु प्रजायते प्रप्रजया प्रपशुभिर्जायते य एतया स्तुते ॥ २ ॥

अयं भूर्लोकोऽस्तीव वै प्राणिनामाश्रयभूतः सन् स्पष्टमुपलभ्यमानोऽवतिष्ठते, तथासौ द्युलोकश्चास्तीव ग्रहनक्षत्रादिभिः प्रकाशमानत्वात्, उभयोर्मध्येवस्थितमिदमन्तरिक्षं छिद्रमिव सुषिरमिव निरात्मकं भवति, एवं सति लोकत्रयानुगुण्येन स्थिताभिर्ऋग्भिरुपेतैवैषा निर्म्मध्या भवतीति यत्तेन यजमानः इमानेव लोकाननु इमांस्त्रीन् लोकाननु प्रजायते त्रिष्वपि लोकेषु समृद्धो भवतीत्यर्थः। उक्तस्यैव विवरणं प्रप्रेति॥२॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य दशमः खण्डः ।

अथ एकादशः खण्डः ।

पञ्चदशभ्यो हिङ्करोति स तिसृभिः स एकादशभिः स एकया, पञ्चदशभ्यो हिङ्करोति स एकया स तिसृभिः स एकादशभिश्चतुर्दशभ्यो हिङ्करोति स दशभिः स एकया स तिसृभिः ॥ १ ॥

स्पष्टोर्थः ॥ १ ॥

अथोक्तानां तिसृणां विष्टुतीनां प्रयोगस्यानियमे प्राप्ते सवनत्रयभेदेन व्यवस्थामाह—

आज्यानां प्रथमा पृष्ठानां द्वितीयोक्थानां तृतीया ॥ २ ॥

आज्यानां प्रातःसवनिकानां स्तोत्राणां प्रथमया विष्टुत्या चतुश्चत्वारिंशस्तोमकलनिः, पृष्ठानां पृष्ठस्तोत्राणां माध्यन्दिनगतानां चतुर्णां चतुश्चत्वारिंशस्य द्वितीया विष्टुतिः तथोक्थानां च। अत्रोक्थशब्दस्तृतीयसवनगतस्तोत्रोपलक्षणार्थः। तेनाग्निष्टोमसाम्येप्युक्तशब्देन ग्रहणात् तत्सहितानां चतुर्णां स्तोत्राणां चतुश्चत्वारिंशस्य तृतीया विष्टुतिः कार्य्या ॥ २ ॥

अथ प्रकारान्तरेणासां व्यवस्थामाह--

याज्यानाꣳ सा होतुर्य्या पृष्ठानाꣳ सा मैत्रावरुणस्य योक्थानाꣳ सा ब्राह्मणाच्छꣳसिनो यैव होतुः साच्छावाकस्य या पृष्ठानाꣳ सा होतुर्योक्थानाꣳ सा मैत्रावरुणस्य याज्यानाꣳ सा ब्राह्मणाच्छꣳसिनो यैव होतुः साच्छावाकस्य योक्थानाꣳ सा होतुर्य्याज्यानाꣳ सा मैत्रावरुणस्य या पृष्ठानाꣳ सा ब्राह्मणाच्छꣳसिनो यैव होतुः साच्छावाकस्य, सर्वा आज्येषु सर्वाः पृष्ठेषु सर्वा उक्थेषु ॥ ३ ॥

या आज्यानामुक्ता प्रथमा विष्टुतिः सा होतुराज्यस्य कार्य्या यत्प्रथममाज्यस्तोत्रं तत् हि होता प्रयोगशास्त्रेणानुशंसति अतस्तत्सम्बन्धात्तदाज्यत्वम्। एवं मैत्रावरुणादीनामथानुशंसितृत्वेन तत्स्तोत्रसम्बन्धः पृष्ठानां पृष्ठस्तोत्राणां या द्वितीया विहिता सा मैत्रावरुणस्याज्यस्य कार्य्या योक्थानां विहिता तृतीया विष्टुतिः सा ब्राह्मणाच्छंसिन आज्यस्य कार्य्या यैव होतुराज्यस्य प्रथमा विष्टुतिः साच्छावाकस्य कार्य्या, एवं सर्व्वा अपि विष्टुतयः प्रातःसवने उपयुक्ताः, तथा माध्यन्दिनसवनेऽपि या पृष्ठानां विष्टुतिर्द्वितीया सा होतुः पृष्ठस्य कार्य्या, योक्थानां विहिता तृतीया सा मैत्रावरुणस्य पृष्ठे कार्य्या, आज्यानां विहिता प्रथमा सा ब्राह्मणाच्छंसिनः पृष्ठे कार्य्या, यैव होतुः पृष्ठे द्वितीया साच्छावाकस्य पृष्ठे कार्य्या, एवं माध्यन्दिनसवनेऽपि सर्व्वा विष्टुतयः प्रविष्टाः। योक्थानां विहिता प्रथमा सा ब्राह्मणाच्छंसिनः पृष्ठे का-

र्य्या, यैव होतुः पृष्ठे द्वितीया साच्छावाकस्य पृष्ठे कार्य्या एवं माध्यन्दिनसवनेऽपि सर्व्वा विष्टुतयः प्रविष्टाः। योक्थानां विहिता तृतीया विष्टुतिः सा होतुरग्निष्टोमस्य साम्नः कार्य्या, आज्यानां विहिता या प्रथमा सा मैत्रावरुणस्योक्थे कार्य्या, या पृष्ठानां विहिता द्वितीया सा ब्राह्मणाच्छंसिन उक्थे कार्य्या, यैव होतुरुक्थस्य विहिता साच्छावाकस्योक्थे कार्य्या, एवं तृतीये सवने सर्व्वाः प्रविष्टाः। एवं व्यतिषङ्गे सति सर्व्वा विष्टुतयः आज्येषु सर्व्वाः पृष्ठेषु सर्व्वाश्चोक्थेषु विनियुक्ता भवन्ति ॥ ३ ॥

उक्थव्यवस्थां प्रशंसति--

पशवो वै समीषन्ती यदेषा सर्वाणि सवनान्यनुसञ्चरत्यनुसवनमेवैनं पशुभिः समर्द्धयति पशुमान् भवति य एतया स्तुते ॥ ४ ॥

समीषन्ती समित्येकीभावे सवनत्रयेप्येकीभूय ईषति गच्छतीति समीषन्ती एषा विष्टुतिः पशवो वै पशुहेतुत्वात्। सा एषा सर्व्वाणि सवनान्यनु सर्वेषु सवनेषु सञ्चरतीति यत्तेन एनं यजमानं अनुसवनं सवन एव पशुभिः समृद्धीकरोति, यश्चैतया स्तुते सोऽपि पशुमान् भवतीति ॥ ४ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य एकादशः खण्डः।

अथ द्वादशः खण्डः।

अथाष्टाचत्वारिंशस्य द्वे विष्टुती तयोः प्रथमामाह-

षोडशभ्यो हिङ्करोति स तिसृभिः स द्वादशभिः स एकया षोडशभ्यो हिङ्करोति स एकया स तिसृभिः स द्वादशभिः, षोडशभ्यो हिङ्करोति स द्वादशभिः स एकया स तिसृभिः ॥ १ ॥

स्पष्टोर्थः ॥ १ ॥

अथैतां प्रशंसति--

अन्तो वा अष्टाचत्वारिंशः पशवश्छन्दोगा यत् षोडशभ्यः षोडशभ्यो हिङ्करोति षोडशकलाः पशवः कलाशस्तत् पशूनाप्नोति ॥ २ ॥

योऽयमष्टाचत्वारिंशस्तोमः असावन्तो वै अत उर्ध्वं स्तोमान्तरस्यानुक्तत्वात् त्रिवृदादीनामवसानभूतः खलु, पशुसाधनत्वात् छन्दोगाश्च पशवः, ते च पशवः षोडशकलाः अष्टौ शफाश्चत्वारः पादाः शिरो ग्रीवा आत्मा पुच्छमिति । एवं सति त्रिष्वपि पर्य्यायेषु यत् षोडशभ्यः षोडशभ्यो हिङ्करोति तत्तेन कलाशः अवयवश एव पशूनन्ततः प्राप्नोति ॥ २ ॥

प्रकारान्तरेण स्तौति—

द्वादशभिर्विहितैका परिचरा द्वादशमासास्सम्वत्सरो यजमानः परिचरा यद्द्वादशभिर्विदधात्येका परिचरा भवति यजमानमेव तदन्ततस्सम्वत्सरे पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिताऽष्टाचत्वारिंशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥ ३ ॥

त्रिषु पर्यायेष्वावापस्थानगताभिर्द्वादशभिः स्तोत्रीयाभिरेषा विष्टुतिर्विशेषतो विहिता, तृचभागयोस्त्रिर्वचनं परिचराया एकत्वञ्च न्यायतः प्राप्तम् । सम्वत्सरश्च द्वादशमासात्मकः परिचरा यजमानस्थानीयाः । एवं सति द्वादशभिः स्तोत्रीयाभिरावापस्थानगताभिरिमां विष्टुतिं विदधाति परिचरा चैका भवतीति यत्तेनान्ततः स्तोमानामवसाने यजमानमेव सम्वत्सरे पशुषु प्रतिष्ठापयति । समपर्य्यायत्वादेषा खलु विष्टुतिः प्रतिष्ठिताऽष्टाचत्वारिंशस्य, अतो य एतया स्तुते स प्रतितिष्ठति ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य द्वादशः खण्डः ॥

अथ त्रयोदशः खण्डः ।

अथान्यां विष्टुतिं दर्शयति—

षोडशभ्यो हिङ्करोति स तिसृभिः स दशभिस्स तिसृभिः, षोडशभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स दशभिः, षोडशभ्यो हिङ्करोति स दशभिः स तिसृभिः स तिसृभिर्न्नेदीयःसंक्रमा ॥ १ ॥

पर्य्यायात्पर्य्यायान्तरं संक्रामन्ती समानसंख्यास्वेव संक्रमणान्नेदीयःसंक्रमैषा ॥ १ ॥

अथैतां स्तौति—

अन्तो वा अष्टाचत्वारिंशो यथा महावृक्षस्याग्रं सृप्त्वा नेदीयःसंक्रमात् संक्रामत्येवमेतन्नेदीयःसंक्रमया नेदीयःसंक्रमात् संक्रामति ॥ २ ॥

त्रयस्त्रिंशस्य नेदीयःसंक्रमार्थवादवादिदमपि व्याख्येयम् ॥ २ ॥

प्रकारान्तरेण स्तौति—

दशभिर्विहिता तिस्रः परिचरा दशाक्षरा विराडेतावान् पुरुषो यदात्मा प्रजा जाया यद्दशभिर्विदधाति तिस्रः परिचरा भवन्ति यजमानमेव तत् विराज्यन्नाद्येऽन्ततः प्रतिष्ठापयत्यन्नादो भवति य एतया स्तुते ॥ ३ ॥

यद्या विष्टुतिर्दशभिरावापस्थानगताभिः स्तोत्रीयाभिर्विहिता तिस्रः परिचराः परिचरस्थाने तिस्रो भवन्तीत्यर्थः। अन्नाद्यरूपा विराडपि प्रतिपादं दशाक्षरा,आत्मा प्रजा पुत्रपौत्रादिरूपा जाया चेति यदेतत्त्रितयमस्ति एतावान् हि पुरुष एवं सति आवापस्थाने यद्दशभिर्विदधातीमां विष्टुतिं तिस्रः परिचरा भवन्ति तत्तेन प्रजया जायया च सहितं यजमानमेवान्नाद्ये अन्नाद्यरूपे विराजि अन्ततः स्तोमसमाप्तौ प्रतिष्ठापयति स्तोता, अतो य एतया स्तुते सोऽन्नादो भवति अदनीयान्नबाहुल्योपेतो भवति ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे तृतीयाध्यायस्य त्रयोदशः खण्डः।

इति तृतीयाध्यायः समाप्तिमगमत्।

अथ चतुर्थाध्यायः।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
स्तोमानां दशरात्रस्य प्रोक्ता विष्टुतयः क्रमात् ।
गवामयनिकानां च ता एवेत्यवगम्यते ॥ २ ॥
शतानि त्रीणि षष्टिश्च विषुवांश्च चतुर्थकम् ।
प्रोक्तानि गव्यसत्रस्य स्तुत्यहानि क्रमादिह ॥
तानि सङ्गृह्य वक्ष्यन्ते बुद्धिव्युत्पत्तिसिद्धये ॥ ३ ॥

द्विविधं गवामयनं दशमाससाध्यं द्वादशमाससाध्यञ्च तत्र द्वादशमासनिर्वर्त्यस्य प्रायणीयोऽतिरात्रः प्रथममहस्ततश्चतुर्विंश उक्थ आरम्भणीयः ते उभे अहनी अनुष्ठाय ज्योतिर्गौरायुर्गौरायुर्ज्योतिरित्याभिप्लविकः षडहः स चतुर्वारमावर्त्तनीयः ततस्त्रिवृदादिस्तोमषट्कसाध्यः पृष्ठ्यः षडहः एवं पञ्चभिः षडहैरेको मासः पूर्य्यते एतस्यैवावर्त्तनेन पञ्च मासाः सम्पाद्यास्तत्र षष्ठे मासादौ त्रयोभिप्लवाः षडहाः कार्य्याः । तत एकः पृष्ठ्यः षडहः ततोभिजिदेकमहः त्रयः स्वरसामानः इत्येवमष्टाविंशत्यहानि आद्याभ्यां प्रायणीयचतुर्विंशाभ्यां षष्ठमासपूरणम् । इत्थं पूर्वपक्षे अशीत्युत्तरशतं संख्यान्यहानि सम्पद्यानि ततो विषुवमेकमहः तदस्य सत्रस्य प्रधानभूतम् सप्तमे मासादौ त्रयः स्वरसामानः प्रतिलोमाः कार्य्याः ततो विश्वजिदावृत्तः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भस्त्रिवृदुत्तमः ततस्त्रयोभिप्लवाः षडहा आवृत्ताः एवमष्टाविंशत्यहानि स्युः । अस्य च मासस्य महाव्रतातिरात्रौ च ततो अभिधास्यमानः पूरकः स सप्तमो मासः ततः पृष्ठ्यः षडहः पूर्वकैश्चतुर्भिराभिप्लविकैः प्रतिलोमक्रमेणानुष्ठितैरष्टमो मासः स एवावृत्त्या नवमदशमैकादशा अपि सम्पाद्याः द्वादशमासस्यादौ त्रयोभिप्लवाः षडहाः ततो गोरायुषी द्वे अहनी द्वादशाहस्य दशाहानि चेति त्रिदशाहानि स द्वादशो मासः ततो महाव्रतमुपान्त्यमहः तेन उदयनीयोतिरात्र इत्यपि सप्तममासस्य पूरकाविति । तदेतद्गवामयनसत्रमभिधास्यन् तन्नामनिर्वचनप्रदर्शनायादावाख्यायिकामाह—

गावो वा एतत् सत्रमासत तासां दशसु मास्सु शृङ्गाण्यजायन्त ता अब्रुवन्नराः स्मोत्तिष्ठामोपशा नोऽश-

तेति ता उदतिष्ठन् ॥ १ ॥

पुरा खलु गावः एतत्सम्वत्सरसत्रमासत अन्वातिष्ठन् 'आसचादना अपायचोदना च तत्र लिङ्ग'मिति मीमांसकाः, अत्रासिरूपपूर्वतिथे चानुष्ठाने ये वर्त्तते अत इति तदङ्गरनुष्ठितं अत इदं गवामयनमित्याचक्षते । तासां सत्रस्थितानां मध्ये कासाञ्चिद्गवां दशसु मासु मासेषु 'यदन्ते मासि' इत्यादिना मासशब्दस्य मासुभावः । तेष्वनुष्ठितेषु शृङ्गाण्यजायन्त ता जातशृङ्गा अब्रुवन् परस्परमुक्तवत्यः किमिति अराःस्म अमृद्धा अभूम अतो वयमुत्तिष्ठाम सत्रं समायाम । अराःस्मेति यदुक्तं तादृव्याचष्टे उपशाः अभितः शिरः प्रदेशमुपेत्याशेरन्ते इत्युपशाः शृङ्गाणि तानि नोऽस्माकं अङ्गत जातान्यभूवन्निति सम्बन्धः । अङ्गतेति जनीप्रादुर्भाव इत्यस्मात् लुङि बहुवचने 'मन्त्रे घसे'त्यादिना च्लेर्लुकि 'गमहनजने'त्युपधालोपे रूपम्, एवमुक्त्वा ता गावः सत्रादुदतिष्ठन् । ता एवं दशभिर्मासैः फलप्राप्तेर्दशमासानिर्व्वर्त्त्यमपि गवामयनमस्तीत्युक्तं भवति ॥ १ ॥

अथ द्वादशमासनिर्व्वर्त्त्यमप्यस्तीति दर्शयति—

तासान्त्वेवाब्रुन्नासामहा एवेमौ द्वादशौ मासौ सꣳसम्वत्सरमापयामेति तासान्द्वादशसु मासु शृङ्गाणि प्रावर्त्तन्त ताः सर्वमन्नाद्यमाप्नुवꣳस्ता एनास्तूपरास्तस्मात्ताः सर्व्वान्द्वादशमासः प्रेरते सर्वꣳहि ता अन्नाद्यमाप्नुवन् ॥ २ ॥

तुशब्दो वैलक्षण्यद्योतनार्थः, तासामेव गवां मध्ये काश्चिदब्रुवन् किमित्युच्यते, यौ द्वादशौ द्वादशसंख्यापूरकावेव शिष्टावेकादशद्वादशौ मासौ इमौ आसामहा एवं अनुष्ठायैवं अनुष्ठाय प्रारब्धं संवत्सरसाध्यं समापयामेति 'व्यवहिताश्चेति' समित्यस्य व्यवहितेन सम्बन्धः, तासां गवां जातानि शृङ्गाणि द्वादशसु मासु मासेषु पूर्णेषु प्रावर्त्तन्त प्रापयत् दशभिर्मासैः शृङ्गप्राप्तिलक्षणफले सिद्धेऽपि पुनरश्रद्धया यतो मासद्वयमन्वातिष्ठन् अतो जातानामपि शृङ्गाणां पुनः पतनमित्यभिप्रायः, तथा चैतरेयकं—'अथ समापयिष्यामः सम्वत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्त्तन्ते'ति । एतास्तूपरा इति ताः पतितशृङ्गा गावः सर्व्वर्तुभवमन्नाद्यमदनीयमन्नं प्राप्नुवन् ता गावस्तूपराः शृङ्गहीना दृश्यन्ते तस्मात्ताः सर्व्वान् द्वादशमासान् मासान् प्रेरते प्रगच्छन्ति । ईर गतौ, शीतवाततपेषु सर्वदा युष्माङ्ग एव यथायथं गच्छ-

न्ति शृङ्गिण्यो महिष्यादयस्तु कृशा भवन्ति, तस्मादित्युक्तं कस्मादित्याह हि यस्मात्ता गावः सर्वमन्नाद्यमाप्नुवन् तस्मात् सर्व्वासु पुष्टा भवन्ति तथा चैतरेयकं-'ऊर्ज्जस्वत्यमसमन्वत तस्मादुताः सर्व्वभूतान्तरमुत्तिष्ठन्ति' इति ॥ २ ॥

उक्तार्थं जानतः फलमाह—

सर्वमन्नाद्यमाप्नोति य एवं वेद ॥ ३ ॥

स्पष्टार्थः ॥ ३ ॥

तदेवं दशमासनिर्व्वर्त्यं द्वादशमासनिर्व्वर्त्यं चेति द्विविधं गवामयनं प्रतिपादितं तयोर्ज्योतिष्टोमदर्शपूर्णमासादिवदेतत्कामं एतत्कुर्य्यादिति कामफलसम्बन्धफलविशेषश्रवणाद्विश्वजिन्न्यायेनात्यन्ताश्रुतस्य स्वर्गस्य कल्पनाया अन्याय्यत्वाद्रात्रिसत्रन्यायेनार्थवादिकस्य समृद्धिफलस्य वाक्यशेषे श्रुतत्वादश्रुतत्वाच्छुतङ्करीय इति समृद्धिकामा एतत्सत्रमासीरन्निति विधिरुन्नेतव्यः । तैत्तिरीयके समृद्धिफलकत्वं स्पष्टमाम्नातम्-'य एवं विद्वान् सम्वत्सरमुपयन्त्याब्रुवन्त्येवे'ति॥३॥

अथास्य सत्रस्य पूर्वोक्तान्यहानि क्रमेण विधास्यन् अतिरात्रसंस्थं प्रथममहर्विधातुमाख्यायिकामाह—

प्रजापतिर्वा इदमेक आसीत् सोऽकामयत बहु स्यां प्रजायेयेति स एतमतिरात्रमपश्यत्तमाहरत्तेनाहोरात्रे प्राजनयत् ॥ ४ ॥

यदिदं दृश्यमानं जगत् सृष्टेः पूर्वं प्रजापतिरेक एवासीत् प्रलयावस्थायामव्याकृते कारणे कार्य्यप्रपञ्चस्य लीनत्वात् सृष्टौ हिरण्यगर्भ एक एवासीदित्यर्थः। स एकलः प्रजापतिरकामयत कामनामकरोत् किमिति बहुस्रष्टव्यगिरिनदिसमुद्रादिभेदेनानेकविधः स्यां भवेयम् , तदर्थमहं प्रजायेय अहमेव कार्य्येण रूपेण परिणतो भवेयमिति। स एवं कामयमानः प्रजापतिः सृष्टयुपायत्वेन एतं गवामयनस्याद्यमतिरात्रमपश्यत् दृष्टवान् दृष्ट्वा च तमाहरत् तदन्वतिष्ठत् तेनानुष्ठितेनाहोरात्रे अहश्च रात्रिं च प्राजनयत् उदपादयत् सर्वकारणभूतः प्रजापतिः अहोरात्रप्रमुखं कृत्स्नं जगत् यज्ञरूपेणैव साधनेन ससर्जेति सङ्ग्रहार्थः ॥४॥

अथेदानीन्तनमतिरात्रमभिधत्ते—

यदेषोऽतिरात्रो भवत्यहोरात्रे एव प्रजनयन्त्यहोरात्रयोः प्रतितिष्ठन्त्येतावान्वाव सम्वत्सरो यदहश्च रात्रिश्चाहोरात्राभ्यामेव तत्सम्वत्सरमाप्नुवन्ति ॥ ५ ॥

एषः प्रजापतिना दृष्टोऽतिरात्रः गवामयनस्य प्रथममहर्भवतीति यत् तेन सत्रानुतिष्ठन्तो यजमाना अहोरात्रे एव प्रजनयन्ति उत्पादयन्ति स्वाधीने कुर्वन्तीत्यर्थः । तथा सति तयोः स्वाधीनयोः प्रतितिष्ठन्ति प्रतिष्ठिता भवन्ति । तत्र यद्यपि यद्दृत्तयागोऽसिद्धवदनुवादता प्रतिभाति तथापि यदाग्नेयोष्टाकपाल इतिवदप्राप्तत्वादतिरात्रस्य विधेयता द्रष्टव्या । न केवलमहोरात्रयोः प्रतिष्ठा किन्तु तत्सम्पाद्यात्मकं प्रतिष्ठितं सम्वत्सरमपि प्राप्नुवन्तीत्याह एतावानित्यादिना ॥ ५ ॥

अथैनमतिरात्रमवयुज्य प्रशंसति—

यज्ज्योतिष्टोमो भवति यज्ञमुखन्तदृध्नुवन्ति यदुक्थो यज्ञक्रतोरनन्तरयाय यद्वाग्निः सर्वस्याप्त्यै ॥ ६ ॥

अथ षोडशिकोऽयमतिरात्र इत्युक्तं, कल्पो ज्योतिष्टोमोतिरात्रः स षोडशिक इति । अथ तद्व्यतिरिक्ताभिस्तिसृभिः संस्थाभिरवयुज्य स्तूयते । यद्यपि सर्वेषामपि ज्योतिष्टोमत्वमस्ति तथापि उक्थातिरात्रसंस्थयोः पृथक् वक्ष्यमाणत्वात् अग्निष्टोमसंस्थैव ज्योतिष्टोमशब्देन उच्यते । ज्योतींषि त्रिवृदादयः स्तोमा यस्य स ज्योतिष्टोमः। तथा च तैत्तिरीयकं-'त्रिवृत्पञ्चदश सप्तदश एकविंश एतानि ज्योतींषि यत् एतस्य स्तोमाः, इति । यज्ज्योतिष्टोमोऽग्निष्टोमो द्वादशस्तोत्रात्मको भवति ज्योतिष्टोमस्य हि अग्निष्टोमसंस्था मुख्या 'एष वाव प्रथमो यज्ञानामिति' श्रुतेः । तत्तेन यज्ञमुखं यज्ञानां मुखभूतमग्निष्टोमं प्राप्य 'आध्नुवन्ति' सत्रिणः समृद्धा भवन्ति । तथा तस्मिन्नतिरात्रे उक्थः पञ्चदशस्तुतशस्त्रसाध्यः क्रतुरन्तर्भवतीति यत् तत् यज्ञक्रतोः सम्पूर्णस्य यज्ञस्य अनन्तरयाय अपरित्यागाय भवति । उक्थसंस्थायां हि क्रतुः सम्पूर्णो भवति यथा पूर्वयोः सवनयोः पञ्चदश पञ्चदश स्तोत्राणि तथा तृतीयेऽपि स्तोत्रपञ्चकसद्भावात् । अग्निष्टोमस्त्वसंपूर्णः क्रतुः उक्तहेतोरभावात् । अपि च त्रिष्वपि सवनेषु प्रस्थिता याज्यादेवताः शस्त्रैः प्रशस्यन्ते यथा हि प्रातःसवने मैत्रावरुणस्य प्रस्थितयाज्या देवता मित्रावरुणौ शस्त्रेऽपि तावेव प्रशस्येते। ब्राह्मणाच्छंसिन इन्द्रप्रस्थितयाज्या देवता सैव तदीयशस्त्रेण स्तूयते तथा माध्यन्दिनसवनस्य सर्वेन्द्रत्वात् प्रस्थितयाज्यासु शस्त्राणि चेन्द्राण्येव तथा तृतीयसवने मैत्रावरुणस्येन्द्रावरुणा मुतया इति । ऐन्द्रावरुणी प्रस्थितयाज्या इन्द्रश्च सोमं पिबन्तं बृहस्पतिः ऐन्द्राबार्हस्पत्या ब्राह्मणाच्छंसिनः प्रस्थितयाज्या इन्द्राविष्णवपि पिबतामित्यच्छावाकस्य चैन्द्रा

वैष्णावी । यदि तृतीयसवन एतद्देवत्यानि शस्त्राणि न शस्येरन् प्रस्थितयाज्यादेवतास्तुत्यभावेन क्रतुरपूर्णः स्यात् । उक्थेषु च प्रथमशस्त्रं मैत्रावरुणं द्वितीयमैन्द्राबार्हस्पत्यं तृतीयमैन्द्रावैष्णवं एतेषु तृतीयसवने सवनान्तरवत् प्रस्थितयाज्यदेवतानां प्रशंसा जातेति यज्ञक्रतुः सम्पूर्णो भवति । इत्थमन्तर्भूतेन संख्याद्वयेन प्रशस्तविहितया अतिरात्रसंख्ययापि प्रशंसति यदित्यादिना । अत्र रात्रिशब्देन त्रयः पर्य्यायाः सन्धिः स्तोत्रं तच्छस्त्राणि च लक्ष्यन्ते । रात्रिर्भवतीति यत्तत् सर्वेषां स्तुतशस्त्राणां परिगृहीतत्वात् सर्वस्य सम्पूर्णस्य यज्ञस्य प्राप्त्यै भवति । न च यदेषोऽतिरात्रो भवतीति च यज्ज्योतिष्टोमो भवति यदुक्थो भवति यद्रात्रिरित्यादिवाक्यत्रयेण पृथक् पृथक् कर्म्मविधिरिति मन्तव्यम् । वैश्वानरं द्वादशकपालन्निर्वपेत् पुत्रे जात इति विहितायां जात्येष्ट्यां यदष्टाकपालो भवति यन्नवकपालो भवतीत्यादिवदयुक्तानुवादत्वेन स्तुतिपरत्वात् ॥ ६ ॥

क्रमप्राप्तस्य चतुर्विंशस्य बहुवक्तव्यसद्भावात्पृथग्बहुकामः इदानीमभिप्लवपृष्ठ्ययोरहां संग्रहेण कल्पमभिधान आदावाभिप्लविकपूर्वं त्र्यहं विधातुं प्रस्तौति—

स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयम्मध्यमो गौरसावुत्तम आयुः ॥ ७ ॥

स पूर्वोक्तः प्रजापतिः एतान् स्तोमान् स च स्तोमशब्देन त्रिवृदादिस्तोमवन्त्यहानि लक्ष्यन्ते । तानि ज्योतिर्गौरायुरिति एतन्नामकान्यपश्यत् । तत्र ज्योतिरग्निष्टोमसंस्थः गौरायुषो उक्थसंस्थे ज्योतिष इयं स्तोमकल्पिः । त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्निष्टोमसामेति । अथ गोष्टोमस्य पञ्चदशो बहिष्पवमानः त्रिवृदाज्यानि सप्तदशम्माध्यन्दिनं सवनमेकविंशं तृतीयसवनम् । अथायुष्टोमस्य त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशम्माध्यन्दिनं सवनमेकविंशं तृतीयसवनमिति । एते उक्ता स्तोमा इमे लोका वै भूरादिकाः खलु कः कतमो लोक इति बुभुत्सायामाह अयमेव लोको ज्योतिः अयम्मध्यमो अन्तरिक्षलोको वै असावुत्तमस्तृतीयः स्वर्लोक आयुः स्तोमत्रयस्य लोकत्रयेण सह संख्यासाम्यात् तत्शब्दता एतैः त्रिभिः स्तोमैः साधनैस्त्रीन् लोकान् प्राजनयदिति शेषः ॥ ७ ॥

अथैतान् विधत्ते—

यदेते स्तोमा भवन्तीमानेव लोकान् प्रजनयन्त्येषु लोकेषु प्रतितिष्ठन्ति ॥ ८ ॥

यदेषोऽतिरात्रो भवतीति वाक्यवदेतस्सर्व्वं व्याख्येयम् ॥ ८ ॥

अभिप्लवषडहस्योत्तरं त्र्यहं विधातुमाह—

स एतन्त्र्यहं पुनः प्रायुङ्क्त तेन षडहेन षट् क्रतून् प्राजनयत् ॥ ९ ॥

स प्रजापतिरेतं पूर्वोक्तं त्र्यहं पुनः प्रयुङ्क्तवान् । गौरायुज्योतिरिति क्रमोऽत्रावगन्तव्यः । तथा चापस्तंबः 'ज्योतिष्टोममग्निष्टोमं रथन्तरसामानङ्गामुक्थं बृहत्सामानमायुषमुक्थं रथन्तरसामानं ज्योतिष्टोमं बृहत्सामानमिति' । तेन षडहेन षट् क्रतून् वसन्तादीन् प्राजनयत् सृष्टवान् ॥ ९ ॥

अथार्थवादानुगुण्याय पूर्व्वविहितेन त्र्यहेन संयुज्य इममुत्तरं त्र्यहं विधत्ते—

यदेष षडहो भवति क्रतूनेव प्रजनयन्ति क्रतुषु प्रतितिष्ठन्ति ॥ १० ॥

स्पष्टोर्थः ॥ १० ॥

अथ द्वितीयं षडहं विधातुमाह—

स एतꣳ षडहं पुनः प्रायुङ्क्त ताभ्यां द्वाभ्याꣳ षडहाभ्यां द्वादशमासः प्राजनयत् ॥ ११ ॥

पूर्व्वप्रयुक्तमेव षडहं पुनरपि प्रयुक्तवान् तैर्मिलितैर्दशभिरहोभिर्द्वादशमासो मासान् प्राजनयत् ॥ ११ ॥

पूर्व्ववदर्थवादानुगुण्याय विहितेन षडहेन सह द्वितीयं षडहं समुच्चित्य विधत्ते—

यदेतौ द्वौ षड्हौ भवतो मासानेव प्रजनयन्ति मासेषु प्रतितिष्ठन्ति ॥ १२ ॥

पूर्व्ववद् व्याख्येयम् ॥ १२ ॥

तृतीयचतुर्थौ षडहौ विधातुमाह—

स एतौ द्वौ षडहौ पुनः प्रायुङ्क्त तैश्चतुर्भिः षडहैश्चतुर्विꣳशतिमर्द्धमासान् प्राजनयत् ॥ १३ ॥

एतौ पूर्वप्रयुक्तावेव षडहौ पुनः प्रयुक्तवान् तदैव प्रयुक्तैश्चतुर्भिः षडहैश्चतुर्विंशतिसंख्यान्यहानि सम्पन्नानि । तैश्च तत्संख्याकान् अर्द्धमासान् प्रजापतिः सृष्टवान् ॥ १३ ॥

अथ पूर्ववद्विहितेन षडहद्वयेन सह अर्थवादानुगुण्याय इमं तृतीयचतुःषडहद्वयं विधत्ते--

यदेते चत्वारः षडहा भवन्त्यर्द्धमासानेव प्राजनयन्त्यर्द्धमासेषु प्रतितिष्ठन्ति ॥ १४ ॥

स्पष्टोऽर्थः ॥ १४ ॥

इत्थं षडहचतुष्कं विधाय पञ्चमषष्ठषडहं विधातुमाह--

स इदं भुवनं प्रजनयित्वा पृष्ठ्येन षडहेन वीर्यमात्मन्यधत्त ॥ १५ ॥

स प्रजापतिः इदमहोरात्रादिरूपं भुवनं सर्वं जगत् प्रकर्षेणोत्पाद्य निर्वीर्यः सन् प्रयुक्तेन पृष्ठ्येन षडहेन त्रिवृदादिस्तोमकेन वीर्यं सृष्टस्य जगतो भागरक्षणाद्यर्थं सामर्थ्यमात्मनि स्वस्मिन्नधत्त पुनर्धृतवान् ॥ १५ ॥

तामिमं पृष्ठ्यषडहं विधत्ते--

यदेष पृष्ठ्यः षडहो भवति वीर्य एवान्ततः प्रतितिष्ठन्ति ॥ १६ ॥

यस्मात्प्रजापतिरिमं षडहं वीर्यधारणार्थं प्रयुक्तवान् तस्मादिमं षडहं प्रयुञ्जानाः सत्रिणः अन्ततो मासावसाने वीर्य एव प्रतिष्ठिता भवन्तीत्युक्तम् । इत्थमनुष्ठितषडहपञ्चकात्मकेन मासेन तत्सङ्घात्मकं संवत्सरं प्रजापतिः सृष्टवान् । सत्रिणोऽपि षडहपञ्चकानुष्ठानेन मासद्वारा संवत्सरमेव स्वभोगसाधनमुत्पादयन्ति तस्मिंश्च प्रतिष्ठिता भवन्ति इति ॥ १६ ॥

तस्य स्तुतिः—

तेन मासान् सव्वँत्सरं प्राजनयद्यदेषमासो भवति सव्वँत्सरमेव प्रजनयन्ति सव्वँत्सरे प्रतितिष्ठन्ति ॥ १७ ॥

स्पष्टोऽर्थः ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

प्रायणीयातिरात्रानन्तरमनुष्ठेयं चतुर्विंशमन्यद्वितीयमहः बहुवक्तव्यत्वेन पश्चाद्विधास्यत इति यदवादि अतस्तदहर्विदधाति—

प्रायणीयमेतदहर्भवति ॥ १ ॥

एतद्वक्ष्यमाणमहः प्रायणीयं प्रकर्षेण यन्ति गच्छन्ति स्वर्गमनेनेति व्युत्पत्तिः । एतत्संज्ञकं गवामयनस्य द्वितीयमहरनुष्ठेयं भवति । यद्यपि श्रुत्यन्तरे प्रथमविहितस्यातिरात्रस्यैव प्रायणीय इयि संज्ञा प्रसिद्धा तथापि प्रथमोत्तमयोरतिरात्रयोः सर्वत्र साधारणत्वादस्यैवाह्नो गवामयने असाधारणं प्राथम्यमिति कृत्वा एतदादिकङ्गवामयनस्वरूपमित्यस्मिन् द्वितीयेऽहनि प्रायणीयशब्दोऽत्र प्रयुज्यते ॥ १ ॥

उक्तमहर्नामनिर्वचनद्वारा प्रशंसति—

प्रायणीयेन वा अह्ना देवाः स्वर्गं लोकं प्रायन्यत् प्रायꣳ स्तत्प्रायणीयस्य प्रायणीयत्वम् ॥ २ ॥

पुरा देवाः प्रायणीयेन प्रायणीयाख्येन खल्वह्ना स्वर्गं लोकं प्रायन् प्राप्ताः यद्यस्मात्प्रायन् स्वर्गं प्रागमन् तस्मादस्याह्नः प्रायणीयत्वं प्रायणीयसाधनत्वात्प्रायणीयमिति नाम सम्पन्नम् ॥ २ ॥

अथैतस्याह्न उक्तरूपेण प्रशस्तत्वात् सत्रिभिरस्मिन्नहनि अवश्यं मृत्विग्भिर्भाव्यमित्यन्वयव्यतिरेकाभ्यामाह—

तस्मात्प्रायणीयस्याह्न ऋत्विजा भवितव्यमेतद्धि स्वर्गस्य लोकस्य नेदिष्ठं य एतस्यर्त्विङ्न भवति हीयते स्वर्गाल्लोकात् ॥ ३ ॥

यस्मादेतदहः स्वर्गप्राप्तिसाधनं तस्मादस्याह्नः प्रयोगाय ऋत्विजा जातावेकवचनमृत्विग्भिर्भवितव्यं, एतत् खलु द्वितीयमहः स्वर्गलोकस्य नेदिष्ठमन्तिकतमं, साक्षात् प्राप्तिसाधनत्वात् । अतो य एतस्यर्त्विक् न भवति आर्त्विज्यन्न करोति स स्वर्गाल्लोकात् हीयते हीनो वियुक्तो भवति ॥ ३ ॥

अथैतस्मिन्नहनि स्तोमं विधत्ते—

चतुर्विꣳशं भवति ॥ ४ ॥

इदमहरुक्थसंस्थन्तत्र सर्वेषु स्तोत्रेषु चतुर्विंश एव स्तोमः कार्य्यः ॥ ४ ॥

तदेतत् प्रशंसति—

चतुर्विंशत्यक्षरा गायत्री तेजो ब्रह्मवर्चसङ्गायत्री तेज एव ब्रह्मवर्चसमारभ्य प्रयन्ति ॥ ५ ॥

अयञ्च स्तोमश्चतुर्विंशतिसंख्याकः गायत्री चतुर्विंशत्यक्षरा सा च गायत्री तेजः प्रजापतिमुखादग्निना सहोत्पन्नत्वात् अस्यास्तेजोरूपं ब्रह्मवर्चसं च तेजोऽवान्तरभेदइति तेजोब्रह्मवर्चसरूपा गायत्री एवं सति चतुर्विंशतिस्तोममतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरं प्रारभन्ते अस्मिन्नहनि प्रयुञ्जानाः संख्याद्वारेण तेजो ब्रह्मवर्चसञ्चारभ्य अवरुध्य स्वर्य्यन्ति स्वर्गं गच्छन्ति ॥ ५ ॥

पुनरपि विहितं स्तोममनूद्य प्रशंसति—

चतुर्विंशं भवति चतुर्विंशो वै सव्वँत्सरः साक्षादेव सव्वँत्सरमारभन्ते ॥ ६ ॥

चतुर्विंशत्यर्द्धमासात्मकत्वात् संवत्सरस्य चतुर्विंशत्वं तथा सति चतुर्विंशस्तोमं प्रथमतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरमारभन्ते ॥ ६ ॥

अथेमं स्तोमं स्तोत्रीयागतसंख्याद्वारेण प्रशंसति—

यावत्यश्चतुर्विंशस्योक्थस्य स्तोत्रीयास्तावत्यः सव्वँत्सरस्य रात्रयः स्तोत्रीयाभिरेव तत् सव्वँत्सरमाप्नुवन्ति ॥ ७ ॥

पञ्चदशस्तोत्रे अस्मिन्नहनि पञ्चदशस्तोत्रेषु प्रत्येकं चतुर्विंशस्तोत्रीयायुक्तेषु परिगणनायां मिलित्वा षष्ट्युत्तरत्रिंशत्स्तोत्रीया भवन्ति । तथा सति चतुर्विंशस्तोमकस्य यावत्यः स्तोत्रीयाः संवत्सरस्यापि तावत्यो रात्रयः एवं प्रयुञ्जानाः साधिणस्तेन चतुर्विंशेन स्तोत्रीयाभिरेव संवत्सरं प्राप्नुवन्ति ॥ ७ ॥

स्तोत्रसंख्ययापीदमहः प्रशंसति—

पञ्चदशस्तोत्राणि भवन्ति पञ्चदशार्द्धमासस्य रात्रयोऽर्द्धमासश एव तत् सव्वँत्सरमाप्नुवन्ति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथ स्तोत्रशस्त्राणि समुच्चित्य तत्संख्ययापीदमहः प्रशंसति—

पञ्चदश स्तोत्राणि पञ्चदश शस्त्राणि समासो मासश एव तत् सव्वँत्सरमाप्नुवन्ति ॥ ९ ॥

स्पष्टोऽर्थः ॥ २ ॥

अथास्याह्न उक्थपक्षे किञ्चिद्दोषमाशङ्क्य तत्परिहाराय सामद्वयं विधत्ते—

तदाहुरीर्म्म इव वा एषा होत्रा यदच्छावाक्या यदच्छावाकमनुसन्तिष्ठत ईश्वरेर्मा भवितोरिति यद्युक्थꣳ स्यात्त्रैककुभञ्चोद्वꣳशीयञ्चान्ततः प्रतिष्ठाप्ये वीर्यं वा एते सामनी वीर्यएवान्ततः प्रतितिष्ठन्ति ॥ १० ॥

तत्तस्मिन् उक्थपक्षमाहुर्ब्रह्मवादिनः किमिति तदुच्यते होतृव्यतिरिक्तानां होतृकाणां किमहो यत् वा अच्छावाक्या अच्छावाकसम्बन्धिनी होत्रा शंसनादिरूपा क्रिया एषा ईर्मेति व्रणमुच्यते, तद्व्रणमनुतिष्ठते अच्छावाकमनुलक्ष्य सन्तिष्ठते अच्छावाकशब्देन समाप्यते नाच्छावाकसमापनेन ईर्मयज्ञस्य दुष्टतां भवितो(१)र्भवितुमीश्वराः समर्था भवन्तीत्याहुरित्यन्वयः। अतो यदीयमुक्थं उक्थसंस्थं स्यात् उक्तदोषपरिहाराय त्रैककुभं चोद्वंशीयं चोभे सामनी अन्ततस्तृतीयसवनस्यान्ते प्रतिष्ठाप्य त्रैककुभं ब्रह्मसाम उद्वंशीयमच्छावाकसामेत्येवं कर्त्तव्येत्यर्थः। शाट्यायनेन स्पष्टमाम्नातं, ईर्म इव वा एषा होत्राणां यदच्छावाको यदच्छावाकमनुसन्तिष्ठेतेर्म इव तुष्टुवानाः स्युरिति। तस्य त्रैककुभं ब्रह्मसाम भवत्युद्वंशीयमच्छावाकसामेति य एक इद्विदयते इति तृचे गेयं उद्वंशीयं एते सामनी वीर्यं वै वीर्यरूपे एव कथमनयोर्वीर्यवत्त्वमुच्यते ककुभमिति शृङ्गवदुन्नतस्याभिमानं त्रीणि ककुभानि यस्य तत् त्रिककुभं तत्सम्बद्धं त्रैककुभं अतस्त्र्युन्नतसम्बन्धादेते सामनी वीर्यमित्युच्यते उन्नतं हि लोके वीर्यवद्भवति उद्वंशीयस्य चोद्वंशमिव येमिर इत्युद्यमनश्रवणादुच्छ्रायप्रतीतेर्वीर्यत्वं, एवं सति वीर्यरूपयोः साम्नोः प्रयोगात् अन्ततस्तृतीयसवनस्यान्ते वीर्यएव यजमानाः प्रतितिष्ठन्ति अतोऽच्छावाकसमापनदोषो न भवतीत्यर्थः ॥१०॥

अथास्यैवाह्नो विकल्पेन अग्निष्टोमसंस्था कार्येत्याह—

अथो खल्वाहुरग्निष्टोममेव कार्यमेष वै यज्ञः स्वर्ग्यो यदग्निष्टोम ऊर्द्धोंहि होतारमनुसन्तिष्ठते ॥ ११ ॥

अथो शब्दः पक्षव्यावृत्त्यर्थः। अभिज्ञाः खल्वाहुः किमिति ? इदमहरग्निष्टोमम् अग्निष्टोमसंस्थमेव कार्यं न तु अग्निष्टोम इति। यत् एष खलु यज्ञः स्वर्ग्यः स्वर्गाय हितः तत् कुतो हेतोः हि यस्मादूर्द्धोंऽस्त्रिवृदादि-

(१) ईश्वरार्येऽग्रतोसुत्प्रत्ययः।

क्रमेण ऊर्द्धाभिमुखः सन् अयमग्निष्टोमो होतारमनुलक्ष्य सन्तिष्ठते होता हि सर्वहोतॄणां मुख्यस्तदीयेनाग्निमारुतशस्त्रेणाग्निष्टोमः परिसमाप्यते अतोऽस्य स्वर्ग्यत्वं ॥ ११ ॥

उक्थत्वे संवत्सरावाप्तिरूपं यत् फलमुक्तं तदप्यत्रापि विद्यत इत्याह—

द्वादशस्तोत्राण्यग्निष्टोमो द्वादश मासाः संवत्सरस्तेन संवत्सरसम्मितो द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विंशतिश्चतुर्विंशतिरर्द्धमासाः संवत्सरस्तेन संवत्सरसम्मितः ॥ १२ ॥

योयमग्निष्टोमः स द्वादशस्तोत्राणि द्वादशानां स्तोत्राणां सङ्घात्मकः संवत्सरश्च द्वादशमासात्मकस्तेनायमग्निष्टोमसंस्थः संवत्सरसम्मितः संवत्सरसदृशस्तेन संवत्सरमेवाप्नुवन्तीत्यर्थः। किञ्चाग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणि भवन्ति तदुभयमिलित्वा चतुर्विंशति सम्पद्यन्ते संवत्सरश्च चतुर्विंशत्यर्द्धमासात्मकः तेनाप्ययं संवत्सरसम्मितः ॥ १२ ॥

एवमग्निष्टोमसंस्थायाः सिद्धान्तत्वाशङ्कायामुक्थसंस्थैव सिद्धान्तइति निगमयति—

अथो खल्वाहुरुक्थमेव कार्यमहः समृद्ध्यै ॥ १३ ॥

अथो इति पूर्वपक्षव्यावृत्त्यर्थः। उक्थसंस्थमेवैतदहः कार्य्यं, किमर्थमहः समृद्ध्यै सम्पूर्णतया इति ब्रह्मवादिनआहुः। अग्निष्टोमे हि पूर्वयोः सवनयोः पञ्चपञ्च स्तोत्राणि तृतीये तु द्वे एवेत्यहः समृद्धिर्न भवति, उक्थे तु तृतीयसवने पञ्च स्तोत्राणीत्यहः समृद्धं भवति ॥१३॥

उक्थसंस्थाङ्गीकारे युक्त्यन्तरमाह—

सर्वाणि रूपाणि क्रियन्ते सर्वꣳ ह्येतेनाह्नाप्यते ॥१४॥

उत्तरेषामह्नां सम्बन्धीनि यानि रूपाणि स्तोमपृष्ठविभक्त्यादीनि तान्यस्मिन्नुक्थे क्रियन्ते अतः सर्वं हि यज्ञसम्बन्धि रूपं तेनाह्ना उक्थसंस्थेन आप्यते प्राप्यते तत उक्थसंस्थैव कार्य्येत्यर्थः। सर्वरूपकरणञ्च सर्व्वावाप्तिश्च सम्पादनद्वारेणेति निदानकारेणैवमुच्यते, अथो खल्वाहुः सर्व्वाणि रूपाणि क्रियन्त इति आचार्य्याः एतेष्वेव सर्व्वान् स्तोमान् सर्व्वाणि पृष्ठानि सर्वा विभक्तीर्दशरात्ररूपाणीति विभक्तिमात्रेण कल्पयन्त इति संगृह्योक्त्वा पुनस्त्रिवृत्पञ्चदशौ चतुर्विंशः सम्पाद्यत इत्यादिना एतान्येवस्तोमपृष्ठादीनि प्रत्येकक्रमेण विविच्य प्रदर्शितानि तत्सर्वं तत्रैवावगन्तव्यम् ॥ १४ ॥

अस्मिन्नहनि बहिष्पवमानस्य आद्यां स्तोत्रीयां पूर्वपक्षतया विदधाति—

पवन्ते वाजसातये सोमाः सहस्रपाजस इति सहस्रवती प्रतिपत्कार्य्या ॥ १५ ॥

प्रतिपद्यते प्रक्रम्यते बहिष्पवमानस्तोत्रे एषा प्रतिपत् सा सहस्रवती सहस्रशब्दोपेता कार्य्या ॥ १५ ॥

एतां प्रशंसति—

सव्वँत्सरस्य रूपꣳ सर्व्वानेवैनानेतया पुनाति सर्वानभिवदति ॥ १६ ॥

अस्यां हि बहुत्वसंख्या सहस्रपदेन प्रतीयते। संवत्सरश्च बहुदिवसात्मकः। अत एषा सहस्रवती संवत्सरस्य बहुदिवसात्मकस्य रूपम् अनुरूपं अनुगुणेत्यर्थः, अपि चैतान् यजमानान् सर्व्वानेव एतया प्रतिपदा पुनाति स्तोता शोधयति, कथमिति ? तदुच्यते यस्मादेषा पवन्ते इत्यनेन बहुवचनेन सर्व्वानभिवदति प्रतिपादयति अत इत्यर्थः। यद्यपि तत्र बहुवचनेन स्तोमबहुत्वमेव प्रतीयते तथापि बहुत्वश्रुतिसामान्यात् सर्व्वान् यजमानानेतया पुनातीति श्रुतिः ॥ १६ ॥

इत्थं ब्राह्मणाभिप्रेतं पक्षमभिधाय स्वाभिमतं पक्षं दर्शयति—

अथो खल्वाहुः पवस्व वाचो अग्रिय इत्येव कार्या मुखं वा एतत् सव्वँत्सरस्य यद्वाचोग्रम्मुखत एव तत् सव्वँत्सरमारभन्ते ॥ १७ ॥

अथो खल्विति पक्षान्तरव्यावृत्त्यर्थः। पवस्व वाच इत्येषैव बहिष्पवमानस्य प्रतिपत्कार्येति ब्रह्मवादिनआहुः। अस्य प्रायणीयस्याह एषाभिरूपेति स्तौति मुखं वा एतत् संवत्सरस्य यद्वाचोऽग्रं मुखत एव तत् संवत्सरमारभन्त इति। वाचः स्तोत्रशस्त्रात्मिकायाः अग्र्यं प्राथम्यं प्रथमयोग इति यत् एतत् संवत्सरस्य सत्रस्य गवामयनस्य मुखं वै भवति, अस्याश्च प्रतिपदि पवस्व वाचो अग्रिय इति अग्रशब्दो विद्यते। अनेन च श्रुतिसामान्येन स्तुतशस्त्रादिवाङ्निष्पाद्यस्य गवामयनस्य मुखभूतमग्रं प्रतीयते। एवं सत्येषा प्रतिपद्भवतीति यत्तेन संवत्सरसत्रं मुखत एव आरभन्ते यजमानाः प्रक्रमन्ते अस्यामृच्यग्रियशब्दसद्भावात् अग्रियस्य चतुर्विंशस्य रूपेत्यभिप्रायः ॥ १७ ॥

एषा प्रजननहेतुत्वादपि प्रशस्तेत्याह—

मिथुनमिव वा एषा व्याहृतिः पवस्वेति पुꣳसो रूपं

वाच इति स्त्रियाः सोमेति पुंसो रूपञ्चित्राभिरिति स्त्रिया मिथुनमेवैभ्यो यज्ञमुखे दधाति प्रजननाय ॥ १८ ॥

एषा मन्त्रगता व्याहृतिरुक्तिर्मिथुनमिव वै इत्यवधारणे मिथुनरूपैव भवति । तदेव दर्शयति-पवस्वेति यत् पवनं प्रतिपाद्यते तत् पुंसः पुरुषस्य रूपं प्रायेण स्तोमस्य पवनं पुरुषएव करोति। यद्वा पवनकर्त्तुः सोमस्य पुंस्त्वादस्य पुंरूपत्वं, वाच इति स्त्रीलिङ्गत्वात् स्त्रियारूपं, तथा सोमेति यदामन्त्रितं तत् पुंसो रूपं चित्राभिरिति स्त्रियाः, एवं सति एषा प्रतिपद्धवतीति यत तेन एभ्यो यजमानेभ्यो यज्ञमुखे मिथुनमेव दधाति किमर्थं प्रजननाय यजमानानां प्रजोत्पत्तये ॥ १८ ॥

अथास्याह्न अग्निष्टोमस्तोत्रे ब्राह्मणान्तरसिद्धं किञ्चित् साम विदधाति—

अग्ने युङ्क्ष्वा हि ये तवेति जराबोधीयमग्निष्टोम साम कार्य्यं युक्तेनैव सव्वँत्सरेण प्रयन्ति चतुर्विंꣳशत्यक्षरासु भवति चतुर्विंꣳशस्य रूपम् ॥ १९ ॥

अग्ने युंक्ष्वा हीत्यस्मिंस्तृचे गायत्रे जराबोधेत्यस्यामृच्युत्पन्नं साम यद्यपि नाधीमहे तथाप्यूहेन अस्मिन्नहनि अग्निष्टोमसामत्वेन तत्कार्य्यम्। एवं सति युङ्क्ष्वेति मन्त्रे युक्तत्वलिङ्गदर्शनात् उक्तेनैव परस्परसम्बद्धेनैव सव्वँत्सरसत्रेण प्रयन्ति गच्छन्ति सत्रस्य पारं प्राप्नुवन्तीत्यर्थः । किञ्च एतत्साम चतुर्विंꣳशत्यक्षरासु गायत्रीषु भवति, एतच्चाहश्चतुर्विंशस्तोमकं तथा सति संख्यासामान्यात् तत्साम अस्याह्नोऽनुरूपं भवति ॥ १९ ॥

अथ स्वाभिमते सिद्धान्तमाह—

अथो खल्वाहुर्य्यज्ञायज्ञीयमेव कार्य्यम् ॥ २० ॥

स्पष्टोऽर्थः ॥ २० ॥

इमं पक्षं प्रशंसति—

पन्था वै यज्ञायज्ञीयं पथ एव तन्न यन्ति ॥ २१ ॥

यज्ञायज्ञीयमग्निष्टोमसामेति यदेतत् एष खलु पन्था यज्ञस्य न्याय्योमार्गः यज्ञायज्ञीयमग्निष्टोमसाम कुर्व्वन्तीति यत् तत्तेन पथः मार्गादेव एतान् न यन्ति न गच्छन्ति प्रच्युता न भवन्ति ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथास्मिन्नेवाहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिनः पृष्ठस्तोत्रनिवर्त्तकमेकं साम विधत्ते--

अभीवर्त्तो ब्रह्मसाम भवति ॥ १ ॥

तञ्चोदञ्चमृतीवहमित्यस्मिन् योनावुत्पन्नं साम अभीवर्त्ताख्यम् एतत् साम ब्राह्मणाच्छंसीयपृष्ठस्तोत्रमनुशंसति, तत्र वक्ष्यमाणासु ऋक्षु कर्त्तव्यम् ॥ १ ॥

अथैतन्नामनिर्वचनेन प्रशंसति—

अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त यदभीवर्त्तो ब्रह्मसाम भवति स्वर्गस्य लोकस्याभिवृत्त्यै ॥ २ ॥

अभीवर्त्ताख्येन साम्ना देवाः स्वर्गं लोकमभ्यवर्त्तन्त अगच्छन् अतएवास्याभिवृत्तिसाधनत्वादस्य साम्नोऽभीवर्त्त इति संज्ञा निष्पन्ना। अतएव शाट्यायनकं यदभ्यवर्त्तन्त तदभीवर्त्तस्याभीवर्त्तत्वमिति, अभिपूर्वाद्वृतुवर्त्तन इत्यस्मात्करणे घञ् "उपसर्गस्य घञ्यमनुष्येषु बहुलमि"ति पूर्वपदस्य दीर्घः। एवं सति अस्मिन्नहनि अभीवर्त्तो ब्रह्मणः पृष्ठ्यसाम भवतीति यत् तत् स्वर्गस्य लोकस्याभिवृत्त्यै अभिवर्त्तनायाभिगमनाय सत्रिणां सम्पद्यते ॥ २ ॥

अस्य च साम्नः इन्द्रं गीर्भिर्हवामह इति पादस्यान्त्यं हे इत्येतत् हा इति विकृतं निधनं तदेतदनूद्य प्रशंसति—

एकाक्षरणिधनो भवत्येकाक्षरा वै वाग्वाचैव तदारभ्य स्वर्गं लोकं यन्ति ॥ ३ ॥

अयमभीवर्त्त एकाक्षरणिधनः हे इत्येकमक्षरन्निधनं यस्य तादृशो भवति वागप्येकाक्षरा इति तत्तेन एकाक्षरनिधनप्रयोगेण एकाक्षरया वाचैव यज्ञमारभ्य स्वर्गं लोकं यान्ति यजमाना गच्छन्ति। एतदभीवर्त्ताख्यं साम पूर्वस्मिन् पक्षसि विद्यमानानामाभिप्लविकानामहां स्वरसाम्नां च माध्यन्दिने सवने वक्ष्यमाणासु ऋक्षु ब्रह्मणः पृष्ठस्तोत्रतया कर्त्तव्यं तथा उत्तरस्मिन् पक्षसि "इन्द्रक्रतुम्न आभरे"त्येक एव प्रगाथः ब्रह्मसामाश्रयः कर्त्तव्यः। प्रत्यहं तस्मिन् प्रगाथे अन्यदन्यत्साम ब्रह्मणः पृष्ठ्यस्तोत्रार्थं कर्त्तव्यम् ॥ ३ ॥

तदेतदुभयं विधत्ते—

साम्नेतो यन्त्यृचा पुनरायन्ति ॥ ४ ॥

साम्ना अभीवर्त्ताख्येन पूर्ववस्मिन् पक्षसि विद्यमानेषु पूर्वोक्तेष्वहःसु प्रत्यहं प्रयुज्यमाने इतो अस्माल्लोकाद्यन्ति गच्छन्ति स्वर्गं तया ऋचा सामान्याभिप्रायमेकवचनमिन्द्रकतुन्न आभरेति ऽयृचेनेत्यर्थः उत्तरस्मिन् पक्षसि पुनः पुनः प्रयुज्यमानेनैतेन ऽयृचेन पुनरायन्ति इमं लोकमभिलक्ष्य स्वर्गात्पुनरावर्त्तन्ते, अत उभयलोकप्राप्त्यर्थत्वादुभयोः पक्षसोरेतदुभयं कर्त्तव्यमित्यर्थः ॥ ४ ॥

तदेव कथमित्यत आह—

साम वा असौ लोक ऋगयं यदितः साम्ना यन्ति स्वर्गं लोकमारभ्य यन्ति यदृचा पुनरायन्त्यस्मिन् लोके प्रतितिष्ठन्ति ॥ ५ ॥

यदिदं साम तदसौ स्वर्लोकः ऋग्यजुरपेक्षया साम तृतीयं भवति स्वर्लोकश्च पृथिव्यन्तरिक्षापेक्षया तृतीयः । अनयोः स्थानसाम्यादिभेदेन व्यपदेशः, येयमृक् सा अयं लोकः उभयोः प्राथम्यात्, किमतो भवति तदुच्यते इतः साम्ना यन्तीति यत्तत् स्वर्गं लोकमेव साक्षादारभ्य यन्ति । तथा ऋचा ऋग्भिस्त्र्यृचेन पुनरायन्तीति यत् तेन अस्मिन्नेव लोके पुनः प्रतिष्ठा भवति ॥ ५ ॥

विहितं साम त्र्यृचरूपमुभयं व्यतिरेकत्वेन प्रशंसति—

यत्सामावसृजेयुरव स्वर्गाल्लोकात्पद्येरन्यदृचमनुसृजेयुर्न्नश्येयुरस्माल्लोकात् ॥ ६ ॥

यद्यदि पूर्वं विहितं साम अवसृजेयुः परित्यजेयुः स्वर्गाल्लोकादवपद्येरन् अधः पतेयुः । यद्यदि ऋचमनुसृजेयुरस्माद्भूर्लोकान्नश्येयुः प्रच्यवेरन् स्वर्गस्थितिसाधनं साम अस्मिन् लोके प्रतिष्ठाहेतुः ऋगिति उभयमुक्तं भवति ॥ ६ ॥

तदुभयमनूद्य प्रशंसति—

समानꣳ साम भवत्यन्योन्यः प्रगाथोन्यदन्याद्धि चित्रमध्वानमवगच्छन्नेति ॥ ७ ॥

पूर्वपक्षेऽस्मिन् पक्षसि उक्तेष्वहःसु समानमेकमेवाभीवर्त्ताख्यं ब्रह्मसाम भवति प्रगाथः प्रगथनीयस्तदाश्रयस्त्र्यृचस्त्वन्योऽन्यः प्रत्यहं विलक्षणो भवति । लोकेपि हि दीर्घेऽध्वनि अन्यदन्यत्परस्परविलक्षणं चित्रं चायनीयलब्धव्यं धनम् अवगच्छन् प्राप्नुवन् अध्वानम्महापथमेति पुरुषः प्राप्नोति एवमेवैते संत्रिणोन्यमन्यं प्रगाथमेव गच्छन्तो विष्वत्पर्य्यन्तं यज्ञमार्गं यन्ति ॥ ७ ॥

एतत् प्रजननहेतुत्वेन प्रशंसति—

वृषा वा एष रेतोधा यदभीवर्त्तः प्रगाथेषु रेतो दधदेति यदितः समानꣳसाम भवत्यन्योऽन्यः प्रगाथो रेत एव तद्दधति यत्परस्तात् समानः प्रगाथो भवत्यन्यदन्यत्साम रेत एव तद्धितं प्रजनयन्ति ॥ ८ ॥

अभीवर्त्त इति एष वृषा वर्षणशीलः सेचनसमर्थो युवैव अत एव रेतोधाः रेतसो वीर्य्यस्य निधाता स प्रगाथेषु प्रगाथस्थास्वृक्षु रेतो दधत् एति गच्छति यत इतश्चतुर्विंशादारभ्य सामानमेवाभीवर्त्ताख्यं ब्रह्मसाम भवति प्रगाथस्तदाश्रयोन्योऽन्यः प्रत्यहं भिन्नो भवतीति तदेतदुभयं तत्तेन सम्रिणो रेत एव दधति प्रजोत्पादनाय रेतसएव धारणां कुर्व्वन्ति परस्तात् परस्मिन्नुत्तरस्मिन् पक्षसि समानः एकः प्रगाथ इन्द्रक्रतुमित्यादिको भवति ब्रह्मसाम तु प्रत्यहमन्यदन्यद्विलक्षणमेव भवतीति यत् तत्तेन हितं पूर्व्वस्मिन् पक्षस्याहितरेतएव प्रजनयन्ति बहुविधस्य साम्नः प्रयोगेण बहुविधकार्य्यरूपेणोत्पादयन्ति ॥८॥

प्रकारान्तरेण प्रशंसति—

साम्नेतः प्रगाथां दुग्धे प्रगाथेन परस्तात्सामानि दुग्धे सलोमत्वाय ॥ ९ ॥

इतश्चतुर्विंशादारभ्य साम्नैकेन सर्व्वा प्रगाथां दुग्धे पूर्व्वस्मिन् पक्षसि बहूनि फलानि प्रगाथेभ्यः क्षारयति युक्तात् परस्मिन् पक्षसि प्रगाथेन पूर्व्वोक्तेन सामानि दुग्धे यान्यस्मिन् प्रगाथे प्रयुज्यन्ते तेभ्यः फलानि क्षारयति एवं क्रियमाणमेतदुभयं सलोमत्वाय अनुलोमत्वाय भवति। ऋचो हि साम्नाम् आधारतया प्रथमसिद्धाः सामानि तु तदाश्रितत्वात् पश्चाद्भावीनीति तेनैवानुपूर्व्येण फलोत्पादनमेवानयोः सलोमत्वम् ॥ ९ ॥

पूर्व्वस्मिन् पक्षसि ऋचां चैषामनावृत्तिः उत्तरस्मिंस्तु साम्नां तदुभयं प्रशंसति—

ये वा अध्वानं पुनर्निवर्त्तयन्ति नैनं ते गच्छन्ति ये ऽपुनर्निवर्त्तं यन्ति ते गच्छन्ति ॥ १० ॥

ये खलु पान्थाः अध्वानं पुनर्निवर्त्तयन्ति पुनः पुनर्निवृत्ता गच्छन्ति ते एनमध्वानं न गच्छन्ति अध्वनः पारं न प्राप्नुवन्ति, ये तु अपुनर्निवर्त्तं पुनः पुनर्निवृत्तिराहित्येनाध्वानं यन्ति ते गच्छन्ति अध्वानं

एवमेव सत्रिणोऽपि सकृत्प्रयुक्तान् पुनरपि प्रयुञ्जानाः संवत्सरसत्रस्य पारं प्राप्नुवन्ति ॥ १० ॥

प्रयुक्तस्य पुनः प्रयोगे दोषमाह--

य आस्तुतं कुर्वते यथा दुग्धामुपसीदेदेवन्तत् ॥११॥

आस्तुतं पूर्वस्तुतं प्रगाथं ये कुर्वते ते पुनः प्रयुञ्जते यथा दुग्धामुपसीदेत् दोग्धा दोग्धुमुपविशेत् एवमेव तद्भवति ॥ ११ ॥

एतदेव व्यतिरेकमुखेन द्रढयति--

ये नास्तुतं यं कामं कामयन्ते तमभ्यश्नुवते ॥ १२ ॥

ये तु आस्तुतं सकृत्प्रयुक्तं न कुर्व्वते न पुनः प्रयुञ्जते यं कामं कामयन्ते तं प्राप्नुवन्ति ॥ १२ ॥

उक्तमर्थं विचारपूर्व्वकं नियमयति--

ब्रह्मवादिनो वदन्ति यातयामाः सव्वँत्सरा ३ अयातयामा ३ इति ते नायातयामेति वक्तव्यं पुनरन्यानि स्तोत्राणि निवर्त्तन्त ऊर्द्धमेव ब्रह्मसामेति ॥ १३ ॥

अस्मिन् गवामयनसत्रे ब्रह्मवादिनः परस्परमाहुः, किमिति ? अयं संवत्सरः सत्रात्मकः किं यातयामो गतरसः उतायातयाम इति विचार्य्यमाणानामिति संशये स्तुतिः। पक्षद्वयोत्थानस्य का शङ्का ? उच्यते बृहद्रथन्तरयोरेव पुनः पुनः प्रयोगात् वामदेव्यकाले ययोश्च नित्यशः प्रयोगात् ब्रह्मसाम्नश्चाभीवर्त्तः तथा च सर्व्वान्वयित्वात् प्रयुक्तानां पुनः पुनः प्रयोगेण यातयामत्वाशङ्का, तथा ब्रह्मसाम्नः पुनः पुनः प्रयुज्यमानस्यापि तदाश्रयाणां प्रगाथानां प्रत्यहं विभिन्नत्वादयातयामत्वमित्युभयदर्शनाद्विशेषाग्रहणाच्च संशये इत्थं निर्णेतव्यम् अयातयाम एव संवत्सर इति वक्तव्यमभिज्ञैस्तत् कस्य हेतोः ? यतः अन्यान्यभीवर्त्तव्यतिरिक्तानि स्तोत्राणि साश्रयाणि निवर्त्य तत्स्थाने साश्रयाण्यप्रयुक्तानि स्तोत्राणि पुनरावर्त्तन्ते ब्रह्मसामैकमेव ऊर्द्धमनिवृत्तमितरस्याप्याश्रयभेदो विद्यते अतो हेतोः संवत्सरस्यागतरसत्वम् ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

तदेवं चतुर्थेऽहनि ब्रह्मसाम विधाय प्रसङ्गात् संवत्सरस्यापि ब्रह्मसाम निरूपितं, चतुर्विंशस्य पुनरन्यानि स्तोत्राणि तानि सर्व्वाणि

आर्षेयकल्पेनैव बोद्धव्यानि, तदेवं पूर्वस्मिन् पक्षसि चतुर्विंशाभिप्लविकस्वरसामस्वहःसु एकमेवाभीवर्त्तसाम पुनः पुनरावर्त्तनीयं, प्रगाथस्तु प्रत्यहं भिन्न इति स्थितं, तत्रादौ पञ्चमासाश्चतुरभिप्लवा इति तेषु विंशतिशतमहान्याभिप्लविकानि भवन्ति षष्ठे तु त्रयोभिप्लवा इत्यष्टादश त्रयः स्वरसामान इत्येकविंशतिः तदुभयमिलित्वा एकचत्वारिंशच्छतमहानि भवन्ति। एतेष्वहःसु प्रगाथभेदस्योक्तत्वात्, के ते स्तोत्रीयाः प्रगाथास्ऽयृचाश्चेत्याकांक्षायामाह--

पञ्चसु मासु बार्हताः प्रगाथा आप्यन्ते ॥ १ ॥

पूर्वस्मिन् पक्षसि पञ्चसु मासेषु बार्हताः प्रगाथाः आप्यन्ते समाप्यन्ते। प्रगाथमुपलक्षणं बार्हतास्त्यृचाश्च समाप्यन्त इत्यर्थः, कथमेतदुच्यते चतुःशतं ह्यैन्द्राबार्हताः प्रगाथा दाशतय्यां विद्यन्ते तेषु चत्वारः प्रगाथा ऊर्द्धायाः बृहद्रथन्तरकालेयस्तोत्रीया इन्द्रक्रतुन्न आभरेत्युत्तरपक्षीयश्चैक इति कुतस्तेषामुद्धारः बृहत् स्तोत्रीयस्य चतुर्विंशेऽहनि प्रयुक्तत्वात् अभिप्लवेषु वा युग्मेष्वहःसु प्रयुक्तत्वात् रथन्तरस्य स्तोत्रीयस्य युग्मेषु प्रयुक्तत्वात् कालेयस्तोत्रीयस्य अन्वहं प्रयुक्तत्वात् इन्द्रक्रतोश्चोत्तरस्मिन् पक्षसि पृथग्विधास्यमानत्वात् पूर्वस्मिन् पक्षयोग इति ते उद्धृियन्ते ततः शतं भवति तेषु चतुर्विंशे कार्य्य इत्येकोनशतं सप्ताशीतिस्ऽयृचः सतो बृहत्या दाशतय्यामाम्नाताः ते चैकोनत्रिंशत्स्यृचो भवन्ति अष्टाविंशतिशतं प्रगाथऽयृचसमुदायो भवति तत्र विंशतिशतं पञ्चानाम्मासानामपेक्षितम् एकोनशतमेव प्रगाथा विद्यन्ते इत्येकैकस्मिन् अभिप्लवे तृतीयेष्वभिप्लवेषु तृतीयेष्वहःसु सतोबृहतीस्ऽयृचाः कार्य्याः। इतरेषु प्रगाथा एव कार्य्याः। एवं कृते पञ्चमस्य मासस्योत्तमेऽभिप्लवे चत्वार एव प्रगाथा लभ्यन्ते तत्र तृतीयेऽहनि सतो बृहतीः कृत्वा पञ्चापि सतो बृहत्यः कार्याः। एवं पञ्चसु बार्हताः प्रगाथा आप्यन्ते सतो बृहतीस्ऽयृचाः अष्टौ परिशिष्यन्ते षष्ठे च मासे एकविंशतिसंख्यान्यहानि तत्राद्येषु षष्ठेष्वहःसु एते अवशिष्टास्त्यृचाः कार्याः ॥ १ ॥

ततस्त्रयोदशस्वहःसु कथं प्रगाथलाभ इत्याशङ्क्याह--

तेष्वाप्तेषु छन्दसी संयुज्यैतव्यम् ॥ २ ॥

तेषु बार्हतेषु प्रगाथेषु ऽयृचेषु चोक्तप्रकारेण परिसमाप्तेषु सत्सु अवशिष्टेष्वहःसु द्वे छन्दसी संयुज्य ऽयृचीकृत्य एतव्यं ब्रह्मसाम्न आश्रयत्वेन प्रयोक्तव्यम् ॥ २ ॥

ते के छन्दसी इत्यतआह।

तिस्र उष्णिहः स्युरेका गायत्री तास्तिस्रो बृहत्यो भवन्ति ॥ ३ ॥

तिसृभिरुष्णिग्भिरेकया च गायत्र्या तिस्रो बृहत्यः सम्पद्यन्ते उष्णिहस्त्वाद्यौ पादावष्टाक्षरौ तृतीयो द्वादशकः तथा सति तिसृष्वुष्णिक्षु एकैकस्य गायत्रपादस्य संयोजने प्रत्येकं बहती भवति एवं छन्दोद्वयं संयुज्यैतव्यमित्यर्थः। तथाच सूत्रकृतोक्तं, षष्ठे मासि गायत्रीपादमेकैकमुष्णिहामुपरिष्टात्कुर्यादिष्टावानुपपत्तिर्ह्यन्यथेति उष्णिहा गायत्री चेति, या एता ऐन्द्र्यश्चतस्रः अवशिष्टानां प्रथमेऽहनि प्रयुज्यन्ते तेभ्यो अन्या एवोत्तरेष्वहःसु प्रयोक्तव्याः य आस्तुतं कुर्वते यथा दुग्धामुपसीदेदिति प्रयुक्तं पुनः प्रयोगे निन्दादर्शनात् ॥ ३ ॥

अथ पक्षान्तरं विवक्षुश्छन्दसां योगे पूर्वोक्तदोषमाह।

तदाहुः सꣳशर इव वा एषच्छन्दसां यत् द्वे छन्दसी संयुञ्जन्तीति ॥ ४ ॥

संशीर्य्यते शिथिलीभवत्यनेनेति सꣳशरः यत् द्वे छन्दसी संयुञ्जन्तीति एष छन्दसां संशर इव वै शिथिलीभाव एवेति तत्तस्मिन्विषये ब्रह्मवादिन आहुः ॥ ४ ॥

कथं तर्हि न्यूनाहः पूरणमिति चेत्तत्राह।

चतुरुत्तरैरेवच्छन्दोभिरेतव्यं ॥ ५ ॥

गायत्र्यादिभिर्जगत्यन्तैश्चतुरुत्तरैः पूर्वस्मात्पूर्वस्मात् छन्दसः उत्तरोत्तरं चतुर्भिरक्षरैरधिकैश्छन्दोभिरेतव्यं गायत्रीव्यतिरिक्तानामेव षण्णाञ्चतुरुत्तरत्वं गायत्र्याः प्रथमत्वात् पशूनाञ्चतुष्पात्त्वात्पशुत्वेन स्तुतिः। स्पष्टमन्यत् ॥ ५ ॥

चतुरुत्तरप्रायन्तामिमं पक्षं प्रशंसति।

पशवो वै चतुरुत्तराणिच्छन्दाꣳसि पशुभिरेव तत् स्वर्गं लोकमाक्रममानयन्ति ॥ ६ ॥

चतुरुत्तरेषु छन्दःसु चतुःसङ्ख्यायोगात् पशूनाञ्च चतुष्पात्त्वात् पशुत्वेन स्तुतिः। स्पष्टमन्यत् ॥ ६ ॥

चतुरुत्तरस्य प्रयोगस्य स्थानान्याह।

एकाङ्गायत्रीमेकाहमुपेयुरेकामुष्णिहमेकाहमेकामनुष्टुभमेकाहं बृहत्या पञ्चमास इयुः पङ्क्तिमेकाहमुपेयु-

त्रिष्टुभा षष्ठं मासमीयुः श्वो विषुवान् भवितेति जगतीमुपेयुः ॥ ७ ॥

एकाङ्गायत्रीछन्दसः प्राधान्यादेकवचनं एकङ्गायत्रीतृचं एकाहं एकस्मिन्नहनि आदिभूते चतुर्विंशेऽहनि ब्रह्मसामाश्रयं उपेयुः उपगच्छेयुः कुर्युरित्यर्थः, एवमुत्तरेष्वपि सङ्ख्यैकत्वं द्रष्टव्यं । एकामुष्णिहमेकमौष्णिहं तृचं एकाहं एकस्मिन्नहनिप्रथममासस्य प्रथमस्याभिप्लवस्य प्रथमेऽहनि अभीवर्त्तस्याश्रयत्वेन कुर्युः । तस्यैव द्वितीयेऽहनि एकामनुष्टुभं एकमानुष्टुभं तृचं ब्रह्मसामाधारत्वेनोपेयुः । ततो बृहत्या बार्हतैः प्रगाथैस्तृचैश्च पञ्च मासः पञ्च मासान् प्रथमद्वितीयाभ्यामहोरात्राभ्यां वर्जितान् इयुः प्राप्नुयुः तेषु मासेषु बार्हतेषु तृचेषु च ब्रह्मसामाभिवर्त्तं कुर्युरिति । अस्मिन्नपि पक्षे आभिप्लविकेषु तृतीयेष्वहःसु बार्हतास्तृचामन्यत्र प्रगाथा इति द्रष्टव्यं । एवं पञ्च मासेषु पूर्णेषु द्वौ प्रगाथौ नव तृचाश्च शिष्यन्ते । षष्ठे महाप्रथमाभिप्लवे द्वितीयस्य पञ्चाहे चैतान् प्रयुज्य एकाहमेकस्मिन्नहनि द्वितीयाभिप्लविकस्य षष्ठेऽहनि एकां पङ्क्तिमेकं तृचं ब्रह्मसामार्थमुपेयुः । ततस्त्रैष्टुभेन तृचेन षष्ठं मासं षष्ठमासस्य अवशिष्टानि यान्यभिप्लविकान्यहानि षट्सङ्ख्याकानि यौ च प्रथमद्वितीयौ स्वरसामानौ एतदहरष्टकं उपेयुः, षष्ठमासशब्देन उक्तान्येवाहानि लक्ष्यन्ते, तत्राह श्वो विषुवान् भवितेति जगतीमुपेयुरिति, श्वः विषुवान् भविता भविष्यतीति यत्पूर्वमहस्तृतीयस्वरसामाख्यं तत्र जगतीञ्जागतं तृचं ब्रह्मसामाधारतयोपेयुः॥७॥

इममपि पक्षं निन्दित्वा पक्षान्तरं दर्शयति ।

तदाहुरनवकॢप्तानि वा एतानिच्छन्दाꣳसि मध्यन्दिने बृहत्या चैव त्रिष्टुभा चैतव्यं ॥ ८ ॥

तत्तत्र विषये ब्रह्मवादिन आहुः। एतानि छन्दांसि चतुरुत्तराणि मध्यन्दिने सवने अनवकॢप्तानि अवकॢप्तिसमर्थानि यद्यप्यत्र सप्तानामनवकॢप्तिः समानैवेति प्रतीयते तथापि माध्यन्दिने पवमाने गायत्री बृहतीत्रिष्टुब्व्यतिरिक्तानामेव चतुर्णामनवकॢप्तानामध्ये केन छन्दसैतव्यन्तत्राह, बृहत्या चेति, बार्हतैः प्रगाथैस्तृचैश्च त्रैष्टुभैरेतव्यमित्यर्थः ॥८॥

ननु त्रीणि छन्दाꣳसि मध्यन्दिने अवकॢप्तानि तेषु गायत्रीं परित्यज्य इतरयोर्ग्रहणे किं कारणन्तत्राह ।

एते वै छन्दसी वीर्य्यवती एते प्रत्यक्षं मध्यन्दिनस्य रूपं ॥ ९ ॥

एते वै बृहतीत्रिष्टुभौ छन्दसी वीर्यं वै वीर्यरूपे एव । वीर्यं वै त्रिष्टुबिति श्रुतेः, त्रिष्टुभोवीर्यत्वं बृहत्याश्रयमित्याहुरन्यानि छन्दांसि वर्षीयांसि कस्माद्बृहत्या मध्यन्दिने स्तुवन्तीत्यादिना छन्दोऽन्तरेभ्यो वैषिष्ट्यप्रतीतेर्वीर्यवत्त्वं ननु गायत्र्याश्च सोमाहरणादौ छन्दोऽन्तरेभ्यो वैशिष्ट्यदर्शनात् माध्यन्दिने पवमाने चान्वयित्वात्सापि वीर्यरूपैवेति प्रयोज्या चेत्तेन एते एव बृहतीत्रिष्टुभौ छन्दसी प्रत्यक्षं असाधारणं मध्यन्दिनस्य रूपङ्गायत्री तु त्रिष्वपि मध्यन्दिनेषु प्रयुज्यते इति सवनत्रयसाधारणं त्रिष्टुब्बृहत्योश्च माध्यन्धिन एव प्रयोग इत्यसाधारणम् ॥ २ ॥

किमनयोरनियमेन प्रयोग उत नियमेनेति जिज्ञासायामाह ।

राथन्तरेऽहनि बृहती कार्यैतद्वै रथन्तरस्य स्वमायतनं यद्बृहती स्वएव तदायतने रथन्तरं प्रतितिष्ठति बार्हतेऽहनि त्रिष्टुप् कार्यैतद्वैबृहतः स्वमायतनं यत् त्रिष्टुप् स्वएव तदायतने बृदद्रथन्तरे प्रतितिष्ठन्ती इतः ॥१०॥

चतुर्विंशादिषु यस्मिन्नहनि रथन्तरं प्रयुज्यते तस्मिन्नहनि अभीवर्त्तस्य बहती आश्रयत्वेन कार्य्या बार्हताः प्रगाथा इत्यर्थः, बृहती ति यत् एतद्धि रथन्तरस्यायतनं स्थानम्माध्यन्दिनसवने बृहती पूर्वं प्रयुज्यते अतस्तदायतनत्वं, एवं सति तत्तेन बार्हतेऽहनि बृहत्याः करणेन स्वकीयएव स्थाने रथन्तरं प्रतिष्ठितं भवति उक्तेष्वहःसु अस्मिन्नहनि बृहत्साम प्रयुज्यते तस्मिन्बार्हतेऽहनि त्रिष्टुप् कार्य्या त्रैष्टुभे तृचे अभीवर्त्तो ब्रह्मसाम कर्त्तव्यं बृहत्त्रिष्टुभोर्द्वितीयप्रयोज्यत्वात्त्रिष्टुभो बृहदायतनत्वं तत्तेन त्रिष्टुभः प्रयोगेण बृहत्साम स्वएवायतने प्रतितिष्ठतीति शेषः, अत्रापि त्रैष्टुभबार्हते तृचानां यो यः पूर्वं प्रयुज्यते तत उत्तरमन्योन्य एव उत्तरेष्वहःसु प्रयोक्तव्यः आस्तुतं कुर्वते इति प्रयुक्तस्य पुनः प्रयोगे निन्दाश्रवणात् । एवं व्यवस्था बृहतीत्रिष्टुभोः प्रयोगे क्रियमाणे बृहद्रथन्तरे सामनी प्रतितिष्ठन्तीति शत्रन्तस्य द्विवचनान्तस्य रूपमेतत् स्वे स्वे एवायतने प्रतिष्ठिते सती इतो गच्छतः कृत्स्नमहर्व्याप्नुतः । एतदुक्तं भवति चतुर्विंशेऽहनि वृतेरथन्तरे उभे अपि प्रयुज्येते आभिप्लविकेषु तु प्रथमतृतीयादिष्वयुक्ष्वहःसु रथन्तरं प्रयुज्यते द्वितीयादिषु युग्मेष्वहःसु बृहत्साम अतश्चतुर्विंशेऽहनि प्रथम आभिप्लविके च बृहत्यामभीवर्त्तं कुर्य्यात् द्वितीये त्रिष्टुभि एवमतऊर्द्धं विन्यासेनोभयोश्छन्दसोः प्रयोगः । यद्वा चतुर्विंशे

ऽहनि त्रिष्टुभि अभीवर्त्तः कार्य्यः बार्हतं ह्येतदहः अत ऊर्द्धं बृहती-त्रिष्टुभोः क्रमेण प्रत्यहं विन्यासेन प्रयोग इति। निदानकारस्तु एतत् पक्षद्वयमभिधाय पुनरपि पक्षान्तराण्यभ्यधात् बृहत्या चैतव्यं त्रिष्टुभा चैतव्यमिति प्रतीकमुपादाय त्रिष्टुभि चतुर्विंशोऽभीवर्त्तः कुर्य्यात् बृहत्यां प्रथम आभिप्लविके त्रिष्टुभि द्वितीये एवमनुपूर्व्वं छन्दसोः प्रयोगो भवति तत उर्द्धं विन्यसेत् इत्यादिना तत्सर्वं तत्रैव द्रष्टव्यं, इत्थं त्रयः पक्षा गताः, प्रगाथेषु प्राप्तेषु छन्दसी संयुज्यैतव्यमिति प्रथमः चतुरुत्तरैः छन्दोभिरेतव्यमिति द्वितीयः बृहत्या चैव त्रिष्टुभा चैतव्यमिति तृतीयः ॥ १० ॥

अथान्ये सप्त पक्षाः प्रदर्श्यन्ते।

त्रयस्त्रिंशता प्रगाथैरेतव्यं त्रयस्त्रिंशद्देवता देवतास्वेव प्रतितिष्ठन्तोयन्ति, चतुर्विंशत्यैतव्यं चतुर्विंशतिरर्द्धमासाः संवत्सरः संवत्सर एव प्रतितिष्ठन्तो यन्ति, द्वादशभिरेतव्यं द्वादशमासाः संवत्सरः संवत्सर एव प्रतितिष्ठन्तोयन्ति, षड्भिरेतव्यंषड्वृतव ऋतुष्वेव प्रतितिष्ठन्तोयन्ति, चतुर्भिरेतव्यश्चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठन्तोयन्ति, त्रिभिरेतव्यन्त्रयइमे लोका एष्वेव लोकेषु प्रतितिष्ठन्तोयन्ति, द्वाभ्यामेतव्यन्द्विपाद्यजमानः स्वर्गस्य लोकस्याक्रान्त्या अन्येनान्येन हि पदा पुरुषः प्रतितिष्ठतीति ॥ ११ ॥

चतुर्विंशप्रभृतिषु तृतीयस्वरसामान्तेष्वहःसु त्रयस्त्रिंशता त्रयस्त्रिंशतिसंख्याकैर्बार्हतैः प्रगाथैरेतव्यं आदितस्त्रयस्त्रिंशत्स्वहःसु त्रयस्त्रिंशत्प्रगाथानामभीवर्त्तस्य क्रमेण स्तोत्रीयत्वेन प्रयुज्य पुनरपि तैरेवावृत्तैस्तृतीयस्वरसामान्तं ब्रह्मसाम कर्त्तव्यं तथा सति त्रयस्त्रिंशद्देवता अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रश्च प्रजापतिश्चेति तास्वेव प्रतितिष्ठन्तः सन्तो यजमाना यन्ति एवमुत्तरत्रापि व्याख्येयम ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्यचतुर्थः खण्डः ॥

अथ पञ्चमः खण्डः ।

इत्थं पूर्वस्मिन् *पक्षस्यभीवर्त्तं ब्रह्मसामत्वेन विधाय तत्प्रगाथाश्च निरूपिताः । अथाभिजित् त्रयः स्वरसामानोदिवाकीर्त्यमहस्त्रयः स्वरसमानो विश्वजिदिति नवरात्र इति नवरात्रो विधातव्यः, षष्ठे मासि त्रीनभिप्लवान् एकं पृष्ठञ्च कृत्वा अभिजिदनुष्ठेयः ततस्त्रयः स्वरसामानः ततो विषुवानिति तत्राभिजिद्विषुवतोर्मध्यगतान् स्वरसाम्नो विधत्ते ।

स्वरसामान एते भवन्ति ॥ १ ॥

यज्ञा यथा अपूर्व्वेत्यस्यां योनावुत्पन्नानि चत्वारि स्वरसंज्ञकानि सामानि येषु भवन्ति ते स्वरसामानः तानि चत्वारि आर्भवेषु पवमानेष्वनुष्टुप्सु कर्त्तव्यानि । प्रसुत्वानायान्धस अयं पूषा रयिर्भगः सुतासो मधुमत्तमा इति आनुष्टुभास्तृच एतेषु कर्त्तव्या इति। अपरे तु स्वराणि पृष्ठानीति वर्णयन्ति, तदुक्तं सूत्रकृता स्वरपृष्ठाश्चेत् समसामिकेषु पृष्ठस्तोत्रीयेष्विति । यदि स्वरसामानः स्वरपृष्ठाः स्युस्तदा स्वरसामसम्बन्धिबृहद्रथन्तरपृष्ठस्तोत्रीयेषु कल्पकारोक्तेषु 'यज्ञा यथा अपूर्व्वामत्स्यपायितेमहः प्रत्यस्मै पिपीषत' इत्येतेष्वेव स्वराणि पृष्ठानि कुर्य्यादिति सूत्रार्थः । एवं विधान् स्वरसाम्न अभिजित ऊर्द्धमुपेयुरित्यर्थः । तेषां स्वराख्यानां साम्नां स्वराणि पराणीति च अन्ये द्वे संज्ञे भवतः ॥ १ ॥

तत्र स्वरसंख्यापूर्वकं स्तौति ।

स्वर्भानुर्वा आसुर आदित्यन्तमसाऽविध्यत्तं देवाः स्वरैरस्पृण्वन्यत् स्वरसामानो भवन्त्यादित्यस्य स्पृत्यै॥२॥

आसुरो असुरजातीयः स्वर्भानुर्नाम अन्धकारात्मकः आदित्यं तमसा स्वशरीरभूतेनान्धकारेणाविध्यत् अवाधत आवृतवानित्यर्थः तं आदित्यन्देवाः स्वरैः सामभिः अस्पृण्वन् तस्य तमसोऽपनयनेन अबलयन् स्पृ प्रीतिबलनयोः, बलिनं कृतवन्त इत्यर्थः । तथा सति स्वरसामानो भवन्तीति यत् तत् आदित्यस्य आदित्यात्मना संस्तुतस्य विषुवतः स्पृत्यै बलनाय प्रबलीकरणाय भवति धातूनामनेकार्थत्वात् । स्पृणोती रक्षाकर्मा, देवाः स्वरैः सामभिररक्षन् इदानीमपि सात्रिभिः क्रियमाणानि स्वराणि विषुवदात्मन आदित्यस्य रक्षायै भवन्ति अतः स्व-

* पक्षसीत्यसंस्कृतः पाठः पक्षे इति साधुः इति केचिद्वदन्ति तदसत् अनेकत्र पुस्तकेष्वेवंविधपाठत्वेन पक्षःशब्दस्यापि सम्भवात् ॥

रणसाधनत्वात् एतेषां स्वराणीति संज्ञा सम्पन्ना, तथाच तैत्तिरीयकं यदस्यारणं तत् स्वराणां स्वरत्वमिति ॥ २ ॥

अथैतेषां परसंज्ञान्तद्धेतुकथनेन प्रशंसति ।

परैर्वै देवा आदित्यꣳ स्वर्गं लोकमपारयन्यदपारयꣳस्तत्पराणां परत्वं ॥ ३ ॥

परशब्दाभिधेयैरेतैः स्वरैः देवा आदित्यं स्वर्गं लोकमपारयन् प्रापयन् । स्पष्टमन्यत् ॥ ३ ॥

वेदनं प्रशंसति ।

पारयन्त्येनं पराणि य एवं वेद ॥ ४ ॥

एतत् स्वरसंज्ञायामप्युपलक्षणं स्वराणि पराणीति संज्ञे यः इत्थं वेद एनं वेदितारं स्वर्गं लोकं पारयन्ति सामानि प्रापयन्ति संज्ञावेदनेन स्वर्गप्राप्तिर्भवतीत्यर्थः ॥ ४ ॥

अथैतेषां स्वरसाम्नां स्तोमं विधत्ते ।

सप्तदशा भवन्ति ॥ ५ ॥

सर्वेषु स्तोत्रेषु सप्तदश स्तोमो भवतीत्यर्थः ॥ ५ ॥

तदेतत्प्रशंसति ।

प्रजापति वैं सप्तदशः प्रजापतिमेवोपयन्ति ॥ ६ ॥

संवत्सरो हि प्रजापतिः सप्तदशो भवति द्वादशमासाः पञ्चर्तव इति एवं सति सप्तदश प्रयुञ्जानाः प्रजापतिमेवोपयन्ति ॥ ६ ॥

अनुष्टुप् छन्दसो भवन्त्यानुष्टुभो वै प्रजापतिः साक्षादेव प्रजापतिमारभन्ते ॥ ७ ॥

प्रजापतिः सवनछन्दांसि गायत्र्यादीनि सवनदेवताभ्यो विभज्य अनुष्टुभं स्वं छन्दोऽकल्पयदिति ऐतरेयादिषु श्रवणात् प्रजापतेरानुष्टुभां प्रयोगे सति साक्षात्प्रत्यक्षमेव आरभन्ते अवलम्बन्ते ॥ ७ ॥

एते स्वरसामानः कुत्रानुष्ठेया इति तेषां स्थानमाह ।

त्रयः पुरस्तात् त्रयः परस्ताद्भवन्ति ॥ ८ ॥

विषुवतः पुरस्तादभिजितऊर्ध्वमुपेतव्याः परस्ताद्विषुवतऊर्ध्वं विश्वजितः प्राक् एतएव प्रतिलोममनुष्ठेया भवेयुः ॥ ८ ॥

अथैतान् प्रशंसति ।

देवा वा आदित्यस्य स्वर्गाल्लोकादवपादादबिभयु-

स्तमेतैः स्तोमैः सप्तदशैरदृंहन्यदेते स्तोमाभवन्त्यादित्यस्य धृत्यै ॥ ९ ॥

देवाः पुरा आदित्यस्य स्वर्गाल्लोकादवपादात् अधःपतनात् अबिभयुर्भीता आसन् तमादित्यमेतैः स्तोमैः सप्तदशकैः स्वरसामभिः अभितः स्थितैः अदृंहन् अदृढयन् यदेते स्तोमाः स्तोमयुक्ताः स्वरसामानोऽभितो भवन्ति तदादित्यस्य धृत्यै धारणाय स्थैर्याय भवन्ति ॥९॥

प्रकारान्तरेण प्रशंसति ।

चतुस्त्रिंशा भवन्ति वर्ष्म वै चतुस्त्रिंशो वर्ष्मणैवैनꣳ सम्मिमते ॥ १० ॥

तेषु स्वरसामसु प्रयुज्यमानाः सप्तदश स्तोमाः द्वौ द्वौ सम्पद्य चतुस्त्रिंशा भवन्ति चतुस्त्रिंशच्च वर्ष्म वै उच्छ्रितं स्थानं वर्ष्म तद्रूपः खलु । ननु यत्र षड्विंश एव स्तोमानि त्रिवृदाद्यपेक्षया उच्छ्रितस्थानगताः न चतुस्त्रिंशाः कथन्तस्योच्छ्रितस्थानत्वं, नैषदोषः, त्रयस्त्रिंश एव एकाधिकश्चतुस्त्रिंशो भवतीति तदुपपत्तेः, एवं सति वर्ष्मणा उच्छ्रितेन स्थानेन सहैव एनमादित्यं विषुवदात्मकं सम्मिमते सत्रिणः स्थापयन्ति स्वरसामभ्यः पुरस्तादभिजित्कार्य्यः आवृत्तेभ्यस्तेभ्य ऊर्द्धं विश्वजित् तयोर्विधिरर्थवादेनोन्नेय इति ॥ १० ॥

तस्य पराचीनातिपादादबिभयुस्तꣳसर्व्वैः स्तोमैः पर्य्यार्षन्विश्वजिदभिजिद्भ्यां वीर्य्यं वा एतौ स्तोमौ वीर्य्येणैव तदादित्यं पर्य्युषन्ति धृत्यै ॥ ११ ॥

तस्यादित्यस्य पराचीनातिपादात्पराचीनेन अनाभिमुख्येन अतिपादादत्यूर्द्धगमनात् शङ्कमानात् अबिभयुः भीता देवाः तं सर्व्वैः स्तोमैस्त्रिवृदादिभिस्त्रयस्त्रिंशान्तैः पर्य्यार्षन् परिगता आसन् ऋषी गतौ, परितोदृष्टीश्चक्रुरित्यर्थः । कथं विश्वजिदभिजिद् भ्यां सर्वस्तोमाभ्यामूर्द्धं विश्वजिता अधस्तादभिजितेत्यर्थः, वीर्य्यं वा एतौ स्तोमौ स्तोमवन्तौ विश्वजिदभिजितौ यदेतौ भवतः तत्तेन वीर्य्येणैव आदित्यं विषुवदाख्यं पर्य्युषन्ति सत्रिणः परिगच्छन्ति दृढीकुर्व्वन्ति किमर्थं धृत्यै स्थिरत्वाय ॥ ११ ॥

अथ विश्वजिदभिजिद्भ्यां कृतैषा धृतिः आदित्यात्मना संस्तुतस्य विषुवतः अनवपादायानतिपादाय न भवतीत्युक्तं उपसंहरति ।

अनवपादायानतिपादाय ॥ १२ ॥

एवं स्वरसाम्ना विश्वजिदभिजितोश्च प्रयोगेण धृतत्वात् आदित्यात्मनो विष्णुवतोऽधः पतनमूर्द्धगमनञ्च न भवतीत्यर्थः॥ १२॥

तदेवं षष्ठे मासि त्रयोऽभिप्लवाः षडहाः पृष्ठ्यः षडह अभिजित स्वरसामान इत्यनुपूर्व्वं कर्त्तव्या इत्युक्तं तत्र कश्चिद्दोषमाशङ्क्य पक्षान्तरमुपन्यस्यति।

तदाहुः कर्त्तप्रस्कन्द इव वा एष यत् त्रयस्त्रिंशत सप्तदशमुपयन्तीति पृष्ठ्योन्तरः कार्य्यः॥ १३॥

तत्र विषये ब्रह्मवादिन आहुः, किमिति अभिजितो ह्यग्निष्टोमसाम त्रयस्त्रिंशस्तोमकं तदनन्तरं यत् सप्तदशं स्तोमं स्वरसाम प्रापयन्ति एषः कर्त्तप्रस्कन्द इव वै कर्त्तै अवरे प्रपात इव भवति उभयोर्मध्ये त्रिणवैकविंशौ विद्यमानावतिक्रम्य अवाचीने सप्तदशे प्रवृत्तिरिति तस्य दोषस्यायं परिहारः। अभिजित् स्वरसाम्नोर्मध्ये पृष्ठ्यः षडहः अन्तरः मध्यतः कार्य्यः॥ १३॥

ननु तत्रापि पृष्ठ्यस्य यत् षड्हस्तस्मात् त्रयस्त्रिंशमुपेत इति उक्तदोषोऽपरिहृतो भवति तत्राह।

तस्य यत्सप्तदशमहस्तदुत्तमं कार्यꣳसलोमत्वाय॥१४॥

तस्य पृष्ठ्यषड्हस्य सप्तदशं तृतीयमहस्तदुत्तमं पृष्ठं कार्यं तथा सति सप्तदशात् सप्तदशमुपेतो भवति तत् सलोमत्वाय अनुरूपत्वाय भवति। एतदेव शाट्यायनमुनिभिर्विस्पष्टमाम्नातं, तदाहुः स्तोमत्वं सत्रमिव वा एतत् स्तोमोयन्ति यत्रयस्त्रिंशत सप्तदशमुपयन्तीति। पुरस्तादेव पृष्ठस्य षड्हस्याभिजितमुपेत्य पृष्ठस्यैव षड्हस्य तस्य यन्मध्ये सप्तदशस्तदुपरिष्टात् त्रयस्त्रिंशस्य पर्य्यहेयुः तत्सप्तदशात् सप्तदशमुपयन्ति॥ १४॥

समात्समं स्तोमकृत् तत्र स्तोमा यन्तीति तमिमं पक्षं निरस्यति।

तदाहुरुदरं वा एष स्तोमानां यत् सप्तदशो यत् सप्तदशम्मध्यतो निर्हरेयुरशनायवः प्रजाः स्युरशनायवः सत्रिणः॥ १५॥

तत्रान्ये ब्रह्मवादिन आहुः। स्तोमानां मध्ये सप्तदश इति यत् एषयज्ञस्योदरं वै उदरस्थानीयः अतो यत् यदि सप्तदशं मध्यतः षड्हस्य मध्यात् निर्हरेयुः बहिः कुर्युः अन्नाद्यस्थानस्योदरस्य निर्हाराच्च देशवर्त्तिन्यः प्रजाः अशनायवो बुभुक्षिताः क्षुधार्त्ताः स्युर्भवेयुः ततः सत्रिणोपि अशनायवो भवेयुरिति॥ १५॥

कथं तत्र कर्त्तव्यमिति तदाह ।

त्रयस्त्रिंशादेव सप्तदश उपेत्यो वर्ष्म वै त्रयस्त्रिंशो वर्ष्म सप्तदशो वर्ष्मण एव तद्वर्ष्माभिसंक्रामन्ति॥१६॥

त्रयस्त्रिंशात् स्तोमात् पूर्व्वेद्युः क्रियमाणादेव अनन्तरं सप्तदश एव स्तोम उपेत्यः उपगन्तव्यः । नन्वेवं सति कर्त्तृप्रस्कन्दलक्षणो दोष उक्त इति चेत् मैवं, त्रयस्त्रिंशः स्तोमो वर्ष्म अधिकसंख्यत्वात् श्रेष्ठः खलु सप्तदशोपि प्रधानभूतानां पृष्ठस्तोत्राणां निर्वर्त्तकत्वात् वर्ष्म श्रेष्ठः । एवं सति यत् त्रयस्त्रिंशात्सप्तदशमुपयान्ति तद्वर्ष्मण एव श्रेष्ठादेव वर्ष्म श्रेष्ठमभिसंक्रामन्ति अतः सदृशात्सदृशसंक्रान्तेः कर्त्तृप्रस्कन्दलक्षणो दोषो न भवतीत्यर्थः ॥ १६ ॥

अथैतेषां स्वरसाम्नां संख्यानिर्णयाय ब्रह्मवादिनां विचारं दर्शयति ।

तानाहुरुक्थाः कार्य्या३ अग्निष्टोमा३ इति यदुक्थाः स्युः ॥ १७ ॥

केषुचिद् ब्राह्मणेषु स्वरसाम्नां उक्थत्वं श्रुतं केषुचिदग्निष्टोमत्वं तदुभयदर्शनात् संशये ब्रह्मवादिभिर्विचार्य्यते तान् स्वरसाम्नोऽधिकृत्यैवमाहुः किमुच्यते उक्थसंस्थाः कार्य्याः उताग्निष्टोमसंस्था इति विचार्यमाणानामिति वाक्यद्वये प्लुतिः ॥ १७ ॥

उक्थत्वपक्षे तावदयं गुणइत्याह ।

पशवो वा उक्थानि शान्तिः पशवः शान्तेनैव तद्विषुवन्तमुपयन्ति ॥ १८ ॥

तदुक्थाः स्युः स्वरसामानः तदा शान्तेनैव कर्म्मणा विषुवन्तं आदित्यात्मना संस्तुतमुपयन्ति परितापाभावायेति शेषः कथमुक्थस्य शान्तत्वमुच्यते पशवो वा उक्थानि तत्साधनत्वात् शान्तिश्च पशवः पशुप्रभावेन क्षीरादिनोत्पाद्यत्वात् अत उक्थस्य शान्तत्वम् ॥ १८ ॥

अग्निष्टोमाख्यं विधास्यन्निमं पक्षन्दूषयति ।

तदाहुर्विवीवधमिव वा एतद्यदग्निष्टोमो विषुवानग्निष्टोमौ विश्वजिदभिजितावथेतर उक्थाः स्युरिति ॥१९॥

तत् स्वरसामविषये ब्रह्मवादिन आहुः । उभयतः शिक्यगतभारद्वयोपेतं स्कन्धेन वोढव्यं काष्ठं वीवधं विषमं वीवधं विवीवधं तदिव ह्येतत् यत्त्वविषुवान् विश्वजिदभिजिताविति त्रयोऽग्निष्टोमाः अथेतरे स्वरसामान उक्थाः स्युः अग्निष्टोमानां द्वादशस्तोत्रशस्त्रत्वादल्पत्वं उ-

कथानां पञ्चदशस्तोत्रशस्त्रत्वाद्गुरुत्वं न हि गुरुलघू भारौ वीवधेन वोढुं शक्यौ अतो वैषम्यादेतदवीवधम् ॥ १९ ॥

अग्निष्टोमा एव सर्व्वे कार्य्याः ॥ २० ॥

सर्व्वेपि स्वरसामानोऽग्निष्टोमसंस्था एव कार्य्याः ॥ २० ॥

अथैतत्प्रशंसति ।

वीर्य्यं वा अग्निष्टोमो वीर्य्य एव मध्यतः प्रतितिष्ठन्ति नव संस्तुता भवन्ति नव प्राणाः प्राणेष्वेव प्रतितिष्ठन्ति ॥ २१ ॥

योऽयमग्निष्टोमः स वीर्य्यं वै सर्व्वप्रकृतित्वाद्वीर्य्यरूप एव तथा सति स्वरसाम्नोऽग्निष्टोमसंस्थान् कुर्व्वन्तः सत्रिणः मध्यतो गवामयनस्य मध्ये वीर्य्यएव प्रतितिष्ठन्ति किञ्च संस्तुता एते षट् स्वरसामानो भवन्ति नवसंख्यायाविभागे समाप्यन्ते तथाहि एकैकमहर्द्वादशस्तोत्रं सर्व्वेषु च स्तोत्रेषु सप्तदश एव स्तोमः तत्रैकस्मिन्नहनि चतुराधिकद्विशतस्तोत्रीया भवन्ति एवं षट्सु स्वरसामसु ससहस्रं चतुर्व्विंशत्युत्तरद्विशतञ्च स्तोत्रीया भवन्ति ताश्च षट्त्रिंशदधिकशतं नवका भवन्ति किमतो भवति उच्यते नवसंख्या हि पुरुषे प्राणाः सप्त शीर्षण्याः द्वावधाश्चाविति तथा सति नवसंख्याकेषु प्राणेष्वेव सत्रिणः प्रतिष्ठिता भवन्ति दीर्घायुषोभवन्तीत्यर्थः ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

गवामयनस्य मध्यवर्त्तिनि नवरात्रे अष्टावहान्युक्तानि अथ पूर्वोत्तरयोः पक्षसोर्मध्येऽनुष्ठेयं गवामयनस्य प्रधानभूतं विषुवदाख्यमहः प्रदर्शयति ।

विषुवानेष भवति ॥ १ ॥

एष विषुवान् संवत्सरस्य सत्रस्य मध्यतो भवति ॥ १ ॥

अथेमं स्तौति ।

देवलोको वा एष यद्विषुवान्देवलोकमेव तदभ्यारोहन्ति ॥ २ ॥

यत् यो विषुवान् एष देवलोको वै देवानां लोकः स्थानभूत आदित्यात्मको हि विषुवान् तत्तेन विषुवतः प्रयोगेण देवलोकमेव यजमाना अभ्यारोहन्ति ॥ २ ॥

अथ तस्मिन्नहनि स्तोमं विधत्ते ।

एकविंशो भवत्येकविंशो वा अस्य भुवनस्यादित्य आदित्यलोकमेव तदभ्यारोहन्ति ॥ ३ ॥

तस्मिन्नहनि सर्व्वेषु स्तोत्रेष्वेकविंश एव स्तोमो भवति । अस्य भुवनस्य लोकस्य आदित्य एकविंशो वै अत आदित्यात्मकस्य विषुवत एकविंशस्तोमत्वमुचितं एकविंशस्तोममुपयन्तीति यत् तेन आदित्यलोकमेवाभ्यारोहन्ति ॥ ३ ॥

कथमादित्यस्यैतल्लोकापेक्षयैकविंशत्वमिति तत् दर्शयति ।

द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंशः ॥ ४ ॥

हेमन्तशिशिरयोः समासेनैकत्वात् ऋतूनां पञ्चसंख्या ॥ ४ ॥

एकविंशस्तोमप्रयुक्तं फलं दर्शयति ।

मध्यत एव यज्ञस्य प्रतितिष्ठन्ति ॥ ५ ॥

एकविंशो वै स्तोमानां प्रतिष्ठा अतो यज्ञस्य संवत्सरसत्रस्य मध्यतोमध्य एवास्मिंलोके प्रतितिष्ठन्ति यद्वा द्वादशमासाइत्यादिना ये अनुक्रान्ता एषु सर्व्वेषु प्रतितिष्ठन्ति, तथाच शाट्यायनकं, एकविंशो विषुवान् भवति एकविंशो वा अस्य भुवनस्य विषुवान् द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंशः सर्वस्मिन्वा एषोतिप्रतिष्ठितः यद्यस्मिन्नेष सर्व्वस्मिन्नधिप्रतितिष्ठन्तीति तस्मिन् सर्व्वस्मिन्नधिप्रतिष्ठामेति ॥ ५ ॥

अस्मिन्नहनि बहिष्पवमानस्य प्रतिपदं विधत्ते ।

वायो शुक्रो अयामिति शुक्रवती प्रतिपद्भवत्यादित्यस्य रूपं ॥ ६ ॥

प्रतिपदिति प्रथमस्तृच उच्यते अयन्तृचो विषुवति बहिष्पवमानस्य प्रतिपद्भवति प्रतिपच्छब्दस्य स्त्रीलिङ्गत्वात् शुक्रवती स्त्रीलिङ्गता भास्वरवाचकशुक्रशब्दोपेतत्वात् एष आदित्यस्य रूपं आदित्यात्मकस्य विषुवतोऽनुरूपं ॥ ६ ॥

ननु सर्वेष्वहःसु पावमान्या गायत्र्या हि प्रतिपदा भाव्यं, तत्र कस्माद्वायवित्यनुष्टुप् विधीयत इति तत्राह ।

वायुर्व्वा एतन्देवतानामानशेऽनुष्टुप् छन्दसां यदतोन्या प्रतिपत् स्यात्प्रदहेत् ॥ ७ ॥

देवतानां देवानां मध्ये वायुरेवैनमादित्यमानशे व्याप्नोति, छन्दसाम्मध्ये अनुष्टुबेनमानशे नान्यच्छन्दः यद्यपि अतो वायव्याया अन्या अन्यदेवत्या प्रतिपत्स्यात् तदा यजमानान् प्रदहेत् ॥ ७ ॥

अथैतां वायव्यां प्रशंसति ।

यन्ति वा एते प्राणादित्याहुर्यं गायत्र्याः प्रतिपदो यन्तीति यद्वायव्या भवन्ति तेन प्राणान्न यन्ति प्राणोहि वायुः ॥ ८ ॥

ये यजमानाः गायत्र्याः प्रतिपदो यन्ति अपगच्छन्ति गायत्रीप्रतिपदं न प्रयुञ्जते एते प्राणापानव्यानरूपेण गायत्रीसंस्तुतान् प्राणादेव यन्त्यपगच्छन्तीति अत एते प्राणविरहात् सद्यएव म्रियेरन् इति ब्रह्मवादिन आहुः, तत्रायं परिहारः वायव्या वायुदैवत्या प्रतिपद्भवतीति यत् तेन प्राणान्न यन्ति नापगच्छन्त । तत्कुतो हेतोः प्राणो हि वायुरतस्तद्देवत्यया प्राणलाभोयुक्त एवेत्यर्थः ॥ ८ ॥

अथानया अपरोपि गुणो भवतीत्याह ।

अथो शमयन्त्येवैनमेतया शान्तिर्हि वायुः ॥ ९ ॥

अथो अपिच एनं तपन्तमादित्यं एतया वायव्या शमयन्त्येव वायुः शान्तिर्हि तापशान्तिकरो भवति ॥ ९ ॥

पवमानस्तोत्रस्य सोमदैवत्यत्वात् वायव्यानुपपन्नेत्याशङ्क्याह—

आयाहि सोमपीतय इति सौमी पावमानी ॥१०॥

वायो शुक्रो अयामित इत्यस्यामृचि अनेन तृतीयपादेन सोमकीर्त्तनात् सोम एव पवमानो भवति । एषां सौमी पावमानी च भवति अत उपपन्नैषा पवमानस्तोत्रे ॥ १० ॥

तथैषा शान्तिहेतुश्चेति प्रशंसति—

नियुत्वती भवति पशवो वै नियुतः शान्तिः पशवः शान्तेनैव तदादित्यमुपयन्ति ॥ ११ ॥

स्पार्हो देव नियुत्वतेति नियुच्छब्दोऽस्यां दृश्यते, नियुतश्च वायवोहि वडवास्ताश्च पशवः पशवश्च शान्तिरूपाः एवञ्च नियुत्वती एषा प्रतिपद्भवतीति यत् तेन शान्तेनैवानुष्ठानेन आदित्यप्रदाहाय ॥११॥

अथास्मिन्नहनि सामानि विधत्ते—

दिवाकीर्त्यसामा भवति ॥ १२ ॥

दिवाकीर्त्यानि सुक्रियाणि सामानि अस्मिन् प्रयुञ्जन्त इति दिवा-

कीर्त्यसामा । अयं विषुवान् दिवाकीर्त्यसामा कार्य्यः । कानि पुनस्तानि दिवाकीर्त्यानि, भ्राजाभ्राजे इत्यादिना अग्रे वक्ष्यमाणानि ॥ १२ ॥

अथैतद्दिवाकीर्त्यसामत्वं प्रशंसति—

स्वर्भानुर्वा आसुर आदित्यन्तमसाविध्यत्तस्य देवा दिवाकीर्त्यैस्तमोऽपाघ्नन्यद्दिवाकीर्त्यानि भवन्ति तमएवास्मादपघ्नन्ति रश्मयो वा एत आदित्यस्य यद्दिवाकीर्त्यानि रश्मिभिरेव तदादित्यं साक्षादारभन्ते ॥१३॥

आसुरेण स्वर्भानुना तमसा विद्धस्यादित्यस्य बाधकं तमोऽन्धकारं देवा दिवाकीर्त्यैः सामभिरपाघ्नन् व्यनाशयन् अतो यद्दिवाकीर्त्यान्यस्मिन् भवन्ति तेन तम एवास्मादादित्यादपघ्नन्ति । कथमेषां साम्नां तमसो हननसामर्थ्यमिति चेत् उच्यते, दिवाकीर्त्यसामानीति यत् एते आदित्यस्य रश्मयो वै रश्मिरूपा एव अत एषां युक्तमेव तमसो नाशकत्वं तत्तथा सति रश्मिभिरेवादित्यं साक्षात् प्रत्यक्षमारभन्ते, ये सत्रिणो विषुवति दिवाकीर्त्यानि प्रयुञ्जत इत्यर्थः ॥ १३ ॥

दिवाकीर्त्यसामभिस्तमसोऽपहननं सामान्येनोक्तं तदेव विवृणोति—

भ्राजाभ्राजे पवमानमुखे भवतो मुखत एवास्य ताभ्यां तमोऽपघ्नन्ति ॥ १४ ॥

पवमानमुखे मध्यन्दिनार्भवयोः पवमानयोर्मुखे प्रमुखे भ्राजाभ्राजे सामनी भवतः । गायत्रस्य नित्यत्वात् ततः परस्तात् क्रमेण भवत इत्यर्थः । अस्य प्रत्नामनुद्युतमिति तृचे गातव्यं साम भ्राजं तन्माध्यन्दिने पवमाने मुखे । परिस्वानो गिरिष्ठा इत्यस्मिन्यत्साम आभ्राजं तदार्भवपवमानमुखे । यद्यप्यत्र पवमानमुख इति सामान्यसम्बन्धएव दृश्यते ये गायत्रे ते गायत्रीपूत्तरयोः पवमानयोरिति विशेषावगतेरेवं व्याख्यातं, स्पष्टमन्यत् । अनेन भ्राजाभ्राजयोः साम्नोः स्थाननियमोऽर्थादुक्तोभवति ॥ १४ ॥

तथान्येषामपि त्रयाणां साम्नां स्थानविशेषं प्रदर्शयन् पूर्वोक्तं तमोऽपहननमेव तत्साध्यं प्रदर्शयति—

महादिवाकीर्त्यश्च विवर्कणश्च मध्यतो भवतो मध्यतएवास्य ताभ्यां तमोऽपघ्नन्ति भासमन्ततो भवति पक्षएवास्य तेन तमोऽपघ्नन्ति ॥ १५ ॥

विभ्राड् बृहत्पिबतु सोम्यंमध्वित्ति तृचे जागते गेयं साम महादिवा-

कीर्त्यं । इन्द्र क्रतुन्न आभरेति प्रगाथे गेयं विकर्णम् । एते सामनी मध्यतोऽस्य विषुवतो मध्ये पृष्ठस्तोत्रेषु भवतः । महादिवाकीर्त्यं होतृसाम इतरद् ब्रह्मसाम । तथाच तैत्तिरीयकं, महादिवाकीर्त्यं होतुः पृष्ठं विकर्णं ब्रह्मसामेति । एवं सति ताभ्यामस्यादित्यस्य मध्यतो मध्यदेशात् एव तमो विनाशयन्ति । तथा अन्ततोऽन्तेऽवसाने भासमग्निष्टोमसाम कार्य्यम् प्रत्यक्षस्येत्यस्यामृच्युत्पन्नं दशस्तोभं साम भासं तन्मूर्द्धानम् इति तृचेऽत्र गातव्यम् । तेनान्ततः क्रियमाणेनैव भासेन पक्षतः पादप्रदेशादेव तमोऽपघ्नन्ति ॥ १५ ॥

अग्निष्टोमसामत्वेन विहितं भासं प्रशंसति—

दशस्तोभं भवति दशाक्षरा विराड् विराज्येव प्रतितिष्ठन्ति ॥ १६ ॥

इदं भासं दशस्तोभं भवति आद्यन्तयोः प्रयुज्यमाना हाउहावादयो भासान्ता दशस्तोभास्तैर्युक्तमेतत् । विराट् दशाक्षरा सा चान्नरूपा "अन्नं वै विराडि"ति श्रुतेः । तथा सति दशस्तोभेन साम्ना विराज्येव सत्रिणः प्रतिष्ठिता भवन्ति ॥ १६ ॥

भासस्य स्तोत्रियद्वारेण स्तुतिं चिकीर्षुः कश्चित्प्रश्नमुपक्षिपति—

यत्त्वित्याहुः षड्भिरितो मासैरध्वानं यन्ति षड्भिः पुनरायन्ति क्व तर्हि स्वर्गो लोको यस्य कामाय सत्रमासत इति ॥ १७ ॥

इतोऽस्माल्लोकात् षड्भिः पूर्वपक्षसि भवैर्मासैः अध्वानमेव यन्ति स्वर्गप्राप्तिसाधनमार्गमेव यन्ति । पुनरुत्तरपक्षैः षड्भिः मासैरायन्ति इममेव लोकं प्रत्यागच्छन्ति । तर्हि तथा सति स्वर्गोलोकः क्व भवति ? यस्य स्वर्गस्य कामाय काममाप्तुम् इमे यजमानाः सत्रमासत इति। यत्तु यत् खल्वाहुः कथयन्ति ब्रह्मवादिनः ॥ १७ ॥

तत्रेदमुत्तरमाह—

मूर्द्धानन्दिव इति स्वर्गं लोकमारभन्ते ॥ १८ ॥

विषुवतोऽग्निष्टोमसाम्नि मूर्द्धानन्दिव इति स्वर्गलोकवाचकशब्दप्रयोगात् प्रयोगफलभूतं स्वर्गं लोकमारभन्ते प्राप्नुवन्ति ॥ १८ ॥

तर्हि व्याप्तत्वात् सत्रावसानएव म्रियेरन् तत्राह—

अरतिं पृथिव्या इत्यस्मिँल्लोके प्रतितिष्ठन्ति ॥ १९ ॥

अत्र पृथिव्या इति कीर्त्तनात् एषामस्मिँल्लोके प्रतिष्ठा भवतीत्यर्थः॥१९॥

अथ तस्यैतस्य स्तोत्रीयस्य तृचो विषुवतो रूपमित्याह—

वैश्वानरमृतआजातमग्निमिति विषुवत एव तद्रूपं क्रियते ॥ २० ॥

ऋतमित्यादित्यनाम विषुवानप्यादित्यसंस्तुतः । अत ऋतशब्दस्य कीर्त्तनं विषुवतोरूपमित्यर्थः । इत्थं प्रथमायाः स्तोत्रीयायाः पादद्वयेन प्रशंसा कृता ॥ २० ॥

अथ तृतीयपादे अतिथिशब्देनान्नाद्यप्राप्तिर्भवतीत्याह—

कविꣳसम्राजमतिथिञ्जनानामित्यन्नाद्यमेवोपयन्ति॥२१॥

अतिथिर्ह्यन्नेन तर्पणीयः । अतस्तद्वाचकेनातिथिशब्देन तत्सम्बन्धिनोऽन्नस्य प्रतीतेः । सत्रिणोऽन्नाद्यमेवोपगच्छन्ति ॥ २१ ॥

चतुर्थपादे जनयन्तेति पदप्रयोगेण फलं दर्शयति—

आसन्नापात्रञ्जनयन्त देवा इति जायन्त एव ॥ २२ ॥

जनिधातोः प्रयोगात् विशिष्टेन संस्कृतरूपेण पुत्रपौत्रादिना वा जायन्त एवैते ॥ २२ ॥

विहितमहः प्रशंसति—

तात्रिष्टुब्जगतीषु भवति त्रैष्टुब्जागतो वा आदित्यो यदतोऽन्यासु स्यादेव स्वर्गाल्लोकात्पर्य्यरन् ॥ २३ ॥

तदेतद्विषुवदहस्त्रिष्टुब्जगतीषु च भवति । अत्र चाहःशब्दपरामर्शकेन तच्छब्देन तस्मिन् प्रधानभूते पृष्ठस्तोत्रमग्निष्टोमेति तदेतत्त्रिष्टुब्जगतीषु कर्त्तव्यं, पृष्ठं हि महादिवाकीर्त्यं तद्विभ्राड्बृहदिति जागते तृचे गातव्यं मूर्द्धानमिति तृचे त्रैष्टुभे अग्निष्टोमसाम भासं कार्य्यं तच्छब्देन प्रकृतं भासमेवैकं साम परामृश्यते । तत् त्रिष्टुब्जगतीषु त्रैष्टुभजागतरूपयुक्तासु कार्यं, तथा हि मूर्द्धानं दिवोऽरतिं पृथिव्या इत्यस्मिन्नग्न इत्यत्र विश्वा इति ऋचो व्यूहेन द्वादशाक्षरत्वात् एषा जागतरूपा स्वतस्त्रिष्टुप्त्वादेव त्रैष्टुभरूपाऽपि तिस्रोपि ऋचः त्रिष्टुब्जगत्यो भवन्ति निदाने त्वेतद्वाक्यमुदाहृत्य त्रिष्टुब्जगतीष्विति पदं बहुधा व्याख्यातं तत्सर्व्वमनुसन्धेयम्, आदित्यश्च त्रैष्टुब्जागतः कथं 'गायत्रो वा अयं लोकः त्रैष्टुभोऽन्तरिक्षलोकः जागतोऽसौ लोकः दिवश्चान्तरिक्षस्य मध्ये सञ्चरतीत्यादित्यस्त्रैष्टुब्जागतो भवति विषुवांश्चादित्यस्तुतः । अतो विषुवतोऽग्निष्टोमस्य साम त्रैष्टुब्जागतमेव स्यादित्यर्थः । ननु शाट्यायनकादिषु अनुष्टुप्सु भासं कार्य्यमिति दृश्यते तत्कथं त्रिष्टुब्जगतीष्विति चेत् नैवम्, अतस्त्रिष्टुब्जगतीभ्यामन्यासु अन्यच्छन्द-

स्कासु यद्यदि भासं स्यात् स्वर्गाल्लोकादवपद्येरन् अधः पतेयुः सत्रिणः ॥ २३ ॥

तथा प्रकारान्तरेण एता ऋचः प्रशंसति—

सम्राड्वतीषु भवति साम्राज्यं वै स्वर्गो लोकः स्वर्ग एव लोके प्रतितिष्ठन्ति ॥ २४ ॥

सम्राट्शब्दवतीषु ऋक्षु भासमग्निष्टोमसाम भवति यत् स्वर्गस्तत् साम्राज्यं वै साम्राज्यम् ईश्वरस्य कर्म्माख्यं तथा सति कर्मि सम्राजमिति सम्राट् शब्दप्रयोगात् साम्राज्ये स्वर्गलोके प्रतिष्ठिता भवन्ति॥२४॥

इति ताण्डयमहाब्राह्मणे चतुर्थाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

"पुर्वमवादिष्म इन्द्र क्रतुन्न आभर" इत्यस्मिन् प्रगाथे विषुवति विकर्णे ब्रह्म साम कार्य्यमिति तं प्रगाथं माध्यन्दिने पवमाने अभीवर्त्ताख्यं साम च विधास्यन्नाह—

आत्मा वा एष संवत्सरस्य यद्विषुवान् पक्षावेतावभितो भवतो येन चेतोऽभीवर्त्तेन यन्ति यश्च परस्तात्प्रगाथो भवति तावुभौ विषुवति कार्य्यौ पक्षावेव तद्यज्ञस्यात्मन् प्रतिदधति स्वर्गस्य लोकस्य समष्टयै ॥ १ ॥

यत् यो विषुवान् एष सव्वँत्सरसत्रस्य गवामयनस्यात्मा मध्यमौ द्वौ षण्मासौ एतौ विषुवन्तमभितः क्रियमाणौ पक्षावेव भवतः । तत्र पूर्वस्मिन् पक्षसि येनाभीवर्त्तेन यन्ति यश्च परस्तादुत्तरस्मिन् पक्षसि "इन्द्र क्रतुमि"ति प्रगाथो भवति एतौ विषुवतः पक्षभूतौ । अतो विषुवति कार्य्यौ । प्रगाथे विकर्णादयः कार्य्याः । अभीवर्तश्च माध्यन्दिने पवमाने कार्यः । एतत्तैनतयोः करणेन यज्ञस्य गवामयनस्यात्मनि पक्षौ प्रतिदधति यजमानाः । एतच्च पक्षयोःप्रतिनिधानं स्वर्गस्य लोकस्य समष्टयै सम्यक् प्रतिकल्पते पक्षवाह्नि पतितुं शक्नोति ॥ १ ॥

कोऽसौ प्रगाथ उत्तरपक्षे यो यस्मिन् विकर्णे भवति तमाह—

"इन्द्रक्रतुन्न आभरे"ति प्रगाथो भवति ॥ २ ॥

स्पष्टोऽर्थः ॥ २ ॥

अस्य प्रगाथस्य प्रयोगः प्रजातिहेतुरित्याख्यानमुखेन दर्शयति—

वसिष्ठो वा एतं पुत्रहतोऽपश्यत् स प्रजया पशुभिः प्राजायत यदेष प्रगाथो भवति प्रजात्यै ॥ ३ ॥

पुत्रहतो हतपुत्रः सौदास अग्नौ प्रक्षेपात् शक्त्याख्ये पुत्रे हते इमं प्रगाथं वसिष्ठोऽपश्यत् स तेन प्रगाथेन प्रजया च पशुभिश्च प्राजायत यदेष प्रगाथो भवति गवामयने तत् सत्रिणां प्रजात्यै पुत्रादिरूपेण यजमानाय भवति ॥ ३ ॥

अस्मिन् प्रगाथे "जीवा ज्योतिरशीमही"ति जीवनप्रतिपादनात् संवत्सरस्य क्षेमेण सन्तरणमेव प्रार्थ्यमित्याह—

जीवा ज्योतिरशीमहीति ये वै स्वस्ति सवँत्सरꣳ सन्तरन्ति ते जीवा ज्योतिरश्नुवते ॥ ४ ॥

ये खलु यजमानाः स्वस्ति खलु क्रमेण संवत्सरं सन्तरन्ति ते जीवाः जीवन्तः सन्तो ज्योतिरश्नुवते एतत्पादेन जीवतामेव सतां संवत्सरसत्रसम्पूर्त्या तेजसः प्राप्तिर्भवतीत्यर्थः ॥ ४ ॥

तथास्मिन् प्रगाथे विद्यमानं दुराध्य इति पदं व्याचष्टे—

माना अज्ञाता व्वृजना दुराध्यो माशिवासोऽवक्रमुरिति ये वै स्तेना रिपवस्ते दुराध्यस्तानेव तदतिक्रामन्ति ॥ ५ ॥

स्तेनाः तस्करा रिपवो बाधकाश्चेति दुराध्यः दुष्टाध्यानाः तानेव तत्तेन पदाऽतिक्रामन्ति अशिवासोऽशिवकरा "अस्मात् प्रचिक्रमिषुरि"ति मन्त्रवर्णात् । उत्तरग्रन्थे ऋचः सर्वा व्याख्याता अस्माभिरिति पुनरत्र न व्याख्यायन्ते ॥ ५ ॥

पुनरपि प्रगाथशेषमुदाहृत्य प्रशंसति—

त्वया व्वयं प्रवतः शश्वतीरपोऽति शूर तराम सोऽतिसवँत्सरो वै प्रवतः शश्वतीरपस्तमेव तत्तरन्ति॥६॥

शश्वतीः बह्वीः प्रवतः प्रवणगामिनीः । अपोऽतितराम इति अतितरणं श्रूयते । अत्र प्रवतः शश्वतीरप इति त्रिभिरपि शब्दैर्बह्वनुष्ठानेन दुस्तरत्वात् संवत्सर एवोच्यते एतत् एतेन प्रार्थनेन तं संवत्सरमेव यजमानास्तरन्ति ॥ ६ ॥

अथोत्तरस्मिन् पक्षेऽसि विकल्पे त्रयः "प्रगाथाः इन्द्रक्रतुमि"त्यस्य स्थाने कर्त्तव्या इत्युपन्यस्यति—

अद्याद्याश्वः श्वस्त्वामिदा ह्यो नरो वयमेनमिदा ह्य इति सन्ततयः प्रगाथा भवन्ति तेषामेकः कार्य्यः सलोमत्वाय श्वस्तनमेवाभिसन्तन्वन्ति ॥ ७ ॥

एषु प्रगाथेषु अद्याद्या श्वः श्वः। इदानीमिदानीं ह्यः पूर्व्वेद्युरिति अहर्द्वयसम्बन्धदर्शनात् एते प्रगाथाः सन्ततयः सन्तानस्य अहर्द्वयसम्बन्धस्य बाधका भवन्ति। अत उत्तरस्मिन् पक्षसि तेषामेकः प्रगाथः कार्यः। सच सलोमत्वायानुलोमनाय भवति। एवं कुर्व्वन्तो यजमानाः श्वस्तनम् आगाम्यहरेव वर्त्तमानेनाह्ना अभिसन्तन्वन्ति सन्ततं सम्बन्धं कुर्व्वन्ति ॥ ७ ॥

इमं पक्षं निरस्य पूर्व्वोक्तमेव प्रगाथं विदधाति—

अथो खल्वाहुरिन्द्र क्रतुन्न आभरेत्येव कार्य्यꣳ समृद्ध्यै ॥ ८ ॥

अथो खल्विति पक्षान्तरपरिग्रहे। समृद्ध्यै समृद्ध्यर्थमिन्द्र क्रतुन्न आभरेत्येव प्रगाथं कार्यमित्याहुर्ब्रह्मवादिनः। वसिष्ठो वा एतं पुत्रहतम् इत्यादिना समृद्धिहेतुत्वं चास्योक्तम् ॥ ८ ॥

अथोत्तरस्मिन् पक्षसि अहःकल्पं विदधाति—

प्रत्यवरोहिणो मासा भवन्ति ॥ ९ ॥

पूर्वस्मिन् पक्षसि ये मासा अनुक्रान्तास्ते उत्तरस्मिन् पक्षसि प्रत्यवरोहिणः कार्याः प्रथमं तावत् स्वरसामानः तृतीयो द्वितीयः प्रथम इति क्रमेण प्रथममनुष्टुभः पृष्ठ्यश्च त्रयस्त्रिंशारम्भणस्त्रिवृदुक्षतः कार्य्यः। अभिप्लवा अपि प्रतिलोमा भवेयुः ॥ ९ ॥

यथा वा इतो वृक्षꣳरोहन्त्येवमेनं प्रत्यवरोहन्ति स्वर्गमेव तल्लोकꣳरूढ्वास्मिँल्लोके प्रतितिष्ठन्ति ॥ १० ॥

यथा खलु लोके पुरुषा इतो मूलादारभ्य उन्नतं वृक्षं रोहन्ति रूढ्वा च पुनरग्रादारभ्य मूलमवरोहन्ति एवमेव तत् षड्भिर्मासैरारुह्य एनं यज्ञं यजमानाः प्रत्यवरोहन्ति तत्तेनारोहावरोहयोः करणेन स्वर्गमेव लोकं रूढ्वा षड्भिः मासैरारुह्य पुनः षड्भिर्मासैरवरोहणेनास्मिँल्लोके प्रतिष्ठिता भवन्ति ॥ १० ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य सप्तमः खण्डः।

अथ अष्टमः खण्डः।

एवमुत्तरस्मिन् पक्षसि स्वरसामप्रभृति प्रत्यवरोहणमासानुपयन्ति उत्तरे मासि त्रीनभिप्लवान् कुर्य्युः। ततो गोआयुषी द्वे अहनी कर्त्तव्ये तत्र विधीयते—

गौश्चायुश्च स्तोमौ भवतः॥ १॥

गोष्टोम आयुष्टोमश्चेति द्वे अहनी उक्थसंस्थे कर्त्तव्ये॥ १॥

अनयोर्द्वित्वसङ्ख्यां प्रशंसति—

द्विपाद्यजमानः प्रतिष्ठित्यै॥ २॥

यस्मादिमौ गोष्टोमायुष्टोमौ द्वौ। अतो द्विपाद् यजमानः प्रतिष्ठित्यै प्रतिष्ठानाय भवति॥ २॥

स्तोत्रीयासंख्याद्वारेणैतौ प्रशंसति—

ऊनातिरिक्तौ भवत ऊनातिरिक्तं वा अनु प्रजाः प्रजायन्ते प्रजात्यै॥ ३॥

तत्र गोष्टोमस्य पञ्चदशं बहिष्पवमानं त्रिवृदाज्यानि सप्तदशं माध्यन्दिनं सवनम् एकचत्वारिंशदधिकद्विशताः स्तोत्रीया भवन्ति। आयुष्टोमस्य तु त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि शेषं गोष्टोमवदिति स्तोमकल्पौ सत्येकोनषष्ठ्यधिकद्विशतस्तोत्रीया भवन्ति। उभयत्र दशसंख्यया विराट्संपादने सति एतौ गोष्टोमायुष्टोमौ ऊनातिरिक्तौ भवतः। गोष्टोम एकया स्तोत्रीययातिरिक्त इतरश्चैकया न्यूनः कियतो भवति उच्यते 'ऊनं वातिरिक्तं यदाहि पुंसो हि वीर्य्यमतिरिक्तं स्त्रिया न्यूनमथवा स्त्रिया अतिरिक्तं पुंसो न्यूनम्, एतदूनातिरिक्तं युगलमनुलक्ष्य ईदृशे युगले प्रजाः प्रजायन्ते स्त्रीपुंसरूपा उत्पद्यन्ते। यदा तु स्त्रीपुंसयोरपि वीर्य्यं समं भवति तदा नपुंसकमेव जायते। उक्तं हि 'पुमान् पुंसोधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः, तथाच यास्कः, "शुक्रातिरेके पुमान् भवति, शोणितातिरेके स्त्री भवति, द्वाभ्यां समेन नपुंसको भवती"ति। एवं न्यूनातिरिक्तं करणं सन्तिनां प्रजात्यै पुत्रादिरूपेण प्रजननाय भवति॥ ३॥

अथैतौ संयुज्य स्तौति—

वैराजो भवतोऽन्नं ह्विराडन्नाद्य एव प्रतितिष्ठन्ति॥ ४॥

एतौ गोष्टोमायुष्टोमौ वैराजौ विराजमभिसम्पन्नौ भवतः 'दशाक्षरा ह्विराडि'ति श्रुतेः। दशसंख्यया अनयोः स्तोत्रीयाणां विभागे सति विराट्संपत्तेर्वैराजत्वं, स्पष्टमन्यत्॥ ४॥

इत्थमुत्तरस्मिन् पक्षे षष्ठे मासि त्रिंशत्संख्यान्यहानि विहितानि तत ऊर्द्धं द्वादशाहस्य मध्यतो यो दशरात्रः स कर्त्तव्य इति विदधाति—

द्वादशाहस्य दशाहानि भवन्ति ॥ ५ ॥

प्रायणीयोदयनीयौ मुक्त्वा यानि मध्ये दशाहानि तानि कर्त्तव्यानीत्यर्थः ॥ ५ ॥

अथैतानि स्तौति—

विरड्वा एषा समृद्धा यद्दशाहानि विराज्येव समृद्धायां प्रतितिष्ठन्ति ॥ ६ ॥

सर्वस्तोमसर्वपृष्ठसंयोगात् एषा समृद्धा विराट् यत् यान्येतानि दशाहानि तेन विराज्येव समृद्धायां सत्रिणः प्रतिष्ठिता भवन्ति ॥६॥

अथ विहितानि दशाहान्यवयुज्य स्तौति—

पृष्ठानि भवन्ति वीर्यं वै पृष्ठानि वीर्य एव प्रतितिष्ठन्ति छन्दोमा भवन्ति पशवो वै छन्दोमाः पशुष्वेव प्रतितिष्ठन्त्यथैतद्दशममहरासस्तोममासच्छन्दआसविभक्तिकमनिरुक्तं प्राजापत्यम् ॥ ७ ॥

पृष्ठ्य षडहे क्रमेण रथन्तरबृहद्वैरूपवैराजशाक्ररैवतानि सामानि पृष्ठानि पृष्ठस्तोत्रनिर्वाहकाणि भवन्ति तानि च सर्वसाधकत्वाद्वीर्यमित्युच्यते तथा सति वीर्य्यएव प्रतितिष्ठन्ति षड्हानन्तरं त्रयश्छन्दोमा भवन्ति ते च पशुसाधनत्वात् पशवो वै तदनुष्ठानेन पशुष्वेव प्रातितिष्ठन्ति । अथ छन्दोमानन्तरं एतद्दशममहरविवाक्यनामकं भवति तदेवाहरासस्तोमादि विशेषणैर्विशेष्यते एकोहि गणो द्वादशाहिको दशरात्रः तत्र पूर्वेष्वहस्सु त्रिवृदादयोऽष्टाचत्वारिंशान्ताः स्तोमाः क्रमेण प्रयुज्यमाना आप्यन्ते समाप्यन्त इत्यासस्तोमकमेतत् । तथा आसच्छन्दविभक्तयश्च सः तं तेन तस्मै तस्मात् तस्य तस्मिन्निति सप्त आमन्त्रितविभक्तरष्टमी ताश्च पूर्वेष्वेवाहस्सु समाप्ता इति । इदमहरासावभक्तिकमनिरुक्तं देवतावाचिनः पदस्य पृष्ठस्तोत्रे अभावादनिरुक्तम् अत्र हि 'कयानश्चित्र आभुवदि'ति कवतीषु रथन्तरं पृष्ठस्तोत्रस्य चेन्द्रो देवता सा चात्र न निरुच्यते। आज्येष्वपि 'यदद्य सूर उदित' इति तृचस्योक्ते अनिरुक्ते 'उत्वा मन्दन्वि'ति तृचस्याद्ये अनिरुक्ते इत्येवम् अस्मिन्नहनि अनिरुक्तदेवता द्रष्टव्या अत एवैतदहः प्राजापत्यम् 'अनिरुक्तः प्रजापतिरि'तिश्रुतेः, अतएवङ्गुणविशिष्टमहः सत्रिणां फलावाप्त्यै सम्पद्यत इत्यर्थः ॥ ७ ॥

अथैतस्मिन् दशमेऽहनि किञ्चिद्धर्म्मं विधत्ते—

यदध्याहुरति तद्रेचयन्ति तस्मान्न व्युच्यम् ॥ ८ ॥

अस्मिन्नहनि यत् यदध्याहुः विब्रुवन्ति । अज्ञानं संशितुं, शंसयितुं चानुष्ठेयं पदार्थं स्तुतशस्त्रादिषु तादृशं शब्दं वा इदमेतेनायथाकृतम् इदमेतेन यथोक्तमिति क्रियमाणविरोधिवचनं यदि कुर्वन्ति विभक्तारः । (तद् तदाऽतिरेचयन्ति कर्मातिरेकमवगमय्य दूषयन्ति,) तस्मात् न व्युच्यम् अस्मिन्नहनि विरुद्धवचनं न कर्त्तव्यम् अविवाक्यमहरिति ह्येतदाचक्षते ॥ ८ ॥

अथास्मिन्नहनि अनुष्टुप्छन्दसः प्रयोगं परोक्षेण विधत्ते—

परोक्षमनुष्टुभमुपयन्ति प्रजापतिर्वा अनुष्टुप् यत् प्रत्यक्षमुपेयुः प्रजापतिमृच्छेयुः ॥ ९ ॥

आनुष्टुभं छन्दः परोक्षम् अप्रत्यक्षमुपयन्ति उपेयुः कुर्य्युः । अष्टाक्षरैश्चतुर्भिः पादैः प्रत्यक्षमनुष्टुप् भवति अतोऽन्या द्वात्रिंशदक्षरा परोक्षानुष्टुप् सैवास्मिन्नहनि कार्य्या न प्रत्यक्षा आर्भवे श्यावाश्वान्धीगवे अनुष्टुप्सु प्रकृतौ भवतः ते एव पर्यूषु प्रधन्वेति पिपीलिकमध्यासु कार्य्ये इति ईदृशमनुष्टुभं परोक्षमुपयन्त्यतिरेके निन्दामुखेन पुरोच्यते । यदिदमनुष्टुप्छन्दः स प्रजापतिर्वै तदीयत्वात् तद्रूप एव तदीयत्वञ्च पूर्वमेवोक्तम् एवं सति यत् यदि प्रत्यक्षमनुष्टुभमुपेयुः प्रजापतिमृच्छेयुः प्राप्नुयुः सत्रान्तरे अस्माल्लोकात्प्रच्युता भवेयुरित्यर्थः । इह लोके चिरं स्थित्वा देहान्ते प्रजापतेः सायुज्यं सत्रिभिः काम्यते ॥ ९ ॥

अथैतस्याह्नोऽग्निन्नरोदीधितिभिररण्योरिति विराडाग्निष्टोमसाम वामदेव्यं त्रयस्त्रिंशस्तोमकं कार्य्यमिति विधित्सुरर्थवादेनैतद्विधिमुन्नयति—

यो वै सत्रस्य सद्वेद सद्भवति वामदेव्यं वै साम्नाꣳसदग्निर्देवतानां विराट् छन्दसान्त्रयस्त्रिꣳशः स्तोमानां तान्येव तदेकधा संभृत्योत्तिष्ठन्ति ॥ १० ॥

यः खलु सत्रस्य सत् सारं वेद । ससत् सारभूतः श्रेष्ठः स्वानां भवति। किं तत् सत्रस्य सारमित्युच्यते-साम्नां मध्ये वामदेव्यं वामदेवेन दृष्टं साम सत् सत्रसम्बन्धि सत्रात्मकं, देवानां मध्ये अग्निः, छन्दसां मध्ये विराट्, स्तोमानां मध्ये त्रयस्त्रिंशः, एवं सति वामदेव्यादीन्येकधा सम्भृत्योत्तिष्ठन्ति सत्रादुत्थिता भवन्ति । आग्नेयीषु विराट्सु वामदेव्यमग्निष्टोमं त्रयस्त्रिंशस्तोमकं कुर्य्युरित्यर्थः ॥ १० ॥

अथ वामदेव्यस्तुत्यर्थं ब्रह्मवादिनां विचारं दर्शयति—

ब्रह्मवादिनो वदन्ति यतः सत्रादुदस्थाताऽस्थिताऽदिति ॥ ११ ॥

यतो गच्छतः सत्रात् किमेते सत्रिण उदस्थाता उत्तिष्ठन्ति उत स्थितात् सत्रादिति ब्रह्मवादिन आहुः । उभयत्र विचार्यमाणानामिति प्लुतिः, तिष्ठतेर्लुङ्लङिति वर्त्तमाने लुङ् प्रत्ययेन मध्यमः ॥ ११ ॥

तत्र केचन यतः सत्रादुत्तिष्ठन्ति केचित् स्थितादिति तदुभयं विविच्य दर्शयन् फलमपि तयोः दर्शयति—

ये रथन्तरेण स्तुत्वोत्तिष्ठन्ति ते यत उत्तिष्ठन्ति तान् ब्रूयादप्रतिष्ठाना भविष्यन्तीति ये बृहता स्तुत्वोत्तिष्ठन्ति ते स्थितादुत्तिष्ठन्ति तान् ब्रूयात् स्थायुकैषाꣳश्रीर्भविष्यति न वसीयाꣳसो भविष्यन्तीति ॥ १२ ॥

ये रथन्तरमग्निष्टोमसाम कृत्वा तेन स्तुत्वोत्तिष्ठन्ति ते यतो यतः गच्छतः सत्रात् उत्तिष्ठन्ति । रथन्तरं हि माध्यन्दिने सवने बृहतः पूर्वं प्रयुज्यते तस्मिन् समये गच्छत्येव यज्ञो न समाप्यत इति गच्छत एव सत्रादुत्तिष्ठन्ति तान्यदि कश्चिद् ब्रूयात् अप्रतिष्ठानाः प्रतिष्ठाराहिताः एते सत्रिणो भविष्यन्ति तथैव तेषां फलं स्यादिति शेषः । ये बृहदग्निष्टोमसाम कृत्वा तेन स्तुत्वोत्तिष्ठन्ति रथन्तरप्रयोगावस्थायां बृहता स्थितत्वात् ते स्थितादेव सत्रादुत्तिष्ठन्ति तान्यदि कश्चिद् ब्रूयात् स्थायुका स्थितिशीलास्य श्रीर्भविष्यति नोत्तरोत्तरं वर्द्धते अतो न वसीयांसः श्रेयांसो भविष्यन्तीति तदपि फलं तथैव स्यादित्यर्थः । तस्मादुभयमग्निष्टोमसाम न कार्यमित्युक्तं भवति अतो वामदेव्येन स्तुत्वोत्थेयमिति ॥ १२ ॥

पूर्वोक्तमेव पक्षे निगमयति—

ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ते सतः सदभ्युत्तिष्ठन्ति पूर्णात्पूर्णमायतनादायतनमन्तरिक्षायतना हि प्रजा ॥ १३ ॥

ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ते सतः सारात् सारमभिलक्ष्योत्तिष्ठन्ति वामदेव्यादिकात् पूर्वोक्तात् सतः सारात् उत्तिष्ठन्तः सत्फलं लभन्त इत्यर्थः । तथा पूर्णाच्चास्मादुत्तिष्ठन्तः पूर्णफलं प्राप्नुवन्ति तथा 'अन्तरिक्षं वै वामदेव्यमि'ति श्रुतेर्वामदेव्यमन्तरिक्षात्मकमायतनं

प्रजाश्चान्तरिक्षायतना अवकाशमन्तरेण सञ्चरणानुपपत्तेस्तासां तदायतनत्वं तथा सति आयतनभूतादू वामदेव्यादुत्तिष्ठन्त आयतनं प्रजानामायतनं स्थानम् अन्तरिक्षात्मकम् अभिलक्ष्योत्तिष्ठन्ति प्रजानामायतनत्वं लभन्त इत्यर्थः ॥ १३ ॥

अथ स्तोत्रीयाक्षरसंख्यया प्रशंसति—

त्रयस्त्रिंशदक्षरासु भवति त्रयस्त्रिंशद्देवतास्वेव प्रतिष्ठायोत्तिष्ठन्ति ॥ १४ ॥

"अग्निं नर" इत्याद्यासु त्रयस्त्रिंशदक्षरासु वामदेव्यं भवति । देवतासु त्रयस्त्रिंशत्, तथा सति स्तोत्रीयाक्षरसंख्यया देवतास्वेव प्रतिष्ठायोत्तिष्ठन्ति ॥ १४ ॥

अथ वामदेव्यं बहुधा प्रशंसति—

प्राजापत्यं वै ख्वामदेव्यं प्रजापतावेव प्रतिष्ठायोत्तिष्ठन्ति पशवो वै ख्वामदेव्यं पशुष्वेव प्रतिष्ठायोत्तिष्ठन्ति ॥ १५ ॥

वामदेव्यं हि कयानश्चित्र इत्यनिरुक्तदेवतायां तस्यामृच्युत्पन्नमनिरुक्ता च प्राजापत्या अतस्तत्रोत्पन्नं वामदेव्यमिति प्राजापत्यमित्युच्यते पशुसाधनत्वात् शान्तिहेतुत्वाच्च वामदेव्यस्य तच्छन्दत्वं, स्पष्टमन्यत् ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अहर्गणेष्वन्त्यान्यहान्युदवसनीयान्तानि पत्नीसंयाजान्तानीतराणि अस्मिन् दशमेऽहनि पत्नीसंयाजेभ्य ऊर्ध्वमपि मानसस्तोत्रादयः केचित् धर्मा अनुष्ठेयाः । तानत्र विधास्यन् आदावाहवनीयोपस्थानं विधत्ते—

पत्नीः संयाज्य प्राञ्च उदेत्यायꣳसहस्रमानव इत्यतिच्छन्दसाऽऽहवनीयमुपतिष्ठन्ते ॥ १ ॥

पत्नीसंयाजान् कृत्वा प्राञ्चः प्राङ्मुखाउदेत्य प्राग्वंशान्निर्गम्य मानसेन स्तोष्यतः 'अयꣳसहस्रमानव' इति अतिच्छन्दसा अतिच्छन्दस्यृचि गीतेन गोरिति निधनवता उद्गातारः अय आहवनीयमुपतिष्ठन्ते । नन्वत्रातिच्छन्दसेति ऋच एव करणता श्रूयते न साम्नः, अतः कथं साम्नोपस्थानमुच्यते, यस्मात् सूत्रकारएवमुक्तवान् आहवनीयं गत्वाऽयꣳसहो हा-

इति त्रिरुद्गाता गायेन्निधनमितरावनूपेयाताम्इति, अतः साम्नैवोपस्थानमवगम्यते इति गानविशिष्टयैवर्चोपस्थानं, पत्नीसंयाज्येति क्त्वाप्रत्ययश्च पूर्वकालतामात्रेण समानकर्तृकत्वेऽपि, उद्गातृणां पत्नीसंयाजेन सम्बन्धाभावात् ॥ १ ॥

एतदतिच्छन्दसोपस्थानं स्तौति—

इमे वै लोका अतिच्छन्दा एष्वेव लोकेषु प्रतितिष्ठन्ति ॥ २ ॥

गायत्र्यादीनां छन्दसां भूराद्येकैकलोकसम्बन्धिनामतिच्छन्दास्तु इमे त्रय एव लोकाः तत्र गायत्रीत्रिष्टुब्जगतीनामन्तर्भावित्वात् । अतस्तत्करणकोपस्थानेन एष्वेव भूरादिलोकेषु सत्रिणः प्रतितिष्ठन्तीति॥२

तदीयं निधनमनूद्य प्रशंसति—

गोरिति निधनं भवति विराजो वा एतद्रूपं यद्गौर्विराज्येव प्रतितिष्ठन्ति ॥ ३ ॥

यत् एतद्विराट्छन्दसोरूपं गौः । गोमान् हि लोके विराजति यद्वा गोप्रभवं यदेतत् क्षीरादिकमेतत् विराड'न्नं वै विराडि'ति श्रुतेः, अतोऽनेन विधानेन अन्नरूपे विराज्येव प्रतितिष्ठन्ति ॥ ३ ॥

अथ मानसं स्तोत्रं विधत्ते—

प्रत्यञ्चः प्रपद्य सार्पराज्ञ्या ऋग्भिः स्तुवन्ति ॥ ४ ॥

आहवनीये यत् प्रत्यञ्चः प्रत्यङ्मुखाः सदः प्रपद्य सार्पराज्ञ्या सर्पराज्ञी ब्रह्मवादिनी तया दृष्टाभिः ऋग्भिः 'आयङ्गौः पृश्निरक्रमीदि'त्यादिभिः स्तुवन्ति । आसु गायत्रसाम्ना स्तुवन्तीत्यर्थः ॥ ४ ॥

अथैताः प्रशंसति—

अर्बुदः सर्प एताभिर्म्मृतान्त्वचमपाहत मृतामेवैताभिस्त्वचमपघ्नते ॥ ५ ॥

अर्बुदो नाम कादृवेयः । एताभिः ऋग्भिर्म्मृतां शीर्णान्त्वचमपाहत अपागमयत् सत्रिणोप्येताभिर्म्मृतां पापात्मिकान्त्वचरूपामपघ्नते अपगमयन्ति ॥ ५ ॥

प्रतिष्ठाहेतवश्चैता इति प्रशंसति—

इयं वै सार्पराज्ञ्यस्यामेव प्रतितिष्ठन्ति ॥ ६ ॥

इयं वै दृश्यमाना भूमिः सार्पराज्ञी सर्पणशीलानां प्राणिनामीश्वरी ये तु तद्दृष्टाभिः ऋग्भिः स्तुवन्ति ते चास्यामेव भूमौ प्रतितिष्ठन्ति॥६॥

अस्य च स्तोत्रस्य त्रिक एव स्तोम इति तत्संख्यया प्रशंसति—

तिसृभिः स्तुवन्ति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठन्ति ॥ ७ ॥

स्तोत्रीयासु त्रिसंख्यायोगात् त्रिष्वपि लोकेषु प्रतितिष्ठन्तीत्यर्थः ॥७॥

अध्वर्य्युणा स्तोत्रोपाकरणं मनसा कर्त्तव्यमिति विधत्ते—

मनसोपावर्त्तयति ॥ ८ ॥

असर्ज्जसर्ज्जीत्यादिकमुपावर्त्तध्वमित्यन्तं स्तोत्रोपाकरणं मन्त्रम्मनसा जपेदित्यर्थः ॥ ८ ॥

तथोद्गातृणामपि हिङ्कारप्रस्तावादिकमपि मनसैव कर्त्तव्यमिति विधत्ते—

मनसा हिङ्करोति मनसा प्रस्तौति मनसोद्गायति मनसा प्रतिहरति मनसा निधनमुपयन्त्यसमाप्तस्य समाप्त्यै ॥ ९ ॥

"सर्वे निधनम्" इति वचनादत्र निधनमुपयन्तीति बहुवचनम् एतच्च मनसा करणं यज्ञे यत्किञ्चिदसमाप्तमनुष्ठानेनानवाप्तमस्ति तस्य सर्वस्य समाप्त्यै समापनाय भवति ॥ ९ ॥

असमाप्तसमापनं लोके प्रसिद्धमित्याह—

यद्वै वाचा न समाप्नुवन्ति मनसा तत्समापयन्ति ॥ १० ॥

यत् खलु वाचा वाक्येन लौकिकाः पुरुषाः समाप्तुं न शक्नुवन्ति मनसैव तत्समापयन्ति ॥ १० ॥

स्तोत्रस्थानस्य परिश्रयणं विधत्ते—

परिश्रिते स्तुवन्ति ब्रह्मणः परिगृहीत्यै ॥ ११ ॥

परिश्रिते कटादिभिरावेष्टिते स्थाने स्तुयुः । तच्च परिश्रयणं ब्रह्मणः स्तोत्रात्मकस्य परिगृहीत्यै परिग्रहणाय बहिर्गमनाभावाय भवति ॥११॥

अथ ब्रह्मोद्यं विधत्ते—

ब्रह्मोद्यवँदन्ति ब्रह्मवर्चस एव प्रतितिष्ठन्ति ॥ १२ ॥

अथ सूत्रकारः गायत्रीं त्रिर्ब्रूयुरिति धानञ्जय्यश्चतुर्होतारमभिप्रत्येतदिति गौतमः, तर्के वा कथयेयुर्यथाश्वत्रिरात्र इति पाण्डिः, तत्सवितुर्वरेण्यमित्येषा गायत्री साक्षाद्ब्रह्मणः प्रतिपादिका तस्यास्त्रिर्वचनं ब्रह्मोद्यमिति धानञ्जय्यस्य मतम्। चित्तिस्रुक् चित्तमाज्यमित्यादिकाः पञ्चानुवाकाः चतुर्होतारोऽध्वर्य्युभिः समाम्नाताः तेषामाद्यं स्तुत्यनुशंसनाय होता व्याचक्षत इति विधास्यते तदेवाख्यानं ब्रह्मोद्यमिति गौतमः, यथा

त्रिरात्रेऽश्वमेधे वादिप्रतिवादिरूपेण तर्के प्रश्नप्रतिवचने कुर्वन्ति 'किंस्विदासीदि'त्यादिभिर्मन्त्रैस्तथैवात्रापि कर्त्तव्यमिति शाण्डिल्यः, एवं ब्रह्मवादे कृते सति ब्रह्मवर्च्चस एव यजमानाः प्रतितिष्ठन्ति ॥ १२ ॥

स्तोत्रानुशंसनार्थं होतुश्चतुर्होतृमन्त्रं विधत्ते—

चतुर्होतारꣳ होता व्याचष्टे स्तुतमेव तदनुशꣳसति नहि तत् स्तुतं यदननुशस्तम् ॥ १३ ॥

मानसस्तोत्रानन्तरं स्तोत्रीया ऋचो मनसा शस्त्वा चतुर्होतृणामाद्यश्चित्तिसृगित्यनुवाकं व्याचक्षीत । व्याख्यानमध्वर्य्युस्वरेण कथनं तत्तेन व्याख्यानेन स्तुतस्य स्तोत्रस्यानुशंसनं कृतं भवति । यद्यपि स्तोत्रीयाभिरेव अनुशंसनं कृतं तथापि ताः पराच्यः शस्यन्त इति नैतावता स्तोमाभिशंसनं निष्पद्यते तदर्थमेव तद्व्याख्यानमित्यर्थः, अनुशंसनाभावे कृतमपि स्तोत्रमकृतसमं स्यादित्ययमर्थो नहि तदित्यादिनोच्यते ॥१३॥

अथ प्रजापतिपरिवादः कर्त्तव्य इति विधत्ते—

प्रजापतिं परिवदन्त्याप्त्वैवैनं तद्व्याचक्षते तावदापामैनमिति ॥ १४ ॥

हे प्रजापते त्वं दुर्लभः दुराराध्यश्च तथापि त्वां दशमेनाह्ना गृहीतवन्तः क्वेदानीं गमिष्यसीत्येवं परिवादं कुर्य्युरित्यर्थः, यद्वा श्रुत्यन्तरप्रसिद्धोऽकुशलोवाऽयं प्रजापतिः यो दंशमशकान् असृजत् यस्तेनानित्यादिकम्, अथ वा "प्रजापतिर्वै स्वां दुहितरमभ्यधावदि"त्यादिकं यत्पापं कर्म्म तस्य कीर्त्तनं परिवादः, तथा च सूत्रितं 'प्रजापतिं परिवदन्ति पापैः कर्मभिरित्येके नत्वधीमहे, अपि वाध्वर्य्युवह्वृचानां न किञ्चित्स्यादि'ति किमर्थः प्रजापतेः परिवादः? उच्यते यथा महारण्ये मत्तगजमुपायेन गृहीत्वा सन्तुष्टाः परिवदन्ति क्वेदानीं दुर्ग्रहो मूढचारी दुश्चरित्रः त्वं गमिष्यसीति परिवदन्ति एवमेव प्रजापतिं प्रत्यक्षत उपलभ्य हर्षातिशयेन परिवादः क्रियते तदेतदुच्यते, एनं प्रजापतिं वयन्तावदापाम प्राप्तवन्त इति बुद्ध्वा एनं प्रजापतिमाप्त्वैव प्राप्यैव तद्व्याचक्षते तस्य भर्त्सनाय प्रजापतिकृतं तत् पापकर्म्म कथयन्ति ॥ १४ ॥

अथ गृहपतिकर्त्तृकमौदुम्बरीधारणं विधत्ते—

गृहपतिरौदुम्बरीं धारयति गृहपतिर्वा ऊर्ज्जो यन्तोर्जमेवैभ्यो यच्छति ॥ १५ ॥

सत्रिणां मध्ये यो गृहपतिरसावौदुम्बरीं सदसो मध्ये निखातां धारयति समन्वारभत आनक्षत्रदर्शनात् नोत्सृजेत्, ऊर्ज्जा ऊदुम्बर

इतिश्रुतेः' ऊर्ग्वैवौदुम्बरी, गृहपतिः खलु ऊर्जोऽन्नस्य यन्ता नियन्ता प्रदातेत्यर्थः। तस्मादौदुम्बरीधारणेन ऊर्जमन्नमेव एभ्यः सत्रिभ्यो यच्छति ददाति ॥ १५ ॥

अथ सर्वेषां वाग्यमनं विधत्ते—

वाचं यच्छन्ति ॥ १६ ॥

आनक्षत्रदर्शनादेतद्वाग्यमनम् ॥ १६ ॥

अथैतत् स्तौति—

दुग्धानीव वै तर्हि छन्दाꣳसि यातयामान्यन्तगतानि तान्येव तद्रसेनाप्याययन्ति ॥ १७ ॥

तर्हि तस्मिन् काले पूर्वेष्वहःसु दुग्धानि इव वै दुग्धान्येव छन्दांसि अतोऽन्तगतानि यातयामानि गतरसानि तत्तथा सति अनेन वाग्यमनेन तान्येव छन्दांसि रसेनाप्याययन्ति पुनः सारयुक्तानि कुर्वन्ति ॥ १७ ॥

प्रकारान्तरेण स्तौति—

अथो श्वस्तनमेवाभिसन्तन्वन्ति ॥ १८ ॥

अथो अपि च श्वस्तनं परस्मिन् दिवसे कर्त्तव्यं कर्मैवाभिलक्ष्य वाचं सन्तन्वन्ति श्वस्तने कर्मणि वाचा निष्पाद्यं स्तुतशस्त्रादिकं कुर्वन्ति वाग्यमनेन सम्पादयन्तीत्यर्थः ॥ १८ ॥

अथ गवामयनस्य सत्रत्वेनादक्षिणत्वादक्षिणाभावाद्यं स्तुतशस्त्रादिकं कुर्वन्ति कृतं वा समृद्ध्यभावमाशंक्य तां सम्पादयति—

आत्मदक्षिणं वा एतद्यत्सत्रम् ॥ १९ ॥

आत्मैव दक्षिणा यस्य तादृशमेव तत् यदेतत्सत्रं सत्रयागः। न यज्ञान्तरवत् गवादिदक्षिणमतो दक्षिणासद्भावात् समृद्धिरस्त्येवेत्यर्थः ॥१९॥

एतत् स्तौति—

यदा वै पुरुष आत्मनोऽवद्यति यं कामं कामयते तमभ्यश्नुते ॥ २० ॥

यदा खलु पुरुष आत्मनः स्वशरीरात् अवद्यति देवेभ्यः प्रदातुं, तदा यं कामं कामयते तमभिप्राप्नोति ॥ २० ॥

आत्मनोऽवदानप्रकारं दर्शयति—

द्राभ्यां लोमावद्यति द्राभ्यां त्वचं द्राभ्यां माꣳसं द्राभ्यामस्थि द्राभ्यां मज्जानं द्राभ्यां पीवश्च लोहितश्च ॥२१॥

सञ्चँत्सरसत्रस्य आदितो द्राभ्याम्मासाभ्यामात्मनः सम्बन्धि यल्लोम शरीरगतं लोम तदवद्यति देवेभ्यो दातुं स्वशरीरात् पृथक् करोति,

द्वाभ्यां लोमान्तर्गतां त्वचमवद्यति, अथ द्वाभ्यान्त्वगन्तर्गतं मांसमवद्यति, पुनर्द्वाभ्यां मांसान्तर्गतमस्थ्यवद्यति, ततो द्वाभ्यामज्ञानमस्थ्यन्तर्गतमज्ञाख्यं रसमवद्यति, पुनरन्याभ्यां मासाभ्यामवशिष्टं पीवो मेदो लोहितञ्चावद्यति, एवं द्वादशभिर्म्मासैः पुरुष आत्मानमेव कृत्स्नमवदाय देवेभ्यो दत्तवान् भवति किमत्र बाह्यया दक्षिणयेति आत्मदक्षिणं सत्रमित्युक्तम् ॥ २१ ॥

अथ सत्रिणां सशिखं वपनं विधत्ते—

शिखा अनु प्रवपन्ते पाप्मानमेव तदपघ्नते लघीयाꣳसः स्वर्गं लोकमयामेति ॥ २२ ॥

सर्वे सत्रिणः शिखाः शिरसि विद्यमानान् सर्वान् केशान् अनुक्रमेण दीक्षानुपूर्व्या प्रवपन्ते प्रकर्षेण वापयेयुः, तत्तेन वपनेन पाप्मानमेवापघ्नते अपहतपाप्मानो भवन्ति, सशिखं वपनं कुर्वतः कोऽभिप्राय ? इति चेत् लघीयांसो लघुतमाः केशभाररहित्येन स्वर्गोत्पतनाय लघुतमगात्राः सन्तः स्वर्गं लोकमयाम प्राप्नुवामेति ॥ २२ ॥

प्रकारान्तरेण वपनं प्रशंसति—

अथो गवामेवानुरूपा भवन्ति सर्वस्यान्नाद्यस्यावरुध्यै ॥ २३ ॥

एतत्सत्रानुष्ठानेन गावः शृङ्गहीना भूत्वा सर्वमन्नाद्यं प्राप्नुयुरिति आदावुक्तम् अतः सत्रिणापि सर्वस्यान्नाद्यस्यावरोधाय अनुष्ठितसत्राणां गवां शृङ्गहीनानामनुरूपा भवन्ति सशिखवपनेन सदृशा भवन्ति ।२३॥

इति ताण्डयमहाब्राह्मणे चतुर्थाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

दशमस्याह ऊर्द्ध्वमहाव्रताख्यं गवामयनस्योपान्त्यमहरनुष्ठेयं तद्विवक्षुराख्यानमुखेन तन्नाम निर्वक्ति ।

प्रजापतिः प्रजा असृजत सोऽरिच्यत सोऽपध्यत तं देवा अभिसमगच्छन्त तेऽब्रुवन्महदस्मै व्रतꣳ सम्भराम यदिमन्धिनवदिति तस्मै यत्सꣳवँत्सरमन्नं पच्यते तत्समभरꣳस्तदस्मै प्रायच्छꣳस्तदव्रजयत्तदेनमधिनोन्महन्मर्य्या व्रतं यदिममाधिन्वीदिति तन्महाव्रतस्य महाव्रतत्वम् ॥ १ ॥

सर्वकारणभूतः प्रजापतिः इमाः सर्वाः प्रजा असृजत आदौ सृष्टवान्, ततो बहुकार्यसृष्टेः स प्रजापतिः अरिच्यत रिक्तः क्षीणोऽभवत्, ततोऽपश्यत श्रान्त्यातिशयेन अशेत, तमभिलक्ष्य देवाः समगच्छन्त, तत्तस्ते इदमब्रुवन्, अस्मै रिक्ताय प्रजापतये महद्भूतमन्नं सम्भराम, यद्व्रतमिमन्धिनवत् प्रीणयेत्तर्पयेदिति, धिविः प्रीणनार्थः अस्माल्लेटि रूपमेतत् । एवमुक्ता यदन्नं सव्वँत्सरं पच्यते समस्तेन सव्वँत्सरेण निष्पद्यते तत्तस्मै तदर्थं तदन्नं समभरन् सम्पादितवन्तः सम्पाद्य चास्मै तत्प्रायच्छन् तदन्नं स प्रजापतिः अव्रजयदभक्षयत् 'व्रजिरत्र भक्षणार्थः, भक्षितं तदन्नमेनं प्रजापतिमधिनोत् अतर्पयत् । तदनन्तरं देवा इदमब्रुवन् 'हे मर्त्या मर्त्याः एतन्महद्व्रतं यदेनं प्रजापतिमाधिन्वीत् अतार्प्सीदिति । यदिदं ममद्भूतमित्युक्तं तन्महाव्रतस्य महाव्रतप्रवृत्तिनिमित्तं सव्वँत्सरान्ते कर्त्तव्यमिदमहः प्रजापतेरन्नत्वेन स्तूयत इति कर्मणोऽपि महाव्रतनाम सम्पन्नम ॥ १ ॥

प्रकारान्तरेण निर्वचनं दर्शयति--

प्रजापतिर्वाव महाँस्तस्यैतद्व्रतमन्नमेव ॥ २ ॥

स प्रजापतिः खलु सर्वेभ्यो महान् तस्यैतद् व्रतं कर्म अन्नमेव अन्नवत् तृप्तिकरमेव अतो महतः सम्बन्धि व्रतमिति कृत्वा महाव्रतमित्युच्यते । अस्मिन् पक्षे वैयधिकरण्यात् 'आन्महतः समानाधिकरणे'ति विधीयमानमात्वं व्यत्ययेनेति द्रष्टव्यम् ॥ २ ॥

इदमहर्विधुवतः स्थाने कर्त्तव्यमिति पूर्वपक्षेणोपन्यस्यति--

तदाहुर्मध्यः सव्वँत्सरस्योपेत्यं मध्यतो वा अन्नं जग्धं धिनोति ॥ ३ ॥

जग्धं भक्षितमन्नं मध्यत उदरमध्यस्थं सत् धिनोति तर्पयति अतोऽन्नस्थानीयमिदमहः सव्वँत्सरस्य मध्यतो मध्ये उपेत्यम् उपेतव्यमनुष्ठेयमित्यर्थः । तत्तत्र महाव्रतविषये केचिदाहुः, अपरेऽभिज्ञाः सव्वँत्सरस्यान्त एवोपेत्यमित्याहुरिति ॥ ३ ॥

सिद्धान्तयति--

तद्वाहुर्यन्मध्यत उपयन्त्यर्द्धमन्नाद्यस्याप्नुवन्त्यर्द्धं सम्बट् कुर्वन्तीत्युपरिष्टादेव सव्वँत्सरस्योपेत्यꣳसव्वँत्सरे वा अन्नꣳसर्व्वं पच्यते ॥ ४ ॥

तदु तत्रैव विषये अभिज्ञा ब्रह्मवादिन आहुः । यत् यदि मध्यतः सव्वँत्सरस्य मध्ये इदमहरुपयन्ति तर्हि सव्वँत्सरसाध्यस्यान्नाद्यस्या-

र्द्धमेवाप्नुवन्ति अर्द्धे संवट् कुर्वन्ति व्यर्धं कुर्वन्तीति । अतः सव्वँत्सरस्योपरिष्टादेव इदमहरुपेत्यं सव्वँत्सरे सम्पूर्ण एव हि सर्वमन्नं पच्यते अतः सर्वस्यान्नस्य प्राप्तयेऽवकल्पत इत्यर्थः ॥ ४ ॥

अथास्याहुः पञ्चविंशः स्तोमः स्यादिति विधित्सुराह—

चतुर्विंशं भवति चतुर्विंशो वै सव्वँत्सरोऽन्नं पञ्चविंशम् ॥ ५ ॥

इदमहश्चतुर्विंशतिस्तोमकं भवति सव्वँत्सरो हि चतुर्विंशत्यर्द्धमासात्मकः । तस्यैतदनुगुणम् । अतस्तत्साध्यमन्नं पञ्चविंशं पञ्चविंशतिसंख्यापूरकं भवति ॥ ५ ॥

प्रकारान्तरेण प्रशंसति—

यद्वा अदश्चतुर्विंशं प्रायणीयन्तदेतदुदयनीयम् ॥६॥

सर्वसत्रसाधारणावाद्यन्तावतिरात्राविति कृत्वा उपाद्यं प्रायणीयमुपान्त्यं प्रायणीयमिति उच्यते । यद्वै यत् खलु अदः पूर्वमुक्तं चतुर्विंशस्तोमकं प्रायणीयमुपाद्यमहः तदेवैतदिदानीमुच्यमानं महाव्रतमुदयनीयम् एवं सति उपक्रमोपसंहारौ समानरूपौ भवतः ॥ ६ ॥

ननु महाव्रतमहः पञ्चविंशस्तोमकं तस्य कथं चतुर्विंशस्तोमकेन प्रायणीयेन साम्यमित्यत आह—

यत् सव्वँत्सरमन्नꣳसम्भरन्ति सैषा पञ्चविंश्युपजायते ॥ ७ ॥

संवत्सरं संवत्सरपर्य्यन्तं संवत्सरे चतुर्विंशत्यर्द्धमासात्मके समाप्ते देवा यदन्नंसम्भरन्ति तेषां तदन्नमेव पञ्चविंशी पञ्चविंशतिसंख्यापूरणी स्तोत्रीयोपजायते सम्पद्यते अतः फलरूपैषा पृथग्भूतेति प्रायणीयेन साम्यम् एवं सति अस्मिन्नहनि सर्वस्तोत्रेषु पञ्चविंशस्तोमः कर्त्तव्य इति विधिरुन्नेतव्यः ।

वेदार्थस्य प्रकाशेन तमो हार्द्दं निवारयन् ।
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ ७ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे चतुर्थाध्यायस्य दशमः खण्डः ॥ ४ ॥ १० ॥

चतुर्थाध्यायः समाप्तिमगमत् ।

पञ्चमोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

उक्तं महाव्रतस्याहुः सर्वेषु स्तोत्रेषु पञ्चविंशः स्तोमः कार्य्यः इति' शिरः पक्षौ पुच्छ आत्मेति पञ्चविधं होतुः पृष्ठस्तोत्रं तत्र महाव्रताख्यं, महाव्रतमित्युच्यते—

वामदेव्यं महाव्रतं कार्य्यम्॥ १॥

स्पष्टोऽर्थः॥ १॥

तस्मिंश्च स्तोत्रे आत्मैव पञ्चविंशः स्तोमः, शिरःप्रभृतिषु स्तोमान्तरं, तत्र शिरसस्त्रिवृत्स्तोमं विधत्ते—

त्रिवृच्छिरो भवति॥ २॥

त्रिभिस्तृचैर्वर्त्तत इति त्रिवृत् स एव स्तोमः शिरोभागश्च भवति॥२॥

तस्य स्तोमस्य शिरसा सहानुरूप्यं दर्शयति—

त्रिवृद्ध्येव शिरोलोमत्वगस्थि॥ ३॥

लोके प्राणिनां शिरः लोम त्वक् अस्थीति भेदेन त्रिवृद्ध्येव त्रिगुणमेव खलु। अतः शिरसस्त्रिवृतः स्तोमो युक्तः॥ ३॥

शिरोव्यतिरिक्तस्य पाङ्क्तत्वप्रतिपादनेन शिरसस्त्रिवृत्त्वं व्यतिरेकेण दर्शयति—

पाङ्क्त इतर आत्मा लोम त्वङ्मांसमस्थि मज्जा॥४॥

इतरः शिरोव्यतिरिक्त आत्मा देहः पाङ्क्तः पङ्क्तियुक्तः पञ्चसंख्योपेतः, कथमित्युच्यते-लोमत्वङ्मांसमस्थिमज्जेति भेदेन, एवं शिरः पाङ्क्तञ्च भवति अपि तु त्रिवृदेवेत्यर्थः॥ ४॥

शिरसा त्रिवृत्स्तोमकेन स्तवनं विधत्ते—

सकृद्धिङ्कृतेन शिरसा पाराचा स्तुवते॥ ५॥

अनेन आदौ सकृत् हिंकृत्य पाराचा अनावृत्तेन शिरसा स्तुवते उद्गातारः॥ ५॥

तदेतदनावृत्तस्तवनं प्रशंसति—

तस्माच्छिरोऽङ्गानि मेद्यन्ति नानुमेद्यति न कृश्यन्त्यनु कृश्यति॥ ६॥

तस्मादनावृत्तस्तवनात् अविकृतरूपमेकरूपमेव शिरो भवति अत इतराण्यङ्गानि मेद्यन्ति वर्द्धमानान्यनुवर्द्धन्ते इतरेष्वङ्गेषु वर्द्धमानेष्वपि शिर एकमेवावतिष्ठते तथा कृश्यन्ति कृशी भवन्ति अङ्गानि अनु न कृश्यति नाल्पीभवति इतरेष्वङ्गेष्वपक्षीयमाणेष्वपि स्वयन्नापक्षीयते॥६॥

नन्वितरेषामपि वृद्धिंकाश्यै कथं स्यातां तत्राह—

पुनरभ्यावर्त्तमितरेणात्मना स्तुवते तस्मादितर आत्मा मेद्यति च कृश्यति च ॥ ७ ॥

इतरेण पक्षपुच्छादिरूपेणात्मना पुनरभ्यावर्त्तं पुनः पुनरभ्यावृत्य एकमेव तृचमावर्त्य स्तुवते तस्मादावृत्त्या विकृतत्वात् इतर आत्मा शिरोव्यतिरिक्तो देहो मेद्यति च कृश्यति च कदाचिद्वर्द्धते कदाचित् कृशीभवति ॥ ७ ॥

शिरसो गायत्रीसाम्नः स्तोत्रीयां विधत्ते—

अर्कवतीषु गायत्रीषु शिरो भवति ॥ ८ ॥

अर्कशब्दोपेतासु गायत्रीच्छन्दस्कासु 'इन्द्रमिद्गाथिनो बृहदिन्द्रे' दधीचो अस्थभिरुद्वेदभिश्रुतामघमिति' तृचं त्रयात्मकासु नवस्वृक्षु शिरो भवति ॥ ८ ॥

अथासामर्कत्वं गायत्रत्वञ्च प्रशंसति—

अन्नं वा अर्को ब्रह्मवर्चसं गायत्र्यन्नाद्यं चैवेभ्यो ब्रह्मवर्चसञ्च मुखतो दधाति ॥ ९ ॥

अर्च्यते पूज्यते अनेनेति व्युत्पत्त्या अन्नमेवार्कः । गायत्री च तेजोरूपेणाग्निना सह प्रजापतिमुखादुत्पन्ना ब्रह्मवर्चसं तेजोविशेष इति गायत्री ब्रह्मवर्चसमित्युच्यते । एवमुभयोः स्तोत्रादौ करणेन एभ्यो यजमानेभ्यः अन्नाद्यञ्चैव ब्रह्मवर्चसञ्च मुखतः प्रमुखे दधाति विदधाति उद्गातेत्यर्थः ॥ ९ ॥

अथ पक्षौ स्तोमविशिष्टौ विधत्ते—

पञ्चदशसप्तदशौ पक्षौ भवतः पक्षाभ्यां वै यजमानो व्ययो भूत्वा स्वर्गं लोकमेति ॥ १० ॥

पञ्चदशस्तोमं रथन्तरं दक्षिणपक्षतया कार्य्यं सप्तदशस्तोमं बृहदुत्तरपक्षत्वेन । एवं कृताभ्यां पक्षाभ्यामेव यजमानो व्ययः पक्षी भूत्वा स्वर्गं लोकमुत्पतनेन प्राप्नोति । एवमेकः पञ्चदशः पक्षः इतरः सप्तदश इत्युक्तम् ॥ १० ॥

अधुनोभावपि समानस्तोमौ स्यातामिति केषाञ्चिन्मतमुपन्यस्यति—

तावाहुः समौ कार्य्यौ पञ्चदशौ वा सप्तदशौ वा सवीवधत्वाय ॥ ११ ॥

तौ पक्षौ पञ्चदशस्तोमकौ सप्तदशस्तोमकौ वा समौ समानावेव कार्य्याविति केचिदाहुः । किमर्थं ? सवीवधत्वाय समानवीवधत्वाय इतरथा हि वैषम्यमेव दोषः स्यादिति ॥ ११ ॥

इमं पक्षं निराकृत्य पूर्व्वोक्तमेव पक्षं परिगृह्णाति—

तद्वाहुर्य्यत्समौ भवत एकवीर्य्यौ तर्हि भवत इति पञ्चदशसप्तदशावेव कार्य्यौ साचीव वै वयः पक्षौ कृत्वापतीयः पतति ॥ १२ ॥

तत् उ आहुरिति पदच्छेदः, उ इति पक्षान्तरपरिग्रहे । तत्र आहुर्ब्रह्मवादिनोऽभिज्ञाः । किमिति ? यद्यदि समौ समानस्तोमौ भवतः तर्हि तदा एकवीर्य्यौ समानवीर्य्यौ भवत इति, अस्त्वेकवीर्य्यत्वं को दोष इति चेत् पतनासामर्थ्य इति ब्रूमः । वयः पक्षी साचीव वै तिर्य्यगिव पक्षौ कृत्वा पतीयः पतति अतिशयेन पतनं करोति पक्षयोः साम्ये तु साचीभावो न स्यात् अतः पञ्चदशसप्तदशावेव कार्य्यौ ॥ १२ ॥

बृहद्रथन्तरयोः किं दक्षिणतः कार्य्यं किमुत्तरत इत्याकांक्षायामाह—

दक्षिणतो बृहत्कार्यं दक्षिणो वा अर्द्ध आत्मनो वीर्य्यवत्तरः ॥ १३ ॥

दक्षिणतो दक्षिणपक्षे बृहत्साम कार्य्यम् इन्द्रादिभिः सह प्रजापतेरुरस उत्पत्तेः वीर्यवद्बृहत् आत्मनो देहस्य दक्षिणोऽर्द्धो भागः वीर्यवत्तरः अतिशयेन वीर्यवान् अतस्तत्र बृहत्साम प्रयोगार्हमित्यर्थः । परिशेषात् रथन्तरमुत्तरमिति गम्यते ॥ १३ ॥

तमिमं पक्षं निरस्य सिद्धान्तमाह—

अथो खल्वाहुरुत्तरत एव कार्य्यं ब्राह्मणाच्छंसिनोऽर्द्धात् त्रैष्टुभं वै बृहत्त्रैष्टुभो ब्राह्मणाच्छंसी त्रैष्टुभः पञ्चदशस्तोमः ॥ १४ ॥

अथो खल्विति पक्षान्तरपरिग्रहे । उत्तरत एव बृहत्साम कार्य्यमिति ब्रह्मवादिन आहुः ब्राह्मणाच्छंसिनोऽर्द्धात् समीपात् होतुरुत्तरो ब्राह्मणाच्छंसी उत्तरस्मिन् पक्षे क्रियमाणं बृहत्साम ब्राह्मणाच्छंसिनः

समीपवर्त्ति भवति नान्यथा तस्मादुत्तरतः कार्य्यमिति कथनम्, अनयोः सम्बन्धः बृहत्साम त्रैष्टुभं, त्रिष्टुभा सह प्रजापतेरुरसउत्पत्तेः। ब्राह्मणाच्छंसी च होत्रकाणां द्वितीयः त्रिष्टुप्छन्दसां द्वितीयेति संख्यासाम्यात् त्रैष्टुभत्वं उभयोस्त्रिष्टुब्द्वारा सम्बन्धात् सामीप्यमुचितं यद्यप्यनेन न्यायेन त्रैष्टुभः पञ्चदशस्तोम इति पञ्चदशस्यापि त्रिष्टुभत्वश्रवणात् उत्तरपक्षे प्रयोगः प्रसक्तः तथापि 'रथन्तरेण पञ्चदशेन स्तुवीरन्' 'बृहता सप्तदशेन स्तुवीरन्निं'ति प्रयोगवचनकाले वक्ष्यमाणत्वात् अत्र पञ्चदशस्तोमत्वं पूर्वपक्षाभिप्रायेणेति ज्ञायते ॥ १४ ॥

तथा दक्षिणपक्षे रथन्तरं कार्य्यमित्याह—

दक्षिणतो रथन्तरं कार्य्यम्मैत्रावरुणस्यार्द्धर्चं वै रथन्तरं गायत्रो मैत्रावरुणो गायत्रः सप्तदशस्तोमः ॥१५॥

पूर्ववद्व्याख्येयं, गायत्र्या सह रथन्तरस्य प्रजापतिमुखादुत्पन्नत्वाद्गायत्रत्वं मैत्रावरुणस्य च होत्रकाणां प्रथमत्वात् प्रथमच्छन्दसा गायत्रेण सम्बन्धः सप्तदशस्तोमस्य गायत्रत्वमेवं सम्पाद्यम्। सप्तदशस्तोमो जगती च प्रजापतेः मध्यकायादुत्पन्नत्वात् जगती च द्वे गायत्र्याविति जगती द्वारा सप्तदशस्य गायत्रत्वम् ॥ १५ ॥

एकविंशात्मकं पुच्छं कार्य्यमिति विधत्ते—

एकविꣳशं पुच्छं भवति ॥ १६ ॥

स्पष्टोऽर्थः ॥ १६ ॥

तदेव प्रशंसति—

एकविꣳशो वै स्तोमानां प्रतिष्ठा तस्माद्वयः पुच्छेन प्रतिष्ठायोत्पतति पुच्छेन प्रतिष्ठाय निषीदति ॥१७॥

स्तोमानां त्रिवृदादीनां मध्ये एकविंशः प्रतिष्ठाहेतुः तस्मात्प्रतिष्ठाहेतोरेकविंशस्य पुच्छे करणात् वयः पक्षी पुच्छेन प्रतिष्ठाय आश्रयमवष्टभ्य पक्षाभ्यामुत्पतति तथा पुच्छेनैव प्रतिष्ठाय स्वाश्रयमालम्ब्य निषीदति उपविशति ॥ १७ ॥

अथ पुच्छत्वेन यज्ञायज्ञीयं पुच्छं कार्य्यमिति कुत एतदित्यत आह—

यज्ञायज्ञीयं पुच्छं कार्य्यं यज्ञायज्ञीयꣳ ह्येव महाव्रतस्य पुच्छम् ॥ १८ ॥

हीति प्रसिद्धौ यज्ञायज्ञीयं साम हि महाव्रतस्य पुच्छतया प्रसिद्धं 'बृहद्रथन्तरे पक्षौ यज्ञायज्ञीयं पुच्छमि'ति मन्त्रवर्णादेतच्च यज्ञायज्ञी-

यमैन्द्रीषु कार्य्यं पृष्ठस्तोत्रस्यैन्द्रत्वात् ॥ १८ ॥

अथैतं पक्षं निरस्य पक्षान्तरमाह—

अथो खल्वाहुरतिशयं वै द्विपदां यज्ञायज्ञीयं भद्रमेव कार्य्यꣳसमृद्ध्यै ॥ १९ ॥

अथो खल्वभिज्ञा ब्रह्मवादिन आहुः चतुष्पदास्वृक्षु हि यज्ञायज्ञीयं गीयते द्विपदां यजमानानां तदतिशयम् अतिशयितमतिरिक्तमिति अतो भद्रं साम पुच्छतया कार्य्यन्तद्धि द्विपदासु गीयते तथा सति तत्साम द्विपदां यजमानानां समृद्ध्यै समृद्ध्यर्थं भवति ॥ १९ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

महाव्रतस्तोत्रस्य पक्षिरूपेण कल्पस्य शिरःप्रभृतीनांस्तोमा उक्ताः सामानि च विहितानि अथ तस्यैवापरं कल्पं दर्शयति—

वामदेव्यम्महाव्रतं कार्य्यन्तस्य गायत्रꣳशिरो बृहद्रथन्तरे पक्षौ यज्ञायज्ञीयं पुच्छम् ॥ १ ॥

यद्यपि पञ्चानां समुदाय एव महाव्रतशब्दवाच्यः वामदेव्यं कयानाश्चित्रेत्यस्या मुत्पन्नं साम । अतस्तस्यात्मत्वेन कार्य्यमित्यर्थः, गतमन्यत् ॥ १ ॥

यद्यपि पञ्चविधे महाव्रते एकैकस्यां विधायां सहस्रप्रोतत्वं वक्ष्यति तत्समुदायवेदनमादौ प्रशंसति—

यो वै महाव्रते सहस्रं प्रोतꣳवेद प्रसहस्रं पशूनाप्नोति ॥ २ ॥

शिरःपक्षादिरूपेण पञ्चावयवे महाव्रते सहस्रं प्रोतं सम्बद्धं वेद जानाति सहस्रं सहस्रसंख्यान् पशूनाप्नोति ॥ २ ॥

तस्य पञ्चावयवाः किमात्मकाः तेषु किं सहस्रं प्रोतमिति तदुभयं क्रमेण दर्शयति—

तस्य प्राची दिक् शिरस्तच्छन्दोभिः सहस्रमसावन्यतरः पक्षः सनच्चत्रैः साहस्रोऽयमन्यतरः पक्षः स ओषधिभिश्च वनस्पतिभिश्च साहस्रोऽन्तरिक्षमात्मा तद्यजुर्भिः साहस्रं प्रतीची दिक् पुच्छन्तदग्निभिश्च रश्मिभिश्च साहस्रं प्रसहस्रं पशूनाप्नोति य एवं वेद ॥ ३ ॥

तस्य महाव्रतस्य प्राची दिक् शिरः। तदात्मकमित्यर्थः। तत् छन्दोभिर्गायत्र्यादिभिः साहस्रसम्बन्धी। यद्यप्यसावन्यतरोऽयमन्यतर इति पक्षयोः सम्बन्धविशेषेण श्रुतः तथापी'यं वै रथन्तरमसौ वै बृहदि'ति श्रुतेः, विशेषोऽवगम्यते। अन्तरिक्षं अन्तरिक्षलोक आत्मा तद्वयोभिः पक्षिभिः साहस्रं अन्तरिक्षचारित्वात् पक्षिणां प्रतीचीदिगात्मकं पुच्छं तत् अग्निभिश्च रश्मिभिश्च साहस्रं वेद यजमानस्य प्रतीच्यां हि गार्हपत्यादिरूपेण भूयांसोऽग्नयो भवन्ति उदितस्य चादित्यस्य रश्मयः प्रतीच्यां प्रसरन्तीति प्रतीच्यात्मकं पुच्छम् अग्निभिश्च रश्मिभिश्च सहस्रसम्बन्धीत्यर्थः। एवं प्राच्याद्यात्मकेषु महाव्रतावयवेषु सहस्रयोगित्वं यो वेद दशसहस्रं पशूनाप्नोति। आदावुक्तस्यैवोपसंहारः ॥ ३ ॥

अस्मिन् कल्पे वामदेव्यमात्मत्वेन कार्यमित्युक्तं तन्निरस्यति—

तदाहुरपृष्ठं वै त्वामदेव्यमनिधनꣳहीति ॥ ४ ॥

तत्तत्र महाव्रते ब्रह्मवादिन आहुः। अत्र पृष्ठमिति होतुरेव पृष्ठस्तोत्रं विवक्षितं वामदेव्यं होतुः पृष्ठत्वे अयोग्यं कुतः? अनिधनं हि तदृचो बहिर्भूतनिधनं यतोऽस्य नास्ति तत इत्यर्थः ॥ ४ ॥

अनिधनत्वं कथमपृष्ठत्वे हेतुः तत्राह—

अनायतनं वा एतत् साम यदनिधनम् ॥ ५ ॥

साम्नो निधनमायतनं यस्य नास्ति तदनायतनं आयतनरहितमप्रतिष्ठितं ततो वामदेव्यस्य पृष्ठानर्हतेत्यर्थः ॥ ५ ॥

तर्हि किम्महाव्रतस्यात्मत्वेन कार्यं तदाह—

राजनम्महाव्रतं कार्य्यम् ॥ ६ ॥

इन्द्रन्नरोनेमधितेत्यस्यामुत्पन्नं राजनाख्यं साम तदासेति तृचे अस्य स्तोत्रस्यात्मत्वेन कार्य्यम् ॥ ६ ॥

तदेवंप्रशंसति—

एतद्वै साक्षादन्नं यद्राजनं पञ्चविधं भवति पाङ्क्तꣳ हि अन्नम् ॥७॥

एतत् खलु साक्षात्प्रत्यक्षमन्नं यद्राजनं साम स्तोमादिभिः शोभमानमन्नवत् प्रीतिकरं भवति, महाव्रतं चान्नत्वेन संस्तुतम् अतस्तत्रैतत्प्रयोगार्हमित्यर्थः, अपि चैतत्साम पञ्चविधं भवति महाप्रस्तावादिभक्तीनां प्रत्येकं प्रयोज्यत्वात् पञ्चवारं तथा चैतरेयकोपनिषदि श्रूयते, "पञ्चकृत्वः" प्रस्तौति पञ्चकृत्वोद्गायति पञ्चकृत्वोपद्रवति पञ्चकृत्वो निधनमुपयन्तीति। यद्वा हुं हुं हुं हुं हुं हो हो हो हो हो इत्यादि पञ्चस्तोभयोगात् वागिडासुवोबृहद्भा इति पञ्चनिधनयोगाद्वा पाञ्चविध्यम्, अन्नं

हि पाङ्क्तं पङ्क्तिसम्बद्धम् अश्यं खाद्यं चोष्यं लेह्यं पेयमिति, अतो राजनस्य पञ्चविधत्वात् पञ्चविधान्नरूपत्वम् ॥ ७ ॥

ननु वामदेव्यस्याकरणे तत्कृतं फलन्न स्यादित्यत आह—

हिङ्कारवद्भवति तेन ह्वामदेव्यस्य रूपम् ॥ ८ ॥

यदेतत्साम हिङ्कारवद्भवति तेन वामदेव्यस्य रूपमस्मिन् साम्न्यन्तर्भूतम् अत एतत्करणेन तत्कार्य्यमपि लभ्यत इत्यर्थः ॥ ८ ॥

नन्वस्यापि पृष्ठस्तोत्रे योग्यता कथमित्यत आह—

निधनवद्भवति तेन पृष्ठस्य रूपम् ॥ ९ ॥

निधनवत्तेन प्रतिष्ठितत्वात् इदं साम पृष्ठस्तोत्रमित्यर्थः । अस्य पञ्च निधनानि पूर्वमेव प्रदर्शितानि ॥ ९ ॥

अथ ब्राह्मणाच्छंसिनः पृष्ठस्तोत्रानिर्वर्त्तकमेकं साम विधत्ते—

अतिच्छन्दःसु पञ्चनिधनं ह्वामदेव्यं ब्रह्मसाम कार्य्यम् ॥ १० ॥

कयानश्चित्रेत्यस्यामुत्पन्नं 'इह प्रजाएरायस्पोषाय आगन्माम इदं वामं चराचराय'इत्यादिभिः पञ्चभिर्निधनैरुपेतं वामदेव्यं साम अतिच्छन्दःसु 'त्रिकद्रुकेषु माहिषोयवाशिर' इत्यादिषु ब्रह्मसामत्वेन कार्य्यम्॥१०॥

तदेतदतिच्छन्दस्सु गानं स्तौति—

अति वा एषाऽन्यानि च्छन्दाऽंसि यदतिच्छन्दा अत्येतदन्यान्यहान्यहर्य्यन्महाव्रतम् ॥ ११ ॥

अतिच्छन्दा अतिच्छन्दश्छन्दस्का यत् या ऋक् एषा अन्यानि गायत्र्यादीनि च्छन्दांसि अति वै अतीत्येव वर्त्तते यन्महाव्रताख्यमहः । एतदस्यान्यान्यहान्यतिवर्त्तते । अतोस्मिन्नहनि अतिच्छन्दःप्रयोगो युक्त इत्यर्थः ॥ ११ ॥

तत्र विहितं ब्रह्मसाम प्रशंसति—

ब्रह्मसाम्नैव तदन्यान्यहान्यतिमेदयति ॥ १२ ॥

ततः स्वतएव वृत्तम्महाव्रतमहर्ब्रह्मसाम्नैव तदन्यान्यहान्यतिमेदयति आत्मानं वर्द्धयति स्वतो वृद्धमपि पुनः राजनेन साम्ना वर्द्धत इत्यर्थः ॥ १२ ॥

निधनद्वारेण प्रशंसति—

पञ्चनिधनं भवति पाङ्क्तऽंह्यन्नम् ॥ १३ ॥

पञ्च निधनानि पूर्वं प्रदर्शितानि तद्युक्तमेतत् ब्रह्मसाम भवति अन्न-

स्य पाङ्क्तत्वं पूर्वमुक्तम् अतोऽन्नसंस्तुते महाव्रतेऽहनि पञ्चनिधनं साम प्रयोगार्हमित्यर्थः ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे मध्यमाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

अथेलान्दं सामाग्निष्टोमसामत्वेन कर्त्तव्यमिति विधत्ते—

इलान्दमग्निष्टोमसाम कार्य्यम् ॥ १ ॥

'अग्निरस्मि जन्मना' इत्यस्यामुत्पन्नम् 'अग्ने तव श्रवोवय' इति षड्र्चे इलान्दमग्निष्टोमसाम कार्य्यम् ॥ १ ॥

तदेतत्साम प्रशंसति—

एतद्वै साक्षादन्नं यदिलान्दमिरान्नं वा एतदिरायामेवान्नाद्येऽन्ततः प्रतितिष्ठन्ति ॥ २ ॥

इलान्दमिति यत् एतत् प्रत्यक्षमन्नं कुतः ? इरान्नं वा एतदिरायामेव इरा भूमिरन्नञ्च तत् उभयमिरान्नं इरान्नशब्दवाच्यमेवैतत्साम इलान्दमित्युच्यते । रलयोरेकत्वस्मरणात् लकारस्य च व्यत्ययेन रकारः । इरायां भूमौ अन्नाद्ये च अन्ततः सत्रस्यावसाने यजमानाः प्रतिष्ठिता भवन्ति ॥ २ ॥

यत्पूर्वमुक्तम् 'अग्ने तव श्रवो वय' इत्यादिके षड्र्च इलान्दं कार्य्यमिति ता ऋचो विधास्यन् तदीयं छन्दो विधत्ते—

समुद्रो वा एतच्छन्दः सलिलं लोमशꣳसमुद्र इव खलु वै स भवति सलिल इव लोमश इव यो भवति॥३॥

एतदिलान्दस्याधारभूतं छन्दः समुद्रो वै समुद्र इव अप्रधृष्यं सत् समुद्रनामकं भवति 'अग्ने तव श्रवोवय' इत्यादिषु द्वयोर्द्वयोर्ऋचोः साम समाप्यते प्रत्यृचं चत्वारिंशदक्षराणि मिलित्वा अशीत्यक्षराणि सम्पद्यन्ते एवमेकैका स्तोत्रीया अशीत्यक्षरा भवति । अशीत्यक्षरस्य छन्दसः सिन्धुरिति संज्ञा समुद्रशब्दश्च सिन्धुपर्य्याय इति असावपि छन्दसः संज्ञा । कुतोऽस्य छन्दसः संज्ञा कुतोऽस्य छन्दसः समुद्र इवाप्रधृष्यत्वं ? सालिलं सर्वतो लेलायति चेदं साम लोमशं नानाविधा स्तोमा आवर्त्तमाना अस्य साम्नो लोमत्वेन निरूप्यन्ते लोमभिर्युक्तमेव विशिष्टस्य साम्न आधारत्वात् छन्दः समुद्र इत्युच्यते । लोकेऽपि यः पुरुषः सलिल इव सर्वतो लेलायमान इव लोमश इव लोमस्थानीयैः पुत्रपौत्रा-

दिभिरुपेत इव भवति । इव शब्दोऽवधारणे उक्तविशेषणविशिष्ट एव भवति । यद्वा सलिलमुदकं तद्यथा व्याप्नोति एवं कृत्स्नं विषयं व्याप्नुवन् । यथा च लोमशः पुरुषो आपादमस्तकं लोमभिरावेष्टितो भवति तथा परिजनैरावेष्टितो यो भवति समुद्रवदप्रधृष्य इत्यर्थः । एवमस्यापि साम्नः सलिलत्वात् लोमशत्वाच्च तदाश्रयं छन्दः समुद्रवदप्रधृष्यमित्युक्तम् ॥ ३ ॥

अथैतच्छन्दस्का ऋचः सामाधारतया विधत्ते--

तस्मादेतासु कार्य्यꣳसमृद्ध्यै ॥ ४ ॥

यस्मादेतच्छन्द उक्तप्रकारेण समुद्रः तस्मादेतासु च्छन्दस्कास्वृक्षु इलान्दं कार्य्यं तच्च यजमानानां समृद्ध्यै सम्पत्त्यै भवति ॥ ४ ॥

अस्य च साम्नस्त्रीणि निधनानि 'एव्रतम , एसुवः, एशकुन' इति तानि प्रत्येकमनूद्य प्रशंसति--

व्रतमिति निधनं भवति महाव्रतस्यैव तद्रूपं क्रियते, स्वरिति भवति स्वर्गस्य लोकस्य समष्ट्यै, शकुन इति भवति शकुन इव वै यजमानो वयो भूत्वा स्वर्गꣳलोकमेति ॥ ५ ॥

व्रतमिति निधनमस्य साम्नो भवतीति यत् महाव्रतस्यैव तदनुगुणं रूपं क्रियते महाव्रतेऽपि व्रतशब्दसद्भावात् । स्वरिति द्वितीयं निधनं स्वर्गं साधयति अतः स्वर्गलोकस्य संप्राप्त्यै भवति । शकुन इति तृतीयं निधनं भवति तेन शकुन इव पक्षीव यजमानो वयः पक्षी भूत्वा स्वर्गं लोकं प्राप्नोति । इतीलान्दमग्निष्टोम साम कार्य्यमित्युक्तम् ॥ ५ ॥

अथ यज्ञायज्ञीयं वा कार्य्यमिति विधत्ते—

यज्ञायज्ञीयमग्निष्टोमसाम कार्य्यम् ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

तदेतत् स्तौति—

यद्वा अन्या वाङ्नातिवदेत्तदग्निष्टोमसाम कार्यꣳ वै वाग्वाचमतिवदति वाग्यज्ञायज्ञीयं वाक्येवान्ततः प्रतितिष्ठन्ति ॥ ७ ॥

यत् साम अन्या वाङ्नातिवदत्यन्युत्कृष्टं न वदेत् तदेव सामोत्कर्षविधिभूतं तदेवाग्निष्टोमसाम कार्य्यं न खलु वागेव स्वयं वाचमतिवदति यज्ञायज्ञीयं च वाङ्निधनत्वात् वागेव तस्मादिति वा तद्वहि-

तस्य वाग्रूपस्य यज्ञायज्ञीयकरणात् अन्ततः सत्रावसाने वाक्येव सत्रिणः प्रतितिष्ठन्ति ॥ ७ ॥

अथ वारवन्तीयं वा अग्निष्टोमसाम कर्त्तव्यमिति दर्शयति—

वारवन्तीयमग्निष्टोमसाम कार्यम् ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

इदं स्तौति—

अग्निर्वा इदं वैश्वानरो दहन्नैत्तस्मादेवा अबिभयुस्तं वरणशाखयाऽवारयन्त यदवारयन्त तस्माद्वारवन्तीयम् ॥ ९ ॥

अग्निर्वैश्वानरः पूर्वमिदं जगत् दहन् ऐत् आगच्छत् तस्मादग्नेर्देवा भीता आसन् दहन्तं तमग्निं वरणो वृक्षविशेषः तस्य शाखयाऽवारयन्त अशमयन् तस्माद्वरणशाखया वार्य्यमाणोऽग्निस्तावकत्वात् अस्य साम्नो वारवन्तीयनाम सम्पन्नम् ॥ ९ ॥

प्रसङ्गादन्यदपि किञ्चिदाह—

तस्माद्वरणोभिषज्य एतेन हि देवा आत्मानमत्रायन्त ॥ १० ॥

तस्मादुपशमहेतुत्वात् वरणो वृक्षो भिषज्यो भिषजि भेषजे साधुः। एतेन हि वरणेन हि देवा आत्मानं दहतोऽग्नेः सकाशादरक्षन् अतो युक्तमेवैतस्य भेषजसाधुत्वम् ॥ १० ॥

अन्यदपि किञ्चित्प्रासङ्गिकं रूपं विदधाति—

तस्माद्ब्राह्मणोऽवारणेन न पिबेद्वैश्वानरन्नेच्छमयाहीति ॥ ११ ॥

तस्माद्वरणवृक्षस्याग्न्युपशमनहेतुत्वात् अग्न्युपासको ब्राह्मणः वरणविकारेण पात्रेण न पिबेत् वैश्वानरमुपास्यमानमग्निन्नेत् नैव शमयै शान्तं करवाणीति बुद्ध्या ॥ ११ ॥

प्रकृतमेव वारवन्तीयं स्तौति—

पशवो वै वारवन्तीयꣳ शान्तिः पशवः शान्तादेव तत्सर्वꣳसरादुत्तिष्ठन्ति ॥ १२ ॥

पशूनां पोषकत्वात् वारवन्तीयं पशवो वै पशवः खलु पशवश्च शान्तिः शान्तिहेतवः तत्तस्माच्छान्तिरूपस्य वारवन्तीयस्यान्ततः करणात् शान्तादेव सर्वꣳसरादुत्तिष्ठन्ति सत्रिणः ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

एवं महाव्रतस्तोत्रस्य स्वरूपमभिधाय 'प्राणेन पुरस्तादि'त्यादिना 'आसन्दीमारुह्योद्गायती'त्यन्तेन तत् प्रयोगप्रकार उच्यते। पक्षिरूपस्य तस्य महाव्रतस्य लोमनखस्थानीयानां विधास्यमानानां प्राणादिसाम्नां परिमाद इति संज्ञा तैश्चाहवनीयादिकमुपस्थेयमित्यस्मिन् खण्डे विधीयते । अस्य चोपस्थानस्य कालादिकं सूत्रकारो विशदीकृतवान्। महाव्रतस्य पृष्ठ उपाकृते युक्तं स्तोमं परिमादो गायेदिति भाडितायनः, प्रतिगृह्य तृणे अयुक्त्वेति गौतमशाण्डिल्यौ, धानञ्जय्यश्च प्रागेव स्तोत्रोपाकरणादित्येक इति, तत्र प्राणसाम्ना आहवनीयोपस्थानं विधत्ते—

प्राणेन पुरस्तादाहवनीयमुपतिष्ठन्ते प्राणमेव तज्जयन्ति ॥ १ ॥

इन्द्रं नर इत्यस्यां 'हाउ३ आयुः३ सात्यम३' इति गीयमानं साम प्राणः । तेन साम्ना पुरस्तात् पूर्व्वस्यां दिश्यवस्थाय आहवनीयमुपतिष्ठन्ते। सदसो निर्गत्य दक्षिणेनाग्नीध्रीयं गत्वा चित्याग्निमुत्तरेण आहवनीयस्य पूर्वभागं प्राप्य उपस्थानमित्यर्थः । यद्यपि परिमादो गायेदित्येकवचनेन एकस्यैव गानकर्त्तृत्वात् तत्करणके उपस्थानेऽप्येक एवेति उपतिष्ठन्त इति बहुवचनमनुपपन्नं तथापि 'सर्वाण्युद्गाता सकृत् सकृद्गायेत् निधनमितरावुपेयातामपि मध्ये निधनेषु' इति सूत्रकारेण इतरयोरपि निधनभागेऽन्वयस्योक्तत्वात् त्रयोऽप्युपस्थाने कर्त्तार इति बहुवचनमुपपद्यते । एवमुत्तरत्रापि द्रष्टव्यम्। तत्तेन प्राग्दिक् सम्बन्धिनाहवनीयोपस्थानेन प्राणमेव पञ्चवृत्त्यात्मकं शरीरे वर्त्तमानस्य प्राणवायोः या प्राणाख्या प्रथमा वृत्तिः तामेव जयन्ति लभन्त इत्यर्थः । प्राणवृत्तिरपि नासिकातो निर्गत्य प्राग्गामिनी भवति । अतः प्राक् सम्बन्धिनोपस्थानेन तज्जयो युक्तः ॥ १ ॥

अथ चित्याग्नेः पुच्छस्य अपानसाम्नोपस्थानं विधत्ते—

अपानेन पश्चात्पुच्छमुपतिष्ठन्ते अपानमेव तज्जयन्ति ॥ २ ॥

यथैतं प्रत्याव्रज्य पश्चादवस्थाय 'इन्द्रं नर' इत्यस्यामेव 'हाउ३ आनो हिय३ मनदोहम३' इति गीयमानं साम अपानः । तेन पुच्छमुपतिष्ठेरन् तत्तेन प्रत्यग्दिक्सम्बन्धिनोपस्थानेन प्रत्यग्गामिनीम् अपानवृत्तिमेव जयन्ति ॥ २ ॥

व्रतपक्षौ नाम द्वे सामनी 'इन्द्रं नर' इत्यस्यामेवोत्पन्ने ताभ्यां चित्याग्नेः पक्षयोरुपस्थानं विधत्ते—

व्रतपक्षाभ्यां पक्षावुपतिष्ठन्ते दिश एव तज्जयन्ति ॥३॥

'व्रतपक्षयोः पूर्वेण दक्षिणं पक्षमि'ति सूत्रकारेण व्यवस्थाया दर्शितत्वात् पूर्वेण व्रतपक्षेण दक्षिणं पक्षमुत्तरेणोत्तरं चोपतिष्ठेरन् एते अपि सामनी 'इन्द्रं नर' इत्यस्यामुत्पन्ने 'हाउ३ हेऽ३ हऽ३ इन्द्रं नरो' इति गीयमानं साम पूर्वो व्रतपक्षः । हाउ३ इहा३ हऽ३ इन्द्रं नरो' इति गीयमानं सामोत्तरः तत्तेन दिक्सम्बन्धः । पक्षयोरुपस्थानेन दिशां जयो भवति ॥ ३ ॥

पुनरन्यदुपस्थानं विधत्ते—

प्रजापतेर्हृदयेनापिकक्षमुपतिष्ठन्ते ज्यैष्ठ्यमेव तज्जयन्ति॥४॥

अपिकक्षं पक्षमूलमुत्तरमपिकक्षमुपतिष्ठेरन् प्रजापतेः ज्येष्ठत्वात् तत्तेनोपस्थानेन ज्यैष्ठ्यमेव जयन्ति ॥ ४ ॥

अथ चात्वालस्योपस्थानं विधत्ते—

वसिष्ठस्य निहवेन चात्वालमुपतिष्ठन्ते स्वर्गमेव तल्लोकमाप्त्वा श्रियं व्यदन्ते ॥ ५ ॥

'असावि देवम्' इत्यस्यामुत्पन्नं साम वसिष्ठस्य निहवः । तेन चात्वालमुपतिष्ठेरन् 'आइहो३ पहिया उ२३४वा हाइ असावि देवगोरुजीता३क्षां धाउ' इत्येतदादिकं तत्साम 'विश्वे देवा मम शृण्वन्तु' इत्यस्यामृचि 'सुम्नेष्विद्धो अन्तमा मदेमेति' विद्यते तस्य चायमर्थः । हे देवाः वः युष्माकम् अन्तमाः अन्तिकतमाः सन्तः सुम्नेषु सुखेषु मदेम इति । अत एवंरूपस्यार्थस्य दर्शनात् एतत् करणकोपस्थाने स्वर्गमेव लोकमाप्त्वा लब्ध्वा श्रियं सम्पदमभिवदन्ते ॥ ५ ॥

अथैतस्य साम्न आधारभूतामृचं विधाय प्रशंसति—

वैश्वदेव्यामृचि भवति विश्वरूपं वै पशूनाꣳरूपं पशूनेव तज्जयन्ति ॥ ६ ॥

वैश्वदेव्यामृच्येतत् साम भवतीति विश्वरूपं बहुरूपं हि पशूनां रूपं तत्तेन वैश्वदेव्याः करणेन पशूनेव जयन्ति ॥ ६ ॥

अथान्यदुपस्थानं विधत्ते—

सत्रस्यर्द्ध्याग्नीध्रमुपतिष्ठन्त ऋद्धावेव प्रतितिष्ठन्ति ॥७॥

'औहोवा३ अगन्म ज्योतिः' इति सत्रस्य ऋद्धिस्तेन साम्ना आग्नी-

भ्रम् आग्नीध्रमण्डपस्थमग्निमुपतिष्ठेरन् 'अगन्म ज्योतिरमृता अभूम' इत्यादिना ऋचेः सूचितत्वात्। ऋद्धौ समृद्धावेव प्रतितिष्ठन्ति ॥ ७ ॥

अस्य च साम्नो निधनं स्वर्ज्योतिरिति तत्र वर्णव्यूहेन चतुरक्षरनिधनं भवति तदनूद्य प्रशंसति—

चतुरक्षरनिधनं भवति चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठन्ति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

यावत् प्राणस्य विरामो भवति तावन्तं कालमेतन्निधनमावर्त्तयेयुरिति विधत्ते—

आतमितोर्निधनमुपयन्त्यायुरेव सर्वमाप्नुवन्ति ॥ ९ ॥

आतमितोस्तमुग्लाने इत्यस्मात् 'भावलक्षणेस्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्' इति तोसुन् प्रत्ययः। आतमनात् प्राणवायोः यावत्तमनं ग्लानं श्रमो भवति तावत्पर्य्यन्तं स्वर्ज्योतिः स्वर्ज्योतिरिति अनुच्छ्वसन्तः पुनः पुनरावर्त्तयेयुः। एवं प्राणस्यान्तर्निरोधेन सर्वं सम्पूर्णमेवायुः प्राप्नुवन्ति ॥ ९ ॥

तथा हविर्द्धानयोरुपस्थानं विधत्ते—

श्लोकानुश्लोकाभ्यांहविर्द्धाने उपतिष्ठन्ते कीर्त्तिमेव तज्जयन्ति ॥ १० ॥

'हाऊ स्वरता ब्रह्मणा, इति गीयमानं साम श्लोकः 'आनवस्ते रथमश्वायाता १२२४' इत्यस्यां गीयमानं 'हाऊ स्वरता स्वरतस्वरा २३ता' इत्यादिकं साम अनुश्लोकः। तत्र पूर्वेण श्लोकेन साम्ना हविर्द्धानयोः पुरस्तात्प्रत्यङ्मुखाः स्थित्वा हविर्द्धाने उपतिष्ठेरन्, हविर्द्धानयोः पश्चात् स्थित्वा अनुश्लोकेन हविर्द्धाने एवोपतिष्ठेरन्। तदुक्तं सूत्रकारेण 'पुरस्तात्प्रत्यङ्मुखाः पश्चादितरेणेति, तत्तेन सामद्वयोपस्थानेन कीर्त्तिमीयुः। एते पुण्यश्लोकाः। एतैः सम्यक् सत्रमनुष्ठितमित्येवं रूपं यशः प्राप्नुवन्ति ॥ १० ॥

अथ अन्यदुपस्थानं विधत्ते—

यामेन मार्जालीयमुपतिष्ठन्ते पितृलोकमेव तज्जयन्ति ॥ ११ ॥

द्वन्द्वेषु सामसु 'नाके सुपर्णम्' इत्यस्यां यत्पठितं यामम 'औ होई इया हाऊ अहो होइवा नाके सुपा' इत्यादि तेन मार्जालीयन्धिष्णमुप-

तिष्ठेरन्। वेदेर्दक्षिणभागे हि मार्जालीयं पितृलोकश्च दक्षिणत इति तत्तेन मार्जालीयोपस्थानेन पितृलोकमेव जयन्ति ॥ ११ ॥

अथ सदस उपस्थानं विधत्ते—

आयुर्णवस्तोभाभ्यांऽसद उपतिष्ठन्ते ब्रह्म चैव तत् क्षत्रञ्च जयन्ति ॥ १२ ॥

'हाऊ३ आ विश्वतो दावन्विश्वतो न आ भर 'इत्यायुः, विश्वतो दावन्विश्वतोन आ' इति नव स्तोभाः। सदसः पुरस्तात् स्थित्वा पूर्वेण आयुः साम्नोपतिष्ठन्ते पश्चात् स्थित्वोत्तरेण आयुर्णवस्तोभेन साम्ना। उक्तं हि सूत्रकारेण 'यथा हविर्द्धाने तथा' इति। तत्र ज्योतिः शब्देन समृद्धिवचनेन ब्रह्म च क्षत्रञ्च कीर्त्यत इति तत्तेन सामद्वयोपस्थानेन ब्रह्म च ब्राह्मणजातिं क्षत्रं क्षत्रियजातिञ्च उभयमपि जयन्ति ॥ १२ ॥

अथ गार्हपत्योपस्थानं विधत्ते—

ऋश्यस्य साम्ना गार्हपत्यमुपतिष्ठन्ते ॥ १३ ॥

'हरीत इन्द्र श्मश्रूणि' 'इति गीयमानं ऋश्यस्य साम, तेन गार्हपत्यं शालामुखीयमुपतिष्ठेरन् ॥ १३ ॥

अथैतत्साम स्तौति—

इन्द्रꣳसर्व्वाणि भूतान्यस्तुवँस्तस्यर्श्य एकमङ्गमस्तुतमचायत्तदस्यैतेनास्तौत्तेनास्य प्रियं धामोपागच्छत्प्रियमेवास्यैतेन धामोपगच्छन्ति ॥ १४ ॥

पुरा इन्द्रं फलकामनया सर्वाणि भूतान्यस्तुवन् तस्यैकमङ्गं गुह्यरूपमस्तुतं न केनापि स्तुतमासीत् ऋश्यैस्तदङ्गमचायत् अजानत् ज्ञात्वा च स तस्येन्द्रस्य तदङ्गमेतेन साम्नाऽस्तौत् तेनास्य प्रियं धामोपागच्छत् अत एतेनोपतिष्ठमाना अपि अस्येन्द्रस्य प्रियमेव धाम स्थानमुपगच्छन्ति, अस्मिन् साम्नि 'भुङ्डिति प्रभुङ्डितीन्द्रस्तसरेति' स्तोभवदेनं भोगसाधनं गुह्यमङ्गं प्रतीयते। 'इन्द्रस्तसरपूता' इत्यत्र च तसरशब्देन तदेवोच्यते। तत्र शाट्यायनकम् 'ऋश्यास इन्द्र भुङ्डिति मघवन्निन्द्र भुङ्डिति प्रभुङ्डितीन्द्रस्तसरपूता २३४५ इति पुनः पुनस्तसरस्थिरगित्येतत्' इत्यादिकमनुसंधेयम्। अतो गुह्यस्य स्तुतिरधिगन्तव्या॥१४॥

अस्य च निधनं प्रत्यक्षमुपेतव्यं न परोक्षेणेति विधत्ते—

यत् परोक्षं निधनमुपेयुर्हीतिमुखं प्रतिमुञ्चेरन् प्रत्यक्षमुपयन्ति ह्रीतिमुखमेवापजयन्ति ॥ १५ ॥

यत् यदि अस्य साम्नो निधनम् 'इन्द्रस्तसरपूता' इत्येतत् परोक्षमुपेयुरुपगच्छेयुः ह्रीतमुखं लज्जाविष्टमुरवाकारं पुत्रं प्रतिमुञ्चेरन् स्वात्मनि संयोजयेरन्। यत् यदि प्रत्यक्षमुपयान्ति तदोद्गीतमुखमेवमपरो निर्देशः ह्रीतमुखत्वं पुत्रादिगतमुपजयन्ति तिरस्कुर्वन्ति। किमिदन्निधनस्य परोक्षं किंवा प्रत्यक्षमिति चेत्?तदुभयं विविच्य प्रदर्शितं निदाने 'ऋश्यं प्रत्यक्षञ्चापितं परोक्षमपि वेन्द्रेति प्रत्यक्षं इन्द्र इति परोक्षम्'इत्यादिना 'ऋश्यास इन्द्र भुङ्' इतीन्द्रपदमित्युपरि सर्वाणीन्द्रवाचकानि पदानि सम्बुध्यन्तानि प्रयोज्यानि तेनेन्द्रस्तसरपूता इति प्रथमान्तमपोह्य इन्द्रस्तसरपूतेति संयोज्य यथा 'ऋश्यास इन्द्र मघवन्निन्द्रेति' त्रीणि सम्बुध्यन्तानि एवं हीन्द्रः सम्बोध्यत्वात् प्रत्यक्षकृतो भवति अतस्तद्वाचकं निधनमपि प्रत्यक्षं भवति । प्रथमान्तत्वे तु परोक्षकृतत्वेन निधनस्य परोक्षता स्यात् । सूत्रकृताऽपि इन्द्रप्रभृति प्रत्यक्षं निधनमुपेयुरिति ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

एवं महाव्रतस्तोत्रस्याङ्गभूता लोमनखस्थानीयास्त्रयोदश परिमादो गताः । एतेषाञ्च लोमनखस्थानीयत्वं तैत्तिरीये समाम्नातं 'यदित इतो लोमानि इतो नखात्परिमादः क्रियन्ते तान्येव तेन प्रत्युप्यन्त इति, अथ महाव्रतस्तोत्रं पञ्चविधम् अत्राध्वर्युः शिरसोद्गायेन्मैत्रावरुणो दक्षिणेन पक्षेण ब्राह्मणाच्छंस्युत्तरेण गृहपतिः पुच्छेनोद्गातात्मनेत्येवं कर्तृविशेषसम्बन्धं वक्ष्यति । तत्रोद्गातुरुद्गानकाले कञ्चिद्विशेषं विधत्ते—

आसन्दीमारुह्योद्गायति देवसाक्ष्य एव तदुपरिषद्यं जयति ॥ १ ॥

उद्गाता आसन्दीमारुह्य आत्मना राजतेन साम्ना उद्गायति तत्तेन भूमिं परित्यज्य आसन्द्या उपर्य्यारोहणेन देवसाक्ष्ये देवानां दर्शन एव उपरिषद्यम् उपरि सदनम् उच्छ्रिते स्वर्गादावस्थानं जयति लभते ॥१॥

आसन्द्या औदुम्बरीत्वं विधाय प्रशंसति—

औदुम्बरी भवत्यूर्गुदुम्बर ऊर्जमेवावरुन्धे ॥ २ ॥

उदुम्बरविकारैः औदुम्बरैः काष्ठैर्निर्मिता भवति । योऽयमुदुम्बरः स ऊर्ग् वै बलकरमन्नमेव ऊर्ग्विभागसमये तस्योत्पत्तेः । तथा च तैत्तिरीयकं 'देवा वा उर्ज्जं व्यभजत तत उदुम्बर उदतिष्ठदिति। अत औदुम्ब-

र्यासन्युपवेशनेन ऊर्जमेव साक्षात्प्राप्नोति । यदुक्तं सूत्रकारेण 'प्रादेश-शमात्राः पादा अरत्निमात्राणीतराण्यङ्गानी'ति ॥ २ ॥

तदेतद्विधाय प्रशंसति—

प्रादेशमात्री भवत्यस्य लोकस्यानुद्धानाय ॥ ३ ॥

प्रादेशमात्रपादत्वात् प्रादेशमात्री आसन्दी । एवं पादानां ह्रस्वीयस्त्वम् अस्य लोकस्य अस्मात् लोकादनुद्धानाय भवति ॥ ३ ॥

अथ तस्यारोहणं विधाय प्रशंसति—

छन्दोभिरारोहति स्वर्गमेव तल्लोकमारोहति ॥ ४ ॥

'गायत्रेण त्वा च्छन्दसारोहामि' त्रैष्टुभेन त्वा च्छन्दसारोहामि, जागतेन त्वा च्छन्दसारोहामि, आनुष्टुभेन त्वा च्छन्दसारोहामि, वैराजेन त्वा च्छन्दसारोहामि' इति वैराजपञ्चमैः गायत्र्यादिभिश्छन्दोभिरासन्दीमारोहति । छन्दोविकल्पश्च सूत्रकारेणोक्तः 'चतुर्भिरिति धानञ्ज्यास्त्रिभिः शाण्डिल्य' इति । तत्तेन रोहणेन स्वर्गं लोकमारोहति ॥ ४ ॥

उपावरोहणकाले एतैरेव प्रतिलोमैश्छन्दोभिरुपावरोहणं विधत्ते—

छन्दोभिरुपावरोहत्यस्मिँल्लोके प्रतितिष्ठति ॥ ५ ॥

एतेषामेव छन्दसां प्रतिलोम आरोहण इति गायत्रस्य प्रथमत्वेन भूर्लोकात्मकत्वात् अस्मिन् लोके पुनः प्रतितिष्ठतीति । तदुक्तं सूत्रकृता 'आह्रयमाने भक्षे प्रतिलोमैः आरोहणीयैः अवरुह्य जपेन्महीं द्यौः पृथिवी चनेति सर्वे सह स्तुवीरन्नि'ति । यद्यध्वर्युप्रभृतयः शिरःप्रभृतिभिरुद्गानं कुर्युः । तेषामेकैकया स्तोत्रीयान्त्यया अस्तुतया उद्गाता अभिसमेयुरिति वक्ष्यति ॥ ५ ॥

उद्गातुस्तासामुद्गानं विधत्ते—

सर्वेणात्मना समुद्धृत्योद्गेयमेषु लोकेषु नेद्याहितोऽसानीति ॥ ६ ॥

अध्वर्युप्रभृतिभिः परिशोषिताः स्तोत्रीयाः समुद्धृत्य संगृह्य सर्वेण स्तोत्रीयेण आत्मना आत्मभूतेन राजनेन उद्गेयमुद्गानं कार्यम् एषु लोकेषु स्थानेषु शिरःप्रभृतिषु नेत् नैव व्याहितोऽन्तरितोऽसानि भवानीति बुध्वा अतः प्रभृतिषु सर्वेषूद्गातृषु स्तुतं भवतीत्यर्थः ॥ ६ ॥

अथोद्गातुरासन्द्याः सकाशात्पादयोरवरोहणं विधत्ते—

एकस्यां स्तोत्रीयायामस्तुतायां पादावुपाहरति ॥ ७ ॥

पञ्चविंशस्तोमस्य राजनस्य एकस्यां स्तोत्रीयायाम् अन्त्यायामस्तु-

तायां प्रस्तूयमानायामुद्गाता पादावुपाहरति भूमेरासन्नं स्थापयति ॥७॥

अथ त्रयाणामप्युद्गातॄणां पादयोर्भूमौ स्थापनकालं विधत्ते--

सह निधनेन प्रतिष्ठामुपयन्त्येष्वेव लोकेषु प्रतितिष्ठन्ति ॥ ८ ॥

उत्तमे निधने राजनस्य 'ग्वाजीडासु बृहद्भा३४५'इत्यन्तेन सह प्रतिष्ठामुपयन्ति भूमौ पादौ प्रतिष्ठापयन्ति । एवं भूमौ स्थापनेन एष्वेव लोकेषु प्रतिष्ठिता भवन्ति । अत्र बहुवचनेन प्रस्तोतृप्रतिहर्तॄंस्तस्मात् प्रष्टिरूपादासनात् भूमौ पादप्रतिष्ठापनं कर्त्तव्यमित्यवगम्यते ॥ ८ ॥

अथ प्रसङ्गात् होतुरप्यासनविशेषं विधाय प्रशंसति--

प्रेङ्खामारुह्य होता शꣳसति महस एव तद्रूपं क्रियते ॥९॥

होता प्रेङ्खां दोलामारुह्य तत्रैवासीनो निष्केवल्यं बृहतीसहस्रात्मकं शस्त्रं शंसति तत्तेन महसस्तेजस एवैश्वर्य्यरूपमेतत्क्रियते ॥ ९ ॥

कथं प्रेङ्खारोहणेन महसो रूपं कृतं भवति तत्राह—

यदा वै प्रजा महस आविशति प्रेङ्खास्तर्ह्यारोहन्ति ॥ १० ॥

यदा खलु प्रजाः जनान् महस्तेज ऐश्वर्य्यमाविशति तर्हि तस्मिन् काले प्रेङ्खा आरोहन्ति ॥ १० ॥

तथाध्वर्य्योरासनं विधत्ते—

फलकमारुह्याध्वर्युः प्रतिगृणाति ॥ ११ ॥

औदुम्बरफलकमारुह्याध्वर्युः निष्केवल्यं शस्त्रं प्रतिगृणाति ॥११॥

अन्येषामपि ऋत्विजामासनानि विधत्ते—

कूर्चानितरेऽध्यासत ऊर्द्धा एव तदुत्क्रामन्तो यन्ति॥१२॥

उक्तेभ्यो येऽन्ये मैत्रावरुणादयस्ते कूर्चान् बृसीरध्यासते, तथा चैतरेयकं 'बृसीर्होत्रकाः समधिरोहन्ति सब्रह्मका' इति । एवं सर्वेषामृत्विजामूर्द्धोपवेशनात् उर्द्धा एव उर्द्धाभिमुखा एव सन्त उत्क्रामन्त ऐहिकभोगावसाने स्वर्गं प्रत्युत्क्रामन्तो यन्ति इदानीमुच्चिक्रमिषयैव तेष्वासनेषूपविशन्तीत्यर्थः ॥ १२ ॥

ब्राह्मणश्च शूद्रश्च सत्रिणां प्रशंसनं निन्दनञ्च क्रमेण कुर्य्यातां तदेतद्विधत्ते—

अभिगरापगरौ भवतो निन्दत्येनानन्यः प्रान्यः शꣳसति य एनान्निन्दति पाप्मानमेषाꣳ सोऽपहन्ति यः

प्रशंसति यदेवैषां सुष्टुतꣳसुशस्तं तत् सोऽभिगृणाति ॥ १३ ॥

अभिगरः स्तोता, अपगृणाति अपवदतीति अपगरो निन्दिता, तावुभौ आनीतौ भवतः। तयोरन्यः शूद्रः एनान् सत्रिणो निन्दति एतैः सम्यङ्नानुष्ठितमित्यपवदति। तथा अन्यो ब्राह्मणः एनान् प्रशंसति एषां सत्रिणां सम्बन्धि सुष्टुतं शोभनं स्तवनं सुशस्तं सुशसनं च यदास्ति तदेवासावभिगृणाति ॥ १३ ॥

अथ चर्म्मनिमित्तं ब्राह्मणशूद्रयोर्विवादं विधत्ते—

शूद्रार्य्यौ चर्म्मणि व्यायच्छेते तयोरार्य्यं वर्णमुज्जापयन्ति ॥ १४ ॥

शूद्रश्चार्य्यश्चोभौ चर्म्मणि परिमण्डले आदित्यप्रतिरूपे निमित्ते व्यायच्छेते व्यायमनं विविधमाकर्षणम्ममदीयम्ममदीयमिति तत् कुरुतस्तयोर्म्मध्ये आर्य्यं वर्णं ब्राह्मणजातिमुज्जापयन्ति यथा ब्राह्मणो जयेत् तथा कुर्युरित्यर्थः ॥ १४ ॥

तदेतत् स्तौति—

देवाश्च वा असुराश्चादित्ये व्यायच्छन्तस्तन्देवा अभ्यजयँस्ततो देवा अभवन्। परासुरा अभवन्नात्मना परास्य भ्रातृव्यो भवति य एवं वेद ॥ १५ ॥

पुरा वै देवाश्चासुराश्चासावादित्योऽस्माकमेवेति तस्मिन् आदित्ये विषये व्यायच्छन्तः विवादं कृतवन्तः। तमादित्यं देवा अभ्यजयन्। असुराः पराअभवन् जयं न प्राप्नुवन्। स्पष्टमन्यत् ॥ १५ ॥

ब्राह्मणस्य जयो यथा स्यात् तथा कर्त्तव्यमित्युक्तं, तदेव प्रशंसति—

यदार्य्यं वर्णमुज्जापयन्त्यात्मानमेव तदुज्जापयन्ति ॥ १६ ॥

आर्य्यं ब्राह्मणं वर्णमुज्जापयन्तीति उत्कर्षेणामुं प्रापयन्तीति यत् तत्तेन सत्रिण आत्मानमेव उज्जापयन्ति। जयतेर्णिच् 'क्रीङ्जीनां णाविं'त्यात्वे 'अर्त्ति ह्री ली'त्यादिना पुगागमः ॥ १६ ॥

व्यायमनहेतुभूतस्य चर्मणः किञ्चिद्गुणं विधाय प्रशंसति—

परिमण्डलश्चर्म भवत्यादित्यस्यैव तद्रूपं क्रियते ॥ १७ ॥

तच्चर्म परितः कृतमण्डलाकारं भवति। तत्तेन आदित्यस्यैव रूपमस्मिन् चर्म्मणि क्रियते। आदित्ये हि पुरा देवानां व्यायमनं कृतमित्युक्तम् अत एवैतच्चर्म आदित्यप्रतिरूपकं भवति ॥ १७ ॥

अथास्मिन् स्तोत्रे गीयमाने दुन्दुभीनां वादनं विधत्ते—

सर्व्वासु स्रक्तिषु दुन्दुभयो व्वदन्ति या व्वनस्पतिषु व्वाक्तामेव तज्जयन्ति ॥ १८ ॥

सर्वासु स्रक्तिषु वेद्याः कोणेषु दुन्दुभयो वदन्ति शब्दं कुर्य्युस्तदेवं यथा वदन्ति तथा तान्वादयतीत्यर्थः । वाद्यपूर्वं देवेभ्यो निष्क्रम्य वनस्पतिषु या वाक् प्रविष्टा तामेव वाचं तत्तेन दुन्दुभिशब्देन जयन्ति प्राप्नुवन्ति ॥ १८ ॥

अथ भूमिदुन्दुभिवादनं विधत्ते—

भूमिदुन्दुभिर्भवति या पृथिव्यां व्वाक्तामेव तज्जयन्ति ॥ १९ ॥

आग्नीध्रीयस्य पश्चादर्द्धमन्तर्वेद्यर्द्धं बहिर्वेदि भूमाववटं खात्वा सवनीयस्य ऋषभचर्म्मणापिदधाति स भूमिदुन्दुभिर्भवति तां "वादयन्ती"ति शेषः, स्पष्टमन्यत् ॥ १९ ॥

अन्यासामपि वाचां प्रयोगं विधत्ते—

सर्व्वा व्वाचो व्वदन्ति येषु लोकेषु व्वाक्तामेव तज्जयन्ति ॥ २० ॥

सर्वाः संस्कृताश्चासंस्कृताश्च ग्राम्यवाचश्च वदन्ति प्रेक्षकाः सर्वे जना इत्यर्थः, गतमन्यत् ॥ २० ॥

अथ राजपुरुषाणां देवयजनस्य परितो गमनं विधत्ते—

सन्नद्धाः कवचिनः परियन्तीन्द्रियस्यैव तद्रूपं क्रियतेऽथो महाव्रतमेव महयन्ति ॥ २१ ॥

सन्नद्धाः सम्बद्धहस्तत्राणादिकाः कवचिनः कवचयुक्ताश्च राजपुरुषाः रथमारुह्य गृहीतचापशराः सन्तः परियन्ति देवयजनं परितो गच्छेयुः। इन्द्रियस्यैव बलस्यैव तद्रूपं क्रियते यदेतत् कवचिनां परिगमनं अथो अपि च महाव्रतमेव महाव्रताख्यमेवाहर्महयन्ति ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य पञ्चमः खण्डः ।

अथ षष्ठः खण्डः ।

एवं पञ्चविधमहाव्रतस्तोत्रस्य शिरःप्रभृतिगान् पञ्चावयवानध्वर्वादयः पञ्च सहोपक्रम्य युगपदुद्गायेयुरित्येकः पक्षः, उद्गातैव कृत्स्नस्तोत्रमुद्गायेदित्यपरः, तत्र प्रथमं पक्षं विदधाति ।

सर्व्वे सहर्त्विजो महाव्रतेन स्तुवीरन् ॥ १ ॥

महाव्रतेन शिरआदिभिः पञ्चविधेन स्तोत्रेण ऋत्विजः सर्वे युगपत् स्तुवीरन् ॥ १ ॥

कतमः कतमेनावयवेन स्तुवीत इत्यत आह—

अदध्वर्य्युः शिरसोद्गायेन्मैत्रावरुणो दक्षिणेन पक्षेण ब्राह्मणाच्छंस्युत्तरेण गृहपतिः पुच्छेनोद्गातात्मना ॥२॥

शिरसा शिरस्त्वेन परिकल्पितेन त्रिवृता स्तोमेन गायत्रेण साम्ना अध्वर्य्युः शिरसोद्गायेत्, तथा मैत्रावरुणो दक्षिणेन पक्षेण, तथा तेन परिकल्पितेन रथन्तरसाम्ना पञ्चदशस्तोमेनोद्गातोद्गायेत्, तथा ब्राह्मणाच्छंस्युत्तरेण पक्षेण तदात्मना परिकल्पितेन सप्तदशस्तोमेन बृहत्साम्ना स्तुवीत। गृहपतिर्यजमानः भद्रं यज्ञायज्ञीयं च विकल्पितेन परिकल्पितेनान्यतरेण एकविंशस्तोमकेनोद्गायेत्। स्वयमुद्गाता आत्मनो मध्ये आत्मा तद्रूपतया परिकल्पितेन राजनसाम्नोद्गायेत्, अत्राध्वर्य्युः शिरसोद्गायेदित्यादिना अध्वर्य्युप्रभृतीनामुद्गातृकार्य्ये विधानात्प्रस्तोतृप्रतिहर्त्तारावपि तस्य तस्य कल्पनीयौ। तत्राध्वर्य्योरग्रे द्वितीयः प्रस्तोता तृतीयः प्रतिहर्त्ता कार्य्यः पक्षयोस्तु द्वितीययोरुद्गातृत्वात् तदनन्तरभाविनौ तृतीयचतुर्थावेव प्रस्तोतृप्रतिहर्त्तारौ कार्य्यौ पुच्छे तु अविनियुक्तौ सुब्रह्मण्योन्नेतारौ प्रस्तोतृप्रतिहर्त्तारौ कर्त्तव्यौ नह्यत्र गत्यन्तरमस्तीत्येकः पक्षः। अध्वर्य्युप्रभृतीनामेवोद्गातृत्वविधानान्नेतरयोर्बाध इति उद्गातृवर्गौ यौ प्रस्तोतृप्रतिहर्त्तारौ तावेव सर्वत्र क्रमेण प्रस्तोतृप्रतिहर्त्तारौ कुर्य्यातामित्यपरः पक्षः। इममेव पक्षं सूत्रकारः 'सर्व्वे सहर्त्विजो महाव्रतेन स्तुवीरन्नित्युद्गातृविकार एव स्या'दित्यादिना दर्शितवान्॥२॥

यद्यध्वर्य्युप्रभृतयः सर्वे महाव्रतेन स्तुवीरन्-तत्र किञ्चिद्विशेषमाह—

तद्यद्येवं कुर्य्युरेकैकया स्तोत्रीययाऽस्तुतयोद्गातारमभिसमेयुः ॥ ३ ॥

तत्तत्र महाव्रते यद्येवं कुर्य्युः। तदा स्वीयेषु स्तोत्रेषु शिरःप्रभृतिषु अस्तुतया एकैकया स्तोत्रीयया उद्गातारमभिसमेयुरभिगच्छेयुः। इयमस्तुतेत्युद्गात्रे निवेदयेयुरित्यर्थः ॥ ३ ॥

अथैतर्हि निवेदितानां स्तोत्रीयानां क्रमेणोद्गात्रा विनियोगप्रकारमाह—

तिसृभिरुद्गाताऽत्मन उद्गीयाथ या शिरसः स्तोत्रीया तां दध्यादपराभिस्तिसृभिरुद्गीयाथ या दक्षिणस्य पक्षस्य

स्तोत्रीया तान्दध्यादपराभिस्तिसृभिरुद्गीयाथ योत्तरस्य पक्षस्य स्तोत्रीया तान्दध्यात्तिसृभिर्वैकया वा स्तुतꣳस्यादथ या पुच्छस्य स्तोत्रिया तान्दध्यात् ॥ ४ ॥

आत्मनः राजनस्यादितस्तिसृभिः स्तोत्रियाभिरुद्गीय उद्गानं कृत्वा अथानन्तरं या शिरसः स्तोत्रीया अध्वर्युणावशेषिता तामुद्गाता दध्यात् प्रथमपर्यायस्य प्रथमाविष्टावानन्तरं तया स्तुवीतेत्यर्थः । एवमुत्तरत्रापि योज्यम् । यदा राजनस्य साम्नः पञ्चविंशस्तोमस्य अन्त्याभिस्तिसृभिः स्तोत्रीयाभिरेकया वा अस्तुतं स्यात् स्तुतिः कृता न भवेत् अथास्मिन् स्थाने गृहपतिनोच्छेषितां पुच्छस्य स्तोत्रियामप्रत्येतत्। नत्वेकैकस्या उच्छेषणम् ॥ ४ ॥

आत्मनि प्रतिधानञ्च किमर्थमित्यत आह—

आत्मन्येव तदङ्गानि प्रतिदधाति स्वर्गस्य लोकस्य समष्ट्यै ॥ ५ ॥

तत्तेन उक्तक्रमेण स्तोत्रीयाणां प्रक्षेपणेन आत्मनि मध्यकाय एव शिरःप्रभृतीन्यङ्गानि प्रतिदधति संयोजयति । सम्पूर्णाङ्गो हि गन्तुं शक्नोति प्रतिधानं स्वर्गस्य लोकस्य समष्ट्यै सम्प्राप्त्यै भवति ॥ ५ ॥

अथ सर्वे महाव्रतेन स्तुवीरन्नित्युक्तं पक्षं निरस्य उद्गातैव शिरःप्रकृतिकेन सर्वेण स्तोत्रेण स्तुवीतेत्यमुं पक्षं दर्शयति—

अथो खल्वाहुः कथमध्वर्युर्बह्वृचः साम गायेदित्युद्गातैव सर्वेणोद्गायेत्तदेव समृद्धꣳ समृद्धावेव प्रतितिष्ठन्ति ॥ ६ ॥

अध्वर्युर्यजुर्वेदाध्यायी मैत्रावरुणोऽपि, बह्वृचः ऋग्वेदाध्यायी, अनित्यं हि तयोः सामाध्ययनं ततः कथं साम गायेतामिति ब्रह्मवादिन आहुः । अथो खल्विति पक्षान्तरपरिग्रहे एवमुक्ता तदनन्तरमेव निश्चितवन्तः उद्गातैव सर्वेण कृत्स्नेन शिरःप्रभृतिकेन महाव्रतस्तोत्रेणोद्गायेत् तदेव समृद्धं, स्वशाखात्वेन सम्यगधीतत्वात् स्वरादिविकल्पाभावेन सम्यक् प्रयुक्तत्वात् तदेव स्तोत्रं समृद्धं सम्पूर्णं भवति । तथा च सत्रिणोऽपि समृद्धावेव प्रतिष्ठिता भवन्ति ॥ ६ ॥

अथास्मिन् पक्षे स्तुतिप्रकारमाह—

हविर्द्धाने शिरसा स्तुत्वा सꣳरब्धाः प्रत्यञ्च एयुस्ते दक्षिणेन धिष्ण्यान् परीत्य पश्चान्मैत्रावरुणस्य धिष्ण्य-

स्योपविश्य रथन्तरेण पञ्चदशेन स्तुवीरँस्त उदञ्चः सर्पंसर्पेयुर्जघनेन होतुर्धिष्ण्यं पश्चाद्ब्राह्मणाच्छंसिनो धिष्ण्यस्योपविश्य बृहता सप्तदशेन स्तुवीरँस्ते । येनैव प्रसर्पेयुस्तेन पुनर्निःसृप्योत्तरेणाग्नीध्रं परीत्य पश्चाद्ग्रार्हपत्यस्योपविश्य पुच्छेनैकविंशेन स्तुवीरँस्ते येनैव निःसर्पेयुस्तेन पुनः प्रसृप्य यथायतनमुपविश्यासन्दीमारुह्योद्गातात्मनोद्गायति ॥ ७ ॥

हविर्द्धाने हविर्द्धानमण्डपे उद्गातारः शिरसा स्तुत्वा संरब्धाः समन्वारब्धाः प्रत्यञ्चः प्रत्यङ्मुखाः सन्त पयुः हविर्द्धानाद्गच्छेयुः अपरया द्वारा हविर्द्धानान्निष्क्रम्य मार्जालीयादीनां धिष्ण्यानां दक्षिणतः परीत्य पूर्वया द्वारा सदः प्रविश्य मैत्रावरुणधिष्ण्यस्य पश्चादुपविश्य रथन्तरेण पञ्चदशेन स्तुवीरन्। ततस्त उद्गातारः उदञ्चः उदङ्मुखाः प्रसर्पेयुः होतुर्धिष्ण्यमपरेण ब्राह्मणाच्छंसिधिष्ण्यस्य पश्चादुपविश्य बृहता सप्तदशेन स्तुवीरन् ते पुनर्येनैव पथा प्रसर्पेयुः तेनैव पुनर्निःसृप्य निर्गत्य दक्षिणेन धिष्ण्यान् परीत्य पूर्वया द्वारा सदो निर्गत्य अपरया द्वारा हविर्द्धाने प्रपद्य पूर्वया द्वारा हविर्द्धानान्निष्क्रम्येत्यर्थः । तत उत्तरेणाग्नीध्रमाग्नीध्रीयं धिष्ण्यं परीत्य गार्हपत्यस्य पश्चादुपविश्य एकविंशस्तोमकेन पुच्छेन स्तुवीरन् त उद्गातारो येनैव पथा निःसर्पेयुः सदसो निष्क्रान्ताः तेनैव पुनः सदः प्रसृप्य प्रपद्य यथायतनमुपविशेयुः। तत उद्गाता आसन्दीमारुह्य आत्मनोद्गानं कुर्य्यात् । अत्रोपविश्येति पूर्वकालतामात्रे क्त्वाप्रत्ययो द्रष्टव्यः ॥ ७ ॥

अत्रोद्गाने पत्नीनां वीणाविशेषैरुपगानं विधत्ते—

तं पत्न्योऽपघाटिलाभिरुपगायन्त्यार्त्विज्यमेव तत्पत्न्यः कुर्वन्ति सह स्वर्गंल्लोकमयामेति ॥ ८ ॥

तमुद्गातारमपघाटिलाभिर्वीणाविशेषैरुपगायन्ति उपगानं कुर्य्युः तदुपगानमार्त्विज्यमेव पत्न्यः कुर्वन्ति यजमानैः सह स्वर्गं लोकं प्राप्नुयामेति बुद्ध्या । अपघाटिलाशब्दस्यार्थं सूत्रकारो विस्पष्टमेवोक्तवान् 'पश्चिमेनोपगातृन्द्वेद्वे एकैका पत्नी काण्डवीणां पिच्छोलां व्यत्यासं वादयेदुपमुखं पिच्छोलावादनेन काण्डमयी अपघाटिला इत्याचक्षत' इति, उपमुखं स्थापयित्वा मुखमारुतेन वाद्यमाना वीणाऽपघाटिला इत्याच-

श्रुतइति । पिच्छोला वादनदण्डेन वाद्यमाना काण्डमयी काण्डवीणा इत्यर्थः ॥ ८ ॥

अस्मिन्नहनि सर्वेषामपि यजमानानां गृहेषु ब्राह्मणभोजनार्थं पाकः कर्त्तव्य इति विधत्ते—

कुले कुलेऽन्नं क्रियते तद्यत्पृच्छेयुः किमिदं कुर्वन्तीतीमे यजमाना अन्नमत्स्यन्तीति ब्रूयुः ॥ ९ ॥

अन्येष्वहःसु गृहपतिप्रधाना एव सर्वे ब्राह्मणान् भोजयितुमन्नानि कामयन्ते । अस्मिन् अहनि कुले कुले यजमानानां गृहे गृहे अन्नं क्रियते पृथक् पृथक् ब्राह्मणान् भोजयितुमन्नं कर्त्तव्यम् । तत्तत्र एवं क्रियमाणे यद्यदि पृच्छेयुः प्रेक्षका जनाः किमिदं कुले कुले कुर्वन्तीति तदैवं प्रतिब्रूयुः इमे यजमाना अन्नमत्स्यन्तीति अस्मिन् लोके बहुलमन्नं प्रदाय अमुष्मिन् लोके बहुलमेते भोक्ष्यन्त इति ॥ ९ ॥

अथैतत्प्रशंसति—

यो वै दीक्षितानां पापं कीर्त्तयति तृतीयमेवाऽंशं पाप्मनोहरत्यन्नादस्तृतीयं पिपीलिकास्तृतीयम् ॥ १० ॥

यः खलु दीक्षितानां दीक्षणीयेषु संस्कृतानां पापमशुभं कीर्त्तयति स पुरुषः एषां पापस्य तृतीयमंशं हरति । यो दीक्षितानामन्नमात्ति सोऽन्नादस्तृतीयमंशं हरति । आज्येष्वन्नेषु च बहुषु सत्सु बह्व्यः पिपीलिकास्तद्भक्षणार्थमागच्छन्ति तास्तृतीयमंशं पापं हरन्ति । अत आज्यादिषु पिपीलिकापतने दोषाशंका न कार्येत्यर्थः ॥ १० ॥

परिमादः पूर्वमुक्ताः ता अन्नस्य प्रशंसति—

परिमाद्भिश्चरन्ति त्वक्च वा एतल्लोम च महाव्रतस्य यत् परिमादस्त्वचञ्चैव तल्लोम च महाव्रतस्याप्त्वावरुन्धते ॥ ११ ॥

याः पूर्वमुक्ताः परिमादस्ता महाव्रतस्य त्वक्लोमस्थानीयास्ततस्ता आप्त्वा प्राप्य अवरुन्धते स्वयमपि त्वचं लोम च लभन्त इत्यर्थः । 'यदेतान् ह वै पुरुषो देवेभ्यः करोति तादृगस्मै देवाः कुर्वन्ती'ति श्रुतेः ॥ ११ ॥

अथ वीणाविशेषस्य वादनं विधते—

वाणं वितन्वन्त्यन्तो वै व्वाणोऽन्तो महाव्रतमन्तेनैव तदन्तमभिवादयन्ति ॥ १२ ॥

वाणं महावीणा तम् वितन्वन्ति तंत्रीभिः संयोज्य वादयन्तीत्यर्थः ।

वाणो वीणानामन्तः परमः श्रेष्ठ इत्यर्थः । वाणः खलु सर्वेषां वाद्यविशेषाणां अन्तोऽवसानभूतः महाव्रतमहामन्तः तत्तेनान्तेनैवान्तमभिलक्ष्य वादयन्ति ॥ १२ ॥

तस्य वाणस्य तन्त्रीसंख्यां विधाय प्रशंसति—

शततन्त्रीको भवति शतायुर्वै पुरुषः शतवीर्य्यः ॥१३॥

"सर्वमायुर्य्यन्ती"ति शेषोऽर्थो निगदसिद्धः ॥ १३ ॥

वाणस्योल्लेखनं विधाय प्रशंसति—

तमुल्लिखेत्'प्राणाय त्वाऽपानाय त्वा व्यानाय त्वेति प्राणापानव्यानानेव तदाप्त्वाऽवरुन्धते' ॥ १४ ॥

प्राणाय त्वेत्यादिना मन्त्रेण औदुम्बर्य्याः शाखया वाणमुपलिखति हे वाण ! त्वां प्राणाद्यर्थमुल्लिखामीति मन्त्रार्थः । तत्तेन प्राणादीनि चाप्त्वा प्राप्य निरुन्धते इति ॥ १४ ॥

अथ यजमानप्रेष्यास्त्रियः उदकुम्भं धारयन्त्यो नयेयुरिति विधत्ते—

परिकुम्भिन्यो मार्ज्जालीयं यन्'तीदम्मध्विदम्माध्वि'ति सघोषा एव तद्वयो भूत्वा सह स्वर्गँ लोकं यन्ति ॥१५॥

इदं मध्विदं मध्विति मन्त्रं शंसन्त्यः पुनः पुनर्गायन्त्यः कुम्भिन्यो दास्यः मार्ज्जालीयं धिष्ण्यं परियन्ति परितो नृत्यन्तीत्यर्थः । तत्तेन एवं सशब्दं परिवर्त्तमानेन यजमानाः सघोषा एव सन्तः वयः पक्षिण इवान्तरिक्षगा भूत्वा सह संघशः स्वर्गं लोकं प्राप्नुवन्ति देहावसान इत्यर्थः ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य षष्ठः खण्डः ।

अथ सप्तमः खण्डः ।

इत्थं गवामयनस्योपान्त्यमहर्विस्तरेणोक्तं तथा पूर्वस्मिन् पक्षस्याभिप्लविकेष्वहःसु स्वरसामसु च अन्वहमेकमेव ब्रह्मसामाभीवर्त्तस्तोत्रीया त्वन्या अन्या उत्तरस्मिन् पक्षसि ब्रह्मसामस्तोत्रीया एका एव 'इन्द्र क्रतुन्न आभरेति'सामनि अन्वहमन्यदन्यदिति च सर्वस्य गवामयनस्य साधारण्येनोक्तम् । अथ तस्मिन् प्रकृते गवामयने सर्वेष्वहःसु आर्भवे पवमाने अनुष्टुप्सु गौरीवितं साम कार्य्यमिति विधित्सुराह—

देवा वै वाचं व्यभजन्त तस्या यो रसोऽत्यरिच्यत तद्गौरीवितमभवदनुष्टुभमनु परिप्लवते वागनुष्टुग्वाचो रसा गौरीवितम् ॥ १ ॥

देवाः खलु पुरा वाचं छन्दोरूपां व्यभजन्त गायत्रीं प्रातःसवने अग्नये वसुभ्यो व्यभजन्त। त्रिष्टुभं माध्यन्दिने सवने इन्द्राय रुद्रेभ्यो व्यभजन्त। जागतं तृतीयसवने विश्वेभ्यो देवेभ्य आदित्येभ्यो व्यभजन्त। एवं विभज्यमानायास्तस्या वाचः यो रसः सारोऽत्यरिच्यत तद्गौरीवितसाम सामाभवत्। तच्च अनुष्टुभमनुलक्ष्य परिप्लवते सञ्चरति। कुतएतत्? यदिदमनुष्टुप्छन्दः सा वाक् गौरीवितं च वाचो रसः अतो अनुष्टुप्छन्दस्कामेवर्चं आधारतया गृह्णाति ॥ १ ॥

एवं विशिष्टच्छन्दस्यतत्साम विधाय प्रशंसति—

यद्गौरीवितेनान्वहꣳ स्तुवते वाचयेव तद्वाचा रसन्दधाति ॥ २ ॥

अभि प्र गोपतिं गिरेत्यस्यां योनावुत्पन्नं साम गौरीवितं तच्चानुष्टुभमूहते एवमूहेनानुष्टुभे तृचे गेयेन तेन साम्ना अन्वहं गवामयने अहन्यहनि सर्वेष्वहःसु आर्भवे पवमाने स्तुवते इति यत् तत्तेन वाचयेव वाचा रसं सारं दधति निदधति ॥ २ ॥

एतद्वेदनं प्रशंसति—

रसवद्वाचा वदति य एवं वेदेति ॥ ३ ॥

एवमर्थं यो वेद जानाति स वाचा रसवत् रसयुक्तमेव वदति वचनस्य सारवत्त्वेन ग्राह्या वाग् भवतीत्यर्थः ॥ ३ ॥

अस्मिन् साम्नि विद्यमानं किञ्चिदनूद्य प्रशंसति—

द्व्युदासम्भवति स्वर्गस्य वा एतौ लोकस्यावसानदेशौ पूर्वेणैव पूर्वमहः सꣳस्थापयन्त्युत्तरेणोत्तरमहरभ्यतिवदन्ति ॥ ४ ॥

द्वावुदासावुत्क्षेपावस्मिन् साम्नि भवत इति द्व्युदासम् उत्क्षेपोनाम दीर्घविशेषः। एतावुत्क्षेपौ स्वर्गस्य लोकस्यावसानदेशौ पारदर्शिनौ तत्र पूर्वेणैवोदासेन पूर्वं वर्त्तमानमहः संस्थापयन्ति उत्तरेणोदासेन उत्तरमागाम्यहः अभि उद्दिश्य अतिवदन्ति इदमहरतीत्य प्रतिपादयन्ति ॥ ४ ॥

गौरीवितसामगतावुदासावुपजीव्य प्रशस्य तद्व्यतिरेके बाधोपन्यासेन प्रशंसति—

एतद्वै यज्ञस्य श्वस्तनं यद्गौरीवितं यद्गौरीवितमनुसृजेयुरश्वस्तना अप्रजसः स्युः ॥ ५ ॥

यद्गौरीवितं साम एतत् खलु यज्ञस्य यज्ञसम्बन्धि श्वस्तनं श्वः परस्मिन् दिने भवं पूर्वापरयोरह्नोः सन्धायकमित्यर्थः। यद्यदि तद्गौरीवितमनुसृजेयुः परित्यजेयुः तदा सत्रिणोऽश्वस्तनाः उत्तरकाले सम्बन्धरहिताश्च अप्रजसः प्रजारहिताः स्युर्भवेयुः। अतोऽन्वहं कर्त्तव्यमित्यर्थः५॥

प्रकारान्तरेण प्रशंसति—

सं वा अन्यो यज्ञस्तिष्ठत इत्याहुर्वागेव न सन्तिष्ठत इति यद्गौरीवितमन्वहं भवति वाचमेव तत्पुनः प्रयुङ्क्ते ॥ ६ ॥

अन्यो वाग्रहितो यज्ञः सन्तिष्ठते वै परिसमाप्त एव भवतीति ब्रह्मवादिन आहुः तथा अन्येषु सन्तिष्ठमानेष्वपि वागेव न सन्तिष्ठत इत्याहुर्यस्मादेवं तस्माद्गौरीवितं वाचः स्वरात्मकं सामान्वहं भवति तत्तेन। असंस्थितां पुनः प्रयुङ्क्ते श्वस्तनाभावाय गौरीवितं साम प्रत्यहमनुष्टुप्सु कर्त्तव्यमित्युक्तं भवति। अत एतत् आद्यन्ते अहनी मुक्त्वा अन्येषु मध्यवर्त्तिष्वहःसु कर्तव्यमिति ज्ञायते ॥ ६ ॥

अथ सुज्ञानाख्यं सामान्वहं कार्य्यमिति विधित्सुस्तस्य निधनं विदधाति—

स्वर्णिधनमन्वहं भवति ॥ ७ ॥

'सोमः पुनान ऊर्म्मिणे'त्यस्यां योनावुत्पन्नं सुज्ञानं तस्योपेति निधनं तस्य स्थाने स्वरिति निधनं कर्त्तव्यमित्यर्थः। तथा च सूत्रकृतोक्तं 'उपास्थानेष्वन्यानि निधनानि स्वरानादेशे तथा स्वराणि स्युरि'ति प्रकृत्य स्वरसकाशात्ते दैवोदाससुज्ञानयोश्चेति ॥ ७ ॥

अथैतत् प्रशंसति—

देवक्षेत्रं वा एतेऽभ्यारोहन्ति ये स्वर्णिधनमुपयन्ति स उ वै सत्रिणः सत्रमुपनयेदित्याहुर्य एनान्देवक्षेत्रमभ्यारोहयेदिति न वै देवक्षेत्र आसीन आर्त्तिमार्च्छति यत् स्वर्णिधनमन्वहं भवति नैव काञ्चनार्त्तिमार्च्छन्ति॥८॥

ये स्वर्णिधनमुपयन्ति उपगच्छन्ति प्रयुञ्जते इत्यर्थः। एते देवक्षेत्रं देवानां स्थानं स्वर्गशब्दवाच्यमेवाभ्यारोहन्ति। अपि च य उद्गातादिरेतान् यजमानान् देवक्षेत्रं स्वर्णिधनेनाभ्यारोहयेत्। इतिहेतौ अतः कारणात् स एव सत्रिणो यजमानान् सत्रमुपनयेत फलप्रदानशब्दं सम्पूर्णप्रयोगं प्रापयेदित्याहु ब्रह्मवादिनः। किञ्च न वै खलु देवक्षेत्रे देवा-

नां स्थाने आसीनः पुरुषः आर्त्तिमार्च्छति कदाचिदपि तस्यार्त्तिर्न भवतीत्यर्थः। एवं सति यत् स्वर्णिधनमन्वहमनुष्ठितं भवति तेन काञ्चनार्तिंकामपि हिंसां नैवार्च्छन्ति न प्राप्नुवन्ति ॥ ८ ॥

अस्मिन् स्वर्णिधने किञ्चिद्दोषमाशङ्क्य परिहरति—

च्यवन्ते वा एतेऽस्माल्लोकादित्याहुर्यं स्वर्णिधनमुपयन्तीति यद्दचा स्वरूपं यन्त्यस्मिँल्लोके प्रति तिष्ठन्ति यदेकारोऽन्तरिक्षे यत्साम्नामुष्मिन्त्सर्वेषु लोकेषु प्रति तिष्ठन्ति स्वर्णिधनेन तुष्टुवानाः ॥ ९ ॥

अन्वहं स्वर्णिधनमुपयन्तः सद्य एवैते स्वर्गं गच्छन्ति । अतोऽस्माल्लोकात् च्यवन्त इत्याहुर्ब्रह्मवादिनस्तस्यायं परिहारः यद्दचा स्तोत्रीयया स्वरूपं यन्ति स्वर्णिधनमुपगच्छन्ति । ऋचि हि स्वर्णिधनं गीयते तेनास्मिन् लोके प्रतितिष्ठन्ति ऋगात्मको हि भूर्लोकः । एषुवरिति (?)यदेकारस्तत्र विद्यते तेनान्तरिक्षलोके प्रतितिष्ठन्ति यत् साम्ना स्वर्णिधनमुपयन्ति तेनामुष्मिन् स्वर्गे प्रतितिष्ठन्ति । एवं च स्वर्णिधनेन तुष्टुवानाः स्तुवन्तः सत्रिणः सर्वेषु लोकेषु प्रतिष्ठिता भवन्ति ॥ ९ ॥

अथ सुज्ञानं विधत्ते—

सुज्ञानं भवति ॥ १० ॥

स्पष्टोऽर्थः ॥ १० ॥

सोमः पुनान इत्यस्यामुत्पन्नं साम शोभनज्ञानहेतुत्वात् सुज्ञानम् एतदेव आख्यायिकामुखेन प्रदर्श्य सत्रिणामपि अनेन साम्ना शोभनज्ञानप्राप्तिर्भवतीत्याह—

देवा वै स्वर्गल्लोकं यन्तोऽज्ञानादबिभयुस्त एतत् सुज्ञानमपश्यँस्तेन ज्ञात्रमगच्छन्यत् सुज्ञानमन्वहं भवति ज्ञात्रमेव गच्छन्ति ॥ ११ ॥

देवाः पुरा स्वर्गं लोकं गच्छन्तः शङ्कमाना अज्ञानादबिभयुः भीता आसन् तदेतत्सुज्ञानं साम दृष्ट्वा प्रायुञ्जत प्रायुङ्क्त तेन ज्ञात्रं संज्ञानमगच्छन् प्राप्ताः। तथा सति इदानीमपि सत्रे अन्वहं सुज्ञानं क्रियते इति यत् तेन ज्ञात्रं ज्ञानमेव गच्छन्ति सर्वे यजमानाः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथ इयावाइवन्निहवश्चैते द्वे सामनी अन्वहं भवेतामिति विधित्सुराह—

ये वै ऽवाचमन्नमादयन्त्यन्नादा भवन्ति ये ऽितर्षयन्ति रूक्षा भवन्ति ॥ १ ॥

ये खलु पुरुषाः वाचमन्नमादयन्ति वागन्नमन्निनां प्रयुञ्जत इत्यर्थः । ते अन्नादा अन्नस्यात्तारो भवन्ति ये वाचम्ऽितर्षयन्ति निरभिलाषां कुर्वन्तीत्यर्थः । ते रूक्षा अन्नराहित्येन पुरुषा अस्निग्धा भवन्ति ॥ १ ॥

किञ्च यद्वाचोऽन्नन्तद्दर्शयति—

गौरीवितꣳ इयावाइवन्निहव एतानि वै सामानि ऽवाचोऽन्नमेतेषां ऽवागन्नं यदेतानि न च्यवन्ते ऽवाचमेव तदन्नमादयन्ति तेन सर्वेऽन्नादा भवन्ति ॥ २ ॥

पूर्वं विहितस्यापि गौरीवितस्य पुनः सम्पादमेतत्स्तुत्यर्थम् । इतरे एवाप्राप्तत्वात् विधित्सिते एतानि सामानि त्रीणि वाचमृगात्मिकाया अन्नं वागक्षराभिव्यक्तिद्वारा अन्नवदुपकारकं, तथा एषाञ्च साम्नामृगात्मिका वागन्नं साधारणत्वेन तावदुपकारकम् एवम्परस्परोपकारकत्वात् साम्नां वाचश्चान्नत्वम् । एवं सति एतानि सामानि अन्वहं न च्यवन्ते न गच्छन्ति प्रयुज्यन्त एवेति यत् तत्तेन वाचमेवादयन्ति साम्नां प्रयोक्तारः तेन सर्वे सत्रिणोऽन्नादा भवन्ति ॥ २ ॥

अथैतानि प्रकारान्तरेण प्रशंसति—

अभिक्रान्तापक्रान्तानि भवन्त्यभिक्रान्तापक्रान्तं वै ऽवाचो रूपम् ॥ ३ ॥

अभिक्रान्तमारोहः अपक्रान्तमवरोहः तदुभयमेतेषु सामसु भवति किमतो भवतीति उच्यते लोके भद्रां वाचं पुरुषा अभिक्रामन्ति तद्विपर्ययां वाचं पुरुषाः अपक्रामन्ति । अतो अभिक्रान्तापक्रान्ता एव । अभिक्रान्तापक्रान्तान्येवैतानि सामानि वाचो रूपमनुरूपं भवति ॥ ३ ॥

अथ माध्यन्दिने पवमाने बृहतीष्वन्वहं ध्रुवः कार्य्य इति विधत्ते—

ध्रुवोऽन्वहं भवति ॥ ४ ॥

'पुनानः सोमधारये'इत्यस्यां योनावुत्पन्नं साम ध्रुवः । तत् प्रतिदिवसं कर्त्तव्यमित्यर्थः ॥ ४ ॥

तदेतत् लौकिकध्रुवसाम्येन स्तौति—

समुद्रं वा एते प्रस्रान्ति ये सर्ववँत्सरमुपयन्ति यो-

वा अप्लवः समुद्रं प्रस्नाति न स तत उदेति यत्प्लवो भवति स्वर्गस्य लोकस्य समष्ट्यै ॥ ५ ॥

ये संवत्सरं संवत्सरसाध्यं गवामयनमुपयन्ति एते समुद्रमेव प्रस्नान्ति अवगाहन्ते समुद्रवदस्य सत्रस्यातिगाम्भीर्य्यात् । यः खलु अप्लवः उडुपरहितः सन् समुद्रमवगाहते स ततः समुद्रान्नोदेति नोद्गच्छति निमग्न एव भवति यस्तु प्लवात् समुद्रं प्रस्नाति स तु ततः सकाशादुदेत्येव । एवं सति समुद्रकल्पे संवत्सरसत्रे अन्वहं प्लवो भवतीति यत् तेन प्लवेन संवत्सराख्यं सत्रन्तीर्त्वा स्वर्गलोकस्य सम्प्राप्त्यै यजमाना भवन्ति ॥ ५ ॥

अत्रत्यन्निधनमनूद्य प्रशंसति—

अति विश्वानि दुरिता तरेमेति यदेवैषां दुष्टुतं दुःशस्तं तदेतेन तरन्ति ॥ ६ ॥

अस्य साम्नो निधनम् 'अति विश्वानि दुरिता तरेमे'ति अस्मिन्निधने विश्वानि दुरितानि अतितरेमेत्याशासनं दृश्यते एषां सत्रिणां यद्दुष्टुतम् अयथाशास्त्रं स्तुतं यच्च दुःशस्तम् अयथाशंसनम् स्तवनं कृतम् एते नातितरणप्रार्थनेन तदुभयन्तरन्ति ॥ ६ ॥

अथाभिप्लवषडहस्य प्रथमेऽहनि अनुष्टुप्स्वोकोनिधनाख्यं साम कर्त्तव्यमिति विधत्ते—

ओकोनिधनꣳ षडहमुखे भवति ॥ ७ ॥

'तमु अभिप्रगायत आजामि रक्ते अव्यत' इत्येतस्यां योनावुत्पन्नं साम ओकोनिधनं तत्र हि ओक इति निधनं दृश्यते । तत् साम षडहस्य मुखे षडहस्य प्रमुखे प्रथमेऽहनि कार्य्यम् ॥ ७ ॥

तदेतत् स्तौति—

परां वा एते परावतं गच्छन्ति ये षडहस्यान्तं गच्छन्ति यदोकोनिधनꣳ षडहमुखे भवति प्रज्ञात्यै ॥८॥

ये सत्रिणः षडहस्य अन्तं गच्छन्ति प्रथममहरारभ्य यावत् षष्ठमहस्तावत्पर्य्यन्तैरन्तर्य्येणानुतिष्ठन्ति ते परामपरावतम् अतिदूरं गच्छन्ति अतिदूरं हि गच्छतां मार्गज्ञानमपेक्षितं यत् षडहमुखे ओकोनिधनं भवति तत् यज्ञस्य प्रज्ञात्यै भवति ॥ ८ ॥

कथमोकोनिधनेन प्रज्ञातिर्भवति तत्राह—

यदा वै पुरुषः स्वमोक आगच्छति सर्व्वं तर्हि प्रजा-

नाति सर्व्वमस्मै दिवा भवति ॥ ९ ॥

यदा वै खलु पुरुषः स्वं स्वकीयम् ओको गृहं स्थानमागच्छति प्राप्नोति तर्हि तस्मिन् काले सर्वं प्रजानाति स्वगृहप्राप्तेः पूर्वं समाधिक्येन किञ्चिन्न ज्ञायते गृहप्राप्तौ सत्यां समपनोदे सति ज्ञानवान् भवतीत्यर्थः। सर्वञ्च विद्यमानं वस्तु अस्मै गृहप्राप्ताय दिवा दिवे प्रकाशाय भवति प्रज्ञातं भवतीत्यर्थः। अत ओको निधनेन तस्य प्रज्ञातिर्य्युक्तेत्यर्थः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

उक्तं गवामयनमथ तस्य दीक्षाकालमाह—

एकाष्टकायां दीक्षेरन् ॥ १ ॥

माघकृष्णाष्टमी एकाष्टका। उक्तं हि आपस्तम्बेन 'माघ्याः पौर्णमास्या उपरि षडष्टका तस्यामष्टमी ज्येष्ठा या सम्पद्यते तामेकाष्टकेत्याचक्षत' इति ॥ २ ॥

अथ तस्यामेकाष्टकायां संवत्सरसत्राय दीक्षेरन्—

एषा वै सँव्वत्सरस्य पत्नी यदेकाष्टकैतस्यां वा गताꣳ रात्रिं व्वसति साक्षादेव तत् सँव्वत्सरमारभ्य दीक्षन्ते ॥

यत् या इयमेकाष्टका एषा खलु संवत्सरस्य प्रजापत्यात्मकस्य पत्नी स्त्री तथा सति एकस्यामेवैकाष्टकायाम् एताꣳ रात्रिम् 'अत्यन्तसंयोगे द्वितीया' वसति। संवत्सरात्मकः प्रजापतिः शेते। लोके पत्न्याः समीपे हि पतीरात्रौ वसति। एवं चैकाष्टकायां दीक्षमाणाः साक्षात् प्रत्यक्षमेव संवत्सरं प्रजापत्यात्मकमारभ्य गीत्वा दीक्षन्ते ॥ २ ॥

अस्मिन् पक्षे एको दोषः स्यादित्याह—

तस्य सानिर्य्या यदपोऽनभिनन्दन्तोऽभ्यवयन्ति॥३॥

तस्यैकाष्टकायां दीक्षितस्य सानिर्या दोषः। अनभिनन्दन्तः प्रीतिहरिताः सन्तः। अपोऽभ्यवयन्तीति यदेकाष्टकायां दीक्षमाणानां शिशिर अवभृथः स्यात् तदा आपः सूर्य्यरश्मिभिः शोषितत्वेन अल्पीयस्त्वात् तद्विषयाभिलाषरहिता एवावभृथं गच्छन्ति योयमभिनन्दनाभावः सोऽस्मिन् दोषपक्षे इत्यर्थः ॥ ३ ॥

अपरोऽप्ययं दोषः स्यादित्याह—

विच्छिन्नं वा एते सत्रँवँत्सरस्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवेते ॥ ४ ॥

संवत्सरस्य विच्छिन्नं विच्छेदमभिमुखीकृत्यैते दीक्षन्ते य एकाष्टकायां दीक्षन्ते दीक्षितान् कुर्वन्ति । कुत एतत् ? उच्यते 'मधुश्च माधवश्च वासन्तिकावृतू' इत्यादाविव । अत्रापि ऋतुशब्देन मास एवोच्यते । यावेतौ माघफाल्गुनौ मासौ ऋतुशब्दवाच्यौ एतावन्तनामानौ शिशिरर्तुः संवत्सरान्त इति ॥ ४ ॥

तौ मासावन्तशब्दवाच्यौ तयोर्हि संवत्सरः समाप्यते तथा चैवास्मिन् संवत्सरे सत्रारम्भः अपरस्मिन् यजत इत्यत आह—

आर्त्तं वा एते सत्रँवँत्सरस्याभि दीक्षन्ते येऽन्तनामानावृतू अभि दीक्षन्ते ॥ ५ ॥

ये अन्तनामानौ अन्तशब्दवाच्यौ ऋतू मासावभिलक्ष्य दीक्षन्ते एते संवत्सरस्यान्तं हि अन्तमेवाभिलक्ष्य दीक्षन्ते ॥ ५ ॥

एवं दोषग्रस्तत्वादयं पक्षो न कार्य्य इत्याह—

तस्मादेकाष्टकायान्न दीक्ष्यम् ॥ ६ ॥

यस्मादेते पूर्वोक्ता दोषाः प्रसज्येरन् तस्मादेकाष्टकायान्न दीक्ष्यं दीक्षणं न कार्य्यम् ॥ ६ ॥

एवं प्रथमपक्षं निन्दित्वा पक्षान्तरमाह—

फाल्गुने दीक्षेरन् ॥ ७ ॥

यस्मिन् मासे फाल्गुनी पौर्णमासी युज्यते स फाल्गुनः । तस्मिन् दीक्षा कार्य्या ॥ ७ ॥

तदेतद्गुणकथनेन प्रशंसति—

मुखं वा एतत्सत्रँवँत्सरस्य यत् फाल्गुनो मुखत एव तत्सत्रँवँत्सरमारभ्य दीक्षन्ते ॥ ८ ॥

यत् फाल्गुनो मास एतत् संवत्सरस्य मुखं यदुत्तरे फाल्गुनो मुखत एव तत् संवत्सरस्याग्निमाधायेति । एतदुक्तं भवति यदा फाल्गुनी पौर्णमासी उत्तरफल्गुनीयुक्ता तदा फाल्गुनमासः संवत्सरस्यादिर्भवतीति तत्तथा सति मुखत एव प्रथमत एव संवत्सरमारभ्योपक्रम्य दीक्षन्ते ॥ ८ ॥

अस्मिन् पक्षेऽपि दोषो विद्यत इत्याह—

तस्य सानिर्य्या यत्सम्मेघे विषुवान् सम्पद्यते ॥९॥

तस्य फाल्गुने दीक्षणस्य सानिर्या दोषः यत् संमेघे मेघसंघयुक्ते सत्रे विषुवान् मध्यमहः सम्पद्यते। आदित्यस्तुतो हि विषुवान् तस्य मेघैरन्तर्द्धानं सम्भाव्यते इति यत् स दोषः स्यादित्यर्थः ॥ ९ ॥

तर्हि सर्वदोषविनिर्मुक्तो दीक्षायाः कालः क ? इत्याशङ्क्याह—

चित्रापूर्णमासे दीक्षेरन् ॥ १० ॥

चित्रायुक्तः पौर्णमासः चित्रापूर्णमासः तस्मिन् दीक्षेरन् ॥१०॥

तदेतत् स्तौति—

चक्षुर्व्वा एतत्सव्वँत्सरस्य यच्चित्रापूर्णमासो मुखतो वै चक्षुर्मुखत एव तत्सव्वँत्सरमारभ्य दीक्षन्ते तस्य न निर्य्यास्ति ॥ ११ ॥

चित्रापूर्णमास इति यत् एतत् संवत्सरस्य चक्षुर्वै। जायमानस्य हि प्रथमं मुखञ्जायते तत्रापि चक्षुरेव प्रथममाविर्भवति। अतस्तत्सादृश्यादस्य चक्षुषः। उक्तक्रमेण मुखतो मुखप्रदेश एव चक्षुः। अतो मुखत एव तत् संवत्सरमारभ्य गृहीत्वा दीक्षन्ते। यः फाल्गुनगुण उक्तः सोऽप्यत्र विद्यत इत्युक्तं भवति। तस्य न निर्य्यास्ति कश्चिदपि दोषो न विद्यते॥११॥

इत्थं चित्रापौर्णमास्यां दीक्षितव्यमित्युक्तम् अथ तस्मिन्नेव मासे शुक्लैकादश्यां दीक्षितव्यमित्याह—

चतुरहे पुरस्तात् पौर्णमास्या दीक्षेरन् ॥ १२ ॥

चैत्र्याः पौर्णमास्याः पुरस्ताच्चतुरहे चतुर्णामहां समाहारश्चतुरहस्तस्मिन्विद्यमाने गवामयनस्य दीक्षा कार्य्या ॥ १२ ॥

एवं दीक्षणस्य गुणमाह—

तेषामेकाष्टकायां क्रयः सम्पद्यते तेनैकाष्टकान्न संबट् कुर्व्वन्ति ॥ १३ ॥

सर्वेषां सत्राणां द्वादश दीक्षा भवन्ति तत एकादशीप्रभृति द्वादशसु गतासु रात्रिषु त्रयोदशीरात्रिरष्टमी स्यात्। एकाष्टका च बहुलाष्टमीति अस्यामेकाष्टकेत्युपचारः तस्याः क्रयः सम्पद्यते। प्रथमे ह्युपसर्जने राजक्रयस्तस्मिन् दिने प्रातःकाले प्रायणीयाद्या यज्ञावयवाः प्रक्रम्यन्ते तेन प्रक्रमेण एकाष्टकां न संबट् कुर्वन्ति क्रियानुपयोगेन व्यर्थं न कुर्वन्ति। अत एव एकाष्टकाप्रारम्भकृतो गुणश्चास्मिन् पक्षेऽन्तर्भवतीत्यर्थः ॥ १३ ॥

अन्येऽपि गुणा अस्मिन् पक्षे सन्तीत्याह—

तेषां पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षे मासाः सन्तिष्ठमाना यन्ति पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठतः पशव ओषधयोऽनूत्तिष्ठन्ति तान्कल्याणी वागभिवदत्यरात्सुरिमे सत्रिण इति ते राध्नुवन्ति ॥ १४ ॥

तेषामेकादश्यां दीक्षमाणानां सुत्या सोमयागः पूर्वपक्षे सम्पद्यते। सत्राणां सर्वेषां द्वादशोपसदः तत्राष्टमीप्रभृति द्वादशसु गतासु त्रयोदशी शुक्लपक्षपञ्चमी तस्यां प्रथमोऽतिरात्र इति पूर्वपक्षे सुत्या प्रारभ्यत इत्यर्थः। त्रिंशता त्रिंशताऽहोभिर्म्मासेषु सन्तिष्ठमानेषु पूर्वपक्ष एव सर्वमासाः सन्तिष्ठमाना यन्ति वर्त्तन्ते। एवं द्वादशसु मासेषु गतेषु पूर्वपक्ष एव सत्रादुत्तिष्ठन्ति। तानुत्तिष्ठतः सत्रादुत्थानं कुर्वतो यजमाननु पश्चात् पशव ओषधयश्चोत्तिष्ठन्ति उर्द्धं रोहन्ति। तान्यजमानान् कल्याणी शोभना वाक् यशस्करी वाक् वदति। किमिति इमे सत्रिणो यजमानाः अरात्सुः समृद्धा अभवन्निति तदनन्तरन्ते सत्रिणो राध्नुवन्ति समृद्धा भवन्ति ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य नवमः खण्डः।

अथ दशमः खण्डः।

उक्तो गवामयनस्य दीक्षाकालः। अथ तस्मिन्नेव गवामयने विकल्पेन मासि मास्येकमहरुत्सृजेयुरिति विधास्यन्नाह—

आ वा एते सव्वँत्सरं प्याययन्ति य उत्सृजन्ति ॥१॥

ये अहान्युत्सृजन्ति एते संवत्सरमाप्याययन्ति। छिद्रवान् हि देहो रसादिभिरायत्तो भवति एवमेव संवत्सरमध्ये एवमनुशिष्टः संवत्सरेऽपि तदन्तर्भवति। ततः केषाञ्चिदहामुत्सर्गस्य संवत्सरछिद्रवत्त्वेनाप्यायितो भवति ॥ १ ॥

अनुत्सर्गे बाधमाह—

यथा वै दृतिराध्मात एवꣳसव्वँत्सरोऽनुत्सृष्टो यन्नोत्सृजेयुरमेहेन प्रमायुकाः स्युः ॥ २ ॥

यथा चर्म्ममयो दृतिराध्मातः छिद्ररहित्येन वायुना पूरितः एवमहामुत्सर्ज्जनाभावे संवत्सरोऽप्याध्मातो भवति। एवं स्थिते यद्यदहानि नोत्सृजेयुः अमेहेन आध्मानकृतेन उदावर्त्ताख्येन रोगेण प्रमायुकाः मरणशीलाः स्युर्भवेयुः सत्रिणः। अतोऽहरुत्सर्गः कर्त्तव्य इत्यर्थः ॥ २ ॥

तथा प्रकारान्तरेणैतत् प्रशंसति—

प्राणो वै सव्वँत्सर उदाना मासा यदुत्सृजन्ति प्राण एवोदानान्दधति यो दीक्षितः प्रमीयते या सव्वँत्सरस्यानुत्सृष्टस्य शुक्सा तमृच्छति ॥ ३ ॥

देहधारकः प्राण एव संवत्सरः। उदानाः ऊर्द्धगमनादिप्रवृत्तिहेतवः तस्य वृत्तयः उदाना मासाः। एवं स्थिते मासे अहानि यदुत्सृजन्ति तेन उदानान् स्तिमितान् प्राण एव दधति धारयन्ति। अनुत्सर्गे तु ऊर्द्धगमनेन स्तिमित्यभावात्प्राणसकाशादुदाना निर्गताःस्युः। अपि च अहोभिरनुत्सृष्टस्य संवत्सरस्य या शुक् शोकः सा तमृच्छति प्राप्नोति। यो दीक्षितः सत्रमध्ये प्रमीयते म्रियते। तस्मादहामुत्सर्जनं कार्य्यमित्युक्तं भवति ॥ ३ ॥

अथ किं कृत्स्नमहरुत्सृज्यं उत किञ्चिदनुत्सृज्यमिति जिज्ञासायां ब्रह्मवादिनां विचारं दर्शयति—

तदाहुरुत्सृज्या३न्नोत्सृज्या३मिति ॥ ४ ॥

तत्तत्र गवामयनविषये ब्रह्मवादिन आहुः। किमिति किं ? कृत्स्नमहरुत्सृज्यं उताहुः किञ्चिदेवोत्सृज्यम् अहस्तु नोत्सृज्यमिति ? श्रुत्यन्तरे तु पक्षद्वयदर्शनाद्ब्रह्मवादिनां विचारः विचार्य्यमाणानामिति प्लुतिः ॥ ४ ॥

तत्र न सर्वमुत्सृज्यमपि तु किञ्चिदेवोत्सृज्यमिति पक्षमवलम्ब्याह—

यद्युत्सृजेयुरुक्थान्युत्सृजेयुस्तदेवोत्सृष्टं तदनुत्सृष्टम् ॥५॥

यद्यहान्युत्सृजेयुः। यदीति वचनादयमुत्सर्गपक्षो वैकल्पिक इति गम्यते। तस्मिन् पक्षे उक्थसंस्थेष्वहःसु उक्थान्यग्निष्टोमसाम्नः पराणि स्तोत्राणि शस्त्राणि चोत्सृजेरन्। तदेवाह उत्सृष्टमग्निष्टोमसाम्नः परस्य प्रयोगस्य परित्यागात् उत्सृष्टं भवति। तत्पर्य्यन्तस्यानुष्ठानात् अनुत्सृष्टञ्च भवति ॥ ५ ॥

अथास्मिन् पक्षे प्रकारान्तरेणोत्सर्जनानुत्सर्जने दर्शयति—

अथो खल्वाहुरेकाह्निकं कार्य्यन्तदेव साक्षादुत्सृष्टमभ्युत्सृष्टवन्ति ॥ ६ ॥

अथो खल्विति पक्षान्तरपरिग्रहे। अहरुत्सर्गपक्षे एकाह्निकमेव स्तोमं कार्य्यम्। उत्सृष्टव्येऽहनि विषुवत्स्तोत्रेष्वेकैव स्तोत्रीयेष्वार्भवेषु च तिस्र इत्यर्थः। तत्तत्र साक्षादेव स्वीयस्य स्तोमस्योत्सर्गः। विषमेषु स्तोत्रेषु एकैव स्तोत्रीया स्यात् समेषु चतस्र इत्यर्थः। कुत इत्युत्सृष्टं स्तोमम-

भित्यज्यमभ्युत्सुष्वन्ति सवनादुपरि सुन्वन्ति अभिषवं कुर्वन्तीत्यर्थः । एवं स्तोममात्रस्योत्सर्जनादन्येषां स्तुतशस्त्राणामनुत्सर्जनाच्च तदहरुत्सृष्टमनुत्सृष्टञ्च भवति ॥ ६ ॥

अथ पक्षान्तरविधित्सयेमं पक्षं दूषयति—

छिद्रो वा एतेषाꣳ सव्वँत्सर इत्याहुर्य्ये स्तोममुत्सृजन्तीति ॥ ७ ॥

य उक्तं प्रकारान्तरेण स्तोममुत्सृजन्ति एतेषां संवत्सरः संवत्सरसाध्योयागः छिद्रो वै छिन्नावयव एव भवतीति ब्रह्मवादिन आहुः । अतोऽहरेवोत्सृज्यमित्ययमेव पक्ष आदरणीयः ॥ ७ ॥

अस्मिन् पक्षे छिद्रपिधानाय कर्त्तव्यं सम्पूर्णप्रयोगमाह—

पशुमालभन्ते स्तोममेव तदालभन्ते स्तोमो हि पशुः ॥ ८ ॥

यदहरुत्स्रष्टुं कामयन्ते तस्याह्नः सवनीयं पशुमेवालभन्ते तत्तेन स्तोममेवालभन्ते । स्तोमग्रहणं शस्त्रादीनामन्येषामप्युपलक्षणार्थम् । स्तोमो हि पशुः पशुवत् देवताप्रीतिकरत्वात् । अतः पश्वनुष्ठानेनैव स्तोमादिकं सर्वमनुवृत्तं भवतीत्यर्थः ॥ ८ ॥

अथ तस्मिन्नहनि प्रातः सवनयोगमाह—

श्व उत्सृष्टाः स्म इति व्वत्सानपाकुर्व्वन्ति प्रातः पशुमालभन्ते तस्य व्वपया प्रचरन्ति ततस्सवनीयेनाष्टाकपालेन तत आग्नेयेनाष्टाकपालेन ततो दध्नैन्द्रेण ततश्चरुणा व्वैश्वदेवेन तत्प्रातः सवनꣳ सन्तिष्ठते ॥ ९ ॥

श्वः परेद्युरह्नः । उत्सृष्टाः स्मः, अहरुत्सर्जनं करिष्याम इति बुद्ध्या पूर्वस्मिन्नेवाहनि वत्सानपाकुर्वन्ति सायन्दोहार्थं मातृभ्यः पृथक्कुर्य्युः । उत्सृष्टाः स्म इति सृजेयुः । लङुत्तमबहुवचने रूपमेतत् । अनेन विहितस्य वत्सापाकरणस्य दोहार्थत्वात् सायं दुग्ध्वा तत्पयो दधि कुर्वन्ति इत्युक्तं भवति । ततः प्रातःकाले उत्स्रष्टव्यस्याह्नो यः सवनीयः पशुस्तमालभन्ते । आलम्भनस्य यागार्थत्वादालम्भनादीन् संस्कारान् कुर्युरित्यर्थः । ततस्तस्य पशोर्वपया प्रचर्य्य ततः सवनीयेनाष्टाकपालेन अष्टसु कपालेषु संस्कृतेन पुरोडाशेन प्रचरन्ति । ततोऽन्येनाग्नेयेनाग्निदैवत्येनाष्टाकपालेन तत ऐन्द्रेण दध्ना ततो वैश्वदेवेन चरुणा प्रचरेयुः । तत्तेनानुष्ठानेन प्रातःसवनं सन्तिष्ठते समाप्यते ॥ ९ ॥

अथ माध्यन्दिनसवनस्य प्रयोगमाह—

ततः पशुपुरोडाशेनैकादशकपालेन ततः सवनीयेनैकादशकपालेन ततो मरुत्वतीयेनैकादशकपालेन ततश्चरुणैन्द्रेण तन्माध्यन्दिनꣳ सवनं सन्तिष्ठते ॥ १० ॥

ततो माध्यन्दिनसमये पशुपुरोडाशेन यद्देवत्यः पशुस्तद्देवत्येनैकादशसु कपालेषु संस्कृतेन पुरोडाशेन प्रथममिष्ट्वा ततः सवनीयेनैन्द्रेणैकादशकपालेन प्रचर्य्य ततो मरुत्वतीयेन मरुत्वद्गुणविशिष्टेनैन्द्रदेवत्येनैकादशकपालेन प्रचर्य्य ततः केवलेन्द्रदेवत्येन चरुणा प्रचरेयुः। तत्तावतैव माध्यन्दिनं सवनं परिसमाप्यते ॥ १० ॥

अथ तृतीयसवनकृत्यमाह—

पशुना प्रचरन्ति ततः सवनीयेन द्वादशकपालेन ततो वैश्वदेवेन द्वादशकपालेन ततश्चरुणाऽऽग्निमारुतेन तत्तृतीयसवनꣳ सन्तिष्ठते ॥ ११ ॥

पशुना पश्ववयवैः हृदाद्यङ्गैः प्रथमं प्रचरन्ति। ततः सवनीयेनैन्द्रेण पुरोडाशेन द्वादशकपालेन प्रचर्य्य ततो वैश्वदेवेन विश्वदेवदेवत्येन द्वादशकपालेन प्रचर्य्य ततोऽग्निमरुद्देवत्येन चरुणा प्रचरेयुः। तत्तावतैव तृतीयसवनं परिसमाप्यते ॥ ११ ॥

एवं सवनत्रये परिसमाप्ते यत् सायं काले कर्त्तव्यं तद्दर्शयति—

पृषदाज्येन प्रचर्य्य पत्नीस्संयाजयन्ति ॥ १२ ॥

दधिमिश्रमाज्यं पृषदाज्यं तेनानुयाजान् इष्ट्वा ततः पत्नीः संयाजयन्ति पत्नीसंयाजान्तमहः समापनीयमित्यर्थः।

वेदार्थस्य प्रकाशेन तमो हार्द्दं निवारयन्।
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १२ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे पञ्चमाध्यायस्य दशमः खण्डः।

पञ्चमाध्यायः समाप्तिमगमत्।

इति प्रथमा पञ्चिका।

अथ षष्ठोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
चतुर्थे पञ्चमे चैव गवामयनमीरितम्।
सर्वप्रकृतिभूतोऽयमग्निष्टोम इहोच्यते॥

तमेतमग्निष्टोमं विवक्षुराह—

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स एतमग्निष्टोममपश्यत्तमाहरत्तेनेमाः प्रजा असृजत॥ १॥

प्रजापतिर्ब्रह्मा हिरण्यगर्भः। अकामयत कामितवान्। किमिति? उच्यते। बहु स्याम् इदानीमेक एव सन् नानारूपो भवेयं तदर्थं प्रजायेयेति स्वरूपानुपमर्देनैव प्रकर्षेण नानारूपेणोत्पद्येयमिति। स एवं कामयमानः एतमग्निष्टोमं प्रजननसाधनरूपमपश्यत् दृष्टवान् 'यज्ञायज्ञीय' इत्यस्यामाग्नेय्यामुत्पन्नेनाग्निष्टोमसाम्ना समाप्तिरस्याग्निष्टोम इति नाम सम्पन्नम्। तमग्निष्टोममाहरत् अन्वतिष्ठत तेनाहृतेन इमा दृश्यमानाः प्रजाः असृजत सृष्टवान्। अत्र यस्मात् प्रजापतिराहरत् तस्मादन्यैरयमग्निष्टोमोऽनुष्ठातव्य इति विधिरुन्नेयः। 'यत् स्तूयते तद्विधीयत' इति न्यायात्॥ १॥

कथं प्रजाः सृष्टवानिति? तत्राह—

एकादशेन च वै सता स्तोत्रेणाग्निष्टोमस्यासृजतैकादशेन च मासा सव्वँत्सरस्य ता द्वादशेन च स्तोत्रेणाग्निष्टोमस्य पर्य्यगृह्णात् द्वादशेन च मासा सव्वँत्सरस्य॥ २॥

सन्त्यग्निष्टोमे द्वादश स्तोत्राणि 'द्वादशाग्निष्टोमस्य स्तोत्राणी'ति श्रुतेः। तत्रैकादशेन वै स्तोत्रेणाग्निष्टोमस्य सम्बन्धिना तथा संवत्सरस्य गवामयनसत्रस्य सम्बन्धिना एकादशेन च मासा मासेनोभाभ्यां सिसृक्षुः प्रजापतिः ताः प्रजा असृजत। पूर्वं गवामयनप्रस्तावे गवामयनेन सर्वमसृजतेति वर्णितत्वात् तदवयवभूतेन एकादशेन मासेन सह इदानीं सृष्ट्यभिधानमेकादशस्य स्तोत्रस्य स्तुत्यर्थं। एवमुत्तरत्रापि द्रष्टव्यम्। ताः सृष्टाः प्रजाः अग्निष्टोमस्य द्वादशेन स्तोत्रेण सव्वँत्सरस्य गवामयनस्य द्वादशेन मासेन पर्य्यगृह्णात् आत्मसात् कृतवान्। लोके एकादशद्वादशयोर्मासयोरनतिक्रमेण प्रसवः प्रजायते॥ २॥

उक्तलक्षणानुष्ठानेन तदेव लभ्यत इति प्रशंसति—

तस्मात्प्रजा दशमासो गर्भं भृत्वैकादशमनु प्रजायन्ते तस्माद्द्वादशेनाभ्यतिहरन्ति द्वादशेन हि परिगृहीतास्तस्य एव त्वेवँद परि जाताः प्रजा गृह्णाति प्र जाता जनयन्ति ॥ ३ ॥

यस्मात् प्रजापतिरेकादशेन प्रजा असृजत तस्माल्लोके प्रजाः स्त्रियः दशमासो दशमासान् गर्भं भृत्वा धारयित्वा एकादशमनु एकादशे मासि प्रजायन्ते प्रजनयन्ति। यस्मात् द्वादशेन प्रजापतिः पर्य्यगृह्णात् तस्माद् द्वादशमासमभिलक्ष्यीकृत्य नातिहरन्ति गर्भन्न धारयन्ति। अनतिक्रमणे कारणमाह—हि यस्मात् द्वादशेन स्तोत्रेण परिगृहीताः प्रजाः गृह्णाति परिग्रहं करोति न कदाचित्तं परित्यजतीत्यर्थः। किञ्च जाता अनुकृत्य ताः प्रजाः प्रजनयति उत्पादयति ॥ ३ ॥

अथ प्रजापतेः सृष्टिप्रसङ्गे किञ्चिदर्थमाह—

तासां परिगृहीतानामश्वतर्य्यत्यक्रामत्तस्या अनुहाय रेत आदत्ता तद्वडवायान्न्यमाडयस्माद्वडवा द्विरेतास्तस्मादश्वतर्य्यप्रजा आत्तरेता हि ॥ ४ ॥

तासां प्रजापतिना परिगृहीतानां प्रजानाम्मध्ये अश्वतर्य्यत्यक्रामत् अतिक्रम्यागच्छत्। तामनुहायानुगम्य तस्या रेतः प्रजोत्पादनसाधनं वीर्य्यं आदत्त स्वीकृतवान्। आदाय वडवायां न्यमाट् निमार्ज्जनं स्थापनमकरोत्। यस्मादेवन्तस्माद्वडवा द्विरेता स्वकीयरेतसा सह द्विरेता अभूत् अश्वमश्वतरञ्च रेतोद्वयसामर्थ्यात् प्रसूत इत्यर्थः। रेतस आहृतत्वात् अश्वतर्य्यप्रजा अनपत्याभूत् अश्वतर्य्याः कदाचिदश्वतरोऽन्योऽश्वो वा न जायत इत्यर्थः। सा आत्तरेता हि परित्यक्तप्रजननसामर्थ्या खलु। अयमर्थः। सर्वोपि तैत्तिरीयके स्पष्टमाम्नायते 'अग्निष्टोमेन वै प्रजा असृजत ता अग्निष्टोमेनैव पर्य्यगृह्णात् 'तासां परिगृहीतानामश्वतर्य्यत्यक्रामत्तस्या अनुहाय रेत आदत्ते' त्यादिना ॥ ४ ॥

अथास्या दक्षिणाऽनर्हतां विषयविशेषे तदर्हतामाह—

तस्माद्वदक्षिणीयाऽति हि सा यज्ञमरिच्यतातिरिक्तस्य दक्षिणा स्यात्सलोमत्वाय षोडशिनः स्तोत्रेदेयाऽतिरिक्तो वै षोडश्यतिरिक्त एवातिरिक्तां ददाति ॥ ५ ॥

तस्मादु तस्मादेव हेतोरश्वतरी अदक्षिणीया दक्षिणायामनर्हा । तस्मादित्युक्तं विवृणोति-हि यस्मात् सा यज्ञं यष्टव्यं प्रजापतिम् अत्यरिच्यत अतिक्रम्यागच्छत 'यज्ञो वै प्रजापतिरि'तिश्रुतेः । अत एषा यज्ञे यदतिरिक्तं तस्य दक्षिणा स्यात् । अतिरिक्ताया दक्षिणाकल्पनं सलोमत्वाय आनुलोम्याय साहश्याय भवति । कोऽसावतिरिक्तः प्रदेशः यस्मिन् सा दीयते तमाह-षोड़शिनो यज्ञस्य स्तोत्रे सा देया दातव्यैषा। तस्मिन् यागे पञ्चदशभिः स्तोत्रैः कल्पितेभ्य उक्थादिभ्य एकं षोड़शिस्तोत्रमतिरिक्तं भवति। तदेवाह यत् षोड़शम् अस्तोत्रमतिरिक्तं तत्राश्वतरीन्ददद्यजमान अतिरिक्तवति षोड़शिनि अतिरिक्तामिमां ददाति प्रयच्छति ॥ ५ ॥

इत्थं प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति-'प्रजापतिः प्रजासृष्टिसाधनत्वेनाग्निष्टोममपश्यत् तेन प्रजा असृजतेति' योऽग्निष्टोम उक्तस्तस्य त्रिवृदादिभिः स्तोमैर्गायत्र्यादिभिश्छन्दोभिरन्यादिभिर्देवैरन्यैर्ब्राह्मणादिभिः साध्यत्वात्तेषां सृष्टिं क्रमेण विवक्षुरादौ त्रिवृद्गायत्र्यादिसम्पाद्यां सृष्टिमाह—

सोऽकामयत यज्ञꣳ सृजेयेति स मुखत एव त्रिवृतमसृजत तं गायत्रीच्छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणो मनुष्यो ऽवसन्त ऋतुस्तस्मात्त्रिवृत्स्तोमानां मुखं गायत्री च्छन्दसामग्निर्देवतानां ब्राह्मणो मनुष्याणां ऽवसन्त ऋतूनां तस्माद्ब्राह्मणो मुखेन ऽवीर्य्यङ्करोति मुखतो हि सृष्टः ॥ ६ ॥

सः प्रजापतिरकामयत किमिति सर्वसाधकं यज्ञं सृजेयेति । स एतमग्निष्टोममपश्यत् तमाहरदित्युक्तस्यैवेदं विवरणम् । सः प्रजापतिः मुखत आत्मनो मुखादेव त्रिवृतं त्रिवारमावृत्तित्रयसाध्यमेतन्नामकं स्तोममसृजत । तं त्रिवृतमनु पञ्चाद्गायत्रीच्छन्दः गायत्रं नाम च्छन्दोऽसृज्यत, तदनु अग्निर्देवताऽन्वसृज्यत, तमनु मनुष्यो ब्राह्मणोऽन्वसृज्यत, तथा तमनु वसन्ताख्यश्च ऋतुरसृज्यत, यस्माद्यदेते मुखत एव सृष्टास्तस्मादेते त्रिवृदादयः स्वस्वजातीयानां मध्ये मुख्या अभवन् । त्रिवृदादीनां मुख्यानां मध्ये ब्राह्मणस्य मुख्यत्वप्रयुक्तं वीर्यं लोकसिद्धं दर्शयति—तस्मान्मुखसृष्टत्वेन मुख्यत्वात् ब्राह्मणो मुखेनेदानीमपि वीर्यं स्वाध्यायप्रवचनादिजन्यं सामर्थ्यङ्करोति । तस्मादित्युक्तं विवृणोति हि यस्माद्ब्राह्मणो मुखतः सृष्टस्तस्मादित्यर्थः ॥ ६ ॥

उक्तार्थविदुषः फलमाह—

करोति मुखेन वयीर्य्यं य एव वँवेद ॥ ७ ॥

एवमुक्तमर्थं यो वेद सोऽपि मुखेन वीर्य्यङ्करोति मुखसाध्येन स्वाध्यायप्रवचनादिनैवाभीष्टं साधयति इत्यर्थः ॥ ७ ॥

अथ पञ्चदशस्तोमत्रिष्टुभादीनां सृष्टिमाह—

स उरस्त एव बाहुभ्यां पञ्चदशमसृजत तन्त्रिष्टुप्छन्दोऽन्वसृज्यतेन्द्रो देवता राजन्यो मनुष्यो ग्रीष्म ऋतुस्तस्माद्राजन्यस्य पञ्चदश स्तोमस्त्रिष्टुप्छन्द इन्द्रो देवता ग्रीष्म ऋतुस्तस्मादु बाहुवीर्य्यो बाहुभ्याꣳ हि सृष्टः ॥ ८ ॥

सः प्रजापतिरुरस्त एव । तस्यैव च व्याख्यानं बाहुभ्यामिति । पञ्चदशस्तोमं तृचगतानां तिसृणामृचां त्रिष्वपि पर्य्यायेषु पञ्चवारावृत्तिसाध्यं पञ्चदशस्तोममसृजत । एवमुत्तरत्र सप्तदशादीनामावृत्तिप्रयुक्तसंख्यावत्त्वमिति द्रष्टव्यम् । तमनु त्रिष्टुप्छन्द इत्यादिर्ग्रीष्म ऋतुरित्यन्तः पूर्ववद्योज्यः । तस्माद्यस्मात् पञ्चदशादीनां राजन्येन सहोत्पत्तिः तस्माद्राजन्यस्य पञ्चदशादयो भवन्ति । तेषां पञ्चदशादीनां राजन्यसम्बन्धः श्रुतिषु प्रसिद्धः 'वसन्ते हि ब्राह्मणमुपनयीत' 'ग्रीष्मे राजन्योऽग्नीनादधीत' ग्रीष्मे राजन्य इत्यादिना राजन्यसम्बन्धः । एवं प्रथमेऽपि पर्य्याये ब्राह्मणस्य त्रिवृद्रायस्यादीनां विशेषसम्बन्धोऽवगतः । तस्मादु बाहुवीर्य्य इत्यादि स्पष्टम् ॥ ८ ॥

अथ विदुषः फलमाह—

करोति बाहुभ्या वँवीर्य्यं य एव वँवेद ॥ ९ ॥

ऋज्वर्थः ॥ ९ ॥

अथ सप्तदशादिसृष्टिमाह—

स मध्यत एव प्रजननात्सप्तदशमसृजत तज्जगतीच्छन्दोऽन्वसृज्यत विड्वै देवा देवता वैश्यो मनुष्यो वर्षा ऋतुस्तस्माद्वैश्योऽद्यमानो न क्षीयते प्रजननाद्धि सृष्टस्तस्मादु बहुपशुर्वैश्यदेवो हि जागतो वर्षा ह्यस्यर्तुस्तस्माद्ब्राह्मणस्य च राजन्यस्य चाद्योऽधरो हि सृष्टः ॥ १० ॥

सः प्रजापतिः मध्यतो मध्यदेशादेव । तस्यैव व्याख्यानं-प्रजननात् स-

सप्तदशं स्तोममसृजत । तमनु जगतीच्छन्दोऽन्वसृज्यत । तदनु क्रमेण विश्वे देवा देवता वैश्यो मनुष्यो वर्षा ऋतुश्चान्वसृज्यत । तस्मात्प्रजोत्पादकप्रजननादुत्पन्नत्वात् वैश्यजातीयोऽद्यमानो भक्ष्यमाणो राजादिभिर्धनैरपहियमाणोऽपि न क्षीयते किन्तु पशुपालनादिना समृद्धो भवत्येव । तत्र हेतुः प्रजननाद्धि सृष्ट इति । तस्मादु तस्मादेव कारणात् स वैश्यो बहुपशुर्भवति । तत्रोपपत्तिरुच्यते–वैश्वदेवो हि जागतो विश्वैर्देवैः सह सृष्टत्वात् असावपि वैश्वदेवस्तस्मादित्यर्थः । वैश्वदेवत्वमस्य बहुपशुत्वे हेतुः । जागतः जगत्या सहोत्पन्नत्वात् असौ जगतीसम्बन्धो भवति । वर्षा ह्यस्यर्तुरित्ययमपि बहुपशुत्वे हेतुः–एतत् स्तोमसम्बन्धस्योपलक्षणम् । अनेन वैश्यस्य सप्तदशस्तोमजगतीच्छन्दःप्रभृतीनां च विशेषसम्बन्ध उक्तो भवति । तस्मादयं पूर्वसृष्टस्य ब्राह्मणस्य च राजन्यस्य चाद्योऽदनीय उपजीवनीयो भवति । तस्मादिति हेतुं विवृणोति-हि यस्मादधरः पश्चाद्भावी निकृष्टः सृष्टस्तस्मादित्यन्वयः ॥ १० ॥

अथैकविंशस्तोमादिसृष्टिमाह—

स पत्त एव प्रतिष्ठाया एकविंशमसृजत तमनुष्टुप्छन्दोऽन्वसृज्यत न का चन देवता शूद्रो मनुष्यस्तस्माच्छूद्र उत बहुपशुरयज्ञियो विदेवो हि, न हि तं का चन देवताऽन्वसृज्यत तस्मात्पादावनेज्यन्नाति वर्द्धते पत्तो हि सृष्टस्तस्मादेकविंशस्तोमानां प्रतिष्ठा प्रतिष्ठाया हि सृष्टस्तस्मादनुष्टुभं छन्दाꣳसि नानु व्यूहन्ति ॥ ११ ॥

सः प्रजापतिः पत्त एव प्रतिष्ठाया इति परस्परं सामानाधिकरण्यं पादयोः प्रतिष्ठाहेतुत्वं स्पष्टम् । प्रतिष्ठारूपाभ्यां पादाभ्यां एकविंशं स्तोममसृजत । तमनु अनुष्टुप्छन्दोऽन्वसृज्यत । तदनु इतरेष्विव चात्र का चन देवता न सृष्टा किन्तु शूद्रो मनुष्योऽन्वसृज्यत । तस्मात्पूर्वं देवसृष्ट्यभावात् शूद्र उत बहुपशुः पशुबहुत्वोपेतोऽपि अयज्ञियो यज्ञानर्होऽभूत् । 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्त' इति श्रुत्यन्तरम् । तस्मादित्युक्तं कस्मादित्याह-विदेवो देवरहितः खल्वयम् । एतदपि कुत इत्यत आह–तं शूद्रमनु न हि का चन देवताऽसृज्यत । यस्मात् विदेवः तस्माच्छूद्रः पादावनेज्यं त्रैवर्णिकानां पादप्रक्षालनरूपं कर्मातिक्रम्य न वर्द्धते । एतदितरशुश्रूषोपलक्षणं द्विजातिशुश्रूषातिरिक्तं किञ्चिदपि धर्म्ममनुतिष्ठेदित्यर्थः । तथा च स्मर्य्यते 'शूद्रस्य द्विजशुश्रूषा परमो धर्म्म उच्यते । अन्यथा कुरुते किञ्चिद्वेत्तत्तस्य निष्फलमि'ति । तत्रोपपत्तिरुच्यते—हि

यस्मादयं पक्तः सृष्टः । किञ्च तस्मात्प्रजापतेः प्रतिष्ठारूपपादतः सृष्टत्वादयमेकविंशस्तोम इतरस्तोमानामध्ये प्रतिष्ठा भवति । एकविंशस्तोमकेन यज्ञायज्ञीयेनाग्निष्टोमस्य समाप्तेरस्य प्रतिष्ठात्वम् । हि यस्मादेकविंशः प्रतिष्ठायाः सृष्टः । अत इत्यर्थः । तस्मात्पादतोनिकृष्टप्रदेशादुत्पन्नत्वात् अनुष्टुप्छन्दस्यनु तृतीयार्थमित्यर्थः । अनोः कर्म्मप्रवचनीयत्वात् छन्दांसीति द्वितीया । अनुसवनप्रयुक्तैर्गायत्र्यादिच्छन्दोभिः सह न व्यूहन्ति पृष्ठ्यादिषु छन्दसां व्यूहे क्रियमाणे स्वस्थान एवानुष्टुभं प्रयुञ्जते न तस्य स्थानेऽन्यद्गायत्र्यादिकं छन्दः तेषां वा स्थानेऽनुष्टुभं प्रयुञ्जत इत्यर्थः ॥ ११ ॥

किमर्थमेवमिति तत्राह—

पापवसीयसो विधृत्यै ॥ १२ ॥

पापमधरस्थानादुत्पन्नमनुष्टुप्छन्दः । वसीयः पुण्यं सुखाद्युत्तमस्थानोत्पन्नं गायत्र्यादिकं तदुभयस्य विधृत्यै विधरणाय असाङ्कर्य्यायेत्यर्थः ॥ १२ ॥

अथ वेदितुः फलमाह—

विधृतिः पापवसीयसो भवति य एव ँवेद ॥ १३ ॥

यदुक्तमर्थज्ञानातिशयाय पुण्यद्वयस्य विधृतिः विवेचनको भवति तस्मिन्नुभे समानाश्रयणे स्त इत्यर्थः ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य प्रथमः खण्डः ॥ ६ ॥ १ ॥

अथ द्वितीयः खण्डः ।

तदेवमग्निष्टोमाख्यस्य ज्योतिष्टोमस्य प्राधान्येन त्रिवृदादिस्तोमचतुष्टयस्य च सृष्टिरुक्ता । इदानीं तेष्वेव हि तत् ज्ञातव्यमित्याह—

यो वै स्तोमानुपदेशनवतो ँवेदोपदेशनवान्भवति ॥ १ ॥

वै शब्दो वाक्यालङ्कारे । यः पुमान् स्तोमान् त्रिवृदादीन् उपदेशनवतो वक्ष्यमाणोपदेशेन युक्तान् वेद जानाति सोऽप्युपदेशनवान् भवति वक्ष्यमाणेन प्राणादिदेवतावान् भवति ॥ १ ॥

के ते उपदेशा इति ? तानाह—

प्राणो वै त्रिवृदर्द्धमासः पञ्चदशः सँवँत्सरः सप्तदश आदित्य एकविँश एते वै स्तोमा उपदेशनवन्त उपदेशनवान् भवति य एव ँवेद ॥ २ ॥

यस्तु त्रिवृत्स्तोमोऽस्ति 'प्राणो वै त्रिवृदिति' व्याकृत्या नवर्चः सम्पद्यन्ते । मुख्यः प्राणोऽपि शीर्षण्यैः सप्तप्राणैः अर्वाग्वृत्तिभ्यां प्राणद्वयाभ्यां सह नव प्राणात्मकः। अतो नवभेदसाम्यात् त्रिवृत्प्राण इति स्तूयते । यथा पञ्चदशस्तोमोऽप्यर्द्धमासात्मकः पञ्चदशभिरहोभिर्युक्तत्वात् तत्संख्यासाम्येन स्तुतिः । योऽयं सप्तदशस्तोमः स संवत्सरः 'द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान् संवत्सर' इति श्रुतेः । सप्तदशसंख्यासाम्यादसौ सप्तदश इत्युच्यते । योऽयमेकविंशस्तोमः स आदित्य एव "द्वादशमासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य इत्येकविंश" इति श्रुतेरादित्यस्यैकविंशत्वात् तत्संख्यासाम्येनास्यादित्यत्वम् । एते स्तोमा उक्तास्त्रिवृदादय उपदेशनवन्तः त्रिवृदादीनां प्राणाद्यात्मादिकथनमेवोपदेशनं तद्वन्तः । शिष्टं गतम् ॥ २ ॥

अथोक्तस्तोमचतुष्टयस्य प्रसङ्गेन त्रिणवत्रयस्त्रिंशयोरप्युपदेशनवत्त्वमाह—

इमे वै लोकास्त्रिणवास्त्रिणवस्य वै ब्राह्मणेनेमे लोकास्त्रिष्पुनर्नवा भवन्ति ॥ ३ ॥

त्रिणवस्वरूपस्य त्रिवृत् त्रयात्मकत्वविधानेन इमे भूरादयो लोकाः त्रिः पुनर्नवा(१) भवन्ति त्रित्वसंख्योपेताः सन्तः पुनर्नवसंख्याका भवन्ति 'त्रयो वा इमे त्रिवृतो लोका' इति श्रुतेः एकैकस्य त्रिवृत्त्वान्मिलित्वा नवसंख्याकत्वम् । लोकत्रयस्याश्रयस्य स्तोमस्य त्रैलोक्यात्मकत्वमेवोपदेशनवत्त्वम् ॥ ३ ॥

अथोक्तार्थविदुषः फलमाह—

एषु लोकेषु प्रति तिष्ठति य एव ँवेद ॥ ४ ॥

स्पष्टोऽर्थः । यदा त्रिणवस्य वा इत्यादिकमेवं वेदेत्यन्तं वेदितुः फलं त्रिणवस्य वै ब्राह्मणेनेमे वै लोकास्त्रिणव इति ध्यानज्ञानेन इमे लोकास्त्रिष्पुनर्नवेषु जानानः प्रतिष्ठितो भवति ॥ ४ ॥

अथ त्रयस्त्रिंशस्योपदेशनवत्त्वमुच्यते—

देवता वाव त्रयस्त्रिँशोऽष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च त्रयस्त्रिँशौ ॥ ५ ॥

अयं त्रयस्त्रिंशस्तोमः। देवता वाव देवता एव। उक्तेस्तोमे देवतासु च एकत्वापादकं संख्यासाम्यमुपपादयति—अष्टौ वसव इत्यादिना ॥५॥

(१) अत्र बहुव्रीहौ डच्प्रत्ययः ।

अथ विदुषः फलमाह—

स देवेन यज्ञेन यजते य एव ँवेद ॥ ६ ॥

यः पुमानेवं जानाति स देवेन सन्निहितदेवकेन यज्ञेन यजते। उक्तदेवतात्मकत्वमेवास्य स्तोमस्योपदेशनवत्त्वम् ॥ ६ ॥

अथ प्रकारान्तरेण त्रयस्त्रिंशं स्तोतुमाह—

यो वा अधिपति ँवेदाधिपतिर्भवति त्रयस्त्रिँशो वै स्तोमानामधिपतिः पुरुषः पशूनाम् ॥ ७ ॥

त्रयस्त्रिंशो वै त्रयस्त्रिंशः खलु स्तोमानामधिपतिः। उक्तस्तोमेभ्योऽधिकसंख्योपेतत्वात्। पुरुषस्यापि अधिपतित्वोपन्यासः स्तोमदृष्टान्तत्वेन तस्यैव स्तुत्यर्थः ॥ ७ ॥

अथ पुरुषस्याधिपतित्वमेवोपपादयति—

तस्मान्न्यञ्चोऽन्ये पशवोऽदन्त्यूर्ध्वः पुरुषोऽधिपतिर्हि सः ॥ ८ ॥

तस्मात्पुरुषस्याधिपतित्वात् अन्ये पुरुषव्यतिरिक्ता गवाश्वादयः पशवो न्यञ्चोऽवाङ्मुखाः सन्तः अदन्ति भक्षयन्ति तृणानि, पुरुष ऊर्ध्वमुखः सन् भुङ्क्ते। ऊर्ध्वत्वे हेतुं विवृणोति-स पुरुषः अधिपतिः खलु ॥८॥

अथ विदुषः फलमाह—

अधिपतिः समानानां भवति य एव ँवेद ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य द्वितीयः खण्डः ॥ ६ ॥ २ ॥

अथ तृतीयः खण्डः ।

अथ संख्याक्रमेणाग्निष्टोमं प्रथमं विवक्षुस्तं बहुफलसाधनत्वेन प्रशंसति—

एष वाव यज्ञो यदग्निष्टोमः ॥ १ ॥

एष वाव एष एव मुख्यो यज्ञो यदग्निष्टोमः। अग्निष्टोम इति सर्वफलसाधनत्वेन मुख्यत्वादेष एव यज्ञः। इतरे त्वेकैकफलसाधनत्वाज्जघन्या इत्यर्थः ॥ १ ॥

अथ तदेवाह—

एकस्मा अन्यो यज्ञः कामायाहियते सर्वेभ्योऽग्निष्टोमः ॥ २ ॥

अन्य उक्थादिकः। एकस्मै कामाय एकं फलमुद्दिश्याहियते अनुष्ठीयते। यथा 'उक्थेन पशुकामो यजेत' 'षोडशिना वीर्य्यकामो यजेत' 'वाजपेयेनाधिपत्यकामो यजेतेति' अग्निष्टोमस्तु सर्व्वेभ्य आहियते अतोऽयमेव मुख्यो यज्ञः ॥ २ ॥

अथ सर्व्वकामसाधनोऽग्निष्टोम इत्युक्तं तत्र पशोरपि फलसाधनत्वेनायं समृद्ध इत्याह—

द्वादश स्तोत्राण्यग्निष्टोमो द्वादशमासाः सँव्वत्सरः सँव्वत्सरं पशवोऽनु प्रजायन्ते तेन पशव्यः समृद्धः॥३॥

द्वादशानां स्तोत्राणामाहारोऽग्निष्टोमः, द्वादशमाससमुदायात्मकश्च संवत्सरः, अतः संख्यासादृश्यादग्निष्टोम एव संवत्सरः। अनु संवत्सरे हि पशवो गर्भन्धृत्वा प्रजायन्ते अतः संवत्सरः पशव्यस्तेन संवत्सरेणास्याभेदादयमपि पशव्यः पशुभ्यो हितो भवति अत एव समृद्धः॥३॥

अथास्य प्रकारान्तरेण पशव्यत्वमाह—

द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्व्विँशतिश्चतुर्विँशतिरर्द्धमासाः सँव्वत्सरः सँव्वत्सरं पशवोऽनु प्रजायन्ते तेन पशव्यः समृद्धः ॥ ४ ॥

अग्निष्टोमे यज्ञे द्वादश स्तोत्राणि द्वादश शस्त्राणि तदुभयं मिलित्वा चतुर्विंशतिसंख्या सम्पद्यते। संवत्सरश्चतुर्विंशतिरर्द्धमासात्मकः। तथा सत्ययं संख्यासाम्यात् संवत्सरात्मकः। शिष्टंपूर्ववत् ॥ ४ ॥

अथ ब्रह्मवर्च्चसफलसाधनत्वेन प्रशंसति—

अग्नौ स्तोत्रमग्नौ शस्त्रं प्रति तिष्ठति तेन ब्रह्मवर्च्चस्यः ॥ ५ ॥

अस्य स्तोत्रमन्तिमं यज्ञायज्ञीयमग्नौ प्रति तिष्ठति तत्राग्नेयं, तथास्य शस्त्रं चान्तिममाग्निमारुतमग्नावेव प्रतितिष्ठति समाप्नोति। आग्निमारुतेऽपि अग्निः स्तूयते। अतस्तदुभयोपेतोऽग्निष्टोमो ब्रह्मवर्च्चस्यो भवति तेजोविशेषरूपत्वात्। अग्नेरपि तेजोविशेषसद्भावात् अस्योक्तफलसाधनत्वम् ॥ ५ ॥

अथास्याग्निष्टोमस्य ज्योतिष्टोमत्वव्यपदेशः किंनिबन्धन इति प्रश्नमाक्षिप्योत्तरमाह—

किंज्योतिष्टोमस्य ज्योतिष्टोमत्वमित्याहुर्व्विराजꣳसꣳस्तुतः सम्पद्यते विराड्वै च्छन्दसां ज्योतिः ॥ ६ ॥

अस्य ज्योतिष्टोमस्य किञ्ज्योतिष्टोमत्वं किं कारणकत्वमित्याहुर्ब्रह्मवादिनः? अयं यज्ञस्त्रिवृदादिभिः संस्तुतः सन् विराजं सम्पद्यते। 'दशाक्षरा विराडि'ति श्रुतेः। दशसंख्या सम्पद्यत इत्यर्थः। तथा सति विराजत इति विराडिति व्युत्पत्त्या छन्दसां मध्ये विराट् ज्योतिः। एवं च स्तोमानां मध्ये विराट् द्वारा सम्पत्तेरयं ज्योतिष्टोम इत्युच्यत इति। विराजेन दशसंख्याधिक्यकल्पसिश्चेत्थमवगन्तव्या प्रातःसवने बहिष्पवमानस्त्रिवृदतो नवस्तोत्रीया भवन्ति। आज्यस्तोत्राणि चत्वारि तानि पञ्चदशानि षष्टिस्तोत्रीया भवन्ति। तदुभयस्मिलित्वा एकोनसप्ततिस्तोत्रीया भवन्ति। माध्यन्दिने सवनेऽपि पञ्चदश माध्यन्दिनः पवमानः पृष्ठस्तोत्राणि चत्वारि अपि सप्तदश स्तोमानि मिलित्वा अशीतिस्तोत्रीया भवन्ति। तृतीयसवनेऽपि सप्तदश आर्भवः पवमानः। एकविंशस्तोममग्निष्टोमस्तोत्रं मिलित्वा अष्टत्रिंशत्स्तोत्रीया भवन्ति। सवनत्रयं मिलित्वा नवत्यधिकं शतस्तोत्रीया भवन्ति। अतश्च दशशो भागे सति अन्ते दशावशिष्यन्ते। एवं दशसंख्योपेतत्विराट्त्वसम्पत्तेस्तत्सम्बन्धादस्य ज्योतिष्टोमत्वम् ॥ ६ ॥

अथ विदुषः फलमाह—

ज्योतिः समानानां भवति य एव ँवेद ॥ ७ ॥

ऋज्वर्थः ॥ ७ ॥

अथाग्निष्टोममेव प्रकारान्तरेण प्रशंसति—

ज्येष्ठयज्ञो वा एष यदग्निष्टोमः ॥ ८ ॥

अग्निष्टोम इति योऽस्ति एष ज्येष्ठयज्ञः खलु देवानां ज्येष्ठः प्रजापतिः 'हिरण्यगर्भः समवर्त्तताग्र' इत्यादिस्तुतेः। तत्सम्बन्धादस्य ज्येष्ठत्वम् 'प्रजापतिर्वा एष यज्ञो यदग्निष्टोम' इति श्रुतिः ॥ ८ ॥

अथामुमेव पक्षं प्रजापतेः श्रेष्ठत्वसम्पादनद्वारा पुनः प्रशंसति—

प्रजापतिः प्रजा असृजत ता अस्मै श्रैष्ठ्याय नातिष्ठन्त स एतमग्निष्टोममपश्यत्तमाहरत्ततोऽस्मै प्रजाः श्रैष्ठ्यायातिष्ठन्त ॥ ९ ॥

पूर्वं प्रजापतिना सृष्टाः। अस्मै स्रष्ट्रे प्रजापतये श्रैष्ठ्याय श्रेष्ठभावाय नातिष्ठन्त अमुं श्रेष्ठमिति नाशासिष्ट। इतरत् सुज्ञानम् ॥ ९ ॥

अथ विदुषः फलमाह—

तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एव ँवेद ॥१०॥

स्पष्टोऽर्थः ॥ १० ॥

पूर्वं'म्मुखत एव त्रिवृतमसृजत तं गायत्रीच्छन्दोऽन्वसृज्यते'त्यादिना च्छन्दश्चतुष्टयस्य सृष्टिरुक्ता तत्रादितस्त्रयाणामेव सवनत्रयसम्बन्धो दृश्यते कथन्तुरीयस्य तत्सम्बन्ध इति ब्रह्मवादिनः शङ्कामुपक्षिपति—

यत्त्वित्याहुर्गायत्रं प्रातःसवनं त्रैष्टुभं माध्यन्दिनꣳ सवनञ्जागतं तृतीयसवनं क्व तर्हि तुरीयं च्छन्दोऽनुष्टुबिति ॥ ११ ॥

यद्यदि तु इदानीमिति वक्ष्यमाणप्रकारेणाहुर्ब्रह्मवादिनः तेषामुक्तिप्रकारमाह—गायत्रं गायत्र्या सम्बद्धं प्रातःसवनं, प्रातःसवने गायत्र्या सम्बद्धो दृश्यत इत्यर्थः । एवमुत्तरयोरपि योज्यम् । तर्हि एवं सति तुरीयञ्चतुर्थमनुष्टुप् छन्दः क्व कुतः सवने सम्बध्यत इत्येवं यद्याहुरिति समन्वयः । तदा वक्ष्यमाणमुत्तरं ब्रूयादिति शेषः ॥ ११ ॥

अनुष्टुप्सम्बन्धः किमर्थं पृच्छ्यत इति तत्राह—

छन्दसां वा अन्ववलुप्तिं यजमानोऽन्ववलुप्यते ॥१२॥

छन्दसां गायत्र्यादीनां चतुर्णाम्मध्ये यस्यापि छन्दसोऽवलुप्तिं नाशमनु यजमानोऽप्यनुक्रमेणानुलुप्यते नश्यति । अत उक्तः प्रश्नो युक्त इत्यर्थः ॥ १२ ॥

अथ तस्योत्तरमाह—

अष्टाक्षरा गायत्री हिङ्कारो नवम एकादशाक्षरा त्रिष्टुब् द्वादशाक्षरा जगती च्छन्दोभिरेवानुष्टुभमाप्नोति यजमानस्यानवलोपाय ॥ १३ ॥

गायत्र्याः पादस्य स्वतोऽष्टावक्षराणि हिङ्कारो बहिष्पवमानस्याद्योऽक्षरः तेन सह नव सम्पद्यन्ते । माध्यन्दिनस्य पवमानस्यान्त्यायां त्रिष्टुभि एकादशाक्षराणि । आर्भवपवमानस्यान्त्यायां जगत्यां द्वादशाक्षराणि सहिङ्कारच्छन्दस्त्रयगताक्षराणि मिलित्वा द्वात्रिंशतिः सम्पद्यते । अनुष्टुबपि द्वात्रिंशदक्षरा तथा सति त्रिभिरेव छन्दोभिः सहिङ्कारैरनुष्टुभमाप्नोति स्तोताऽसावनुष्टुप् स्वावयवैस्त्रिभिः सहिङ्कारैः अष्टाक्षरादिरूपैश्छन्दस्त्रयं व्याप्य तद्द्वारा सवनत्रयमथाप्नोतीत्युक्तं भवति । असावार्त्तिर्यजमानस्यानवलोपायाविनाशाय भवति एवन्तुरीयस्य छन्दसः सवनत्रयसम्बन्धन्तूत्तरं ब्रूयुरित्यभिप्रायः ॥ १३ ॥

उक्तार्थविज्ञानं सङ्क्षेपविस्ताराभ्यां प्रशंसति—

यो वा अनुष्टुभꣳ सर्व्वत्रापिꣳ सवनान्यन्वायत्तां

व्वेद सर्व्वत्रास्यापि भवत्येषा वा अनुष्टुप् सर्व्वत्रापिः सवनान्यन्वायत्ता तद्य एवं व्वेद सर्वत्रास्यापि भवति ॥ १४ ॥

योवा यः कश्चिदपि पुरुषः अनुष्टुभं सर्वत्रापिं सर्वत्र यज्ञे आपिर्य्याप्तिः तां वेद जानाति। कथन्तस्या व्याप्तिरिति तामाह—सवनानि त्रीण्यपि अनुक्रमेणायत्तां गायत्र्याद्यक्षरद्वारेण संख्याप्राप्तां वेद अस्य वेदितुः सर्वत्र आपिर्य्यापनं अप्रतिहतसञ्चारो भवति। का सा अनुष्टुप् एषा वै छन्दोऽक्षरसमाहारासिद्धा खल्वनुष्टुप् उक्तलक्षणोपेता। तद्य एवमित्यादेरुपसंहारार्थत्वादपुनरुक्तिः ॥ १४ ॥

अथ पूर्वविहितं स्तोमचतुष्टयं यज्ञनिर्वाहकत्वेन प्रशंसति—

यद्वै राजानोऽध्वानं धावयन्ति येऽश्वाना व्वीर्य्यवत्तमास्तान्युञ्जते त्रिवृत्पञ्चदशः सप्तदश एकविंश एते वै स्तोमाना व्वीर्य्यवत्तमास्तानेव युङ्क्ते स्वर्गस्य लोकस्य समष्ट्यै ॥ १५ ॥

यद्वै यदा वा खलु राजानः संग्रामकर्त्तारः अध्वानं माजिमार्गं धावयन्ति गमयन्ति रथान् तदा ते ये अश्वानाम्मध्ये वीर्य्यवत्तमा अतिशयेन वीर्य्योपेता अश्वाः सन्ति तान् युञ्जते योजयन्ति रथेषु। अयं दृष्टान्तः। एवमुद्गाता स्तोमानाम्मध्ये त्रिवृदादयोऽतिशयेन वीर्य्यवत्तमाः अतस्तानेव युङ्क्ते स्वर्गप्राप्तिसाधने यज्ञे। तत्तेषां योजनं स्वर्गस्य लोकस्य समष्ट्यै सम्यक् प्राप्तये सम्पद्यते ॥ १५ ॥

एवं प्रशस्य स्तोमचतुष्टयमग्निष्टोमस्य प्रतिष्ठासाधनविधत्ते—

चतुष्टोमो भवति प्रतिष्ठा वै चतुष्टोमः प्रतिष्ठित्यै ॥ १६ ॥

अग्निष्टोमश्चतुष्टोमो भवति विहितत्रिवृदादिस्तोमचतुष्टयं निर्वर्त्य कर्त्तव्यः। स चतुष्टोमः प्रतिष्ठा वै प्रतिष्ठारूपः खलु यथा पादचतुष्टयोपेतोऽश्वादिः प्रतिष्ठितो भवति तद्वदयमपीति भावः। सा चतुष्टोमकल्पितिः प्रतिष्ठित्यै यजमानस्य स्थैर्य्याय भवति ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य तृतीयः खण्डः ॥ ६ ॥ ३ ॥

अथ चतुर्थः खण्डः ।

अथोद्गातुर्व्यापारात्मकं प्रथमं कर्म्म ज्ञापनार्थमौदुम्बर्य्युच्छ्रयणन्त-

द्विवक्षुस्तस्योत्पत्तिमाह—

प्रजापतिर्देवेभ्य ऊर्ज्जं व्यभजत्तत उदुम्बरः समभवत्प्राजापत्यो वा उदुम्बरः प्राजापत्य उद्गाता यदुद्गातौदुम्बरीं प्रथमेन कर्मणान्वारभते स्वयैव तद्देवतयात्मानमार्त्विज्याय वृणीते ॥ १ ॥

देवानामूर्ग्विभागे उदुम्बरोत्पत्तिस्तैत्तिरीये श्रूयते 'देवानामूर्ज्जव्यभजत्तत उदुम्बर उदातिष्ठदिति' यस्मादेवं तस्मादुदुम्बरः प्राजापत्यो वै प्रजापतिदेवताकः खलु। उद्गाता प्राजापत्यामौदुम्बरीं प्रथमेन कर्म्मणा निमित्तेनान्वारभत इति यत् स्वयैव तद्देवतया प्रजापतिनात्मानमार्त्विज्याय वृणीते वृतवान् भवति। अथ वक्ष्यमाणमन्त्राणां विनियोगं सूत्रकार आह 'अग्रेणौदुम्बरीङ्कृत्वोदङ्मुखस्तिष्ठन्नध्वर्य्युणा सहोच्छ्रयेत् दक्षिणोत्तराभ्यां पाणिभ्यां द्युतानस्त्वेत्यायोरिति इवभ्रेऽवदध्यादवधाय जपेन्नमः समुद्रायेति ॥ १ ॥

अथ समन्त्रकमौदुम्बर्य्युच्छ्रयणं विधत्ते—

तामुच्छ्रयति "द्युतानस्त्वा मारुत उच्छ्रयतूर्द्विवꣳ स्तभानान्तरिक्षं पृण दृꣳह पृथिवीम्" ॥ २ ॥

तामुच्छ्रयति ऊर्द्धं स्थापयति मानार्थन्द्युतानस्त्वा मारुत इत्यादिमन्त्रेण। मन्त्रस्यायमर्थः, हेशाखे त्वा त्वान्द्युतानो द्योतमान एतन्नामको मरुतां पुत्रो मारुतो देव उच्छ्रयतु ऊर्द्धं स्थापयतु, तथा दिवं द्युलोकं उत्स्तभान उपरि स्थितमपतनाय स्तम्भनङ्कुरु तवोच्छ्रयणेन। तथान्तरिक्षन्तव स्थौल्येन पृण पूरय, तव मूलेन पृथिवीं दृꣳह दृढां कुरु ॥ २ ॥

अथाध्वर्युणा निधीयमानायाः शाखाया उद्गात्रन्वारम्भमन्त्रं विधत्ते—

तामन्वारभत "आयोष्ट्वा सदने सादयाम्यवतश्छायायाꣳ समुद्रस्य हृदय" इति ॥ ३ ॥

हे उदुम्बरि! त्वा त्वाम् आयोः 'इण्गतौ' यजमानस्य स्वर्गप्रापकस्य सवनत्रयगामिनो वा देवान् प्रति गच्छतो वा यज्ञस्य सदने स्थाने सादयामि। तथा अवतश्छायायां रक्षकस्य यज्ञस्य छायायां सादयामि। तथा समुद्रस्यान्तरात्मनोऽन्तरिक्षस्य, यद्वा समभिप्रयन्त्येनमृत्विगादय इति समुद्रः सदः तस्य हृदये मध्यदेशे सादयामि। इतिशब्दो मन्त्रसमाप्तिद्योतनार्थः। अनेन मन्त्रेण तां शाखामन्वारभते अनुक्रमेण स्पृशेत् ॥३॥

मन्त्रगतमायुःशब्दं व्याचष्टे—

यज्ञो वा आयुस्तस्य तत्सदनं क्रियते ॥ ४ ॥

य आयुः स यज्ञो वै । अत्रायुःशब्देन यज्ञोऽभिधीयत इत्यर्थः । अस्य व्युत्पत्तिर्मन्त्रव्याख्यानावसरे प्रदर्शिता । तत्तेन मन्त्रेण आयुःशब्दप्रयोगेण तस्य यज्ञस्यैव सदनं क्रियते ॥ ४ ॥

अथावतश्छायायामिति मन्त्रभागं व्याचष्टे—

यज्ञो वा अवति तस्य सा च्छाया क्रियते ॥ ५ ॥

योऽयं यज्ञः स खलु अवति रक्षति यजमानमतोऽवनात् यज्ञस्यैव च्छाया कृता भवति ॥ ५ ॥

समुद्रस्येति भागस्य सदोरूपतां दर्शयति—

मध्यतो वा आत्मनो हृदयन्तस्मान्मध्ये सदस औदुम्बरी मीयते ॥ ६ ॥

आत्मनो यजमानस्य हृदयम्मध्यतो वै मध्ये खलु तस्मात्तदानुरूप्याय सदसो मध्यदेशे औदुम्बरी मीयते प्रक्षिप्यते । मन्त्रेसमुद्रशब्दाभिधेयस्य ब्राह्मणे सदःशब्देन व्यवहारात्तस्य सदश एवार्थो विवक्षित इत्युक्तं भवति ॥ ६ ॥

अथौदुम्बर्य्यनुमन्त्रणे योऽयं मन्त्रः 'नमः समुद्राय नमः समुद्रस्य चक्षुषे मामा यून्वर्वाहासीर्दूर्गस्यूर्ज्जोदा ऊर्ज्जम्मे देह्यूर्ज्जम्मे धेह्यन्नम्मे देह्यन्नम्मे धेहि'त्यादि मन्त्रोऽस्ति तत्र नमः समुद्रायेति वाक्यद्वयं व्याचष्टे—

"नमः समुद्राय नमः समुद्रस्य चक्षुष" इत्याह वाग्वै समुद्रो मनः समुद्रस्य चक्षुस्ताभ्यामेव तन्नमस्करोति ॥ ७ ॥

वाचो निरवधिकत्वात्समुद्र इत्युच्यते, वाग्रूपसमुद्रस्य मनसः पूर्वरूपत्वात् समुद्रचक्षुरित्यनेन मन उच्यते । 'मनः पूर्वरूपं वागुत्तररूप'मिति हि श्रुतिः कौषीतकिनः, तत्तथा सत्यमुं भागं पठन्नुद्गाता वाचो मनसश्च नमस्कारं कृतवान् भवति ॥ ७ ॥

मामा यून्वर्वेत्यमुं भागं व्याचष्टे—

"मामा यून्वर्वाहासीदि"त्याह साम वै यून्वर्वा साम्न एव तन्नमस्करोत्यार्त्विज्यं करिष्यन् ॥ ८ ॥

यून्वर्वा यून्वर्वर्च्चः पुरुषं यूनर्त्तिं प्राप्नोतीति यून्वर्वा साम वै तत्तथा सत्येतत् पाठेन साम्न एव नमस्करोति ॥ ८ ॥

आर्त्विज्यं करिष्यन्नुद्गाता एतदेव विवृणोति—

यो वा एवꣳसाम्ने नमस्कृत्य साम्नार्त्विज्यं करोति

न साम्नो हीयते नैनꣳ सामापहते ॥ ९ ॥

यः पुमान् एवमुक्तरीत्या साम्ने नमस्कृत्य साम्ना सामगाननिमित्तेनार्त्विज्यं करोति स साम्नः सकाशान्न हीयते न वियुक्तो भवति। एनमुद्गातारं साम न अपहते न परित्यजति सामाप्येनेन न दुष्टं भवति। तच्चैवं परार्थं प्रयुक्तवानिति न हिनस्तीत्यर्थः ॥ ९ ॥

न केवलमस्य सामकृतबाधाभावः किन्तु अन्यदीयनिन्दापि न प्राप्नोतीत्याह—

य एनमनुव्याहरति स आर्तिमार्च्छति ॥ १० ॥

योऽन्यः पुमानेनमुक्तप्रकारेणार्त्विज्यकारिणमनुव्याहरति अधिक्षिपति स एवार्त्तिमधिक्षेपप्रयुक्तामार्च्छति सर्वतः प्राप्नोति ॥ ११ ॥

अथोर्गसीत्यादि मन्त्रभागमुपादाय तत्तात्पर्यमाह—

"ऊर्गस्यूर्जोदा ऊर्ज्जं मे देह्यूर्ज्जं मे धेह्यन्नं मे देह्यन्नं मे धेंहि" प्रजापतेर्वा एतदुदरं यत्सद ऊर्गुदुम्बरो यदौदुम्बरी मध्ये सदसो मीयते मध्यत एव तत्प्रजाभ्योऽन्नमूर्जन्दधाति ॥ ११ ॥

मन्त्रभागस्यायमर्थः, हे उदुम्बरि त्वम् ऊर्गसि अन्नमसि देवानामन्नविभागे उत्पन्नत्वादत ऊर्ज्जोदा अन्नस्य दात्री भवसि, ऊर्ज्जम्मे मह्यं देहि, तथाच मे मयि ऊर्ज्जन्धेहि स्थापय। मे इति 'सुपांसुलुगि'त्यादिना सप्तम्याः शेभावे रूपसिद्धिः। उक्तएवार्थः। अन्नम्मे देहीति शब्दान्तरेणोच्यते–सद इति। यत एतत् प्रजापतेः उदरं खलु उदुम्बर इति यत्तत् ऊर्ग् अन्नमेवात एव मध्यदेश उदर एव प्रजननात् अन्नसिध्यर्थमन्नम् ऊर्ज्जं दधाति स्थापितवान् भवतीत्यर्थः। तथा सति यदौदुम्बरी सदसो मध्ये मीयते तत् मध्ये ऊर्ग्स्थापनमेव प्रजानां जीवनाय तेषामुदरे अन्नं स्थापितं भवतीत्यर्थः। अन्नमित्यूर्जमित्यस्य व्याख्यानम् ॥ ११ ॥

एतदेव व्यतिरेके दोषप्रदर्शनेन द्रढयति—

तस्माद्यत्रैषा यातयामा क्रियते तत् प्रजा अशनायवो भवन्ति ॥ १२ ॥

तस्मान्मन्त्रेण स्थापनादन्नं दधाति। यस्मादेवमतः। यत्रैषा औदुम्बरी यातयामा मन्त्रराहित्येन गतरसा सती क्रियते तत्तत्र देशे प्रजा अशनायवः क्षुधिता भवन्ति। यस्मादेवं तस्मान्मन्त्रेण स्थापनादन्नं दधातीति सम्बन्धः ॥ १२ ॥

मध्यतोऽन्नं दधातीत्युक्तं किं तन्मध्यमत्र विवक्षितं कथं वा तत्रान्ननिधाने प्रजानां तृप्तिर्भवतीति तत्राह—

साम देवानामन्नꣳ सामन्येव तद्देवेभ्योऽन्न ऊर्ज्जन्दधाति स एव तदूर्ज्जि श्रितः प्रजाभ्य ऊर्ज्जं विभजति॥१३॥

तस्य सामोपजीवनं प्रायच्छदिति, सामविधाने उक्तत्वादन्नवत् प्रीतिकरत्वाद्वा देवानामन्नं साम तत्तथा सति सामन्येव देवानामन्नभूते सामनि ऊर्ज्जमन्नन्दधाति किमर्थं? देवेभ्यः देवांस्तर्पयितुम्। स इति श्रित इति च लिङ्गव्यत्ययः। तत्तथा स एव तदेव देवानामन्नभूतम् ऊर्ज्जि अन्ने श्रितं साम प्रजाभ्य एषामर्थाय ऊर्ज्जं विभजति प्रयच्छति ॥ १३ ॥

अथौदुम्बरिप्रसङ्गात् उद्गात्रादीनां स्वस्वप्रयोगादिव्यवस्थामाह—

उदङ्ङासीन उद्गायत्युदीचीन्तादिशमूर्ज्जा भाजयति प्रत्यङ्ङासीनः प्रस्तौति प्रतीचीन्तादिशमूर्ज्जा भाजयति दक्षिणासीनः प्रतिहरति दक्षिणान्तादिशमूर्ज्जा भाजयति प्राञ्चोऽन्य ऋत्विज आर्त्विज्यं कुर्व्वन्ति तस्मादेषा दिशां वीर्य्यवत्तमैतांꣳ हि भूयिष्ठाः प्रीणन्ति ॥ १४ ॥

यौदुम्बरी पूर्वं गानार्थंनिर्म्मिता तस्या उदङ्ङासीनः उदग्देशे स्थित्वा उद्गाता गानभागङ्गायति तत्तेन उदीचीन्दिशम् ऊर्ज्जा अन्नेन भाजयति बह्वन्नाङ्करोति। एवं प्रस्तोता प्रत्यङ्ङासीनः प्रस्तौति तत्तेन प्रतीचीन्तादिशमूर्ज्जा भाजयति। एवं दक्षिणाभिमुखः प्रतिहर्ता दक्षिणान्तदिशमूर्ज्जा भाजयति। अन्ये होत्रादिसप्तर्त्विजः प्राञ्चः प्राङ्मुखाः आर्त्विज्यं कुर्वन्ति। तस्माद्बहुभिः स्वाभिमुखमनुष्ठितत्वादेषा प्राची दिक् दिशामन्यासाम्मध्ये वीर्य्यवत्तमा अतिशयेन वीर्य्यवती। तस्मादित्यस्य विवरणमेतां हीत्यादि ॥ १४ ॥

अत्र ब्रह्मवादिनः प्रश्नमवतारयति—

ब्रह्मवादिनो वदन्ति कस्मात्सत्यात्प्राञ्चोऽन्य ऋत्विज आर्त्विज्यं कुर्व्वन्तीति विपरिक्रम्योद्गातार इति दिशामभीष्टयै दिशामभिप्रीत्या इति ब्रूयात्तस्मात्सर्व्वासु दिक्ष्वन्न विवँद्यते सर्व्वा ह्यभीष्टाः प्रीताः ॥ १५ ॥

ब्रह्मवादिनो वदन्ति कस्मात्सत्यात् कुतो हेतोरिति तत्रोत्तरमाह—

दिशामभिष्टयै दिशामभिप्रीत्या इति ब्रूयादित्यस्मात् सर्वासु दिक्ष्वन्नं विद्यते सर्वा ह्यभीष्टाः प्रीता इति सर्वासु दिक्षु पूर्वरीत्या आर्त्विज्यकरणन्दिशामभीष्ट्यै तिसृणामपि दिशामभितो यागाय पूजनायाभिप्राप्तये वा भवति तथा दिशां सर्वासामभिप्रीत्यै अभिप्रीणनाय भवति एकामपि दिशमनतिहाय सम्भावनायेत्यर्थः । एवमुत्तरं ब्रूयात्, यस्मादेवं तस्मात् सर्वासु दिक्षु अन्नं विद्यते लभ्यत इत्यर्थः । उक्तार्थस्यैवोपपादनं सर्वा ह्येति । यस्मात् सर्वा अपि दिशः अभीष्टाश्च प्रीताश्च तस्मात्सर्वासु दिक्षु अन्नं विद्यत इति युक्तम् ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ समन्त्रकं द्रोणकलशस्य प्रोहणं विवक्षुस्तस्योत्पत्तिमाह—

प्रजापतिरकामयत बहु स्यां प्रजायेयेति सोऽशोचत्तस्य शोचत आदित्यो मूर्ध्नोऽसृज्यत सोऽस्य मूर्द्धानमुदहन् स द्रोणकलशोऽभवत्तस्मिन् देवाः शुक्रमगृह्णत तां वै स आयुषार्त्तिमत्यजीवत् ॥ १ ॥

प्रजापतिरकामयतेत्युक्तार्थम् । तस्य शोचतः आदित्यो मूर्ध्नोऽसृज्यत सृष्टोऽभूत् । स सृष्ट आदित्यः तस्य प्रजापतेर्मूर्द्धानं मस्तकप्रदेशं स्वोत्पत्त्यर्थं उदहन् ऊर्ध्वं घातितवान् । स भिन्नो मूर्द्धा द्रोणकलशोऽभवत् । तस्मिन् कलशे देवाः शुक्रं शुक्लं दीप्तं सोमरसं प्रत्यगृह्णत गृहीतवन्तः । स प्रजापतिः । आयुषा शिरोभङ्गात् क्षीणेनायुष्येण या आर्त्तिरभूत् तामार्त्तिमत्यजीवत् अतिक्रम्य चिरकालं जीवितवान् स्वशिरोभागकपाले आप्यायकस्य सोमरसस्य धारणेन आर्त्तिं पर्य्यहरादित्यर्थः ॥१॥

अथोक्तार्थवेदनं प्रशंसति—

आयुषार्त्तिमतिजीवति य एव वँवेद ॥ २ ॥

योऽन्य एवमुक्तमर्थं जानाति स आयुषा नैमित्तिकायुःक्षयेण जनिता या आर्त्तिः तामतिजीवति अतिक्रम्य शतवर्षं जीवति ॥ ३ ॥

इदानीं समन्त्रकं द्रोणकलशप्रोहणं विधत्ते—

तं प्रोहे"द्बानस्पत्योऽसि बार्हस्पत्योऽसि प्राजापत्योऽसि प्रजापतेर्मूर्द्धास्यत्यायुपात्रमसीदमहम्मां प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्चसाये"ति ॥ ३ ॥

तं प्रजापतिशिरस्त उत्पन्नं कलशं वानस्पत्य इत्यादिना मन्त्रेण प्राञ्चं प्रोहेत् प्रेरयेत्। एतत्प्रोहणमध्वर्य्वादिभिस्त्रिभिरपि कर्त्तव्यं, तथा च सूत्रम् 'ऋतमसीति द्रोणकलशमालभ्य व्वानस्पत्योऽसीति प्रोहेयुरि'ति अयं मन्त्रः पूर्वं व्याख्यातः ॥ ३ ॥

अथ मन्त्रस्य प्रथमभागस्य तात्पर्य्यं व्याचष्टे—

यदाह व्वानस्पत्य इति सत्येनैवैनं तत्प्रोहति ॥ ४ ॥

मन्त्रे उद्गाता वानस्पत्य इति यदाह तत्तेन एनं द्रोणकलशं सत्येनैव प्रोहति। वस्तुतो द्रोणकलशस्य वनस्पतिविकारत्वात् सत्य इति 'बृहस्पतिर्व्वै देवानामुद्गाता तमेव तद्युनक्ती'ति एतेन मन्त्रभागेनैव प्रोहणं कृतवान् भवति ॥ ४ ॥

अथ द्वितीयभागस्य तात्पर्य्यमाह—

यदाह बार्हस्पत्य इति बृहस्पतिर्व्वै देवानामुद्गाता तमेव तद्युनक्ति ॥ ५ ॥

तं बृहस्पतिमेव युनक्ति प्रेरयति ॥ ५ ॥

अथ तृतीयचतुर्थभागयोस्तात्पर्य्यमाह—

यदाह प्राजापत्य इति प्राजापत्यो ह्येष देवतायै यद्द्रोणकलशो यदाह प्रजापतेर्मूर्द्धेति प्रजापतेर्ह्येष मूर्द्धा उद्धन्यत ॥ ६ ॥

द्रोणकलशस्य प्रजापतेर्म्मूर्द्धरूपत्वमुक्तप्रकारेण स्पष्टन्तत्सम्बन्धा देव स प्राजापत्य इत्युच्यते ॥ ६ ॥

अथ पञ्चमस्य तात्पर्य्यमाह—

यदाहा"त्यायुपात्रमि"त्यति ह्येतदन्यानि पात्राणि यत् द्रोणकलशो देवपात्रं द्रोणकलशः ॥ ७ ॥

मन्त्रे अत्यायु पात्रमिति यदाहोद्गाता तद्युनक्ति इति शेषः, तत्कथं युनक्ति? इति तत्राह–द्रोणकलश इति। यत् पात्रमसि एतत् पात्रमन्यानि मनुष्याणां पात्राणि अति हि अतीत्य वर्त्तते खलु। अथवा मनुष्यास्तेषां पात्राण्यतीत्य वर्त्तन्ते इति व्युत्पत्त्या अत्यायुपात्रत्वात् तेनान्येषामतिक्रमणं युक्तमित्यतिक्रमणमेव दर्शयति। अयं द्रोणकलशो देवपात्रं देवानांपानसाधनं पात्रम् अन्नत्यो हि सोमस्तद्देवार्थं गृह्यते तस्माद्देवपात्रत्वात् नरपात्रातिक्रमणेनात्यायुपात्रमिति मन्त्रभागोयुक्त इत्यर्थः ॥ ७ ॥

इति विदुषः फलमाह—

देवपात्री भवति य एव वँवेद ॥ ८ ॥

य उक्तार्थज्ञः स देवपात्री देवपात्रं द्रोणकलशस्तद्वान् भवति। सोमयागानुष्ठाता भवतीत्यर्थः ॥ ८ ॥

अथ प्रासङ्गिकं किञ्चिदाह—

ब्राह्मणं पात्रे न मीमाꣳसेत यं ब्राह्मणमिव मन्यते प्र देवपात्रमाप्नोति न मनुष्यपात्राच्छिद्यते ॥ ९ ॥

ब्राह्मणं पात्रे पात्रभावे अयं पात्रं भवति न वेति न मीमांसेत विचारं न कुर्यात्। किं ब्राह्मणब्रुवमात्रेण न मीमांसितव्यं नेत्याह-यं पुरुषं ब्राह्मणमिव मन्यत। इव शब्द एवकारार्थः। जात्या ब्राह्मणमेव यदि नाश्नुयात् तदा तद्विषयं वृत्तविद्यादिस्वभावासद्भावन्न मीमांसेतेत्यर्थः। तथा च स्मृतिः 'न पृच्छेद्गोत्रचरणे न स्वाध्यायं श्रुतं तथा। हृदयं कल्पयेदेवं सर्वदेवमयोद्विज' इति। एवं यस्मिन्विचारमकृत्वा पात्रमेवेति यो निश्चयं करोति तस्य तदेव पात्रमन्वेति विद्यातपोयुक्ते यत्फलं भवति तत्तस्मिन्नपि भवतीत्यर्थः। किञ्च स पुमान् मनुष्यपात्रान्न छिद्यते मनुष्याणां पात्रं भवतीत्यर्थः ॥ ९ ॥

उक्तं द्रोणकलशग्रोहणं हविर्द्धानादधः कर्त्तव्यं तत्राक्षगतवागवरोधनायेति वक्ष्यति। अतो वागक्षरसम्बन्धं वक्तुमाख्यायिकामाह—

वाग्वै देवेभ्योऽपक्रामत्सापः प्राविशत्तां देवाः पुनरयाचँस्ता अब्रुवन्यत्पुनर्दद्याम किन्नस्ततः स्यादिति यत्कामयध्व इत्यब्रुवँस्ता अब्रुवन्यदेवास्मासु मनुष्या अपूतं प्रवेशयाँस्तेनासꣳसृष्टा असामेति ॥ १० ॥

पुरा देवेभ्यः सकाशात् स्वयमात्मानं प्रकाशयन्ती वाक् अपक्रामत् आत्मानमप्रकाश्यापगताभूत् 'वै शब्दः श्रुत्यन्तरप्रसिद्ध्यर्थः' तथाच तैत्तिरीयकं 'वाग्वै देवेभ्योऽपक्रामत् यज्ञायातिष्ठमानेत्यादि। सापगता अपः प्राविशत् तां वाचं पुनर्यज्ञार्थमयाचन् प्रार्थयन् ताश्च पुनरब्रुवन् किमिति यत्पुनर्दद्याम यच्छाम नोऽस्माकं ततः किं फलं स्यादिति पृष्टास्ते देवाः तर्हि यत्फलं कामयध्व इत्यब्रुवन् ताश्च पृष्टाः पुनरब्रुवन् हे देवाः अपूतमपूतादिकं अस्मासु मनुष्याः तदुपलक्षिताः सर्वे प्राणिनः प्रवेशयान् प्रवेशयेयुः। लोड्बहुवचनस्येदं रूपम्। तेनापूतेन असंसृष्टाः संसर्गरहिताः। असाम भवेम ॥ १० ॥

उक्तार्थब्रह्मविदः फलमाह—

शुद्धा अस्मा आपः पूता भवन्ति य एव वँवेद॥११॥

स्पष्टोऽर्थः ॥ ११ ॥

अथाप्राप्ताया वाचो वनस्पतीन् प्रवेशमाह—

सा पुनर्त्तात्यक्रामत् सा वनस्पतीन् प्राविशत्तान्देवाः पुनरयाचँस्तान्न पुनरददुस्तानशपन् स्वेन वः किष्कुणा वज्रेण वृश्चानिति तस्माद्वनस्पतीन् स्वेन किष्कुणा वज्रेण वृश्चन्ति देवशप्ता हि ॥ १२ ॥

पुनर्त्ता आर्द्रः पुनर्हता सा अत्यक्रामत् । अतिक्रम्य सा वनस्पतीन् प्राविशत् । प्रविष्टान्तां देवाः इत्यादि अशपन्नित्यन्तः क्षेपः । शापप्रकारमाह—वो युष्मान् स्वेन स्वसम्बन्धिना वानस्पत्येन किष्कुणा दण्डेन युक्तेन वज्रेण परश्वादिना वृश्चान् वृश्चेयुरिति । यस्मादेवन्तस्मादिदानीमपि स्वेन किष्कुणा वज्रेण वृश्चन्ति । हि यस्माद्वनस्पतयो देवैः शप्ताः । अत इत्यभिप्रायः ॥ १२ ॥

इदानीमक्षसम्बन्धं वक्तुं प्रविष्टाया वाचश्चतुर्द्धा विभागमाह—

ता वँवनस्पतयश्चतुर्द्धा वाच विँवन्यदधुर्दुन्दुभौ वीणायामक्षे तूणवे तस्मादेषा वदिष्टैषा वल्गुतमा वाग्वा वनस्पतीनां देवानाꣳ ह्येषा वागासीत् ॥ १३ ॥

तान्तेषु प्रविष्टां वाचं वनस्पतयश्चतुर्द्धा चतुःप्रकारं विन्यदधुः विभज्य निधनमकुर्वन् । केष्वाति उच्यते—दुन्दुभौ भेर्य्यां वीणायां वेणुनिर्म्मिततन्तुसम्बद्धायां विपञ्च्याम् । अक्षे रथादिचक्रयोर्मध्यवर्त्तिनि तिर्य्यग्दण्डे । तूणवे धनुषि गुणे । तस्मादुक्तपदार्थप्रवेशादेषैव वाक् वदिष्ठा अतिशयेन वक्त्री । अत एषैव वल्गुतमा चारुतमा वाक् या श्रोतृमनोह्लादिनीत्यर्थः । एषेत्युक्तं केत्याह—या वनस्पतीनां वनस्पतिविकाराणां दुन्दुभ्यादीनां सम्बन्धिनी । उक्तस्यैव विवरणं देवानां हीति । यस्मात् दुन्दुभ्यादिषु प्रविष्टा वाक् वदिष्ठा वल्गुतमा च अतः खलु देवानां योग्यासीत् ॥ १३ ॥

इदानीमक्षस्थवागवरोधनाय तदधः कलशप्रोहणन्तदुपरि दशापवित्रस्थापनञ्च विधत्ते—

अधोऽधोऽक्षं द्रोणकलशं प्रोहन्ति तस्या वाचोऽवरुद्ध्या उपर्य्युपर्य्यक्षं पवित्रं प्रयच्छन्त्युभयत एव वाचं परिगृह्णन्ति ॥ १४ ॥

अक्षमधोऽधः । अक्षस्याव्यवहितेऽधःप्रदेशे । द्रोणकलशं प्रोहन्त्युद्गातारः । तच्च प्रोहणं तस्या अक्षप्रविष्टाया वाचोऽवरुध्या अवरोधनाय भवति । तथा उपर्य्युपर्य्यक्षम् अक्षस्याव्यवहिते उपरि भागे । पवित्रं प्रयच्छन्ति । तथा सति उभयत एव वाचमक्षस्थां परिगृह्णन्ति स्वायत्तां कुर्वन्ति ॥ १४ ॥

अथाक्षस्पर्शननिन्दापूर्वकं तस्यास्पर्शं विधत्ते—

यस्य कामयेतासुर्य्यमस्य यज्ञं कुर्य्यां वँवाच वँवृञ्जीयेति द्रोणकलशं प्रोहन्बाहुभ्यामक्षमुपस्पृशेदसुर्य्यमस्य यज्ञङ्करोति वाच वँवृङ्क्ते योऽस्य प्रियः स्यादनुपस्पृशन्नक्षं प्रोहेत्प्राणा वै द्रोणकलशः प्राणानेवास्य कल्पयति॥१५॥

अस्य यजमानस्य यज्ञम् । असुर्य्यमसुरेभ्यो हितं देवानामप्रीतिकरं कुर्य्याम् । अस्य वाचञ्च वृञ्जीय जयेयं प्रतिहतवचनं करोमीति यस्य यस्मै यजमानाय कामयेतोद्गाता तस्मै द्रोणकलशं प्रोहन् बाहुभ्यामक्षमुपस्पृशेत् । तथा सति अस्य यज्ञमसुर्य्यं करोति । अस्य वाचं वृङ्क्ते वर्जयति । अथाऽक्षोपस्पर्शनं तत्र निषिद्धमित्यभिप्रायः । अथोक्तवैलक्षण्येन यो यजमानोऽस्योद्गातुः प्रियः स्यात्तस्योक्तदोषद्वयाभावायाक्षमनुपस्पृशन् प्रोहेत् । तथा सति योऽयं द्रोणकलशः सः । प्राणो वै प्राणाख्योऽभूत् । प्रजापतेः शिरस्त उत्पन्नत्वात् । अतः अनुपस्पृशन् द्रोणकलशं प्रोहन्नुद्गाता अस्य यजमानस्य प्राणानेव कल्पयति यजमाने स्थापितवान् भवति । अतोऽक्षस्पर्शनमकृत्वा प्रोहेदिति तात्पर्य्यम् । नन्वक्षस्पर्शाभावेन यजमाने वा ख्यापनमुचितं तदकृत्वा कथं प्राणकल्पनं विरुद्धमिति ? नैषदोषः, यजमाने प्राणेन वा म्रियते यदा च प्राणस्य तदतो व्याप्रियते । तथा च तैत्तिरीयकं 'यत्रैतदधीते वा भाषते वा व्वाचि तदा प्राणो भवति व्वाक् तदा प्राणं रेढि । अथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणे तदा व्वाग्भवति प्राणस्तदा व्वाचं रेढीति' नात्वितरेषामिवोद्गातृणामन्त्रेण वरणाभावात् ॥ १५ ॥

कथमेषामार्त्विज्यकरणमिति ब्रह्मवादिनः प्रश्नमुपक्षिपति—

यन्निवत्याहुर्व्वाचान्यानृत्विजो व्वृणते कस्मादुद्गातारो व्वृता आर्त्विज्यं कुर्व्वन्तीति ॥ १६ ॥

यन्नु यद्यन्यानित्याहुरेवं साक्षेपं यदि ब्रूयुः । वचनप्रकारमेव प्रदर्शयति 'व्वाचा इन्द्रं हौत्रात् मरुतः पौत्रादि'त्यादि रूपया अन्यान् होत्रादीन् ऋत्विजो वृणते । अध्वर्य्यवो वा कस्मादित्यादि स्पष्टम् ॥ १६ ॥

तेषामेवमुत्तरं ब्रूयादित्याह—

यदूद्रोणकलशमुपसीदन्ति तेनोदूगातारो व्वृताः ॥१७॥

यस्मादेते द्रोणकलशमुपसीदन्ति प्रोहन्ति तेन ते वृत्ता एवमार्त्विज्यं कुर्वन्ति ॥ १७ ॥

कथं द्रोणकलशनैषां वृतिरिति तत्राह—

प्राजापत्या वा उदूगातारः प्राजापत्यो द्रोणकलशो द्रोणकलश एवैनानार्त्विज्याय व्वृणीते ॥ १८ ॥

यज्ञात्मकप्रजापतिसम्बन्धाद्वा 'प्रजापतिः सामे'ति श्रुतेः। तत्सम्बन्धाद्वा उद्गातारः प्राजापत्याः। द्रोणकलशश्च तन्मूर्द्धत उत्पत्तेः प्राजापत्यः। तथा सत्युभयोः समानसम्बन्धात्तेन तेषां वरणमिति ॥ १८ ॥

अथ द्रोणकलशस्य प्राङ्मुखप्रोहणस्यायमाशय इत्याह—

प्राञ्च उपसीदन्ति प्राञ्चो यज्ञस्याग्रे करवामेति ॥ १९ ॥

इतः पूर्वमेतेषामुद्गातॄणाङ्गाने प्राङ्मुखत्वासम्भवात् द्रोणकलशप्रोहणे प्राङ्मुखा एवोपसीदन्ति। कया बुद्ध्येति? यज्ञस्याग्रे आदौ प्रथमं कर्म्म प्राञ्चः सन्तः करवामेति ॥ १९ ॥

अथ द्रोणकलशं प्राङ्मुखः प्रोहेत्प्राच्या दिशोऽभिजयायेत्याह—

अनभिजिता वा एषोद्गातॄणां दिग्यत्प्राची यदूद्रोणकलशं प्राञ्चं प्रोहन्ति दिशोऽभिजित्यै ॥ २० ॥

प्राच्या अनभिजितत्वमौदुम्बरे गाने उद्गातॄणां प्राङ्मुखगानाभावाभिप्रायकं स्पष्टम्। न तु रथादिकमश्वादयो युक्ता वहन्ति ॥ २० ॥

कथमुद्गातॄणां यज्ञे योग इति प्रश्नमवतार्य्य द्रोणकलशोपसम्पत्तिरेव तेषां योग इत्याह—

यन्निवत्याद्धुरन्तराश्वः प्रासेवौ युज्यतेऽन्तरा शम्य अनड्वान्क उद्गातॄणां योग इति यदूद्रोणकलशमुपसीदन्ति स एषां योगस्तस्माद्युक्तैरेवोपसद्यन्न ह्ययुक्तो व्वहति ॥ २१ ॥

प्रासेवौ रथयुगस्य सुषिरगतोभयपार्श्वरज्जू तयोर्मध्ये अश्वो युज्यते। शम्ये शकटयुगस्योभयपार्श्वकीलके तयोर्मध्येऽनड्वान्। तथा सति यज्ञाख्ये रथे कथमुद्गातॄणां योग इति प्रश्नः? यदेते द्रोणकलशं हविर्द्धानाक्षाधःस्थितमुपसीदन्ति स एवैषां योग इति तस्योत्तरम्। तस्माद्युक्तैरेवानन्यचित्तैरेव उपसद्यं कलशोपसदनं कर्त्तव्यम्। तथा सति न ह्ययुक्तो वहत्ययमुद्गातृवर्गः ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य पञ्चमः खण्डः ॥ ६ ॥५ ॥

अथ षष्ठः खण्डः ।

अथ ग्राव्णामुपरि द्रोणकलशाध्यूहनं विधत्ते—

ग्राव्णः सꣳसाद्य द्रोणकलशमध्यूहन्ति विड्वै ग्रावाणोऽन्नꣳ सोमो राष्ट्रं द्रोणकलशो यद्ग्रावसु द्रोणकलशमध्यूहन्ति विश्येव तद्राष्ट्रमध्यूहन्ति ॥ १ ॥

द्रोणकलशाध्यूहनकर्तृभिरुद्गातृभिः प्रथममभिषवसाधनान् ग्राव्णः संसाद्य प्रश्चात् द्रोणकलशाध्यूहनं कर्त्तव्यम् । तथा सति ये ग्रावाणः सन्ति ते विड्वै बहुत्वसंख्यायोगात् तेषां विड्व्यवहारः । सोमस्यान्नत्वं प्रसिद्धम् । यो द्रोणकलशःस राष्ट्रं राष्ट्रमिति राजेति कोचिद्राज्यमित्यपरे । तथा सति यद्ग्रावसु सोमरसाधारं द्रोणकलशमध्यूहन्ति तत्तेन विश्येव राष्ट्रम् अन्नस्येदमध्यूहन्ति स्थापितवन्तो भवन्ति ॥ १ ॥

अथ यजमानस्य पापं कामयमान उद्गाता एवं कुर्य्यादित्याह—

यं द्विष्याद्विमुखान् ग्राव्णः कृत्वेदमहममुममुष्यायणममुष्याः पुत्रममुष्या विशोऽमुष्मादन्नाद्यान्निरूहामीति निरूहेद्विश एवैनमन्नाद्यान्निरूहति ॥ २ ॥

उद्गता यं यजमानं द्विष्यात् द्वेष्टि तस्मै ग्राव्णः । अभिषवोपलाभिमुखान् परस्परनिवृत्तमुखान् कृत्वा इदामदानीमहममुं द्वेष्यं यजमानं 'अमुमित्यत्र तन्नामनिर्देशात्' कथममुष्यायणं अमुष्यगोत्रोत्पन्नम् अमुष्याः पुत्रम् अमुष्या विशः सकाशात् 'अत्राप्यमुष्या इति पञ्चम्या विशो नाम निर्देशात्' एवमहममुं द्वेष्यं यजमानं विशोऽन्नाद्याच्च निरूहामि नाशयामि इत्येवं मन्त्रमुच्चार्य्य निरूहेत् । एवं कुर्वन्नुद्गाता विशोऽन्नाद्याच्चैनं यजमानं निरूहति ॥ २ ॥

अथ यजमानस्य भद्रं कामयमान एवं कुर्य्यादित्याह—

योऽस्य प्रियः स्यात्सम्मुखान् ग्राव्णः कृत्वेदमहममुष्यायणममुष्याः पुत्रममुष्यां विश्यमुष्मिन्नन्नाद्येऽध्यूहामीत्यध्यूहेद्विश्येवैनमन्नाद्येऽध्यूहति ॥ ३ ॥

पूर्ववाक्येनैव व्याख्यातप्रायमिदम् ॥ ३ ॥

द्वेष्यस्य च प्रियस्य चोभयस्य प्रयोगमनादृत्यात्मन एव श्रेयःकाम-यमान आह—

अथो तदुभयमनादृत्येदमहं मां तेजसि ब्रह्मवर्च-

सेऽध्यूहामीत्यध्यूहेत्तेजस्येव ब्रह्मवर्च्चस आत्मानमध्यूहति ॥ ४ ॥

अथो तदुभयं द्वेष्यस्य प्रियस्य चाप्रियभूतं श्रेयश्चानाहत्येत्यर्थः मामित्यत्रात्मनो नाम निर्दिशेत्। तेजः शरीरकान्तिः। ब्रह्मवर्च्चसं श्रुताध्ययनजन्यतेजः। इतरत् सुज्ञानम् ॥ ४ ॥

अथ द्वेष्यविषयं प्रयोगान्तरमाह—

यः कामयेत विशा राष्ट्रꣳ हन्यामिति व्यूह्य ग्राव्णोऽधो द्रोणकलशꣳ सादयित्वोपाꣳशुसवनमुपरिष्टादभिनिदध्यादिदमहममुया विशाऽदो राष्ट्रꣳ हन्मीति विशैव तद्राष्ट्रꣳहन्ति ॥ ५ ॥

यः। उद्गाता कामयेतेति किमिति ? परिजनेनामुं राजानं हन्याम् इति। स ग्राव्णो व्यूह्य पृथक् पृथक् स्थापयित्वा। अधः भूमावेव द्रोणकलशं सादयित्वा उपांशुसवनम् उपांशुग्रहार्थं स्तूयते येन तं ग्रावाणम् उपरिष्टादभिनिदध्यात्। इदमिदानीमहममुया विशा अमूभिः परिजनैः अदो राष्ट्रममुं राजानं हन्मीति 'अमुयाद इत्युभयत्र परिजनानां राज्ञश्च नाम गृह्णीयात्, शिष्टोऽयं कल्पः। अन्यस्मिन् अपि यजमाने तद्देशराज्ञोऽप्रियस्य पापचिकीर्षायां कार्य्य इति केचित्। यजमानस्यैव राज्ञ इत्यपरे। तदेवं पञ्च कल्पा उपन्यस्ताः। तत्र प्रथमो नित्यप्रयोगार्थः। शिष्टास्तत्तत्प्रतिपादितकामनार्था इति मन्तव्यम् ॥ ५ ॥

वसवस्त्वेत्यादिभिर्मन्त्रैर्द्रोणकलशसम्मार्ज्जनं वक्ष्यति, तत्रत्येषु गायत्र्यादिच्छन्दःसु किञ्चिद्वेदितव्यमित्याह—

यो वै दैवानि पवित्राणि च्वेद पूतो यज्ञियो भवति च्छन्दाꣳसि च्वै दैवानि पवित्राणि तैर्द्रोणकलशं पावयन्ति ॥ ६ ॥

यानि दैवानि देवसम्बन्धीनि पवित्राणि शोधकानि तानि छन्दांस्येव खलु। तैस्तल्लिङ्गैर्मन्त्रैरित्यर्थः। द्रोणकलशं सोमरसधारणाय पावयन्ति पावनं कर्त्तव्यमित्यर्थः ॥ ६ ॥

अथ देवपवित्राख्यच्छन्दोभिर्युक्तपावनसाधनमन्त्रानाह—

वसवस्त्वा गायत्रेण च्छन्दसा पुनन्तु रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा पुनन्त्वादित्यास्त्वा जागतेन च्छन्दसा

पुनन्त्वेतानि वै दैवानि पवित्राणि पूतो यज्ञियो भवति य एव ँवेद ॥ ७ ॥

सिद्धा मन्त्रार्थाः, सम्मृजन्त्विति मन्त्राम्नाने सिद्धे पुनन्तु इदानीं वर्णनं संमृजन्त्वित्यस्य व्याख्यानार्थमिति मन्तव्यम्। अथवा मन्त्रपाठादेव तस्मिन् सिद्धे पुनन्त्विति वा प्रयोक्तव्यमिति वैकल्पिकत्वबोधनार्थम्। मन्त्रब्राह्मणयोरप्युभयोरपि प्रमाणत्वाविशेषात्। यथेन्द्रं गीर्भिर्हवामह इत्येव स्वाध्याये सिद्धे इन्द्रं गीर्भिर्हवामह इत्यनुवर्णनं हवामह इति वा प्रयोक्तव्यमित्येवमर्थमिति तद्वदिहापीति मन्तव्यम्। एवं जातीयकेषु विकल्पो द्रष्टव्य इति निदाने निर्णीतत्वात् ॥ ७ ॥

अपूर्वमेव दशापवित्रस्य शुक्लत्वं विधातुमाख्यायिकामाह—

स्वर्भानुर्वा आसुर आदित्यन्तमसाविध्यत्तं देवा न व्यजानँस्तेऽत्रिमुपाधावँस्तस्यात्रिर्भासेन तमोपाहन्यत् प्रथममपाहन् सा कृष्णाविरभवद्यद्वितीयꣳ सा रजता यत्तृतीयꣳ सा लोहिनी यया वर्णमभ्यतृणत् सा शुक्लासीत् ॥ ८ ॥

पूर्वं स्वर्भानुर्नामकोऽसुर आदित्यं तमसान्धकारेणाविध्यदाततवान्। तं सर्वे देवा नाज्ञासिषुः। ते देवा अत्रिं महर्षिमुपाधावन्नादित्यस्यावरणान्धकारमपजहीति। तस्य तमोऽत्रिर्भासेनापाहन्नपजघान। तत् यत्तमोभागं प्रथममपाहन् सा कृष्णा कृष्णवर्णाऽऽविरभवत्, यद्वितीयꣳ सा रजतवर्णा आविरभवत्, यत्तृतीयꣳ सा लोहिनी लोहिताऽऽविरभवत्। यया अन्त्योपादेयलिङ्गेन स्त्रीलिङ्गता येन प्रयोगेणेत्यर्थः। वर्णमत्र रोहितम् अभ्यतृणत् प्रकाशं चकार। अत्र तृदिः प्रकाशनकर्म्मा। तस्मादुपपदिका यत्र क्व च स्वनति तदपाभितृन्दन्तीत्यादिषु तथा दर्शनात्। सा शुक्ला मेध्यासीत् ॥ ८ ॥

इदानीं तद्विधत्ते—

तस्माच्छुक्लं पवित्रꣳ शुक्रः सोमः स शुक्रत्वाय ॥ ९ ॥

तस्मात्तिरोहितवर्णस्यैव शुक्लाविरूपेण परिणतत्वात् शुक्लं शुक्लाविरोममयं दशापवित्रं कर्त्तव्यम्। तथापि सोमोऽपि शुक्रः सोमः निर्म्मलः। अतः स शुक्रत्वाय शुक्लसोमानुगुण्याय भवति ॥ ९ ॥

एवं पवित्रस्य शुक्रत्वं विधाय तदेवान्वयव्यतिरेकाभ्यां दृढयति—

यं द्विष्यात्तस्यैतेषां वर्णानामपि पवित्रे कुर्य्यात्पा-

पाप्मनैवैनं तमसा विध्यति कृष्णमिव हि तमो योऽस्य प्रियः स्यादासक्तिशुक्लं कुर्य्याज्ज्योतिर्व्वै हिरण्यं ज्योतिरेवास्मिन्दधाति ॥ १० ॥

यं यजमानमुद्गाता द्विष्यात्तस्य प्रयोगः । एतेषां शुक्लव्यतिरिक्तानामन्यतमवर्णमपि पवित्रे कुर्यात् । तथा सति कृष्णादित्रयस्यापि पापरूपत्वात् पाप्मनैवैनं यजमानं तमसा विध्यति पापभूयिष्ठं करोतीत्यर्थः । कृष्णमिव हि कृष्णं तमः शुक्लव्यतिरिक्तवर्णमिव हि पापमिव हि वर्त्तते विरोधित्वसाम्यात् । यश्च यजमानोऽस्योद्गातुः प्रियः स्यात्तस्य प्रयोगे पवित्रमाशक्तिशुक्लं कृष्णवर्णान्तरस्य लेशतोऽपि संसर्गाभावेन शुक्लवर्णं कुर्य्यात् । हिरण्यशब्देनात्र तत्रत्यं तेजो लक्ष्यते । पवित्रगतं यत्तेजः तत् ज्योतिर्वै साक्षात् ज्योतिरेव । तथा सति ज्योतिरेवास्मिन् यजमाने दधाति ॥ १० ॥

अथ पवित्रस्य शुक्लवर्णत्वप्रसङ्गेन किञ्चित् पूर्वनिदानं विधत्ते—

तस्मादात्रेयं चन्द्रेणेच्छन्त्यत्रिर्हि तस्य ज्योतिः ॥११॥

तस्मात्कारणादात्रेयम् अत्रिगोत्रोत्पन्नं ब्राह्मणं चन्द्रेण हिरण्येनेच्छन्ति संयोजयितुम् अनेन विधिरुन्नेयः । हिरण्यमात्रेयाय ददातीत्यन्यत्र विधानात् ॥ ११ ॥

तस्मादित्युक्तं विवृणोति—

अभ्यतृणत्पवित्र व्विँगृह्णन्ति हस्तकार्य्यमेव तद्यज्ञस्य क्रियत एतद्वा उद्गातृणाꣳ हस्तकार्य्यं यत्पवित्रस्य व्विग्रहणम् ॥ १२ ॥

अत्रिर्हि तस्यादित्यज्योतिरभ्यतृणत् प्रकाशितवान् । अथोद्गातॄणां दशापवित्रं साधारणं विधत्ते । पवित्रं शुक्लवर्णे विगृह्णन्ति विस्तारयेयुः । तथा सति यज्ञस्योद्गातृभिः यद्धस्तेन कृतं भवति तदेव कृतं भवति तदेव विवृणोति—एतद्वा उद्गातॄणामिति । इतो अन्यस्याध्वर्य्वादिव देतेषां हस्तकार्य्यस्याभावादित्यर्थः ॥ १२ ॥

अथोक्तार्थज्ञानस्य फलमाह—

न हस्तवेष्यान्निर्ऋच्छति य एव व्वँवेद ॥ १३ ॥

हस्तवेष्यान् हस्तेन व्यापारान् कर्म्मणो न निर्ऋच्छति सर्वदास्य यागदानाद्यनुष्ठानाय हस्तो व्यापारयतीत्यर्थः ॥ १३ ॥

अथोक्तप्रसारणं व्यतिरेकेण द्रढयति—

योऽपि न व्विगृह्णाति प्राणादेनमन्तर्यन्ति ॥ १४ ॥

स्पष्टम् ॥ १४ ॥

पवित्रप्रसारणे तत्सङ्कोचाभावाय किञ्चिद्वक्तव्यमित्याह—

तं ब्रूयाद्वेपमानः प्रमेष्यस इति ह्येपमान एव प्रमीयते॥१५॥

तम् उद्गातारं पवित्रं प्रसारयन्तं ब्रूयात्किमिति ? उच्यते—वेपमानः कम्पमानः प्रमेष्यसे । नित्यमपि वेपमान एव प्रमीयते स इति । तथा स प्रियोऽत उक्तं पवित्रविग्रहणं सूत्रकार आह "अवधूय पवित्रमुदग्दशमबाङ्नाभि वितनुयुः पवित्रन्त इति ऋचैक" इति ॥ १५ ॥

अथोद्गातुर्द्वारानुमन्त्रणं समन्त्रैकैकदेशोपादानं विधत्ते—

प्र शुक्रैतु देवी मनीषास्मद्रथः सुतष्टो न ह्वाजीत्युद्गाता धारामनुमन्त्रयते ॥ १६ ॥

मन्त्रैकदेशः पूर्वं व्याख्यातः । इत्यनेन मन्त्रेण शोध्यमानसोमधारामनुमन्त्रयते ॥ १६ ॥

अथानुमन्त्रणमन्त्रशेषम् आयुष इत्यादिभागस्य पूर्वपठितस्य विकल्पपाठमाह—

आयुषे मे पवस्व ह्वर्चसे मे पवस्व ह्विदुः पृथिव्यादिवो जनित्राच्छृण्वन्त्वापोऽधः क्षरन्तीः सोमेहोद्गायेत्याह मह्यं तेजसे ब्रह्मवर्चसायेति ॥ १७ ॥

आयुष इत्यादिक इहोद्गायेत्यन्तः पूर्ववदेवोक्तः । पश्चाद्वैकल्पिकं मन्त्रशेषमाह 'मह्यं तेजसे ब्रह्मवर्च्चसाये'ति ॥ १७ ॥

अथ पवमानानुमन्त्रणप्रसङ्गात् पावनं स्तौति—

एष वै सोमस्योद्गीथो यत्पवते सोमोद्गीतमेव साम गायंति ॥ १८ ॥

यत् सोमः शब्दायमानः पवते एवं सोमस्योद्गीथः । तथा सति सोमेनोद्गायेति ब्रुवन् यजमानः सोमोद्गीतमेव साम गायति ॥ १८ ॥

अथ सोमशोधने नियममाह—

अच्छिन्नं पावयन्ति यज्ञश्चैव प्राणाँश्च सन्तन्वन्ति सन्ततं पावयन्ति यज्ञस्य सन्ततत्यै ॥ १९ ॥

अच्छिन्नं धाराविच्छेदादित्येवं यथा तथा पावयन्ति । तद्यजमानस्य यज्ञस्य प्राणानाञ्च सन्तानाय सन्ततं प्रबन्धं पावयन्ति । यज्ञस्य सन्ततत्यै प्रबन्धाय । सन्ततिः यज्ञस्य प्रारब्धस्याविच्छेदेन समाप्तिः । सम्प्रबन्ध उत्तरोत्तरं यज्ञस्य सिद्धिरिति विनियोगः ॥ १९ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य षष्ठः खण्डः ॥ ६ ॥ ६ ॥

अथ सप्तमः खण्डः ।

अथ प्रवृतहोमस्य यौ "सूर्यो मा बेकुरे"त्यादिकौ मन्त्रौ तयोर्द्वितीय-मन्त्रसाध्यहोमं विधातुमाख्यायिकामाह—

बृहस्पतिर्व्वै देवानामुदगायत्तꣳ रक्षाꣳस्यजिघाꣳसन् स य एषां लोकानामधिपतयस्तान् भागधेयेनोपाधावत् ॥ १ ॥

बृहस्पतिर्मन्त्राभिमानी एतन्नामको देवः देवानां यज्ञे पूर्वमुदगायत् औद्गात्रमकरोत् तं तथा कुर्वाणं रक्षांस्यजिघांसन् हन्तुमैच्छन् स बृहस्पतिः एषां पृथिव्यादीनां लोकानां येऽधिपतयोऽभ्यायंस्तान् भागधेयेन वक्ष्यमाणमन्त्रसाध्यहोमलक्षणेन भागधेयेनोपाधावत् अप्रीणयदित्यर्थः ॥ १ ॥

इदानीं समन्त्रकं होमं विधत्ते—

सूर्य्यो मा दिव्याभ्यो नाष्ट्राभ्यः पातु व्वायुरन्तरिक्षाभ्योऽग्निः पार्थिवाभ्यः स्वाहेति जुहोति ॥ २ ॥

मन्त्रस्तु पूर्वमेव व्याख्यातः । उक्तमन्त्रो भागत्रयेण कर्त्तव्यः ॥ २ ॥

अथ मन्त्रस्य तात्पर्य्यमाह—

एते व्वा एषां लोकानामधिपतयस्तान् भागधेयेनोपासरत ॥ ३ ॥

य एषां भूरादीनां लोकानामधिपतयः त एते वै निर्दिष्टाः सूर्य्यादयः खलु । तथाहि तिस्र एव देवताः क्षित्यन्तरिक्षद्युस्थानाः अग्निर्वायुः सूर्य्य इति तान् भागधेयेन तदुचितभागप्रदानेन उपासरत् अनुसृतवान् भवति । यतस्ते प्रीता रक्षःकृतोपद्रवं पर्याहरन् । अत इदानीमप्युद्भातृभिरेतत्कर्त्तव्यमित्यभिप्रायः ॥ ३ ॥

वेदितुः फलमाह—

करोति व्वाचा व्वीर्य्यन्न सदस्यामार्त्तिमार्च्छति य एवꣳवेद ॥ ४ ॥

वाचा वीर्यकरणन्नाम वेदशास्त्रादिना स्वसामर्थ्यप्रकटनम् ॥ ४ ॥

अथ बेकुरेत्यनेनाप्युक्तं प्रवृतहोमं विधातुमाख्यायिकामाह—

वाग्वै देवेभ्योऽपाक्रामत्तां देवा अन्वमन्त्रयन्त सा ऽब्रवीदभागास्मि भागधेयम्मेऽस्त्विति कस्ते भागधेयं

कुर्य्यादित्युद्गातार इत्यब्रवीदुद्गातारो वै वाचे भागधेयं कुर्व्वन्ति ॥ ५ ॥

पुरा वाग्देवता देवेभ्यः सकाशात् अपाक्रामत् मन्त्रात्मिका वाक् देवान् गुणैः प्रकाशयन्ती अपगताभूदित्यर्थः । तां वाचं देवा अन्वमन्त्रयन्त अनुमन्त्रमाह्वानमकुर्वन् । सा आहूता वागब्रवीत् किमिति ? अभागाऽस्मि यथा भवतां यज्ञे भागोऽस्ति तद्वत् मह्यन्नास्ति इति । तथोक्ता देवास्तर्हि ते कः भागधेयं कुर्यादित्यब्रुवन् । सा च पुनरुद्गातार इत्यब्रवीत् । तेषां तद्भागप्रदानयोग्यताऽऽह्यते । उद्गातारः खलु वाचे देव्यै भागधेयं कुर्वन्ति तेषामध्वर्य्वादिवद्धस्तव्यापारलक्षणक्रियाया अभावाद्भागेकव्यापारत्वाच्चेत्यभिप्रायः ॥ ५ ॥

इदानीं समन्त्रकहोमं विधत्ते—

तस्यै जुहुयाद् बेकुरानामासि जुष्टा देवेभ्यो नमो वाचे नमो वाचस्पतये देवि वाग्यत्ते वाचो मधुमत्तस्मिन् मा धाः सरस्वत्यै स्वाहेति ॥ ६ ॥

अयमन्त्रः पूर्वं व्याख्यातः । अनेन यो यः सर्पति स स जहुयात् ॥६॥

मन्त्रगतयोर्वाक्सरस्वतीशब्दयोरैक्यार्थमाह—

वाग्वै सरस्वती तामेव तद्भागधेयेनारभते ॥ ७ ॥

आलम्बते उद्गात्रादिकामित्यर्थः ॥ ७ ॥

अद्वेष्यस्य वाग्ध्यानात्मप्रयोगकथनव्याजेन अद्वेष्ययजमानप्रयोगेण वाग्ध्यानमात्रप्रयोगेण नालं किन्तु मन्त्रपाठः कर्त्तव्य इत्याह—

यं द्विष्यात्तस्यैतामाहुतिञ्जुहुयाद्वाचं मनसा ध्यायेद्वाचमेवास्य व्यृङ्क्ते ॥ ८ ॥

यं यजमानं द्विष्यादुद्गाता तस्य प्रयोगे एतामाहुतिं जुह्वद्धोमं कुर्वन् वाचम्मनसाध्यायेन्मन्त्रं ब्रूते । कुतः ? अद्वेष्यस्य प्रयोगे मन्त्र उच्चारयितव्य इत्यभिप्रायः । अत्र मन्त्रसमाम्नाये बेकुरानामासीति मन्त्रः प्रथमं समाम्नातः सूर्योमेति पश्चात् । अत्र क्रमविपर्यासः किमर्थः ? मन्त्रेषु स्तुतिमात्रमेव विवक्षितं न क्रम इति केचित् । अपरे तु स्तुतिमात्रविवक्षायामपि क्रमविलङ्घनस्यान्याय्यत्वादेवं वा क्रमः स्यादिति क्रमविकल्पार्थमिति ॥ ८ ॥

अथ बहिष्पवमानार्थं प्रसर्पणं विधत्ते—

बहिष्पवमानꣳ सर्पन्ति स्वर्गमेव तल्लोकꣳसर्पन्ति ॥९॥

ये अध्वर्युप्रमुखाः बहिष्पवमानार्थं सदः सकाशाच्चात्वालं प्रति सर्पन्ति तत्तेन स्वर्गं लोकमेव प्रति सर्पन्ति । यजमानस्य एतत् कर्तृक-प्रसर्पणाभावे स्वर्गासिद्धेस्तस्य स्वर्गार्थमेवैते प्रसर्पन्ति ॥ ९ ॥

प्रसर्पणे किञ्चिन्नियमद्वयं विधत्ते—

प्रक्वाणा इव सर्पन्ति प्रतिकूलमिव हीतः स्वर्गो लोकः त्सरन्त इव सर्पन्ति मृगधर्म्मा वै यज्ञो यज्ञस्य शान्त्या अपत्रासाय ॥ १० ॥

बहिष्पवमानस्य स्वर्गत्वेनोपन्यासात्तदर्थं प्रसर्पणं प्रक्वाणैरिव कर्त्तव्यम् । यद्यपि स्वर्गः सर्वान् प्रत्यविशिष्टत्वादनुकूल एव तथापि मृगवृत्त्यनन्तरभावित्वात्प्रतिकूलमिवोच्यते । किञ्च त्सरन्त इव 'त्सरच्छद्मगतौ' यथा पादप्रसारणध्वनिर्नोत्पद्यते तथा मृदुपदन्यासैर्गन्तव्यम् । यथा मृगग्राहिभिस्तद्वत् 'त्सरद्गमने'कारणमाह—यो यज्ञः स मृगधर्म्मो वै मृगस्य यः पलायनधर्म्मः स तद्धर्मयुक्तः खलु । किमर्थमेवं कृतिरिति चेदुच्यते—यज्ञस्य शान्त्यै शमनाय स्थैर्याय । तदेवाह—अपत्रासाय । प्रसर्पणे हि त्रासो भवति ॥ १० ॥

अथ तत्र वाङ्नियमं तदभावे दोषं कथयन् विधत्ते—

वाचं यच्छन्ति यज्ञमेव तद्यच्छन्ति यद्व्यवदेयुर्यज्ञं निर्ब्रूयुस्तस्मान्न व्यवदेयम् ॥ ११ ॥

तदेतत् प्रसर्पकाः वाचं यच्छन्ति नियमयन्ति तत्तेन यज्ञमेव यच्छन्ति । यज्ञस्य मन्त्रादिलक्षणवाक्पूर्वकत्वाद्वागेव यज्ञः । यद्यपि व्यवहरेयुर्विविधं दुष्टां वाचं ब्रूयुस्तर्हि यज्ञमेव निर्ब्रूयुः नितरां ब्रूयुः । अयमिति प्रकाशयेयुरित्यर्थः । तस्मात्तैर्न व्यवदेयम् ॥ ११ ॥

अथाध्वर्युप्रभृतिब्रह्मान्तानां पञ्चर्त्विजां तत्र समारम्भणं विधत्ते—

पञ्चर्त्विजः सꣳरब्धाः सर्पन्ति पाङ्क्तो यज्ञो यावान् यज्ञस्तमेव सन्तन्वन्ति ॥ १२ ॥

यजमानवर्जिताः पञ्चर्त्विजः । सꣳरब्धाः सम्यक् परस्परं सङ्गताः सर्पन्ति । तत्रत्यपञ्चसंख्या स्तूयते—पाङ्क्तो यज्ञः । यज्ञस्य पाङ्क्तत्वं तैत्तिरीये प्रश्नमुखेन स्पष्टीकृतम् । "नच्चां न यजुषा पङ्क्तिराप्यते यत्किञ्च यज्ञस्य पाङ्क्तत्वमि"ति धानाः करम्भः परिवापः पुरोडाशः पयस्पाशेन पङ्क्तिरुच्यते तेन यज्ञस्य पाङ्क्तत्वमिति । एतैरेव तु हविष्पङ्क्त्यक्षरपाङ्क्तनराशंसपाङ्क्तसवनपङ्क्तीनां प्रदर्शनेन यज्ञस्य पाङ्क्तत्वमुपवर्णितम् ॥ १२ ॥

यो वै यज्ञहविष्पङ्क्तिं वेदेत्यत्र समारभ्य प्रसर्पताम्मध्ये प्रस्तोतृविच्छेदे प्रयोगमाह—

यदि प्रस्तोताऽवच्छिद्यते यज्ञस्य शिरश्छिद्यते ब्रह्मणे वरन्दत्वा स एव पुनर्व्वर्त्तव्यश्छिन्नमेव तत्प्रतिदधाति ॥ १३ ॥

यदि प्रस्तोता अध्वर्य्योरन्वारम्भादवच्छिद्यते तदा यज्ञस्य शिर एव छिद्यते । तस्य शिरो हि तन्मुखस्य प्रथमभागस्य गातृत्वात् । तस्य प्रायश्चित्तार्थं ब्रह्मणे वरङ्गां दत्वा स एव ब्रह्मा पुनर्वर्त्तव्यो वरणीयः । तत्तेन छिन्नमपि शिरः प्रति दधाति ॥ १३ ॥

अथोद्गात्रवच्छेदे प्रयोगमाह—

यद्युद्गातावच्छिद्यते यज्ञेन यजमानो व्यृध्यतेऽदक्षिणः स यज्ञक्रतुः सस्थाप्योऽथान्य आहृत्यस्तस्मिन्देयं यावद्दास्यन् स्यात् ॥ १४ ॥

यदि उद्गातावच्छिद्यते प्रस्तोत्रन्वारम्भणात्तदा वृध्येन नष्टेन यजमानो वृध्यते गतसमृद्धो नष्टो भवति । तस्माद्यज्ञ एव क्रतुर्यज्ञक्रतुः सप्रवृत्तः अदक्षिणो दक्षिणाविहीनः समापनीयः । अथानन्तरं अन्यस्तत्संस्थोयाग आहृत्यः पुनरनुष्ठेयः । तस्मिन् पुनः कृते यज्ञे देयं दातव्यं किं द्रव्यमन्यदिति ? नेत्याह । यावद्धनं पूर्वस्मिन् यज्ञे दास्यन् स्यात् यजमानस्तदेव धनं तस्मिन् यज्ञे तेन देयम् ॥ १४ ॥

अथ प्रतिहर्त्रवच्छेदमाह—

यदि प्रतिहर्त्ताऽवच्छिद्यते पशुभिर्यजमानो व्यृध्यते पशवो वै प्रतिहर्त्ता सर्व्ववेदसन्देयं यदि सर्व्ववेदसन्न ददाति सर्वज्यानिमीयते ॥ १५ ॥

यदीत्यादि स्पष्टम् । प्रतिहारमानभागे पशुसमृद्धेस्तद्भागगता अपि पशव इत्युच्यते । पशुनाशाभावाय सर्ववेदसं देयं सर्वमपि धनं दातव्यम् । यदि सर्वं धनं न दद्यात् तदानीं यजमानः सर्वज्यानिं जीयते सर्वपुत्रपशुधनादिरूपां हानिं हीयते । अपरो धात्वर्थोऽनुवादः । सर्वाभिः समृद्धिभिर्विहीनो भवतीत्यर्थः । अत्रावच्छेदप्रकरणे एकैकावच्छेदे प्रतिनियतप्रायश्चित्तानुष्ठानान्न कदाचित्प्रतिपत्तिः । उद्गातृप्रतिहर्त्रोः सहावच्छेदे कथमित्याशंकापूर्वतन्त्रेऽधिकाराध्याये प्रायश्चित्तपादे अत्रोक्त उद्गातृप्रतिहर्त्रोरवच्छेदवाक्यद्वयं विषयीकृत्य सहावच्छेदे कथमित्याहास्ति

प्रायश्चित्तं तच्च विकल्पितमिति विचारद्वयम्। तयोरेव क्रमावच्छेदे उत्तरावच्छेदः प्रबल इत्येकः। सचोद्गातृसम्बन्धी चेत् सर्वस्वमेव दातव्यं 'न द्वादशए शतमिति' द्वितीय इति विचारद्वयं कृतम्। ते चत्वारो विचाराः क्रमेणात्र निर्णयाय प्रदर्श्यन्ते। तत्र प्रथमं दर्शयति 'उद्गातुः प्रतिहर्त्तुश्च सहावच्छेदनेऽस्ति न। प्रायश्चित्तमुतास्त्यत्र तन्निमित्तविघाततः। एकैकस्यैव विच्छेदकर्त्तृत्वान्न निहन्यते। कालमात्रं तु तत्रैकं प्रायश्चित्तमतो भवेत्' ज्योतिष्टोमस्तु श्रूयते। तद्यद्युद्गातावच्छिद्येत अदक्षिणो यज्ञः समाप्योऽथान्य आहृत्य तत्र तद्द्याद्यद्दास्यन् स्यात्। यदि प्रतिहर्त्तावच्छिद्यते सर्वस्वं दद्यादिति। अस्यायमर्थः प्रातःसवनेन बहिष्पवमानेन स्तोष्यमाना ऋत्विजः शालाया बहिः प्रसर्पन्ति तदानीमेकस्य पृष्ठतोन्य इत्येवं पिपीलिकावत् पङ्क्त्याकारेण गन्तव्यम्। तत्र पुरतो गन्तुः कच्छं गृहीत्वैव पृष्ठतोऽन्यो गच्छेत्। एवं सति यदि प्रमादादुद्गाता गृहीतं कच्छं मुञ्चेत्तदा दक्षिणामदत्वा प्रक्रान्तो यज्ञः समापनीयः। तं समाप्य पुनरपि स यज्ञः प्रयोक्तव्यः। तस्मिन् प्रयोगे यदीप्सितं द्रव्यं तद्द्यात्। यदा प्रतिहर्त्ता मुञ्चेत् तदा तस्मिन्नेव प्रयोगे सर्वं दद्यादिति। तत्र यद्युद्गातृप्रतिहर्त्तारौ युगपत् मुञ्चेतां तदानीमुक्तं प्रायश्चित्तनिमित्तं विहन्येत। एकैककर्तृकोऽवच्छेदो निमित्तत्वेन श्रुतः। अयं तूभयकर्तृकत्वान्नैकेन व्यपदेष्टुं शक्यते। तस्माच्छ्रूयमाणस्य निमित्तस्य विहितत्वान्नास्ति प्रायश्चित्तमिति प्राप्ते ब्रूमः, द्वौ ह्यत्रावच्छेदौ तयोरेकैकस्यैक एव कर्त्तेति निमित्तस्य नास्ति विघातः। कालमात्रैक्यात्तु एकत्वभ्रान्तिः। तस्मान्निमित्तविघाताभावादस्ति प्रायश्चित्तम्। द्वितीयं दर्शयति 'समुच्चयो विकल्पो वा प्रायश्चित्तद्वयेऽग्रिमः। अदक्षिणं पूर्वमस्मिन् प्रयोगेऽन्यत्तु पश्चिमम्। प्रयोगे पश्चिमे नास्ति निमित्तं तेन तद्वयम्। प्राप्तमेकप्रयोगेऽतो विरुद्धत्वाद्विकल्पिते' अदक्षिणत्वं सर्वस्वदानं चेति यत्प्रायश्चित्तद्वयन्निमित्तभेदेन श्रुतं तन्निमित्तद्वयसन्निपाते समुच्चेतव्यम्। यद्यदक्षिणत्वसर्वस्वदानयोरन्योन्यविरोधः तर्हि प्रयोगभेदेन व्यवस्थापनीयम्। अवच्छेदयुक्ते प्रथमप्रयोगे दक्षिणा न दातव्या उत्तरप्रयोगे सर्वस्वं दातव्यम्। सत्यपि प्रयोगभेदे कर्म्मण एकत्वात्। समुच्चय इति प्राप्ते ब्रूमः,न ह्युत्तरप्रयोगे दक्षिणा दातव्या विच्छेदो विद्यते न च। सति निमित्ते प्रायश्चित्तं युक्तम्। तस्मात्प्रथमप्रयोग एव निमित्तद्वयवशात्प्रायश्चित्तद्वयं प्राप्तं तच्चान्योन्ये अविरुद्धाविरुद्धत्वाद्विकल्पते। तृतीयं दर्शयति 'अवच्छेदक्रमे पूर्वः प्रबलः स्यादुतोत्तरः। असंजातावि-

रोधेन पूर्वेणोत्तरसेधनम् । निरपेक्षोत्तरज्ञानं जायते पूर्वबाधया । न बाधकान्तरं तस्य तेन प्रबलमुत्तरम्' उद्गातृप्रतिहर्तृकयोरवच्छेदयोर्यौगपद्ये समानबहुलत्वादस्तु प्रायश्चित्तयोर्विकल्पः । यदा तु क्रमेणावच्छेदौ स्यातां तदानीमसंजातविरोधित्वेन पूर्वस्य प्रबलत्वात् श्रुतिलिङ्गादाविवोत्तरस्य प्रवृत्तिर्निरुध्यत इति चेत् ? मैवं, श्रुतिलिङ्गादावुत्तरस्य सापेक्षत्वात् । पूर्वेण विरोधे सत्युत्तरस्योत्पत्तिरेव नास्ति । इहतु ज्ञानद्वयमन्योन्यनिरपेक्षं वाक्यद्वयादुत्पद्यत इति नास्त्युत्पत्तिप्रबन्धे । उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते। ननु निरपेक्षत्वस्य समानत्वात् पूर्वज्ञानमेवोत्तरस्य बाधकमस्त्विति चेत् ? न, पूर्वज्ञानोत्पत्तिदशायामविद्यमानस्योत्तरज्ञानस्य बाध्यत्वायोगात् । उत्तरकालेतु स्वयं बाधितं पूर्वज्ञानं कथमुत्तरस्य बाधकं भवेत् । नचान्यत्किञ्चिदुत्तरस्य बाधकं पश्यामः । तस्मादुत्तरकालीनावच्छेदनिमित्तं प्रायश्चित्तमनुष्ठेयम् । चतुर्थं दर्शयति 'उद्गातुः पश्चिमेच्छेदे पुनर्यागस्य दक्षिणा । शतं द्वादशयुक्तं स्याद्यदि वा सर्ववेदसम् । तद्द्याद्यत्पुरादिष्टमित्युक्ते शतदक्षिणा । प्रतिहर्तुः पुरा च्छेदात्सर्ववेदसबाधितम् । शतदानं पूर्वयागे सर्ववेदसदक्षिणा । प्राप्ते व्यूह्यं प्रयोगे तु दातव्यं सर्ववेदसम्' । यद्युद्गाता पश्चादवच्छिद्येत तदा तस्यावच्छेदस्य प्रबलत्वेन तन्निमित्तं प्रायश्चित्तमनुष्ठेयम् । तच्च प्रायश्चित्तमीदृशं, प्रथमप्रयोगं दक्षिणारहितमनुष्ठाय द्वितीयप्रयोगे पूर्वन्दित्सुना दक्षिणा दातव्या इति । पूर्वगां द्वादशाधिकं शतं तत्प्रतिहर्त्रवच्छेदनिमित्तसर्वस्वेन बाधितम् । नचोद्गात्रवच्छेदेन पश्चाद्धाविना सर्वस्वन्दित्सा बाध्यत इति शङ्कनीयम्। बाधकस्य दक्षिणान्तरस्य तत्रानुक्तत्वात् । यादृत्सितं तदुत्तरप्रयोगे देयमित्येतावदेव ततोऽत्रोच्यते । दित्सितञ्च सर्वस्वमित्युक्तम् । अत उत्तरकालीनोद्गात्रेऽवच्छेदनिमित्तेऽपि पुनः प्रयोगे पूर्वकालीनप्रतिहर्त्रवच्छेदप्रयुक्तं सर्वस्वमेव दातव्यम् ॥ १५ ॥

अथ बहिष्पवमाने प्रसर्पणसमयेऽध्वर्योः प्रस्तरप्रतिहरणं विधत्ते—

अध्वर्युः प्रस्तरꣳ हरति ॥ १६ ॥

प्रस्तरो दर्भमुष्टिः ॥ १६ ॥

प्रस्तरं प्रशंसति—

यजमानो वै प्रस्तरो यजमानमेव तत् स्वर्गꣳलोकꣳ हरति ॥ १७ ॥

प्रस्तरस्य हविरासनादिद्वारा यागसाधनत्वात् यजमानोऽपि सा-

क्षाद्यङ्गसाधनमिति साधनत्वसाम्यात् प्रस्तरो यजमानत्वेन स्तूयते। तत्तथा सति बहिष्पवमानस्य स्वर्गत्वेन पूर्वं प्रतिपादितत्वात् प्रस्तरं प्रहरन् अध्वर्युर्यजमानमेव स्वर्गं लोकं प्रति हरति प्रापयति। इदमेव वाक्यं विषयीकृत्य प्रथमाध्यायस्य चतुर्थपादे 'प्रस्तरइति कर्म्मनामधेयं वा गुणो वा प्रस्तरस्य स्तुतिर्वेति' त्रेधा संशय्य स्तुतिरिति सिद्धान्तितम्। तथाहि 'यजमानः प्रस्तरोऽत्र गुणो वा नाम वा स्तुतिः। सामानाधिकरण्येन स्यादेकस्यान्यनामता। गुणो वा यजमानस्तु कार्य्यप्रस्तरलक्षिते। अंशांशित्वाद्यभावेन पूर्ववन्नात्र संस्तुतिः। अर्थभेदादनामत्वं गुणश्चेद्विक्रियेत सः। यागसाधकताद्वारा विधेयप्रस्तरस्तुतिः'। इदमाम्नायते यजमानः प्रस्तर इति। तत्र यजमानस्य प्रस्तरशब्दो नामधेयं प्रस्तरस्य वा यजमानशब्दो नामधेयम् कुतः? उद्भिदा यागेनेत्यादाविव सामानाधिकरण्यादित्येकः पक्षः, गुणविधिरेष इत्यपरः पक्षः। तदापि यजमानकार्य्ये जपादौ प्रस्तरस्याचेतनस्य सामर्थ्याभावात् प्रस्तरकार्य्ये सम्यग्धारणादौ यजमानस्त्वशक्तत्वात् यजमानरूपो गुणो विधीयते। एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्य्यलक्षकत्वेन प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति। न चात्र पूर्वन्यायेन स्तुतिः सम्भवति अष्टाकपालद्वादशकपालयोरिव प्रस्तरयजमानयोरंशांशित्वाभावात्।'वा अग्नेर्वै क्षेपिष्ठा देवता ऊर्ज्जोऽवरुध्या' इत्यादिवत् स्तुतिरिति चेत्? न, क्षिप्रत्वादिधर्म्मवत् कस्यचिदुत्कर्षस्याप्रतीतेः तस्मान्नामगुणयोरन्यतरत्वप्राप्ते ब्रूमः। गोमहिषयोरिवार्थभेदस्यात्यन्तप्रसिद्धत्वान्नामत्वञ्च युक्तम्। गुणपक्षे त्वग्नौ प्रहरणस्य प्रस्तरविषयत्वात् यजमाने प्रहृते सति क्रम्मलोपः स्यात्। तस्माद्ध्रुवः प्रस्तरो यजमानशब्देन स्तूयते। यथा सिंहो देवदत्त इत्यत्र सिंहगुणेन शौर्य्यादिनोपेतो देवदत्तः सिंहशब्देन स्तूयते। तथा यजमानगुणेन यागसाधकत्वेन युक्तः प्रस्तरो यजमानशब्देन स्तूयते। एवं यजमान एककपाल इत्यादिषु द्रष्टव्यम् ॥ १७॥

अथ प्रकारान्तरेण प्रस्तरं प्रशंसति।

यज्ञो वै देवेभ्योऽश्वोभूत्वापाक्रमत्तं देवाः प्रस्तरेणारमयँस्तस्मादश्वः प्रस्तरेण सम्मृज्यमान उपावरमते यदध्वर्युः प्रस्तरꣳ हरति यज्ञस्य शान्त्या अप्रत्याय ॥ १८ ॥

यज्ञः खलु पूर्वं देवेभ्यः सकाशादश्वो भूत्वा अपाक्रामदपगतवान्। तदा देवाः अश्वस्य घासः प्रस्तर इति मत्वा तमश्वं प्रस्तरेण प्रदर्शिते-

नारमयन् । तस्मादिदानीमपि अश्वः प्रस्तरेण तृणमुष्टिना सम्मृज्यमान उप समीपेनारमते क्रीडति । तस्माद्ध्वर्युः प्रस्तरं हरति यज्ञस्य शान्त्या अप्रत्रासाय अपलापनाय च भवति ॥ १८ ॥

अथ प्रकारान्तरेण स्तौति—

प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अशनायन्तोऽपाक्रमँस्तेभ्यः प्रस्तरमन्नं प्रायच्छत्त एनमुपावर्त्तन्त तस्मादध्वर्युणा प्रस्तर ईषदिव विधूयो विधूतमिव हि तृणं पशव उपावर्त्तन्ते ॥ १९ ॥

पूर्वं प्रजापतिना सृष्टाः पशव अशनायन्तो अशनमिच्छन्तः स्रष्टुः सकाशात् अपाक्रामन् अपसृत्यागच्छन् । तेभ्यः प्रस्तरं दर्भमुष्टिमन्नत्वेन प्रायच्छत् । ततो लब्धान्नास्ते प्रजापतिमुपावर्त्तन्ते । तस्मात् पशूनामन्नत्वाद्ध्वर्युणा प्रस्तर ईषदिव विधूयश्चालनीयः। तथा सति विधूतमिव हि तृणं ईषद्विधूततृणमपेक्ष्य पशवो यजमानं उपावर्त्तन्ते । यजमानस्य शान्त्यै पशवः समृद्धा भवन्तीत्यर्थः ॥ १९ ॥

अथ विदुषः फलमाह—

उपैनं पशव आवर्त्तन्ते य एवँ वेद ॥ २० ॥

स्पष्टोऽर्थः ॥ २० ॥

अथ प्रस्तरं भूमौ स्थापयित्वा गानं विधत्ते—

प्रस्तरमासद्योद्गायेद्धविषोऽस्कन्दाय ॥ २१ ॥

उद्गाता प्रस्तरमपि हरन् आसद्य भूमावासञ्जनं कृत्वोद्गायेत् । तथा सति प्रस्तरस्य हविरासादनार्थत्वात्तदपरित्यज्यासञ्जनं हविषोऽस्कन्दायाप्रच्युत्यै भवति ॥ २१ ॥

एवमुक्तप्रकारेण गुणसद्भावेऽपि दोषोऽप्यस्तीत्याह—

यजमानन्तु स्वर्गाल्लोकादवगृह्णाति ॥ २२ ॥

तुशब्दो वैलक्षण्यद्योतनार्थः । तु किन्तु 'यजमानो वै प्रस्तर' इत्युक्तत्वाद्यजमानमेव स्वर्गाल्लोकादवगृह्णाति निरुध्य भूमौ स्थापितवान् भवति प्रस्तरं भूमावासञ्जयन्नुद्गाता ॥ २२ ॥

तर्हि क उपाय इति चेत्तानाह—

अष्टीवतोपस्पृशतोद्गायन्तेनास्य हविरस्कन्नं भवति न यजमानꣳ स्वर्गाल्लोकादवगृह्णाति ॥ २३ ॥

अष्ठीवता जानुनोपस्पृशता तत्रासञ्जयता प्रस्तरमुद्गेयम् । आसञ्जना-द्धविषोऽस्कन्दः भूमेः उपरि स्थापनात् स्वर्गादनवग्रहश्च भवति ॥२३॥

अथ बहिष्पवमानस्य स्तोत्रस्य चात्वालसम्बन्धं सार्थवादमाह—

चात्वालमवेक्ष्य बहिष्पवमानꣳ स्तुवन्त्यत्र वा असावादित्य आसीत्तं देवा बहिष्पवमानेन स्वर्गꣳ लोक महरन्यच्चात्वालमवेक्ष्य बहिष्पवमानꣳ स्तुवन्ति यजमानमेव तत् स्वर्गꣳ लोकꣳ हरन्ति ॥ २४ ॥

उद्गातारश्चात्वालदेशमवेक्ष्य बहिष्पवमानं स्तुवन्ति तत्र स्थित्वा स्तोतव्यमित्यर्थः । तत्किमर्थमित्याह पूर्वं अत्र चात्वालदेशे खल्वसौ दिवि दृश्यमान आदित्य आसीत् । तमादित्यं देवाः बहिष्पवमानेन स्तोत्रेण स्वर्गं लोकमहरन् । तथा सति यच्चात्वालावेक्षणपूर्वकं बहिष्पवमानस्तवनं तत् यजमानस्य स्वर्गलोकहरणाय भवति ॥ २४ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य सप्तमः खण्डः ।

अथ अष्टमः खण्डः ।

अथास्मिन् खण्डे बहिष्पवमान एव स्तूयते नवभिः स्तोत्रीयाभिः हिङ्कारे दशमीभिः स्तोतव्यमिति विवक्षुराह—

स तु वै यज्ञेन यजेतेत्याहुर्यस्य विराजं यज्ञमुखे दध्युरिति ॥ १ ॥

यस्य यजमानस्य यज्ञमुखे यज्ञस्य मुखस्थानीये बहिष्पवमाने वाग्व्यापारे बहिष्पवमानस्य प्राथम्याद्यज्ञमुखत्वं तस्मिन्विराजं दध्युः प्रक्षिपेयुर्गायेयुरित्यर्थः । स एव खलु यजमानो यज्ञेन यजेत यष्टवानित्याहुर्ब्रह्मवादिनः ॥ १ ॥

इदानीं विराट्प्रदर्शनद्वारेण तद्विधत्ते—

नवभिः स्तुवन्ति हिङ्कारो दशमो दशाक्षरा विराड् विराजमेवास्य यज्ञमुखे दधति ॥ २ ॥

नवभिः स्तोत्रीयाभिस्त्रिवृत्स्तोममगताभिः स्तुवन्ति स्तुयुरित्यर्थः । तासां हिङ्कारो दशमो भवति । तथा सति दशसङ्ख्यासम्पद्यते । विराडपि दशाक्षरा तद्वारा अस्य यजमानस्य यज्ञमुखे बहिष्पवमाने विराजमेव दधति स्थापयन्त्युद्गातारः ॥ २ ॥

अथ स्तोत्रीयाणां दशसंख्यामेव प्रशंसति—

नवभिः स्तुवन्ति नव प्राणाः प्राणैरेवैनꣳ समर्द्धयन्ति हिङ्कारो दशमस्तस्मान्नाभिरनवतृण्णा दशमी प्राणानाम् ॥ ३ ॥

नवभिः स्तुवन्ति स्तुयुः। नव प्राणाः सप्तशीर्षण्या द्वावर्वाञ्चाविति तेषान्नवसङ्ख्या। तथा सति कृत्स्नैः प्राणैरेवैनꣳ समर्द्धयन्ति। यतो हिङ्कारो दशमो भवति। तस्मात्प्राणानान्नवानां दशमी सती नाभिरनवतृण्णा भवति इतरप्राणवदच्छिद्रा भवति ॥ ३ ॥

अथ हिंकारं वियुज्य स्तौति—

नवभिः स्तुवन्ति नवाध्वर्य्युः प्रातःसवने ग्रहान् गृह्णाति तानेव तत्पावयन्ति तेषां प्राणानुत्सृजन्ति ॥ ४ ॥

यन्नवभिः स्तोत्रीयाभिः स्तुवन्ति अध्वर्य्युश्च प्रातःसवने नवग्रहान् गृह्णाति। तथा सति तत्तेन स्तवनेन तानेव ग्रहान् पावयन्ति शोधयन्ति। किञ्च तेषां ग्रहाणां प्राणानुत्सृजन्त्यूर्द्धमुखान् कल्पयन्ति। ग्रहाणान्नवसंख्यया पूर्वाचार्य्यैः संग्रहीता 'उपांशुरन्तर्य्यामश्च वायव्यश्चेन्द्रवायवः। ततश्च मैत्रावरुणाः शुक्रो मन्थी ततः परः। तत आग्रयणो नाम ध्रुवो नवम इत्यत' इति ॥ ४ ॥

अथवा बहिष्पवमानं प्रजननसाधनत्वेन स्तौति—

प्रजापतिर्वै हिङ्कारस्त्रियो बहिष्पवमान्यो यद्धिङ्कृत्य प्रस्तौति मिथुनमेवास्या यज्ञमुखे दधाति प्रजननाय ॥ ५ ॥

हिङ्कारस्य प्राथम्यात् प्रजापतिरपि कृत्स्नस्यापि प्रथम इति हिङ्कारस्य प्रजापतित्वम्। बहिष्पवमानसम्बन्धिन्यः स्तोत्रीयाः स्त्रियः स्त्रीस्थानीयाः। तथा सति यद्धिङ्कृत्वा स्तौति तेनास्य यजमानस्य यज्ञमुखे मिथुनमेव दधाति। किमर्थं प्रजननाय यजमानस्यापत्योत्पत्त्यर्थम् ॥ ५ ॥

अथ हिङ्कारपूर्वकं बहिष्पवमानं स्तौति—

एष वै स्तोमस्य योगो यद्धिङ्कारो यद्धिङ्कृत्य प्रस्तौति युक्तेनैव स्तोमेन प्रस्तौति ॥ ६ ॥

हिङ्कारगानं यदस्ति एष स्तोमयोगः। तथा सति यद्धिङ्कृत्य हिङ्कारमुच्चार्य्य स्तौति तदा युक्तेनैव स्तोमेन प्रस्तौति। ननु स्तोमयोगः पूर्वमेवोक्तः किमर्थमत्र पुनर्विधीयत? इति नैषदोषः। अत्र हिङ्कारस्तुत्यर्थत्वात् ॥ ६ ॥

पुनर्हिङ्कारं प्रशंसति—

एष वै साम्नाꣳरसो यद्धिङ्कारो यद्धिङ्कृत्य प्रस्तौति रसेनैवैता अभ्युद्य प्रस्तौति ॥ ७ ॥

रसः सारः साम्नामादौ प्रयुज्यमानत्वादस्य रसरूपत्वम्। यद्यदि हिङ्कृत्य रसरूपं हिङ्कारमुच्चार्य्य स्तौति गायति। स्तोत्रीयाः रसेनैव एताः स्तोत्रीयाः तृचा अभ्युद्याभिवन्दनं कृत्वा प्रस्तौति गायति ताः सरसाः करोतीत्यर्थः ॥ ७ ॥

बहिष्पवमानस्तोत्रीयाः सर्वाः समानदेवताः समानच्छन्दस्काश्च भवन्ति तत् स्तौति—

आरण्येभ्यो वा एतत् पशुभ्यः स्तुवन्ति यद्बहिष्पवमानमेकरूपाभिः स्तुवन्ति तस्मादेकरूपा आरण्याः पशवः ॥ ८ ॥

बहिष्पवमानं स्तोत्रमेकरूपाभिः स्तोत्रीयाभिः स्तुवन्तीति यत् समानदेवताकत्वं समानच्छन्दस्कत्वञ्चैवैकरूप्यन्तासां खलु। पवमानः सोमो देवता गायत्रीच्छन्दः एतदेतेनैकरूपस्तवनेन आरण्येभ्यः पशुभ्य एकरूपेभ्यस्तेषां लाभार्थं स्तुवन्ति। तस्मात् स्तोत्रीयाणामैकरूप्यादारण्याः पशवः 'गोमायुर्गोमृगो गवय उष्ट्रः शरभो हस्ती मर्कट' इति सप्तसंख्यकाः सर्व एकरूपा एकवर्णा भवन्ति ॥ ८ ॥

अथ स्तोत्रीयाणामनावृत्तिं स्तौति—

पराचीभिः स्तुवन्ति तस्मात् पराञ्चः प्रजायन्ते पराञ्चो वितिष्ठन्ते ॥ ९ ॥

पराचीभिरनावृत्ताभिः स्तुवन्ति 'तिसृभ्यो हिङ्करोति स पराचीभि'रिति हि पूर्वमुक्तम्। तस्मात्प्राञ्चोऽधोमुखाः प्रजायन्ते सम्भवन्ति। अधोमुखाः पराञ्च एव हि मनुष्या जायन्ते। किञ्च पराञ्चो वितिष्ठन्ते स्वर्गादिप्राप्तौ। पराङ्मुखा एव इह लोकात्पतन्तीति निवृत्तमुखा एव प्रयतन्ते ॥९॥

बहिष्पवमानस्यापवृत्त्यभावं प्रशंसति—

अपरिश्रिते स्तुवन्ति तस्मादपरिगृहीता आरण्याः पशवः ॥ १० ॥

परिश्रयणन्तृणपर्णादिभिरपवरणं तद्रहिते अपरिश्रिते बहिर्वेदिदेशे स्तुवन्ति तस्मादारण्याः पशवः अपरिगृहीता भवन्ति ॥ १० ॥

अथ बहिष्पवमानमन्तःशंसनद्वारेण प्रशंसति—

बहिः स्तुवन्त्यन्तरनुशंसन्ति तस्माद्ग्राममाहृतैर्भुञ्जते ॥ ११ ॥

बहिर्वेदि स्तुवन्त्यन्तर्वेदि स्तुतमनुशंसन्ति होतारः । सामान्यविवक्षया बहुवचनम् । यस्मादेवं तस्माद्ग्रामं प्रत्याहृतैर्व्रीह्यादिभिर्मनुष्या भुञ्जते ॥ ११ ॥

अथ प्रसङ्गादाज्यस्तोत्राणि विषयीकृत्याह—

ग्राम्येभ्यो वा एतत् पशुभ्यः स्तुवन्ति यदाज्यैर्नानारूपैः स्तुवन्ति तस्मान्नानारूपा ग्राम्याः पशवः ॥ १२ ॥

नानारूपैराज्यस्तोत्रैर्ग्रामदैवत्यैः स्तोत्रैरित्यर्थः । तथाहि अग्नेयं होतुराज्यं मैत्रावरुणं मैत्रावरुणस्यैन्द्रं ब्राह्मणाच्छंसिन ऐन्द्राग्नमच्छावाकस्येति नानारूपाणि । तस्मादाज्यानां वैरूप्याद् ग्राम्याः पशवो नानारूपाः । तथाहि 'पुरुषोऽश्वो गौरविरजोगवैडोऽश्वतर' इति सत्तापि पशवः प्रत्येकं नानारूपाः ॥ १२ ॥

अथ आज्यस्तोत्राणामावृत्तिं प्रशंसति—

पुनरभ्यावर्त्तꣳ स्तुवन्ति तस्मात्प्रेत्वर्य्यः प्रेत्य पुनरायन्ति ॥ १३ ॥

पुनः पुनरभ्यावृत्याभ्यावृत्य स्तुवन्ति । अनेन पर्य्यायेष्वत्वमावृत्तिद्योतकेन विज्ञातम् । शिष्टचर्चाम्पराक्त्वं पर्य्यायेषु प्रत्येकं चावर्त्तनत्वमित्युभयमप्युक्तं भवति । तस्मात्पराक्त्वात् प्रेत्वर्य्यः प्रगमनशीला गावः प्रातःकाले भवन्ति । तस्मादभ्यावृत्तेः सङ्घावाच्च प्रेत्य ग्रामार्थं गत्वा पुनरायन्ति सायंकाले । गोरपेक्षया प्रेत्वर्य्य इति स्त्रीलिङ्गता ॥ १३ ॥

अथाज्यस्तोत्राणां परिश्रितप्रदेशसम्बन्धं प्रशंसति—

परिश्रिते स्तुवन्ति तस्मात् परिगृहीता ग्राम्याः पशवः ॥ १४ ॥

आज्यैः परिश्रिते सदसि स्तुवन्ति इतरत् सुज्ञानम् । अत्र सर्वत्र तत्तत् स्तुत्या तत्तद्विधयोऽवगन्तव्याः ॥ १४ ॥

अथ बहिष्पवमान एवापक्रम्याह—

अमुष्मै वा एतल्लोकाय स्तुवन्ति यद्बहिष्पवमानꣳ

सकृद्धिङ्कृताभिः पराचीभिः स्तुवन्ति सकृद्धीतो ऽसौ पराङ्लोकः ॥ १५ ॥

बहिष्पवमानेन स्तुवन्तीति यत् एतत् अमुष्मै स्वर्गायैव स्तुवन्ति । अत आदौ सकृद्धिङ्कृताभिः पराचीभिः स्तोत्रीयाभिः स्तुवन्ति । इतो अस्माल्लोकादसौ स्वर्गो लोकः सकृद्धि नद्धिर्हि गम्यते । पराङ् पराङ्मुखः खलु हिङ्कारस्य सकृत्वं स्वर्गस्य सकृत्वे प्रयोजकम् । तथा स्तोत्रीयाणां पराक्त्वं स्वर्गस्यास्माल्लोकात्परागूपत्वे ॥ १५ ॥

अथाज्येषूक्तवैपरीत्यं दर्शयति—

अस्मै वा एतल्लोकाय स्तुवन्ति यदाज्यैः पुनरभ्यावर्त्तꣳ स्तुवन्ति तस्मादयꣳल्लोकः पुनः पुनः प्रजायते ॥ १६ ॥

यत् पुनरभ्यावर्त्तमाज्यैः स्तुवन्ति एतदस्मै भूर्लोकाय स्तुवन्ति । तस्मादभ्यावृत्त्या स्तुतत्वादयं लोकः पुनः पुनः प्रजायते अस्मिन् लोके प्राणिनः पुनः पुनर्जायन्ते । स्वर्गे यथा सकृदेव जायन्ते न तथात्रेत्यर्थः। अस्य कर्म्मभूमित्वादित्यभिप्रायः । अमुष्मा इति वाक्ये स्तुतिप्राधान्याद्बहिष्पवमानकर्म्मत्वेन निर्देशः । अत्र तु स्तोत्रीयासमुदायस्य स्तुतिसाधनत्वविवक्षया आज्यैरिति करणत्वेन निर्देश इति विवेकः॥१६॥

बहिष्पवमानस्य 'अच्छासमुद्रमिन्दव' इत्युत्तमायां 'अगन्नृतस्य योनिमे'त्यत्र य आकारोऽस्ति तं स्तौति—

पराञ्चो वा एतेषां प्राणा भवन्तीत्याहुर्यꣳ पराचीभिर्बहिष्पवमानीभिः स्तुवत इत्यावतीमुत्तमां गायेत्प्राणानान्धृत्यै ॥ १७ ॥

बहिष्पवमानीभिः स्तुवत इत्याहुरिति सम्बन्धः । स्तोत्रीयान्ते आ इत्युच्चारणेनावृत्तिः सूच्यते । अतः प्राणाः पुनर्धृता भवन्ति ॥ १७ ॥

बहिष्पवमानस्योत्तमायां रथन्तरवर्णं गायेदिति सप्रयोजनमाह—

च्यवन्ते वा एतेऽस्माल्लोकादित्याहुर्यꣳ पराचीभिर्बहिष्पवमानीभिः स्तुवत इति रथन्तरवर्णामुत्तमाङ्गायेदियं वै रथन्तरमस्यामेव प्रतितिष्ठति ॥ १८ ॥

ये पराचीभिर्बहिष्पवमानीभिः स्तोत्रीयाभिः स्तुवते ते अस्माल्लोकात् च्यवन्त एवेत्याहुः । कः परिहार इति ? उच्यते, उत्तमां बहिष्पवमा-

नस्यान्तिमां स्तोत्रीयां रथन्तरवर्णां रथन्तरोपेतवर्णां भकारां उद्गीथो पक्रमेण तद्वदिमां गायेत्। तथा च सूत्रम् 'रथन्तरवर्णायां चत्वार्यक्षराण्यभिष्टोभेद्भाभा इति शाण्डिल्यो भभ इति धानञ्जय इतीति' एवमपि कथं प्रच्युत्यभाव इति चेत् ? तत्राह। रथन्तरं साम तदिदं वै पृथिव्येव। तथा सति तत् वर्णकरणेनास्यामेव पृथिव्यां प्रतितिष्ठति ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य अष्टमः खण्डः ।

अथ नवमः खण्डः ।

अथ स्तोत्राणां प्रतिपद् विचार आरभ्यते, तत्र ग्रामकामस्य प्रतिपदं विधत्ते—

'उपास्मै गायता नर' इति ग्रामकामाय प्रतिपदं कुर्य्यात् ॥ १ ॥

ग्रामार्थिने उपवर्तीं प्रतिपदं कुर्य्यात्। प्रतिपदिति प्रथमतृचमेव स एव स्तोत्रीय इति चोच्यते। इयं प्रतिपत् यद्यपि नित्याग्निष्टोमप्रकरणे स्तोत्रीयासु सामाम्नाता तथापि कामसम्बन्धात् तत्रैव ग्रामार्थापि भवति। ततो न पृथक्कामभेदेन प्रयोगापेक्षास्ति। तथा पयःसाधनके नित्याग्निहोत्रप्रयोगे पयसा पशुकामस्य जुहुयादिति पशुफलसाधनत्वं तद्वदिहापि। ननु प्रकरणादस्यानित्यत्वावगतिः। काम्यत्वं तु 'ग्रामकामाय प्रतिपदमिति' प्रतिपदमिति वाक्येन। अतः प्रकरणस्य दुर्बलत्वात् कथं नित्येन काम्यसिद्धिरिति ? सत्यम्। तथापि नित्यप्रयोगार्थप्रतिपदन्तराभावेन गत्यभावाद्वाक्यादपि प्रकरणमेव प्रबलमिति मन्तव्यम्। केचिदिदं तृचं काम्यप्रयोग एवेत्याहुः ॥ १ ॥

उक्तप्रतिपदि नर इत्यस्य सद्भावात् ग्रामकामायोचितेत्याह—

नरो वै देवानां ग्रामो ग्राममेवास्मा उपाकः ॥ २ ॥

नरो मनुष्याः खलु देवानां ग्रामः। अत्र नर इति यजमाननर ऋत्विज उच्यन्ते। ग्राम इति निवासाश्रयः। अतो देवानां यागनिष्पादनद्वारा नरो ग्रामः। तथा सति नरशब्दोपेतां उपास्मा इत्येतां प्रतिपदं युञ्जन् उद्गाता अस्मै यजमानाय ग्राममेवोपाकः उपायनीयः कृतवान् भवति ॥ २ ॥

उपेति पदस्य परम्परया ग्रामार्थत्वादपि तत्कामस्येयमुचितेत्याह—

उप वा अन्नमन्नमेवास्मा उपाकः ॥ ३ ॥

अत्तुः समीपे नियतमन्नस्यावस्थानात्समीपवाचिनोपशब्देन समीपस्थमन्नमुच्यते। तदपि व्रीह्यादिरूपमन्नं ग्रामः समीप एव केदारादौ

जायत इति वा पक्वमन्नं ग्रामावयवभूतेषु गृहेषु वर्त्तत इति वाऽन्नमिति ग्रामः। तथा च सति तद्युक्तप्रतिपत्प्रयोगेणास्मा अन्नमेव ग्राममेवोपाकः समीपे कृतवान् भवति ॥ ३ ॥

अथ प्रजाकामस्य प्रतिपदमाह—

'उपोषु जातमप्तुर'मिति प्रजाकामाय प्रतिपदं कुर्य्यात्॥४॥

स्पष्टम् ॥ ४ ॥

तत्र प्रजालिङ्गं दर्शयति—

उप वै प्रजा तां जातामित्येवाजीजनत् ॥ ५ ॥

लोके जनयिता उप समीपे प्रजानां प्रजां पुत्रादिरूपां जातामित्येवं खल्वजीजनदुत्पादयति। तस्माज्जातशब्दोपेता प्रजाकामस्योचितेत्यर्थः। 'उपास्मै' इति प्रतिपन्नित्यकाम्योभयार्थमित्युक्तम्। उपोषु जातमप्तुरमित्यादीनां स्पष्टं तत्काम्यप्रयोगार्थत्वम्। यथा च कल्पकारः 'उपोषु जातमिति प्रतिपत्तृचं प्रकृतिज्योतिष्टोमादन्यास्मिन् प्रजाकामप्रयोगे विदधाति प्रजाकामस्योपोषु जातमप्तुरमिति स्तोत्रीय' इत्यादिना 'समानमितरज्ज्योतिष्टोमेने'त्यन्तेन। एवमुत्तरासामपि काम्ये प्रतिपदा कल्पोऽवगन्तव्यः ॥ ५ ॥

अथ पश्वादिभेषजकामप्रयोगे प्रतिपदमाह—

'सनः पवस्व शङ्गव' इति प्रतिपदं कुर्य्यात् ॥ ६ ॥

स्पष्टम् ॥ ६ ॥

अत्र पशुभेषजस्याद्यः पाद उचित इत्याह—

यां समां महादेवः पशून् हन्या'त्स नः पवस्व शङ्गव' इति चतुष्पदे भेषजं करोति ॥ ७ ॥

यां समां यस्मिन् संवत्सरे सनः पवस्वेति पादे गवादिकामाय भेषजं करोति तस्मिन् हि पादे सोमं सम्बोध्य गवेशं पवस्वेति प्रार्थ्यमानत्वात् ॥ ७ ॥

अथ द्वितीयपादो द्विपदामेकशफानाञ्च भेषजप्रयोगे युक्त इत्याह—

शङ्गनायेति द्विपदे शमर्व्वत इत्येकशफाय ॥ ८ ॥

द्विपात् मनुष्यो जनः अर्वाश्च एकशफः ताभ्यां भेषजं करोतीति॥८॥

तृतीयपादोऽपि पशुभेषजायोचित इत्याह—

द्विषेण वै तां समामोषधयोऽक्ता भवन्ति यां समाम्महादेवः पशून् हन्ति यच्छंराजन्नोषधीभ्य इत्या-

ह्यौषधीरेवास्मै स्वदयत्युभय्योऽस्मै स्वदिताः पच्यन्तेऽकृष्टपच्याश्च कृष्टपच्याश्च ॥ ९ ॥

यस्मिन् संवत्सरे महादेवः पशून् हन्ति तां समां तस्मिन् संवत्सरे सर्वा ओषधयो विषेण युक्ता भवन्ति । 'यच्छं राजन्नोषधीभ्य' इत्याहोद्गाता तदस्मै यजमानाय ओषधीरेव स्वदयति स्वादुं करोति । उभय्य उभयविधाः अकृष्टपच्याश्च कृष्टपच्याश्च कर्षणादिरहिता नीवारादयः तद्युक्ता व्रीह्यादयश्चास्मै यजमानाय स्वदिताः स्वादुभवाः पच्यन्ते स्वयमेव परिणता भवन्ति । तासां लक्षणात् पशवः सर्वे नीरुजा भवन्तीत्यर्थः । शं राजन्निति पाठे हे राजन् सोम ओषधीभ्यः शम्पवस्वेति प्रार्थनाप्रतीतेरोषधीनां निर्विषत्वात् तद्भक्षकाणां पशूनामपि भेषजप्राप्तिरुचितैव ॥ ९ ॥

अथ श्रैष्ठ्यकामाय प्रयोगे प्रतिपदमाह—

पवस्व व्वाचो अग्रिय इति प्रतिपदं कुर्य्याद्यं कामयेत समानानाꣳ श्रेष्ठः स्यादिति ॥ १० ॥

स्पष्टोऽर्थः ॥ १० ॥

तस्यामग्रियशब्दसद्भावादेषा तस्योचितेत्याह—

पवस्व व्वाचो अग्रिय इत्यग्रमेवैनं परिणयति ॥ ११ ॥

यतः 'पवस्व व्वाचो अग्रिय' इति भागे अग्रिय इत्यस्ति, अतस्तत्प्रयोगेण एनं यजमानं अग्रं पुरोभागं परिणयति परिगमयति ॥ ११ ॥

अग्रपरिणयने श्रियां कः सम्बन्ध इति तत्राह—

श्रीर्व्वै व्वाचोऽग्रꣳ श्रियमेवास्मिन्दधाति ॥ १२ ॥

वाचः अभिवदनस्य यदग्रं पुरोभागः स श्रीर्वै श्रीरेव खलु । बहूनाम्मध्ये यस्य वाक् प्रथमं प्रवृत्ता स शोभते । तथा सति एतत् पाठेनास्मिन्यजमाने श्रियमेव दधाति ॥ १२ ॥

बह्वर्थप्रयोगे प्रतिपदमाह—

एते असृग्रमिन्दव इति बहुभ्यः प्रतिपदं कुर्य्यात् ॥ १३ ॥

बहवो दीक्षिता एकाहाहीनैर्य्यजन्ते तत्र 'एते असृग्र'मिति तृचं प्रतिपदं कुर्य्यात् ॥ १३ ॥

अथ बह्वर्थप्रयोजनयोग्यतामाह—

एत इति सर्व्वानेवैनानृद्ध्यै भूत्या अभिवदति ॥ १४ ॥

एत इति बहुवचनान्तेन सर्वानेवैनान् यजमानानभिवदति । ऋद्ध्यै तस्य व्याख्यानं भूत्या इति । ननु एत इतीन्दव इत्यस्य विशेषणं

तच्च प्रकृतान् सोमरसान्वक्ति । कथं यजमानानभिवदतीति ? उच्यते । ब्राह्मणेषु श्रुतिसामान्यमात्रेण सर्वत्र स्तुतिप्रवृत्तेः ॥ १४ ॥

अस्याः प्रतिपदः प्रजापतेः सृष्टिसाधनत्वेन प्राशस्त्यमाह—

एत इति वै प्रजापतिर्देवानसृजतासृग्रामिति मनुष्यानिन्दव इति पितॄँस्तिरःपवित्र इति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभि सौभगेत्यन्याः प्रजाः॥१५॥

एत इत्येनेन पदेन प्रथमेन बुद्धिस्थेन सृष्ट्यादौ प्रजापतिः पूर्वसृष्ट्यानुरूप्येण देवानसृजत । तथा असृग्रमिति पदेन मनुष्यान् इन्दव इति पितॄन् । एतेषां पदानां देवादिसृष्ट्यनुकूलत्वमुत्तरस्मिन् ब्राह्मणे वक्ष्यामः । तिरःपवित्रमिति पदेन ग्रहानसृजत । तिरःपवित्रेण शोधितेन रसेन ग्रहा गृह्यन्त अत एतत् । इह सृष्ट्यनुकूलमाशव इति पदेन स्तोत्रमसृजत । अश्नुवते व्याप्नुवन्ति स्तुत्या देवानिति स्तोत्राण्याशवः । तथा विश्वानीत्यनेन शस्त्रमसृजत । विशन्ति देवानां हृदयानीति विश्वानि शस्त्राणि । अभिसौभगेत्यन्याः प्रजा असृजत । सौभगानि धनानि अभि उद्दिश्येति देवमनुष्यादीनां भोगभूता अन्या गोऽविलक्षणाः प्रजा असृजत ॥ १५ ॥

अथैत इति पदस्य सृष्टौ सङ्गतिरित्याह—

यदेत इति तस्माद्यावन्त एवाग्रे देवास्तावन्त इदानीम् ॥ १६ ॥

ननु एतच्छब्दः सर्वनामवाची सन्निहितपरामर्शकः । देवास्त्वसन्तः विप्रकृष्टाः । अथ कथमेतच्छब्देन ते परामृश्यन्त इति ? नायं दोषः । न केवलं पुरोवर्त्तिवस्तुसन्निधिरेव सन्निधिः किन्तु बुद्धिसन्निधिरेवा।तस्मादबुद्ध्या सन्निहितत्वादेत इति पदेन परामृष्टत्या एव । अतो यद्यस्मात्प्रजापतिना देवाः 'एत' इति पदेनालोचितास्तस्माद्यावन्त एवाग्रे सृष्ट्यादौ देवाः स्थापिताः सृष्टा इत्यर्थः । तावन्त एवेदानीमपि न पुनर्म्मनुष्या एव तेभ्योऽन्ये सृज्यन्ते ॥ १६ ॥

तर्हि इदानीमपि सृष्ट्यभावे कथन्तेषां वर्त्तमानभाविकालयोः सम्बन्ध इति तत्राह—

सर्व्वान्वृद्धिमार्ध्नुवꣳस्थितेव ह्येषा व्याहृतिः ॥१७॥

उ शब्दो वैलक्षण्यार्थः । उ किन्तु सर्वान् सर्वकालसम्बन्धिन ऋद्धिमायुरादिलक्षणमार्ध्नुवन् समृद्धा अभवन् । अतः पूर्वसृष्टा नित्या

वर्त्तन्त इत्यर्थः। उक्तार्थस्योपपत्तिरुच्यते स्थितेव हीत्यादिना। हि यस्मादेषा देवसृष्टिसाधना व्याहृतिरेत इत्युक्तिः स्थितेव वर्त्तते। एत इत्यस्यार्थपरामर्शात् सर्वदा सन्निहिता एव हि प्रतीयन्ते ॥ १७ ॥

अथासृग्रमिति पदं मनुष्यसृष्टौ सङ्गतमित्याह—

यदसृग्रमिति तस्मान्मनुष्याः श्वः श्वः सृज्यन्ते ॥१८॥

यद्यस्मादसृग्रमिति पदं सृष्ट्यभिधायकं तस्मान्मनुष्याः श्वः श्वः परस्मिन्नहनीत्येवं सर्वदा सृज्यन्ते ॥ १८ ॥

इन्दव इति पदं पितृसृष्टौ सङ्गतमित्याह—

यदिन्दव इतीन्दव इव हि पितरः ॥ १९ ॥

इन्दव इति पदं स्मृत्वा पितरोऽसृज्यन्त तस्मादिन्दव इव हि सोमा इव खलु पितरो भवन्ति ॥ १९ ॥

कथं तेषां सोमसाम्यं तत्राह—

मन इव ॥ २० ॥

मनसा हि केवलं सृज्यन्ते न चक्षुर्विषया भवन्ति। अतो मन इवेत्युच्यते। सोमनामाप्यन्नविशेषरूपत्वा'दन्नमयं हि सौम्यं मन'इति श्रुतेर्मनःसम्बन्धः। यद्वा बलयात्मकस्य सोमस्याधिदैवसोमेन चन्द्रेणाभेदात् तस्य च मनस उत्पन्नत्वान्मनःसम्बन्धः। तस्मादिन्दव इति पदं पितृसृष्टौ सङ्गतमित्यर्थः ॥ २० ॥

उक्तार्थानुसन्धानपूर्वकञ्चैत इत्यस्याः प्रतिपत्करणं समृद्धिसाधनमित्याह—

यान्ताः प्रजाः सृष्टा ऋद्धिमार्ध्नुवꣳस्तामृध्नुवन्ति येषामेवं विद्वानेतां प्रतिपदं करोति ॥ २१ ॥

ताः प्रजापतिना सृष्टा देवादिरूपाः प्रजा यां ऋद्धिं समृद्धिं आर्ध्नुवन् प्राप्ताः तां समृद्धिं ऋध्नुवन्ति, के प्राप्नुवन्ति ?तान् दर्शयति। येषां यजमानानामेवं विद्वान् उक्तसृष्टिसाधनत्वं जानन् एते असृग्रमित्येतां प्रतिपदं करोति ॥ २१ ॥

एवं कृत्स्नामृचं प्रशस्याद्यं पादमाख्यायिकामुखेन प्रशंसति—

छन्दाꣳसि वै सोममाहरꣳस्तं गन्धर्वो विश्वावसुः पर्य्यमुष्णात्तेनापः प्राविशत्तं देवता अन्वैच्छꣳस्तं विष्णुरप्सु पर्य्यपश्यत स व्यकाङ्क्षदयन्नू ३ ना ३ इति तं पदा प्रास्फुरत्तस्मात्पृथागिन्दवोऽसृज्यन्त स देवताभ्योऽभि-

तस्तिष्ठन्तीभ्य एते असृग्रमिन्दव इति प्राब्रवीद्बहिष्पवमानेन वै यज्ञः सृज्यते यदेते असृग्रमिन्दव इति प्रस्तौति यज्ञमेव तत् सृष्टन्देवताभ्यः प्राह ॥ २२ ॥

पूर्वं गायत्र्यादीनि छन्दांसि द्युलोकात्सोममाहरन् तदाहियमाणं सोमं गन्धर्वो विश्वावसुः पर्य्यमुष्णात् परिमुषितवान्। तेन परिमुषितेन सोमेनापः प्राविशत्। तं प्रविष्टं देवताः सर्वा अन्वैच्छन्। अन्वेष्टुं तं विष्णुरप्सु पर्य्यपश्यत् परिदृष्टवान्। स विष्णुर्यकाङ्क्षत् विचिकित्सत्। कथमिति? उच्यते। अयन्नू ३ना ३ इति, न्विति वितर्के अयं सोमापहर्त्ता भवेन्नोवेति। ततः स तमवगत्य तं पदा स्वेन प्रास्फुरत् प्रावधीत्। पीडितात् गन्धर्वात् पृथक् प्रत्येकमिन्दवोऽसृज्यन्त उद्भता अभवन्। स विष्णुः सृष्टान् सोमान् अभितस्तिष्ठन्तीभ्यो देवताभ्यः प्राब्रवीत्। किमिति? 'एते असृग्रमिन्दव' इति एते सोमाः सृज्यन्त इति तस्यार्थः। ततः किमिति? तत्राह। यज्ञोऽग्निष्टोमो बहिष्पवमानेन वै खलु सृज्यतेऽस्य प्राथम्यात्तद्व्यतिरेकेण यज्ञाभावात्। तथा सति यदेते असृग्रमिति पदं प्रस्तौति प्रस्तावभागत्वेन गायति तत्तेन यज्ञमेव सृष्टं देवताभ्यः प्राहोद्गाता। अतोऽवश्यमेषा प्रतिपत् कर्त्तव्येत्यभिप्रायः ॥ २२ ॥

अस्य प्रतिपत्तृचस्यान्त्यपादे यदिडापदं तत्प्रशंसति—

व्यृद्धं वा एतदपशव्यं यत्प्रातःसवनमनिडं हि यदिडामस्मभ्यं संयतमित्याह प्रातःसवनमेव तदिडावत्पशुमत्करोति ॥ २३ ॥

प्रातःसवनमिति यदस्ति एतत् व्यृद्धं वै असमृद्धं खलु। अपशव्यं पशुभ्योऽहितं पशुविरोधि। तदपि कुतः? अनिडं हि। इडा शब्दो निधनादिषु प्रातःसवने नास्ति। तथा सति यदिडामस्मभ्यं संयतमप्याहोद्गाता तेन वचनेन प्रातःसवनमिडावत् कृतमेव ततश्च तत् पशुमत्करोति। इडेति गो नाम 'इडे रन्ते' इत्युपक्रम्य एतानि गोनामानीति श्रुतत्वात् ॥ २३ ॥

अथ समूहार्थप्रतिपदमाह—

दधिक्रावत्या रुचेति व्राताय प्रतिपदं कुर्य्यात् ॥ २४॥

स्पष्टोऽर्थः। ननु एते असृग्रमिति बहुभ्यः प्रतिपदं कुर्य्यादिति विहितेन वा अलं किमर्थं पुनर्विधानमिति? नैषदोषः। बहुभ्य इत्यत्रासखीनां यजमानानां प्रतिपद्विधानात्। अत्र तु व्रातायेति सखीनामेव

यजमानानां प्रतिपद्विधानात्, न हि व्रातशब्दबहुशब्दौ समानार्थौ । बहुशब्दो यजमानबहुत्वमात्रमपेक्षते व्रातशब्दस्तु परस्परसाखिभूतयजमानसमुदायमतो न पुनरुक्तिः । तथा च कल्पकारः पूर्वस्मिन् प्रयोगे बहुनामसखीनां यजमानानाम् 'एते असृग्रम्'इति सस्मार, अत्र तु सखीनां यजमानानां 'दविद्युतत्या रुचे'ति स्तोत्रीय इति ॥ २४ ॥

उक्तप्रतिपद्व्रातप्रयोगे सङ्गतेत्याह—

दविद्युतत्या रुचेति वै गायत्र्या रूपं परिष्टोभन्त्येति त्रिष्टुभः कृपेत्यनुष्टुभः सोमाः शुक्रा गवाशिर इति जगत्याः सर्वेषां वा एषा च्छन्दसाꣳरूपं च्छन्दाꣳसीव खलु वै व्रातोपदेषा प्रतिपद्भवति स्वेनैवैनाꣳस्तद्रूपेण समर्द्धयति ॥ २५ ॥

दविद्युतत्येति पादे दीप्तिवाचिपदद्वयं श्रूयते । दीप्तिश्च तेजश्च 'तेजो वै ब्रह्मवर्चसं गायत्री' इति श्रुतेरयं पादो गायत्र्या रूपम् । परिष्टोभन्त्येत्यत्र स्तोभशब्दः श्रूयते त्रिष्टुभ्यपि स्तोभशब्दः अतो अयं भागस्तिष्टुभोरूपम् । 'कृपेति वाङ्नाम' 'वागनुष्टुप्' इति श्रुतेरेतत्पादमनुष्टुभो रूपम्।सोमाः शुक्रा' इति पादे गोशब्दःश्रूयते जगत्यामपि गच्छतीति जगतीति व्युत्पत्तिरत उभयत्र गमिधातुसाम्यादयं पादो जगत्या रूपम् । एवमेषा प्रतिपत् सर्वेषां हि छन्दसां रूपम् । छन्दांसीव उक्तानि चत्वारि छन्दांस्येव खलु 'व्रातशब्दः समुदायवाची' अत्रापि छन्दःसमुदायोऽस्ति । एवं सति यदेषा प्रतिपद्भवति एतान् यजमानान् तेनैव स्वेन रूपेण समर्द्धयति । एषा प्रतिपत् स्वस्मिन् गायत्र्यादिछन्दोद्वारैर्द्दीप्त्यादिरूपैः समृद्धान् करोतीत्यर्थः ॥ २५ ॥

पुनरेषा समृद्धिसाधनत्वेन व्रातयोग्येत्याह—

व्यृद्धा वा एत इन्द्रियेण वीर्य्येण यद्व्रात इन्द्रियं वीर्य्यं छन्दाꣳसीन्द्रियेणैवैनान्वीर्य्येण समर्द्धयति॥२६॥

यत् यो व्रातोऽस्मिन् एते व्रातावयवभूताः सखायो यजमाना इन्द्रियवीर्य्याभ्यां वृद्धा विहीना वै व्रातात्मकत्वादेव असमर्थाः खलु । लोके परस्परसङ्घातानपेक्षन्ते छन्दांसि तु इन्द्रियवीर्य्यं तत्समत्वादेषा सर्वछन्दोरूपा प्रतिपदेतान् यजमानान् इन्द्रियेण वीर्य्येण च समर्द्धयति ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य नवमः खण्डः ।

अथ दशमः खण्डः ।

अथ दीक्षितानां मध्ये यः कश्चिद्दीक्षितः प्रमीयते एतत्तेषां प्रयोगे प्रतिपदमाह ।

अग्न आयूंषि पवस इति प्रतिपदं कुर्य्याद्येषां दीक्षितानां प्रमीयते ॥ १ ॥

स्पष्टम् ॥ १ ॥

अस्य तद्योग्यतामाह—

अपूता इव वा एते येषां दीक्षितानां प्रमीयते यद्येषाऽग्निपावमानी प्रतिपद्भवत्यग्नेरेवैनान्निष्टपति पवमानः पुनाति ॥ २ ॥

येषां दीक्षितानां मध्ये यः कश्चित्प्रमीयते स एते सर्वेऽप्यपूता इव वै अपूता एव खलु सहाधिकारात्। तथा सति यत् यद्येषाग्निपावमानी आग्निपावमानीदेवताका 'अग्न आयूंषी'त्येषा प्रतिपद्भवति तदग्नेरेव एनान् यजमानान्निष्टपति निःशेषेण सन्तापयत्युद्यापनार्थम्। तान्निष्टप्तान् पवमानो देवः पुनाति शुद्धान् करोति ॥ २ ॥

तत्र आयुःशब्दोऽपि तेषामुचित इत्याह—

यदायूंषीत्याह य एव जीवन्तितेष्वायुर्दधाति ॥३॥

यद्यस्मादायूंषीति प्रत्याहोद्गाता अतो य एव जीवन्ति यजमानास्तेषु सर्वेष्वपि यजमानेष्वायुः शतसंवत्सरलक्षणं दधाति ॥ ३ ॥

तत्पदपाठेन दीर्घरोगिणः प्रयोगे प्रतिपदमाह—

आनो मित्रावरुणेति ज्योगामयाविने प्रतिपदं कुर्य्यात् ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

अस्यास्तद्योग्यतामाह—

अपक्रान्तौ वा एतस्य प्राणापानौ यस्य ज्योगामयति प्राणापानौ मित्रावरुणौ प्राणापानावेवास्मिन्दधाति ॥ ५ ॥

यस्य यजमानस्य ज्योगामयति दीर्घरोगो भवति एतस्य प्राणापानावपक्रान्तौ । प्राणापानयोर्हि साम्ये आरोग्यं भवति । तथा सति यदेषा मैत्रावरुणी प्रतिपद्भवति तेन प्राणापानावेवास्मिन् आमयाविनि

दधाति। मित्रावरुणयोः प्राणापानयोश्च कः सम्बन्ध इत्युच्यते 'मैत्रमह-र्वारुणी रात्रि' रिति श्रुत्यन्तरात्, मित्रावरुणयोरहोरात्ररूपत्वम्। अहरेव प्राणो रात्रिरपान' इति श्रुत्यन्तराच्चयोः प्राणापानात्मकत्वम्। एवं परम्प-रया मित्रावरुणौ प्राणापानौ अतस्तद्युक्ता प्रतिपत्तस्योचितेत्यर्थः ॥५॥

अनृताभिशस्तस्य प्रतिपदमाह—

अपघ्नन्पवते मृधोपसोमो अराव्ण इत्यनृतमभिश-स्यमानाय प्रतिपदं कुर्य्यात् ॥ ६ ॥

स्पष्टम् ॥ ६ ॥

कथमनेन स्तोत्रेण यजमानस्याभिशंसनमपहतं भवतीत्यत्राह—

अरावाणो वा एते येऽनृतमभिशꣳसन्ति तानेवा-स्मादपहन्ति ॥ ७ ॥

अनृताभिशंसका एवारावाणो अरावतः अराव्णः 'अपघ्न-पवते मृधोपसोम' इति श्रूयमाणप्रतिपत्रित्वं प्रयुञ्जान उद्गाता अस्माद्यजमा-नात् तानेवारातीनेवापहन्ति ॥ ७ ॥

तृतीयपादोऽपि तस्यानुगुण इत्याह—

गच्छन्निन्द्रस्य निष्कृतमिति पूतमेवैनं यज्ञियमिन्द्र-स्य निष्कृतं गमयति ॥ ८ ॥

अस्मिन्पाद इन्द्रस्य निष्कृतं संस्कृतस्थानं गच्छन् 'अरावत' इति श्रूयते। अतोऽभिशंसनात् पूतं यज्ञियं यज्ञार्हं एनं यजमानमेव निष्कृत-मिन्द्रस्य स्थानं गमयत्युद्गाता ॥ ८ ॥

अथ क्षत्रियस्य प्रयोगे प्रतिपदमाह—

व्वृषा पवस्व धारयेति राजन्याय प्रतिपदं कुर्य्याद्वृ-षा वै राजन्यो व्वृषाणमेवैनं करोति ॥ ९ ॥

राजन्याय अभिषिक्तक्षत्रियाय यजमानाय। अत्र वृषेति श्रूयते राज-न्योऽपि अभिमतवर्षणाद्वृषैव। अत एतत्प्रयोगेनैनं वृषाणं करोति ॥९॥

अथ द्वितीयपादस्यानुकूलतामाह—

मरुत्वते च मत्सर इति मरुतो वै देवानां व्विशो व्विशमेवास्मा अनु नियुनक्त्यनपक्रामुकाऽस्माद्व्विड्-भवति ॥ १० ॥

अस्मिन् पादे मरुच्छब्दः श्रूयते मरुतश्च देवानां विशस्तथा सति

तत् पाठेन विशमेवास्मै यजमानायानुनियुनक्ति अनुक्रमेण नियोजयति । तेनास्माद्यजमानाद्विट् जातिरनपक्रामुका अनपक्रमणशीला भवति ॥ १० ॥

तृतीयपादस्यानुकूलतामाह—

विशश्चा दधान ओजसेत्योजसैवास्मै वीर्य्येण विशं पुरस्तात्परिगृह्णात्यनपक्रामुकास्माद्विड्भवति ॥ ११ ॥

अत्रौजसेति पदं भवति तद्वीर्य्यमभिधत्ते। अतस्तत्पाठेनौजसैव वीर्य्येण विशमस्मै यजमानाय पुरस्तात्परिगृह्णाति गतमन्यत् । पूर्वमनपक्रमणमभिमुखप्राप्त्यर्थमत्र तु प्राप्ताया विशो परित्यागार्थमित्यनपक्रामयोर्भेदः ॥ ११ ॥

अथ राष्ट्रकामयमानस्य प्रतिपदमाह—

पवस्वेन्दो वृषासुत इति प्रतिपदं कुर्य्याद्यः कामयेत जने म ऋध्येतेति ॥ १२ ॥

जने जनपदे मे मह्यं ऋध्येत ऋद्धिः स्यादिति सुज्ञानमन्यत् ॥ १२ ॥

किमत्र लिङ्गन्तदाह—

कृधी नो यशसो जन इति जनतायामेवास्मा ऋध्यते ॥ १३ ॥

अत्र जने जनसमूहे नो यशसो यशः कृधीति श्रूयते। एतत् समृद्धिः लिङ्गम्। तथा सति जनतायां जनसमूहे अस्मै यजमानाय ऋध्यते समृद्धिर्भवति ॥ १३ ॥

द्वियजमानके प्रयोगे प्रतिपदमाह—

युवꣳ हि स्थः स्वः पती इति द्वाभ्यां प्रतिपदं कुर्य्यात्समावद्राजावेवैनौ यज्ञस्य करोत्युभौ यज्ञयशसेनार्पयति ॥ १४ ॥

अत्रेन्द्रः सोमश्चोभौ श्रूयेते। अत एतत्प्रतिपत्करणेन यज्ञस्य समावद्राजौ समानफलभागिनौ करोति यजमानावुद्गाता । किञ्चोभौ यज्ञयशसेन यज्ञोपि स्तूयते तेन यशसा स्वर्गलक्षणेनार्पयति । तत्र स्वर्गतीति श्रुतत्वात् इत्यभिप्रायः ॥ १४ ॥

अथ वृष्टिकामाय प्रतिपदमाह—

प्रास्य धारा अक्षरन्निति वृष्टिकामाय प्रतिपदं कुर्य्यात् ॥ १५ ॥

स्पष्टम् ॥ १५ ॥

अत्र वृष्टिलिङ्गं दर्शयति—

प्रास्य धारा अक्षरन्निति दिवो व्वृष्टिञ्च्यावयति व्वृष्णः सुतस्यौजस इत्यन्तरिक्षात् ॥ १६ ॥

प्रास्येति पादे धाराक्षरणलिङ्गात् द्युलोकसकाशाद्वृष्टिञ्च्यावयत्युद्गाता । द्वितीयपादे वृष्ण इति वर्षणलिङ्गात् द्युलोकादागतां वृष्टिमन्तरिक्षात् च्यावयति ॥ १६ ॥

तृतीयपादे स्थितिहेतुरित्याह—

देवाँ अनु प्रभूषत इत्यस्मिन् लोके प्रतिष्ठापयति ॥ १७ ॥

अत्र पादे 'देवां अनु प्रभूषत इति वा, प्रभवति इति वा, सोमस्य कीर्त्तनमस्ति । तच्च देवानां पूजनं भूर्लोके एकोचितमिति अस्मिल्लोके प्रतिष्ठायुक्तम् ॥ १७ ॥

अथ पुनरोजस इति पदं वृष्टिलिङ्गमित्याह—

ओजसा वा एतद्वीर्य्येण प्रदीयते यदप्रत्तं भवति यद्वृष्णः सुतस्यौजस इत्याहौजसैवास्मै व्वीर्य्येण दिवो व्वृष्टिं प्रयच्छति ॥ १८ ॥

लोके यदप्रत्तं आदायाप्रदत्तं भवति धनं एतदोजसा वीर्य्येण खलु प्रदीयते । ओजसेत्यस्य व्याख्यानं वीर्य्येणेति । तस्माद्य'द्वृष्णः सुतस्यौजस' इत्याहोद्गाता तेनौजसैव वीर्य्येण स्वप्रयोगे सामर्थ्यादस्मै यजमानाय दिवो वृष्टिं प्रयच्छति ॥ १८ ॥

वैरिगोकामस्य प्रयोगे प्रतिपदमाह—

तया पवस्व धारया यया गाव इहागमञ्जन्यास उप नो गृहमिति प्रतिपदं कुर्य्याद्यः कामयेतोप मा जन्या गावो नमेयुर्विन्देत मे जन्या गा राष्ट्रमिति यदेषा प्रतिपद्भवत्युपैनञ्जन्यागावो नमन्ति व्विन्दतेऽस्य जन्या गा राष्ट्रम् ॥ १९ ॥

उक्तं कृत्स्नमपि फलं कृत्स्नयैवर्च्चा प्रतीयत इत्याभिप्रायेण कृत्स्ना ऋक् प्रतीकत्वेनोपात्ता । अत्र जनशब्दः शत्रुजनसंवादी । जन्यास्तत्सम्बन्धिनो गावो मे नमेयुः प्राप्नुयुरिति । उपनमत गा मे राष्ट्रं विन्देतेति च यो यजमानः कामयेत तस्मै तया पवस्वेत्येतत्प्रतिपदं कुर्य्यात् । अत्र हि

जन्या गाव इह नो गृहमागमन्निति श्रूयते। जन्यस्य कृतत्वमपि राष्ट्रं गृहम्। अत उक्तफलसिद्धावेतल्लिङ्गम्। एवंसति यद्यङ्गस्य यजमानस्यैषा प्रतिपद्भवति उपैनमित्यादिसिद्धप्रायमिति ॥ १९ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य दशमः खण्डः।

षष्ठाध्यायः समाप्तिमगमत्।

सप्तमोऽध्यायः।

अथ प्रथमः खण्डः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अग्निष्टोमविधिस्तोमस्तुतिप्रासङ्गिकाः परे।
उक्ताः प्रतिपदः काम्याः स्युर्बहिष्पवमानगाः ॥

अथ बहिष्पवमानादीनां सामानि स्तुतिप्रकारांश्च विधीयन्ते, गायत्र्यां प्रातःसवने स्तोत्राणीति स्थितं तस्य गायत्रसाम्नः स्तुतिप्रकारं संस्तुतिकमाह—

इमे वै लोका गायत्रं त्र्यावृद्गेयन्त्रयो हीमे लोका यत्त्र्यावृद्गायत्येभिरेवैनं लोकैः सम्मिमीते ॥ १ ॥

यद्गायत्रं सामास्ति तदिमे लोका वै भूरादित्रयो लोकाः खलु। अतस्त्र्यावृद्गेयम्। आवृदिति गानक्रियाविशेषणम्। आवृतो गीतिखण्डाः तिस्र आवृतो यस्मिन् तत्त्र्यावृत्तद्यथा भवति तथा गेयम्। तस्य आवृत्प्रकारं सूत्रकार आह। 'पवमानायेन्दावा२' इत्येकाऽवृत्'अभिदेवां इया' इत्यपरा 'क्षात' इत्यपरा इति एतत्त्र्यावृत्त्वं प्रस्तावव्यतिरिक्तभागाभिप्रायम्। गायत्रस्य लोकसामापेक्ष्य त्र्यावृत्त्वं विहितं तेषां कथं त्रैविध्यमिति? तदुच्यते त्रयो हीम इत्यादिना। एवं सति यद्यदि त्र्यावृद्गायति गायत्रमेभिस्त्रिभिर्लोकैरेनं यजमानं सम्मिमीते समानं कृतवान् भवति ॥ १ ॥

यथोक्ते सामनि अवनर्दनं विधत्ते—

द्विरवनर्देद्धि कुर्य्यात्तृतीयम् ॥ २ ॥

द्विरवनर्दनं कुर्य्यात्। हिङ्कुर्य्यादुत्तमाया आवृतः पूर्वं तेन तृतीयमेवावनर्दं भवति। अवनर्दनस्वरूपं सूत्रकारो बहुधा विकल्पितवान्। तद्यथा· 'पूर्वा वावनर्दा इति धानञ्जय्य' इति। अस्यायमर्थः आवर्गौ इति खण्डौ ऽयवनर्दौ ऽयवनर्दनीयौ अवस्वरेदित्यर्थः। पूर्वखण्डयोरन्त्याक्षरमुच्चैः कृत्वा नीचैरवस्थापयेदित्यर्थः।तथैव हि सावित्र्यं सामगीयते। मध्यमायामावृति द्वौ स्तोभौ कुर्य्यात्तावावनर्दाविति गौतमः। अस्यायमर्थः मध्यमे गीतिभागे तदन्यस्वरसदृशौ द्वौ स्तौभौ कुर्य्यात् तौ च द्विरवनर्दनीयाविति गौतम इति। तावेव गानेन दर्शयति 'अभिदेवां इया१२१२' इति।अत्र द्वावाकारावन्त्याक्षरसदृशौ प्रत्येकमवनर्दितावित्यर्थः। 'सर्वत्रौकारावित्येके स्तोभधर्म्मत्वादिति'। सर्वास्वपि ऋक्षु सावित्रीयोनिं दृष्ट्वा त्वोकारावेव मध्यमगीतिखण्डे स्तोभौ कुर्य्यात्। न पुनस्तदन्त्याक्षरसदृशावित्यर्थः। कुतः?स्तोभधर्म्मत्वात्।योऽभिदृष्टेः स्तोभोऽन्यत्र प्रवर्त्तत' इति स्तोभानां धर्मोऽयं तदेतन्निराकरोति। 'यथर्च्चमाचार्य्यास्तथर्कसदृशदृष्टान्तात्स्तोभानैकान्त्याच्चेति'।अस्यायमर्थः। मध्यमे गीतिखण्डे यादृशमन्त्यमार्चिकाक्षरं तत्सदृशौ स्तौभौ कार्य्यावित्याचार्य्याः। कुतः ? तत्रैव 'कंश'लिङ्गयोरार्चिकाक्षररूपयोरेव स्तोभयोर्योनौ दर्शनात्।तथाहि· 'धियो यो नः प्रचोदया' दितिमध्यमे गीतिखण्डे षष्ठः स्वर ॐकारोऽन्त्यः तत्सदृशावोकारावेव तत्र स्तोभौ विवक्षितौ तत्रार्थादोकारत्वं संज्ञातम्। अतः सर्वत्रान्त्याक्षरसदृशावेव स्तोभौ कुर्य्यादिति। किञ्च सावित्र्याओकारयोर्न स्तोभत्वैकान्त्यमस्ति। एकान्त्येन स्तोभाविति निश्चेतुन्न शक्यावित्यर्थः।द्विरवनर्देदिति ऋगक्षरस्यैवावनर्दनविधानोपपत्तेर्न स्तोभत्वे किञ्चित् प्रमाणमस्तीति यावत्। तेन स्तोभधर्मत्वादित्यसिद्धो हेतुरित्यभिप्रायः ॥ २ ॥

अथोक्तवैलक्षण्येन हिंकाराभावेन मुख्यावनर्दत्रयकरणे दोषमाह—

यत्त्रिरवनर्दत्यति तद्गायत्रꣳ रेचयति ॥ ३ ॥

यत् यदि हिंकारेण विनैव त्रिरवनर्दति तेन गायत्रमतिरेचयति। द्वौ स्तोभौ कुर्य्यात्तावावनर्दाविति पक्षस्यानूनं ब्राह्मणमनुकूलं दृश्यत इति बोद्धव्यम् ॥ ३ ॥

गायत्रसाम्नः प्रतिहारो नास्ति हिंकार एव तत् स्थानीय इत्याह—

यो वै गायत्रेणाप्रतिहृतेनोद्गायत्यप्रतिष्ठानो भवति

हिंकारो वै गायत्रस्य प्रतिहारः ॥ ४ ॥

यो वै गायत्रेण प्रतिहाररहितेनोद्गायति सोऽप्रतिष्ठानः प्रतिष्ठारहितो भवति ॥ ४ ॥

अतो हिंकारस्तत्स्थानीयो द्रष्टव्यस्तस्य मानसत्वमाह—

स मनसा ध्येयः प्रतिहृतेन गायत्रेणोद्गायति प्रतितिष्ठति ॥ ५ ॥

स हिंकारो मनसा ध्येय उच्चारणीयः प्रतिहर्त्रा शेषं स्पष्टम् । अत्र सूत्रम् "ऊर्द्ध रेतस्याया ह्यक्षरꣳशिष्ट्वा हिङ्कारं ब्रूयाद् 'ब्रुम् आ २' 'इति चेत्ऊर्द्ध रेतस्यायां प्रतिहर्त्ता मनसा ध्यायेन्न परास्विति गौतमः परास्वेवेति धानञ्ज्यशाण्डिल्यावितीति" ऊर्द्ध रेतस्याया इत्यादेरयमर्थः । बहिष्पवमानस्य प्रथमा रेतस्या तदूर्ज्जामुत्तरास्वेव ह्यक्षरं शिष्ट्वा हिङ्कारं ब्रूयात् कुतः?षड्विंशब्राह्मणे रेतस्या हिङ्कारनिषेधादिति। अनन्तरं ब्राह्मणं 'यो वै गायत्रेणाप्रतिहृतेनोद्गायतीत्यादि समनसा ध्येय' इत्यन्तं हिङ्कारस्य मनसा ध्यानं विधत्ते । रेतस्यायामेव तं हिङ्कारं प्रतिहर्त्ता मनसा ध्यायेत् न परासु इति। 'यो वै गायत्रेणाप्रतिहृतेनोद्गायतीति' प्रतिहारभक्तिलोपो मनसा ध्यानस्य निमित्तत्वेनावगम्यते । तद्भक्तिलोपश्च रेतस्यायामेव नान्यत्रेति । तत्रैव तु ध्यानमिति गौतमो मन्यते ।परास्वेवेत्यादेरयमर्थः । परास्वेव मनसा ध्यानं न रेतस्यायां कुतः? न प्रतिहारलोपो निमित्तं किं तु प्रतिहर्त्तुः प्रतिहारवचने प्राप्ते तं विहायोद्गातुः प्रतिहारवचनं निमित्तम्। तथाहि यो वै उद्गाता गायत्रेण प्रतिहर्त्ता अप्रतिहृतेन स्वयमेव प्रतिहारं कृत्वा गायति सोऽप्रतिष्ठः स्यादिति ब्राह्मणार्थः । ततश्चोद्गातुः प्रतिहारवचनमुत्तरास्वेवेति तत्रैव ध्यानमिति धानञ्ज्यशाण्डिलौ मन्येते इति ॥ ५ ॥

अथ प्रातःसवनस्य मन्द्रस्वरत्वाद्बहिष्पवमानस्य कृत्स्नस्यापि तत्प्राप्तौ प्रथममध्यमोत्तमा ऋचः प्रथममध्यमोत्तमस्वराः क्रमेण कर्त्तव्या इति विधित्सुराह—

यो वा एभ्यो लोकेभ्यो गायत्रं गायति नैभ्यो लोकेभ्य आवृश्च्यत इम एनं लोका ऊर्ज्जाऽभिसंवसते ॥६॥

गायत्रस्य लोकत्रयात्मकत्वमुक्तम् ।यः खलूद्गाता एभ्य स्त्रिभ्यो लोकेभ्य उपादाय गायत्रं गायति स एव इतो लोकेभ्यो नावृश्च्यते न विच्छिद्यते । किं तु इमे लोका एनमूर्ज्जाऽन्नेनाभिसंवसते समाच्छादयन्ति ॥६॥

कथमेभ्यो लोकेभ्यो गायत्रं गीतं भवति तथा दर्शयति—

मन्द्रमिवाग्र आददीताथ तारतरमथ तारतमन्तदे-भ्यो लोकेभ्यो ऽगासीत् ॥ ७ ॥

संग्रहेण तावच्चतुर्विधः स्वरः । उपांशु मन्द्रो मध्यम उत्तम इति । समीपगैः श्रोतुमयोग्या उपांशुमन्द्रादयस्त्रयोऽपि तद्योग्यास्तेऽप्युत्त-रोत्तरमुच्चभूता भवन्ति । तेष्वग्रे प्रथमम्मन्द्रमिव ईषदुच्चैरित्यादादीतो-पक्रमेण । अथ मध्यभागे तारतरं ब्रूयात् । पूर्वस्मादप्यधिकमुच्चैर्ब्रूयात् । अथ तारतमन्ततोऽप्यन्त्यभागेऽत्यन्तमुच्चैर्ब्रूयात् । तत्तेनैभ्यो लोके-भ्योऽगासीद्गायति । छन्दसि लुङ्लङ्लिटः' इति वर्त्तमाने लट् ॥ ७ ॥

अथ गायत्रसाम्नो निरुक्तगाने दोषं सङ्कीर्त्यानिरुक्तगानं विधत्ते—

अनिरुक्तङ्क्रेयमेतद्वै गायत्रस्य क्रूरं यन्निरुक्तं यद-निरुक्तं गायति क्रूरमेवास्य परिवृणक्ति ॥ ८ ॥

अनिरुक्तमव्याकृताक्षरङ्क्रेयम् । निरुक्तं गानं यदस्त्येतदेव खलु गाय-त्रस्य क्रूरं गानम् । तस्माद्यद्यदनिरुक्तं गायत्यस्य गायत्रस्य क्रूरमेव परिवृणक्ति परिवर्जयति ॥ ८ ॥

अथास्य मध्ये अनवानव्यतिरेकेण दोषसङ्कीर्त्तनं विधत्ते—

प्राणो गायत्रन्न व्यवान्यात्प्राणस्याविच्छेदाय यदि व्यवानिति प्रमायुको भवति यदि न व्यवानिति सर्व-मायुरेति ॥ ९ ॥

गायत्रे सामनि नव स्तोत्रीयाः। प्राणाश्च सप्तशीर्षण्या । द्वावर्वाञ्चौ । तत्र न व्यवान्यद्गायत्रमध्ये निश्वासन्न कुर्यात् । द्वावेतान्न कुर्यात् । सुव्यक्तमन्यत् ॥ ९ ॥

अथ निःश्वासेन विना गानसमापनाशक्तस्याह—

यदि व्यवान्यान्मध्य ऋचो व्यवान्यात्प्राणो वै गाय-त्रं प्राणः स्वरः प्राणमेव तन्मध्यत आत्मन्दधाति स सर्वमायुरेति ॥ १० ॥

यद्यनवानं गातुमशक्तः सन् व्यवान्यात्तर्हि ऋङ्मध्ये व्यवान्यात् । तत्र मध्ये व्यवानं श्रूयते । गायत्रं प्राणः स्वरोऽपि तन्निष्पाद्यत्वात् प्राण-एव । स्वरम्मध्ये कुर्व्वन्नुद्गाता प्राणमेव यजमानस्यात्मनि दधाति स्था-पयति । स सर्वमायुरेति ॥ १० ॥

अथ कामभेदे निधनान्याह—

इडां पशुकामाय निधनं कुर्य्यात्स्वः स्वर्गकामाय यशो ब्रह्मवर्चसकामायायुरामयाविने हꣳसीत्यभिचरते ॥११॥

उत्तमश्चाकारो गायत्रस्य निधनन्तस्य स्थाने यत् कामयते तस्य प्रयोगे तदानुगुण्येन तत्तन्निधनं कुर्य्यात्। सर्वत्र चतुर्थीश्रुतेः। यजमानफलान्येतानि नित्ये क्रियमाणानि तत्तत् फलं क्रतुफलव्यतिरेकेण साधयन्तीति केचित्। पशुकामादियज्ञेष्वपीत्यपरे ॥ ११ ॥

अथैतानि स्तौति—

एते वै गायत्रस्य दोहाः ॥ १ ॥

दुह्यन्त एभिरिति दोहाः। एतदपेक्षया निधनानि। एत इति पुल्लिङ्गत्वेन निर्दिष्टाः ॥ १२ ॥

वेदितुरप्येतत् फलं भवतीत्याह—

ब्रह्मवर्चसी पशुमान् भवति य एवं वेद ॥ १३ ॥

उक्तफलद्वयमितरेषामप्युपलक्षणम्। अत्र श्रुतानि सर्वाण्यप्याप्नोति ॥१३॥

इति ताण्डमहाब्राह्मणे सप्तमाध्यायस्य प्रथमः खण्डः।

अथ द्वितीयः खण्डः।

तदेवमुक्तो बहिष्पवमानः, अथाज्यस्तोत्राणां देवता विवक्षुराख्यायिकामाह—

प्रजापतिर्देवेभ्य आत्मानं यज्ञं कृत्वा प्रायच्छत्तेऽन्योन्यस्मा अग्राय नातिष्ठन्त तानब्रवीदाजिमस्मिन्नितेति त आजिमायन्यदाजिमायꣳस्तदाज्यानामाज्यत्वम् ॥१॥

पूर्वं प्रजापतिर्देवेभ्य इन्द्रादिभ्यो भोगार्थमात्मानं यज्ञमग्निष्टोमं कृत्वा प्रायच्छत्। ते देवा अन्योन्यस्माअग्राय प्रथमभोगाय नातिष्ठन्त न समजानन्। तद्दृष्ट्वा प्रजापतिस्तान् देवानेवमब्रवीत्। अस्मिन्नग्रभाग एतान् कुर्वन्नितेति। आजिं मर्य्यादामितो गच्छतेति। तदेवाजिमायन् अगमयन्। यद्यस्मादाजिमायन् तत्तस्मादाज्यानामाज्यत्वम्। आजिमानेष्वाज्यस्तोत्रमरचयादित्यर्थः ॥ १ ॥

इदानीमाज्यस्तोत्राणां देवताकल्पनमाह—

स इन्द्रोऽवेदग्निर्वा इदमग्र उज्जेष्यतीति सोऽब्रवीद्यतरोनाविदमग्र उज्जयात्तन्नौ सहेति सोऽग्निरग्र उदजयदथ मित्रावरुणावथेन्द्रोऽथैषैका होत्रानुज्जितासीत्स इन्द्रोऽग्निमब्रवीद्यत्सहावोचावहै यन्नौ तदिति सैषैन्द्राग्न्यध्यर्द्धमग्ने स्तोत्रमध्यर्द्धमिन्द्रस्य ॥ २ ॥

स इन्द्र अवेत् अजानत् । अग्नेरेवेदं धावनमग्र इतरेभ्यः पूर्वमुज्जेष्यतीत्येवं विदित्वा स इन्द्रोऽग्निमब्रवीत् । नावावयोर्म्मध्ये यतरोऽपीदमग्र उज्जयात् पूर्वमुत्कृष्टं जयेत्तत्फलं नावावयोः सह भवत्विति । अग्निरपि तथास्त्वित्यङ्गीकृतवानिति शेषः । अथ सोऽग्निरग्र इतरेभ्यः पूर्वमाजिमुदजयत् । अथ पश्चान्मित्रावरुणावथेन्द्र उज्जयत्क्रमेणैव तेषामाज्यानि भवन्तीत्यभिप्रायः । 'अग्न आयाहि वीतय' इत्याग्नेयं होतुराज्यम् । 'आनो मित्रावरुणेति' मैत्रावरुणमित्रावरुणस्य । 'आयाहि सुषुमाहित' इत्यैन्द्रं ब्राह्मणाच्छंसिनः।एवं चतुर्णामाज्यानां मध्ये त्रीण्युज्जितानि । अथैषाच्छावाकस्यैका होत्रा केनचिदनुज्जिताऽऽसीत् । मुख्यव्यतिरिक्तानामृत्विजामार्त्विज्यं होत्रेति व्यपदिश्यते । अनुज्जितविषये स इन्द्रोऽग्निमब्रवीत् । यद्यस्मात् सह फलं समानमित्यवोचावहि—उक्तवन्तावावां तत्तस्मादियं होत्रा नावावयोः स्यादित्यथैवास्त्विति सोऽप्यङ्गीकृतवानिति शेषः । सैषोभयार्था होत्रैन्द्राग्नीन्द्राग्निदेवताका 'इन्द्राग्नी आगतं सुतम्'इत्यच्छावाकस्याज्यम् । तथा सत्यध्यर्द्धमर्द्धाधिकमग्नेः स्तोत्रं भवति । एतत्कृत्स्नाभिप्रायम् । प्रथममेकं चतुर्थञ्चमित्यग्नेरध्यर्द्धस्तोत्रम् । तथा इन्द्रस्याप्यध्यर्द्धं ब्रह्मसामैकं चतुर्थे द्वितीयमर्द्धमित्यर्द्धम् ॥ २ ॥

उक्तविभागं संगृह्यानुवदति—

चत्वारि सन्ति षड्देवत्यानि ॥ ३ ॥

पूर्वोक्तानि चत्वारि वाक्यानि षड्देवत्यानि भवन्ति । अग्निर्म्मित्रावरुणाविन्द्र इति चतस्रो देवताः पुनश्च द्वाविन्द्राग्नी इति षड्देवत्यत्वम् । तदिदं स्तौति ॥ ३ ॥

आज्यानां षड्देवतात्वं प्रशंसति—

षड्धा विहितो यज्ञो यावान्यज्ञस्तमेवारभते ॥४॥

उक्थ्यषोडशिनोरन्यतमान्तर्भावे षट्प्रकारो विहितः खलु । अतस्त-

देवत्याज्यस्य प्रातःसवनप्रयोगेण यज्ञो ज्योतिष्टोमो यत् परिमाणोऽस्ति तमेव तं सर्वमपि यज्ञमारभत आरब्धवान् भवति ॥ ४ ॥

उक्तदेवतानानात्वमाज्यस्य जामित्वसाधनेन स्तौति—

सर्वाणि स्वाराण्याज्यानि तज्जामि नानादेवत्यैः स्तुवन्त्यजामितायै ॥ ५ ॥

सर्वाण्यप्याज्यानि गायत्रत्वात् स्वाराणि स्वरैरेव वक्तुं प्राप्तानि । अतस्तज्जामि । अतिरेकोऽयं 'जाम्यतिरेकनाम'इति निरुक्तम् । यद्वा तन्द्रीकरणम् । अतो नानादेवत्यैस्तृचैः स्तुवन्त्युक्तदोषाभावाय ॥५॥

अथाज्यानामभ्यावृत्तगानं स्तौति—

ग्राम्येभ्यो वा एतत्पशुभ्यः स्तुवन्ति यदाज्यैः पुनरभ्यावर्त्तꣳस्तुवन्ति तस्मात्पराञ्चः प्राज्यन्ते प्रत्यञ्चः प्रजायन्ते तस्मादु प्रैत्य पुनरायन्ति ॥ ६ ॥

यदाज्यैः स्तुवन्त्येतदेतेन सवनेन ग्राम्येभ्य एव पशुभ्यस्तल्लाभार्थमेव स्तुवन्ति । तस्मात्पराक्तस्य प्रत्यक्तस्य च विद्यमानत्वात्पराञ्चः प्राज्यन्ते प्रसिच्यन्ते प्रत्यञ्चः प्रतिमुखाः प्रजायन्ते । तस्मादेवाभ्यावर्त्तस्तवनादेव पशवः प्रातः सञ्चरन्ति प्रेत्य सायं पुनरायन्ति ॥ ६ ॥

इति ताण्डयमहाब्राह्मणे सप्तमाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

प्रातःसवनमुक्त्वा माध्यन्दिनं सवनं विवक्षुर्माध्यन्दिनम्पवमानं स्तौति—

एतावता वाव माध्यन्दिनꣳ सवनं पुपुवे ॥१॥

एतावता वक्ष्यमाणानामाज्यानां परिमाणेन पदार्थेनैव कृत्स्नमपि माध्यन्दिनं पवमानं पुपुवे पूयते । एतावतेत्यनेन पावकद्रव्यपरिमाणन्तद्योग्यं द्रव्यञ्च सामान्येन निर्दिष्टं भवति ॥ १ ॥

एतावतेत्युक्तमेव विशदयति—

त्रिभिश्च च्छन्दोभिः पञ्चभिश्च सामभिः ॥ २ ॥

त्रिभिर्गायत्रीत्रिष्टुब्बार्हतैर्बृहतीभिश्च । सामभिर्गायत्रामहीयवरौरवयौधाजयौशनसंज्ञैः पञ्चभिश्च ॥ २ ॥

किमेतावता भवतीत्याह ।

यन्माध्यन्दिनेन पवमानेन स्तुवन्ति माध्यन्दिनमेव तत्सवनं पावयन्ति ॥ ३ ॥

यन्माध्यन्दिनं पवमानं स्तुवन्ति तत्तेन माध्यन्दिनं सवनं पावयन्ति । पवमानस्तवनेन स्तुवन्तमपि विष्टुवन्तीत्यर्थः । सवनेन पूतं भवतीत्यर्थः ॥ ३ ॥

पवमानस्तवनेन सवनं पूतं भवतीत्युक्तन्तदुभयोः पवमानसवनयोः साम्नात्मवैषम्यमाह—

एतावन्ति वाव सर्वाणि सामानि यावन्ति माध्यन्दिने पवमाने ॥ ४ ॥

यावन्ति माध्यन्दिने पवमाने सामानि सन्त्येतावन्त्येव खलु तत्सवनगतानि सामान्यपि ॥ ४ ॥

येषु पवमानेषु सामसु सवनान्यन्तर्भवन्ति तान्याह—

गायत्रन्निधनवदानिधनमैडम् ॥ ५ ॥

गायत्रं साम प्रसिद्धम् । निधनवदिति बहिर्निधनमृगक्षरतो बहिर्भूतनिधनम् । यथा' आमहीयवमनिधनं बहिर्भूतं निधनरहितम् । यथा यौधाजयौशने । ऐडं इडानिधनं यथा रौरवमिति । एवं मैत्रावरुणपृष्ठं वामदेव्यं गायत्रीच्छन्दस्कत्वात् ॥ ५ ॥

होतुः पृष्ठं रथन्तरं बहिर्निधनं नौधसं ब्रह्मसाम निधनकाले यमैडमच्छावाकपृष्ठमिति पुनरुपसंहरति—

यन्माध्यन्दिनेन पवमानेन स्तुवन्ति सर्वैरेव तत्सामभिः स्तुवन्ति ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

अथ गायत्र्यां गायत्रं साम प्रशंसनद्वारेण विधत्ते—

आत्मा वै यज्ञस्य पवमानो मुखं गायत्री प्राणो गायत्रं यद्गायत्र्यां गायत्रेण स्तुवन्ति मुखत एव तत्प्राणान्दधति ॥ ७ ॥

यज्ञस्याग्निष्टोमस्य पवमान एवात्मा स्वरूपं तत्स्तुतिरूपत्वात् । माध्यन्दिनपवमानोऽप्यात्मा तस्य मुखं गायत्री प्रथमप्रयोज्यत्वात् । तत्राश्रितत्वाद्गायत्रं प्राणः । एवञ्च सति गायत्रेण स्तुवन्तीति यत्तत्तेन मुखत एव तत्प्राणान्दधति ॥ ७ ॥

त्रिभिश्छन्दोभिरित्युक्तन्तच्छन्दस्त्रयं प्रशंसति—

प्राणापाना वा एतानि च्छन्दाꣳसि प्राणो गायत्री व्यानो बृहत्यपानस्त्रिष्टुब्यदेतैश्छन्दोभिः स्तुवन्ति प्राणापानानामविच्छेदाय ॥ ८ ॥

तानि त्रीणि च्छन्दांसि प्राणापाना वै । अपानशब्देन व्यानापानावुच्यते देहान्तर्वर्त्तित्वसाम्यात् । तदपेक्षयैव प्राणापाना इति बहुवचनम्। कः किं छन्दोरूप इति विभज्य दर्शयति प्राणइत्यादिना । एक एव मुख्यः शरीरधारकः प्राणवायुर्बहिर्वृत्तिरुच्छासाख्यः प्राण उच्यते स गायत्रीस्थानीयः । व्यानः प्राणापानयोर्विधारकः स बृहत्या । अपानो बहिर्वृत्तेरन्तः प्रवेशको निःश्वासाख्यस्त्रिष्टुभः । शेषं स्पष्टम् ॥ ८ ॥

तदेतच्छन्दस्त्रयं प्रकारान्तरेण प्रशंसति—

इमे वै लोका एतानि च्छन्दाꣳस्ययमेव गायत्र्यय मध्यमो बृहत्यसावुत्तमस्त्रिष्टुब्यदेतैश्छन्दोभिः सꣳहितैः स्तुवन्त्येषाꣳलोकानामविच्छेदाय ॥ ९ ॥

अयं भूर्लोक एव गायत्री लोकेषु च्छन्दःसु चानयोः प्राथम्यात् । उक्तरूपत्वमेवमुत्तरत्रापि द्रष्टव्यम् । संहितैरिति च्छन्दोऽन्तरानन्तर्हितैरित्यर्थः । शिष्टं स्पष्टम् ॥ ९ ॥

संहितैः स्तुवन्तीत्युक्तं तद्व्यतिरेके दोषमाह—

यदन्यच्छन्दोऽन्तरा व्यवेयादिमाँल्लोकान्विच्छिन्द्यात् ॥ १० ॥

यद्यद्यन्यस्त्रिभ्य उक्तेभ्योऽन्यच्छन्दोऽन्तरा त्रयाणामुक्तानां छन्दसां मध्ये व्यवेयाद्व्यवहितं कुर्य्यात्तेनेमान् भूरादिलोकान्विच्छिन्द्यात् । परस्परोपकार्य्योपकारकभावरहितान् कुर्यादित्यर्थः ॥१०॥

एवं छन्दः प्रशस्य सामानि प्रशंसति—

गायत्रेण स्तुत्वा निधनवता स्तुवन्तीयं वै गायत्र्यस्यामेव तदायतनं क्रियते ॥ ११ ॥

'उद्यात' इत्यादिषु गायत्रीषु गायत्रसाम्ना स्तुत्वा तास्वेव गायत्रीषु निधनवतामहीयवेन साम्ना स्तुयुस्तथा सत्येतास्वृक्षु या गायत्र्यस्ति सेयं वै भूरेव । तत्तेन गायत्रीषु आयतनरूपान्निधनवदामहीयवगानेनास्यां भूमावेवायतनं क्रियते यजमानाय ॥ ११ ॥

एतदेव व्यतिरेकनिन्दया स्तौति—

यदनिधनेनाग्रे स्तुयुरनायतनो यजमानः स्यात् ॥१२॥

अग्रे बहिष्पवमानस्यादौ यद्यदि गायत्रमन्तरेण निधनवता निधनवदामहीयवव्यतिरिक्तेन केनचित्साम्ना स्तुयुरनायतनो यजमानः स्यात्। तस्मान्निधनवदामहीयवेनाग्रे स्तोतव्यम् ॥ १२ ॥

पुनस्तदेव प्रशंसति—

निधनवता स्तुवन्ति वीर्य्यं वै गायत्री वीर्य्यन्निधनं वीर्य्येणैव तद्वीर्य्यꣳ समर्द्धयति ॥१३॥

गायत्रीषु 'उच्चात' इत्यादिषु निधनवता बहिर्निधनेनामहीयवेन स्तुवन्ति। गायत्रीतरच्छन्दोभिरशक्यस्य सोमाहरणस्य कर्त्रीति वीर्य्यमेव निधनमपि वीर्य्यम्। आयतनवानिह वीर्य्यं करोति। तथा सति तत्तेन गायत्रीषु निधनवत् प्रयोगेण पूर्वं विद्यमानं वीर्य्यं वीर्य्यान्तरेणैव समर्द्धयति। उक्ते गायत्रीषु गायत्रमामहीयवं च सामनी ॥ १३ ॥

अथ बृहतीषु 'पुनानः सोम' इत्यादिषु रौरवं तावद्विदधाति—

ऐडेन बृहतीमारभन्ते ॥ १४ ॥

ऐडेन इडानिधनेन रौरवेण साम्ना बृहतीच्छन्द आरभन्ते गृह्णन्ति॥१४॥

अथ तत्प्रशंसति—

पशवो वा इडा पशवो बृहती पशुष्वेव तत्पशून्दधाति ॥ १५ ॥

'इडेरन्ते' इत्यादि गोपर्य्यायेष्विडायाः पशुरूपत्वात्। 'इडा वैमानवी घृतपदी' 'इडायास्त्वापदे' 'इडायास्पदं घृतवत्' इत्यादिषु गोरूपेण स्तुतेरिडेति पशवः खलु। बृहत्यपि 'अयम्मध्यमो बृहती' इत्युक्तत्वादन्तरिक्षस्थानीया। अन्तरिक्षे पशवः सञ्चरन्तीति पशव इत्युच्यते। शिष्टं स्पष्टम्॥१५॥

अथ बृहतीष्वेव यौधाजयं विधित्सुस्तां स्तौति—

बृहत्यां भूयिष्ठानि सामानि भवन्ति ॥ १६ ॥

एकाहीनसत्रेषु माध्यन्दिने पवमाने बृहत्यां हि भूयिष्ठानि सामानि भवन्ति। अतो भूयिष्ठवीर्या बृहती॥ १६ ॥

इदानीं बृहतीषु यौधाजयं विदधाति—

तत्रापि त्रिणिधनम्(१) ॥ १७ ॥

---

(१) त्रिनिधनमिति दन्यमध्यः पाठः पुस्तकान्तरे वर्त्तते।

तेषु भूयिष्ठवीर्येषु सामसु त्रिणिधनं निधनत्रयोपेतं यौधाजयं ज्योतिष्टोमे द्वितीयं भवतीति तद्विधिरवगन्तव्यः। ननु पूर्वं 'गायत्रं निधनवदनिधनम्'इत्यत्र यौधाजयस्यानिधनशब्देन व्यवहारः। इदानीन्तु त्रिणिधनमित्युच्यते। अतो व्याहतमिति? नैतदस्ति। पूर्वं यौधाजयं वहिर्निधनाभावादनिधनमित्युक्तम्। इह तु 'षासी'त्येकं निधनं१'दासी'त्यपरं २ 'ष्या या' ३ इत्युत्तममिति निधनत्रयसद्भावात्त्रिणिधनमित्युक्तम्॥१७॥

अथ तत् प्रशंसति—

अबलिष्ठ इव वा अयम्मध्यमो लोकस्तस्यैव तदायतनं क्रियते ॥ १८ ॥

मध्यमोऽन्तरिक्षलोकोऽबलिष्ठ इव वै। अन्यन्तमप्रबल इव प्रतिभातीतरलोकद्वयवदनाश्रयत्वात्। तस्यैवाबलिष्ठस्यैवान्तरिक्षस्य तत्तदानीं यदा यौधाजये त्रिणिधनं प्रयुज्यते तदाऽयतनं क्रियते कृतं भवति। कैश्चिद्वरिष्ठ इवेत्यभिधीयते ॥ १८ ॥

तदेव पुनः प्रशंसति—

त्रिणिधनं भवति त्रीणि सवनानां छिद्राणि तानि तेनापिधीयन्ते ॥ १९ ॥

"कतमानि च्छिद्राणीति? पवमानदेवतास्तुतयस्तानि च्छिद्राणि। अथाप्यन्तरेण पवमानमावृत्तीनि च हविर्भिः प्रचरन्ति तानि च्छिद्राणीति" अयमर्थः पवमानव्यतिरिक्तानि स्तोत्राणि यजनीयदेवतास्तुतिरूपाणि। नैवम्। पवमान इति त्रयः पवमानाः सवनानां छिद्राणि। 'अथाप्यन्तरेण पवमान'मित्यादिना प्रकारान्तरेण सवनच्छिद्राण्युच्यन्ते। तस्यायमर्थः। आवृत्तिस्तोत्राणि निरन्तरा भवन्ति। पवमानेभ्यः परं पुरस्तादावृत्तिस्तोत्रेभ्यो हविर्भिः प्रचरन्ति। यया सवनीयैः पुरोडाशैर्द्विदेवत्यैर्ग्रहैः सवनीयमुखीयैर्ऋतुयाजैरिति प्रातःसवने चरन्ति। दधिघर्म्मोपांशुपुरोडाशेन पुरोडाशैः सवनमुखीयैर्म्मरुत्वद्ग्रहेणेति माध्यन्दिने। पशवङ्गैः सवनमुखीयैः पुरोडाशैः सवनमुखीयैः सावित्रग्रहेण सौम्यचरुणा पत्नीवद्ग्रहेणेति तृतीयसवन इत्येवमपिसवनच्छिद्राणीति ॥१९॥

प्रकारान्तरेण स्तौति—

त्रिणिधनं भवति अय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति ॥ २० ॥

स्पष्टोऽर्थः ॥ २० ॥

उक्तन्त्रिणिधनं प्रतिष्ठाहेतुरिति तद्व्यतिरेकेणाप्रतिष्ठितत्वसंकीर्त्तनेन प्रशंसति—

त्रिणिधनं भवत्येतेन वै माध्यन्दिनꣳसवनं प्रतिष्ठितं यत्त्रिणिधनं यात्रिणिधनन्न स्यादप्रतिष्ठितम्माध्यन्दिनꣳसवनꣳस्यात् ॥ २१ ॥

त्रिणिधनं प्रतिष्ठाहेतुरिति पूर्वमुक्तम् । शिष्टं सुज्ञानम् ॥ २१ ॥

इदानीं निधनगताक्षरसंख्ययापि स्तौति—

द्व्यक्षराणि निधनानि भवन्ति द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति ॥ २२ ॥

निधनेष्वक्षरद्वयं यजमानोऽपि द्विपात् । उभयोरपि प्रतिष्ठारूपत्वान्निधनप्रयोगेण यजमानमेव यज्ञे पशुषु च प्रतिष्ठापयति ॥ २२ ॥

तदेव रौरवयोधाजये उक्त्वौशनमाह—

अनिधनमन्ततो भवति स्वर्गस्य लोकस्यानतिपादाय ॥२३॥

अनिधनन्निधनहीनमौशनमन्ततो भवति । तच्च स्वर्गस्य लौकस्यानतिपादायानाशाय भवति । न कदाचिद्यजमानं स्वर्गाय युञ्जत इत्यर्थः ॥२३॥

व्यतिरेके बाधमाह—

यन्निधनवत्स्याद्यजमानꣳ स्वर्गाल्लोकान्निर्हन्यात्॥२४॥

अन्ततो यदि निधनवत्साम भवेत् स्वर्गाल्लोकान्निर्हन्यात् । निधनं हि प्रतिष्ठा प्रतिष्ठायामतीव पश्वन्नाद्यसमृद्धिः । अतः क्रतुफलेन स्वर्गं प्राप्तोऽप्यन्ततो निधनप्रयोगात् प्रतिष्ठा । पश्वन्नाद्यर्थं स्वर्गादिकमेव लोकं यजमानः पुनरागच्छेदित्यभिप्रायः ॥ २४ ॥

अनिधनमन्ततो भवतीत्युक्तमनिधनमौशनमनुवदति स्तुत्यर्थम्—

स्वारं भवति ॥ २५ ॥

अन्त्यस्वरेण स्वरितेन यत्सामाप्यते तत्स्वारम् । सर्वत्र तावत् चत्वार एव सामान्ताः। स्वारो निधनामिडावागिति । अत्रान्त्यमक्षरं स्वरयित्वा समापितं 'हाई'कारश्च । द्वयमपि रूढ्या स्वर इति व्यपदिश्यते । अत्र हाईकारप्रसंगादुक्तार्थनिश्चयः ॥ २५ ॥

स्वरं प्रशंसति—

स्वरेण वै देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्रयच्छति ॥ २६ ॥

अन्ततो मन्त्राणां स्वाहान्ते स्वरितभूते देवेभ्योऽन्नाद्यं हविः प्रदीयते। तत्तस्मात्तेन स्वरप्रयोगेण देवेभ्योऽन्ततः सामान्तेऽन्नाद्यं प्रयच्छति दत्तवान् भवति ॥ २६ ॥

माध्यन्दिनपवमानगतानामाद्यन्तसामनी स्तोतुमनुवदति—

गायत्रं पुरस्ताद्भवति स्वारमन्ततः ॥ २७ ॥

स्पष्टोऽर्थः ॥ २७ ॥

अथ स्तौति—

प्राणो वै गायत्रं प्राणः स्वरः प्राणानेव तदुभयतो दधाति तस्मादुभयतः प्राणाः पशवः ॥ २८ ॥

गायत्रस्य प्राणरूपत्वम्। गायत्र्याः प्राथम्येन मुखजन्यत्वेन तद्रूपत्वं पूर्वमेवोक्तम्। स्वरस्यापि प्राणनिरोधमन्तरेणानुत्पत्तेः प्राणत्वम्। तत्तेन प्राणानेवोभयत आद्यन्तयोर्युपर्यधश्च दधाति। तस्मात्पशव उभयतः प्राणा उपर्य्यूर्ध्ववृत्तिः प्राणोऽधस्तादधोवृत्तिरपान इत्युभयतः प्राणाः पशवः ॥ २८ ॥

पुनः प्रशंसति—

यद्गायत्रं पुरस्ताद्भवति स्वारमन्ततः प्राणैरेव प्रैत्यपाने प्रतितिष्ठति ॥ २९ ॥

पुरस्ताद्गायत्रस्य करणात्पुरोगमनहेतुना प्राणेन प्रैति प्रगच्छति। अन्तःप्रतिष्ठायां स्वरस्य करणात्प्रतिष्ठाहेतुनापानेन प्रतितिष्ठति ॥ २९ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तमाध्यायस्य
तृतीयः खण्डः।

अथ चतुर्थः खण्डः।

अथास्मिन् खण्डे बृहत्याख्यं मध्यमं छन्दः स्तूयते। आदौ तावत्स्वर्ग्यत्वेन दक्षिणा योज्येति प्रशंसति—

एतद्वै यज्ञस्य स्वर्ग्यं यन्माध्यन्दिनꣳ सवनम्माध्यन्दिनस्य पवमानः पवमानस्य बृहती यद्बृहत्याः

स्तोत्रे दक्षिणा दीयन्ते स्वर्गस्यैव तल्लोकस्यायतने दीयन्ते ॥ १ ॥

माध्यन्दिनं सवनं यदस्तीयतद्वै-एतदेव यज्ञस्यावयवेषु मध्ये स्वर्ग्यम् । यद्येवं तन्माध्यदिनसवनस्यावयवेषु मध्ये माध्यन्दिनः पवमानः स्वर्ग्यः । तद्वच्छन्दसां मध्ये बृहती स्वर्ग्या । तथा सति यद्यदि बृहत्याः स्तोत्रे रौरवयौधाजययोर्गानसमये दक्षिणा दीयन्ते यजमानैः । सिद्धमन्यत् । अनेन माध्यन्दिनपवमानस्य मध्ये दक्षिणा दातव्येत्युक्तम्। तच्चासन्नेषु नाराशंसेषु दक्षिणा दातव्येत्यनेन सह विकल्प्यते । यद्वा बृहत्याः स्तोत्रे निवृत्ते दक्षिणा देयेति व्याख्येयम् । यथोक्तेन सह विरोधो न भवति ॥ १ ॥

अथ प्रकारान्तरेण तां प्रशंसति—

देवा वै च्छन्दाꣳस्यब्रुवन्युष्माभिः स्वर्गं लोकमयामेति ते गायत्रीं प्रायुञ्जत तया न व्याप्नुवꣳस्त्रिष्टुभं प्रायुञ्जत तया न व्याप्नुवञ्जगतीं प्रायुञ्जत तया न व्याप्नुवन्ननुष्टुभं प्रायुञ्जत तयाऽल्पकादि न व्याप्नुवꣳस्त आसान्दिशाꣳ रसान्प्रबृह्य चत्वार्यक्षराण्युपादधुः सा बृहत्यभवत्तयेमाँल्लोकान् व्याप्नुवन् ॥ २ ॥

ते देवा गायत्रीं प्रायुञ्जत लोकव्याप्त्यर्थं प्रयुक्तवन्तः । तया न व्याप्नुवन् लोकान् । एवं त्रिष्टुभं जगतीं च प्रयुज्य ताभ्यां न व्याप्नुवन् । ततोऽनुष्टुभं प्रायुञ्जत तयाऽल्पकादि न देशान् व्याप्नुवन् । ते पश्चादस्यामेव वीर्यमाधाय व्याप्नुयामेति बुद्ध्वा-आसाम्मुख्यदिशां रसान् प्रबृह्योद्धृत्य चत्वार्यक्षराणि कृत्वा अनुष्टुभ्युपादधुः । सा ऽक्षरचतुष्टयोपेताऽनुष्टुब्बृहत्यभवत् । तयेमान् भूरादिलोकान् व्याप्नुवन् ॥२॥

अथ बृहत्या बृहत्त्वमुक्तव्याप्तिप्रवृत्तिनिमित्तकमित्याह—

बृहती मर्त्या ययेमाँल्लोकान् व्यापामेति तद्बृहत्या बृहत्त्वम् ॥ ३ ॥

हे मर्त्या मर्त्या बृहत्येषा ययेमान् लोकान् व्यापाम व्याप्ताः स्मेति । तस्माद्बृहत्या बृहत्त्वं महत्त्वम् ॥ ३ ॥

पशुरूपाक्षरचतुष्टयसम्बन्धादपि बृहती स्वस्तोत्रे दक्षिणायोग्येत्याह—

पशून्वा अस्यान्तानुपादधुः पशवो वै बृहती यद्-

बृहत्याः स्तोत्रे दक्षिणा दीयन्ते स्व एव तदायतने दीयन्ते ॥ ४ ॥

तान् तानि दिशां सारभूतानि चत्वार्यक्षराणि पशून् वै पशुरूपाण्येवास्यां बृहत्यां येनाक्षरोपाधानेन बृहती भवति तस्यामुपादधुः । तस्माद्बृहती पशव एव । तस्याः स्तोत्रे दक्षिणादानं स्वकीय एवायतने दत्तं स्यात् ॥ ४ ॥

अथ बृहतीत्वं प्रश्नप्रतिवचनरूपेण प्रशंसति—

यन्निवत्याद्धुरन्यानि च्छन्दाꣳसि त्वर्षीयाꣳसि कस्माद्बृहत्युच्यत इत्येषा हीमाँल्लोकान् व्याप्नोन्नान्यच्छन्दः किञ्चन यानि सप्त चतुरुत्तराणि च्छन्दाꣳसि तानि बृहतीमभिसम्पद्यन्ते तस्माद्बृहत्युच्यते ॥ ५ ॥

अन्यानि पङ्क्तिप्रभृतीनि च्छन्दांसि वर्षीयांसि चतुरुत्तराणि बह्वक्षराणि तानि परित्यज्य कथमेषा बृहत्युच्यते ? इति यथा ब्रह्मवादिन आहुस्तत्रेदमुत्तरम् । एषेत्यादि तच्च स्पष्टम् । किञ्चैतानि सप्तचतुरुत्तराणि गायत्र्यादीनि जगत्यन्तानि च्छन्दांसि सन्ति तानि बृहतीमभिसम्पद्यन्ते । कथं ? उच्यते । एका गायत्री जगती चैका तयोरक्षराणि मिलित्वा द्वासप्ततिर्भवन्ति । तानि द्वेधाविभागे सति षट्त्रिंशदक्षरात्मिके द्वे बृहत्यौ भवतः । एवमुष्णिक् त्रिष्टुभौ द्वे बृहत्यौ तथानुष्टुप्पङ्क्ती द्वे बृहत्यौ स्वयञ्च बृहतीति । एवं सर्वाण्यपि च्छन्दांसि बृहतीमभिसम्पद्यन्तेऽतो बृहतीत्युच्यत इति प्रशंसा ॥ ५ ॥

अथ माध्यन्दिने बृहत्यस्तित्वविषये ब्रह्मवादिन आक्षेपमवतारयति—

यन्निवत्याद्धुर्गायत्रं प्रातःसवनं त्रैष्टुभम्माध्यन्दिनꣳसवनञागतं तृतीयसवनङ्कस्माद्बृहत्या मध्यन्दिने स्तुवन्तीति ॥ ६ ॥

स्पष्टोऽर्थः ॥ ६ ॥

तस्योत्तरमाह—

बहिष्पवमानेन वै देवा आदित्यꣳ स्वर्गं लोकमहरन् स नाध्रियत तं बृहत्या मध्यन्दिने स्तभ्नुवꣳस्तस्माद्बृहत्या मध्यन्दिने स्तुवन्त्यादित्यꣳ ह्येषा मध्यन्दिने दाधार ॥ ७ ॥

पूर्वं देवा बहिष्पवमानेनादित्यं स्वर्गं लोकमहरन्नगमयन्। स नाधीयत तेन पवमानेन तत्र धृतो नाभूत्। तस्मध्यन्दिने पवमाने बृहत्याः स्तोत्रेण स्तम्नुवन्नधः प्रच्युतितः स्तम्भितवन्तः। यस्मादेवन्तस्मान्मध्यन्दिने स्तुवन्ति। हि यस्मादेषा मध्यन्दिने दाधारादित्यमित्येतदुत्तरम्। एतावता बृहत्या मध्यन्दिने प्रसङ्गमुक्तम् ॥ ७ ॥

कथं माध्यन्दिनसवनस्य त्रैष्टुभत्वप्राप्तिरिति तत्प्रकारमाह—

यैरु कैश्च च्छन्दोभिर्म्मध्यन्दिने स्तुवन्ति तानि त्रिष्टुभमभि सम्पद्यन्ते तस्मात्त्रिष्टुभो नयन्ति माध्यन्दिनात्सवनात् ॥ ८ ॥

उशब्दोऽप्यर्थे। यैः कैश्चापि च्छन्दोभिर्म्मध्यन्दिने सवने माध्यन्दिनपवमाने पृष्ठेषु चतुर्षु स्तुवन्ति तानि त्रिष्टुभो न गच्छन्ति। समवेतानि च्छन्दांसि त्रिष्टुभमभि सम्पद्यन्ते। तस्मान्माध्यन्दिनात्सवनात्त्रिष्टुभः सकाशान्नयन्ति। त्रिष्टुप्सम्पत्तिप्रकारं छन्दसामित्युन्नेतव्यम्। कथम्माध्यन्दिने पवमाने 'उद्धात' इति गायत्रे तृचे गायत्रामहीयवे द्वे सामनी गातव्ये तदर्थं तृचस्य द्विरावृत्त्या षट् गायत्र्यो भवन्ति। तथा मैत्रावरुणे पृष्ठे 'कया न' इति गायत्रतृचोत्पन्ने वामदेव्यसप्तदशस्तोमत्वात् सप्तदश गायत्र्यस्ताः संयताश्चयोविंशतिगायत्र्यो भवन्ति। पुनश्च 'पवमाने पुनान' इति बार्हते तृचे रौरवयौधाजयसामद्वयार्थं द्विरावृत्तेः षट् बृहत्यो भवन्ति। तथा होतुः पृष्ठे 'अभित्वा शूर' इति प्रगाथे ककुबुत्तराकारं गानात्प्रथमे पर्य्याये प्रथमविष्टावात्तिस्रो बृहत्यः। इतरयोः पर्य्याययोरेकैकेति मिलित्वा पञ्च बृहत्यः शिष्टा द्वादशककुभः स्युः। यद्वा रथन्तरमकृत्वा 'त्वामिद्धि' इति बृहत्सामपक्षेऽपि पञ्चैव बृहत्यो द्वादश ककुभः स्युः। तथा ब्राह्मणाच्छंसिनः पृष्ठेऽपि 'तच्चोदस्मम्' इति प्रगाथे नौधसः प्रयोगे सप्तदशस्तोमत्वात् सप्तदश बृहत्यः। एवमच्छावाकपृष्ठे 'तरोभिः' इति प्रगाथे कालेये सप्तदशबृहत्य इति द्वयोर्मेलने चतुस्त्रिंशद्भवन्ति पूर्वोक्तैः षड्भिः पञ्चभिश्च मिलित्वा सर्वाः पञ्चचत्वारिंशद्बृहत्यः। पूर्वोक्तरथन्तरबृहतोरन्यतरस्मिन्प्रयोगेऽवशिष्टा द्वादश ककुभस्त्रयोविंशतिषु गायत्रीषु मध्ये चतसृभिर्गायत्रीभिर्मिलित्वा द्वादश बृहत्यो भवन्ति। तन्मेलनमेवं स्यात एकैकस्याः ककुभोऽष्टाविंशत्यक्षराणि गायत्र्याश्चैकस्मिन् पादे अष्टावक्षराणि तानि मिलित्वा षड्विंशदक्षरैरेका बृहती सम्पद्यत एवं द्वादश बृहत्योऽपि योजनीयाः। तदेवं पञ्चचत्वारिंशद्बृहतीभिः सप्तपञ्चाशद्बृहत्यो भवन्ति। एता अवशिष्टैकोनविं-

शतिर्गायत्रीणां सप्तपञ्चाशत्पादैर्मिलित्वा तावत्संख्याकास्त्रिष्टुभः स्युः । 'पवमाने प्रतुद्रव'इति तृचेऽशने तिस्रःसिद्धास्तिस्रस्त्रिष्टुभ इति माध्यन्दिनसवनगतानि सर्वाणि च्छन्दांसीत्यष्टषष्टिस्त्रिष्टुभो भवन्ति ।अयं त्रिष्टुप्सम्पत्तिप्रकारो भगवता कात्यायनेनोपग्रन्थे दर्शितः । तद्यथा 'यैरु कैश्च च्छन्दोभिरिति षष्टिस्त्रिष्टुभ आसां सिद्धिस्त्रयोविंशतिर्गायत्र्यः पञ्चचत्वारिंशतं बृहत्यो द्वादश ककुभश्चतसृभिर्गायत्रीभिस्ता बृहत्यस्ताः सप्तपञ्चाशतं तावन्त्यक्षराणि गायत्र्यस्तैस्त्रिष्टुभस्त्रिष्वास्वौशने इति' इति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तमाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अस्मिन् खण्डे गायत्रव्यतिरिक्तानि चत्वारि सामानि स्तूयन्ते क्रमेण तत्रादावामहीयवं स्तौति—

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स शोचन्नमहीयमानोऽतिष्ठत्स एतदामहीयवमपश्यत्तेनेमाः प्रजा असृजत ताः सृष्टा अमहीयन्त यदमहीयन्त तस्मादामहीयवम् ॥ १ ॥

पूर्वं प्रजापतिरेकाकी सन्नकामयत 'बहु स्यां प्रजायेय' इति । स तस्यामवस्थायां स्वव्यतिरिक्तस्य कस्यचिदभावादमहीयमानोऽपूज्यमानः शोचन्नतिष्ठत् । स प्रजोत्पत्युपायत्वेनैतदामहीयवन्नाम सामापश्यत् । तेन प्रयुक्तेन साम्नेमा देवमनुष्यादिरूपाः प्रजा असृजत ताः सृष्टाः प्रजा अमहीयन्त अपूज्यन्त स्वाभिः प्रजाभिः । यदमहीयन्त येन साम्ना सृष्टास्तस्मादामहीयवमिति शब्दसामान्येन स्तुतिः । अमहीयुना प्रजापतिना दृष्टत्वात् आमहीयवमिति तन्नाम सम्पन्नमित्यर्थः॥१॥

अथोक्तसाम्नः 'स्तौषे' इति निधनं प्रजापतेः श्रैष्ठ्यसाधनत्वेन प्रशंसति—

ता अस्मात्सृष्टा अपाक्रामꣳस्तासान्दिवि सदृभूम्याददे इति प्राणानादत्त ता एनं प्राणेष्वात्तेषु पुनरुपावर्त्तन्त तास्य उग्रꣳशर्म्म महिश्रव इति पुनः प्राणान् प्रायच्छत्ता अस्मादुदेवायोधꣳस्तासाꣳ स्तौष इति

मन्यूनवाइटणात्ततो वै तस्मै ताः श्रैष्ठ्यायातिष्ठन्त ॥२॥

ताः सृष्टाः प्रजा अस्मात् स्रष्टुः सकाशादपाक्रामन्नपागच्छन् । स प्रजापतिस्तासामपगतानां प्राणान् 'दिविसद्' इति पादेनादत्त-आत्तवान् । ताः स्वीयेषु प्राणेषु चक्षुरादिष्वात्तेषु प्रजापतिना स्वीकृतेषु पुनरेनमुपावर्त्तन्तोपागमन्। ताभ्यः उपावृत्ताभ्यः 'उग्रश्शर्म्म' इति पादेन पुनः प्राणान् प्रायच्छत् । ता लब्धप्राणा अस्मात्पूर्वं प्राणापहारात्कारणादुदयोधन्नेवोन्मुखा एवायुध्यन्त। केचित् 'अस्मा'इति पठन्ति। अस्मा एनं प्रजापतिमुद्दिश्येत्यस्यार्थः । स प्रजापतिरेषां प्राणापहारजन्योमन्युः सञ्जात इति बुध्वा 'स्तौष' इति स्तुतिप्रकाशेन निधनेन तासाम्मन्यूनवाशृणान्निकृष्य हिंसितवान् । ततः खलु कारणान्मन्यूपगमादस्मै प्रजापतये श्रैष्ठ्यायातिष्ठन्त समजानत ॥ २ ॥

अथ विदुषः फलमाह—

तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एवँ ञ्वेद ॥ ३ ॥

स्पष्टोऽर्थः ॥ ३ ॥

पुनस्तदेव प्रशंसति—

प्रजानाञ्च वा एषा सृष्टिः पापवसीयश्च ञ्विधृतिर्यदामहीयवम् ॥ ४ ॥

यदेतदामहीयवमिति तदेषां प्रजानाञ्च सृष्टिर्वै सृष्टिकर्तृसृष्टिसाधनभूता च । सृष्टेः स्त्रीलिङ्गमपेक्ष्यैषेति साम्नः स्त्रीलिङ्गनिर्देशः । किञ्चामहीयवमेव पापवसीयसञ्च पापस्य पुण्यस्य च विधृतिर्विधरणी विवेचनीत्यर्थः ॥ ४ ॥

अथ विदुषः फलम्—

ञ्विधृतिः पापवसीयसो भवति य एवँ ञ्वेद ॥ ५ ॥

स्पष्टम् ॥ ५ ॥

एवमामहीयवं प्रशस्य रौरवयौधाजययौशनानि प्रशंसितुमाख्यायिकामाह—

देवा वै यशस्कामाः सत्रमासतागिनरिन्द्रो ञ्वायुर्मखस्तेऽब्रुवन्यन्नो यशऽऋच्छात्नः सहासदिति तेषाम्मखं यश आर्च्छत्तादादायापाक्रामत्तदस्य प्रासहादित्सन्त तं पर्य्यायतन्त स्वधनुः प्रतिष्टभ्यातिष्ठत्तस्य धनुरार्त्निरूर्द्धा पतित्वा शिरोऽच्छिनत्स प्रवर्ग्योऽभवद्यज्ञो वै मखो यत्

प्रवर्ग्यं प्रवृञ्जन्ति यज्ञस्यैव तच्छिरः प्रतिदधति ॥ ६ ॥

पूर्वमग्न्यादयश्चत्वारो देवा यशोऽर्थं सत्रमासत तस्मिन् समये ते देवा एवमब्रुवन्। यद्यशो नोऽस्माकमध्ये प्रथमं ऋच्छात् प्राप्नुयात्तद्यशो नोऽस्माकं सह साधारणमसद्भवत्विति समयं कृत्वा सत्रमासत। तेषामध्ये मखो दैवं यश आर्च्छत् प्राप्नोत्। स तद्यश आदायापाक्रामत्। अस्यापगतस्य तद्यशः प्रासहा प्रसहेन बलात्कारेणादित्सन्त तदर्थन्तं पर्य्ययतन्त परितोऽयुध्यन्। स धन्वी धनुः प्रतिष्टभ्य शिर आततज्यं कृत्वाऽतिष्ठत्। तस्य धनुर्ज्या वल्मीका भूमावुत्पतिता अखादन्त। ततो धनुरार्त्निर्धनुषः कोटिरूर्ध्वा पतित्वा तस्य मखस्य शिरोऽच्छिनत्। उपदीकानां धनुर्ज्याच्छेदः शाखान्तरतोऽवगन्तव्यः। तथाहि तैत्तिरीयकं 'स धनुः प्रतिष्टभ्यातिष्ठत्ता उपदीका अब्रुवन्वरं वृणीमहा अथ वरमिमं रन्धयाम यत्र क्व च स्वानान्तदपोऽभितृणदामेति तस्मादुपदीका यत्र क्व च स्वनन्ति तदपोऽभिवृन्दन्ति वरे वृते ह्यासां तस्य ज्यामप्यादँस्तस्य धनुर्विप्रमाणं शिर उदवर्त्तयत्' इति। स तच्छिरः प्रवर्ग्योऽभवत्। यज्ञो वै मख उच्यते यत् प्रवर्ग्यं प्रवृञ्जन्ति यजमानस्य तत्तेन यज्ञस्य च्छिन्नं शिरः प्रतिदधति। स तत् कुर्वन्त्येतत् प्रासङ्गिकम्। अयमर्थः सर्वोऽप्यध्वर्युब्राह्मणे स्पष्टमाम्नायते 'देवा वै सत्रमासत ऋद्धिपरिमितं यशस्कामास्तेऽब्रुवन्यन्नः प्रथमं यश ऋच्छात् सर्व्वेषाम्नस्तत्सहासत्' इत्यादिना ॥ ६ ॥

अथ रौरवं स्तूयते।

तद्देवा यशो व्यभजन्त तस्याग्नी रौरवं प्राबृहत॥७॥

तद्यशो देवा व्यभजन्त तस्याग्नी रौरवं प्राबृहतेति। तद्यशो देवा व्यभजन्त तस्य विभक्तस्य रौरवं भागं अग्निः पृथक् चकार ॥ ७ ॥

एतावता किं यशो लब्धमित्यत आह—

तद्वै स पशुवीर्य्यं प्राबृहत पशवो वै रौरवम् ॥ ८ ॥

तत्तेन रौरवविभागेनैव सोऽग्निः पशुवीर्य्यं पशुलक्षणं सामर्थ्यमेव प्राबृहत। तदपि कुत ? इत्याह रौरवं साम पशवः खलु तत्र पशुवाचकेऽनिधनोपेतत्वादित्यभिप्रायः ॥ ८ ॥

पशुमान् भवति य एवँ वेद ॥ ९ ॥

विदुषः स्तुतिः ॥ ९ ॥

अथ रौरवस्याग्निसम्बन्धं दर्शयति—

अग्निर्वै रूरस्तस्यैतद्रौरवम् ॥ १० ॥

रूरू इति शब्दायमानो दहतीति रूरोऽग्निस्तत्सम्बन्धाद्रौरवं साम ॥ १० ॥

प्रकारान्तरेण रौरवसंज्ञां विब्रुवन् स्तौति—

असुरा वै देवान् पर्य्ययतन्त तत एतावग्नी रूरौ विष्वञ्चौ स्तोभावपश्यत्ताभ्यामेनान् प्रत्यौषत्तो प्रत्युष्यमाणा अरवन्त यदरवन्त तस्माद्रौरवम् ॥ ११ ॥

पूर्वं हि देवानसुराः पर्य्ययतन्त परितोऽयुध्यन्त । ततोऽग्नेरेतौ रूरौ विष्वञ्चौ सर्वतो व्याप्तौ 'ऊहो ३ 'ऊवाऽण्यया औ ३ होवा'इति द्वौ स्तोभावपश्यत्ताभ्यामेनान्प्रत्यौषददहत् । ते प्रत्युष्यमाणा अरवन्त शब्दमकुर्वन् । यदरवन्त तत्तस्माद्रौरवन्नाम सम्पन्नम् । रूरूरवयोरुभयत्र रेफसाम्याद्रूरसम्बन्धाद्रवसम्बन्धाच्च रौरवमिति नाम भवति ॥ ११ ॥

इन्द्रस्य यौधाजयाख्ययशःसम्बन्धमाह—

अथेन्द्रो यौधाजयं प्राबृहत तद्वै स वज्रꣳ प्राबृहत वज्रो वै यौधाजयम् ॥ १२ ॥

अथेत्यानन्तर्य्यार्थे । इन्द्रो यौधाजयं यौध्यान् अजयत । वज्रभावकल्पनमेवं वज्रस्यैव परिकुर्वन्निस्तेन तत्कार्य्यसिद्धेर्यौधाजयस्य वज्रकारणत्वमेव वज्रं वाक् इत्येनेनोच्यते ॥ १२ ॥

अथ विदुषः फलमाह—

वज्रं भातृव्याय प्रहरति य एवꣳ वेद ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

अथ निर्वचनद्वारा तदेव प्रशंसति ।

इन्द्रो वै युधाजित्तस्यैतद्यौधाजयम् ॥ १४ ॥

युधा युद्धेन शत्रून् जयतीतीन्द्र एव युधाजित् तस्य सम्बन्धि तत् साम यौधाजयम् ॥ १४ ॥

अथ निर्वचनान्तरप्रदर्शनेन प्रशंसति—

युधा मर्य्या अजैष्मेति तस्माद्यौधाजयम् ॥ १५ ॥

हे मर्य्या मर्त्याः, युधा अजैष्म असुरानितीन्द्रोऽब्रवीदिति शेषः । तस्माद्युधाजस्य हेतुत्वात् यौधाजयमिति नाम सम्पन्नमिति स्तुतिः ॥१५॥

अथ वायोरौशनसम्बन्धमाह—

अथ वायुरौशनं प्राबृहत ॥ १६ ॥

स्पष्टम् ॥ १६ ॥

औशनस्वीकार एव प्राणाख्यवीर्य्यस्वीकार इत्याह—

तद्वै स प्राणवीर्य्यं प्रावृहत प्राणा वा औशनम् ॥ १७ ॥

औशनसामभागपृथक्करण एव प्राणाख्यस्य वीर्य्यस्य पृथक्कारः। तत्र हेतुः, औशनं साम प्राणाः खलु तस्मिन् स्वरनिधनसद्भावात् स्वरस्य प्राणनिरोधमन्तरेणोच्चारणानुपपत्तेः ॥ १७ ॥

विदुषः स्तुतिः—

सर्व्वमायुरेति य एवं व्वेद ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

औशनसंज्ञानिर्व्वक्ति—

व्वायुर्व्वा उशनꣳस्तस्यैतदौशनम् ॥ १९ ॥

उशन् वशकान्तावित्यस्य कर्म्मणि रूपम्। काम्यते सर्व्वैःप्राणरूपत्वेनेत्युशन्वायुरेव तस्य सम्बन्धित्वादौशनामिति साम्नो नाम सम्पन्नम्॥१९

उशन् सम्बन्धादौशनमित्युक्त्वोशनसः सम्बन्धादौशनमाह—

उशना वै काव्योऽसुराणां पुरोहित आसीत्तं देवाः कामदुघाभिरुपामन्त्रयन्त तस्मा एतान्यौशनानि प्रायच्छन् कामदुघा वा औशनानि ॥ २० ॥

पूर्वं मुशनानाम कवेः पुत्रोऽसुराणां विरोचनादीनां पुरोहित आसीत्तं देवाः कामदुघाभिर्गोभिरुपामन्त्रयन्त। कथन्ताभिरनुमन्त्रणमन्तत्राह। अस्मा उशनस एतान्यौशनानि सामानि कामधेनुसदृशानि प्रायच्छन्। तेषां कामधुक्त्वप्रसिद्धिरुच्यते 'कामदुघा'इत्यादिना ॥२०॥

अथ विदुषः स्तुतिः—

कामदुघा एनमुपतिष्ठन्ते य एवं व्वेद ॥ २१ ॥

य एवं जानाति-एनं कामदुघा गाव उपतिष्ठन्ते समीपं प्राप्नुवन्ति दोहनशीलबहुगोयुक्तो भवतीत्यर्थः ॥ ३१ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तमाध्यायस्य पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

एवं माध्यन्दिनं पवमानमुक्त्वा बृहद्रथन्तरं विवक्षुः प्रजापतेर्मनसि बृहतः प्रादुर्भावमाह—

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स तूष्णीं

मनसा ध्यायत्तस्य यन्मनस्यासीत्तद्बृहत्समभवत् ॥१॥

बहुभावाय प्रकर्षोत्पत्तिं कामयमानः स प्रजापतिस्तूष्णीमिर्व्यापारम्मनसाऽन्येन यदचिन्तयत्तस्य ध्यातुर्मनसि यदासीत्तद्बृहत्साम समभवत् सम्भूतं सामत्वेन परिणतमित्यर्थः ॥ १ ॥

अथान्तःस्थितगर्भस्य प्रजननार्थं प्रजापतेर्ध्यानमाह—

स आदधीत गर्भो वै मेऽयमन्तर्हितस्तं वाचा प्रजनया इति ॥ २ ॥

स प्रजापतिरादधीत आध्यायत्। ध्यानप्रकार उच्यते मेऽन्तरयं गर्भो निहितस्तं खलु गर्भं वाचा साधनेन प्रजननायोत्पादयामीति ॥ २ ॥

अथ वाक्सृष्टिमाह—

स वाचं व्यसृजत सा वाग्रथन्तरमन्वपद्यत ॥ ३ ॥

स ध्यायन् प्रजापतिर्वाचं व्यसृजत सा च सृष्टा वाक् रथन्तरमनु रथन्तरसामानुसृज्य पश्चादपद्यतागच्छदुत्पन्नाऽऽसीत् ॥ ३ ॥

अथ वाक्सम्बन्धेन रथन्तरशब्दनिर्वक्ति—

रथम्मर्य्याः क्षेप्लातारीदिति तद्रथन्तरस्य रथन्तरत्वम् ॥४॥

हेमर्य्या मर्त्याः, रथन्तरवद्देवानां वाहनभूतां वाचामिदं साम क्षेप्लाक्षितभावेनातारीदागच्छदितीन्द्रोऽब्रवीत्। तत्तेन रथन्तरस्य रथन्तरत्वमायातम्। इन्द्रस्योक्तप्रकारकवचनमेव तच्छब्दप्रवृत्तिनिमित्तभूतमित्यर्थः ॥ ४ ॥

अथ बृहत उत्पत्तिं सनिर्वचनान्दर्शयति—

ततो बृहदनु प्राजायत बृहन्मर्य्या इदꣳ स ज्योगन्तरभूदिति तद्बृहतो बृहत्त्वम् ॥ ५ ॥

ततो रथन्तरसृष्टेरनु पश्चाद् बृहत्साम प्राजायत। स इति लिङ्गव्यत्ययः। तदिदं बृहत्साम हे मर्य्या ज्योक् चिरकालं रथन्तरोत्पत्त्यनन्तरकालपर्य्यन्तमतः प्रजापतेर्मनस्यभूत् स्थितमासीदिति यदिन्द्रोऽब्रवीत् तद्बृहत्साम्नो बृहत्त्वं सम्पन्नम् ॥ ५ ॥

अथ बृहत्प्रजापतेर्ज्येष्ठपुत्रत्वेन प्रशंसति—

यथा वै पुत्रो ज्येष्ठ एवं बृहत्प्रजापतेः ॥ ६ ॥

यथा ज्येष्ठपुत्रो मनुष्याणामेवं बृहत्प्रजापतेर्ज्येष्ठपुत्रस्थानीयं भवति६॥

ननु रथन्तरात्पश्चाद् बृहदुत्पन्नं कथं ज्येष्ठपुत्रत्वमस्येति तत्राह—

ज्येष्ठब्राह्मणं वा एतत् ॥ ७ ॥

ज्येष्ठं प्रथमं ब्राह्मणं यस्य बृहत एतत् ज्येष्ठब्राह्मणम्। तथाहि रथन्तरसृष्टिप्रकाशकात्स वाचं व्यसृजत सा वाग्रथन्तरमन्वपद्यत तद्रथन्तरं मर्य्या इत्यादिकाद् ब्राह्मणात्प्रथमं बृहत्सामप्रकाशकं तस्य यन्मनस्यासीत्तद्बृहत् समभवदिति ब्राह्मणं पूर्वभावित्वाज्ज्येष्ठम्। अतः पश्चादुत्पन्नस्यापि बृहतो रथन्तरादपि ज्येष्ठपुत्रत्वं युक्तम् ॥ ७ ॥

अथ विदुषः फलम्—

प्रज्यैष्ठ्यमाप्नोति य एवँ वेद ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

एवं बृहतो ज्येष्ठत्वं सिद्धं कथं रथन्तरस्य पूर्वप्रयोगप्राप्तिरिति कश्चिद् ब्रह्मवादिनां प्रश्नमवतारयति—

यन्निवत्याहुर्बृहत्पूर्वं प्रजापतौ समभवत्कस्माद्रथन्तरं पूर्वं योगमानश इति ॥ ९ ॥

यद्यदि नु-अथ-इति-एवं वक्ष्यमाणप्रकारेणाहुर्ब्रह्मवादिनः। इति शब्दनिर्दिष्टमर्थं विवृणोति। बृहत्साम पूर्वं प्रजापतौ सम्भूतम्। कस्मात्कारणाद्रथन्तरं सामोभयसामसु अहःसु पृष्ठषडहादिषु सर्वेषु पृष्ठ्येषु पूर्वं योगमानश इति प्रयोगं प्राप्नोति ॥ ९ ॥

तस्य परिहारमाह—

बृहदेव पूर्वमँ समभवद्रथन्तरन्तु पूर्वमँसृष्ट्यासृजत तस्मात्पूर्वं योगमानशे ॥ १० ॥

यद्यपि बृहदेव पूर्वं प्रजापतेर्मनसि समभवत्। न पितुर्विशेषोऽस्ति रथन्तरं पूर्वं सृष्ट्या उत्पत्त्या असृजत सृष्टमभूत्। तस्मादिति तस्यैवोपसंहारः ॥ १० ॥

अथ ज्योगामयाविनः प्रयोग उभेऽपि कार्य्य इति विवक्षुराह—

तयोः समानन्निधनमासीत्तस्मिन्नातिष्ठेतान्त आजिमैतां तयोर्हासिति बृहत्प्राणमुदजयदसिति रथन्तरमपानमभिसमवेष्टत ॥ ११ ॥

पूर्वं द्वयोर्बृहद्रथन्तरयोः समानं निधनमासीत्। तस्मिन्नेकस्मिन्निधने नातिष्ठेतां न समजानताम्। ममैवेदम् ममैवेदमिति कलहमकुरुताम्। तदर्थन्त आजिं संग्रामं समेतां समगच्छतम्। तयोर्मध्ये बृहत् स्वेन निधनेन 'हस्' इत्यनेन प्राणमुदजयत् जितवत्। रथन्तरन्तु स्वेन-

'अस्' इतिनिधनेनापानमनन्तरमभिसमवेष्टत समावृणोत्। अनेनोभयत्रानुगतं सकारमेव पूर्वनिधनमुभयोरासीदिति मन्तव्यम् ॥ ११ ॥

ज्योगामयाविने ते उभे विदधाति—

प्राणापानौ वै बृहद्रथन्तरे ज्योगामयाविन उभे कुर्यादपक्रान्तौ वा एतस्य प्राणापानौ यस्य ज्योगामयति प्राणापानावेवास्मिन्दधाति ॥ १२ ॥

'हस्'इति निधनस्य प्राणमुदजयद्धेतुत्वात्तन्निधनं बृहत्सामापि प्राण एव। अपानसंवेष्टनहेतुत्वात्'अस्'इति निधनस्य तद्युक्तं रथन्तरमपानम्। तथा सति यस्य ज्योगामयति तस्य प्राणापानावपक्रान्तौ खलु। अतस्तस्य प्रयोग उभे बृहद्रथन्तरे कुर्यात्। तेनास्मिन् रोगिणि प्राणापानावेव दधाति पुनः स्थापयति। माध्यन्दिने पवमाने बृहतीषु रथन्तरं कार्यं बृहत्सामपृष्ठं कार्यमिति तयोर्व्यवस्था ॥ १२ ॥

अथ बृहद्रथन्तरप्रसङ्गात्तद्विषयं कञ्चित्प्रश्नमुपाक्षिपति—

यन्निवत्याहुरुभे बृहद्रथन्तरे बहिर्निधने कस्माद् बृहद्बहिर्निधनानि भजतेऽन्तर्निधनानि रथन्तरमिति॥१३॥

हस् अस्' इति बृहद्रथन्तरयोरुभयोर्बहिर्निधनत्वात् कथं? बाह्येष्वहःसु ह्यैतादीनि बहिर्निधनानि प्रयुज्यन्ते रथन्तरेष्वन्तर्निधनानि प्रयुज्यन्ते ॥ १३ ॥

रथन्तरेष्वन्तर्निधनानि नौधसादीनि यदि विरुद्धमित्याक्षेपेयुस्तेषामुत्तरम्—

प्राणो बृहत्तस्माद्बहिर्निधनानि भजते बहिर्हि प्राणोऽपानो रथन्तरं तस्मादन्तर्निधनानि भजतेऽन्तर्ह्यपानः ॥ १४ ॥

बृहतः प्राणरूपत्वाद्बहिर्निधनभाक्त्वं युक्तन्तत्र हेत्वभिधानं 'बहिर्हि प्राण' इति रथन्तरं त्वपान एव तस्मादन्तर्वर्त्यपानरूपत्वादन्तर्निधनभाक्त्वम्। तस्मादित्यस्य विवरणमन्तर्ह्यपान इति ॥ १४ ॥

निधनवैषम्ये हेत्वन्तरमाह—

महावृक्षौ वै बृहद्रथन्तरे निधनेन समर्ध्ये ॥१५॥

बह्वाश्रयत्वाद्बृहद्रथन्तरे महावृक्षत्वेन निरूप्येते। अतस्ते निधनेन विषमेण समर्ध्ये सङ्गमयितव्ये ॥ १५ ॥

निधनसाम्ये दोषमाह—

यद्वै महावृक्षौ समृच्छेते बहु तत्र विभग्नं प्रभग्नꣳ शेते ॥ १६ ॥

यद्यत्र खलु महावृक्षौ समृच्छेते। तत्र बहुशाखास्वङ्गादिकं परस्परसंघर्षणाद्विभग्नं प्रभग्नं च सङ्गच्छेते भूमौ वैषम्ये तु नोक्तदोष इत्यर्थः॥१६॥

अथ बृहद्रथन्तरयोरन्यतरप्रयोगेऽप्यन्तरस्यापि फलसिद्धैतयोर्द्वयोर्माहात्म्यं मनसा ज्ञातव्यमित्याह—

एरं वै बृहदैडꣳरथन्तरम्मनो वै बृहद्ग्रथन्तरꣳ साम वै बृहद्ग्रथन्तरं प्राणो वै बृहदपानो रथन्तरमसौ वै लोको बृहदयꣳरथन्तरमेतानि मनसान्वीक्ष्योद्गाये त्कल्पाभ्यामेवाभ्यामुद्गायति ॥ १७ ॥

यद्बृहत्सामतदैरं वै'इरा-अन्नं तत्सम्बन्धि तत्साधनमित्यर्थः। यद्रथन्तरन्तदैडं वै पशुसाधनं खलु शिष्टं सुज्ञानम्। एतानीरादिरूपाण्येतेयोः सम्बन्धीनि मनसाऽन्वीक्ष्य सम्भाव्य पश्चादेते उद्गायेत्।एवं कुर्वन्नुद्गाताऽन्यतरप्रयोगेऽपि कल्पाभ्यां प्रयुक्ताभ्यामुभाभ्यामुद्गायति। उभयोरुद्गाने यत् फलन्तदन्यतरेणापि लभत इत्यर्थः। एतेषां मनसान्वीक्षणस्यान्यतरप्रयोगेऽपि कर्त्तव्यत्वं सूत्रकारोऽप्याह 'बृहता रथन्तरेण वा स्तोष्यमाणः प्राक् स्तोमयोगाद्दश व्याहृतीर्मनसा ध्यायेदैरमैडमिती'ति ॥ १७ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तमाध्यायस्य
षष्ठः खण्डः।

अथ सप्तमः खण्डः।

बृहद्रथन्तरयोः स्तुतिप्रकारं समुच्चित्य दर्शयति—

पशवो वै बृहद्रथन्तरे अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौत्यष्टाशफाꣳस्तत्पशूनवरुन्धे ॥ १ ॥

बृहद्रथन्तरे उभे अपि पशवो वै तयोरनुष्ठानात् सिद्धेः। अत उभयोः प्रथमाया ऋचः 'अभित्वा'त्वामिद्धि' इत्यनयोर्ऋचोरित्यर्थः। अष्टाक्षरेणादितोऽष्टाक्षरैः प्रस्तौति प्रस्तावभागं गायेत्। 'अष्टाक्षरसंख्या ऋगक्षरसंख्या ऋगक्षरमात्रविषया न स्तोभादिविशिष्टविषया 'अभित्वाशूरनोनुमो वा' इति रथन्तरे 'औ हो ई त्वामिद्धि हवामहा३ए' इति बृहती-

ति विभागसंज्ञेनाष्टाक्षरप्रस्तावेनाष्टाशफान् पशून् प्राप्नोति यजमानः॥१॥

अथोत्तरयोर्ऋचोः प्रस्तावभागमाह—

द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति ॥ २ ॥

रथन्तरस्योत्तरयोर्ऋचोः 'ईशानमस्य जगतः 'न जातो न जनिष्यते' इत्यनयोर्ऋचोः 'ईशो वा न जीवे'ति द्व्यक्षरेण प्रस्तावभागं गायेत्। तथा च बृहति 'औ हाई तु वा३मे औहाई महा३ ए' इति द्व्यक्षरेण प्रस्तौति। द्व्यक्षरस्योक्ताष्टाक्षरं मिलित्वा प्रशस्यते। यजमानोऽपि द्विपात्तमेव यज्ञे यज्ञफलभूतेषु पशुषु प्रतिष्ठापयति प्रस्तोता ॥ २ ॥

अथ प्रस्तावमुक्त्वा रथन्तरस्य प्रतिहारभागनियममाह—

पञ्चाक्षरेण रथन्तरस्य प्रतिहरति पाङ्क्तः पशवः पाङ्क्तानेव पशून्वरुन्धे ॥ ३ ॥

आ ईशानमा२३ ईन्द्रा३'इति प्रथमायां 'न जातो ना२ ३ जा३' इति मध्यमायां 'गव्यन्नस्त्वा२ ३हा३'इत्युत्तमायामिति रथन्तरस्य तिसृष्वपि प्रतिहारनियमात्तत्तेन पञ्चाक्षरप्रतिहारेण पाङ्क्तानवयवगतपञ्चसंख्यायोगेन पाङ्क्तसम्बन्धान् पशूनवरुन्धे यजमानः। रोमाणि त्वङ्मांसास्थिमज्जेति पशूनां पञ्चावयवाश्चत्वारः पादा आत्मा चेति वा॥ ३ ॥

अथ बृहतः प्रतिहारभागमाह—

चतुरक्षरेण बृहतः प्रतिहरति चतुष्पदस्तत्पशूनवरुन्धे ॥ ४ ॥

बृहतः प्रथमायां 'त्वां काष्ठा ४ औ होवा'इति। मध्यमायां'महस्तवा ३४ औहो वा'इति। उत्तमायां 'सत्रावाजा ३४ औहो वा'इति ॥ ४ ॥

अथ बृहद्रथन्तरयोः ककुबुत्तरा गानं विदधाति—

न वै बृहन्न रथन्तरमेकञ्छन्दो यच्छक्तितः ककुभावुत्तरे उपादधुस्तस्मादबृहती प्रथमा ककुभावुत्तरे तस्मादबृहद्रथन्तरे एकर्चेन कुर्वन्ति न हि ते एकञ्छन्दोऽयच्छत् ॥ ५ ॥

बार्हते प्रगाथे बृहद्रथन्तरे गीयेते तत्र पूर्वा बृहत्युत्तरा विष्टारपाङ्क्तिः। एवञ्च सत्युक्तप्रगाथे एकां बृहतीं द्वे ककुभे च सम्पादयितुमाह। बृहत्साम रथन्तरं वा एकं छन्दो न खल्वयच्छत्–नियन्तुन्न श-

क्रोत्। ततः कारणादुत्तरे ऋचौ ककुभौ सम्पाद्योपादधुः पूर्वे ऋचः। यद्यस्मादेवन्तस्मादिदानीन्तनैरपि बृहती प्रथमा कार्या ककुभावुत्तरे। तत्प्रकार एवं, बृहती तत एव सिद्धा तस्याश्चतुर्थं पादं पुनरावर्त्य विष्टारपंक्त्योश्च पादद्वयं मिलित्वा एकाङ्ककुभङ्कुर्य्यात्। तस्या एव द्वितीयपादं पुनरावर्त्यावशिष्टपादद्वयेनान्याङ्ककुभामिति। तस्मादेव बृहदथन्तरे एकर्क्षेनैकच्छन्दस्केन कुर्वन्ति। तस्मादित्युक्तविवरणम् ॥ ५ ॥

'न हि त' इत्यादि बृहद्रात्रे कञ्चिद्विशेषमाह—

नव बृहतो रोहान् रोहति नव प्राणाः प्राणानेवावरुन्धे ॥ ६ ॥

बृहतः साम्नो नव रोहानारोहणान्युच्छ्रायानारोहत्यारोहत् प्राणानां नवत्वमसकृदुक्तं सङ्ख्यासाम्यात्। नव प्राणान् यजमान आत्मनि तद्दधाति ॥ ६ ॥

अथ तृचे तान् विभज्य दर्शयति—

त्रीन् प्रथमायाꣳ रोहति भूतं भवद्भविष्यत्तानेवावरुन्धे त्रीन् मध्यमायाꣳ रोहत्यात्मानं प्रजां पशुꣳस्तानेवावरुन्धे त्रीनुत्तमायाꣳरोहति त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठति ॥ ७ ॥

प्रथमायामृचि त्रीन् रोहति द्वितीयायां तृतीयायाञ्च त्रीनिति नव रोहाः स्युः। प्रथमायां रोहत्रयेण भूतवर्त्तमानभविष्यत्कालीना भोगाः सन्ति तानेव यजमानोऽवरुन्धे। शिष्टं सुज्ञानम् ॥ ७ ॥

उक्तार्थवेदनपूर्वकारोहणफलमाह—

सर्व्वान् कामानवरुन्धे य एवं विद्वान् बृहतो रोहान्रोहति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

रथन्तरे उद्गातृप्रस्तोतृभागयोर्म्मध्ये व्यवधानायोद्गातुः कञ्चिद्व्यवधानं विधत्ते—

वज्रेण वा एतत्प्रस्तोतोद्गातारमभिप्रवर्त्तयति यद्रथन्तरं प्रस्तौति समुद्रमन्तर्द्धायोद्गायेद्वागित्यादेयं वाग्वै समुद्रः समुद्रमेवान्तर्दधात्यहिꣳसायै ॥ ९ ॥

प्रस्तोता रथन्तरन्तत्प्रस्तावभागं प्रस्तौतीति यत्? एतद्वज्रेणैव-

प्रस्तोतोद्गाताच प्रवर्त्तयति प्रेरयति । अतस्तत्परिहाराय समुद्रमन्तर्द्धाय व्यवधायोद्गायेदुद्गाता । समुद्रस्यान्तर्धातुमशक्यत्वात्तदुपाय उच्यते वागिति । वागेवेदमित्यादेयं मनस्याधानं कर्त्तव्यं ध्यातव्यमित्यर्थः । वाचः समुद्रस्य च कः प्रसङ्ग ? इत्यत्राह यः समुद्रः सवाग्वै । समुद्रवत् सर्वपदार्थानां स्वान्तर्निधानाद्वाक् समुद्र इत्युच्यते । तथा च वाङ्निधानेन समुद्रमेवान्तर्निहितवान् भवत्यहिंसायै ॥ ९ ॥

अथोक्तदोषपरिहाराय तत्र कञ्चिद्विशेषमाह—

बलवद्गेयं वज्रमेवं प्रवृत्तं प्रत्युद्गृह्णाति ॥ १० ॥

बलवदिति स्पष्टाक्षरमुद्गात्रा गातव्यम् । तथा सत्यस्य दौर्बल्याभावात्प्रस्तावरूपं वज्त्रमेवोद्गृह्णात्यूर्द्धमेव स्तभ्नाति ॥ १० ॥

तत्रैवोपायान्तरमाह—

बलवला कुर्व्वता गेयमभिलोभयतेव वज्रमेवाभिलोभयति ॥ ११ ॥

बलवला कुर्व्वता गेयं स्तोभवता गेयमभिलोभयता—इवेति । अभिलोभनं हिंसनं वज्रमभिलोभयामीति ध्यायता गेयमित्यर्थः । तथा सति वज्रमेवाभिलोभयति हिनस्ति ॥ ११ ॥

रथन्तरगाने नियमविशेषमाह—

क्षिप्रङ्गेयꣳ स्वर्गस्य लोकस्य समष्टयै ॥ १२ ॥

क्षिप्रमविलम्बेन गातव्यम् । तच्च स्वर्गस्याविलम्बेन समष्टयै सप्राप्त्यै भवति ॥ १२ ॥

अत्रैव नियमविशेषमाह—

देवरथो वै रथन्तरमक्षरेणाक्षरेण प्रतिष्ठापयतोद्गेयमरेणारेण हि रथः प्रतितिष्ठति ॥ १३ ॥

रथन्तरं साम देवानां वै रथः । तदक्षरेणाक्षरेण प्रतिष्ठापयतोद्गेयम् । हि यस्माद्रथः अरेणारेण रथाङ्गस्य शङ्कवो नेम्याधारभूता अराः प्रत्यरं हि रथः प्रतितिष्ठति ॥ १३ ॥

अथ तस्य भूस्पर्शगानं विधत्ते—

यो वै देवरथमनन्वालभ्यातिष्ठत्यवास्मात्पद्यत इयं वै देवरथ इमामालभ्योद्गायेन्नास्मादवपद्यते ॥ १४ ॥

यो हि देवरथं रथन्तरमनन्वालभ्यालम्भनं स्पर्शनमकृत्वा आतिष्ठत्यारोहति सोऽस्माद्देवरथादवपद्यतेऽधःपतति । यथा लौकिकरथमन-

वलम्ब्यारोहन्नवपद्यते तद्वत् । अतस्तदवलम्बनस्य क उपाय ? इत्युच्यते । इयं पृथिव्येव हि देवरथः । इयं वै लोको रथन्तर'मित्युक्तत्वात्तस्मादिमामालम्ब्योद्गेयम् ॥ १४ ॥

पुनस्तत्रैव कंचिन्नियममाह—

ईश्वरंवै रथन्तरमुद्गातुश्चक्षुः प्रमथितोः प्रस्तूयमाने सम्मीलेत्स्वर्दृशं प्रतिवीक्षेत नैनश्चक्षुर्जहाति ॥ १५ ॥

रथन्तरं साम स्तूयमानमुद्गातुश्चक्षुः प्रमथितोः प्रमथितुमीश्वरं वै समर्थं खलु । अतस्तस्मिन् प्रस्तूयमाने चक्षुः सम्मीलेन्मुकुलितं कुर्य्यात् । पुनः स्वर्दृशं स्वर्दृशमिति पदं गीयमानं प्रतिवीक्षेतावलोकयेत् । एवं सत्येनमुद्गातारं चक्षुर्न जहाति नान्धो भवति ॥ १५ ॥

रथन्तराश्रयभूतायामृच्यध्ययनप्राप्तं 'तस्थुष' इति पदं निन्दित्वा प्रकारान्तरेण पठितव्यमित्याह—

प्रजननं वै रथन्तरं यत्तस्थुष इत्याहास्थायुकोद्गातुर्वाग्भवत्यपि प्रजननꣳ हन्त्यस्थुष इति वक्तव्यꣳसुस्थुष इति वा स्थायुकोद्गातुर्वाग्भवति न प्रजननमपि हन्ति ॥ १६ ॥

रथन्तरं साम प्रजननस्यापत्याद्युत्पादनस्य हेतुत्वात् स्वयमपि प्रजननमेव । तथा च यद्यदि तस्थुष इत्याहोद्गाता न हि तस्य वाग्ग्रन्थन्तरात्मिका स्थायुका स्थितिस्वभावा भवति न प्रसृता । अत एव प्रजननमुद्गातुः प्रजाद्युत्पादनसामर्थ्यमपिहन्ति । कथं तस्य परिहार ? इति तत्राह । अस्थुष इति वक्तव्यन्तथोक्ते वाचामस्थायुकदोषः परिहृतो भवति । अथवा सुस्थुष इति वक्तव्यं तेनास्य रथन्तररूपाया वाचः शोभनस्थायुकत्वं भवति प्रजननमपि नापिहन्ति । अयमभिप्रायः अस्थुष इत्युक्तेरुद्गातू रथन्तररूपा वाक् प्रसृता भवति । रथन्तरगानस्य फलरूपं प्रजननमपि न हन्ति । सुस्थुष इत्युक्तौ सुशब्दश्रवणात् प्रजननक्षयाभावेन सुप्रजननं भवति ॥ १६ ॥

अथ रथन्तरगानात्पूर्वं 'व्यस्ते गोषु' इत्ययं मन्त्रो जप्तव्य इति विधित्सुराह—

पृष्ठानि वा असृज्यन्त तैर्देवाः स्वर्गꣳ लोकमायꣳस्तेषाꣳ रथन्तरम्महिम्ना नाशक्नोदुत्पतत् ॥ १७ ॥

पूर्वे देवा रथन्तरादीनि षट् पृष्ठानि सृष्ट्वा रथन्तरव्यतिरिक्तै-

रितरैः प्रयुक्तैः सह स्वर्गं लोकमायन् । तेषां मध्ये रथन्तरपृष्ठं महिम्ना प्रवृद्धेन माहात्म्येन निमित्तेन तत्र तत्र विप्रकीर्णत्वेनेत्यर्थः । तेनोत्पतदपि रथन्तरं स्वर्गं गन्तुं नाशक्नोत् ॥ १७ ॥

इदानीं स्वर्गसाधनत्वेन विदधाति—

तस्य वशिष्ठो महिम्नो विनिधाय तेन स्तुत्वा स्वर्गं लोकमैत्तान् संभृत्योद्गायेत् ॥ ॥ १८ ॥

तस्य रथन्तरस्य महिम्नो माहात्म्यानि विप्रकीर्णानि विनिधाय विशेषेणैकत्र स्थाप्य तेन स्तुत्वा वशिष्ठः स्वर्गं लोकमैदगच्छत् । तस्मात्तन्महिम्नः संभृत्योद्गेयमितरैरपि ॥ १८ ॥

अथ गातव्यं संभृतमहिमानमन्त्रन्दर्शयति ।

यस्ते गोषु महिमा यस्ते अप्सु रथे वा ते स्तनयित्नौ य उ ते यस्ते अग्नौ महिमा तेन सम्भव रथन्तर द्रविणवन्न एधि ॥ १९ ॥

अस्यायमर्थः' हे रथन्तर यो यो महिमा ते तव सम्बन्धी गवादिषु अग्न्यन्तेषु विप्रकीर्णो वर्त्तते तेन सर्वेण सम्भव समर्ध्यितं प्रवृद्धं भव । तथा भूतं सत् द्रविणवत् बहुद्रविणोपेतं सन्नोऽस्मदर्थमेधि भव समागच्छ वा ॥ १९ ॥

इति ताण्डयमहाब्राह्मणे सप्तमाध्यास्य सप्तमः खण्डः ।

अथाष्टमः खण्डः ।

अथाष्टमनवमयोर्वामदेव्यं स्तूयते तत्रादौ निर्वचनद्वारा तत्प्रशंसति—

अपो वा ऋत्व्यमार्च्छत्तासां व्वायुः पृष्ठे व्यवर्त्तत ततो व्वसु व्वामꣳसमभवत्तस्मिन् मित्रावरुणौ पर्य्यपश्यतां तावब्रूतां व्वामं मर्य्या इदं देवेष्वाजानीति तस्मा व्वामदेव्यम् ॥ १ ॥

ऋत्व्यमृतुसंबन्धि प्रजननसामर्थ्यमप उदकानि खल्वार्च्छदगच्छत् । तासां प्राप्तार्त्वियानामपां वायुः पृष्ठे देशे व्यवर्त्तत-अनुप्रवृत्तोऽभूत् । ततोद्भ्यः सकाशात् वामं वननीयं वसु धनं समभवत् । तत्सम्भूतं धनं मित्रावरुणौ पर्य्यपश्यतां दृष्टवन्तौ दृष्ट्वा च तावब्रूताम् । किमिति ?

उच्यते। हे मर्त्या वाममिदं धनं सामलक्षणं देवेष्वाजनि उदभूदिति तस्मादेवं ताभ्यामुक्तत्वाद्वामदेव्यमिति तन्नाम सम्पन्नम्॥ १॥

अथोत्पन्नं वामदेव्यं सर्वदेवतासम्बन्धद्वारेण प्रशंसति—

तत्परिगृह्णन्तावब्रूतामिदमविदावेदन्नौमाभ्यर्त्तिद्वमिति तत्प्रजापतिरब्रवीन्मद्वा एतदद्ध्यजनि मम वा एतादिति तदग्निरब्रवीन्मा वा एतदन्नमजनि मम वा एतादिति तादिन्द्रोऽब्रवीच्छ्रेष्ठस्था वा एतदहं वः श्रेष्ठोऽस्मि मम वा एतादिति तद्विश्वे देवा अब्रुवन्नस्मद्देवत्यं वा एतद्यदद्ध्योऽधि समभूदस्माकं वा एतादिति तत्प्रजापतिरब्रवीत्सर्वेषान्न इदमस्तु सर्वं इदमुपजीवामेति तत्पृष्ठेषु न्यदधुः सर्वदेवत्यं वै ह्वामदेव्यम्॥२॥

तद्वसु परिगृह्णन्तौ मित्रावरुणावब्रूतामिदं वस्वविदाव। आवां लब्धवन्तौ स्व अत इदं नौ—आवाभ्यामेव। अतो हे देवा अभ्यर्त्तिद्वं नो अतिबाधध्वमित्यब्रूताम्। एवमुक्ते तद्वसु प्रजापतिरब्रवीत्। एतद्वसु मदधि मत्तोऽजनि प्रादुरभूत्। अतो ममैव खल्वेतदिति। तदेव धनं प्रत्यग्निरेवाब्रवीदेतद्वसु मामनु खल्वजनि। 'अग्नेरपि' इति श्रुतेरग्न्यनन्तरमाप उत्पन्नास्ताभ्योऽस्योत्पन्नत्वादित्यभिप्रायः। ममैवैतादिति तथा तद्धनमिन्द्रोऽब्रवीदेतद्धनं श्रेष्ठस्था वै श्रेष्ठे तिष्ठतीति श्रेष्ठस्थाः। तिष्ठतेः 'सर्वधातुभ्योऽसुन्नि'त्यसुन् प्रत्ययो व्यत्ययेन पुल्लिङ्गता। श्रेष्ठविषयं ह्येतद्वामदेव्यम्। अहञ्च वो युष्माकमध्ये श्रेष्ठोऽस्मि—अतो ममैवैतादिति। तदेव धनं विश्वे देवा अपां सर्वदेवत्यत्वात् तत्रोत्पन्नं धनमस्मद्देवत्यम्। अतोऽस्माकमेवेत्युक्तवान्। एवं वसुविषयं विवदमानेषु सत्सु प्रजाप्रतिरब्रवीत्। इदं धनन्नः सर्वेषामस्तु। अतः सर्वमिदं धनमुपजीवामेति। एवमुक्ते तद्वामदेव्यं धनं पृष्ठेषु रथन्तरादिषु न्यदधुर्देवाः। अत इदं वामदेव्यं सर्वदेवत्यं वै॥ २॥

एतदेव विभज्य दर्शयितुमादौ प्रजापतेर्भागं दर्शयति।

यत्कवतीषु तेन प्राजापत्यं को हि प्रजापतिर्यदनिरुक्तासु तेन प्राजापत्यमनिरुक्तो हि प्रजापतिः॥ ३॥

यत् कवतीषु कशब्दोपेतासु 'कया न' इत्यादिषु तिसृषु गायति तेन तत्साम प्राजापत्यम्। उक्तस्यैव समर्थनं कोहीति। यः प्रजापतिः स

को हि कश्शब्दवाच्यः खलु कोऽहं स्यामिति 'को ह वै नाम प्रजापति'रिति तैत्तिरीयकम् । तथाऽनिरुक्तास्वस्पष्टदेवताविशेषासूक्तास्वेवर्क्षु गीयते । अतोऽप्येतत्प्राजापत्यं तत् समर्थितम् । अनिरुक्तो हिप्रजापतिरनिरुक्तत्वं सर्व्वरूपत्वेनावशिष्टविशेषरूपत्वाभिप्रायम् ॥ ३ ॥

अग्नेर्भागं दर्शयति ।

यद्गायत्रीषु तेनाग्नेयं गायत्रच्छन्दा ह्यग्निः ॥ ४ ॥

यत् 'कयान' इत्यादिषु गायत्रीषु गीयते तेन तदाग्नेयं भवति॥ ४ ॥

यत् पृष्ठेषु न्यदधुस्तेनैन्द्रꣳ सर्व्वाणि हि पृष्ठानीन्द्रस्य निष्केवल्यानि ॥ ५ ॥

यद्यस्माद्रामदेव्यं पृष्ठेषु न्यदधुस्तेनैतदैन्द्रं भवति । कुत ? इत्याह सर्व्वाणि हि पृष्ठानि चत्वारीन्द्रस्य निष्केवल्यान्यसाधारणानि ॥ ५ ॥

अथास्य मित्रावरुणयोर्भागमाह ।

यन्मैत्रावरुणोऽनुशꣳसति तेन मैत्रावरुणम् ॥६॥

यद्यस्मान्मैत्रावरुणदैवत्यशस्त्रे वामदेव्यमनुशंसति तेन मैत्रावरुणमिति 'तेन वामदेव्यमग्नेर्गायत्र्यभवदिति' श्रुतेः ॥ ६ ॥

अथेन्द्रस्य भागं दर्शयत्यथैतस्य वैश्वदेवत्वमाह—

यद्बहुदेवत्यमुत्तमं पदं तेन वैश्वदेवं सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥ ७ ॥

यद्यस्मादुत्तमं पदं वामदेव्यतृचस्यान्तिमं 'शतं भवा स्यूतये' इत्येतत्पदं बहुदेवत्यन्तेन तद्वैश्वदेवमित्थमुक्तरीत्या सर्वेष्वेवरूपेषु सर्वदेवतासम्बन्धिषु प्रतितिष्ठति प्रतिष्ठितं भवति ॥ ७ ॥

अथ वामदेव्याद्रथन्तरादिसृष्टिं विवक्षुस्तत्साधनत्वेन वामदेव्ययोनिभूतां गायत्रीमुपदिशन्नाह—

प्रजापतिर्व्वा एतां गायत्रीं योनिमपश्यत्स आदीधीतास्माद्योनेः पृष्ठानि सृजा इति ॥ ८ ॥

प्रजापतिः खल्वेतां 'कयान' इतीमां गायत्रीं योनिं वामदेव्यस्य योनिभूतामपश्यत् । दृष्ट्वा च स प्रजापतिरादीधीताध्यायत् । किमिति? अस्माद्गायत्रीरूपाद्योनेः पृष्ठानि षडपि सृजै इति सृजानीति ॥ ८ ॥

अथोक्तसाधनाद्रथन्तरसृष्टिमाह—

स रथन्तरमसृजत तद्रथस्य घोषोऽन्वसृज्यत ॥ ९ ॥

स प्रजापतिर्गायत्रीभ्य उत्पन्नाद्वामदेव्याद्वा रथन्तरं पृष्ठं प्रथममसृजत। तत् पृष्ठमनु रथस्य घोषोऽन्वसृज्यत। नचानर्थकोऽयं रथघोषः सृष्ट्युपन्यास इति मन्तव्यं सप्रयोजनत्वात्। तथा हि रथन्तरमनुसृत्योत्पन्नत्वात्पृष्ठस्य प्रथमेऽहनि रथन्तरं रथघोषेणोपाकुर्वन्ति। वामदेव्ययोने रथन्तरपृष्ठोत्पत्तिप्रकार इत्थं ज्ञातव्यः। रथन्तरस्य बार्हतप्रकार इत्थं ज्ञातव्यः। रथन्तरस्य बार्हतप्रगोथो योनिस्तत्र प्रथमायां त्रयो गायत्र्याः पादा एकश्च जागतः। द्वितीयायां विष्टारपङ्क्तौ द्वौ गायत्रौ पादौ द्वौ च जागतौ। अतो वामदेव्याधारायामृचि गायत्रीपादसद्भावाद्गायत्र्यामुत्पन्नमित्युच्यते। साम्नः साम्नोत्पत्तिपक्षेऽपि स्तोत्रियद्वारा पूर्वोक्त एव सम्बन्धः ॥ ९ ॥

अथ बृहद्वैरूपयोर्गायत्रीयोनेः सकाशात् सृष्टिमाह—

स बृहदसृजत तत्स्तनयित्नोर्घोषोऽन्वसृज्यत स व्वैरूपमसृजत तद्वा तस्य घोषोऽन्वसृज्यत ॥ १० ॥

बृहद्वैरूपयोरपि बार्हतप्रगाथाभ्यामेवोत्पत्तेस्तयोः पूर्ववद्गायत्रीपादसद्भावाद्गायत्र्या एवोत्पत्तिस्तनयित्नुघोषेण बृहतः स्तुत्यशक्यत्वात्तत्समानेन दुन्दुभिघोषेणोपाकरणम्। तथा वा तद्घोषस्य रूपानन्तरं सृष्टत्वादुपवाजयमाना वैरूपेण स्तुवीरन्नुपवाज्यमाना वा ॥ १० ॥

अथोक्तसाधनाद्वैराजसृष्टिमाह—

स व्वैराजमसृजत तदग्नेर्घोषोऽन्वसृज्यत ॥११॥

राजगानासम्भवादग्निमन्थनघोष एव तत्र घोषः। वैराजस्य गायत्रीसम्बन्ध एवं वैराजस्य प्रथमापि वा 'सोममिन्द्रमन्नू उत्व' इति त्रिंशदक्षरा उत्तरे त्रयस्त्रिंशदक्षरे' इति तृचस्य षण्णवत्यक्षराणि ताश्चतस्रो गायत्र्यः सम्पद्यन्ते। अतस्तस्य तत उत्पत्तिः ॥ ११ ॥

अथ ततः शाक्करसृष्टिमाह—

स शक्करीरसृजत तदपाङ्घोषोऽन्वसृज्यत ॥ १२ ॥

शक्वरीशब्दस्य स्त्रीलिङ्गत्वात्तच्छब्दपरामर्शाय शक्वरीसाध्यं पृष्ठं सामैवानु पश्चाद्वां घोष इति व्याख्येयम्। अपां घोषेण सह शाक्करस्योत्पन्नत्वात्तदाश्रयमहानाम्नीगानसाधिका अप उपानिदधुः। ध्वनिसम्बन्धस्तु यो यः साम गायति स स उदकघोषमातयतीत्येवं ज्ञातव्यः। गायत्र्या अस्योत्पत्त्युपचारः प्रायशो महानाम्नीषु उपसर्गाव्यतिरिक्तासु 'शिक्षाशचीना'मित्यादिषु गायत्रीपादानां प्रायशः सम्भवादुपपद्यते ॥ १२ ॥

अथ ततो रैवतात्पत्तिमाह।

स रेवतीरसृजत तदृगवां घोषोऽन्वसृज्यत ॥१३॥

नन्वत्र रेवतीनामेव सृष्टिराम्नायते। उत्तरं वारवन्तीयमेव वारवन्तीनां स्तोत्रीयासु विधास्यति। सूत्रकारेणापि वारवन्तीयस्य स्तोत्रे'धेनुः सम्भासयेयु'रित्याह? नैष दोषः। अत्र रेवतीवारवन्तीययोर्विकल्पमेके श्रुवते। अन्ये तु रेवतीशब्देन स्तोत्रीया उच्यन्त इत्याहुः। निदानञ्च 'षष्ठेऽहनि रेवतीषु वारवन्तीयं पृष्ठं भवती'ति रेवतीनां गायत्रीत्वात्ततो रैवतसृष्टिसम्बन्धः ॥ १३ ॥

उक्तमर्थं संग्रहेण दर्शयति—

एतैर्वा एतानि सह घोषैरसृज्यन्त ॥ १४ ॥

एतैर्वा उक्तैः खलु घोषै रथादिसम्बन्धिभिः सहैतानि रथन्तरादीन्यसृज्यन्तेति घोषाणां सह सृष्टिप्रयोजनं पूर्वमुक्तम् ॥ १४ ॥

उक्तार्थवेदनफलमाह—

सर्वेऽस्मिन् घोषाः सर्वाः पुण्या वाचो वदन्ति य एवं वेद ॥ १५ ॥

अस्मिन् वेदितरि-एनं विषयीकृत्येत्यर्थः। सर्वाः पुण्या इत्युक्तस्य विवरणं पुण्या वाच एनमुच्चरन्तीत्यर्थः ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे सप्तमाध्यायस्याष्टमः खण्डः।

अथ नवमः खण्डः।

अथोक्तसम्बन्धमपेक्ष्य पृष्ठानां वामदेव्यत्वेन तदेव प्रशंसति—

पिता वै वामदेव्यं पुत्राः पृष्ठानि ॥ १ ॥

स्पष्टम् ॥ १ ॥

कुत इति तदुपपादयति—

एतस्माद्वा एतानि योनेरसृज्यन्त ॥ २ ॥

एतस्माद्वामदेव्ययोनेः सकाशाद्भवत्येवम् ॥ २ ॥

किं तत इत्याह—

तस्मात् पृष्ठानाꣳस्तोत्रं वामदेव्येनानुष्टुवन्ति शान्त्यै ॥ ३ ॥

यस्मादेवन्तस्मात् षण्णामपि पृष्ठानां स्तोत्रं वामदेव्येन स्तुवन्ति। पृष्ठस्तोत्रवैगुण्यनिबन्धनायाशान्तेरपनयनाय ॥ ३ ॥

एवमपि शान्तिः कथमिति तत्राह—

यद्धि पुत्रोऽशान्तं चरति पिता तच्छमयति ॥ ४ ॥

एवं लोकसिद्धत्वात् स्पष्टम् ॥ ४ ॥

अथ वामदेव्यस्यान्तरिक्षस्थानीयत्वञ्चाह—

अयं वै लोको मध्यमो ऽवामदेव्यमेतस्माद्वा इमौ लोकौ विष्वञ्चावसृज्येतां बृहच्च रथन्तरञ्च ॥ ५ ॥

इदं वामदेव्यमयं मध्यमो लोकोऽन्तरिक्षं खल्वेतस्मादन्तरिक्षाद्विष्वञ्चावभितोऽतो विद्यमानावयं च भूर्लोकोऽसौ द्युलोकश्चासृज्येतां यद्बृहच्च रथन्तरं चास्ति ॥ ५ ॥

अस्त्वेवं त्रयाणां लोकत्रयात्मकत्वं कथमनेन वामदेव्यस्य स्तुतिरिति तत्राह—

यद्रथन्तरेण स्तुवन्ति ये रथन्तराः पशवोऽन्तरीक्षन्त उपश्रयन्ति यद्बृहता स्तुवन्ति ये बार्हताः पशवोऽन्तरीक्षन्त उपश्रयन्ति ते ऽवामदेव्यस्य स्तोत्रेणावरुद्धाः ॥६॥

यदि रथन्तरेण स्तुवन्ति ये राथन्तराः पशवः सन्ति ते सर्वेऽप्यन्तरिक्षमुपश्रयन्ति । एवं बृहत् स्तुत्यापि बार्हताश्च पशवोऽन्तरिक्षमेवोपश्रयन्ति। बृहद्रथन्तरयोरपि पशुहेतुत्वात्तदुभयफलभूताः पशवोऽप्यन्तरिक्षमेवोपश्रयन्त्येवमेकैकस्तोत्रप्रयोगे । वामदेव्यस्य स्तोत्रप्रयोगे तु उभयेऽपि पशवोऽवरुद्धाः स्युः। यद्वा यदुभयविधपशूनामन्तरिक्षाश्रयणं तदन्तरिक्षरूपवामदेव्यस्तुतिप्रसादाल्लभ्यमित्यर्थः ॥ ६ ॥

अथ वामदेव्यगाननियममाह—

ध्रुव आसीनो ऽवामदेव्येनोद्गायेत्पशूनामुपवृत्यै ॥७॥

ध्रुवो निश्चल आसीन उपविष्टः । नियमगानं पशूनां सञ्चरतां पुनरुपावर्त्तनाय भवति ॥ ७ ॥

अथ वेदितुः फलमाह—

उपैनं पशव आवर्त्तन्ते यएवँ ऽवेद ॥ ८ ॥

सुस्पष्टम् ॥ ८ ॥

अथ ध्रुव आसीनो गायेदित्युक्तमेव नियमं वाक्यद्वयेन प्रपञ्चयति—

अन्तरिक्षं वै ऽवामदेव्यमधून्वतेवोद्गेयमधूतामिवान्तरिक्षं पशवो वै ऽवामदेव्यमहिंसतेवोद्गेयं पशूना-

अहिंसायै ॥ ९ ॥

अधून्वतेव अङ्गान्यकम्पतेव । अहिंसतेव अङ्गान्यपीडतेव । सुष्ठान-मन्यत् ॥ ९ ॥

अथ वामदेव्यगाने प्रकारविशेषविषयं ब्रह्मवादिनः प्रभ्रान्तदुस्तर-ञ्चावतारयति—

कथमिव ख्वामदेव्यं गेयमित्याहुः ॥ १० ॥

वामदेव्यं कथं केन प्रकारेण गेयमित्यस्येत्याहुरित्यभिज्ञानामुत्तरम्॥१०॥

इतिशब्दोक्तेन प्रकारविशेषं दर्शयति—

यथांकुली पुत्रान् सन्दश्यासम्भिन्दती हरति यथा ख्वातोऽप्सु शनैर्ख्वाति ॥ ११ ॥

यथा—अंकुली मार्जारी स्वपुत्रान्सन्दश्यासम्भेदं कुर्व्वती हरति यथा वा वायुः पर्व्वताग्रादिवैलक्षण्येनाप्सु शनैर्वात्येवङ्गेयमिति ॥११॥

अथ नियमान्तरमाह—

स्वधून्वामदेव्यङ्गेयम् ॥ १२ ॥

अत्र धूरिति प्रकार उच्यते । स्वैवानन्यसाधारणी धुर्य्यसृतिः स्व-धूः । तथा वामदेव्यं गेयम् ॥ १२ ॥

अथोक्तप्रकारेण गानफलमाह—

यो वै स्वधून्वामदेव्यङ्गायति स्वधूर्भवति ॥ १३ ॥

अनन्याधीतो भवतीत्यर्थः ॥ १३ ॥

स्वधूरित्येतद्विवृणोति—

यात्यस्यान्यो नियानेन नान्यस्य नियानेन याति ॥१४॥

अस्योद्गातुर्नियानेन निगमनेन मार्गेणान्य उद्गाता याति नायमन्यस्य नियानेन मार्गेण याति ॥ १४ ॥

स्वधूर्गेयमित्युक्तं तद्विवृणोति—

न बृहतो न रथन्तरस्यानुरूपङ्गेयꣳ स्वेनैवायतनेन गेयमायतनवान् भवति ॥ १५ ॥

बृहतो रथन्तस्य न यदनुरूपमनुकूलन्तेनैव तन्न गेयम् । किन्तु वाम-देव्यस्य यत् स्वमायतनं नियता गीतिस्तस्यां गानमेवास्य रूपे स्थि-तिः । य एवं गायति सोऽथायतनवान् भवति । अथ वामदेव्यं स्वस्तो-त्रियाणामनिरुक्तत्वस्य पूर्वमुक्तत्वात् स्वयमप्यनिरुक्तं भवति ॥ १५ ॥

तद्रूपत्वं स्तोतुकाम आह—

देवा वै पशून् व्यभजन्त ते रुद्रमन्तरायꣳस्तान्वा-मदेव्यस्य स्तोत्र उपेक्षते ॥ १६ ॥

पूर्वं देवाः प्रजापतिना सृष्टान् पशून् व्यभजन्त परस्परं विभाग-मकुर्वन्। ते विभजमाना विभागात् रुद्रमन्तरायन्नन्तरितवन्तः। तान् वामदेव्यस्य स्तोत्रे क्रियमाणानुपेक्षते-उपेत्य पश्यति। पशून् घातु-कामो रुद्रः ॥ १६ ॥

उक्तदोषपरिहाराय तस्यानिरुक्तत्वमाह—

अनिरुक्तङ्ग्रेयम् ॥ १७ ॥

तस्मादिदानीन्तनैरप्यनिरुक्तं देवतायाः फलस्य वा कस्य चिन्नि-र्वचनमकृत्वा वामदेव्यं गातव्यम्। अनिरुक्तकवतीव्यतिरिक्तास्वेतन्न गा-तव्यमित्यर्थः ॥ १७ ॥

उक्तविपरीत्ये दोषमाह—

यन्निराह रुद्राय पशूनपि दधाति रुद्रस्ताꣳसमां पशून् घातुको भवति ॥ १८ ॥

यद्यपि हि निराह निर्ब्रूते तां समान्तास्मिन् सम्वत्सरे रुद्राय पशू-नपिदधाति स्थापितवान् भवति। स रुद्रस्तां समां पशून् घातुको भवति। तस्मात् कवतीष्वेव गातव्यमिति तस्य स्तुतिः ॥ १८ ॥

अथ पशुकामस्य निरुक्तमपि स्तोत्रियान्तरं वामदेव्यस्य ग्राह्य-मित्याह—

रेवतीषु त्वामदेव्येन पशुकामः स्तुवीत ॥ १९ ॥

'रेवतीर्न' इत्याद्या रेवत्यः ॥ १९ ॥

अथ तासां गोसम्बन्धमाह—

आपो वै रेवत्यः पशवो त्वामदेव्यमद्भ्य एवास्मै पशून् प्रजनयति ॥ २० ॥

अद्भ्यो धान्यादिसमृद्धिस्तद्द्वारा रयिर्धनं भवतीति रेवत्य आपः। वामदेव्यस्यान्तरिक्षरूपत्वात् पशुसम्बन्धः पूर्वमुक्तः। तथा सति रेवतीषु वामदेव्यगानेनाद्भ्यः समुद्रात् पशूनेवास्मै यजमानाय प्रज-नयति ॥ २० ॥

अथोक्तप्रयोगे किञ्चिद्दोषमाह—

अनवर्त्तिः पशुतो भवति प्रजा त्वस्य मीलितेव

भवति ॥ २१ ॥

अवर्त्तिर्दरिद्र्यन्तद्राहित्यमनवर्त्तिः पशुतः पशुभिरनवर्त्तिरदरिद्रो भवति । यदि तथाप्यस्य प्रजा पुत्रादिलक्षणा मीलितेव सङ्कुचितेव भवति रेवतीनामुदकरूपत्वात् । बहूदकप्रदेशे प्रजासमृद्ध्यभावादित्यभिप्रायः ॥ २१ ॥

उक्तदोषपरिहाराय कवतीभ्य एव निर्वक्तव्यमित्याह—

कवतीभ्यो ह्येति प्रजापतेः ॥ २२ ॥

हि यस्मात् पूर्वस्मिन् दोषोऽस्ति—अतः कशब्दवाच्यप्रजापतेः सम्बन्धिनीभ्यः कवतीभ्य एति-एतव्यं वामदेव्यम् । यद्वा उक्तदोषपरिहाराय कवतीभ्यो वामदेव्यमिति ह्येत्यनुवादः ॥ २२ ॥

इति ताण्डयमहाब्राह्मणे सप्तमाध्यायस्य
नवमः खण्डः ।

अथ दशमः खण्डः ।

उक्तं सर्वेषु पृष्ठेषु द्वितीयत्रियमेन मैत्रावरुणसामेति । अधुना रथन्तरपृष्ठेनौधसं कार्य्यं बृहत् पृष्ठे श्रयैतमिति विवक्षुराह—

इमौ वै लोकौ सहास्तान्तौ ह्वियन्तावब्रूतां ह्विवाहं ह्विवहावहै सह नावास्त्विति ॥ १ ॥

पूर्वमिमौ भूर्लोकद्युलोकौ सहास्तां तौ पश्चाद्वियुज्यमानावित्यब्रूतां किमिति ? विवाहं विवधं पृथग्वहनं विवहावहै करवावहै । आख्यातगतो विवाहशब्दोऽनुवादः । परस्परोपकार्य्योपकारकभावं करवावहा इत्यर्थः । तदेवाह सह नावास्त्विति यदेकेन लब्धं तदुभयोरस्त्वित्युक्त्वा तथा कुरुतामित्यर्थः ॥ १ ॥

अथ विवाहप्रकारं दर्शयति—

तयोरयममुष्मै ह्यैतं प्रायच्छन्नौधसमसावस्मै ॥ २ ॥

तयोर्म्मध्येऽयं भूर्लोकोऽमुष्मै द्युलोकाय स्वस्वभूतं ह्यैतं साम प्रायच्छत्तथाऽसौ द्युलोकोऽस्मै भूर्लोकाय नौधसं प्रायच्छत् ॥ २ ॥

ततः किञ्जातमित्याह—

तत एनयोर्न्निधने विपर्य्यक्रामतां देवविवाहो वै ह्यैतनौधसे ॥ ३ ॥

ततः परस्परविवाहादेतयोः श्यैतनौधसयोर्निधने विपर्य्यक्रामतां विपरिवृत्याश्रयतां व्यत्यस्ते अभूताभित्यर्थः। इवैतनौधसे सामनीयं परस्परं विवाहं कृतवती। असौ देवविवाहो देवेभ्यः कृतो विवाहः खलु। अतो नातिक्रमणीय इत्यर्थः ॥ ३ ॥

अथोक्तार्थवेदनफलमाह—

प्रवसीयाꣳसं विवाहमाप्नोति य एवꣳ वेद ॥ ४ ॥

प्राप्नोतीति सम्बन्धः ॥ ४ ॥

अथ रथन्तरबृहतोरन्यतरस्यापि प्रयोगे लोकत्रयप्राप्तिफलं वक्तुमुभयोः प्रयोगेन कल्प्तिं दर्शयति।

इतो वा इमे लोका ऊर्द्धाः कल्पमाना यन्त्यमुतोऽर्वाञ्चः कल्पमाना आयन्ति ॥ ५ ॥

रथन्तरं पृष्ठं कुर्वते यजमानाय इतोऽस्माल्लोकादारभ्योर्द्धाः उपर्य्युपरि वर्त्तमाना भूरादिलोकाः कल्पमानाः स्वं स्वं भोगं प्रयच्छन्तो यन्ति। तथा बृहत् पृष्ठं कुर्वतोऽमुतः स्वर्गादारभ्य स्वं स्वं भोगं कल्पमाना अर्वाञ्चोऽवाङ्मुखा आयन्ति त्रयोऽपि लोकाः ॥ ५ ॥

तयोरन्यतरानुष्ठानेऽपि लोकत्रयात् कल्प्तिं दर्शयति।

यद्रथन्तरेण स्तुवन्तीमꣳ श्लोकं तेन युनक्त्यन्तरिक्षं वामदेव्येन नौधसेनामुं यद् बृहता स्तुवन्त्यमुꣳ श्लोकं तेन युनक्त्यन्तरिक्षं वामदेव्येन इयैतेनेमम् ॥६॥

यद्रथन्तरेण स्तुवन्त्युद्गातारस्तेनेमं भूर्लोकं युनक्ति भोगसाधनत्वेन यजमानस्तस्य तल्लोकरूपत्वात्। वामदेव्येनान्तरिक्षलोकं युनक्ति तल्लोकभोगं प्राप्नोति तेन यजमानः। 'अयं वै लोको मध्यमो यद्वामदेव्यमि'त्युक्तत्वात् 'नौधसेनामुं लोकं युनक्ति यजमानः' एवं बृहत् पृष्ठविषयेऽपि व्याख्येयम् ॥ ६ ॥

अथोक्तार्थवेदनफलं दर्शयति—

कल्प्तानिमाँल्लोकानुपास्ते य एवꣳ वेद ॥ ७ ॥

स्वस्वभोगभरितान् लोकानाप्नोतीत्यर्थः ॥ ७ ॥

पूर्वत्र नौधसेनामुं श्यैतेनेममिति यदुक्तं तत् स्पष्टं दर्शयति।

बृहद्रथन्तरे वै इयैतनौधसे यद्रथन्तराय नौधसं प्रति प्रयुञ्जन्ति बृहदेवास्मै तत्प्रति प्रयुञ्जन्ति बृहद्धये-

तत्परोक्षं यन्नौधसं यदू बृहते इयैतं प्रति प्रयुञ्जन्ति रथन्तरमेवास्मै तत्प्रति प्रयुञ्जन्ति रथन्तरꣳ ह्येतत्परोक्षं यच्छयैतम् ॥ ८ ॥

'अल्पाच्तरम्'इति बृहतोऽल्पत्वेन पूर्वनिपातनाद्रथन्तरं वै इयैतं बृहद्वै नौधसमिति क्रमोऽवगन्तव्यः । अथ 'अग्निर्मूर्द्धा''भुवो यज्ञस्य' हविषो याज्यानुवाक्ये इत्युक्ते 'अग्निर्मूर्द्धा' इत्येषानुवाकानुवाक्या 'भुवो यज्ञस्य' इत्येषा याज्या तद्वदत्रापि। एवं सत्यनेन रथन्तरबृहतोः इयैतनौधसरूपत्वप्रतिपादनेन इयैतनौधसयोर्द्युलोकभूर्लोकयोः सम्बन्ध उक्तो भवति। यद्येनं रथन्तराय नौधसं साम प्रति प्रयुञ्जन्ति प्रतिनिधित्वेन योजयन्ति तत्तेनास्मै रथन्तराय बृहदेव प्रति प्रयुञ्जन्ति । रथन्तरप्रयोगपक्षे बृहद्रूपनौधसप्रयोगेण बृहद्रथन्तरे उभे अपि प्रयुक्ते भवतः । उक्तस्य नौधसस्य बृहत्त्वसमर्थनं 'बृहद्धेतत्'इत्यादि वा। एवमुक्तवैपरीत्येनोत्तरवाक्यं व्याख्येयम् ॥ ८ ॥

उक्तार्थवेदनपूर्वकं प्रयोगं प्रशंसति—

उभाभ्यां बृहद्रथन्तराभ्यां स्तुते य एवं वेद ॥ ९ ॥

य एवं विद्वान् बृहता वा रथन्तरेण स्तुते उभाभ्यामपि स्तुतवान् भवति ॥ ९ ॥

अथ नित्यमपि नौधसं कामनाभेदेन ब्रह्मवर्चसफलार्थमपि विधित्सुराह—

देवा वै ब्रह्म व्यभजन्त तान्नोधाः काक्षीवत आगच्छत्तेऽब्रुवन्नृषिर्न आगꣳस्तस्मै ब्रह्म ददामेति तस्मा एतत् साम प्रायच्छन्यन्नोधसे प्रायच्छꣳस्तस्मान्नौधसं ब्रह्म वै नौधसम् ॥ १० ॥

पूर्वन्देवा ब्रह्म सामलक्षणं वेदभागं व्यभजन्त मह्यमयं मह्यमयमिति विभज्य लब्धवन्तः । तान्विभज्यमानान्नोधा ऋषिः काक्षीवतः कक्षीवत्पुत्र आगच्छत् । ते देवा अब्रुवन् किमिति ? ऋषिर्नोऽस्मानागच्छगात्–तस्मै नोधसे ब्रह्म सामभागं किञ्चिद्ददामेति । एवमुक्त्वा तस्मा एतत् साम प्रायच्छन् । यन्नोधसे प्रायच्छन् तस्मात्तत्सम्बन्धादेतत्साम नौधसमभवत् । अतोऽस्य ब्रह्मभागरूपत्वादेतत् ब्रह्मसाम खलु ॥ १० ॥

अथ ब्रह्मवर्चसायैतद्विधत्ते—

ब्रह्मवर्चसकाम एतेन स्तुवीत ब्रह्मवर्चसी भवति ॥ ११ ॥

स्पष्टम् ॥ ११ ॥

नौधसमुक्त्वा श्यैतं विधास्यामीति प्रतिजानीते—

अथैतच्छ्यैतम् ॥ १२ ॥

वक्ष्यतीति वाक्यशेषः ॥ १२ ॥

अथ नित्यमपि श्यैतमभिसन्धिभेदेन पशुकामप्रयोगार्थमपि विधित्सुस्तस्य पशुसम्बन्धं दर्शयति—

प्रजापतिः पशूनसृजत तेऽस्मात्सृष्टा अपाक्रामꣳस्तानेतेन साम्नाभिव्याहरत्तेऽस्मा अतिष्ठन्त ते शेत्या अभवन् यच्छेत्या अभवꣳस्तस्माच्छ्यैतं पशवो वै श्यैतम् ॥१३॥

पूर्वं प्रजापतिना सृष्टाः पशवस्तस्मै भोगायानवकल्प्यमानास्ततोऽपाक्रामन्। तानेतेन श्यैतेन साम्नाभिव्याहरत् आभिमुख्येनाह्वयत्। तस्योत्तमे पादे 'हुम्' इति पशुघोषानुकरणस्य विद्यमानत्वात्त आहूता अस्मै प्रजापतये भोगायातिष्ठन्त समजानत। अतस्ते श्यैता अभवन्। श्यैतशब्दश्च श्वयतेर्गतिकर्मणोवाश्नातेर्व्याप्तिकर्म्मण उत्पन्नः। अतः शेत्याः शेतव्या अभवन्नित्यर्थः। अतस्तद्धेतुत्वेन श्यैतत्वं सामान्यात्। अक्षरयकारमादौ सम्बध्य श्यैतमिति प्रयुक्तं ब्राह्मणे। अतः पश्वाह्वानसाधनत्वात् श्यैतं पशव एव ॥ १३ ॥

अथ पशुकामाय विधत्ते—

पशुकाम एतेन स्तुवीत पशुमान् भवति ॥ १४ ॥

स्पष्टम् ॥ १४ ॥

अथ श्यैतस्यान्त्यपादे 'हुंमा' इत्येतस्य विद्यमानत्वात् प्रजानां वृद्धिसाधनमेतत्सामेति प्रशंसति—

प्रजापतिः प्रजा असृजत ताः सृष्टा अशोचꣳस्ताः श्यैतेन हुंमा इत्यभ्यजिघ्रत्ततो वै ताः समैधन्त समेधन्ते ताꣳ समां प्रजा यत्रैवं विद्वाञ्छ्यैतेनोद्गायति ॥१५॥

पूर्वं प्रजापतिना सृष्टाः प्रजा अनभिवृद्धा अशोचन्। ताः प्रजाः श्यैतेन तत्र ह्येता 'हुंमा' इत्येनाभिजिघ्रत् शिर आघ्रातवान्। ततः खलु ताः समैधन्त सम्यगवर्द्धन्त। अतो यत्रैवमुक्तार्थाभिज्ञः श्यैतेनोद्गायति तां समां तस्मिन् संवत्सरे प्रजाः समेधन्ते सम्यग्वर्द्धन्ते ॥ १५ ॥

अथोद्गाता श्यैतेनोद्गायति प्रजासम्वर्द्धको भवतीति तद्दर्शयति—

एष वै यजमानस्य प्रजापतिर्यदुद्गाता यच्छ्यैतेन हि-

करोति प्रजापतिरेव भूत्वा प्रजा अभिजिघ्रति ॥ १६ ॥

स्पष्टोऽर्थः ॥ १६ ॥

तत्रत्यवसुनिधनं प्रशंसति—

वसुनिधनं भवति पशवो वै वसु पशुष्वेव प्रतितिष्ठति ॥ १७ ॥

पशूनां निवाससाधनत्वेन धनरूपत्वं प्रसिद्धमतस्तत्प्रयोगेण पशुषु प्रतिष्ठितो भवति यजमानः ।

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १७ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्डयमहाब्राह्मणे सप्तमाध्यायस्य दशमः खण्डः ।

सप्तमाध्यायः समाप्तिमगमत् ।

अष्टमोऽध्यायः ।

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

उक्तो माध्यन्दिनस्तस्मिंश्च पवमानश्च सप्तमे वरुणहोत्रादीनाञ्च पृष्ठानि त्रीण्युक्तानि यथाक्रमं तस्मिन्। ब्रह्मसामानि काम्यानि कालेयतः आर्भवं यज्ञायज्ञीयमुक्थानि प्रवक्ष्यन्तेऽधुनाष्टमे। इयेतनौधसे उभे अपि नित्य एवाग्निष्टोमे विकल्पेन प्रयुज्यमाने अभिसन्धिभेदात्काम्ये अपि भवत इत्युक्तमथाभिचारप्रयोगार्थं ब्रह्मसाम विदधाति—

आष्कारणिधनं काण्वं वषट्कारणिधनमभिचरणीयस्य ब्रह्मसाम कुर्य्यादभिनिधनम्माध्यन्दिने पवमाने॥१॥

अभिचरणीयस्याभिचारसम्बन्धिनस्तत्प्रयोजनस्य यागस्य ब्रह्मसाम ब्राह्मणाच्छंसिनः साम वषट्कारनिधनं कुर्य्यात् 'अभित्वा पूर्व्वपीतये' इत्यत्र ब्रह्मसाम कार्य्यं तत्र 'उपा'निधनमस्ति तत् स्थाने

'वाषाड्'इति निधनं कुर्य्यादित्यर्थः। एवमाने तु माध्यन्दिने बृहतीषु मध्यमायामभिनिधनं कार्य्यम् 'औ हो होहा ई आ ई ही ऊ न् साः आ २३४ भी'इति। अत्र कल्पाः 'अथातो ब्रह्मसामानावभिचरतः श्रैतस्य प्रतिपत्तथा आज्यानि च पुनानः सोम धारयेति रौरवमेकस्यामभिनिधनं काण्वमेकस्यां वैश्रवसमेकस्यामुद्वत्प्राजापत्यं वा यौधाजयन्तिसृषु वषट्कारनिधनं ब्रह्मसामैष ब्रह्मा य ऋत्विज इति कालेयमभिचरणीया विष्टुतयः समानमितरं ज्योतिष्टोमेनेति' ॥ १ ॥

अथोभे सामनी प्रशंसति—

देवेषुव्वा एषा यद्वषट्कारोऽभीति वा इन्द्रो व्वृत्राय व्वज्रं प्राहरदभीत्येवास्मै व्वज्रं प्रहृत्य देवेष्वावषट्कारेण व्विध्यति ॥ २ ॥

वषट्कार इति यत् एषा देवेषुर्वै देवसम्बन्धी बाण एव। इषुशब्दापेक्षयैषेति स्त्रीलिङ्गता। तथा अभीत्युक्त्वा खलु वृत्राय तद्वधार्थं वज्रमिन्द्रः प्राहरत्। अभीत्यस्याभिमुख्यमित्यर्थः। तेन शत्रोरभिमुखं गच्छतीत्यर्थः सूच्यते। अतस्तदुभयोः प्रयोगेन भीत्येवास्मै स्वविरोधिने वज्रं प्रहृत्य देवबाणरूपेण विध्यति। तं विरोधिनं केवलनिधनयोरप्रयोगात्तदाधारयोः साम्नोरेव प्रयोग इति मन्तव्यम् ॥ २ ॥

अथ पशुकामप्रयोगे ब्रह्मसामार्थं त्रैककुभं विदधाति—

त्रैककुभं पशुकामाय ब्रह्मसाम कुर्य्यात् त्वमङ्गप्रशꣳसिष इत्येतासु ॥ ३ ॥

'त्वमङ्ग' इत्येतासूपपन्नं त्रैककुभाख्यं साम पश्वर्थंप्रयोगे ब्राह्मणाच्छꣳसिसाम कार्य्यम् ॥ ३ ॥

इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त रायो व्वाजो बृहद्गिरिः पृथुरश्मिस्तेऽब्रुवन् को नः पुत्रान् भरिष्यतीत्यहमितीन्द्रोऽब्रवीत्तास्त्रꣳस्त्रिककुबधिनिधायाचरत्स एतत्सामापश्यत्त्रिककुबपश्यत्तस्मात्त्रैककुभम् ॥ ४ ॥

पूर्वमिन्द्रो यतीन् वेदविरुद्धनियमोपेतान् यतीन् तान् शालावृकेभ्योऽरण्यश्वभ्यः प्रायच्छत् वधार्थं तेषां मध्ये रायोवाजप्रभृतयस्त्रय उदशिष्यन्त तेभ्यः उद्गताः शिष्टा अभवन्। ते चासतिका एवमब्रुवन्। को महान्नोऽस्मान् पुत्रान् पुत्रवद्रक्षणीयान् कृत्वा भरिष्यतीति। तदि-

न्द्रोऽहं रक्षिष्यामीत्यब्रवीत् । तानवशिष्टांस्त्रिककुप् व्युच्छ्रितप्रदेश आसीत् । त्रिककुप्सु व्यधिनिधायाचरत् । स तदेतत्सामापश्यत् । यत्त्रिककुप् सन्नपश्यत्तस्मादेतत् संत्रकमभवत् अस्थास्यत् ॥ ४ ॥

कथं तेषां जीवनकल्पनमिति तत्राह—

स आत्मानमेव पुनरुपाधावत्त्वमङ्ग प्रशꣳसिषो देवः शविष्ठमर्त्यन्नत्वदन्योमवघन्नास्ति च मर्डितेन्द्र ब्रवीमि ते वचꣳ इति स एतेन च प्रगाथेनैतेन साम्ना सहस्रं पशूनसृजत तानेभ्यः प्रायच्छत्ते प्रत्यतिष्ठन् ॥ ५ ॥

स इन्द्रः स्वव्यतिरिक्तस्य-एतेषां प्रतिष्ठानात् बहिः कस्यचिदप्यभावादात्मानमेव पुनरुपाधावत् 'त्वमङ्ग' इति प्रगाथेन । अयमुत्तरग्रन्थ एवास्माभिर्व्याख्यातः । स एवमात्मानमेव प्रशस्य एतेनोक्तेन प्रगाथेन एतेन त्रैककुभेन साम्ना च पशुसहस्रमसृजत तान् सृष्टानिन्द्रेण लब्ध्वा ते प्रतिष्ठिता अभवन् ॥ ५ ॥

एवमस्य साम्नः पशुरूपप्रतिष्ठासाधनत्वं सामर्थ्योक्तकामनायोग्यत्वाभिधानद्वारेणोपसंहरति—

यः पशुकामः स्याद्यः प्रतिष्ठाकाम एतस्मिन् प्रगाथ एतेन साम्ना स्तुवीत प्रसहस्रं पशूनाप्नोति प्रतिष्ठति ॥६॥

ननु केवलमुपक्रमे पशूकामनैव चोदिता, उपसंहारे तु प्रतिष्ठापि चोद्यतेऽतः कथन्तयोरविरोधो निर्णयस्योपक्रमोपसंहारैकवाक्यताधीनत्वादिति ? नायं विरोधः । तैर्वाक्यादौ भरणस्यैव प्रार्थ्यमानत्वात् पश्वादिद्वारमन्तरेण केवलप्रतिष्ठाया अभावात् पशुरूपप्रतिष्ठैकैवोक्तेति बोद्धव्या । निगदव्याख्यानमेतत् ॥ ६ ॥

तदेव पुनः प्रशंसति—

त्रिवीर्य्यं वा एतत्साम त्रीन्द्रियमैन्द्रय ऋच ऐन्द्रꣳ सामैन्द्रेति निधनमिन्द्रिय एव वीर्य्ये प्रतितिष्ठति ॥ ७ ॥

एतत्त्रैककुभं साम त्रिवीर्य्यं वै वीर्य्यत्रयोपेतं खलु तदेव विविच्य दर्शयति । ऋचोऽप्यैन्द्र्यः सामाप्यैन्द्रं निधनमप्यैन्द्रमिति । अतस्त्रीन्द्रियं य एतेन स्तूयात् स इन्द्रिय एव तस्य विवरणं वीर्य इति तत्र प्रतिष्ठितो भवति ॥ ७ ॥

अथ दीर्घरोगिणः प्रयोगे ब्रह्मसाम विदधाति—

त्रैशोकं ज्योगामयाविने ब्रह्मसाम कुर्य्यात् ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

अथ शब्दनिर्वचनद्वारेण तत्प्रशंसति—

इमे वै लोकाः सहासपुंस्तेऽशोचपुंस्तेषामिन्द्र एतेन साम्ना शुचमपाहन्यत्रयाणाꣳशोचतामपाहꣳस्तस्मात्त्रैशोकम् ॥ ९ ॥

पूर्वमिमे भूरादिलोकाः सहैकस्मिन्नवस्थाने अतिष्ठन्। ते इति हविर्लाभवृष्टिप्रदानादिपरस्परोपकारादिभावेनाशोचन्। तेषां शुचं दुःखमेतेन त्रैशोकेन साम्ना अपाहन्। यद्यस्माच्छोचतां त्रयाणां शोकमपाहन् तस्मात् शोकत्रयापनोदेन त्रैशोकसंज्ञामलभत ॥ ९ ॥

अथापगतानां शुचामन्यत्र प्राप्तिं दर्शयति—

यामस्मादपाहन् सा पुꣳश्चलीं प्राविशद्यामन्तरिक्षात्सा क्लीबं याममुष्मात्सैनस्विनम् ॥ १० ॥

यां शुचमिन्द्रोऽस्माद्भूर्लोकादपाहन् सा पुंश्चलीमन्यान् पुरुषान् प्रति चलन्तीं व्यभिचारिणीमित्यर्थः। एवमुत्तरत्रापि योज्यम्। क्लीबः षण्ढः। एनस्वी महापातकदोषग्रस्तः ॥ १० ॥

अथैतेषु धनादीच्छामन्वयव्यतिरेकाभ्यां प्रसङ्गान्निन्दति—

तस्मात्तेषान्नाशैतव्या य एषामाशामेति तस्मा एव शुचोऽपभजते ॥ ११ ॥

तस्मात्प्राप्तशोकत्वात्तेषामाशा पुंश्चल्यादीनां सम्बन्धिनी धनादीच्छा नैतव्या न प्राप्तव्या। यस्तु मोहादाशां प्राप्नोति तस्मा एव शुचः तामेव शुचमपभजते कष्टं प्राप्नोति ॥ ११ ॥

अथ प्रकृतेऽसङ्गत्वं दर्शयन्नुपसंहरति—

शुचा वा एष विद्धो यस्य ज्योगामयति यत्त्रैशोकं ब्रह्मसाम भवति शुचमेवास्मादपहन्ति ॥ १२ ॥

यस्य यजमानस्य चिरकालो रोगः प्राप्नोति एष शुचा विद्धोऽपहतः खलु। अनेन विध्यर्थवादगतज्योगामयशोकयोर्वैयधिकरण्यं परिहृतं भवति। शिष्टं स्पष्टम् ॥ १२ ॥

तत्रत्यनिधनमप्युक्तविषयेऽनुकूलमित्याह—

दिवेति निधनमुपयन्ति व्युष्टिर्वै दिवा व्येवास्मै व्यासयति ॥ १३ ॥

यत्र साग्नि दिवेति निधनमुपयन्तीह गातारः सा दिवा व्युष्टिर्वै 'उच्छीविवासे' विवासस्तमोऽपवर्जनं प्रकाश इत्यर्थः । अतस्तत्प्रयोगेना स्मै ज्योगामयाविने आमयाख्यं तमो विवासयति परिहरत्येव ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे अष्टमाध्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ प्रतिष्ठार्थिनः प्रयोगे ब्रह्मसाम विधत्ते—

आष्कारणिधनं काण्वं प्रतिष्ठाकामाय ब्रह्मसाम कुर्य्यात् ॥ १ ॥

'आष्' इतिकरणमुच्चारणमाष्कारः तन्निधनोपेतं काण्वं काण्वेन दृष्टं ब्रह्मसाम 'तच्चोदस्ममृतीष्वह'मित्यादिषु कुर्य्यात ॥ १ ॥

अथ निधनद्वारैतत्प्रशंसति—

कण्वो वा एतत्सामर्त्वे निधनमपश्यत् स न प्रत्यतिष्ठत्स वृषदंशस्याषिति क्षुवत उपाशृणोत्स तदेव निधनमपश्यत्ततो वै स प्रत्यतिष्ठद्यदेतत्साम भवति प्रतिष्ठित्यै ॥ २ ॥

कण्वः पूर्वमेव तत्साम निधनरहितं केवलमपश्यत् । स निधनस्य प्रतिष्ठारूपत्वात्तदभावेनाप्रतिष्ठितोऽभूत् । स किन्निधनं प्रतिष्ठासाधनत्वेन करवाणीति चिन्तयन् तदा वृषदंशस्य मार्जारस्य 'आष्' इति क्षुवतः शब्दमुपाशृणोत् । स एतदेवोपश्रयणन्निधनं भविष्यतीत्यवगत्य तदेव प्रयुक्तवान् । ततश्च प्रतिष्ठितोऽभूत् । अतो यत्साम एतन्निधनकं भवेत् तच्च प्रतिष्ठित्यै भवति ॥ २ ॥

अप्रजार्थिनः प्रयोगे ब्रह्मसाम विदधाति—

वसिष्ठस्य जनित्रं प्रजाकामाय ब्रह्मसाम कुर्य्यात् ॥ ३ ॥

तच्चोदस्ममित्यादि वसिष्ठस्य जनित्रम् ॥ ३ ॥

अस्य प्रजासम्बन्धमाह—

वसिष्ठो वा एतत्पुत्रहतः सामापश्यत्स प्रजया पशुभिः प्राजायत यदेतत्साम भवति प्रजात्यै ॥ ४ ॥

पूर्वं हतपुत्रो वसिष्ठः प्रजात्यर्थमेतत्सामापश्यत्तदेव प्रयुज्य प्रजापशुसमृद्धोऽभूत् अतः प्रजार्थिभिरेतत्कर्त्तव्यम् ॥ ४ ॥

स्वर्गार्थिनः प्रयोगे ब्रह्मसामाह—

आथर्वणं लोककामाय ब्रह्म साम कुर्य्यात् ॥ ५ ॥

अत्र यद्यपि लोकसामान्यं श्रूयते तथाप्यर्थवादे 'अमर्त्यं लोकम्'इति विशेषश्रुतेरत्रापि स एवेति निश्चयः । अत्र कल्पः लोककामस्य नौधसस्य स्थाने आथर्वणं ब्रह्मसामोद्यत्योर्विष्टुतयः । समानमितरत् ज्योतिष्टोमेनेति ॥ ५ ॥

एतत्साम प्रशंसति—

अथर्व्वाणो वा एतल्लोककामाः सामापश्यꣳस्तेनामर्त्यꣳ लोकमपश्यन् यदेतत्साम भवति स्वर्गस्य लोकस्य प्रजात्यै ॥ ६ ॥

एतत्सामापश्यन्निति सम्बन्धः । अमर्त्यं दिव्यं लोकं स्वर्गमित्यर्थः । यदेतदित्यादिरुपसंहारः ॥ ६ ॥

भ्रातृव्यवतो यजमानस्य तदपमानार्थप्रयोगे ब्रह्मसाम विदधाति—

अभीवर्त्ते भ्रातृव्यवते ब्रह्मसाम कुर्य्यात् ॥ ७ ॥

स्पष्टम् ॥ ७ ॥

अथैतन्निर्वचनद्वारा प्रशंसति—

अभीवर्त्तेन वै देवा असुरानभ्यवर्त्तन्त यदभीवर्त्तो ब्रह्मसाम भवति भ्रातृव्यस्याभिवृत्यै ॥ ८ ॥

देवानामसुरवधार्थं अभिमुखावर्त्तनसाधनत्वादेतत्सामाभीवर्त्तमभवत् । सुज्ञानमितरत् ॥ ८ ॥

यज्ञविभ्रष्टाय ब्रह्मसाम विधत्ते—

श्रायन्तीयं यज्ञविभ्रष्टाय ब्रह्मसाम कुर्य्यात् ॥ ९ ॥

औद्गात्रावच्छेदसोमापहृतवित्तसामातिपवनादिक्रतुविलोपनिमित्तं यस्य जायते स यज्ञविभ्रष्टस्तत्प्रायश्चित्तम् ॥ ९ ॥

श्रीणातेः पाकार्थात् श्रायन्तीयमित्यर्थान्निर्वचनमिति विवक्षुराह—

प्रजापतिरुषसमध्यैत्स्वां दुहितरं तस्य रेतः परापतत्तदस्यांन्यषिच्यत तदश्रीणादिदं मे माऽदुषदिति तत्सदकरोत्पशूनेव ॥ १० ॥

पूर्वं प्रजापतिः स्वदुहितरमेवोषसमध्यैदध्यगच्छत् । तस्य रेतः परापतत् । तदस्यां पृथिव्यामिषिच्य च तदश्रीणात् अपचत् । केनाभिप्रायेण ?

मादुषदिति दुष्टम्माभूदिति। तत्पक्वं रेतः सदकरोत् तदेव विवृणोति पशूनकरोदिति। एतत् श्रायन्तीयमभवदिति शेषः ॥ १० ॥

एवं प्रशस्य प्रकृतमुपसंहरति—

यच्छ्रायन्तीयं ब्रह्मसाम भवति श्रीणाति चैवैनꣳ सच्च करोति ॥ ११ ॥

यद्यस्य प्रयोगे एतद्ब्रह्मसाम भवति, तत एनं यज्ञविस्रष्टं श्रीणाति पवति शुद्धं करोति ततः सच्च यज्ञसाधकञ्च करोति ॥ ११ ॥

इति ताण्डयमहाब्राह्मणे अष्टमाध्यायस्य द्वितीयः खण्डः ।

अथ तृतीयः खण्डः ।

उक्ताः कामनाभेदेन ब्रह्मसामविशेषा अथास्मिन् खण्डे कालेयं स्तूयते तत्र तावत्कालेयनामनिर्वचनेन प्रशंसति—

देवाश्च वा असुराश्चैषु लोकेष्वस्पर्द्धन्त ते देवाः प्रजापतिमुपाधावꣳस्तेभ्य एतत्साम प्रायच्छदेतेनैनान् कालयिष्यद्धमिति तेनैनानेभ्यो लोकेभ्योऽकालयन्त यदकालयन्त तस्मात्कालेयम् ॥ १ ॥

पूर्वं देवाश्चासुराश्चैतेषां लोकानामाधिपत्यायास्पर्द्धन्त । अस्माकमेव भूयासुरस्माकमेवेति तेषु मध्ये देवाः स्वपितरं प्रजापतिमनुप्राप्ताः। तेभ्य एषामाधिपत्यायैतत्साम प्रायच्छत् किमिति? एतेन साम्नैनानसुरान् कालयिष्यद्धमपनयथेति सुज्ञानमन्यत् ॥ १ ॥

विदुषः फलमाह ।

एभ्यो वै लोकेभ्यो भ्रातृव्यं कालयते य एवं ग्वेद ॥ २ ॥

य एवमवगच्छति सोऽपि स्ववैरिणं लोकत्रयान्निःसारयति ॥ २ ॥

अथास्य स्तोत्रियगततरोभिरिति पादद्वारेणैतत्साम प्रशंसति—

स्तोमो वै देवेषु तरो नामासीद्यज्ञोऽसुरेषु ग्विदद्वसुस्ते देवास्तरोभिर्व्वो ग्विदद्वसुमिति स्तोमेन यज्ञमसुराणामावृञ्जत ॥ ३ ॥

पूर्वं देवेषु तरो नामा सोम आसीत। असुरेषु विदद्वसुरिति नामा यज्ञ आसीत्। एवं सति 'तरोभिर्व्वो ग्विदद्वसु'मिति पादेन देवाः स्तोम-

साधनमसुराणां यज्ञमवृञ्जत अवर्जयन् अच्छिन्दन्नित्यर्थः । यद्यप्यन्यार्थावेतौ तथापि श्रुतिसामान्यमात्रेण च स्तुतिर्द्रष्टव्या ॥ ३ ॥

अथ विदुषः फलमाह—

स्तोमेन यज्ञं भ्रातृव्यस्य व्यृङ्क्ते य एवं वेद ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

एतत्साम तृतीयसवनस्य सन्ततिरूपमिति प्रशंसति—

साध्या वै नाम देवा आसꣳस्तेऽवच्छिद्य तृतीयसवनम्माध्यन्दिनेन सवनेन सह स्वर्गꣳ लोकमायꣳस्ते देवाः कालेयेन समतन्वन्यत्कालेयं भवति तृतीयसवनस्य सन्तत्यै ॥ ५ ॥

पूर्वं साध्या नाम देवा आसन् ते तृतीयसवनमवच्छिद्याननुष्ठाय माध्यन्दिनेन सवनेन सह तदनुष्ठानात् ते स्वर्गमायन् अगच्छँस्ते देवाः । अतः साध्यास्तृतीयसवनस्य विच्छेदमवगत्य कालेयेन साम्ना समतन्वन् तत्सवनमविच्छिन्नमकुर्वन् । अतस्तृतीयसवनाविच्छेदायैतद्भवतीति स्तुतिः ॥ ५ ॥

अथ तृतीयसवनकालेययोः कः सम्बन्ध इति तं दर्शयति—

विदद्वसु वै तृतीयसवनं यत्तरोभिर्वो विदद्वसुमिति प्रस्तौति तृतीयसवनमेव तदभ्यति वदति ॥ ६ ॥

तृतीयसवनं विदद्वसु वै लब्धधनं खलु तस्मिन् हि सम्पूर्णे क्रतुसमाप्तेर्धनस्वादिलक्षणफललाभात् । अतः कालेये यत् 'तरोभिर्वो विदद्वसुम्' इति पठत्युद्गाता तत्तेन तृतीयसवनमेवाभिलक्ष्याति वदति अतीति धात्वर्थानुवादः ॥ ६ ॥

अथैतत्साम सर्वपृष्ठस्वरूपत्वेन प्रशंसति—

सर्वाणि वै रूपाणि कालेयं यत्पदप्रस्तावन्तेन राथन्तरं यद्बृहतो रोहान् रोहति तेन बार्हतं यत् स्तोभवान् प्रतिहारस्तेन बार्हतं यद्रवादिहन्तेन राथन्तरꣳसर्वेष्वेव रूपेषु प्रतितिष्ठति ॥ ७ ॥

यत्कालेयमस्ति तद्रथन्तरबृहतोरुभयोरपि पाणिपादप्रस्तावादिलक्षणानि रूपाणि सन्ति । तान्येव खलु तेषां तस्मिन्विद्यमानत्वात् । तथा हि यत्पदप्रस्तावं भवति पादान्ते प्रस्तावभागपरिसमाप्तिर्भवति तेन

रथन्तरं रूपम्। रथन्तरस्य पादप्रस्तावः पूर्वमुक्तस्तथा यदूबृहतस्तोभिनूोहा-नूोहति तेन बार्हतमपि रूपम्। तत्रापि बृहत्पृष्ठेऽपि रोहत्रयस्योक्तत्वात्। यत्कालेयस्य प्रतिहारस्तोभवान् तेन बार्हतं रूपम्। तथाहि कालेये 'हु वा ई भ रौ वा ३ ४ ३ औ ३ ४ वा' इति प्रतिहारस्तोभवान्। बृहत्यपि 'त्वां काष्ठा ३ ४ औ हो वा' इति तत्र स्तोभो विद्यते अतस्तद्रूपत्वं युक्तं तथा 'हो ५ ईडा' इति कालेयं द्रवदिडं कालेयं भवत्यतो रथन्तरं रूपम्। तथा हि निदानं द्रवदिडारथन्तरपृष्ठेति ऊर्द्धेडा बृहतपृष्ठ इति वैरूप-शाक्वरयो रथन्तरकार्य्यत्वात् वैराजरैवतयोश्च बृहत्कार्य्यत्वात् कारण-भूतोभयरूपत्वप्रतिपादनमत इदं कालेयं सर्वेष्वेव षण्णां पृष्ठानां रूपेषु प्रतितिष्ठति ॥ ७ ॥

इति ताण्डयमहाब्राह्मणे अष्टमाध्यायस्य तृतीयः खण्डः ।

अथ चतुर्थः खण्डः ।

उक्तमाध्यन्दिनं सवनमथ तृतीयसवनस्यादौ गायत्रीसम्बन्धं विश्वक्षुराख्यायिकामाह—

साध्या वै नाम देवा आसꣳस्ते सर्व्वेण यज्ञेन सह स्वर्गꣳलोकमायꣳस्ते देवाश्छन्दाꣳस्यब्रुवन्सोममाहरतेति ते जगतीं प्राहिण्वन्सा त्रीण्यक्षराणि हित्वैकाक्षरा भूत्वागच्छत्त्रिष्टुभं प्राहिण्वन् सैकमक्षरꣳहित्वा त्र्यक्षरा भूत्वागच्छद्गायत्रीं प्राहिण्वꣳश्चतुरक्षराणि वै तर्हि च्छन्दाꣳस्यासन् सा तानि चाचराणि हरन्त्यागच्छदष्टाक्षरा भूत्वा त्रीणि च सवनानि हस्ताभ्यां द्वे सवने दन्तैर्दꣳष्ट्वा तृतीयसवनं तस्माद्वे अꣳशुमती सवने धीतं तृतीयसवनं दन्तैर्हि तद्दꣳष्ट्वा धयन्त्यहरत्तस्य ये हियमाणस्याꣳशवः परापतꣳस्ते पूतीका अभवन् यानि पुष्पाण्यबाधीयन्त तान्यर्জ্জुनानि यत्प्राप्रोथस्ते प्रप्रोथास्तस्मात्तृतीयसवन आशिरमवनयन्ति यमेव तं गावः सोममदन्ति तस्य तꣳ रसमवनयन्ति स-सोमत्वाय ॥ १ ॥

पूर्वं साध्याख्या देवा आसन्। ते सर्वेण यज्ञेन सोपकरणेन सोमादि-साधनमादायैव स्वर्गं लोकमायन्नगमन्। ते प्रसिद्धा वस्वादयो देवा आदौ स्वर्गसाधनयज्ञार्थसोमाहरणाय च्छन्दांसि गायत्र्यादीनि यूयं सोमं द्युलोकात् आहरतेत्युक्तवान्। तान्यपि तथैवाङ्गीचक्रुरिति शेषः। तथोक्तास्ते जगतीं प्राहिण्वन्नप्रेरयन्। सा तत्रत्यैः सोमपालैः सह युद्ध्वा त्रीण्यक्षराणि हित्वैकाक्षरा भूत्वा पुनर्देवानागच्छत्। चतुरुत्तराणि वै तर्हि च्छन्दांसि वक्ष्यति तदभिप्रायकमिदम्। पुनस्ते त्रिष्टुभं प्राहिण्वन्। सापि पूर्ववत् सोमपालेष्वेकमक्षरं हित्वा द्व्यक्षरा भूत्वा पुनरागच्छत्। ते पुनर्गायत्रीं प्राहिण्वन्। छन्दांसि सर्वाणि चतुरुत्तराण्यासन्। अतः सा गायत्री द्युलोके सोमरक्षकैः कृष्णप्रभृतिभिर्जितानि जगतीत्रिष्टुभोश्चतुरक्षराणि हरन्ती अष्टाक्षरा भूत्वा आगच्छत्। पुनः किं कुर्व्वत्यागच्छदित्युच्यते त्रीणि च सवनानि सवनत्रयपर्य्याप्तानि सोमद्रव्याण्यादायेति। तद्विविच्योच्यते हस्ताभ्यां द्वे सवने धृत्वा दन्तैस्तृतीयसवनं दंष्ट्राऽऽगच्छत्। यस्मादेवं तस्माद्धस्ताभ्यां धृते द्वे सवने प्रातर्मध्यन्दिनसवनयोग्ये सोमद्रव्ये पीडाभावात् अंशुमती अभूताम्। तृतीयसवनं धीतं पीतसारभूतं तत्र हेतुमाह दन्तैर्हि तद्द्रव्यं दष्ट्वा धयन्ती पिबन्ती अहरत्। ह्रियमाणस्य सोमस्य पतिताः अंशवः पूतीका अभवन्। तस्य सोमस्य यानि पुष्पाण्यवाशीयन्त अवशादितानि प्रभ्रष्टान्यासन्। शदेः पाघ्रेत्यादिना शीयादेशः। तान्यर्जुनानि हरितवर्णान्यभवन्। यत् प्राप्रोथत् अधनुताङ्गानि प्रप्रोथाख्या ओषधय आसन्। तस्मात्सोमाभावे पूतीकादीनां प्रतिनिधित्वेन स्वीकर्त्तव्यतामभिधातुं प्रासङ्गिकानामेषां उपन्यासः। तस्मादृधुतत्वात्तृतीयसवन आशिरं दधिपयोद्रव्यमवनयन्ति। यमेव तं सोममोषधीनां सारं गावोऽदन्ति भक्षयन्ति तस्य सोमस्य तं रसमवनयन्ति। आशिरावनयने हेतुः ससोमत्वाय सरसत्वाय॥१॥

एवं गायत्रीं प्रशस्येदानीं सवनसम्बन्धमाह—

ते त्रिष्टुब्जगत्यौ गायत्रीमब्रूतामुप त्वायावेति साऽब्रवीत् किं मे ततः स्यादिति यत्कामयस इत्यब्रूताꣳ साब्रवीन्मम सर्व्वं प्रातः सवनमहमुत्तरे सवने प्रणयानीति तस्माद्गायत्रं प्रातःसवनं गायत्र्युत्तरे सवने प्रणयति ॥ २ ॥

ते गायत्र्यपहृताक्षरचतुष्टये त्रिष्टुप्जगत्यौ गायत्रीमब्रूताम् किमिति? त्वा त्वां उपायावेति उपगच्छावेति। सा पुनरब्रवीत्। मे मह्यं ततो युष्म-

दुपगमनार्थिकं फलं स्यादिति ? ते पुनरब्रूतां, तर्हि यत् फलं कामयस इति । सा ते प्रत्यब्रवीत् किमिति ? उच्यते । मम तावत् प्रथमं प्रातःसवन महमुत्तरेऽपि सवने प्रणयानि प्रापयानीति ते तथाऽस्त्वित्यङ्गीचक्रतु-रिति शेषः । यस्मादेवन्तस्मात् पूर्वं गायत्रं प्रातःसवनमुत्तरेऽपि स-वने गायत्री प्रणयति । अयमर्थस्तैत्तिरीयके 'कद्रुश्च वै सुपर्णी च'इत्यनु-वाके प्रतिपादितः ॥ २ ॥

अथ तयोर्गायत्रीप्राप्तिप्रकारं दर्शयति—

तान्त्रिष्टुप् त्रिभिरक्षरैरुपैत्सैकादशाक्षरा भूत्वा प्राजायत ताञ्जगत्येकेनाक्षरेणोपैत्सा द्वादशाक्षरा भूत्वा प्राजायत ॥ ३ ॥

तां गायत्रीं त्रिष्टुबवशिष्टैस्त्रिभिरक्षरैरुपैदन्तः प्राविशत् । ततो गायत्र्या अष्टाक्षरेण सह एकादशाक्षरा भूत्वा प्राजायत प्रकृष्टाऽभूत् । तथैकाक्षरा जगत्यपि गायत्रीसंयुक्ता द्वादशाक्षरा प्राजायत ॥ ३ ॥

अथ गायत्र्याः सर्वच्छन्दोव्याप्तिरुक्तार्थनिबन्धनेत्याह—

तस्मादाहुर्गायत्री वाव सर्वाणि च्छन्दाꣳसि गायत्री ह्येतान् पोषान् पुष्यन्त्यैदिति ॥ ४ ॥

तस्मात्त्रिष्टुब्जगत्योः स्वरूपप्रदानादसाधारणसोमापहरणाच्च गा-यत्री वाव गायत्र्यैव सर्वाणि च्छन्दांसि । गायत्री ह्येतान् प्रागुक्तैकाद-शाक्षरद्वादशाक्षररूपात्मनः पोषान् पुष्यन्ती प्राप्नुवन्त्येतद्यन्नमग-च्छत् । तदेव तृतीयसवने गायत्रं कर्त्तव्यमिति प्रतिपादितम् ॥ ४ ॥

अथाभवपवमानगतानि गायत्रसंहितादिसामानि विधास्यन्नादौ 'स्वादिष्ठया'इति तृचं गायत्रसंहिताया आधारभूतं सस्तुतिकं विदधाति-

इन्द्रस्तृतीयसवनाद्बीभत्समान उदक्रामत्तद्देवाः स्वा-दिष्ठयेत्यस्वदयन्मदिष्ठयेति मद्रदकुर्व्वन् पवस्व सोम धा-रयेत्यपावयन्निन्द्राय पातवे सुत इति ततो वै तदिन्द्र उपावर्त्तत यत् स्वादिष्ठया मदिष्ठयेति प्रस्तौति तृतीय-सवनस्य सेन्द्रत्वाय ॥ ५ ॥

पूर्वमिन्द्रस्तृतीयसवनात् पीतत्वेन गतसाराद्बीभत्समानोऽयोग्य-त्वेनापेक्ष्यमाण उदक्रामदुद्गतवान् । तत्सवनं देवाः 'स्वादिष्ठया'इति स्वादु-तमवाचिना पदेनास्वदयन् स्वादुमकुर्वन्'मदिष्ठया'इति द्वितीयपदेन मह-

कुष्टिमदकुर्वन् 'पवस्व सोमधारया'इति द्वितीयपादेनापावयन् पूतमकुर्वन्। एवं सवनं तद्योग्यं सम्पाद्य'इन्द्राय पातवे सुतः'इति पादेनैन्द्रमुपावर्त्तयन्निति शेषः। तत्र पादे तत इन्द्राय पातवे पातुमिति इन्द्रस्य पानार्थश्रवणात्स्वार्हतामवगत्येन्द्रस्तत्सवनमुपावर्त्तत-अभिमुखमगच्छत्। शिष्टं सुज्ञानम्॥ ५॥

अथासुरपशुविनाशकत्वद्वारेणैतत्प्रशंसति—

स्वादिष्ठा वै देवेषु पशव आसन् मदिष्ठा असुरेषु ते देवाः स्वादिष्ठया मदिष्ठयेति पशूनसुराणामवृञ्जत॥६॥

पूर्वं स्वादिष्ठाः पशवो देवेष्वासन् मदिष्ठा असुरेषु तत्तद्भागस्यैव तैस्तैः प्रयुक्तत्वात्। तदा देवा विदित्वाऽसुराणां प्रत्युपायं 'स्वादिष्ठया मदिष्ठय'इति पादं पठित्वा तानपि स्वयमलभन्त। अतस्तेषां पशूनवृञ्जतेत्युच्यते॥ ६॥

विदुषः फलमाह—

पशून् भ्रातृव्यस्य व्यृङ्क्ते य एवं वेद॥ ७॥

स्पष्टोऽर्थः॥ ७॥

अथोक्ते च तृचे संहितमपि विधत्ते—

तासु सꣳहितम्॥ ८॥

गेयमिति शेषः॥ ८॥

अथैतदन्वर्थनामत्वेन प्रशंसति—

साध्या वै नाम देवा आसꣳस्तेऽवच्छिद्य तृतीयसवनम्माध्यन्दिनेन सवनेन सह स्वर्गꣳ लोकमायꣳस्तद्देवाः सꣳहितेन समदधुर्यत्समदधुस्तस्मात्सꣳहितम्॥ ९॥

सन्धानहेतुत्वात्संहितमिति नामाभूत्, शिष्टं कालेयार्थवद्योज्यम्॥९॥

अथैतन्माध्यन्दिनसवनान्तेन कालेयेन सह स्तौति—

कालेयं पुरस्ताद्भवति सꣳहितमुपरिष्टादेताभ्याꣳ हि तृतीयसवनꣳ सन्तायते॥ १०॥

कालेयस्य पूर्वं तृतीयसवनं सन्तत्यर्थमुक्तमस्यापि तदर्थत्वमिदानीमुच्यतेऽत उभयोर्मिलित्वा माध्यन्दिनतृतीयसवनयोः सन्तानसाधकत्वम्॥ १०॥

अथ कालेयवदस्यापि सर्व्वपृष्ठत्वमिति स्तौति—

सर्व्वाणि वै रूपाणि सꣳहितं यत्पदप्रस्तावन्तेन

राथन्तरं यदबृहतो रोहाद्बृहति तेन बार्हतं यत्पदनिधनन्तेन राथन्तरꣳसर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥ ११ ॥

उक्तमिदं पूर्वम् ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणेऽष्टमाध्यायस्य चतुर्थः खण्डः ।

अथ पञ्चमः खण्डः ।

अथ सफ-पौष्कले विधातुं तयोरुच्छन्दसी विदधाति—

उष्णिक्ककुभावेते भवतः ॥ १ ॥

अत्रापि 'अभ्यर्हितम्' इत्युष्णिक्शब्दस्य पूर्वनिपातः । अतः 'पवस्व मधुमत्तम' 'इन्द्रमग्न सुता' इत्येते ककुबुष्णिहौ भवत इत्यर्थः ॥ १ ॥

अथैतत् स्तौति—

उष्णिक्ककुब्भ्यां वा इन्द्रो व्वृत्राय व्वज्रं प्राहरत्ककुभि पराक्रमतोष्णिहा प्राहरत्तस्मात् ककुभो मध्यमं पदं भूयिष्ठाक्षरं पराक्रमणꣳ हि तदभि समौहत्तस्मादुष्णिह उत्तमं पदं भूयिष्ठाक्षरं पुरो गुरुरिव हि व्वज्रः ॥ २ ॥

उष्णिक्ककुब्भ्यां खलु पूर्वमिन्द्रो वृत्रवधार्थं वज्रं प्राक्षिपत । तद्विभज्य दर्शयति ककुभि पराक्रमत शत्रोरभिमुखं लङ्घितवान् । तत उष्णिहा च्छन्दसा प्राहरद्वज्रं यस्मादेवं कृतवांस्तस्मात् ककुभश्छन्दसो मध्यमं पदं पादो भूयिष्ठाक्षरं प्रकृतद्वादशाक्षरो भवति 'मध्यमाश्च ककुप्'इति हि ककुभो लक्षणम्।पराक्रमणसाधने'पवस्व मधुमत्तम' इति ककुभि मध्यमपादे द्वादशाक्षराणि सन्ति तदक्षराधिक्यमेव खलु पराक्रमणमभित उभे प्रार्ध्वे समौहदष्टाक्षरौ पादौ सम्यगवहत् । तद्वा तत् ककुप्छन्द इन्द्रस्य पराक्रमणं खल्वभिसमौहत् अभिसमवहत् । अतो मध्यमपादाधिक्यं युक्तमेव तस्मादेव वज्रप्रहरणसाधनत्वादेवोष्णिहमुत्तमं पदं भूयिष्ठाक्षरमष्टाक्षरपादद्वयापेक्षयाऽधिकाक्षरम् 'उष्णिक् त्रिपदान्तो द्वादशः' इति हि लक्षणम् । वज्रोऽपि पुरो गुरुरिवाग्रभागे स्थूल इव खलु वज्रः ॥ २ ॥

उक्तार्थस्य फलकथनम्—

व्वज्रं भ्रातृव्याय प्रहरति य एवं व्वेद ॥ ३ ॥

स्पष्टम् ॥ ३ ॥

पुनस्ते प्रशंसति—

नासिके वा एते यज्ञस्य यदुष्णिक्ककुभौ तस्मात् समानं च्छन्दः सती नाना यज्ञं वहतस्तस्मात् समानाया नासिकायाः सत्या नाना प्राणावुच्चरतः ॥ ४ ॥

यस्मादेते च्छन्दसी यज्ञस्य नासिके तस्मात्समानमेकं छन्दः सती सत्यौ नाना पृथक्भूते एव ते यज्ञं वहतः। यस्मादेवमभूत् तस्मादिदानीमपि लोके समानाया एकस्या एव नासिकायाः सत्याः सकाशाद्विसभेदेन प्राणावुच्छ्वासौ नाना पृथगेवोच्चरत उद्गच्छतः ॥ ४ ॥

अथ प्रासङ्गिकमनयोर्नियमविशेषमाह—

प्राणा वा उष्णिक्ककुभौ तस्मात्ताभ्यान्न षषट्कुर्व्वन्ति यद्षषट्कुर्य्युः प्राणानग्नौ प्रदध्युः ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

पूर्वत्रानयोः प्राणोद्गमनसाधननासिकात्वेनोक्तमिदानीं सामद्वयं विधत्ते—

तासु सफं विफमिव वै तृतीयसवनं तृतीयसवनस्य सफत्वायाथैतत्पौष्कलमेतेन वै प्रजापतिः पुष्कलान् पशूनसृजत तेषु रूपमदधाद्यदेतत्साम भवति पशुष्वेव रूपन्दधाति ॥ ६ ॥

पौष्कलं कुर्व्वन्नेतेन वै पुष्कलान् समग्रान् पशूनसृजत । तेष्वेव सृष्टेषु पुनरेतेनैव रूपेणापत्योत्पादनलक्षणां पुष्टिमदधात् स्थापितवान्। एवं पशुपौष्कल्यहेतुत्वात् पुष्कलमिति निर्व्वचनद्वारा स्तुतिः॥६॥

अथ इयावाश्वान्धीगवे उभे अपि सामनी विधित्सुस्तयोरुभयोः समानं स्तोत्रियं प्रशंसति—

पुरोजिती वो अन्धस इति पद्या चाक्षर्य्या च विराजौ भवतः पद्यया वै देवाः स्वर्गँ लोकमायन्नक्षर्यया ऋषयो नु प्राजानन्यदेते पद्या चाक्षर्य्या च विराजौ भवतः स्वर्गस्य लोकस्य प्रज्ञात्यै ॥ ७ ॥

अस्मिंस्तृचे प्रथमानुष्टुबुत्तरे गायत्र्यौ । एवं सति पद्या पादैः सम्पन्नाऽक्षर्य्या चाक्षरपरिगणनया सम्पन्ना च ते विराजौ भवतः 'द-

शाक्षरा ज्विराड्' इति श्रुते र्विराजि दशसंख्यासद्भावादत्रापि मिलित्वा दशपादानां सम्भवात्। तृचस्य मिलित्वाऽशीत्यक्षराणि तानि विराट् संख्यया विभक्तानि समान्येव भवन्ति इति 'पद्याक्षर्य्या च ज्विराजौ भवतः' इत्युक्तं यद्वा प्रथमायामृचि दशपदानि सन्ति ततः पद्या विराट् 'ऋचाक्षर्य्या ज्विराड्' इति विज्ञेयम्। अस्त्वेवं किं ततः स्यादिति चेदुतो भवतीत्याह। पूर्वं पद्यया हि विराजा देवाःस्वर्गं लोकमायन् पदस्याक्रमणसाधनत्वादेतदुचितम्। अक्षर्य्यया तु विराजा च ऋषयोऽनुक्रमेण स्वर्गं प्राजानन्। अक्षरविराट् प्रयोगेण यज्ञन्तद्वारा तत्फलभूतं स्वर्गं चेति क्रमः। अत इदानीन्तनैरपि पद्या चाक्षर्य्या च विराजौ कर्त्तव्ये भवतः किमर्थं ? स्वर्गस्य प्रज्ञात्यै परिज्ञानाय ॥ ७ ॥

अथास्मिंस्तृचे प्रथमं श्यावाश्वं विधत्ते—

तासु श्यावाश्वम् ॥ ८ ॥

स्पष्टम् ॥ ८ ॥

तासु 'पुरोजितीव' इत्याद्यासु तिसृषु ऋक्ष्वेतत्प्रशंसति—

श्यावाश्वमार्ब्बनानसꣳ सत्रमासीनं धन्वोदवहन् स एतत्सामापश्यत्तेन वृष्टिमसृजत ततो वै स प्रत्यतिष्ठत्ततो गातुमविन्दत गातुविद्वा एतत्साम ॥ ९ ॥

आर्ब्बनानसमर्ब्बनानसः पुत्रं श्यावाश्वमृषिं सत्रमासीनमितरे सत्रिणः क्रोधाद्धन्व निरुदकप्रदेशमुदवहन्नुदगमयन्। स तृषार्त्तः सन्नेतत्सामापश्यत्। स वृष्टिमसृजत ततः खलु वृष्टयां सत्यां सस्योत्पत्तौ पृथिव्यां प्रत्यतिष्ठत्। ततो गातुं यज्ञानुष्ठानमार्गमविन्दत। इत्थं गातुविन्मार्गलम्भनं खल्वेतत्साम मार्गलिप्सुना श्यावाश्वेन दृष्टत्वादपि श्यावाश्वमभूदिति ज्ञातव्यम् ॥ ९ ॥

अथ विदुषः फलमाह—

ज्विन्दते गातुं प्रति तिष्ठत्येतेन तुष्टुवानः ॥ १० ॥

एतेन साम्ना तुष्टुवानोऽपि यजमानो गातुं लौकिकवैदिकविधेयं मार्गं विन्दते प्रतितिष्ठति ॥ १० ॥

अथैतत्सामगतं स्तोभद्वयं प्रशंसति—

इन्द्रस्तृतीयसवनाद्बीभत्समान उदक्रामत्तन्देवाः श्यावाश्वेनैहायि एहियेत्यन्वाह्वयन् स उपावर्त्तत यदेतत्साम भवति तृतीयसवनस्य सेन्द्रत्वाय ॥ ११ ॥

ऋजीषदोषदुष्टत्वेनापगतमिन्द्रं देवाः पूर्वं श्यावाश्वेन साम्ना 'एहायि पहिया' इत्याह्वयन्। एहीत्यस्य विकारः 'एहा२ इ' एवमाहूतः सवनं प्रत्युपागच्छत्। इतरत्सुज्ञानम्॥ ११॥

अथान्धीगवं विधत्ते—

अथैतदान्धीगवमन्धीगुर्वा एतत्पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्टयै मध्ये निधनमैडम्भवत्येतेन वै तृतीयसवनं प्रतिष्ठितं यन्मध्ये निधनमैडन्न स्यादप्रतिष्ठितं तृतीयसवनꣳ स्यात्॥ १२॥

अथ श्यावाश्वेष्वेवं प्रतिष्ठितं यन्मध्ये निधनमैडमिति-ऐडं इडासम्बन्धि मध्ये निधनमेतत्साम कर्त्तव्यम्। किं ततस्तत्राह, एतेन खलु मध्ये निधनेन तृतीयसवनं हि प्रतिष्ठितं निधनं हि प्रतिष्ठा तन्मध्ये भवति तेन प्रतिष्ठासिद्धिः। तथेह मध्येन हि प्रतिपुरुषा दृढाः सन्तः प्रतितिष्ठन्ति भूमौ। दृढाशब्दः पशुवाची पशवश्च प्रतिष्ठाहेतुरिति। इडानिधनत्वादपि तृतीयसवनं प्रतिष्ठितमत एवास्य साम्नः पशुपोषहेतुत्वम्। उक्तमर्थं व्यतिरेकेण दृढयति यन्मध्ये निधनमैडन्न स्यादिति स्पष्टम्॥१२॥

अथ मध्ये निधनमेव पुनः प्रशंसति—

दशाक्षरं मध्यतो निधनमुपयन्ति दशाक्षरा विराड्विराज्येव प्रतितिष्ठति॥ १३॥

'अपः श्वानं श्नथिष्टना २३४५' इति दशाक्षरनिधनं साम मध्यत उपयन्ति स्तोतारः। विराडपि दशाक्षरा तेन विराज्येव यजमानः प्रतितिष्ठति॥ १३॥

अथ काव्यं साम विदधाति—

अभिप्रियाणि पवत इति काव्यं प्राजापत्यꣳ साम॥१४॥

'अभिप्रियाणि' इति तृचे गीयमानं काव्यं कविना भार्गवेन दृष्टं प्राजापत्यं साम भवत्यनिरुक्तासु-ऋक्षु गीयमानत्वात्। इदं प्राजापत्यं यथा वामदेव्यं 'कयान' इत्यनुक्तासु गीयमानन्तद्वत्॥ १४॥

अथैतत् स्तौति—

प्रजा वै प्रियाणि पशवः प्रियाणि प्रजायामेव पशुषु प्रतितिष्ठति॥ १५॥

लोके प्रजाः पशवः प्रियाणि। अत्रापि प्रियाणीति श्रुतत्वाच्च तत्प्रयोगेन प्रजायां पशुषु च प्रतिष्ठितो भवति यजमानः॥ १५॥

अथौशनकावे सह स्तौति—

रश्मी वा एतौ यज्ञस्य यदौशनकावे देवकोशो वा एष यज्ञमभिसमुज्जितो यदेते अन्ततो भवतो यज्ञस्यारिष्टयै॥ १६॥

यदौशनकावे एतौ यज्ञस्य रश्मी वै बन्धनरज्जू। रश्मिशब्दापेक्षया 'एतौ' इति पुंलिङ्गनिर्देशः। यदेते उक्ते सामनी अन्ततो भवत एष यज्ञमभिसमुज्जितः। यज्ञमुद्दिश्य देवकोशो देवानां निधानागारं खलु समुज्जितः। तच्च यज्ञस्यारिष्टयै अहिंसायै भवति॥ १६॥

इति ताण्ड्यमहाब्राह्मणेऽष्टमाध्यायस्य पञ्चमः खण्डः।

अथ षष्ठः खण्डः।

देवा वै ब्रह्म व्यभजन्त तस्य यो रसोऽत्यरिच्यत तद्यज्ञायज्ञीयमभवत्॥ १॥

पूर्वं देवा ब्रह्म वेदराशिं व्यभजन्त ममायं भागो ममायं भाग इति विभागमकुर्वन्। तस्य विभज्यमानस्य ब्रह्मणो रसोऽत्यरिच्यत तद्यज्ञायज्ञीयं सामाभवत्॥ १॥

अथैतद्विधत्ते—

ब्रह्मणो वा एष रसो यद्यज्ञायज्ञीयं यद्यज्ञायज्ञीयेन स्तुवन्ति ब्रह्मण एव रसे यज्ञं प्रतिष्ठापयन्ति॥ २॥

अत एतद्यज्ञायज्ञीयं ब्रह्मणो रसः खलु शिष्टं स्पष्टम्। यद्यपि यच्छब्दयोगादनुवादत्वं तथाप्यपूर्वत्वाद्विधिरेवाभ्युपगन्तव्यः॥ २॥

अथैतन्निर्वचनद्वारा प्रशंसति—

योनिर्वै यज्ञायज्ञीयमेतस्माद्वै योनेः प्रजापतिर्यज्ञमसृजत तस्माद्यज्ञायज्ञीयम्॥ ३॥

एतद्यज्ञायज्ञीयं साम योनिर्वै-उत्पत्तिहेतुः। तदेव साधयति एतस्मात् खलु यज्ञायज्ञीयाद्योनेः प्रजापतिर्यज्ञमसृजत। यज्ञमिति जात्यभि-

प्रायेणैकवचनम्। यद्यस्मादेतस्मात् साम्नो यज्ञं यज्ञं वीप्सया सर्वोऽपि यज्ञः परिगृह्यते कृत्स्नं यज्ञजातमसृजत। तस्माद्यज्ञयज्ञसम्बन्धाद्यज्ञायज्ञीयमिति नामास्य सम्पन्नम् ॥ ३ ॥

अथैतत्सामप्रयुक्तं प्रशंसति—

तस्माद्वा एतेन पुरा ब्राह्मणा वहिष्पवमानमस्तोषत योनेर्यज्ञं प्रतनवामहा इति यज्ञन्ततः स्तुवन्ति योनौ यज्ञं प्रतिष्ठापयन्ति ॥ ४ ॥

तस्मादेव कारणात् पुरा ब्राह्मणा अनुष्ठातारो यज्ञस्यादिभूतं वहिष्पवमानमस्तोषत स्तोत्रमकृषत। कया बुद्ध्या योने रेतस्य साम्नः सकाशाद्यज्ञं प्रतनवामहा इति बुद्ध्या। अतोऽप्यस्य योनित्वं सिद्धमतोऽद्याप्यन्ततः स्तुवन्ति योनावेव यज्ञं समापयन्तीति ॥ ४ ॥

अथैतत्सर्वयज्ञात्मकत्वेन प्रशंसति—

असुरेषु वै सर्वो यज्ञ आसीत्ते देवा यज्ञायज्ञीयमपश्यꣳस्तेषां यज्ञायज्ञा वो अग्नय इत्यग्निहोत्रमवृञ्जत गिरागिरा च दक्षस इति दर्शपूर्णमासौ प्र प्र वयममृतजातवेदसामिति चातुर्मास्यानि प्रियमित्रन्नशꣳसिषमिति सौम्यमध्वरम् ॥ ५ ॥

पूर्वमसुरेष्वेव सर्वो यज्ञ अग्निहोत्रादिचतुर्भेदभिन्नः सर्वो यज्ञ आसीन्न देवेषु। ते देवाः स्वाधीनकरणोपायत्वेन यज्ञायज्ञीयमपश्यन्। दृष्ट्वा च तेषां सम्बन्ध्यग्निहोत्रमवृञ्जत 'यज्ञायज्ञावः' इति पादेन। अत्राग्नय इति श्रूयमाणत्वात् अग्निहोत्रवर्जनस्यायमुचितः। अग्निहोत्रं तेभ्यः सकाशाद्वियुज्य स्वयमलभतेत्यर्थः। यद्वा क्रमोऽत्र सम्बन्धहेतुः, अग्निहोत्रदर्शपूर्णमासौ चातुर्मास्यानि सौम्योऽध्वर इति क्रमः। अतस्तत्राग्निहोत्रप्राथम्यात् स्तोत्रीयायामपि 'यज्ञायज्ञा' इत्यस्य प्रथमपादत्वात्तेन तद्वर्जनमुचितम्। एवमुत्तरत्रापि तत्तत्सादृश्यानुक्रमाद्वा सम्बन्ध्येवाव गन्तव्यः। द्वितीयपादे 'दक्षस' इति दकारः श्रूयतेऽतो दर्शपूर्णमासौ प्रावृञ्जत। तृतीयपादे प्रकर्षवाची प्रशब्दः श्रूयतेऽतस्तेनाक्षयसुकृतफलानि चातुर्मास्यान्यवृञ्जत चातुर्मास्यानामक्षयसुकृतसाधनत्वं 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति श्रुतेः। 'प्रियमित्रन्न' इति चतुर्थपादे प्रियशब्दः श्रूयते सोमयागश्च देवानामतिशयेन प्रियः। अतस्तेन पादेन सौम्याध्वरमवृञ्जत ॥ ५ ॥

अथैतत् स्वस्तोत्रीयगतपद्वीप्साद्वारेण प्रशंसति—

यज्ञा वो अग्नये गिरा च दक्षसे प्र वयममृतज्ञातवेद-
साम्प्रियमित्रन्नशꣳसिषमिति वै तर्हि च्छन्दाꣳस्यास-
ꣳस्ते देवा अभ्यारम्भमभिनिवर्त्य च्छन्दोभिर्यज्ञमसुरा-
णामवृञ्जत ॥ ६ ॥

पूर्व्वमसुराणां यज्ञे विनापि वीप्सया 'यज्ञावो अग्नये गिरा च दक्षसे प्रवयम्' इति खलु च्छन्दाꣳसि च्छन्दोऽवयवभूताः पादा अक्षराणि वा आसन्। ते देवा एतदवगत्याभ्यारम्भमभ्यस्य पदं ते देवा हमभिनिव-र्त्यारिभ्यः सकाशाद्यज्ञं छन्दोभिः प्रावृञ्जत ॥ ६ ॥

अथ वेदितुः फलमाह—

च्छन्दोभिर्यज्ञं भ्रातृव्यस्य व्यृङ्क्ते य एवं वेद ॥ ७ ॥

स्पष्टम् ॥ ७ ॥

अत्र गिरागिरेति पादे गकारमकृत्वा इरा इरेति पठितव्यमिति विवक्षुराह।

एतद्धस्म वा आह कूशाम्बः स्वायवो ब्रह्मा लात-
व्यः कꣳस्विदद्यशिशुमारी यज्ञपथेऽप्यस्ता गरिष्यति॥८॥

एतद्धस्माह वक्ष्यमाणमिदमुवाच खलु। आहेत्यस्य भूतकालसम्ब-न्धज्ञापनार्थं स्मेति प्रयोगः। क आह? कूशाम्ब एतन्नामा आचार्य्यः स्वा यवः स्वायोः पुत्रः ब्रह्मा श्रुतादिना परिवृढो लातव्य एतद्गोत्रसम्बन्ध-कथनमेतदिति। उक्तमर्थं विवृणोति, अद्यास्मिन् दिने कं स्वित् कं वा शिशुं शिशुमारी यज्ञपथेऽप्यस्ता प्रक्षिप्ता सती गरिष्यतीति ॥ ८ ॥

का शिशुमारी कथं गरिष्यतीति तदुभयं दर्शयति—

एषा वै शिशुमारी यज्ञपथेऽप्यस्ता यज्ञायज्ञीयं
यद्गिरागिरेत्याहात्मानं तदुद्गाता गिरति ॥ ९ ॥

यज्ञायज्ञीयं सामेति यत् एषैव शिशुमारी शिशुवत्प्रयोगानभि-ज्ञानां घातिनी यज्ञपथे यज्ञस्य मार्गे औद्गात्ररूपेऽप्यस्ता अभिप्रास्ता तथा सति यत् गिरा गिरेति ब्रूयादुद्गाता तेनात्मानमेव गिरति ॥ ९ ॥

कः परिहार इति तमाह—

ऐरङ्कृत्वोद्गेयमिरायां यज्ञं प्रतिष्ठापयत्यप्रमायुक
उद्गाता भवति ॥ १० ॥

ऐरमिरासम्बन्धं कृत्वा गेयं 'गिरा गिरा'इत्यधीतमपि 'इरा इरा'इति कृत्वा गातव्यमित्यर्थः। तेन यज्ञमिरायां भूमावेव प्रतिष्ठापयतीति। अत उद्गातुरपि मरणदोषो नास्ति। इदमेव वाक्यं विषयीकृत्य नवमस्य प्रथमपादेऽध्ययनगतो गिराशब्दो ब्राह्मणविहित इराशब्दश्च विकल्पेन प्रयोगे प्रयोक्तव्यावुत इराशब्द एवेति? न विकल्प इराशब्द एव प्रयोक्तव्य इति सिद्धान्तितम्। सोऽपि इराशब्दो न गातव्यो गातव्यो वेति विचार्य गातव्य एवेति सिद्धान्तितम्। तद्विचारद्वयमत्रार्थनिर्णयाय प्रदर्श्यते तत्र प्रथमन्दर्शयति।

इरा गिरा विकल्पः स्यादुतेरैवाविशेषतः।
आद्ये मैवं बाधपूर्वमिरायाविहितत्वतः॥

ज्योतिष्टोमे श्रूयते यज्ञायज्ञीयेन स्तुवीतेति 'यज्ञायज्ञा' इत्यनेन शब्देनयुक्तायामृच्युपन्नं साम यज्ञायज्ञीयन्तस्यामृचि गिराशब्दः पठ्यते 'यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे'इति तत्र सामगा योनिगानमधीयानाः सहैव गकारेण गायन्ति गा इरा गिरा इति। ब्राह्मणे तु गकारलोपपूर्वकमाकारयकारादिकं गानं विधीयते 'ऐरं कृत्वोद्गेयमिति' गिराशब्दे गकारलोपादि भवति। इरायाः सम्बन्धि गानमैरं तादृशं कृत्वा प्रयोगकाल उद्गानं कर्त्तव्यमित्यर्थः। तत्र योनिगानब्राह्मणयोः समानबलत्वेनाविशेषाभावाद्विकल्पेन प्रयोक्तव्यमिति प्राप्ते ब्रूमः 'न गिरागिरेति ब्रूयाद्यद्गिरागिरेति ब्रूयादात्मानमेव तदुद्गाता गिरेदिति' गकारसहितगाने बाधमुक्त्वा गकाररहितं 'इरा' पदं गेयत्वेन विधीयते। तत्तदादेरिकारस्य गानार्थमाकारो यकार इकारश्चेति त्रीन् वर्णान् प्रयुज्य तत्र वा 'ईरा इरा' इत्येव मन्तव्यम्। अथ द्वितीयं दर्शयति,

इरा पदन्न गेयं स्याद्गेयं वा गीत्यनुक्तितः।
न गेयं गीयमानस्य स्थाने जाते प्रगीयते॥

ब्राह्मणेन विहित इराशब्दो न गातव्यः कुतः? ऐरमिति शब्देन गीतेरनुक्तत्वात्। पाणिनीयेन 'विमुक्तादिभ्योऽण्' इति सूत्रेणेराशब्दादण् प्रत्ययो मत्वर्थीयो विहितः। तथा सति 'इरा' पदोपेतं कृत्वेत्येतावानेवार्थो भवति यदि प्रगीतेरापदसम्बन्धस्तद्धितेन विवक्ष्यते तदानीमाकारो यकार इकारो रेफ आकारश्चेत्येतैः पञ्चभिर्वर्णैर्निष्पन्नमा ईराख्यं गीयमानेराशब्दप्रातिपदिकं भवति। तादृशात् प्रातिपदिकात् पाणिनीयेन 'बुद्राच्छः'इति सूत्रेण प्रत्ययान्तरेण प्रत्ययान्तरे सति 'आ' ईरीतं कृत्वेति ब्राह्मणपाठो भवेत्। तस्मान्न गेयमिति

प्राप्ते ब्रूमः, गीयमानस्य गिरापदस्थान इरापदं विधीयत इति पदमात्रस्य बाधो गानं तु न बाध्यते । किञ्च विमुक्तादिसूत्रेणाण् प्रत्ययेऽपि पूर्वस्मात् 'मतौ स्थः सूक्तसाम्नोः'इति सूत्रात्सामानुवृत्तेरेरं सामेत्यर्थो भवति । सामत्वञ्च गीतिसाध्यं तदा तु 'तस्य विकारः'इत्यस्मिन्नर्थेऽण् प्रत्ययः । तदानीं गिराया विकार इति विग्रहे यथोक्तं गानं लक्ष्यते तस्माद्गातव्यम् ॥ १० ॥

अथैतस्य स्तोत्रीयातृतीयपादे प्रप्रवयमित्येतस्मिन् प्रप्रेत्येवं निन्दित्वा प्रप्रीं वयमिति पठितव्यमित्याह—

वैश्वानरे वा एतदुद्गातात्मानं प्रदधाति यत्प्रप्र वयमित्याह प्रप्रीं वयमिति वक्तव्यं वैश्वानरमेव परिक्रामति ॥ ११ ॥

अस्याग्नेयत्वादेतदेतेनोद्गाताऽऽत्मानं वैश्वानरेऽग्नौ प्रदधाति प्रक्षिपति यद्येतत् प्रप्रवयमित्याह ब्रूयात् । अत्राग्नौ प्रक्षेपवाचिनः प्रशब्दस्य सन्निधानात्तत्परिहार उच्यते । प्रप्रीं वयमिति वक्तव्यन्तत्र परीत्यक्षरद्वयसन्निधाद्वैश्वानरमेव परि अतीत्य क्रामतीति । अतो नोक्तदोष इत्यर्थः॥११॥

प्रियमित्रन्नेति चतुर्थपादेन शब्दं परित्यज्य प्रकारान्तरद्वयेन पठितव्य इत्याह—

यो वै निहनुवानं च्छन्द उपैति पापीयानुज्जगिवान् भवत्येतद्वै निहनुवानं च्छन्दो यन्न शंसिषमिति नु शंसिषमिति वक्तव्यꣳ सुशंसिषमिति वा न निहनुवानं छन्द उपैति वसीयानुज्जगिवान् भवति ॥ १२ ॥

य उद्गाता निहनुवानं क्रियमाणं कर्म्म निहनुवानं छन्दो निहनुवनाचिपादोपेतत्वाच्छन्दोऽपि निहनुवानन्तदुपैति प्राप्नोति स उद्गमिष्यन्नुद्गाता पापीयान् भवति । किं तन्निहनुवानं छन्द इति ? तद्दर्शयति 'न शंसिषम्'इति यत्तदेव निहनुवानं छन्दः शंसन् स्तुवन्नप्युद्गाता नुशंसिषमिति ब्रूते । अतोऽस्य निहनुवरूपत्वमतोऽनुशंसिषमिति वक्तव्यम् । नु इत्येतस्येदानीन्तनकालवाचित्वान्नापह्नवदोषः । यद्वा सुशंसिषमिति वक्तव्यम् । तथा सति नोक्तदोषवच्छन्दःप्राप्तिः । अत उज्जगिवानुद्गाता वसीयान् प्रशस्यो भवति ॥ १२ ॥

अथ वाक्प्रकारनिधनं यज्ञायज्ञीयं तच्च न स्वरूपेण प्रयोज्यात्

किन्तु प्रथमाक्षरं प्रयोक्तव्यमित्याह—

यस्य वै यज्ञा वागन्ता भवन्ति वाचश्छिद्रेण स्रवन्त्येते वै यज्ञा वागन्ता ये यज्ञायज्ञीयान्ता एतद्वाचश्छिद्रं यदनृतं यदग्निष्टोमयाज्यनृतमाह तदन्वस्य यज्ञः स्रवत्यक्षरेणान्ततः प्रतिष्ठाप्यमक्षरेणैव यज्ञस्य च्छिद्रमपि दधाति ॥ १३ ॥

यस्य यजमानस्य यज्ञा वागन्ता वागिति निधनान्ता भवन्ति ते वाचश्छिद्रेण व्यवधानेन स्रवन्ति निष्फला भवन्ति। वागन्तानन्यान् दर्शयति, एते खलु यज्ञा वागन्ता ये यज्ञा यज्ञायज्ञीयस्तोत्रान्ताः स्युः। कथमस्य वाचश्छिद्रत्वसम्भव इति? तदुपपादयति यदनृतमेतदेव वाचश्छिद्रन्तदपि कथमत्र सम्भवतीति? तदत्र सम्भावयति, यद्यपि अग्निष्टोमयाज्यनृतमाह ब्रूते तदनृतच्छिद्रमन्वस्य यजमानस्य यज्ञः स्रवति गलितो भवति तस्य परिहार उच्यते। अन्ततो अग्निष्टोमसामान्ते ऽक्षरेण 'वाक्' इत्यक्षरद्वयेन 'वा' इत्याद्याक्षरेणैव प्रतिष्ठाप्यं समापनीयमेतत्साम तथा सत्येकेनैवाक्षरेणैव यज्ञस्य छिद्रमनृतवदनमनृतवदनुरूपमपिदधात्युद्गाता ॥ १३ ॥

उक्तैकाक्षरस्तुत्यन्तरमाह—

विराजो वा एतद्रूपं यदक्षरं विराज्येवान्ततः प्रतितिष्ठति ॥ १४ ॥

यदक्षरमस्त्येतद्विराजो ऽन्नस्य रूपं खलु। अश्नोतीत्यक्षरं 'विराडित्यन्ननाम' विराज इति व्युत्पत्त्या 'अन्नं विराडिति' श्रुतिश्च। तस्यान्नस्य रूपं स्वयशसा लोके व्याप्तं भवति। ततोऽक्षरं विराजो रूपमित्युच्यते। अतोऽक्षरमन्ते सम्पादनेन स यज्ञोऽन्ततो विराज्येव प्रतिष्ठितो भवति॥१४॥

इति ताण्ड्यमहाब्राह्मणेऽष्टमाध्यायस्य षष्ठः खण्डः।

अथ सप्तमः खण्डः।

अथास्य प्रथमस्तोत्रीयायां सवनानि त्रीण्यपि च्छन्दांस्यवरोहेण सम्पाद्य प्रशंसति—

इतो वै प्रातरूर्द्धानि च्छन्दाꣳसि युज्यन्तेऽमुतोऽवाञ्चि यज्ञायज्ञीयस्य स्तोत्रे युज्यन्ते यज्ञा वो अग्नये गिरा च

दक्षस इति द्वादशाक्षरं प्रवयममृतं जातवेदसमित्येकाद शाक्षरं प्रियम्मित्रस्य शर्ंसिषमित्यष्टाक्षरम् ॥ १ ॥

प्रातः सवन इतो गायत्रमारभ्योर्ङ्नानि च्छन्दांसि त्रिष्टुबादीनि युज्यन्ते प्रयुज्यन्ते । तृतीयसवनान्ते यज्ञायज्ञीयस्तोत्रे त्वमुतो जागता-दर्वाञ्च्यवरोहक्रमाणि च्छन्दांसि युज्यन्ते तत्कथमिति ? स्वयमेव प्रद-र्शयति । आदितः पादद्वयेनावृत्तान्यक्षराणि विहाय द्वादशाक्षराणि तज्जागतं छन्दः । एवमुत्तरयोरपि द्रष्टव्यम् ॥ १ ॥

अथोक्तच्छन्दस्त्रयमेकीकृत्यानुष्टुभं सम्पाद्य प्रशंसति—

अनुष्टुभमुत्तमाꣳ सम्पादयतीयं वा अनुष्टुबस्या-मेव प्रतितिष्ठति ॥ २ ॥

उक्तप्रकारेण पादचतुष्टयाक्षरपरिगणनायामेकत्रिंशदक्षराणि भव-न्ति । 'न वा एकेनाक्षराणि च्छन्दांसि वियन्ति'इति शास्त्रादनुष्टुप्छन्दो भवति । ततश्च कथं प्राशस्त्यमिति तद्दर्शयति । एषाऽनुष्टुबियं वै भूरेव खलु । अनुष्टुभः समसंख्यारूपपादचतुष्टयसद्भावात्प्रतिष्ठात्मिका भूमि-रपि सर्व्वेषां प्रतिष्ठा । अतस्तद्रूपत्वेन स्तुतिः । अतोऽनया स्तुवन् यजमानोऽस्यामेव भूमौ प्रतिष्ठितो भवति ॥ २ ॥

अथ सम्पादितमेवानुष्टुभं द्वेधा प्रशंसति—

ऽवाग्वा अनुष्टुब्वाच्येव प्रतितिष्ठति ज्यैष्ठ्यꣳ वा अनुष्टुब्ज्यैष्ठ्य एव प्रतितिष्ठति ॥ ३ ॥

उक्तप्रकारेणैव सर्ववागात्मिकानां जगतीत्रिष्टुब्गायत्रीणामनुष्टु-बन्तः पातित्वादनुष्टुब्वागित्युच्यते । अत एव हेतोरनुष्टुभो ज्येष्ठत्व-मपि । शिष्टं स्पष्टम् ॥ ३ ॥

अथ यज्ञायज्ञीयस्य गानं प्रश्नोत्तराभ्यां दर्शयति—

कथमिव यज्ञायज्ञीयङ्गेयमित्याहुर्यथाऽनड्वान् प्र-स्रावयमाण इत्थमिव चेत्थमिव चेति ॥ ४ ॥

कथमिव यज्ञायज्ञीयं सामगेयमिति गानप्रकारविषयं प्रश्नं कुर्वन्ति ब्रह्मवादिनस्तत्रेदमुत्तरमभिज्ञा आहुः कथं ? यथाऽनड्वान् प्रस्रावयमाणो मूत्रधारां सततं वक्रां भूमौ पातयमान इत्थमिव पृथक् पृथक् प्रकार-मनृजु कुर्वन्नेति तद्वत् गेयमित्याहुः । इतिशब्द अभिज्ञोत्तरसमाप्तिद्यो-तनार्थः ॥ ४ ॥

इत्थमिव चेत्थमिवेत्युक्तं विवृणोति—

वैश्वानरं वा एतदुद्गातारऽनु प्रसीदन्नेतीत्याहुर्यज्ञायज्ञीयस्यर्च्चꣳ संप्रत्याहेति परिक्रामतेवोद्गेयं वैश्वानरमेव परिक्रामति ॥ ५ ॥

यद्यपि यज्ञायज्ञीयस्य स्तोत्रीयामृचं सम्प्रतीदानीमाहाधीतेनैव पाठेन ऋजुनैवाहोद्गातैतदेतेन वैश्वानरमेवानु—आनुकूल्येन प्रसीदन् प्रकर्षेण सन्निधिं गच्छन्नेवैतीत्याहुः । तच्च गमनन्दाहाय भवति । अतस्तत्परिहाराय परिक्रामते च । अध्ययनपाठमतिक्रम्य ब्राह्मणोक्तप्रकारेणेतरेभ्यो विलक्षणमितस्ततः क्रामतेवोद्गेयम् । तेन वैश्वानरमेव परिक्रामति—अग्निसन्निकर्षमप्राप्यैव लम्भयति ॥ ५ ॥

अथैतच्छिरः प्रावृत्य गातव्यमिति सार्थवादं विदधाति—

वैश्वानरे वा एतदध्वर्य्युः सदस्यानभिसृजति यज्ञायज्ञीयस्य स्तोत्रमुपावर्त्तयति प्रावृतेनोद्गेयं वैश्वानरेणानभिदाहाय ॥ ६ ॥

यज्ञायज्ञीयस्य स्तोत्रमुद्गातृनुपावर्त्तयति प्रेरयति । 'अस्युर्जमुर्जिवाससर्जे'त्यादिनोपावर्त्तध्वमिति ह्यद्धर्य्युः स्तोत्रमुपाकरोति । एतदेतेन स्तोत्रोपाकरणरूपेण वैश्वानरेणैव खल्वध्वर्युः सदस्यानभिसृजत्यभिसंयोजयति । अतस्तत्परिहाराय प्रावृतेन वेष्टितेन वस्त्रेणोद्गातव्यम् । तच्च प्रावरणमग्न्यनभिदाहाय भवति ॥ ६ ॥

प्रावरणे किञ्चिद्विशेषमाह—

न ह तु वै पितरः प्रावृतञ्जानन्ति यज्ञायज्ञीयस्य वै स्तोत्रे पितरो यथायथं जिज्ञासन्त आकर्णाभ्यां प्रावृत्यन्तदेव प्रावृतन्तदप्रावृतञ्जानन्ति पितरो न वैश्वानरोहिनस्ति ॥ ७ ॥

तुशब्दो वैलक्षण्यार्थः । पितरो यज्ञान्विताः स्वस्वसम्बन्धिन ऋत्विजो जिज्ञासमानाः प्रावृतं प्रकर्षेणापिहितशिरसं न ह जानन्ति नैवाधिगच्छन्ति । तेषां यज्ञसम्बन्धिऋत्विजाञ्च जिज्ञासा यज्ञायज्ञीयस्येत्यादिनोच्यते । यथायथं स्वस्ववंशमनतिक्रम्येत्यर्थः । अतः पितॄणां ज्ञानार्थमग्नेरदाहार्थञ्चाकर्णाभ्यां कर्णपर्य्यन्तं प्रावृत्यं प्रावरणं कर्त्तव्यम् । अत्राभिविधावाकारो मर्य्यादायामित्येके । तथाचापस्तम्बः 'स-

कर्णप्रावृता अकर्णप्रावृता वा स्तुवते इति' एवङ्कृते तदेव प्रावृतमप्रावृतञ्च भवति । अतः पितरोऽपि जानन्ति वैश्वानरो न हिनस्ति ॥ ७ ॥

अथ पत्नीकर्त्तृकमपामुपसर्जनमपि वैश्वानरात्मकं यज्ञायज्ञीयशान्त्यर्थमिति स्तौति—

अपः पश्चात् पत्नय उपसृजन्ति त्वैश्वानरमेव तच्छमयन्त्यापो हि शान्तिः ॥ ८ ॥

पत्नयः पश्चाद्गार्हपत्यायतनमप उपसृजन्ति तेन वैश्वानरमेव शमयन्ति । अपां शान्तिरूपत्वं प्रसिद्धम् ॥ ८ ॥

न केवलमनेन शान्तिः क्रियते किन्तु प्रजननहेतुरप्येवमिति स्तौति-

अथो रेत एव तत्सिञ्चन्त्यापो हि रेतः ॥ ९ ॥

अपां रेतस्त्वं 'अद्भिराभिषिञ्चन्ति रेतो वै आपः' इति तैत्तिरीयादिषु प्रसिद्धम् ॥ ९ ॥

अत्रैव विशेषमाह—

दक्षिणानूरूनभिषिञ्चन्ति दक्षिणतो हि रेतः सिच्यते ॥ १० ॥

अर्थस्तु स्पष्ट एव । एतदेव दक्षिणतो रेतः सेकस्य मूलमिति ज्ञातव्यम् ॥ १० ॥

अथोरुसेचनार्थमंशुकसङ्कोचमाह—

महदिव प्रत्यूह्यम्मन एवास्य तज्जनयन्ति ॥ ११ ॥

महदिवात्यन्तं प्रत्यूह्यं संवृतस्य विवरणं कार्य्यं वस्त्रस्यापोहनं कार्य्यमित्यर्थः । तथाच तैत्तिरीयकं 'नग्नं कृत्वोरुमुपप्रवर्त्तयन्तीति' तत्तेन निर्लज्जमत्यन्तं वस्त्रप्रत्यूहनेनास्योरूमध्यस्थापितोदकस्य रेतः सेकस्थानीयस्य तत्स्थानीयमुदयन्तमित्यर्थः । मन एव जनयन्ति मनस्विनं पुत्रमुत्पादयन्तीत्यर्थः । जनयन्तीति प्रयोगबहुत्वापेक्षया बहुवचनम् ॥ ११ ॥

अथाध्वर्य्युभिः कारयितव्यमपातृकर्त्तृकं पत्नीसंख्यापनं विधत्ते—

उद्गात्रा पत्नीः संख्यापयन्ति रेतोधेयाय ॥ १२ ॥

प्रजापतिर्व्वोद्गाता' इत्युक्तम् । अतोऽध्वर्य्युभिः क्रियमाणमुद्गात्रा संख्यापनं रेतोधेयाय पत्नीषु रेतोधारणाय भवति । अपः पश्चात्पत्नय उपसृजन्तीत्यारभ्योद्गात्रा पत्नीः संख्यापयन्ति । रेतोधेयायेत्यन्तस्यार्थस्तैत्तिरीयके वाक्यव्यत्यासेनेष्ट्वा पत्नीमुद्गाता संख्यापयति 'प्रजापतिर्व्वा एष उद्गाता प्रजानां प्रजननायोपप्रवर्त्तयति रेत एव तत्सिञ्चत् पूर-

णोपप्रवर्त्तयत्पूरणा हि रेतः सिञ्चते' इत्यादिना प्रतिपादितः अत्रोद्गातुर्हिंकारसमये पत्न्यवलोकनार्थमध्वर्य्युः प्रैषं करोति ॥ १२ ॥

अत्र पत्नीसंख्यापनमाह—

हिङ्कारं प्रति संख्यापयन्ति हिङ्कृताद्धि रेतोऽधीयत ॥१३॥

यज्ञायज्ञीयस्य तिसृणामपि स्तोत्रीयाणामादौ यदोद्गातारो हिंकुर्वन्ति तस्मिन् काले प्रतिसंख्यापयन्तीत्यर्थः । हिंकृतरेतोधानस्यैतदेव ज्ञापकम् । अत्रापस्तम्बः 'हिङ्कृत्य व्वाग्यतः स्त्रियमुपेयाद्याहरेद्वेति॥१३॥

संख्यापनस्य त्रिवारं विधत्ते—

आतृतीयायाः संख्यापयन्ति त्रिवद्धि रेतः ॥ १४ ॥

तृतीयास्तोत्रीयापर्य्यन्तं हिङ्कारं प्रत्युद्गात्रा संख्यापयन्त्यध्वर्य्यवः शरीरेन्द्रियान्तःकरणरूपेण तत्रिवृद्धि रेत इत्युक्तम् ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणेऽष्टमाध्यायस्य सप्तमः खण्डः ।

अथाष्टमः खण्डः ।

उक्तोऽग्निष्टोमः, अथ तस्यैव संस्थाभेदेऽस्योक्थस्य स्तोत्राणि विधातुमाख्यायिकामाह—

देवा वा अग्निष्टोममभिच्छित्योक्थानि नाशक्नुवन्नभिजेतुन्तेऽग्निमब्रुवँस्त्वया मुखेनेदश्चयामेति सोऽब्रवीत् किम्मे ततः स्यादिति यत्कामयस इत्यब्रुवन् सोऽब्रवीन्मद्देवत्यासूक्थानि प्रणयानिति ॥ १ ॥

देवा वा अग्निष्टोममभिजित्योक्थानि नाशक्नुवन् । अशक्तास्तेऽग्निं त्वया मुखेन पुरोगन्त्रेदमुत्क्वा स्तोत्रजपविषयमसुरसंग्रामं जयामेत्यब्रुवन् । एवमुक्तोऽग्निस्ततो जपान्मे किं फलं स्यादित्यब्रवीत् । ते च देवास्तर्हि यत् फलं कामयस इत्यब्रुवन् । सोऽग्निर्मद्देवत्यासु स्तोत्रीयासूक्थानि स्तोत्राणि प्रणयान् प्रणयेयुरित्यब्रवीत् । तथाङ्गीचक्रुरिति शेषः ॥ १ ॥

इदानीमुक्थस्तोत्रीयास्वाग्नेयत्वं विधत्ते—

तस्मादाग्नेयीष्वृक्थानि प्रणयन्ति ॥ २ ॥

तस्मादग्निना वृतत्वात् । अत्रापूर्वार्थत्वात् प्रणयेयुरिति विधिरव-

गन्तव्यः ॥ २ ॥

अथ तत्स्तोत्रीयाणां गायत्रीच्छन्दस्त्वं विधत्ते—

तस्मादु गायत्रीषु गायत्रच्छन्दा ह्याग्निः ॥ ३ ॥

तस्मादु—अग्निना कृतत्वादेव तर्ह्यस्त्वाग्नेयीषूक्थानां स्तवनं गायत्रत्वस्य कः सम्बन्ध इति? उच्यते। गायत्रच्छन्दा ह्यग्निरिति प्रजापतेर्मुखात् सहोत्पन्नत्वादग्नेर्गायत्र्यभवदित्युक्तत्वाच्चाग्निर्गायत्रच्छन्दोऽभिमानी। आग्नेयस्य कृतत्वादाग्नेयच्छन्दसोऽपि सम्बन्ध इत्यर्थः ॥ ३ ॥

अथोक्तानि साकमश्वेन विधित्सुस्तत्साम निर्वचनद्वाराप्रशंसति—

तेऽग्निम्मुखं कृत्वा साकमश्वेनाभ्यक्रामन् यत्साकमश्वेनाभ्यक्रामꣳस्तस्मात् साकमश्वम् ॥ ४ ॥

ते देवा अग्निमेव मुखं पुरोगामिनं कृत्वाऽश्वेनाश्वरूपेणाग्निना साकं सार्द्धमभ्यक्रामन् शत्रूनत्यक्रामयन्। यस्मादेवमकुर्व्वꣳस्तस्मात्साकमश्वमिति तत् साम्नोनाम सम्पन्नम् ॥ ४ ॥

इदानीं तत्साम विधते—

तस्मात्साकमश्वेनोक्थानि प्रणयन्त्येतेन हि तान्यग्नेऽभ्यजयन् ॥ ५ ॥

तस्मादित्यादि स्पष्टम्। तान्यक्षरसम्बन्धीन्युक्थान्येतेन साम्नाऽभ्यजयन्नित्येतत्तस्मादित्यस्य विवरणम्। एतद्धि 'साकमश्वमेह्यूषु ब्रवाणि ते' इत्यादिष्वाग्नेयीषु गायत्रीषु क्रियते। सर्वेषु स्तोत्रेषु स्वसमानदेवत्यानि शस्त्राणि भवन्ति ॥ ५ ॥

उक्थेषु तु स्तोत्रीयानुरूपेभ्योऽनन्तरमन्या अन्या देवताः कथं शस्यन्त इति? तत्समाधत्ते तत्रैन्द्रावरुणलक्षणं देवतावैलक्षण्यं परिहरति—

स इन्द्रोऽब्रवीत्कश्चाहञ्चेदमन्ववैष्याव इत्यहञ्चेति त्वरुणस्तं त्वरुणोऽन्वतिष्ठदिन्द्र आहरत्तस्मादैन्द्रावारुणमनुशस्यते ॥ ६ ॥

देवानां मध्ये स इन्द्र एवमब्रवीत्। किमित्युच्यते? कश्च को देवः अहं चेन्द्र इदं संग्राममुक्थजपार्थमनुक्रमेणावैष्यावोऽवगमिष्याव इति। अहं च त्वं चान्ववैष्याव इति वरुणोऽब्रवीत्। तमिन्द्रं वरुणोऽनु पश्चात् सहायत्वेनातिष्ठत्। इन्द्रस्तु स्वयमेवाहरदानयदुक्थानि। यस्मादेवं तस्मादैन्द्रावारुणमिन्द्रवरुणदेवताकं सूक्तमुक्थस्तुतमनुशस्यते। अतो वैलक्षण्यमित्यर्थः ॥ ६ ॥

एवमैन्द्राबार्हस्पत्यैन्द्रावैष्णवयोरप्युक्थस्तोत्रस्यावैलक्षण्यमिन्द्रेण प्रार्थितत्वादेवेत्याह—

स एवाब्रवीत्कश्चाहं चेदमन्ववैष्याव इत्यहश्चेति बृहस्पतिस्तं बृहस्पतिरन्वतिष्ठदिन्द्र आहरत्तस्मादैन्द्राबार्हस्पत्यमनुशस्यते स एवाब्रवीत्कश्चाहं चेदमन्ववैष्याव इत्यहश्चेति विष्णुस्तं विष्णुरन्वतिष्ठदिन्द्र आहरत्तस्मादैन्द्रावैष्णवमनुशस्यते ॥ ७ ॥

पूर्ववद्योज्यम्। अयमर्थस्तैत्तिरीयके समाम्नायते 'ते देवा असुरा मैत्रावरुणस्योक्थमश्रयन्त सोऽब्रवीदिन्द्रः कश्चाहं चेमानि तेऽसुरानन्ववैष्याव इत्यहं चेत्यब्रवीद्वरुणः' इत्यादिना ॥ ७ ॥

अथ नित्यानामेवोक्थानामभिप्रायभेदात् पशुकामनार्थत्वमप्यस्तीत्याह—

पशून् वा एभ्यस्तानाहरत्पशवो वा उक्थानि पशुकाम उक्थेन स्तुवीत पशुमान् भवति ॥ ८ ॥

एभ्योऽसुरेभ्यः सकाशाद्यान्युक्थान्याहरत्। एतान् पशूनेव खल्वाहरत्। कथमुक्थान्येव पशव इति? तदुच्यते 'पशवो वा' इति। अतः पशुकाम उक्थेन स्तुवीत स्तौति चेत् पशुमान् भवत्येव तेषामुक्थरूपेण स्थितत्वादित्यभिप्रायः ॥ ८ ॥

एवं साकमश्वमुक्थमुक्त्वा सौभरं द्वितीयमुक्थं विधित्सुराह—

बृहता वा इन्द्रो व्वृत्राय व्वज्रं प्राहरत्तस्य तेजः परापतत्तत्सौभरमभवत् ॥ ९ ॥

पूर्वमिन्द्रो वृत्रवधार्थं बृहता साम्ना वज्रं प्राहरत्। तस्य पतितं तेजः सौभरं सामाभवत् ॥ ९ ॥

अथ सौभरप्रसङ्गादतिरात्रेऽपि ब्राह्मणाच्छंसिन उक्थं सौभरमेव कार्य्यमिति विवक्षू रथन्तरपृष्ठे तावदतिरात्रस्य स्तुतिमाह—

जामि वा एतद्यज्ञे क्रियत इत्याहुर्य्यद्रथन्तरं पृष्ठं रथन्तरꣳ सन्धिर्न्नान्तरा बृहता स्तुवन्तीति यत् सौभरेण स्तुवन्ति बृहतैव तदन्तरा स्तुवन्ति बृहतो ह्यतेत्तेजो यत्सौभरम् ॥ १० ॥

पृष्ठसन्धिस्तोत्रे च रथन्तरस्य करणादन्तरा मध्ये बृहतैव स्तु-

वन्ति तज्जामित्वदोषपरिहाराय भवति 'कथं बृहता स्तुतं भवति सौभरादिति ? तदुच्यते 'बृहतो ह्येतदित्यादिना ॥ १० ॥

यद्येवमजामितायै सौभरं क्रियते सर्व्वत्र रथन्तरपृष्ठे स्याद्बृहत्पृष्ठे त्वतिरात्रे किं मध्यममुक्थं स्यादित्याशङ्क्य ? तत्रापि सौभरमेवेत्याह—

यदि बृहत्सामातिरात्रः स्यात्सौभरमुक्थानां ब्रह्मसाम कार्य्यं बृहदेव तत्तेजसा समर्द्धयति ॥ ११ ॥

यद्यतिरात्रे बृहत्साम स्यात्तस्मिन् पक्ष उक्थानां मध्ये ब्रह्मसाम ब्रह्मणाच्छंसिन उक्थं सौभरं कार्य्यम्। तथा कृते बृहदेव साम स्वतेजोरूपं सौभरमेव स्वकीयेन तेजसा समर्द्धयति ॥ ११ ॥

एवं बृहत्सामपक्षे सौभरं ब्रह्मसामास्तु रथन्तरपक्षे किं ब्रह्मसाम भवेदित्याकाङ्क्षायां ? तत्रापीदमेव सौभरं कर्त्तव्यामित्युक्तवन्तीति यत् सौभरेण स्तुवन्ति बृहता स्तुवन्ति बृहतो ह्येतत्तेजो यत् सौभरमित्याह-

यदि रथन्तरसाम्ना सौभरं कुर्य्यादजामितायै ॥१२॥

जामि वा इत्यादिनैवोक्तमित्यर्थः ॥ १२ ॥

अथ नित्यप्रयोगार्थमपि सौभरं तद्व्यतिरेकेण स्वर्गप्रतिष्ठार्थयोः प्रयोगयोरपि भवतीत्याह—

देवानां वै स्वर्गँ लोकं यन्तां दिशोऽक्लायिन्त ताः सौभरेणो इत्युदस्तम्भुवꣳस्ततो वै ता अदृꣳहन्त ततः प्रत्यतिष्ठꣳस्ततः स्वर्गँ लोकं प्राजानन्यः स्वर्गकामः स्याद्यः प्रतिष्ठाकामः सौभरेण स्तुवीत प्र स्वर्गँ लोकं जानाति प्रतितिष्ठति ॥ १३ ॥

पूर्व्वं स्वर्गं गच्छतां देवानां 'सप्तम्यर्थे षष्ठी' देवेषु स्वर्गं यत्सु सत्सु दिशोऽक्लीयन्त शिथिला आसन्। ता दिशो देवाः सौभरेण सौभरसम्बन्धिना 'ऊ' इति निधनेन उत् स्तम्भुवन् उपरि स्तम्भितवन्तः। ततः स्तम्भनात्स्वयमपि प्रतिष्ठिता आसन्। तत एव स्वर्गं लोकं प्राजानन् स्वाधीनं चक्रुः। अत उभयकामः सौभरेण स्तुवीत स्पष्टमन्यत्। अस्य फलार्थविधानेनैव नित्यप्रयोगेऽप्येताद्विहितं भवतीत्यभ्युपगन्तव्यम् ॥१३॥

तस्य 'ऊ' इति निधनभेदेन यथा स्वर्गार्थत्वमुक्तन्तथा 'ऊर्ग्' इति निधनभेदेनास्यान्नार्थत्वमपि विवक्षुराह—

प्रजापतिः प्रजा असृजत ताः सृष्टा आशनायꣳ

ताभ्यः सौभरेणोर्गित्यन्नं प्रायच्छत्ततो वै ताः समैधन्त॥१४॥

पूर्वं प्रजापतिना सृष्टाः प्रजा यदाशनायन्नशनमैच्छन्। ताभ्यः सौभरेण साम्ना 'ऊर्ग्' इत्यन्नं प्रायच्छन्।ततः खलु ताः समृद्धा अभवन्॥१४॥

इदानीं विधत्ते—

समेधन्ते ताꣳ समां प्रजा यत्रैवꣳ विद्वान् सौभरेणोद्गायति ॥ १५ ॥

यद्यस्मिन् सम्वत्सरे यस्य यजमानस्य प्रयोग एवमूर्गिति निधनमन्नद्वारा समृद्धिसाधनमिति विद्वान् सौभरेणोङ्निधनेनोद्गायति तां समां तस्मिन् सम्वत्सरे तस्य यजमानस्य प्रजा अन्नेन समेधन्ते॥१५॥

अथैतत्सामनिर्वचनद्वारा प्रशंसति—

ता अब्रुवन्त्सभृतन्नोऽभार्षीरिति तस्मात्सौभरम् ॥१६॥

ता अन्नेन समृद्धाः प्रजाः प्रजापतिं यस्मान्नोऽस्मान् सुभृतमभार्षीत् भृतवानित्थं स्तुवीत तस्मात् सौभरमिति नाम सम्पन्नम् ॥ १६ ॥

प्रजापतिर्यदन्नं ताभ्यः प्रायच्छत्तद्वृष्टिद्वारेत्याह—

वृष्टिं वा अभ्यस्तां प्रायच्छदन्नमेव ॥ १७ ॥

यदन्नमेव प्रायच्छत् प्रजापतिस्तां वृष्टिमेव प्रायच्छद्वृष्टिशब्दापेक्षया तच्छब्दस्य स्त्रीलिङ्गता ॥ १७ ॥

एवमेतत् पृथक् पृथक् फलसाधनत्वेन विहितं समुच्चित्याह—

यो वृष्टिकामः स्याद्योऽन्नाद्यकामो यः स्वर्गकामः सौभरेण स्तुवीत ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

अथ 'वृष्टिं वा अभ्यस्तां प्रायच्छत्'इत्यनेन सूचितस्य वृष्ट्यर्थप्रयोगस्य निधनं पूर्वविहितस्वर्गान्नसाधननिधनेनापि निर्दिश्य तस्मिन्नेव सामनि कामनाभेदेन व्यवस्थापयति—

हीषिति वृष्टिकामाय निधनंकुर्य्यादूर्गित्यन्नाद्यकामायो इति स्वर्गकामाय ॥ १९ ॥

हीषित्येतद्वृष्ट्यनुसरणरूपत्वात्तत्कामायोचितम्। ऊर्गित्येतत्साक्षादन्ननाम 'ऊ' इत्येतदूर्द्धगमनस्य सादृश्यात्स्वर्गायोचितम् ॥ १९ ॥

एवमस्य बहुफलसाधनत्वमुचितं कोऽस्य विशेषस्तं दर्शयति—

सर्व्वे वै कामाः सौभरꣳ सर्व्वेष्वेव कामेषु प्रतितिष्ठति॥२०॥

सर्वे कामा हि सर्वकामसाधनं सौभरमित्यर्थः । तत्र 'त्वामिद्धवितारं ववृमहे' इति श्रूयते । सर्वैः कामै रक्षितारमिन्द्रं ववृमहे प्रार्थयाम इति तस्यार्थः । अतोऽस्य सर्वकामार्थत्वं यो वृष्टिकामः स्याद्योऽन्नाद्यकाम इत्यादिवाक्यद्वयं विषयीकृत्य पूर्ववतन्त्रे द्वितीयस्य द्वितीयान्ते किं सौभरफलान्तरप्रतिपादकानि 'हीष्' इत्यादीनि वाक्यानि?उत सौभरफलानामेव व्यवस्थापकानीति विचार्य सौभरफलस्यैव व्यवस्थापकानीति सिद्धान्तितन्तन्यायोऽत्र संगृह्य प्रदर्श्यते,

वृष्ट्यन्नस्वर्गकामानां सौभरस्तोत्रमीरितम् ।
निधनान्यपि हीषूर्गू इति वृष्ट्यादिकामिनाम् ॥
फलान्तरं किं वृष्ट्यादि हीषादीनामुतोदिते ।
सौभरे फलसंभिन्ने निधने विनियम्यते ॥
फलान्तरं चतुर्थ्यौक्तं वृष्टिकामाय हीषिति ।
सौरभस्य फलं हीषित्युक्त्वा वृष्टिर्विवर्द्धते ॥
नोस्व वृष्ट्यन्नकामानामन्यत्वं प्रत्यभिज्ञया ।
नियमेऽपि चतुर्थ्येषा तादर्थ्यादुपपद्यते ।

यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः सौभरेण स्तुवीत सर्वे सौभरमिति समाम्नायः पुनःसमाम्नातं 'हीष्'इति वृष्टिकामाय निधनं कुर्य्यात्'ऊर्गू'इत्यन्नाद्यकामाय'ऊ'इति स्वर्गकामायेति।सौभरं नाम सामविशेषः निधनं नाम पञ्चभिः सप्तभिर्भागैरुपेतस्य साम्नोऽन्त्योभागः । तस्मिन्निधने हीषादयो विशेषाः।सौभरसामसाध्यस्तोत्रफलेभ्यो वृष्ट्यादिभ्योऽन्यानि वृष्ट्यादिफलान्यानयितुं विधीयन्ते कुतः ? हीषादिविधिवाक्ये वृष्टिकामायेत्यादिना चतुर्थीश्रवणात् । चतुर्थीति तादर्थ्यं बुवन्तीति हीषादीनां वृष्ट्यादिकामपुरुषशेषत्वं गमयति । तच्छेषत्वं च पुरुषाभिलषितफलसाधनत्वे सत्युपपद्यते ततः सौभरस्य हीषिति निधनविशेषणस्य च फलभूते द्वे वृष्टी भवतः । तदुभयमेलनान्महती वृष्टिश्चेति प्राप्ते ब्रूमः।सौभरविधौ यो वृष्ट्यादिकामः स एव हीषादिविधौ प्रत्यभिधौ प्रत्यभिज्ञायते।ततः सौभरस्य फलभूता ये वृष्ट्यादयस्त एव हीषादिवाक्येष्वनूद्यन्त इति न फलान्तरम् । अथोच्यते नूतनफलाभावाद्धीषादीनां वचनानां शाखाध्ययनादेव सौभरप्राप्तत्वादनर्थकोऽयं विधिरिति?तन्न फलत्रयकामानां त्रयाणामनियमेन हीषादिमध्ये तस्य कस्य चिन्निधनस्य प्राप्तौ विधिनियमार्थत्वात्तदर्थन्तु फलान्तराभावेऽपीति सौभर हीषादीनां नियम्यमानत्वादुपपद्यते । तस्मादयं निधनविशेषनियमो न विधिः ॥ २० ॥

एवं द्वितीयमुक्थमभिधायाथ तृतीयं विदधाति—

अथैतन्नार्म्मेधम् ॥ २१ ॥

अथ सौभरानन्तरमेतद्विधीयमानं नार्म्मेधं साम कार्य्यमिति शेषः ॥२१॥

अस्य प्रवृत्तिनिमित्तं प्रदर्शयन् प्रतिष्ठासाधनत्वमाह—

नृमेधसमाङ्गिरसꣳ सत्रमासीनꣳ ऋभिरभ्याह्वयन् सोऽग्निमुपाधावत्पाहि नो अग्न एकयेति तं व्वैश्वानरः पर्य्युदतिष्ठत्ततो वै स प्रत्यतिष्ठत्ततो गातुमविन्दत ॥२२॥

अङ्गिरसः पुत्रं नृमेधानामानं सत्रानुष्ठायिनमितरे सत्रमासीना ऋत्विजः स्वाभिर्हन्तुमभ्याह्वयन्। सोऽग्निं 'पाहि नो' इत्यृचा प्रगाथेन वोपाधावत्। पूर्व्वमनृषिभिः सत्रं यद्दृष्टेन मन्त्रेणोपाधावत् प्रार्थयत्। तं रक्षितुं मन्त्रदेवताग्निः पर्य्युदतिष्ठत् प्रादुरभूत्। सोऽग्निरनेन साम्नेन्द्रमुपाधावेति प्राब्रवीदिति शेषः। ततः स नृमेधा एतेन साम्ना प्रत्यतिष्ठत्। ततो गातुं सत्राख्यं श्रेयोमार्गमविन्दत ॥ २२ ॥

तत इदानीन्तनैरपि प्रतिष्ठार्थिभिरेतत्कर्त्तव्यमित्याह—

गातुविद्वा एतत्साम विन्दते गातुं प्रतितिष्ठत्येतेन तुष्टुवानः ॥ २३ ॥

एतत्साम नृमेधसः प्रतिष्ठामार्गसाधनत्वाद्गातुविद्वै मार्गलम्भकं खलु। अत एतेन तुष्टुवानोऽपि गातुं मार्गं विन्दते प्रतितिष्ठति च ॥२३॥

अथास्येतरवैलक्षण्येन नानाछन्दस्त्वमाह—

विच्छन्दस ऋचो भवन्त्यहोरात्रयो रूपम् ॥ २४ ॥

तस्मिन्नार्म्मेधे विच्छन्दसो नानाछन्दोयुक्ता ऋचो भवन्ति कार्य्याः। इत्यर्थमेतद्विच्छन्दसस्तदहोरात्रयो रूपमपि विलक्षणम्। अतस्तद्रूपसादृश्यम् ॥ २४ ॥

कुतोऽहोरात्रयोरुपकल्पिस्तत्राह—

नैव ह्येतदह्नो रूपं न रात्रेर्यदुक्थानाम् ॥२५॥

यदुक्थानां रूपमस्त्येतन्नाह्नोऽपि रूपं न रात्रेरपि कुतः ? तृतीयसवनस्याग्निष्टोमेनैव समाप्तेः पर्य्यायाणाञ्च रात्रे रूपत्वादन्तराले स्थितानामुक्थानामन्यतरस्मिन्नप्यननुप्रवेशात् ॥ २५ ॥

उक्तं विच्छन्दस्त्वं दर्शयति।

ककुप्प्रथमाथोष्णिगथ पुरउष्णिगनुष्टुप्सेनानुष्टुभो नयन्त्यच्छावाकसाम्नः ॥ २६ ॥

'अधीहीन्द्रगिर्वण' इत्येषा ककुम्मध्यमपादस्य द्वादशाक्षरत्वात् 'मध्यमश्चेत्ककुप्'इति तल्लक्षणम्।अथोष्णिक् 'त्रिपदान्त्यो द्वादशक' इति तल्लक्षणम अथ पुरउष्णिगनुष्टुप् प्रायुञ्जन्ति 'हरी इषिरस्य' इत्येषा प्रथमपादस्य द्वादशाक्षरत्वात् 'आद्यश्चेत् पुरउष्णिक्' इति तल्लक्षणम्।ननु पुरउष्णिगष्टाविंशत्यक्षरा अनुष्टुप् द्वात्रिंशदक्षरा कथमनयोः सामानाधिकरण्यमिति ? निदानकार एव तत्समाधत्ते । पुरउष्णिक् तृतीया दाशतय्यान्तां बह्वृचा अधीयन्ते 'युञ्जन्ति हरी इषिरस्य गाथ पौरोरथउरुपुग इन्द्रवाहावचा युञ्जन्ति। तत्र वयं चत्वार्यक्षराण्युपाहरामः 'सुवर्ज्ञिदा'इति सा अनुष्टुप् बृहता'उपरिष्टात् ज्योतिः'इति तेनानुष्टुप् सम्पादनेनाच्छावाक साम्नःसम्बन्धिन्या अनुष्टुभो न यन्ति नोपगच्छन्ति। आनुष्टुभो ह्यच्छावाकं सर्वं गायत्रे प्रातःसवनेऽच्छावाक 'एनावो अग्निमव सा' इत्यनुष्टुभानुवचनं प्रतिपद्यते । उक्थीयमानं सूक्तं च तस्यानुष्टुभं प्रत्यस्मै पिपीषत इति । अच्छावाकस्यानुष्टुप् सम्बन्ध ऐतरेयके श्रूयते । 'अथास्य यच्छन्द आसीदनुष्टुप्सो मुदतमभ्युदौहदच्छावाकीयाभीति' ॥ २६ ॥

इति ताण्डमहाब्राह्मणेऽष्टमाध्यायस्याष्टमः खण्डः ।

अथ नवमः खण्डः ।

साकमश्वं सौभरं नाम्र्मेधामिति त्रीण्युक्थानि उद्वंशीयाष्टादंष्ट्रयोरन्यतरद्वा अच्छावाकसाम करिष्यते हारिवर्णन्तु बह्वसाम्नि सौभरेण विकल्पः । अत्र कल्पकारः 'अथात उक्थानि तस्यैव सत आष्टादंष्ट्राच्छावाकसाम्न इत्युपक्रम्य साकमश्वं हारिवर्णमाष्टादंष्ट्रम्'इत्युक्तवान् तत्र बह्वसामाह—

हारिवर्णं भवति ॥ १ ॥

ब्रह्मसामेति शेषः ॥ १ ॥

एतत्प्रशंसति—

असुरा वा एषु लोकेष्वासꣳस्तान्देवा हरिश्रियमित्यस्माल्लोकात्प्राणुदन्त ध्विराजसीत्यन्तरिक्षाद्दिवेदिव इत्यमुष्मात् ॥ २ ॥

'तं ते मदम्' इत्यैष्णिहे तृचे हारिवर्णाश्रयभूते तिसृणामष्टर्चामन्ते क्रमेण 'हरिश्रियं विराजासि दिवे दिवे' इति श्रूयते तैस्त्रिभिरशैः पूर्वं

देवा भूरादिलोकत्रयेषु स्वामित्वेन वर्त्तमानानसुरानंशक्रमेणाप्राणुवन्त । स्पष्टमन्यत् ॥ २ ॥

अथोक्तार्थवेदनफलमाह—

तद्य एवँ त्रयेदैभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्येमाँ ल्लोकानभ्यारोहति ॥ ३ ॥

एवं स्तोत्रीयैस्त्रिभिः पदैर्लोकत्रयाद्देवकर्तृकमसुरापनोदनज्ञानाति सोऽप्येभ्यो लोकेभ्यो भ्रातृव्यं स्वशत्रुं प्रणुद्यापसार्य्यमान् क्षित्यन्तरिक्षद्युलोकानाभिमुख्येनारोहति ॥ ३ ॥

अथ प्रकारान्तरेण प्रशंसति—

हरिवर्णो वा एतत्पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्टै ॥ ४ ॥

निगदव्याख्यानमेतत् । अनेन हरिवर्णेन दृष्टत्वाद्धरिवर्णमित्यस्य प्रवृत्तिनिमित्तत्वमित्युक्तं भवति ॥ ४ ॥

पशवभिवृद्ध्यैनतत्प्रशस्य रक्षोऽपहतिसाधनत्वेनापि प्रशंसति—

अङ्गिरसः स्वर्गँ ल्लोकं यतो रक्षाꣳस्यन्वसचन्त तान्येतेन हरिवर्णोऽपाहन्त यदेतत्साम भवति रक्षसामपहत्यै ॥ ५ ॥

पूर्वं स्वर्गं लोकं यतो गच्छतोऽङ्गिरसोरक्षांस्यन्वसचन्तान्वगच्छन्त तानि यक्षांसि हरिवर्ण एतेन साम्नाऽपाहन्त विनाशितवान् । अत इदानीन्तनैरप्येतद्रक्षसामपहत्यै भवति ॥ ५ ॥

अथोद्गंशीयमच्छावाकसाम्नः साम विधित्सुस्तदुत्पत्तिं दर्शयति—

पृष्ठानि वा असृज्यन्त तेषां यत्तेजो रसोऽत्यरिच्यत तदेवाः समभरꣳस्तदुद्गꣳशीयमभवत् ॥ ६ ॥

पूर्वं प्रजापतिना पृष्ठानि रथन्तरादिरैवतान्तानि सृष्टान्यभवंस्तेषां सृज्यमानानां यत्तेजः सामर्थ्यङ्कोर्थो ? यो रसः सारोऽशोत्यरिच्यतातिरिक्तोऽभूत् । तदतिरिक्तं सर्वपृष्ठसम्बन्धितेजः समभरन्नेकीचक्रुः । तदेकीभूतन्तेज उद्गꣳशीयनामाभवत् ॥ ६ ॥

अथास्य सर्व्वपृष्ठतेजोरूपत्वेन प्रशस्तत्वं तत्पूर्वतनैः स्तोतृभिर्ज्ञातिप्रयोगाविषयत्वेन समर्थयते—

सर्व्वेषां वा एतत् पृष्ठानां तेजो यदुद्गꣳशीयन्तस्मा-

ह्वा एतत्पुरा सजाताय नाक्रन् पापवसीयसो ज्विधृत्यै॥७॥

उद्गंशीयमिति यदस्त्येतदुक्तरीत्या सर्वेषां पृष्ठानां तेजः खलु तस्मादेव कारणादेतत्साम पुरा सजाताय ज्ञाताय यजमानाय नाक्रन् नाकुर्युः । किमर्थं? पापपुण्ययोरसाङ्कर्याय यस्मादुद्गंशीयं करोति स वसीयान् भवत्येव । अतस्तथां ज्ञातीनां भवेदिति वृद्धेरभिप्रायः ॥ ७ ॥

अथ सजाताप्रयोगनिमित्तं प्राशस्त्यमस्य दर्शयति—

एष ह्येव पृष्ठैस्तुष्टुवानो य उद्गंशीयेन स्तुवते ॥ ८ ॥

उद्गंशीयस्तुतैः सर्वैः पृष्ठै रथन्तरादिभिरपि स्तुतवान् भवतीत्यर्थः । अतोऽस्य प्राशस्त्यम् ॥ ८ ॥

अस्य सर्वपृष्ठतेजोरूपत्वं प्रतिज्ञातम्, तत् कथमित्याशङ्क्य तेषां रूपाण्यत्र सन्तीत्याह—

सर्वाणि वै रूपाण्युद्गंशीयम् ॥ ९ ॥

यानि रथन्तरादीनां रूपाणि सन्ति सर्वाण्येवोद्गंशीयं तेषां समुदायात्मकमेतदित्यर्थः ॥ ९ ॥

रथन्तररूपं तावद्दर्शयति—

गायन्ति त्वा गायत्रिण एति रथन्तरस्य रूपमेति हि रथन्तरम् ॥ १० ॥

'गायन्ति त्वा गायत्रिणः' इत्याकारान्तोऽत्र प्रस्तावभाग एतद्रथन्तरस्य रूपम् । तथा हि 'आ' इति हि रथन्तरं रथन्तरस्य योनौ 'अभि त्वा शूर' इत्यत्र 'आभि त्वा'इति हि गायन्ति । अत उभयोराकारसाद्दश्यात्तद्रूपत्वम् ॥ १० ॥

बृहतो रूपमत्र दर्शयति—

आदिर्बृहत ऊर्ध्वमिव हि बृहत् ॥ ११ ॥

आदिरुद्गंशीयस्याऽद्याक्षरमुकारस्तद्बृहतो रूपम् । तथा हि-यद्बृहत् सामाऽस्ति तदूर्ध्वमिव उपरि वर्त्तते । 'असौ वै लोको बृह'दिति पूर्वमुक्तत्वात् ॥ ११ ॥

अथ वैरूपस्य रूपं दर्शयति—

परिष्टोभो ह्वैरूपस्य परिष्टुभं हि ह्वैरूपम् ॥ १२ ॥

परिष्टोभः स्तोभानां प्रसारो बहुस्तोभत्वं स्तोत्रमुद्गंशीये दृश्यते । स वैरूपस्य वैरूपमपि बहुस्तोभत्वमतस्तद्रूपम् ॥ १२ ॥

वैराजस्य रूपं दर्शयति—

अनुतोदो ऽवैराजस्यानुतुन्नं हि ऽवैराजम् ॥ १३ ॥

अनुतोदोऽभ्यासः स चोद्गृशीये दृश्यते। तथा हि 'उद्गृशमिव येमिरे' इत्ययं पादो द्विरभ्यस्तः। स च वैराजस्य रूपं वैराजमप्यनुतुन्नं भवति। तथा हि वैराजं 'पिबा सोममिन्द्र' 'इत्येत'दुदनुत्वादनुत्वा इत्यनुतोदयुक्तं भवति ॥ १३ ॥

अथ शाक्करैवतयोः स्वरूपमत्र दर्शयति—

अर्द्धेडा शाक्करीणामातिस्वारो रेवतीनाम् ॥ १४ ॥

उव्' इति याऽर्द्धेडा दृश्यते। अध्यर्द्धेडा शाक्वरीषु विद्यते तथाऽत्र विद्यमानोऽतिस्वारो रेवतीनां रूपम् ॥ १४ ॥

अथार्द्धेडातिस्वारौ स्तौति—

अर्द्धेडया वै देवा असुरानवहत्याऽतिस्वारेण स्वर्गं लोकमारोहन् ॥ १५ ॥

पूर्वमर्द्धेडया खल्वसुरान् स्वर्गगमनविरोधिनोऽवहत्याऽतिस्वारेण स्वर्गं लोकमारोहन्। अर्द्धेडाया असुरहननहेतुत्वं शास्त्रगम्यमेव। अतिस्वारस्य तु ऊर्ध्वारोहात्मकत्वात् स्वर्गारोहणहेतुत्वम् ॥१५॥

उक्तार्थञ्च प्रशंसति—

तद्य एवँ ऽवेदार्द्धेडयैव भ्रातृव्यमवहत्यातिस्वारेण स्वर्गं लोकमारोहति ॥ १६ ॥

स्पष्टोऽर्थः ॥ १६ ॥

प्रकारान्तरेण प्रशंसति—

अर्द्धेडया वै पूर्वं यज्ञꣳ सꣳस्थापयन्त्यतिस्वारेणोत्तरमारभन्ते ॥ १७ ॥

'उव्' इत्यस्याऽर्द्धेडायाः अतिस्वारात् पूर्वभावित्वात् प्रयोक्तारः पूर्ववृत्तमुकथसंस्थं यज्ञं संस्थापयन्ति समापयन्ति। उत्तरेणातिस्वारप्रयोगेण ऊर्ध्वरोहात्मकनोत्तरमुपरितनं यज्ञं षोडशिनमारभन्ते आरम्भवन्तो भवन्ति। 'ननु उवित्यधीयते अर्द्धेडया'इति ब्राह्मणे स्तूयते कथमविरोध इति? न विरोधः। अध्ययने 'उप्' उपा' इति तत्र तत्राऽधीयन्ते तत्तत्स्थाने ब्राह्मणे क्रमेण अर्द्धेडा इडा अध्यर्द्धेडेति व्यवहारदर्शनात्। तथैव प्रयोगकाले उवित्यस्य स्थाने इडिति, उपेत्यस्य स्थाने इडेति, उपा इत्यस्य स्थाने इट् इडेति प्रयुञ्जते ॥ १७ ॥

उक्तार्थवेदिनं प्रशंसति—

उपैनमुत्तरो यज्ञो नमति य एवं वेद ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

अथैतत्साम पशुसाधनत्वेन प्रशंसति—

पाङ्क्तं वा एतत्साम पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञ एव पशुषु प्रतितिष्ठति ॥ १९ ॥

'उद्वंशमिवे'त्यस्य चतुर्थपादस्य द्विरभ्यस्तत्वेन पादपञ्चकोपेतत्वादेतत्साम पाङ्क्तम् । अस्तु पाङ्क्तं किं तत ? इति, अत आह—पाङ्क्तो यज्ञः अग्निहोत्रदर्शपूर्णमासचातुर्म्मास्यपशुसोमभेदेन पञ्चविधत्वाद्यज्ञोऽपि पाङ्क्तः । बहिष्पङ्क्त्याद्यक्षरपङ्क्त्यादिकामे तैत्तिरीयब्राह्मणोदाहरणेन पूर्वत्र प्रदर्शितम् । ततश्च किमिति ? तत्राह पाङ्क्ताः पशवः पशूनां पाङ्क्तत्वं लोमत्वङ्मांसास्थिमज्जाख्यैः पञ्चावयवैरुपेतत्वात् । एवं सति पाङ्क्तोद्वंशीयसाम पांक्ते यज्ञे पशुषु च प्रतिष्ठितो भवति ॥ १९ ॥

अथ समृद्धिं कामयमानस्य आष्टादंष्ट्यौरन्यतरदच्छावाकसाम कर्त्तव्यमाह—

आष्टादंष्ट्रं ऋद्धिकामाय कुर्य्यात् ॥ २० ॥

ऋद्धिर्मे स्यादिति कामयित्रे अनयोरन्यतरदिच्छया कुर्य्यात् ॥२०॥

अथैते प्रशंसति—

अष्टादंष्ट्रो ह वैरूपोऽपुत्रोऽप्रजा अजीर्य्यसत् इमाँल्लोकान्विचिच्छिदिवाँ अमन्यत, स एते जरसि सामनी अपश्यत्तयोरप्रयोगादबिभेत्, सोऽब्रवीद्दध्नवद्योमे साम्भ्यां स्तवाता इति ॥ २१ ॥

वैरूपो विरूपस्य पुत्रोऽष्टादंष्ट्रो नाम ऋषिः अपुत्रः, कोऽर्थः ? अप्रजाः प्रजा सन्ततिस्तद्रहितः सन् अजीर्य्यत जीर्णोऽभूत् । स इमान् लोकान् सन्तत्यभावेन विच्छिदिवान् 'लिटः कवसौ रूपम्' विच्छिन्नवान् अमन्यत स ऋषिर्लोकाविच्छेदाय जरासि जरावस्थायामेते सामनी अपश्यत्ताभ्यां प्राजायतेति शेषः । स ऋषिः परमनयोः साम्नोरप्रयोगाज्जीर्णे इमे ते सामनी अपश्यत् । यत अनयोर्वर्त्तनायाऽन्याननुष्ठातॄन् प्रयोजयितुं न शक्नोमि । अतोऽनयोरितः परमप्रयोगो भविष्यतीत्यबिभेत् भीतवान् । एवं भीतः स सर्वेषामनयोः प्रवृत्त्यर्थमेवमब्रवीत् । यः कोऽपि मे साम्भ्यां मत्संबन्धिभ्यां स्तवाते स्तुयात् स ऋध्नवत् ऋध्नुयादिति । ऋद्धिफलसंकीर्त्तने सति तदर्थिनः प्रवर्त्तिष्यन्त इत्यभिप्रायः ॥ २१ ॥

अतः समृद्धयर्थिभिरेते प्रयोक्तव्ये इत्युपसंहरति—

ऋषेर्वा एतत्प्राशोदूभूतं यदाष्टादꣳष्ट्रे भवत ऋध्या एव ॥ २२ ॥

ऋषेराष्टादंष्ट्रस्य प्राशोद्भूतं प्राशया पुत्रादिलक्षणया प्रकर्षेच्छयोदूभूतमेतत्सामद्वयम्। अतो यत् यदि आष्टादंष्ट्रे भवतस्तर्हि ते समृद्ध्या एव भवतः ॥ २२ ॥

इति ताण्ड्यमहाब्राह्मणे ऽष्टमाध्यायस्य नवमः खण्डः ॥

दशमः खण्डः ॥

अथ वृद्धिकामनाप्रसङ्गादस्मिन् खण्डे कामनाभेदेनोक्थानि विधास्यति। तत्र प्रथमं ब्रह्मवर्च्चसकामायाऽऽह—

गायत्रीषु ब्रह्मवर्च्चसकामायोक्थानि प्रणयेयुर्गायत्र्यां ब्रह्मसामाऽनुष्टुभ्यच्छावाकसाम सैषा गायत्री सम्पद्यते ॥ १ ॥

गायत्रीषु ऋक्षूक्थानि प्रणयेयुरुपाकुर्यरन् ब्रह्मवर्च्चसकामाय नित्यार्था एव 'एह्यास्वे'त्याद्यास्तिस्रो गायत्र्यः सौभराश्रयभूताः काम्यार्था अभिभवेयुः। तथा गायत्र्यां गायत्रीच्छन्दसि गायत्रीष्वित्यर्थः। तास्वेव 'इह्यसि वीरसुः' इत्यादिषु सौभरं ब्रह्मसाम कार्य्यम्। तथा अनुष्टुप्छन्दस्कासु 'इन्द्रं विश्वा अवीवृधन्' इत्याद्यासु नामेधमच्छावाकसाम कार्य्यम्। सैषानुष्टुप् गायत्री सम्पद्यते। तत्सम्पत्तिप्रकार इत्थं द्रष्टव्यः-उक्थान्येकविंशस्तोमानि। तत्र तिसृष्विति तिसृभिरनुष्टुब्भिश्चतस्रो गायत्र्यो भवन्ति। एकविंशत्यनुष्टुब्भिरष्टाविंशतिर्गायत्र्यः सम्पद्यन्ते। शिष्टास्तु स्वत एव गायत्र्यः ॥ १ ॥

अस्त्वेवं, किं तत ? इति, तत्राऽऽह—

तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे ॥ २ ॥

ब्रह्मवर्च्चसं नाम तेजोविशेषः। गायत्र्याश्चाग्नेयत्वात् गायत्र्येव ब्रह्मवर्च्चसं तेजः। अथवा गायत्रीजपाद्ब्रह्मवर्च्चसाभिवृद्धिः श्रुतिस्मृतिपुराणादिषु प्रसिद्धा। अतस्तत्प्रयोक्ता ब्रह्मवर्च्चसलक्षणं तेजोऽवरुन्धे ॥ २ ॥

अथ पशुकामस्याऽऽह—

गायत्रीषु पशुकामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्मसामाऽनुष्टुभ्यच्छावाकसाम सैषोष्णिक्सम्पद्यते ॥ ३ ॥

गायत्रीषु नित्यास्वेवोक्थानि प्रणयेयुरुष्णिहि उष्णिक्च्छन्दस्कास्वृक्षु 'तं ते मदं गृणीमसि' इत्यादिषु सौभरं ब्रह्मसाम कर्त्तव्यम् । अनुष्टुभ्यच्छावाकसाम । पूर्ववदेव सैषा गायत्र्यनुष्टुप्सम्पत्योष्णिग्भवति । सप्त गायत्र्याः षडुष्णिहो भवन्त्येव । एकविंशतिस्तोमत्वादेकविंशतिगायत्रीभिराद्योक्थगाभिरष्टादशोष्णिहः सम्पद्यन्ते । अच्छावाकसाम्नि तु सप्त सप्तानुष्टुभोऽष्टावष्टावुष्णिहो भवन्तीत्येकविंशत्यनुष्टुब्भिश्चतुर्विंशतिरुष्णिहः सम्पद्यन्त इत्युष्णिक् सम्पत्तिः ॥ ३ ॥

उष्णिक् सम्पत्तेः प्रयोजनमाह—

पशवो वा उष्णिक् पशूनेवावरुन्धे ॥ ४ ॥

भूयिष्ठपश्वाङ्गागा हि पशवो भवन्ति । उष्णिगपि पश्वाङ्गागस्यान्त्यपादद्वादशाक्षरोपेतत्वात्तादृशी । अत उष्णिक् पशव इत्युच्यते । स्पष्टमन्यत् ॥ ४ ॥

अथ पुरुषकामायाऽऽह—

गायत्रीषु पुरुषकामायोक्थानि प्रणयेयुः ककुभि ब्रह्मसामाऽनुष्टुभ्यच्छावाकसाम सैषा ककुप् सम्पद्यते॥५॥

नित्यास्वेव गायत्रीषु च्छन्दः प्रणयनं ककुप्सु नित्यास्वेव 'वयमु त्वामपूर्व्य' इत्यादिषु ब्रह्मसामसौभरमनुष्टुभ्यच्छावाकसाम पूर्ववदेव । सैषोष्णिगेव मध्यपादद्वादशाक्षरा चेत्ककुबुच्यते । अत उष्णिक् ककुभौ स्तोत्रीयागताक्षरसंख्यावैषम्याभावादुष्णिकसम्पत्तिरेव ककुप्सम्पत्तिः ॥ ५ ॥

तत्फलमाह—

पुरुषो वै ककुप् पुरुषानेवावरुन्धे ॥ ६ ॥

पुरुषस्य मध्यभागस्थौल्यात् ककुभश्चोक्तप्रकारेण मध्यभागाधिक्यात् तत्साम्येन पुरुषः ककुबुच्यते । अतस्तत्प्रयोगेण पुरुषानेवाऽवरुन्धे ॥६॥

अथाऽन्नाद्यकामायाऽऽह—

विराट्स्वन्नाद्यकामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्मसामाऽनुष्टुभ्यच्छावाकसाम सैषा विराट् सम्पद्यते ॥७॥

विराट्सु 'आपः पुरन्नार्म्मिणीमर्दीदेदू' इत्यादिषु त्रिपात्सु साकमश्वे-

नोक्थानि प्रणयेयुरुपक्रमेरन्। उष्णिहि उष्णिकछन्दस्कासु 'तं ते मदम्'-इत्यादिषु सौभरं ब्रह्मसाम कुर्य्युः। अनुष्टुभि नार्मेधमच्छावाकसाम पूर्ववदेव सैषोष्णिगनुष्टुप् विराट् सम्पद्यते। उक्थान्येकविंशस्तोमानीत्युक्तम्। अत एकविंशत्युष्णिहस्तावत्य एवानुष्टुभः त्रिपदाया विराजस्त्रिंशदक्षरत्वात् द्वयेनोनावुष्णिहः। अक्षरद्वयाधिकात्स्वराडनुष्टुभश्च प्रत्येकं द्वे द्वे उष्णिगनुष्टुभौ मिलित्वा द्वे द्वे विराजौ भवत इत्येवं विराट्त्वसम्पत्तिः ॥ ७ ॥

अस्त्वेवं किं तत ? इत्याह—

अन्नं वै विराडन्नाद्यमेवाऽवरुन्धे ॥ ८ ॥

अन्नस्य दशेन्द्रियतृप्तिहेतुत्वादन्नं विराडित्युच्यते। विराट्स्वपि दशसंख्यासद्भावात्। तथा च मन्त्रवर्णः 'सन्द्रामाहे दशतयस्य धासेर्द्विर्यत् पञ्च बिभ्रतो यत्पञ्च' । इति यद्वा लोके अन्नसमृद्ध एव विराजति' इत्यन्नं विराडित्युच्यते। स्पष्टमन्यत् ॥ ८ ॥

अथ ज्यैष्ठ्यकामायोक्थान्याह—

अक्षरपङ्क्तिषु ज्यैष्ठ्यकामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्मसामाऽनुष्टुभ्यच्छावाकसाम सैषानुष्टुप् सम्पद्यते ॥ ९ ॥

अक्षरपङ्क्तिषु पञ्चाक्षरात्मकपञ्चपादोपेतासु 'अग्ने तमद्य' इत्यादिषु ज्यैष्ठ्यकामाय साकमश्वेनोक्थानि प्रणयेयुरुष्णिक्ष्वनुष्टुपसु च सौभरनार्मेधौ ब्रह्माच्छावाकसामनी पूर्ववत् कर्त्तव्ये। अक्षरपङ्क्तिषूष्णिकसम्पत्त्याऽनुष्टुभौ कर्त्तव्ये। अत्राक्षरपङ्क्तीनामुष्णिहाद्यानुष्टुप्त्वसम्पादनमित्थं ज्ञातव्यम्—अक्षरपङ्क्तिषु 'अग्ने तमद्य' इत्यादिष्वाद्यन्ते 'अग्ने तमद्य' एभिर्नो अर्कैः' इत्येते प्रत्येकं पञ्चविंशत्यक्षरे मध्यमा 'अधा ह्यग्ने' इत्येषा। प्रथमे पादे ह्यक्षरस्य विभज्य परिगणनायां षड्विंशत्यक्षरा भवति। तथा सति कृत्स्नस्य स्तोमस्यैकविंशत्वात् स्तोत्रीयास्तिस्रोऽपि प्रत्येकं सप्त सप्त भवन्ति। तत्राद्यन्तयोः स्तोत्रीययोः सप्तवारावृत्तयोस्तु मिलित्वा पञ्चविंशत्यक्षरात्मकाश्चतुर्दशपदपङ्क्तयो भवन्ति। तत्राऽद्यन्तयोः स्तोत्रीययोस्तासामक्षराणि परिगणितानि पञ्चविंशदधिकत्रिशतानि भवन्ति। तानि च द्वात्रिंशदक्षरेण विभक्तानि दशानुष्टुभो भवन्ति। त्रिंशदक्षराणि शिष्यन्ते। तथा मध्यमायाः षड्विंशत्यक्षराया 'अधा ह्यग्न' इत्यस्याः सप्त मध्यावृत्तायाः द्व्यशीत्यधिकशताक्षराणि स्युः। तेषामपि द्वात्रिंशदक्षरविभागे सति पञ्चाऽनुष्टुभः स्युः। द्वाविंश-

दक्षराणि शिष्यन्ते । तानि पूर्वशिष्टैस्त्रिंशदक्षरैः सहैकानुष्टुपू कृत्वा-विंशतिस्त्रिंशच्यन्ते। तथा सौभरस्य ब्रह्मसाम्न उक्थस्यैकविंशस्तोमत्वा-देकविंशत्युष्णिहो भवन्ति। तासु मध्ये षोडशोष्णिहश्चतुर्दशाऽनुष्टुभः स्युः। शिष्टासु पञ्चसूष्णिक्। चत्वारिंशदधिकशताक्षराणि चतस्रोऽनु-ष्टुभो भूत्वा द्वादश शिष्यन्ते । तान्यक्षरपंक्तथवशिष्टैर्विंशत्यक्षरैः सहैकानुष्टुप् सम्पद्यते । इत्येवं पंक्त्युष्णिहोरनुष्टुप्त्वसम्पत्तिः ॥ ९ ॥

अनुष्टुप्सम्पत्तेः फलमाह—

ज्यैष्ठ्यं वा अनुष्टुब् ज्यैष्ठ्यमेवाऽवरुन्धे ॥१०॥

ज्यैष्ठ्यस्य प्रजापतेश्छन्दस्त्वादनुष्टुभो ज्यैष्ठ्यत्वम् । यद्वा सहि-ङ्कारायां गायत्र्यास्त्रिष्टुब्जगत्योः स्वस्वपादाक्षरसंख्याद्वारेणानुष्टुभ्यन्तः-प्रवेशादनुष्टुभो ज्यैष्ठ्यत्वम्। अयमर्थः 'अष्टाक्षरा गायत्री हिङ्कारो नवमः' इत्युपक्रम्य च्छन्दोभिरोघानुष्टुभमाप्नोतीत्येवमेवोक्तः

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १० ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबु-क्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते ॥
माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे
अष्टमाध्यायस्य दशमः खण्डः ॥

अष्टमाध्यायः समाप्तिमगमत् ।

नवमोऽध्यायः ।

प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
ब्राह्मणाच्छंसिनः काम्यसामाद्युक्थान्तमष्टमे ।
वर्णितं नवमे ह्यस्मिन्नतिरात्रादिरुच्यते ॥

तत्र प्रथमखण्डे ससन्धिसामानस्त्रयो रात्रिपर्य्यायाः संग्रहेण प्रद-

दर्यन्ते। द्वितीये त एव विविद्रियन्ते। तत्रादौ रात्रिपर्य्यायान् विधित्सुराह—

देवा वा उक्थान्यभिजित्य रात्रिन्नाशक्नुवन्नभिजेतुं, तेऽसुराऋात्रिंतमः प्रविष्टान्नाऽनुव्यपश्यꣳस्त एतमनुष्टुप्शिरसं प्रगाथमपश्यन् विराजं ज्योतिः, तान् विराजा ज्योतिषाऽनुपश्यन्तोऽनुष्टुभा वज्रेण रात्रेर्निराघ्नन्॥ १॥

देवाः पूर्वमसुरेभ्यः सकाशादुक्थान्यभिजित्य रात्रिं रात्रिपर्यायानभिजेतुन्नाशक्नुवन्। ते देवास्तमस्तमोरूपां रात्रिं प्रविष्टानसुरान्नानुव्यपश्यन् अनुगम्य विविच्य द्रष्टुन्नाऽशक्नुवन्। ते देवा असुरदर्शनोपायत्वेनाऽनुष्टुप्शिरसमनुष्टुबुपक्रमगायत्रीद्वयात्मकं 'पान्तमा' इति प्रगाथमपश्यन् सतो बार्हताः प्रगाथा इति प्रसिद्धम्। कथं ?गायत्र्याः प्रगाथत्वमिति नैवंनियमः। अत्र ह्युत्तरभूते गायत्र्यौ 'पुत्रहतम्' इत्यादिकेऽनुष्टुप्प्रकारे स्तूयेते। अथ प्रग्रथनसम्भवादयमपि गायत्रतृचोऽनुष्टुप्सम्पत्तेः प्रगाथ इत्युच्यते। तथा च निदानं "आनुष्टुभा अपि प्रगाथा भवन्तीत्येके। अनुष्टुप् प्रथमा गायत्र्या उत्तरे यथा 'पुरोजितो वो अन्धस, आत्वा रथं यथोतये, विशो वो अतिथिं पान्तमावो अन्धस इतीति" तथा अयं प्रगाथ एव विराडाख्यं ज्योतिः। अतः प्रगाथदर्शनमेव विराड्रूपज्योतिर्दर्शनम्। यद्यप्यसौ न विराट्छन्दस्कस्तथापि 'पुरोजितो वो अन्धस' इत्यत्र 'पद्याचाक्षर्य्या च विराजौ भवत' इति पूर्वं प्रतिपादितत्वात्। तद्वत् एकस्या अनुष्टुभो द्वयोरेव गायत्र्योः पादानां परिगणने दशसंख्यासद्भावाद्यथा विराडित्युच्यतेऽत एव तमःप्रविष्टानामसुराणां विराजनसाधनत्वात् ज्योतिष्ट्वमुपचर्य 'विराजं ज्योतिरपश्यत्' इत्युक्तम्। तानसुरान् विराजा ज्योतिषा अनुक्रमेण दृष्ट्वा अनुष्टुभा वज्रेण रात्रेः सकाशान्निराघ्नन् निरगमयन् 'नाग्निं व्वाग्वज्र' इति श्रुत्यन्तराद्वयो र्व्वज्ररूपत्वं 'वागनुष्टुप्' इति श्रुतेश्चानुष्टुभो वाग्रूपत्वमित्यनुष्टुभो वज्रत्वव्यपदेशः॥ १॥

अत इदानीन्तनैरप्ययं प्रगाथः कर्त्तव्य इति विदधाति—

यदेषोऽनुष्टुप्शिराः प्रगाथो भवति विराडेव ज्योतिषाऽनुपश्यन्ननुष्टुभा वज्रेण रात्रेर्भ्रातृव्यं निर्हन्ति॥२॥

व्याख्यातप्रायमेतत्॥ २॥

रात्रेर्निराघ्नन्निति सामान्येनोक्तं विवृण्वन् पर्य्यायशब्दं निर्वक्ति—

तान् समन्तं पर्य्यायं प्राणुदन्त यत् पर्य्यायं प्राणु-

दन्त तत्पर्य्यायाणां पर्य्यायत्वम् ॥ ३ ॥

यद्यस्मात् समन्तं रात्रेः सर्व्वतः पर्य्यायं यत्र यत्राऽसुराः पराभूतास्तिष्ठन्ति तं तं देशं परीत्य परीत्य प्राणुदन्त प्रणोदनमकुर्व्वन् । तत्पर्य्यायाणां पर्य्यायत्वं सम्पन्नम् ॥ ३ ॥

प्रगाथमपश्यन्निरुक्तम्, तस्य प्रथमपर्य्यायगतस्य प्रग्रथनप्रकारमाह—

प्रथमानि पदानि पुनरादीनि भवन्ति प्रथमस्य पर्य्यायस्य ॥ ४ ॥

प्रथमपर्य्यायस्य प्रथमानि पदानि गायत्र्योरुत्तरयोर्ऋचो प्रथमपादगतानि पदानि पुनरादीनि पुनरादीयन्तेऽभ्यस्यन्त इति । पुनरादीनि तादृशानि भवन्ति । पुत्रहतं पुरुष्टुतमिति द्विरावर्त्तयेदित्यर्थः ॥ ४ ॥

उक्तनियमविधिसिद्ध्यर्थं देवैः पूर्वमनुष्ठितमिति दर्शयति—

प्रथमैर्हि पदैः पुनरादाय प्रथमरात्रात्प्राणुदन्त ॥ ५ ॥

यतो देवाः पूर्व्वमसुरान् प्रणोदनं प्रगाथगतप्रथमपदानि पुनरादाय प्रथमरात्रादकुर्व्वन् । अत इदानीन्तनैरप्येवं कर्त्तव्यम् ॥ ५ ॥

अथाऽस्य प्रस्तावभागमाह—

पान्तमावो अन्धस इति प्रस्तौति ॥ ६ ॥

स्पष्टम् ॥ ६ ॥

एतत्प्रशंसति—

अहर्वै पान्तमन्धो रात्रिरह्नैव तद्रात्रिमारभन्ते ॥ ७ ॥

अतस्तु सामान्येन स्तुतिः क्रियते । पाति रक्षत्यालोकेनेति पान्तमहः । अन्धीकरणादन्धो रात्रिः । एवं सति पान्तमिति क्रमेण युञ्जन्ति तत्तेनाह्नैव रात्रिमारभन्त उपक्रमन्ते ॥ ७ ॥

प्रगाथं विधाय तत्र साम विधत्ते—

तासु ह्वैतहव्यम् ॥ ८ ॥

कर्त्तव्यमिति शेषः ॥ ८ ॥

अथैतस्य प्रवृत्तिनिमित्तं दर्शयन्नवगतिप्रतिष्ठयोर्हेतुत्वेन प्रशंसति—

ह्वीतहव्यः श्रायसो ज्योग्निरुद्ध एतत्सामाऽपश्यत्सोऽवगच्छत्प्रत्यतिष्ठदवगच्छति प्रतितिष्ठत्येतेनतुष्टुवानः ॥ ९ ॥

श्रायसः श्रेयसः पुत्रो वीतहव्यो नाम ऋषिः 'देविकाशिशपादित्यवाह्वार्धसत्रश्रेयसामादिति' श्रेयःशब्दस्यादेराकारः । ज्योक् चिरकालं

निरुद्धः शत्रुभिर्निरोधं प्रापितस्तन्निर्गमनायैतत्साम दृष्टवान्। स चानेनाऽवगच्छदवगतोऽभूत्। अन्यत् स्पष्टम् ॥ ९ ॥

अस्य साम्नो यदोको इति निधनं तत् प्रशंसति—

तम इव वा एते प्रविशन्ति ये रात्रिमुपयन्ति यदोको निधनꣳ रात्रेर्मुखे भवति प्रज्ञात्यै ॥ १० ॥

ये रात्रिं रात्रिपर्यायाम् उपयन्ति प्रजुज्ञत उद्गातारः, एते तम इव प्रविशन्ति खलु रात्रौ तमःसद्भावात्। अतो रात्रेः प्रथमे पर्य्याये ओकोनिधनप्रयोगः प्रज्ञात्यै अनुष्ठेयपदार्थज्ञानाय भवति ॥ १० ॥

कथमस्य प्रज्ञातिहेतुत्वमित्याशङ्क्य तल्लोकप्रसिद्धिबलेन समर्थयति—

यदा वै पुरुषः स्वमोक आगच्छति सर्व्वं तर्हि प्रजानाति सर्व्वमस्मै दिवा भवति ॥ ११ ॥

यदा कश्चित् पुरुषो दूरमध्वनि गत्वा स्वमोकः स्वकीयं सद्म पुनरागच्छति प्राप्नोति स्वचित्तं सर्व्वं धनादिकं तर्हि तदा प्रजानाति। तदेवोच्यतेऽस्मै सर्वं दिवा भवति प्रकाशितं भवतीत्यर्थः ॥ ११ ॥

एवं सङ्गहेण प्रथमपर्य्यायं विधायाऽथ मध्यमं पर्य्यायं विधातुमाह—

ते मध्यमं पर्यायमश्रयन्त तेषामौर्ध्वसद्मनेन व्वाचमवृञ्जत ॥ १२ ॥

ते प्रथमेन पर्य्यायेण पूर्वरात्रात् प्रनुन्ना असुरा मध्यमं पर्यायमश्रयन्त आश्रयन्। तेषां वाचमौर्ध्वसद्मनेन सद्मा अवृञ्जत अवर्ज्जयन् ॥ १२ ॥

उक्तार्थस्य फलमाह—

व्वाचं भ्रातृव्यस्य व्वृङ्क्ते य एवं व्वेद ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

अत्र त्रिणिधनं विधत्ते—

त्रिणिधनं भवति ॥ १४ ॥

'सुवृक्तिभिः, नृमादनं, भरेषु वा' इति निधनत्रयम् ॥ १४ ॥

उक्तं निधनत्रयं माध्यन्दिनसवनसाम्येन प्रशंसति—

यथा वा अह्नो माध्यन्दिनं सवनं त्रिणिधनायतनमेवमेष रात्रेर्म्मध्यमः पर्य्यायस्त्रिणिधनायतनः सलोमत्वाय ॥ १५ ॥

अह्न एकाहसाध्यस्य ज्योतिष्टोमस्य माध्यन्दिनं सवनं यथा त्रिणि-

धनायतनं निधनत्रयसद्भावेनाऽयतनत्रयोपेतम्।माध्यन्दिनसवने यौधाजये 'पुनान' इत्यत्र 'सास' इत्येकं 'दास'इति द्वितीयं 'ण्यासा'इति तृतीयमिति हि निधनत्रयं तत्र प्रदर्शितम्। एवमेष रात्रेर्मध्यमः पर्य्यायस्त्रिनिधनायतनः। तत्र प्रथमं त्रिनिधनत्वं सलोमत्वायाऽऽनुलोम्याय ॥ १५ ॥

अथ साम्नां स्तोत्रीयासु 'अयं त' इत्यादिषूत्तरयोरनुष्टुप्त्वाय मध्यमपादावृत्तिपूर्वं देवैस्तथा कृतत्वात् कर्त्तव्येति विधित्सुराह—

मध्यमानि पदानि पुनरादीनि भवन्ति मध्यमस्य पर्य्यायस्य मध्यमैर्हि पदैः पुनरादायमध्यमरात्रात्प्राणुदन्त ॥ १६ ॥

इदं वाक्यद्वयं प्रथमपर्य्यायवाक्यद्वयेनैवोक्तप्रायम् ॥ १६ ॥

अथोत्तमं पर्य्यायमाह—

त उत्तमं पर्य्यायमश्रयन्त तेषां घृतश्च्युन्निधनेन पशूनसृजन्त पशवो वै घृतश्च्युतः ॥ १७ ॥

घृतं पयः क्षरन्तीति पशव एव घृतश्च्युतः। अत एतन्निधनेनासुराणां पशुसर्जनं युक्तम् ॥ १७ ॥

उक्तार्थवेदितुः प्रशंसा—

पशून् भातृव्यस्य सृजते य एवं वेद ॥ १८ ॥

इदं ह्यन्वित्यत्र माधुच्छन्दसं सामोत्तरस्मिन्विधास्यते ॥ १८ ॥

ततः स्तोत्रीयासूत्तरयोरनुष्टुप्त्वायान्त्यपादावृत्तिं देवैः कृतत्वात्कर्त्तव्यत्वेन विधत्ते—

उत्तमानि पदानि पुनरादीनि भवन्त्युत्तमस्य पर्य्यायस्योत्तमैर्हि पदैः पुनरादायमुत्तमरात्रात्प्राणुदन्त ॥ १९ ॥

स्पष्टम्। अत्र त्रिष्वपि रात्रिपर्य्यायेषु होतुः सामान्येवोक्तानि। मैत्रावरुणादीनि सामान्युत्तरस्मिन् खण्डे निर्देशक्रमादेवाऽवगन्तव्यानि ॥ १९ ॥

एवं पर्य्यायत्रयमुक्त्वा सन्धिस्तोत्रस्य विधिमुन्नयति—

तान् सन्धिनाऽभिपलायन्त ॥ २० ॥

तान् त्रिभ्यो रात्रिभागेभ्योऽपगत्याऽहोरात्रयोर्यः सन्धिरस्ति तमाश्रितान् सन्धिना सन्धिस्तोत्रेणाऽभिपलायन्त 'अन्तर्णीतण्यर्थोऽयं' अभि अनुसृत्य पलायनमकारयन्त। अतो यज्ञविघातिनां सन्धेरपगमाय सन्धिसामेदानीन्तनैरपि कर्त्तव्यमिति विधिर्द्रष्टव्यः ॥ २० ॥

अथाऽसुराणामसंघातायाऽऽश्विनमाह—

तानाश्विनेनाऽसंहार्यमगमयन् ॥ २१ ॥

तान् सर्वतः पलायितानसुरानाश्विनेन शस्त्रेणासंहार्यं संहर्त्तुमयोग्यमगमयन्। यथा मिथो न सङ्गच्छेयुस्तथा कुर्वन्नित्यर्थः ॥ २१ ॥

उक्तार्थवेदितुः फलमाह—

असंहार्यं भ्रातृव्यं गमयति य एवं वेद ॥ २२ ॥

स्पष्टोऽर्थः ॥ २२ ॥

अथ रात्रिपर्यायमग्निष्टोमसामसम्पादनेन प्रशंसति—

एषा वा अग्निष्टोमस्य सम्मा यद्रात्रिः ॥ २३ ॥

संमा समिति साम्यमिति साम्यमित्यर्थः ॥ २३ ॥

साम्यं दर्शयति—

द्वादश स्तोत्राण्यग्निष्टोमो द्वादश स्तोत्राणि रात्रिः ॥२४॥

चत्वार्याज्यानि चत्वारि पृष्ठस्तोत्राणि मिलित्वाऽष्टौ। त्रीण्येकादश(पवमान) स्तोत्राण्येकं यज्ञायज्ञीयमिति मिलित्वा द्वादशाग्निष्टोमस्य स्तोत्राणि। रात्रिपर्य्यायेष्वपि सन्धिव्यतिरेकेण पर्य्यायं होत्रादीनि चत्वारि चत्वारि स्तोत्राणीत्येवं साम्यम् ॥ २४ ॥

अत्राप्युक्तसाम्येन सन्धिं प्रशंसति—

एषा वा उक्थस्य सम्मा यद्रात्रिः ॥ २५ ॥

अत्र रात्रिशब्देन तदनन्तरभावि सन्धिस्तोत्रं लक्ष्यते ॥ २५ ॥

अनयोः साम्यं दर्शयति—

त्रीण्युक्थानि त्रिदैवत्यः सन्धिः ॥ २६ ॥

उक्थस्तोत्राण्यपि त्रीणि सन्धिस्तोत्राण्यपि 'अग्निरुषा अश्विनौ' इति त्रिदैवत्य मेवमुभयत्र त्रित्वात्साम्यम् ॥ २६ ॥

समत्वसम्पादनेन उक्तस्याऽग्निष्टोमसमनन्तरभावि नवरात्रिसमनन्तरभावि सन्धिसाम प्रशंसति—

यथा वा अह्न उक्थान्येवमेष रात्रेः सन्धिर्नानारूपाण्यह्न उक्थानि नानारूपा एते तृचा भवन्ति ॥ २७ ॥

अह्नो ज्योतिष्टोमसमनन्तरभाव्युक्थानि यथा यादृशानि एवं रात्रेः सन्धिरपि उक्थानां छन्दोभेदान्नानारूपत्वम्। सन्धेस्तु नानाभेदात् देवता नानारूपा इत्युक्तम् ॥ २७ ॥

अथ कामनाभेदेन सन्धिस्तोत्रं विवक्षुरादौ प्रतिष्ठाकामायाऽऽह—

रथन्तरं प्रतिष्ठाकामाय सन्धिं कुर्य्यात् ॥ २८ ॥

(१)'एना वो अग्निम्,(२)'प्रत्युअदर्शि'(३)इमा उ वाम्'इति प्रगाथेषु कर्त्तव्ये नित्य एव रथन्तरेऽभिसन्धिभेदात्प्रतिष्ठासाधनत्वमपि ॥ २८ ॥

एतत्प्रशंसति—

इयं वै रथन्तरमस्यामेव प्रतितिष्ठति ॥ २९ ॥

स्पष्टम् ॥ २९ ॥

अथ बृहत्स्वर्गायाऽऽह—

बृहत् स्वर्गकामाय सन्धिं कुर्यात् ॥ ३० ॥

स्पष्टम् ॥ ३० ॥

बृहत्स्वर्गयोः साम्यमाह—

स्वर्गो लोको बृहत्स्वर्ग एव लोके प्रतितिष्ठति ॥३१॥

द्यावापृथिव्योः मध्ये स्वर्गो द्वितीयः। रथन्तरबृहतोर्मध्ये बृहत् द्वितीयमिति तस्य तत्स्थानीयत्वम् ॥ ३१ ॥

पशुकामाय वैकल्पिकसन्धिसामानि दर्शयति—

वारवन्तीयं वा वामदेव्यं वा शुक्र्यं वैतेषामेकं पशुकामाय सन्धिं कुर्यात् ॥ ३२ ॥

विकल्पवाचिनो वाशब्देनैव विकल्पे सिद्धेऽपि पुनरेतेषामेकमिति वचनं विस्पष्टार्थम् ॥ ३२ ॥

एतानि प्रशंसति—

पशवो वा एतानि सामानि पशुष्वेव प्रतितिष्ठति ॥३३॥

एतेषां प्रयोगे पशवो लभ्यन्त इत्येतान्येव पशव उच्यन्ते। अत्रार्षेयकल्पः प्रतिष्ठाकामाय यत् कल्पं रथन्तरसन्धिसामवत् स्वर्गकामस्य बृहत्सन्धिसाम। तेष्वेव प्रगाथेषु वारवन्तीयं वा वामदेव्यं वा शुक्र्यं वैतेषामेकं पशुकामस्य सन्धिं कुर्य्यादेतेष्वेव प्रगाथेष्विति ॥ ३३ ॥

अथोक्तस्य सन्धिसाम्नोऽनुवचनरूपं होतुर्विधत्ते—

आश्विनः होताऽनुशंसति ॥ ३४ ॥

आश्विनाख्यं सन्धिस्तुतं सन्धिस्तोत्रमनु होता शंसेत्। यद्यप्यस्य

---

१. सा. उ. १. २. १३. १. २. सा. उ. १. २. १४. १.
३. सा. उ. १. २. १४. १,

विधानं बहुचब्राह्मण एवोचितम्, तथाऽप्यस्य वक्ष्यमाणरूपप्रशंसया पवमानदेवत्यत्वेन स्तोत्रस्य प्रशंसा भवतीति तदर्थमत्रापि विधानम्। उत्तरत्र सर्वाः खलु देवताः शस्यन्त(३७.) इति वक्ष्यति। अतोऽस्य वैश्वदेवत्वं युक्तम् ॥ ३४ ॥

कथमाश्विनमुच्यत इति तद्विवक्षुराह—

प्रजापतिर्वा एतत्सहस्रममृजत तद्देवेभ्यः प्रायच्छत्तस्मिन्न समराधयꣳस्ते सूर्य्यं काष्ठां कृत्वाऽऽजिमधावन् ॥ ३५ ॥

पूर्वं प्रजापतिरेतत्सहस्रं सहस्रसंवत्सरमसृजतातत्सृष्टं देवेभ्यः प्रायच्छदिदं स्वीकुरुतेति। तस्मिन् शस्त्रे न समराधयन् विभागं कृत्वा संसिद्धा अभवन्। ते क उपायः ? इति सञ्चिन्त्य सूर्य्यं काष्ठामवधिं कृत्वा ऽऽजिमधावन्नगच्छन् ॥ ३५ ॥

इदानीमाश्विनसम्बन्धं दर्शयति—

तेषामाश्विनौ प्रथमावधावतां तावन्ववदन् सह नोऽस्त्विति तावब्रूतां किं ततः स्यादिति यत्कामयेथे इत्यब्रुवꣳस्तावब्रूतामस्मद्देवत्यमिदमुक्थमुच्यातां इति तस्मादाश्विनमुच्यते ॥ ३६ ॥

तेषां देवानां मध्ये अश्विनौ प्रथमौ सन्तावधावतामाजिम्। तौ प्रथमगामिनावनुगत्य देवा अवदन्। किमिति ? तच्छस्त्रं नोऽस्माकमपि सहास्त्विति। एवं देवैरुक्तौ भागप्रदानेनास्माकं किं फलमिति देवानुक्तवन्तौ। किमपेक्षितमिति तैः प्रत्युक्ताविदमुक्थमस्मद्देवत्यमिति देवानयाचताम्। यस्मादेवं तस्मादिदं शस्त्रमाश्विनमुच्यते ॥ ३६ ॥

सह नोऽस्त्वित्युक्तं शस्त्रसम्बन्धं दर्शयति—

सर्व्वाः खलु देवताः शस्यन्ते ॥ ३७ ॥

यस्माद्देवैः प्रार्थितं तस्मादाश्विनशस्त्रे सर्वा देवताः शस्यन्ते। तथा हि 'अग्नि, रुषा, अश्विनौ, सूर्य्य, इन्द्रो, मित्रावरुणौ, द्यावापृथिव्यो, निर्ऋति, बृहस्पतिः, इत्येतेऽत्र शस्यन्ते ॥ ३७ ॥

अथाऽस्य शंसने किञ्चिन्नियमद्वयमाह—

क्षिप्रꣳ शस्यमाजिमिव ह्येते धावन्त्यासूर्य्यस्योदेतोः शꣳसेत्सूर्य्यꣳहि काष्ठामकुर्व्वत ॥ ३८ ॥

लोक आजिं धावन्तः क्षिप्रमेव धावन्ति। एत ऋत्विज आजिं धा-

वन्तीव यज्ञं समापयन्ति । अत एतैः क्षिप्रमविलम्बेन शंसनीयम् । तच्च शंसनमासूर्य्यस्योदेतोः सूर्य्योदयकालपर्य्यन्तं कर्त्तव्यम् । शिष्टं स्पष्टम् ॥ ३८ ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यास्य प्रथमः खण्डः ॥ ९-१. ॥

द्वितीयः खण्डः ॥

उक्तास्संग्रहेण रात्रिपर्य्यायाः पूर्वस्मिन् खण्डे । अत्र तानेव सप्रपञ्चमाह,—यद्यप्य'नुष्टुप्शिरसं प्रगाथमपश्यन्' (९.१.१.) 'तासु वैतहव्य, (९. १. ८.) मित्यादिना स्तोत्रीयसामनी अपि विहिते तथापि मैत्रावरुणादीनां पर्य्यायसम्बन्धीनि सामानि न विहितानि, अतस्तदर्थं पुनर्विहितमपि होतृसामाऽनूद्य प्रशंसति—

(१)'पान्तमा वो अन्धस' इति वैतहव्यमन्यक्षेत्रं वा एते प्रयन्ति ये रात्रिमुपयन्ति यदोकोनिधनꣳ रात्रेर्मुखे भवत्योकसोऽप्रच्यावाय ॥ १ ॥

वैतहव्येन निरोधपरिहारार्थं दृष्ट्वादस्य वैतहव्यत्वं पूर्व्व(९. १. ९.) मुक्तम् । य ऋत्विजो रात्रिं रात्रिपर्य्यायानुपयन्ति एते अन्यक्षेत्रमुपगताः खलु । प्रयोक्तृणामग्निष्टोमे दिवैव प्रयुज्यमानत्वात् प्रकृतित्वाच्च क्षेत्रम् । अतिरात्रस्तु तद्विलक्षणत्वादन्यक्षेत्रमेव । यद्वा देवैरुक्थवद्रात्रावसुरेभ्यो जितत्वादन्यक्षेत्रत्वम् , तत्र स्वक्षेत्रवदाश्रयाभावात् । अतो रात्रेर्मुखे पर्य्याये य 'दोक' इत्येतन्निधनं भवति, ओक इति निवासनाम, तस्याऽप्रच्युत्यै भवति ॥ १ ॥

अथ मैत्रावरुणसाम विधत्ते—

(२)'प्र व इन्द्राय मादन'मिति गौरीवितम् ॥ २ ॥

'प्र व' इति स्तोत्रीयात्रयस्य प्रतीकोपादानम् । एवमुत्तरत्र प्रतीकं द्रष्टव्यम् ॥२॥

एतत्प्रशंसति—

ब्रह्म यद्देवा व्यकुर्व्वत ततो यदत्यरिच्यत तद्गौरीवितमभवत् ॥ ३ ॥

पूर्वं देवा यद्ब्रह्मसाम व्यकुर्व्वत व्यभजन् । अतो विभागात् परो योऽशोऽत्यरिच्यत तद्गौरीवितमभवत् ॥ ३ ॥

---

१. सा. उ. १. २. १. १. २. सा. उ, १. २. २. १.

एवमतिरिक्तां सम्पाद्य रात्रिपर्य्याये योग्यतामाह—

अतिरिक्तं गौरीवितमतिरिक्तमेतत् स्तोत्रं यद्रात्रिरतिरिक्त एवाऽतिरिक्तं दधाति ॥ ४ ॥

अस्य साम्नोऽतिरिक्तत्वमुक्तम्। रात्रौ कर्त्तव्यं पर्यायगतं मैत्रावरुणस्तोत्रमपि सवनत्रयमतीत्य वर्त्तमानत्वादतिरिक्तम्। शिष्टं सुज्ञानम् ॥४॥

अथ ब्राह्मणाच्छंसिनः साम विधत्ते—

(१)'वयमु त्वा तदिदर्था' इति काण्वम् ॥५॥

स्पष्टम् ॥ ५ ॥

प्रतत्प्रशंसति—

एतेन वै कण्व इन्द्रस्य सांविद्यमगच्छदिन्द्रस्यैवैतेन सांविद्यं गच्छति ॥ ६ ॥

सांविद्यं समानविद्यत्वं सखित्वमित्यर्थः। तत् स्तोत्रीये 'इन्द्र त्वा यन्तः सखायः' इति हि स्तूयते। अतस्तत्प्रयोक्ताऽपीन्द्रस्य सांविद्यं प्राप्नोति ॥ ६ ॥

अच्छावाकसाम विधाय प्रशंसति—

(२)'इन्द्राय मद्वने सुत'मिति श्रौतकक्षं क्षत्रसाम प्र क्षत्रमेवैतेन भवति ॥ ७ ॥

श्रुतकक्षेण क्षत्रियेण दृष्टं श्रौतकक्षम्। अतः क्षत्रसामैतत्। तत्प्रयोगेण क्षत्रं प्रबलं भवति ॥ ७ ॥

अथ मध्यमे पर्य्याये होतुः साम विदधाति—

(३)'अयं त इन्द्र सोम' इति दैवोदासम् ॥ ८ ॥

दैवोदासं दिवोदासेन दृष्टं साम ॥ ८ ॥

एतन्निधनद्वारा प्रशंसति—

अग्निष्टोमेन वै देवा इमं लोकमभ्यजयन्नन्तरिक्षमुक्थेनाऽतिरात्रेणाऽमुं, त इमं लोकं पुनरभ्यकामयन्त त इहेत्यास्मिँल्लोके प्रत्यतिष्ठन् यदेतत्साम भवति प्रतिष्ठित्यै ॥ ९ ॥

पूर्वं देवा अग्निष्टोमोक्थ्यात्रिरात्रैः क्रमेण भूरादिलोकत्रयं जित्वा

---

१. सा. उ. १. २. ३. १. २ सा. उ. १. २. ४. १. ३. सा. उ. १. २. ५. १

त एव पुनरिमं लोकमभ्यकामयन्त । ते कामयित्वा 'इह' इति निधनप्रयोगसामर्थ्येन भूर्लोक एव प्रतिष्ठिता अभवन् । स्पष्टमन्यत् ॥ ९ ॥

होतुरेव वैकल्पिकं स्तोत्रमाह—

ऊर्द्धसद्मनमपि शर्व्वरीषु प्रोहन्ति ॥ १० ॥

अपि शर्वरीष्वपि गतासु प्राप्तासु, शर्वरीष्वतिरात्रेषु पर्यायेष्वित्यर्थः । प्रयोगबहुत्वापेक्षया बहुवचनम् । तच्चोर्ध्वसद्मनं साम प्रोहन्ति कुर्य्युः । अत्र प्रतीकान्तरस्याऽश्रवणात् 'अयं त इन्द्र' इत्याद्या एवास्य स्तोत्रीया इति बोद्धव्यम् ॥ १० ॥

एतत्प्रशंसति—

असुरा वा एषु लोकेष्वासꣳस्तान्देवा ऊर्द्धसद्मनैनेभ्यो लोकेभ्यः प्राणुदन्त ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

उक्तार्थवेदनं प्रशंसति—

तद्य एवँ व्वेदैभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य स्व आयतने सत्रमास्ते ॥ १२ ॥

अत्र 'यो वेद' 'आस्त' इत्युभयत्राप्येकवचनमविवक्षितम् । ये जानन्त्येवं ते सर्वे सत्रानुष्ठायिनो भवन्तीत्यर्थः । अत्र दैवोदासौर्द्धसद्मनयोः साम्नोः प्रयोगविषये निदानकार आह(१)'मध्यमस्य रात्रिपर्य्यायस्य होतृषामणी विचारयन्ति—दैवोदासं वा स्यादौर्द्धसद्मनं वेति विकल्पो वा स्यादपि वा दैवोदासमहीने कुर्य्यात् पूर्वाध्यायं पूर्वं यज्ञस्थाने और्द्धसद्मनं सत्रेषूत्तराध्यायमुत्तरे यज्ञस्थानेऽथाप्यस्मिन् सत्रवादरूपो भवत्यौर्द्धसद्मनमपि शर्वरीषु प्रोहन्ती'ति । अस्याऽयमर्थः—मध्यमस्य रात्रिपर्य्यायस्य सम्बन्धिनी विहिते होतृषामणी विचारयन्ति । विचारप्रकार उच्यते—दैवोदासं वा स्यादौर्द्धसद्मनं वेति विकल्पो वा स्यादिति । व्यवस्थया कल्पो विकल्पः । येन यजमानेन यत् पूर्वं दैवोदासमहीन इति सत्रापेक्षया यत् पूर्वं यज्ञस्थाने ते अहीने स्यादिति । एतेनोत्तराध्यायमित्याद्यपि व्याख्यातम् । अथाप्यस्मिन्नित्यादेरयमर्थः,—अस्मिन्नौर्द्धसद्मनविषये सत्रवादरूपो भवति । प्रोहन्तीति बहुवचनेनाऽभिधानमेव । अथ वा प्रतीकोपादानमिदम् । सत्रवादस्तु स्व आयतने सत्रमास्त इत्ययमपि ॥ १२ ॥

---

१. नि. सू. प्र. ८. खं. १.

अथ मैत्रावरुणसाम विधत्ते—

(१)'आ तू न इन्द्र क्षुमन्त'मित्याकूपारम् ॥ १३ ॥

स्पष्टम् ॥ १३ ॥

तत् प्रशंसति—

अकूपाराऽऽङ्गिरस्यासीत्तस्या यथा गोधायास्त्वगेवं त्वगासीत्तामेतेन त्रिःसाम्नेन्द्रः पूत्वा सूर्य्यत्वचसमकरोत्तद्वाव सा तर्ह्यकामयत यत्कामा एतेन साम्ना स्तुवते स एभ्यः कामः समृध्यते ॥ १४ ॥

अकूपारानामाऽऽङ्गिरस्यासीत् । तस्या यथा गोधायास्त्वक् तथा त्वगासीत् । सा गोधेव दुष्टत्वचा सतीन्द्रमस्तौषीत् । स तुष्ट इन्द्रः एनामेतेन साम्ना त्रिवारं रथच्छिद्रादिना पावयित्वा सूर्य्यत्वचसमकरोत् । तथाच मन्त्रवर्णः '(२)खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्र त्रिः पूत्व्यऽकृणोः सूर्य्यत्वचमिति' । एवमपगतत्वग्दोषा सात र्हि तदानीं तदेवाऽकामयतेन्द्रम् । किमिति ? तद्दर्शयति यत्कामाः—याद्दक्कामोपेता एतत्साम्ना स्तुवन्ति स काम एभ्यः स्तातृभ्यः स मृध्यते समृद्धो भवति ॥ १४ ॥

अथ ब्राह्मणाच्छंसिसाम विधाय प्रशंसति—

(३)'अभि त्वा वृषभा सुतं' इत्यार्षभं क्षत्रसाम क्षत्रमेवैतेन भवति ॥ १५ ॥

विश्वामित्रस्य पुत्र ऋषभः । एतस्योत्पादनकाले स क्षत्रिय एव । अतस्तेन दृष्टत्वादेतदपि क्षत्रसाम । स्पष्टमन्यत् ॥ १५ ॥

अथाऽच्छावाकसाम विधाय प्रशंसति—

(४)'इदं वसो सुतमन्ध' इति गारमेतेन वै गर इन्द्रमप्रीणात्प्रीत एवाऽस्यैतेनेन्द्रो भवति ॥ १६ ॥

स्पष्टोऽर्थः ॥ १६ ॥

अथ तृतीये पर्याये होतृसाम विधाय प्रशंसति—

(५)'इदꣳ ह्यन्वोजसे'ति माधुच्छन्दसं प्रजापतेर्वा एषा तनूर्यातयाम्नी प्रयुज्यते ॥ १७ ॥

---

१. सा. उ. १, २. ६. १. २. ऋ. सं. ८, ९.९. तत्रापि कथेयं द्रष्टव्या ।
३. सा. उ. १. २. ७. १, ४. सा. उ. १. २. ८. १.
५. सा. उ १. २ ९. १.

माधुच्छन्दसा दृष्टं माधुच्छन्दसम्। एवैतत् साम प्रजापतेः शरीरं खलु। अस्य तृचे आद्ये द्वे अनिरुक्ते। अतः प्रजापतेस्तनुत्वम्। अत एव देवतान्तराश्रवणादेवाऽयातयाम्न्यगतसारा प्रयुज्यते ॥ १७ ॥

अथ मैत्रावरुणसाम विधत्ते—

(१)'आ त्वेता निषीदते'ति दैवातिथम् ॥ १८ ॥

स्पष्टम् ॥ १८ ॥

तत् प्रशंसति—

देवातिथिः सपुत्रोऽशनायꣳश्चरन्नरण्य उर्वारूण्य-विन्दत्तान्येतेन साम्नोपासीदत्ता अस्मै गावः पृश्नयो भूत्वोदातिष्ठन् यदेतत्साम भवति पशूनां पुष्ट्यै ॥१९॥

पूर्वं दुर्भिक्षे सञ्जाते देवातिथिर्नाम ऋषिः सपुत्रोऽशनेच्छुः सञ्चरन्नरण्ये उर्वारूणि कर्कटीफलान्यविन्दत्। तानि फलानि देवातिथिः साम्नोपासीददुपसन्नोऽभूत्। तास्तानि फलानि पृश्नयो नानावर्णा गावो भूत्वा अस्मा उदातिष्ठन् प्रादुरभवन्। तस्मा एतत्पश्वानुगुण्याय भवति। न चैतदसङ्गतमिति मन्तव्यम्। सामर्थ्यात्तथा भवत्येव। अथ वा विहितसाम्नः स्तुत्यर्थत्वादविरोधः ॥ १९ ॥

अथ ब्राह्मणाच्छंसिसाम विधाय प्रशंसति—

(२)'योगे योगे तवस्तर'मिति सौमेधꣳ रात्रिषाम रात्रेरेव समृध्यै ॥ २० ॥

सौमेधं सुमेधसा दृष्टं रात्रिषामेति तस्य नाम ॥ २० ॥

अथाऽच्छावाकसाम विधत्ते—

(३) 'इन्द्र सुतेषु सोमेष्वि'ति कौत्सम् ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

एतत्प्रशंसति—

कुत्सश्च लुशश्चेन्द्रं व्यह्वयेताꣳ स इन्द्रः कुत्समुपावर्त्तत तꣳशतेन वादूर्भीभिराण्डयोरबधनात्तं लुशोऽभ्यवदत् प्रमुञ्चस्व परि कुत्सादिहागहि किमु त्वावानाण्डयोर्बद्ध आसाता इति तास्संच्छिद्य प्राद्रवत्स एतत् कुत्सः सामाऽपश्यत्तेनैनमन्ववदत्स उपावर्त्तत॥२२॥

---

१. सा. उ. १. २. १०. १. २. सा. उ. १. २. ११. १. ३. १. २. १२. १.

कुत्सश्च लुशश्चोभावृषी पूर्वे यज्ञे समकालमेवेन्द्रं व्यह्वयेतां पृथक्पृथगाहूतवन्तौ । तयोर्मध्ये स इन्द्रः कुत्सं प्रत्येवाऽपागच्छत् । न पुनर्लुशम् । यज्ञगमनशङ्कया शतसङ्ख्याभिर्वादुर्धीभिश्चर्ममयीभिरज्जुभिराण्डयोर्बध्नात् । तमिन्द्रं लुश आगत्यैवमवादीत्–'हे इन्द्र प्रमुच्यस्वाऽऽत्मानं कुतः स्सकाशात्? तदुच्यते–कुत्सात्परि परीति पञ्चम्यर्थानुवादी । कुत्ससकाशान्मुक्तस्त्वमिहास्मिन्यज्ञ आगह्यागच्छ । किमु त्वावान् त्वत्सदृशः आण्डयोर्मुष्कयोर्बद्धः सन् आसातै आसीत् । अतो महानुभावस्य तव मुष्कबन्धनमनुचितम् । अतो मुच्यस्वेत्यर्थः । अस्य पूर्वार्द्धे 'अवृजं हित्व' इत्यादिकोऽप्रयोजनत्वादत्र न पठितः । एवमुक्त इन्द्रस्ता वाश्रीः संच्छिद्य प्राद्रवत् प्रकर्षेण शीघ्रं लुशमगच्छत् । स तु कुत्स एतत्सामापश्यत् । तेन साम्नैनमिन्द्रमन्वषदत् स्तुतवानित्यर्थः । स स्तुतः कुत्समुपावर्त्तत । अत एतदिन्द्रस्य प्रियतममिति स्तुतिः ॥ २२ ॥

अस्त्वेवम्, किं ततः ? इत्याह—

यदेतत्साम भवति सेन्द्रत्वाय ॥ २३ ॥

स्पष्टम् ॥ २३ ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यायस्य
द्वितीयः खण्डः ॥ ९–२ ॥

तृतीयः खण्डः ॥

एवमुक्तो ज्योतिष्टोमः सर्वप्रकृतिभूतः । स च यद्यपि चतुःसंस्थः तथापि (१)न वै षोडशी नाम यज्ञोऽस्ती'त्यादि श्रुतिः षोडश्यपृथक्त्वादत्र ब्राह्मणेऽग्निष्टोमादिसंस्थात्रयात्मक एवोक्तः । अथाऽवशिष्टेनाऽध्यायशेषेण सोमविषयं प्रायश्चित्तमुच्यते । तत्रादौ साम्युत्थाने प्रायश्चित्तमाह—

यदि सत्राय दीक्षेरन्नथ साम्युत्तिष्ठेत्सोममपभज्य (२)विश्वजिताऽतिरात्रेण यजेत सर्ववेदसेन सर्वस्मा एव दीक्षते सर्वमाप्नोति ॥ १ ॥

यदि सत्राय तदनुष्ठातारो बहवो यजमानाः सह दीक्षेरन्, तेषु कश्चित् साम्यर्धमनुष्ठायोत्तिष्ठेदसमाप्यैव केन चिद्याध्यादिना निमि-

---

१. तै. स. ६. ६. ११. २. अयमेकाहकाण्डपठितात् भिन्नो विश्वजित् ।

सेन, स सोमं क्रीतं स्वांशमपभज्य विभागं कृत्वा तेन सोमेन विश्व-जिताऽतिरात्रसंस्थेन सर्वपृष्ठेन सर्ववेदसेन, 'वेद'इति धननाम । सर्व-स्वदक्षिणात्मकेन यजेत । सत्रादुत्थानेऽन्यं यं कञ्चित् क्रतुमनुष्ठाय कथं सर्ववेदसोऽतिरात्रः क्रियत ? इति । तत्राह-सर्वस्मा एव सर्वस्मै फलाय सर्वाणि च पृष्ठानि सर्वांश्च स्तोमान् प्रयोक्तु खलु सत्राय दी-क्षन्ते । अतोऽयमुचित इत्यर्थः । अनेनाऽतिरात्रेण सर्वसत्रफलं प्राप्नोति॥१॥

अत्रेयं सर्वस्वदक्षिणं सत्रादद्दक्षिणकादप्याधिक्यमेवेत्याह—

या इहक्षिणा ददाति ताभिरिति प्रयुङ्क्ते ॥ २ ॥

या इत या एव दक्षिणा ददाति विश्वजिति क्रतौ ताभिः सत्रम-तीत्य प्रयुक्तवान् भवति । एतेनापि सत्रादधिकं फलमनेन लभ्यत इत्युक्तं भवति । अत्र सोममपभज्येति श्रवणात्सोमक्रयानन्तरमुपसत्सु वा सौत्येषु वाऽहस्सु स्थितस्य विवक्षितं स्यात् न दीक्षासु स्थितस्येति श-ङ्क्यम् । एतदुपग्रन्थे विचार्य्य निर्णीतम्-यथा खलु विश्वजिद्दीक्षाभ्य उत्तिष्ठतः स्यादित्येकं । सोमापभागेन जानीमः क्रीतो हि दीक्षासु सोमो भवतीति । अत्र साम्युत्तिष्ठेदित्येकवचनमविवक्षितम् । अनेकेषामप्युत्ति-ष्ठतामेतस्य साम्युत्थानस्य निमित्तत्वात् ॥ २ ॥

एवं साम्युत्थानप्रायश्चित्तमुक्तम् । रात्रेरुपरिभागे रात्रिपर्यायाः क-र्त्तव्याः । तदनन्तरं सन्धिषाम। ततो व्युष्टेरर्वागेवाश्विनशस्त्रं समापनी-यम् । एवं सति प्रमादात् विलम्बेन पर्याया व्युष्टेः पूर्वं न समाप्नुयुरिति शंकयेत तस्योपायमाह—

यदि पर्य्यायैरस्तुतमभिव्युच्छेत्पञ्चदशाभिर्होत्रे स्तु-युः पञ्चभिः पञ्चभिरितरेभ्यः ॥ ३ ॥

यदि पर्यायैस्त्रिभिः सोममस्तुतमभिव्युच्छेत् प्रभातकालो भवेदिति शंकयेत तदा होत्रे होतृपञ्चदशभिर्ऋग्भिः स्तुयुः । इतरेभ्यो मैत्राव-णादिभ्यस्त्रिभ्यः पञ्चभिर्ऋग्भिः स्तुयुः । होतृणाम पञ्चदशस्तो-मकं कार्य्यमितराणि पञ्चस्तोमकानि कुर्युरित्यर्थः।अत्राऽपस्तम्बो यद्यपि पर्यायत्रयस्य पर्यायद्वयस्यैकपर्यायस्य च स्तोत्राय कालाविलम्बाभावे पृथक्पृथगेव शीघ्रप्रयोगमुक्तवान् , तथापि रात्रिपर्य्यायस्य त्रयस्याप्ये-तत्साधारणमिति मन्तव्यम् । तथाचोपग्रन्थे पठ्यते-'यदि पर्यायैरस्तु-तमभिव्युच्छेदिति सर्वान् पर्यायानधिकृत्य भवति क्रत्वर्थसामान्याद-थैकस्मिन् पर्याये प्रतीकेऽपि द्वयोरिती'ति ॥ ३ ॥

अथ सन्धिस्तोत्रायाह—

(१)'अग्ने विवस्वदुषस' इति सन्धिना स्तुयुः प्राणा वै त्रिवृत् स्तोमानां प्रतिष्ठा रथन्तरꣳ साम्नां प्राणाꣳश्चैवोपयन्ति प्रतिष्ठाञ्च ॥ ४ ॥

नवस्तोत्रीयात्मकसन्धिस्तोत्रेण स्तोतुं मध्ये व्युष्टिः स्यादिति शङ्का यद्युदियात् तदा 'अग्ने विवस्वदुषस' इति प्रगाथे अग्निदेवत्ये सन्धिना स्तोत्रेण त्रिवृत्स्तोमेन स्तुयुः। अत्र त्रिवृदिति(२) त्रिक एवोच्यते। स्तोमानां मध्ये त्रिवृत्स्तोमः प्राणाः खलु त्रिवृत्। त्रिवृति त्रित्वसंख्याऽस्ति। प्राणा अपि प्राणोऽपानो व्यान इति त्रिधा। यद्वा नासिकाच्छिद्रयोर्मुखे च सञ्चारभेदेन त्रिरूपः। अतः सङ्ख्यासाम्यात्त्रिवृदेव प्राणः। तथा साम्नां मध्ये रथन्तरसाम्नः प्रतिष्ठात्वम्। एवं सति यद्रथन्तरं सन्धिषाम त्रिकस्तोमं भवति तेन प्राणांश्च प्रतिष्ठाञ्चोभयमपि प्राप्नुवन्ति ॥ ४ ॥

उक्तस्सन्धिस्तोत्रेतिहासः। अथाश्विनशस्त्रस्य ऋक्सहस्रात्मकस्य कालविलम्बाभावे संख्यां विदधाति—

षष्टिञ्च त्रीणि च शतानि होता शꣳसति ॥ ५ ॥

षष्ट्युत्तरशतत्रयसङ्ख्याका होता ऋचोऽनुशंसत ॥ ५ ॥

तत्संख्यां स्तौति—

तावत्यः सम्वत्सरस्य रात्रयः सम्वत्सरसम्मिताभिरेव तदृग्भिराश्विनमाप्नोति ॥ ६ ॥

उक्तसङ्ख्या एव हि सम्वत्सररात्रयः स्युः।अस्त्वेवं किं तत ? इत्याह-उक्तसंङ्ख्यया सम्वत्सरसम्मानात् सम्मिताभिरेवाऽल्पसंख्याकाभिर्ऋग्भिर्ऋक्सहस्रसम्पाद्यं मुख्यमाश्विनशस्त्रमाप्नोति। अयमभिप्रायः-'सम्वत्सरो वै प्रजापति'रिति श्रुतेरुक्तसंख्यया सम्वत्सरद्वारा प्राजापत्यास्तैः स एव सर्वमिति तावदेव ऋक्सहस्रशस्त्रावाप्तेरिति ॥ ६ ॥

एवं विवासशङ्कायां कर्त्तव्यमुक्त्वेदानीं यथाविहितस्तोत्राणां न्यूनातिरेके प्रायश्चित्तं वक्तुं सम्यक्स्तुवन्तीति स्तुतानां स्वरूपं दर्शयति-

यदर्वाक् स्तुवन्ति तदस्तुतं यत्सम्प्रति स्तुवन्ति तत् स्तुतं यदतिष्टुवन्ति तत्सुष्टुतम् ॥ ७ ॥

यद्यदि विहितत्रिवृदादिस्तोत्रादर्वाक् स्तोत्रीयान्यूनत्वेन स्तुवन्ति तदस्तुतमेवाऽस्तुतप्रायमेव क्रतुवैकल्येनाऽपूर्वोत्पादनाशक्त्यात्।

---

१. सा. उ. ९. १.६.१. २. त्रिवृच्छब्दस्य ऋङ्नवकपरत्व व्युदासार्थमिदमुक्तम्।

यत् सम्प्रति यथावत् स्तुवन्ति तत् स्तुतं यदतिष्टुवन्ति विहितस्तोममतिक्रम्याऽधिकेन स्तुवन्ति तत् सुष्टुतम् । तदत्र सुशब्दोनिन्दार्थः । अधिकस्य न्यूनवद्दुष्टत्वात् । तेन क्रतुवैकल्यं भवत्येव, अविहितत्वाविशेषात् ॥ ७ ॥

विहितन्यूनसंस्तवे प्रायश्चित्तमाह—

यद्यर्वाक् स्तुयुर्यावतीभिर्न स्तुयुस्तावतीभिर्वाऽतिष्टुयुर्भूयोऽक्षराभिर्वा ॥ ८ ॥

यदि विहितस्तुतिर्तोऽर्वाक् स्तोत्रीया न्यूनत्वेन स्तुयुस्तदा यावतीभिः स्तोत्रीयाभिर्न स्तुयुस्ताः परिगणय्य उत्तरे स्तोत्रे अधिकत्वेन तावतीभिरधिसंख्याकेन वा विहितस्तोत्रेण स्तुयुः । यद्वा भूयोऽक्षराभिः स्तुयुः । यद्देवत्यं परस्तोत्रे तद्देवत्यास्वेव स्वस्तोत्रीयाभ्योऽधिकाक्षरासु स्तुयुः ॥ ८ ॥

अथाऽतिष्टुतौ प्रायश्चित्तमाह—

यद्यतिष्टुयुर्यावतीभिरतिष्टुयुस्तावतीभिर्वा न स्तुयुः कनीयोऽक्षराभिर्वा ॥ ९ ॥

उक्तवैपरीत्येन व्याख्यातव्यम् । पूर्वस्मिन् स्तोत्रे यावत्योऽधिका उत्तरस्मिंस्तावत्यो न्यूनाः स्युरित्येकः कल्पः । कनीयोऽक्षराभिर्वा स्तुयुरित्यपरः । एवमतिस्तुतेस्तु द्वौ कल्पावुक्तौ ॥ ९ ॥

अथाऽस्तुतावन्त्यं कल्पमाह—

यद्यर्वाक् स्तुयुस्त्रीडमग्निष्टोमसाम कार्य्यं निधनमेकेडा ये द्वे ताभ्यामेव तत्समं क्रियते ॥ १० ॥

यद्यर्वाक् स्तुयुस्तदा तत्परिहाराय त्रीडं महावैश्वामित्रमग्निष्टोमसाम कार्य्यम् । यज्ञायज्ञीयस्य कथमस्तुतस्य त्रीडं परिहार ? इति तत्राह—तासु तिसृष्विडासु मध्ये एकेडा स्तोत्रीयस्य निधनं भवति । इडाद्वयं तु न्यूनस्तोत्रं सम्पूर्णं करोति ॥ १० ॥

अथाऽतिष्टुतौ सामान्तरं सार्थवादमाह—

यद्यतिष्टुयुः स्वारमग्निष्टोमसाम कार्य्यमूनमिव वा एतत्साम्नो यत् स्वरस्तेनैव तत्समं क्रियते ॥ ११ ॥

अतिस्तवने यज्ञायज्ञियस्तोत्रीयास्वेव स्वारं दीर्घश्रवसमग्निष्टोमसाम कार्य्यम् । कथं तेनाऽधिकस्य समतेति ? ऊनमिवेत्यादिनोच्यते । यत्स्वरनिधनं सामाऽस्ति एतत्सामाऽन्यस्मादिडादिनिधनवतः सकाशादून-

मिव वै, अन्त्यस्वरव्यतिरेकेण बहिर्णिधनाभावात्। अतस्तेनैव तदाधिक्यं समं क्रियते। अत्रार्वाक्स्तवातिष्टवयोस्त्रयस्त्रयः कल्पा उक्ताः। तेषामेवं व्यवस्था—अग्निष्टोमसाम्नः पुरस्ताच्चेदर्वाक्स्तवोऽति वा स्याच्च तत्र त्रीडस्वराभ्यामेवाग्निष्टोमसामभ्यां न्यूनाधिकदोषापगमः। अर्वं चेदग्निष्टोमसाम्नोऽर्वाक्स्तवातिष्टवौ स्यातां तदा स्तोत्रीयाभिरक्षरैर्वा सम्पाद्यमिति। उक्तन्यूनाधिकयप्रायश्चित्तव्यवस्था आर्षेयकल्पग्रन्थे स्पष्टं प्रतिपादिता सा तत्र द्रष्टव्या ॥ ५१ ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यायस्य तृतीयः खण्डः ॥ ९-३ ॥

चतुर्थः खण्डः ॥

अथ संस्तवनिमित्तकं प्रतिपदादिकं विधास्यन् प्रसङ्गादध्वर्युकर्तृकस्य प्रातरनुवाकोपाकरणस्य कालविशेषं विधत्ते—

(१) यदि सोमौ सꣳसुतौ स्यातां महति रात्रेः प्रातरनुवाकमुपाकुर्यात् ॥ १ ॥

पृथक् प्रयोजनयोर्यजमानयोः परस्परं विद्विष्यमाणयोर्वा युगपदेकस्मिन् देशे सोमौ संसुतौ सद्योऽभिष्टुतौ यदि स्यातां तदा रात्रेर्महति काले महारात्रे प्रबुध्य प्रातरनुवाकं होत्राऽनुवक्तव्यमुपाकुर्यात्, 'प्रातर्यावभ्यो देवेभ्योऽनुब्रूही'ति सम्प्रैषेणाऽध्वर्युः प्रारम्भयेत्। प्रकृतौ हि (२)वयसां प्रवदनात् पूर्वं प्रातरनुवाकोपाकरणं तदेव संसुतसोमे मध्यरात्रेः कर्त्तव्यमित्यर्थः ॥ १ ॥

एवं सति को लाभः ? तं दर्शयति—

पूर्वो ह्वाचं पूर्वश्छन्दाꣳसि पूर्वो देवता ह्यृङ्क्ते ॥२॥

युगपदेकत्र बहुयज्ञेषु प्रवर्त्तमानेषु पौर्वापर्य्याभावात् गायत्रादिच्छन्दसामग्न्यादीनां देवतानाञ्च क्वचिदेव सन्निधानं स्यात्, नान्यत्रेति संसवे दोषः। एवं सति मध्यरात्र एव प्रातरनुवाकस्योपक्रमात् पूर्वो यजमानान्तरात् प्रथमभावी सन् वाचं मन्त्ररूपां वृङ्क्ते यजमानान्तराद्वर्जयति स्वयमेव पूर्वं परिगृह्णातीत्यर्थः। तथा छन्दांसि गायत्र्यादीनि च पूर्वो यजमानान्तरात् वृङ्क्ते वर्जयति। प्रातरनुवाके हि गायत्र्यादीनि

---

१. अत्र तैत्तिरीयसंहितायाः सप्तमकाण्डस्य सप्तमप्रपाठकस्य पञ्चमोऽनुवाकः, तत्रत्यं सायणीयं भाष्यं चाऽवलोकनीयम् ॥ २ प्रातः पक्षिणामुत्थानात्पूर्वमित्यर्थः।

चतुरुत्तराणि सप्त च्छन्दांस्यनूच्यन्ते। अतस्तान्यपि यजमानान्तरात् पूर्वं स्वयमेव परिगृह्णाति। तथा तस्मिन् प्रातरनुवाकेऽग्निरुषा अश्विनौ चेति तिस्रो देवता आग्नेयोषस्याश्विनैस्त्रिभिः काण्डैः स्तुताः। ता अपि वृङ्क्ते पूर्वो यजमानान्तराद्वर्जयति स्वकीयत्वेन परिगृह्णाति ॥ २ ॥

अथोद्गातुर्बर्हिष्पवमाने काञ्चित्प्रतिपदं विदधान इन्द्रस्यापि यजमानान्तराद्वर्जनं दर्शयति—

(१)वृषण्वतीं प्रतिपदं कुर्यादिन्द्रो वै वृषा प्रातःसवनादेवैषामिन्द्रं व्वृङ्क्ते ॥ ३ ॥

वृषशब्दोपेतां 'पवस्वेन्दो वृषा सुत' इत्यादिकां वृषण्वतीं 'वृषशब्दात् मतुपि पदसंज्ञायां नलोपे(२)'अनो नुट्' इति नुट्। प्रतिपद्यते प्रारभ्यते इयमिति(३)प्रतिपत्।तां वृषण्वतीं बर्हिष्पवमानस्य प्रतिपदं कुर्यात्।इन्द्रो वै इन्द्र एव वृषा वर्षणशीलत्वात्तच्छब्दाभिधेयः। एवमनेन वृषण्वत्यां प्रयोगेणैषामन्येषां यजमानानां प्रातःसवनादेवेन्द्रं वृङ्क्ते वर्जयति स्वकीये यज्ञ आगमयति ॥ ३ ॥

अथ पक्षान्तरं दर्शयति—

अथो खल्वाहुः सवनमुखे सवनमुखे कार्या सवनमुखात् सवनमुखादेवैषामिन्द्रं व्वृङ्क्ते ॥ ४ ॥

अथो खल्विति पक्षान्तरपरिग्रहे, सवनमुखे सवनमुखे सवनादौ सवनादौ त्रिष्वपि पवमानेष्वेषा वृषण्वती प्रतिपत्कार्या। इति शब्दोऽध्याहर्त्तव्यः। इति ब्रह्मवादिन आहुः। तेषामयं भावः—यदि वृषण्वती बर्हिष्पवमान एव स्यात्तेन सिध्यति प्रातःसवनपरिग्रहः। उत्तरयोः सवनयोर्वृषण्वत्या अप्रयोगादिन्द्रोऽपरिगृहीतो भवेदिति पूर्वस्मिन् पक्षे दोषः। अस्मिंस्तु पक्षे त्रिष्वपि पवमानेषु वृषण्वत्याः प्रयोगात् सवनमुखात् सवनमुखादेव त्रिभ्योऽपि सवनमुखेभ्य एवैषामिन्द्रं वर्जयति। त्रिष्वपि सवनमुखेष्विन्द्रः प्रथमतो यष्टव्यः। तथा कृते बहुषु यज्ञेषु युगपदनुष्ठीयमानेषु यस्मिन् यज्ञेऽस्य वाचकं वृषेति शब्दं शृणोति तत्रैव गच्छति नाऽन्यत्रेति ॥ ४ ॥

सर्वासामपि देवतानां परिग्रहं दर्शयति—

सुसमिद्धे होतव्यमग्निर्व्वै सर्व्वा देवताः सर्व्वा एव देवताः पश्यञ्जुहोति ॥ ५ ॥

---

१. ऋ सं ३. ९. ८ २. पा. सू. ८.२.१६. ३. स्तोत्रे प्रथमा ऋक् प्रतिपदित्युच्यते।

सुसमिद्धेऽतिशयेन दीप्ते होतव्यम्। ततः किम् ? अग्निः खलु सर्वा देवताः सर्वदेवतात्मकः। (१)"देवासुराः संयत्ता आसन्। ते देवा विभ्यतोऽग्निं प्राविशन्। तस्मादाहुरग्निस्सर्वा देवताः" इति श्रुत्यन्तरादग्नेः सर्वदेवतात्मकत्वम्। दीप्तस्याग्नेः सम्यग् दर्शनात्तत्र प्रवर्त्तमानाः सर्वा एव देवताः पश्यन् हविः प्रतियोगित्वेन साक्षात् कुर्वन् जुहोति ॥ ५ ॥

अथाऽस्मिन् संसुतसोमे प्रवृत्तहोमानन्तरं 'संवेशाय'इत्यादिभिर्मन्त्रैः क्रमेणोद्गातव्यमिति विधत्ते—

(२)संवेशायोपवेशाय गायत्र्यै च्छन्दसेऽभिभूतये स्वाहा संवेशायोपवेशाय त्रिष्टुभे च्छन्दसेऽभिभूतये स्वाहा संवेशायोपवेशाय जगत्यै च्छन्दसेऽभिभूतये स्वाहेति जुहोति ॥ ६ ॥

अत्र च सूत्रकारेण(३) 'संसुतसोमे त्वधिकामुद्गाता जुहुयात् संवेशायोपवेशायेति यथासवनं छन्दांस्यादिशन्' इत्यादिना (यदुक्तं) तदत्रानुसन्धेयम्। प्रथमेन मन्त्रेण प्रातःसवने होमो द्वितीयेन माध्यन्दिने तृतीयेन तृतीयसवने। तेषामयमर्थः-संवेशाय संविशति सम्यगस्मद्यज्ञं विशतीति संवेशः संप्रविश्य चोपविशति तत्रैव निषीदति यज्ञान्तरं न गच्छतीत्युपवेशः। ईदृशाय च्छन्दसे गायत्र्यै गायत्र्यात्मकायाऽभिभूतये शत्रूणामभिभवित्रे। यद्वा सोमाहरणसमये सोमरक्षकान् स्वानभ्राजादीनभिभूय हि गायत्री सोममाहृतवती, तदभिप्रायेणेदं विशेषणम्। तस्मै गायत्र्यै च्छन्दसे, स्वाहेदं हविस्त्यजामि। एवमुत्तरत्रापि योज्यम्। त्रिष्टुभे च्छन्दसे जगत्यै छन्दसे इति विशेषः ॥ ६ ॥

अस्तु होमः किमतो भवति ? तदाह—

च्छन्दाꣳसि वा अभिभूतयस्तैरेवैनानभिभवत्युभे बृहद्रथन्तरे कार्ये ॥ ७ ॥

गायत्र्यादीनीमानि च्छन्दांसि खल्वभिभूतयः पूर्वोक्तप्रकारेणाभिभवितारस्तैरेवैनानन्यान् विद्विष्टान्यजमानानभिभवति। ये बृहद्रथन्तरे पृष्ठस्तोत्रनिर्वचनकार्य्यैक्यात् व्रीहियववत् प्रकृतौ विकल्प्येते तयोः संसुतसोमे समुच्चयासम्भवेन विकल्प इति। सत्यम्, अत्र तावदुभे बृहद्रथन्तरे इति पुनर्विधानात् समुच्चयारम्भः प्रतीयते तत्र कथं

---

१. तै. सं. ६. २. २. ६. २. अस्यमन्त्रस्य स्वरूपान्तरं व्याख्याने विशिषश्च तैत्तिरीयसंहितायां (३. १. ७. १.) तैत्तिरीयब्राह्मणे (१.४.६.) च द्रष्टव्यम्,

३. लाट्या. श्रौ. १. ११. १०.

प्रयोगप्रकारः ? इत्याकाङ्क्षायां (१)यन्वित्याहुर्बृहत्पूर्वे प्रजापतौ समभवेदित्यादिना 'तस्मात् पूर्वे योगमानशे' इत्यन्तेन ब्राह्मणेन बृहद्रथन्तरयोस्सन्निपाते रथन्तरं पूर्वे प्रयोक्तव्यं पश्चाद्बृहदिति व्यवस्थितत्वात् माध्यन्दिनपवमाने '(२)पुनानः सोमेति' बार्हते प्रगाथे रथन्तरं कर्त्तव्यम्, पृष्ठस्तोत्रे बृहदित्युभयोः समुच्चयः ॥ ७ ॥

तदेतत्प्रशंसति—

यत्र वा इन्द्रस्य हरी तदिन्द्रः, इन्द्रस्य वै हरी बृहद्रथन्तरे, यदुभे बृहद्रथन्तरे भवतः पूर्व एवेन्द्रस्य हरी आरभन्ते ॥ ८ ॥

यस्मिन् देशे खलिवन्द्रस्य हरी रथ्यावश्वौ भवतस्तत्रेन्द्रस्तिष्ठति बृहद्रथन्तरे सामनी इन्द्रस्य हरी । अतो बृहद्रथन्तरे उभे अपि भवत इति पूर्व एवा ऽन्येभ्यो यजमानेभ्यः प्रथमभाविन एव त इन्द्रस्य हरी आरभन्ते परिगृह्णन्ति ॥ ८ ॥

अन्यदपि सामद्वयं विधत्ते—

तौरश्रवसे कार्ये ॥ ९ ॥

तुरश्रवा नाम कश्चिदृषिस्तेन दृष्टे सामनी तौरश्रवसे। ते च (३) 'यदिन्द्र शासो अव्रतम्' इत्यस्यामुत्पन्ने 'प्रत्नं सधस्थमासदापृछ्यं धरुणं वाज्यर्षसि, सखायो दीर्घजिह्वम् (?)। (३)यो धारया पावकया' इत्येतयोरेकर्च्चयोरूहेन गीयते ते चात्र लिङ्गादार्भवे पवमाने कार्ये संसुतसोमे ॥ ९ ॥

अनयोः प्रयोगानुगुण्यमाख्यानप्रदर्शनेनाह—

तुरश्रवसश्च वै पारावतानाश्च सोमौ सꣳसुतावास्तां, तत एते तुरश्रवाः सामनी अपश्यत्ताभ्यामस्मा इन्द्रः शल्मलिनां यमुनाया हव्यं निरावहत् यत्तौरश्रवसे भवतो हव्यमेवैषां व्यृङ्क्ते ॥ १० ॥

परवा नाम कश्चित्तत्सम्बन्धिनः पारावताः । तेषां दीक्षितानां तुरश्रवसश्च ऋषेः सोमौ संसुतौ सह सुतावास्तां संसवो याग इत्यर्थः । ततोऽनन्तरं तुरश्रवा ऋषिरेते सामनी अपश्यत् दृष्टवान् । दृष्ट्वा च ताभ्यां स्तुतवानिति शेषः । तत्स्तुत्या प्रीत इन्द्रोऽस्मै तुरश्रवसे यमुनायाः सम्बन्धि यमुनातटे वर्त्तमानं तेषां हव्यं हविश्चरुपुरोडाशादिकं

---

१. ता. ब्रा. ७. ६. ९. १०. २. सा. सं. उ. १. १. ९.
३. सा. सं. पू. प्र. ४. अ. १. ऋ. ६. ४. सा. सं. उ. १. १. १८.

शल्मलिना स्वकीयेनाऽऽयुधविशेषेण निरावहत् निहृष्याऽभिप्राय्यत्। पारावतानां हविरपहृत्य तुरश्रवसे दत्तवानित्यर्थः। एवं सति तौरश्रवसे भवतो यत् तेनैषां यजमानानां विद्विषां हव्यं वृङ्क्ते वर्जयति ॥१०॥

अथ प्रसङ्गादध्वर्युकर्तृकमभिषवमप्यन्यदीयाभिषवात् पूर्वमेव कुर्युरिति विधत्ते—

पूर्वेऽभिषुण्वयुः ॥ ११ ॥

(१)प्रतिप्रस्थात्रादयश्चत्वारोऽध्वर्यवः पूर्वे अन्यदीयसामाभिषवात् प्रथमभाविन एतत्सोममभिषुण्वयुः ॥ ११ ॥

किं तत इति, आह—

या वै पूर्व्वाः प्रस्नान्ति ताः पूर्व्वास्तीर्थं जयन्ति पूर्व्व एवेन्द्रमारभन्ते ॥ १२ ॥

याः खलु लोके प्रजाः पूर्वाः प्रथमभाविन्यः सत्यः प्रस्नान्ति नदीतडागादिषु स्नानं कुर्वन्ति पूर्वास्ता एव तीर्थं तरन्त्यवतरन्त्यनेनेति अवतरणप्रदेशस्तीर्थं तज्जयन्ति लभन्ते। पश्चाद्भाविन्यस्तु प्रजा न लभन्ते। एवमत्रापि पूर्व एवाभिष्टोतार इन्द्रमारभन्ते नाऽन्ये ॥ १२ ॥

अथाऽस्मिन् संसुतसोमे होतुः कृत्यं विधत्ते—

विहव्यं शस्यम् ॥१३॥

विहवो नाम कश्चिदृषिस्तेन दृष्टं (२)'ममाग्ने' इत्यादिकं सूक्तं विहव्यम्। तच्छस्यं होत्रा वैश्वदेवसूक्तात्पुरस्ताच्छंसनीयम्। तदुक्तं भगवताऽऽश्वलायनेन (३)'ममाग्न इति वैश्वदेवसूक्तस्यापुरस्तादिति हि तत्र वर्त्तते॥१३॥

एतच्छंसनमपि स्वकीययज्ञ इन्द्रस्य वर्त्तते कारणमित्याख्यानं प्रदर्शयन्नाह—

जमदग्नेश्च वा ऋषीणाञ्च सोमौ सꣳसुतावास्तां तत एतज्जमदग्निर्व्विहव्यमपश्यत्तमिन्द्र उपावर्त्तत यद्विहव्यꣳहोता शꣳसतीन्द्रमेवैषां व्वृङ्क्ते ॥१४॥

पुरा जमदग्नेरन्येषामृषीणाञ्च सोमौ संसुतौ सहाऽभिषुतावास्तां भवेताम्। ततोऽनन्तरं जमदग्निरेतद्विहव्यं सूक्तमपश्यत्। तं जमदग्निमिन्द्र उपावर्त्ततोपागच्छत्, नान्यान्। तत इदानीन्तनोऽपि होता संसु-

---

१. अध्वर्युः, प्रतिप्रस्थाता, नेष्टा, उन्नेता, इति चत्वारः।

२. ममाग्ने वर्चो विहवेष्वस्तु इत्यादयः (ऋ. सं. १०. १०. १६) नवर्चः

३. आश्व. श्रौ. ६. ६. १६, पुरस्तादिति प्रपूर्वसूत्रादनुवर्तत इत्यर्थः।

तसोमे विहव्यं शंसतीति यत् तेनेन्द्रमेवैषां वृङ्क्ते वर्जयति ॥ १४ ॥

अथास्य संसुतसोमस्य संस्थाभेदं पुर्व्वपक्षत्वेन दर्शयति—

यदीतरोऽग्निष्टोमः स्यादुक्थः कार्य्यो यद्युक्थोऽतिरात्रो यो वै भूयान्यज्ञक्रतुः स इन्द्रस्य प्रियो भूयसैवैषां यज्ञक्रतुनेन्द्रं व्वृङ्क्ते ॥ १५ ॥

यदीतरो यजमानान्तरेण क्रियमाणः सोमयागोऽग्निष्टोमः स्यात्, अग्निष्टोमसाम्ना संस्थितो भवेत्तत्तदोक्थ उक्थसंस्थः स्वकीयो यज्ञः कार्य्यः । यदि परकीय उक्थसंस्थः स्यात्, तदानीमतिरात्रः कार्य्यः । एवमधिकसंस्थाकरणे को लाभः ? उच्यते—यो हि भूयान् बहुतरो बहुस्तुतशस्त्रसाध्यो यज्ञक्रतुः स एवेन्द्रस्य प्रिय इष्टो भवति । अतो भूयसा बहुतरेणैव यज्ञक्रतुनैषामिन्द्रं वृङ्क्ते ॥ १५ ॥

तमिमं पक्षं दूषयित्वा स्वाभिमतं पक्षमाह—

अथो खल्वाहुर्दुष्प्राप इव वै परः पन्था यमेवाऽग्रे यज्ञक्रतुमारभेत तस्मान्नेयादिति ॥ १६ ॥

अथो खल्विति पक्षान्तरपरिग्रहद्योतनार्थः । अथो खल्वभिज्ञा ब्रह्मवादिन आहुः किमिति ? दुष्प्राप इव 'वै' इत्यवधारणे प्राप्तुमशक्य एव हि परो दीर्घः पन्थाः । महापथेन हि गच्छन् चिरकालात् फलं प्राप्नोत्यल्पेन तु सद्यः प्राप्नोति । अतः परः पन्था उत्तरोत्तरः संस्थात्मको यज्ञमार्गो दुष्प्राप इत्युक्तं भवति । यस्मादेवं तस्मादग्र आदौ सङ्कल्पसमये यमेव यज्ञक्रतुमारभेत तस्मान्नेयादिति ॥ १६ ॥

अथ होतुः सूक्तद्वयं शस्यं विधत्ते—

सजनीयꣳ शस्यमगस्त्यस्य कयाशुभीयꣳ शस्यम् ॥१७॥

'सजनास इन्द्र'इति शब्दयुक्तं (१)'यो जात एव' इति सूक्तं सजनीयम् । तन्निष्केवल्यशस्त्रे निविद्धानस्य सूक्तस्य पुरस्ताच्छंसनीयम् । तथा (२)कयाशुभा सवयस' इति सूक्तमगस्त्येन दृष्टत्वादगस्त्यस्य कयाशुभीयं तन्मरुत्वतीये शस्त्रे शंसनीयम् । तथा च सूत्रकताऽऽश्वलायनेनोक्तं (३) 'कया शुभेति च मरुत्वतीये पुरस्तात् सूक्तस्य शंसेद्योजात एवेति निष्केवल्ये' इति ॥ १७ ॥

तदेतदुभयं शंसति—

अस्या अमुष्या अद्यश्वान्मिथुनादहोरात्राभ्यामे-

---

१. ऋ. सं. २. २. १. २. ऋ सं. १. २३. १. ३. आश्व. श्रा. ६. ६. १४

वैनान्निर्भजति ॥ १८ ॥

शस्यमानयोः सूक्तयोर्द्विसंख्यायोगादस्याः पृथिव्या अमुष्या दिवश्च द्वाभ्यां लोकाभ्यामेवैतान् द्वेष्टॄन् यजमानान्निर्भजति निर्भक्तान् करोति; वियोजयतीति यावत् । तथा अद्येति वर्त्तमानः कालः । श्व इति भविष्यः कालः उभयस्मादपि कालादेतान्निर्भजति । यद्वा 'उभे बृहद्रथन्तरे कार्य्ये, इति विधिः पूर्व्वमुक्तस्तच्छेषतया ऽयमर्थवादो योज्यः । तथैव हि तैत्तिरीयके समाम्नातम्-(१)'उभे बृहद्रथन्तरे भवत इयं वाव रथन्तरमसौ बृहदाभ्यामेवैनमन्तरेत्यद्य वाव रथन्तरं श्वो बृहदद्याश्वादेवैनमन्तरेति भूतं वाव रथन्तरं भविष्यद् बृहद् भूताच्चैवैनं भविष्यतश्चान्तरेती'ति ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यायस्य
चतुर्थः खण्डः ॥

अथ पञ्चमः खण्डः ॥

उक्तं संसुतसोमे प्रायश्चित्तम् । अथ सोमापहरणे प्रायश्चित्तमुच्यते—

यदि सोममक्रीतमपहरेयुरन्यः क्रेतव्यः ॥ १ ॥

दीक्षान्ते सोमः क्रीयते । यदि ततः पूर्व्वमक्रीतं सोममपहरेयुरन्ये शत्रवस्तदानीं 'यद्यविज्ञाता सर्व्वव्यापद्ये'तेति सामान्येन विहितं सर्व्वप्रायश्चित्तं कृत्वाऽन्यः सोमः क्रेतव्यः । गवादिद्रव्यकेण समन्त्रकक्रयेण प्राप्तव्यः ॥ १ ॥

यदि क्रयोत्तरकालं सोमोऽपहृतः स्यात्तत्राह—

यदि क्रीतं योऽन्योऽभ्याशं स्यात् स आहृत्यः सोमविक्रयिणे तु किञ्चिद्दद्यात् ॥ २ ॥

यदि क्रीतं क्रयप्राप्तं सोममपहरेयुस्तदा योऽन्यः सोमोऽभ्याशमन्तिके स्यात् स आहृत्याऽभिषोतव्यः पुनः क्रयो न भवति । यः सोममाहृत्य विक्रीणाति तस्मै सोमविक्रयिणे यत्किञ्चिदल्पं धनं दद्यात् । न शास्त्रीयं गवादिकं क्रयणद्रव्यं देयमित्यर्थः ॥ २ ॥

---

१. तै. सं. ३. १. ७.

अथ सोमप्रतिनिधीनाह—

यदि सोमं न विन्देयुः पूतीकानभिषुणुयुर्यदि न पूतीकानर्ज्जुनानि ॥ ३ ॥

सोमं शास्त्रोक्तलक्षणं यदि न विन्देयुर्न लभेरँस्तदा पूतीकान् लताविशेषान् पूतीकसंज्ञकानभिषुणुयुः। यदि पूतीकानपि न विन्देयुः तदानीमर्ज्जुनानि श्यामलानि तृणान्याहृत्याऽभिषुणुयुः ॥ ३ ॥

अथ पूतीकानां सोमप्रभवत्वेन सोमकार्य्ये शक्तिमाख्यानेन प्रदर्शयन्नाह—

गायत्री सोममाहरत्तस्या अनु विसृज्य सोमरक्षिः पर्णमच्छिनत्तस्य योंशुः परापतत्स पूतीकोऽभवत्तस्मिन देवा ऊतिमविन्दन्नूतीको वा एष यत्पूतीकानभिषुण्वन्त्यूतिमेवास्मै विन्दन्ति ॥ ४ ॥

अस्य पूतीकस्योतिं तृप्तिमेव विन्दन्ति लभन्ते देवा इति शेषः ॥४॥

अथाऽस्मिन् पूतीकाभिषवयज्ञे गव्यादिसाहित्यं विधत्ते—

प्रतिधुक् च प्रातः पूतीकाश्च, शृतञ्च मध्यन्दिने पूतीकाश्च, दधि चाऽपराह्णे पूतीकाश्च ॥ ५ ॥

प्रातःसवने प्रतिधुक् सद्योदुग्धं पयश्चाभिषुताः पूतीकाश्च सह सोमकार्य्यं कुर्व्वन्ति। तथा मध्यन्दिने माध्यन्दिने सवने शृतं पक्वं क्षीरञ्च पूतीकाश्च सह सोमकार्य्ये शक्ताः। अपराह्णे तृतीयसवने दधि च पूतीकाश्च सह सोमकार्य्यं कर्त्तुं शकनुवन्ति ॥ ५ ॥

प्रतिधुगादेः पूतीकानाञ्च संहत्य सोमप्रतिनिधित्वमुपपादयति—

सोमपीथो वा एतस्मादपक्रामतीत्याहुर्यस्य सोममपहरन्तीति स ओषधीश्च पशूंश्च प्रविशति तमोषधिभ्यश्च पशुभ्यश्चावरुन्धे ॥ ६ ॥

ओषधिवनस्पतिभ्यः सकाशात् प्रतिधुगादिविशिष्टपूतीकाभिषवणसोमपानं यजमानोऽवरुन्धे प्राप्नोति ॥ ६ ॥

अथ यत् पूर्वमुक्तं पूतीकाभावेऽर्ज्जुनानि तृणान्यभिषोतव्यानीति तेषामपि सोमसम्बन्धं दर्शयन् सोमकार्य्यक्षमतामाह—

इन्द्रो व्यृत्रमहंस्तस्य यो नस्तः सोमः समधावत्तानि बभ्रुतूलान्यर्ज्जुनानि, यो वपाया उत्स्विन्नायास्तानि

लोहिततूलानि, यानि बभ्रुतूलान्यर्जुनानि तान्यभिषुणुयादेतद्वै ब्रह्मणो रूपं साक्षादेव सोममभिषुणोति ॥ ७ ॥

पुरा खलु वृत्रमावरकं कृतसोमपानमसुरमिन्द्रो हतवान्। तस्य नस्तो नासिकाप्रदेशाद्यः सोमः समधावत् बहिः प्रावर्त्तत भूमौ प्रसृतोऽभूत्। तानीति विधेयापेक्षया नपुंसकलिङ्गं बहुवचनञ्च। यो वपाया उत्खिद्यायास्तानि लोहिततूलानि। यानि बभ्रुतूलान्यर्जुनानि तूलसमबभ्रुवर्णमञ्जरीयुक्तान्यर्जुनानि श्यामलानि तृणान्यभवन्। यश्च वपाया उत्खिद्यायाः सोमः समधावत्तानि लोहिततूलान्यभवन्। उभयेषां मध्ये यानि बभ्रुतूलान्यर्जुनानि तानि पूतीकाभावेऽभिषुणुयात्। एतदेव हि साक्षाद्ब्रह्मणो रूपं यद्वस्तुवर्णत्वम्। एवं सति साक्षात्प्रत्यक्षमेव सोममभिषुणात्यभिषुतवान् भवति ॥ ७ ॥

तस्मिन्नपहृतसोमप्रयोगे सामानि विधित्सुर्ब्राह्मणाच्छंसिनः पृष्टस्तोत्रनिवर्त्तकमेकं साम विधत्ते—

आयन्तीयं ब्रह्मसाम कार्य्यं सदेवैनं करोति ॥ ८ ॥

(१)'आयन्त इव सूर्य्यम्' इत्यस्यामुत्पन्नं साम आयन्तीयम्। तद्ब्रह्मसाम कर्त्तव्यम्। कृतेन च तेनैनं यज्ञं सदेव प्रशस्तमेव करोति ॥ ८ ॥

अथान्यत्सामद्वयं विधत्ते—

यज्ञायज्ञीयमनुष्टुभि प्रोहेद्वाचैवैनं समर्द्धयति वारवन्तीयमग्निष्टोमसाम कार्य्यमिन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥ ९ ॥

आर्भवपवमाने(२) 'पुरोजिती वो अन्धस' इति योऽयमानुष्टुभस्तृचस्तस्मिन्ननुष्टुभ्यानुष्टुभे तृचे यज्ञायज्ञीयं साम प्रोहेत। यद्यपि वैयगाने यज्ञायज्ञीयं (३)'यज्ञायज्ञा वो अग्नय' इत्यत्रैवाऽऽम्नातम्। तथाप्यनुष्टुभ्यूहेन कर्त्तव्यमित्यर्थः। तस्य हि यज्ञायज्ञीयस्य 'वाग्गि'ति निधनं भवति तथा सत्येनं यज्ञं वाचैव समर्द्धयति समृद्धं करोति।(४)'अश्वं न त्वा वारवन्तम्' इत्यस्यामुत्पन्नं साम वारवन्तीयम्। तदेतदग्निष्टोमसामत्वेन'यज्ञायज्ञा व' इति प्रगाथे कार्य्यम्। तस्य च साम्नो वारणहेतुत्वादपि वारवन्तीयमिति संज्ञा। एवं सति सामेन्द्रियस्य बलस्य वीर्य्यस्य च परिगृहीत्यै

---

१. सा. सं. पू. ३. २. २. ५. २. सा. सं. पू. ६. २. १. १.
३. सा. सं. पू. १. १. ४. १. ४. सा. सं. पू. १. १. १. ८.

स्वीकरणाय भवति ॥ ९ ॥

अथ दक्षिणां विधत्ते—

पञ्च दक्षिणा देयाः ॥ १० ॥

दक्षिणाशब्देन गौरुच्यते । पञ्च गावो दक्षिणात्वेन ऋत्विग्भ्यो देया इति ॥ १० ॥

तदेतत्प्रशंसति—

पाङ्क्तो यज्ञो यावान्यज्ञस्तमेवाऽऽरभते ॥ ११ ॥

यज्ञस्तावत्पाङ्क्तः—त्रीणि सवनानि, अवभृथो, ऽनूबन्ध्या चेति । यद्वा धानाः करम्भः परिवापः पुरोडाशः पयस्येति पञ्च सवनीयहवींषि तदुक्तत्वात् पाङ्क्तः । दक्षिणाऽपि पञ्चसंख्यावती । अतो यावान् यत्परिमाणको यज्ञस्तं तत्परिमाणकमेव यज्ञमारभते । अनेन पञ्चदक्षिणाविधानेन सङ्कल्पावसरे कल्पितानां दक्षिणानां बाध उक्तो भवति ॥ ११ ॥

अथैतं सोमयागं समाप्य प्रायश्चित्तार्थं पुनः सोमेन साङ्गमनुष्ठेयमिति विधत्ते—

अवभृथादुदेत्य पुनर्दीक्षेत ॥ १२ ॥

अवभृथादवभृथं कृत्वा तदनन्तरमुदेत्योदयनीयाद्युदवसानीयान्तं कृत्वा पुनस्तस्मा एव क्रतवे दीक्षते । दीक्षणीयाद्युदवसानीयान्तं सर्वं कर्त्तव्यम् ॥ १२ ॥

तत्र तद्द्याद्यद्दास्यं स्यात् ॥ १३ ॥

तत्र तस्मिन् यज्ञे दक्षिणाद्रव्यं दद्यात् पूर्वस्मिन् प्रयोगे यद्दक्षिणाद्रव्यं दास्यन् स्याद्भवेत् । पूर्वस्मिन् यज्ञे या सप्तैकविंशत्यादिका दक्षिणा सङ्कल्पिता तामस्मिन् द्वितीये प्रयोगे दद्यादित्यर्थः ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठः खण्डः ॥

अथ द्रोणकलशस्य भेदने प्रायश्चित्तं विधत्ते—

यदि कलशो दीर्येत वषट्कारणिधनं ब्रह्मसाम कुर्य्यात्॥१॥

अत्र कलशशब्देन नामैकदेशेन द्रोणकलश एवोच्यते । यथा भीमसेनो भीमः, सत्यभामा भामेति। स यदि दीर्य्येत भिद्येत तदानीं 'अभि

त्वा पूर्वपीतये' इत्यस्यामुत्पन्नं (१)वषट्कारणिधनाख्यं साम वक्ष्यमाणा-स्वृक्षु ब्रह्मसामत्वेन कुर्य्यात् ॥ १ ॥

किमतो भवति ? तदाह—

अवषट्कृतो वा एतस्य सोमः परा सिच्यते यस्य कलशो दीर्यते यद्वषट्कारिणधनं ब्रह्मसाम भवति वषट्-कृत एवाऽस्य सोमो भवति ॥ २ ॥

यस्य यजमानस्य कलशो दीर्य्यते भिद्यते एतस्य सोमोऽवषट्-कृतो वषट्काररहित एव परासिच्यते भूमौ प्रस्कन्द्यते । कलशे दीर्णे तत्रस्थः सोमः सर्वो भूमावेव स्रवति । तदानीं वषट्कारो न प्रयुज्यत इत्यवषट्कृतत्वम् । तथा सति वषट्कारणिधनं ब्रह्मसाम भवतीति यत् तेनाऽस्य यजमानस्य स्कन्नः सोमो वषट्कृतो वषट्कारेण चोदिताधारे प्रक्षिप्त एव भवति ॥ २ ॥

तथाऽस्य साम्न आधारभूता ऋचो विधत्ते—

(२)'विधुं दद्राणꣳसमने बहूना'मित्येतासु कार्य्यम् ॥३॥

एतदाद्यास्वृक्षूहेन कर्त्तव्यमित्यर्थः ॥ ३ ॥

कलशविदारणेऽयं तृचः प्रयोगार्ह इत्याह—

एष हि बहूनाꣳ समने दीर्यते यत्कलशः ॥ ४ ॥

यत् यः कलशो द्रोणकलश एष खलु बहूनामृत्विजां सङ्गमने दी-र्यते भिद्यते । तस्मात् 'दद्राणं समने बहूनाम्' इत्युक्तार्थप्रतिपादकेन शब्देन योगादेता ऋचो दीर्णे कलशे प्रयोगार्हा इत्यर्थः ॥ ४ ॥

तमिमं पक्षं दूषयति—

तदाहुर्न वा आर्त्याऽऽर्त्तिरनूद्याऽऽर्त्या वा एष आर्त्ति-मनुवदति यः कलशे दीर्णे दद्राणवतीषु करोतीति ॥५॥

तत्तत्र विषये ब्रह्मवादिन आहुः, कथमिति ? तदुच्यते । न खल्वार्त्तौ सत्यामार्त्तेनैव वचनेनानुवदितव्यम् । एवं सत्युद्गाता कलशे दीर्णे दद्राणवतीषु विदारणप्रतिपादकदद्राणशब्दवतीषु वषट्कारणिधनं करोति । एष आर्त्या वै आर्त्तिप्रतिपादिकयैव वाचा ऽऽर्त्तिं कलशविदा-रणरूपामनुवदति । अत एतन्न युक्तमिति ॥ ५ ॥

किं तर्हि कलशे दीर्णे कर्त्तव्यम् ? तदाह—

आयन्तीयमेव कार्य्यम् ॥ ५ ॥

---

१. सा. सं. पू. ३. २. २४.

२. सा. सं. उ. ९. १, ७, १, शाक्मना, एभिर्ददे इत्याद्रिमे ऋचौ ।

श्रायन्तीयमेव ब्रह्मसामत्वेन कर्त्तव्यं न वषट्कारणिधनम् ॥ ६ ॥
अस्यैव साम्नः पूर्वोक्तदोषनिवर्त्तकत्वे सामर्थ्यं दर्शयति—

प्रजापतिः प्रजा असृजत स दुग्धो रिरिचानोऽमन्यत स एतच्छ्रायन्तीयमपश्यत्तेनात्मानं समश्रीणात्प्रजया पशुभिरिन्द्रियेण ॥ ७ ॥

पुरा सर्वकारणभूतः प्रजापतिः सर्वाः प्रजा असृजत स्वात्मनि सूक्ष्मरूपेणाऽवस्थितानि सर्वाणि कार्यजातानि स्थूलरूपेण बहिः सृष्टवानित्यर्थः । अतोऽन्तर्गतस्य कार्य्यस्याऽभावात् स प्रजापतिर्दुग्धो रिरिचानोऽमन्यत । यथा दुग्धा गौः अन्तरवस्थितपयसो विसर्जनाद्रिक्ता भवति तथा प्रजापतिरपि सर्वं सृष्ट्वाऽऽत्मनाऽतिरिक्ततया ऽऽसीत् । सर्वारिक्तापरिहारायैतच्छ्रायन्तीयमपश्यत् । तेन च दृष्टेन साम्ना साधनेन प्रजया पुत्रपौत्रादिरूपया पशुभिर्गवादिभिरिन्द्रियेण चक्षुरादिना वीर्येण वाचाऽऽत्मना समश्रीणात् समयोजयत् । अत एव श्रयणसाधनत्वादस्य च श्रायन्तीयमिति संज्ञा ॥ ७ ॥

दुग्ध इव एष रिरिचानो यस्य कलशो दीर्यते यच्छ्रायन्तीयं ब्रह्मसाम भवति पुनरेवाऽऽत्मानꣳसꣳश्रीणाति प्रजया पशुभिरिन्द्रियेण ॥ ९ ॥

तथा सति यस्य कलशो दीर्यते एष दुग्ध इव रिरिचानो रिक्तो भवति, यागस्य विकलत्वेन फलप्राप्त्यभावात् । अर्जितस्य धर्मस्य च प्रहाणाच्च । यच्छ्रायन्तीयमस्य यज्ञे ब्रह्मसाम भवति तेनैष आत्मानं प्रजादिभिः फलैः पुनरेव संश्रीणाति संयोजयति ॥ ८ ॥

अस्मिन् पक्षे वषट्कारणिधनस्याऽप्रयुक्तत्वाद् भिन्नात् कलशात् पुनः सोमोऽवषट्कृतः स्यात्तत्राह—

यदि श्रायन्तीयं ब्रह्मसाम स्याद्वैष्णवीष्वनुष्टुप्सु वषट्कारणिधनं कुर्य्यात् ॥ ९ ॥

यदि श्रायन्तीयं ब्रह्मसाम भवेत्तदा वैष्णवीषु विष्णुसम्बन्धिनीष्वनुष्टुप्छन्दस्कास्वृक्षु(१)'पवस्व वाजसातये' इत्यादिकासु वषट्कारणिधनं कुर्य्यादिति । उत्तरत्र हि वैष्णव्योऽनुष्टुभो भवन्तीति 'पवस्व वाजसातये' इत्यादीनां विधिर्दृश्यते । अतोऽत्रापि वैष्णव्योऽनुष्टुभस्ता

---

१. सा, सं, उ. ३. २. १९. १. त्वां रिहन्ति धीतयः, त्वं द्यां च महिव्रत, इत्यग्रिमे ऋचौ ।

एवेत्यवसीयते। अत्र यदि श्रायन्तीयं ब्रह्मसाम.स्यादिति यदि शब्दं प्रयुञ्जान एष पक्षो वैकल्पिक इति सूचयति । अतोऽनयोः पक्षयोरन्यतरः कर्त्तव्य इत्यर्थः ॥ ९ ॥

वैष्णवीष्वनुष्टुप्सु तस्य साम्नः करणं प्रशंसति—

यद्वै यज्ञस्य स्रवति वषाचं प्रतिस्रवति वषागनुष्टुप् यज्ञो ह्विष्णुर्वाचैव यज्ञस्य च्छिद्रमपिदधाति ॥ १० ॥

यज्ञस्य सम्बन्धि पदं स्रवति गच्छत्यनुष्टुबेव सा वाक् । 'अनुष्टुप् च वै सप्तदश समभवताम्' इत्यादिना सर्वेषां गायत्र्यादीनां छन्दसा मनुष्टुभः सकाशात् सृष्टेर्वक्ष्यमाणत्वादनुष्टुभो वाक्त्वम् । विष्णुश्च यज्ञ एव भवति । अनुष्टुभो विष्णोश्चास्मिँस्तृचे दर्शनाद्यज्ञस्य च्छिद्रं द्रोणकलशविदारणात्मकं सुषिरं वाचैवाऽपिदधात्याच्छादयति । वषट्कारणिधनेन च भूमौ प्रस्कन्नः सोमो वषट्कृतो भवतीत्यभिप्रायः॥१०॥

सामान्तरं विधत्ते—

यद्वै यज्ञस्य स्रवत्यन्ततःस्रवति वारवन्तीयमग्निष्टोमसाम कार्य्यं यज्ञस्यैव च्छिद्रं वारयते ॥ ११ ॥

यत् खलु यज्ञसम्बन्धि स्रवति अन्ततोऽन्ते वारवन्तीयं वारणसाधनमेतत्संज्ञं सामाग्निष्टोमसामतया कार्यम् । तेन यज्ञस्यैव च्छिद्रं वारयते निवर्त्तयति समीकरोति 'यद्वारयँस्तद्वारवन्तीयस्य वारवन्तीयत्वम्' इति हि तन्निर्वचनं दृष्टम् ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यायस्य षष्ठः खण्डः ॥

अथ सप्तमः खण्डः ॥

अथ सोमातिरेकप्रायश्चित्तमुच्यते । तत्र प्रथमं प्रातः सवनं दर्शयति-

यदि प्रातस्सवनात्सोमोऽतिरिच्येत 'अस्ति सोमो अयं सुत, इति मरुत्वतीषु गायत्रेण स्तुयुः ॥ १ ॥

प्रातःसवने सन्ति चत्वार्याज्यस्तोत्राणि तत्र होतुः स्तोत्रे सोमपूर्णाश्चमसा होतव्याः । तत्राऽन्त्यचमसगणो द्रोणकलशाधवनीयपूतभृत्सु विद्यमानः सकलसोमरस आसेचनीयः । तत्र यद्यन्त्यस्य चमसगणस्य होमात्प्राक् सोमोऽतिरिक्तो दृश्यते तं चमसगणं पुनरानीय होतव्य-

१. सा. सं. उ. ९. १. ८. १. पिबन्ति मित्रो अर्यमा, उतोन्वस्य इत्याप्रिमेऋचौ ।

म्। यद्यन्यच्चमसगणस्य होमादूर्द्धं दृश्येत तदिदं प्रायश्चित्तम्। अयमर्थः प्रातःसवनसमाप्तेरूर्ध्वं यदि सोमोऽतिरिच्येतऽतिरिक्तोऽधिको दृश्येत तदाऽध्वर्यवस्तं सोमं होतृचमसमुख्येषु चमसेष्वानीय स्तोत्रमुपाकुर्वन्ति। तदोद्गातारः(१) 'अस्ति सोमो अयं सुत' इति मरुत्वतीषु मरुच्छन्दयुतासु गायत्रीष्वृक्षु गायत्रेण 'तत्सवितुर्वरेण्यम्' इत्यस्यामुत्पन्नेन गायत्रसाम्ना स्तुयुः स्तुवीरन्* ॥ १ ॥

अथाऽस्यामृचि मरुच्छन्दस्त्वं गायत्रत्वञ्चाऽतिरिक्तसामानुगुणमिति स्तौति—

माध्यन्दिनं वा एष सवनं निकामयमानोऽभ्यतिरिच्यते यः प्रातस्सवनादतिरिच्यते तस्मान्मरुत्वतीषु स्तुवन्ति मरुत्वद्धि माध्यन्दिनꣳ सवनं तस्मादु गायत्रीषु गायत्रं हि प्रातस्सवनम् ॥ २ ॥

यः सोमः प्रातस्सवनादतिरिच्यतेऽतिरिक्तो भवति। एष सोमो माध्यन्दिनं सवनं निकामयमानो नितरामभिलषन्नतिरिच्यते। यस्मादेवं तस्मान्मरुत्वतीषु मरुच्छन्दयुक्तासु स्तुवन्ति। कथमेतावता माध्यन्दिनसवनप्राप्तिः? तत्रोच्यते—मरुत्वतीयं मरुद्भिर्युक्तं हि माध्यन्दिनं सवनम्। तत्र मरुत्वतीयग्रहणस्य मरुत्वतीयशस्त्रस्य च विद्यमानत्वात्। अतो मरुत्वतीषु स्तवनेनाऽतिरिक्तस्य सोमस्य माध्यन्दिनसवनप्राप्तिः। यस्मादेषसोमः प्रातस्सवनसम्बद्धस्तस्मादेव गायत्रीषु स्तुवन्ति। गायत्रं गायत्रीच्छन्दस्कं हि प्रातस्सवनम् ॥ २ ॥

अस्य चाऽतिरिक्तस्तोमकल्पिमाह—

यस्मात् स्तोमादतिरिच्यते स एव स्तोमः कार्य्यः सलोमत्वाय ॥ ३ ॥

यस्मात्प्रातस्सवनान्तिमात् स्तोमात्त्रिवृत्पञ्चदशादेरतिरिच्यते सोमोऽतिरिक्तो भवेत् तन्निमित्तकस्य स्तोत्रस्य सवनान्तिमस्तोत्रस्तोमः कार्य्यः। तस्यैव करणं सलोमत्वाय सारूप्याय भवति ॥ ३ ॥

अथ प्रसङ्गाद्धोतुरनुशंसनविशेषं विधत्ते—

ऐन्द्रावैष्णवं होताऽनुशंसति ॥ ४ ॥

---

१. सा. सं. उ. ९. १. ८. १.

* एतत्खण्डीयो विधिस्सर्वोऽपि तैत्तिरीयब्राह्मणे प्रथमाष्टके चतुर्थप्रपाठके पञ्चमानुवाकेऽपि द्रष्टव्यः।

इन्द्रश्च विष्णुश्चेन्द्राविष्णू तद्देवताकं शस्त्रं होताऽनुशंसति। ऐन्द्रीभिर्वैष्णवीभिश्च स्तोत्रानुशंसनं कार्य्यमित्यर्थः। तथाचोक्तं सूत्रकृताऽऽश्वलायनेन(१) "प्रातस्सवने(२)'ऽस्ति सोमो अयं सुतः'(३)'गौर्यृचति मरुता'मिति स्तोत्रीयानुरूपौ। (४)'महां इन्द्रो य ओजसा' (५)'अतो देवा अवन्तु न' इत्यैन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशस्ये"ति ॥ ४ ॥

उक्तमुभयदेवत्यत्वं प्रशंसति—

वीर्यं वा इन्द्रो यज्ञो विष्णुर्वीर्य एव यज्ञे प्रतितिष्ठति ॥५॥

वीर्य्यं वै वीर्य्यरूप एवेन्द्रः, प्रजापतेः सकाशाद्वीर्यवतो बाहोरिन्द्रस्योत्पन्नत्वात्। विष्णुश्च यज्ञः। एवमुभयदेवतासु शंसनेन वीर्ये वीर्ययुक्त एव यज्ञे यजमानः प्रतितिष्ठतीति ॥ ५ ॥

अथ माध्यन्दिने सोमातिरिक्ते प्रायश्चित्तं विधत्ते—

यदि माध्यन्दिनात्सवनादतिरिच्येत(६) 'वण्महाँ असि सूर्य्ये'त्यादित्यवतीषु गौरीवितेन स्तुयुः ॥ ६ ॥

यदि माध्यन्दिनात् सवनात् यदि माध्यन्दिनसवनसमाप्तेरूर्ध्वं सोमोऽतिरिच्यते माध्यन्दिनस्याऽन्त्यचमसगणे हुते सोमोऽधिको दृश्यते चेत्तदा तं सोममध्वर्य्यवश्चमसेषून्नीय स्तोत्रमुपाकुर्व्वन्ति। तत्रोद्गातारः'वण्महाँ असि सूर्य्य' इत्यादित्यवतीष्वादित्यशब्दयुक्तास्वृक्षु गौरीवितेन गौरीवितिना ऋषिणा दृष्टं गौरीवितं(७) 'अभि प्र गोपतिं गिरा' इत्यस्यामुत्पन्नं साम गौरीवितं तेन साम्ना स्तुयुः। तत्साम एतासूद्देन कर्त्तव्यमित्यर्थः ॥ ६ ॥

अस्याऽतिरिक्तसोमस्य सवनद्वयान्तरालवर्त्तित्वेनोभयरूपस्याऽऽदित्यवतीषु बृहतीषु स्तूयमानं गौरीवितमनुगुणमित्याह—

तृतीयसवनं वा एष निकामयमानोऽभ्यतिरिच्यते यो माध्यन्दिनात्सवनादतिरिच्यते तस्मादादित्यवतीषु स्तुवन्त्यादित्यं हि तृतीयसवनं तस्मादु बृहतीषु बार्हतं हि माध्यन्दिनं सवनम् ॥ ७ ॥

यो माध्यन्दिनात् सवनात्सोमोऽतिरिच्यते एष तृतीयसवनमेव

---

१. आश्व. श्रौ. ६. ७. २. २. ऋ. सं. ६. ६. २८.
३. ऋ. सं. ६. ६. २८. ४. ५. ८. ९. ५. सं. १. २. ७.
६. सा. सं. उ. ९. १. ९. १. ७. सा. सं. उ. ७. १. १. १.

निकामयमानो नितरामिच्छन्नतिरिच्यते । यस्मादेवं तस्मादादित्यवतीषु 'बण्महाँ असि' इत्यादित्यशब्दयुक्तासु स्तुवन्ति । आदित्यदेवता हि तृतीयसवनमादित्यग्रहेण हि तृतीयसवनं प्रारभ्यते । यस्मादेष माध्यन्दिनात् सवनादतिरिक्तं तस्मादु तस्मादेव बृहतीषु स्तुवन्ति माध्यन्दिनं सवनं बार्हतम् हि(१) 'पुनानः सोम धारया(२) 'अभि त्वा शूर'इत्यादीनां बृहतीनां तत्र विनियुज्यमानत्वात् ॥ ७ ॥

प्रातस्सवनवदस्य स्तोमकल्पिं होतुरनुशंसनञ्च सार्थवादं विधत्ते—

यस्मात् स्तोमादतिरिच्येत स एव स्तोमः कार्यः सलोमत्वायैन्द्रावैष्णवं होताऽनुशंसति वीर्यं वा इन्द्रो यज्ञो विष्णुर्वीर्य एव यज्ञे प्रतितिष्ठति ॥ ८ ॥

पूर्ववद्व्याख्येयम्। एतावांस्तु विशेषः—अथैन्द्रावैष्णवमिति।(३) 'महाँ इन्द्रो नृवत्'(४)'विष्णोर्नुकम्' इत्येतदादिकमैन्द्रावैष्णवं शंसनीयम् । तथा चाऽऽश्वलायनसूत्रम्-(५) 'माध्यन्दिने बण्महाँ असि सूर्य·(६)'उदुत्यद्दर्शतं वपु'रिति प्रगाथौ स्तोत्रीयानुरूपौ । 'महां इन्द्रो नृवत्' 'विष्णोर्नुक'मिति ॥८॥

अथ तृतीयसवने सोमातिरिक्ते प्रायश्चित्तं विधत्ते—

यदि तृतीयसवनादतिरिच्येत विष्णोः शिपिविष्टवतीषु गौरीवितेन स्तुयुः ॥ ९ ॥

यदि तृतीयसवनात्सोमोऽतिरिच्यते विष्णोः शिपिविष्टवतीषु स्तुवन्ति ॥ ९॥

कोऽतिशयः सामान्तरं परित्यज्य गौरीवितेन स्तुतौ ? किं वा प्रयोजनमिति ? तदुभयं दर्शयति—

यज्ञो वै विष्णुश्शिपिविष्टो यज्ञ एव विष्णौ प्रतितिष्ठत्यतिरिक्तं गौरीवितमतिरिक्त एवाऽतिरिक्तं दधाति ॥ १० ॥

शिपयो रश्मयस्तैराविष्टः शिपिविष्टः। तथा च यास्कः(७) 'शिपयोऽत्र

---

१. सा. सं. पू. ६. १. ३. १. २. सा. सं. पू. ३. १. ५. १.
३. ऋ. सं. ४. ६. ७. ४. ऋ. सं. २. २. २४.
५. आश्व.श्रौ.पू.अ. ६.ख.७.सू.६. ६. ऋ. सं. ५. ५. १०. ७. निरु ५. २.८.

रश्मय उच्यन्ते, तैराविष्टो भवतीति' यद्वा शिपयः पशवस्तैराविष्टः शिपिविष्टः(१) 'यज्ञो वै विष्णुः पशवः शिपिः' इति श्रुत्यन्तरात्। ईदृशो विष्णुर्यज्ञो वै यज्ञ रूप एव। अत एतद्देवत्यासु स्तुतेन यज्ञात्मक एव विष्णौ प्रतितिष्ठति यदेतद्बौरीवितास्यं साम तदतिरिक्तं विभज्यमानाया वेदात्मिकाया वाचोऽधिकं(२) 'देवा वै व्वाचं व्यभजन्त तस्या यो रसोऽत्यरिच्यत तद्बौरीवितमभवत्' इति श्रुतेः। तथा सत्यतिरिक्ते सवनादधिक एव सोमे तदतिरिक्तं साम दधाति निदधाति। तेन साम्नाऽतिरिक्तदोषं शमयतीत्यर्थः॥ १०॥

अथ तृतीयसवने सोमातिरेके पक्षान्तरमाह—

एतदन्यत् कुर्युरुक्थानि प्रणयेयुरुक्थानि वा एष निकामयमानोऽभ्यतिरिच्यते योऽग्निष्टोमादातिरिच्यते यद्युक्थ्येभ्योऽतिरिच्येताऽतिरात्रः कार्य्यो रात्रिं वा एष निकामयमानोऽभ्यतिरिच्यते य उक्थ्येभ्योऽतिरिच्यते यदि रात्रेरतिरिच्येत विष्णोः शिपिविष्टवतीषु बृहता स्तुयुरेष तु वा अतिरिच्यत इत्याहुर्यो रात्रेरतिरिच्यत इति॥ ११॥

अत्र पक्षान्तरद्योतको यदिशब्दोऽध्याहर्तव्यः, एतत्प्रवृत्तकर्म्मणोऽन्यत् संस्थान्तरं यदि कुर्युः, तदा तृतीयसवनादतिरिक्तेन सोमेनाऽग्निष्टोमादन्यत् संस्थान्तरं कार्य्यम्। अतस्तमतिरिक्तं सोममुक्थस्तोत्राणि प्रणयेयुः। यः सोमोऽग्निष्टोमादतिरिच्यते एष उक्थस्तोत्राणि निकामयमानो नितरामभिलषन्नभ्यतिरिच्यतेऽभिप्राप्तयेऽतिरिक्तो भवति। यद्युक्थ्येभ्योऽतिरिक्तः स्यात्तदाऽतिरात्रः कार्यः। यः सोम उक्थ्येभ्योऽतिरिच्यते रात्रावनुष्ठीयमानास्त्रयः पर्यायाः प्रत्येकं चतुष्टयस्तुतशस्त्रास्त इमे रात्रिशब्देनोच्यन्ते। उक्थ्येभ्योऽतिरिक्त एष सोमो रात्रिमेव निकामयमानोऽभ्यतिरिच्यते। अतोऽतिरात्रः कार्य्य इत्यर्थः। यदि रात्रेः रात्रौ कर्त्तव्यात् पर्यायत्रयात् सन्धिस्तोत्राच्च सोमोऽतिरिच्येत तदा पूर्वोक्तासु विष्णोः शिपिविष्टवतीषु बृहत्साम्ना स्तुयुः। यः सोमो रात्रेरतिरिच्यते एष तु वै एष एवातिरिच्यत इत्यभिज्ञा ब्रह्मवादिन आहुः। यस्तु अग्निष्टोमादिकादतिरिच्यते सोऽतिरिक्तो न भवति,

---

१. तै. सं. २. ५. ५. २. ता. ब्रा, ५. ७. १. द्रष्टव्यम्

उत्तरोत्तरसंस्थाया विद्यमानत्वात् । तत्र च तस्य सोमस्योपयोगसम्भवात् । अतिरात्रादूर्ध्वमन्यत् संस्थान्तरं नास्तीत्यतिरिक्तः सोम उपयोगाभावान्निरर्थको भवेत् । अतोऽत्रैव प्रायश्चित्तमिति विशेषद्योतनाय तुशब्दः ॥ ११ ॥

ननु पूर्वं तृतीयसवनात् सोमातिरेके गौरीवितं साम विहितम् । तत्परित्यज्य कुतो बृहतो विधानमित्यत आह—

अमुं वा एष लोकं निकामयमानोऽभ्यतिरिच्यते यो रात्रेरतिरिच्यते बृहता स्तुवन्ति बृहदमुं लोकमाप्तुमर्हति तमेवाऽऽप्नोति ॥१२॥

यः सोमो रात्रेरतिरात्रसंस्थाया अतिरिच्यते । अमुं स्वर्गाख्यमेव लोकमेष निकामयमानोऽभ्यतिरिच्यते । अतिरात्रादधिकस्य संस्थान्तरस्याऽभावात् साम्नां मध्ये बृहत्सामैवाऽमुं स्वर्गं लोकमाप्तुमर्हति नान्यत्(१) 'इयं वाव रथन्तरमसौ वै लोको बृहत्' इति श्रुतेः । अतः स्वर्गं निकामयमानमतिरिक्तमेवाऽसौ बृहता प्राप्नोति ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे वेदार्थप्रकाशसहिते नवमाध्यायस्य सप्तमः खण्डः ॥

अथाऽष्टमः खण्डः ॥

अत्र सत्रमध्ये दीक्षितानां मरणे कर्त्तव्यं विधत्ते—

यदि दीक्षितानां प्रमीयेत दग्ध्वाऽस्थीन्युपनह्य यो नेदिष्ठी स्यात्तं दीक्षयित्वा सह यजेरन् ॥ १ ॥

सत्रार्थं दीक्षितानां दीक्षणीयेष्ट्या संस्कृतानां मध्ये यदि कश्चित्प्रमीयेत म्रियेत तदा तान्निर्मन्थ्येन विधिवद्दग्ध्वा कृष्णाजिनेऽस्थीन्युपनह्य मार्जालीयेऽतिदध्यात् । ततोऽस्य मृतस्य यो नेदिष्ठी स्यादन्तिकतमः पुत्रादिः स्यात्तं दीक्षयित्वा मृतप्रतिनिधित्वेन तं नेदिष्ठिनं दीक्षासंस्कृतेन तेन सह यजेरन् प्रक्रान्तं सत्रमनुतिष्ठेरन् ॥ १ ॥

---

१. तै. सं. ३. १. ७.

२. वाक्यमिदमधिकृत्य विचारः पूर्वमीमांसायां दशमद्वितीयाष्टादशे (१०.२.१८) द्रष्टव्यः ।

अथ यस्मिन्सुत्येऽहनि यजमानो मृतः स्यात् तत्रोद्गातृकृत्यं विधत्ते—

एतदन्यत् कुर्युरभिषुत्याऽन्यत्सोममगृहीत्वा ग्रहान् याऽसौ दक्षिणा स्रक्तिस्तद्वा स्तुयुर्मार्जालीये वा ॥२॥

सुत्यामध्ये यजमाने मृते सत्यभिषुतं सोमं परित्यज्याऽन्यत्, लिङ्व्यत्ययः, अन्यं सोमं विधिवदभिषुत्य ग्रहानैन्द्रवायववादीनगृहीत्वा ऽध्वर्यवो विरमेयुः। तस्मिन् काले याऽसौ वेदेर्दक्षिणा स्रक्तिः कोणो दक्षिणपूर्वा दिक् तत्तत्र वा मार्जालीयधिष्ण्ये वोद्गातारः स्तुयुः स्तुवीरन् ॥ २ ॥

किं तत इत्याह—

अपि वा एतस्य यज्ञे यो दीक्षितः प्रमीयते तमेतेन निरवदयन्ते ॥ ३ ॥

अपि वेति वाक्यालङ्कारद्योतकौ निपातौ। अपि खलु एतस्य, सप्तम्यर्थे षष्ठी। एतस्मिन् यज्ञे यो दीक्षितः प्रमीयते म्रियते तमेतेन स्तोत्रेण निरवदयन्ते निर्गमयन्ति तर्पयन्ति। 'दय' दानगतिरक्षणहिंसादानेषु। यद्वापएतस्यैवेति गृहपतिः कथ्यते। एतस्य वर्त्तमानस्य गृहपतेर्यज्ञ इत्यर्थः ॥ ३ ॥

स्तुतिमात्रं विहितम्, तत्केन साधनेनेत्याकाङ्क्षायामाह—

(१)यामेन स्तुवन्ति यमलोकमेवैनं गमयन्ति ॥ ४ ॥

यामेन साम्ना विहितं स्तोत्रमुद्गातारः कुर्युः। तेन स्तोत्रेणैनं मृतं यमलोकं पितृलोकमेव गमयन्ति ॥ ४ ॥

तस्य साम्न आधारभूतानामृचां संख्यां विधत्ते—

तिसृभिः स्तुवन्ति तृतीये हि लोके पितरः ॥ ५ ॥

तिसृभिः स्तोत्रीयाभिः स्तोत्रं कार्यम्। तस्मादूर्लोकादारभ्य तृतीये हि लोके स्वर्गाख्ये पितरो वर्त्तन्ते। अतस्त्रिसंख्यया तत्रत्यान् पितृनेवैनं प्रापयन्ति ॥ ५ ॥

स्तोत्रान्तरे स्तोत्रीयस्य तृचस्य स्तोमसम्पत्यर्थमावृत्तिर्दृष्टा। तद्वदत्राऽप्यावृत्तिमाशङ्क्याऽऽह—

पराचीभिः स्तुवन्ति पराङ्हितोऽसौ लोकः ॥ ६ ॥

पराचीभिः स्तुवन्ति पराङ्मुखाभिरनावृत्ताभिः स्तुवन्ति। तत् कस्य हेतोः? इतोऽस्माल्लोकादारभ्याऽसौ स्वर्गो लोकः पराङ् हि परा-

---

१. विषयोऽयं तै. ब्रा. १. ४. ६. अनुवाके द्रष्टव्यः।

कृमुखः परावृत्त ऊर्ध्वप्रदेशावस्थितो हि। अतस्तत्प्राप्तये पराचीभिरेव स्तवनं युक्तमित्यर्थः ॥ ६ ॥

तिसृभिरित्यृचां संख्या विहिता । अथ काः पुनस्ता ऋच इति? तत्राह—

(१)सर्पराज्ञ्या ऋग्भिः स्तुवन्ति ॥ ७ ॥

सर्पराज्ञी नाम ब्रह्मवादिनी तस्या ऋग्भिस्तया दृष्टाभिः(१)'आयङ्गौः पृश्निरक्रमीत्' इत्यादिभिर्ऋग्भिः स्तुवन्ति । एतासु यामं साम कार्यमित्यर्थः ॥ ७ ॥

मृतस्याऽपनयन एता ऋचोऽनुकूला इति दर्शयति—

अर्बुदः सर्प एताभिर्मृतां त्वचमपाहत मृतामेवैताभिस्त्वचमपघ्नते ॥ ८ ॥

अर्बुदः सर्परूपोऽर्बुद ऋषिरेताभिः सर्पराज्ञ्या दृष्टाभिर्ऋग्भिर्मृतां जीर्णामात्मीयां त्वचमपाहत अपागमयत् । अत एताभिस्तुवाना अपि मृतं यजमानमपगमयन्तीत्यर्थः ॥ ८ ॥

अथैतस्मिन् स्तोत्रे समाप्त एतासामृचामनुवचनं विधत्ते—

ता ऋचोऽनुब्रुवन्तस्त्रिर्मार्जालीयं परियन्ति सव्यानूरूनाघ्नानाः ॥ ९ ॥

अध्वर्य्युप्रभृतय ऋत्विजस्ताः पूर्वोक्ता ऋचो यमदेवत्यास्सार्पराज्ञीभिश्चाऽनुब्रुवन्तोऽनुवचनधर्मेणोच्चारयन्त आत्मीयान् सव्यान् वामभागस्थानूरूनूरुप्रदेशानाघ्नानाः सव्यैः पाणिभिस्ताडयन्तो मार्जालीयं धिष्ण्यं त्रिस्त्रिवारं परियन्ति परितो गच्छन्ति ॥ ९ ॥

अथैतासामनुशंसनं विधाय प्रशंसति—

स्तुतमनुशंसत्यमुष्मिन्नेवैनं लोके निध्नुवन्ति ॥१०॥

स्तुतं स्तोत्रं होतृप्रभृतयोऽनुशंसंति स्तोत्रीयास्ता ऋचोऽनुशंसेयुः तेनानुशंसनेनाऽमुष्मिन् स्वर्गे लोक एवैनं मृतं यजमानं निध्नुवन्ति प्रीणयन्ति । 'धू विधूनने' अत्रोपसर्गवशात् प्रीणने वर्त्तते । एतावत् कृत्वा ग्रहा ग्रहीतव्याः ॥ १० ॥

तेषामेवैन्द्रवायवाग्रत्वं कर्त्तव्यमिति दर्शयति—

यन्ति वा एते पथ इत्याहुर्ये मृताय कुर्वन्तीत्यैन्द्रवायवाग्रान् ग्रहान् गृह्णते पुनः पन्थानमपियन्ति ॥११॥

---

१. सा. सं. उ ६.१.११.१. २. सर्पराज्ञीपदमन्यथा व्याख्यातम् तै. ब्राह्मणे (१.४.६)

य ऋत्विजो मृताय यजमानायोक्तं क्रियाकलापं कुर्वन्ति । एते पथो मार्गान् वर्त्तमानयज्ञलक्षणान् यन्त्यपिगच्छन्तीति ब्रह्मवादिन आहुः। तस्य चेदं समाधानम्-ऐन्द्रवायवाग्रान्, ऐन्द्रवायवो ग्रहोऽग्रे प्रथमतो येषां ते तथोक्ताः, तथाविधान् ग्रहान् गृह्णते गृह्णीयुः। तदग्रत्वं हि प्राकृतं विकल्पितम्-'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान गृह्णीयात्। यदि बृहत्सामा शुक्राग्रान् यदि जगत्सामा आग्रयणाग्रा'निति । अतोऽत्र नित्यार्थं पुनर्विधानम् । तथा च यस्मात्पथो यज्ञमार्गात् पूर्वं प्रच्युतास्तमेव पन्थानं पुनरपियन्त्यपिगच्छन्ति ॥ ११ ॥

अथाऽस्मिन् यज्ञे बहिष्पवमानस्याऽऽग्निपावमानी प्रतिपद् कार्येति विधत्ते—

'अग्न आयूंषि पवस' इति प्रतिपत्कार्य्या य एव जीवन्ति तेष्वायुर्दधाति ॥ १२ ॥

'अग्न आयूंषि पवसे' इति बहिष्पवमानस्य प्रतिपत् कार्या। यद्यप्यत्र ऋङ्मात्रं प्रतीयते तथापि(१) तृचसूक्तानामादिग्रहणेन विधिरनादेशे' इति सूत्रकारेण परिभाषितत्वात् एतदादिकः (२)तृच एव ग्राह्यः 'अग्न आयूंषि पवसे' इत्यायुर्लिङ्गाद्य एव दीक्षिता जीवन्ति तेष्वायुर्दधाति स्थापयति ॥ १२ ॥

इत्थं प्रवृत्तं सत्रं समाप्य पुनः संवत्सरान्ते कर्त्तव्यमिति दर्शयति—

संवत्सरेऽस्थीनि याजयेयुः संवत्सरो वै सर्व्वस्य शान्तिर्यत्पुरा संवत्सराद्याजयेयुर्वाचमरुष्कृतां क्रूरामृच्छेयुः ॥ १३ ॥

यागानन्तरं संवत्सरे पूर्णे मृतस्य दीक्षितस्याऽस्थीनि याजयेयुः । अपूर्णे संवत्सरे याजयेयुश्चेत् वाचमरुष्कृतां क्रूरामृच्छेयुः प्राप्नुयुः॥१३॥

तस्मिन्नस्थिकर्तृकयज्ञे स्तोत्रपरिमाणाभावं स्तोमपरिमाणञ्चाऽऽह—

असम्मितं स्तोत्रꣳ स्यादसम्मितो ह्यसौ लोकोऽक्षितः पवमानाः स्युः सप्तदशमितरत्सर्व्वम् ॥ १४ ॥

तस्मिन्नस्थिकर्तृके यज्ञे स्तोत्रमसम्मितमपरिमितं स्याद्भवेत्। स्तोत्रपरिमाणं नापेक्ष्यमित्यर्थः। तत्कुतो हेतोः ? हि यस्मादसौ स्वर्गो लोकोऽसम्मितोऽपरिमितस्तस्मात् तत्प्राप्तये अपरिमितं स्तोत्रं स्यादित्यर्थः।

---

१. लाट्या. श्रौ. ६. ३. ४. २. सा. सं उ. ७. १. १२.

एवमेव स्तोमस्याऽप्यपरिमितत्वे प्रसक्तमिदमुच्यते । पवमानास्त्रिषु सवनेषु वर्त्तमानाः बहिष्पवमानाद्यास्त्रिवृतस्त्रिवृत्स्तोमयुक्ताः कार्याः । इतरत् पवमानव्यतिरिक्तं सर्वं स्तोत्रं सप्तदशं सप्तदशस्तोमकं कार्यम्॥१४॥

तदेतदुभयं प्रशंसति—

यत्त्रिवृतः पवमाना भवन्ति प्राणा वै त्रिवृत्प्राणानेवोपयन्ति यत्सप्तदशमितरत् सर्वं प्रजापतिर्वै सप्तदशः प्रजापतिमेवोपयन्ति ॥ १५ ॥

स्पष्टमेतत् ॥ १५ ॥

अथाऽस्मिन्नस्थिकर्त्तृकप्रयोगे प्रातिस्विकं ग्रहाग्रत्वं विधत्ते—

प्राणापानैर्वा एते व्यृध्यन्त इत्याहुर्यं मृताय कुर्वन्तीति मैत्रावरुणाग्रान् ग्रहान् गृह्णते प्राणापानौ मित्रावरुणौ प्राणापानैरेव समृध्यन्ते ॥ १६ ॥

एत ऋत्विजः प्राणापानैः प्राणवायुभिरपानवायुभिश्च विप्रयुज्यन्त इत्याहुर्ब्रह्मवादिनः । ये मृताय यजमानायाऽऽर्त्विज्यं कुर्वन्तीति । अत्राऽयं परिहारः—प्रातःसवने विद्यमानान् ग्रहान् मैत्रावरुणाग्रान् मित्रावरुणौ देवते यस्य मैत्रावरुणोऽग्रे प्रमुखे येषां ते तथोक्तास्तथाविधान् ग्रहान् गृह्णते गृह्णीयुः । मित्रश्च वरुणश्चेति यौ देवौ तावेव प्राणापानावतस्तद्देवत्यग्रहाग्रत्वेन प्राणापानैरेवैते समृध्यन्ते समृद्धा भवन्ति चिरजीविनो भवन्तीत्यर्थः ॥ १६ ॥

इति ताण्ड्यमहाब्राह्मणे वेदार्थप्रकाशसहिते
नवमाध्यायस्याऽष्टमः खण्डः ॥

अथ नवमः खण्डः ॥

अथ द्रोणकलशस्थस्य सोमस्य क्षये प्रायश्चित्तं विधित्सुस्तस्य दोषमाह—

यस्य कलश उपदस्यति कलशमेवाऽस्योपदस्यन्तं प्राणोऽनूपदस्यति प्राणो हि सोमः ॥ १ ॥

यस्य यजमानस्य कलशो द्रोणकलशस्थस्सोम उपदस्यति क्षयं प्राप्नोति, दसु उपक्षये, अस्य यजमानस्योपदस्यन्तं क्षीयमाणं कलश-

मनु पश्चात् प्राण उपदस्यति यजमानस्य प्राणोऽपि क्षयं प्राप्नोति। हि यस्मात् सोमः प्राणः प्राणहेतुः तस्मात् सोमस्योपदासे प्राणोपदासो युक्त इत्यर्थः ॥ १ ॥

अत एवं सति प्रायश्चित्तमपेक्षितम् तत्र शाखान्तरीयं मतं तावद्दर्शयति—

तदाहुः पयोऽवनयेदिति ॥ २ ॥

तत्तत्र कलशे उपदासविषय आहुः केचिच्छाखिनः । किमिति ? पयोऽवनयेदिति द्रोणकलशस्थे सोम उपक्षीणे तत्र दुग्धं पयोऽवनीय तेन सोमकार्य्याणि कर्त्तव्यानीति ॥ २ ॥

अथ स्वमतं दर्शयति—

अथो खल्वाहुरन्तर्हितमिव वा एतद्यत्पयो हिरण्यमेवाऽपोऽभ्यवनयेद्धिरण्यमभ्युन्नयेदिति ॥३॥

अथो खल्विति पक्षान्तरपरिग्रहे । अभिज्ञा ब्रह्मवादिन आहुः कथयन्ति । किमिति ? यत् एतदन्तर्हितमिव वै अन्तर्हितमसन्निकृष्टमप्रत्यक्षमेव दोहनात्प्राक् गवामूधसि वर्त्तमानस्याऽप्रत्यक्षत्वात् । अतः सोमस्यान्तर्द्धाने अन्तर्हितस्य पयसोऽवनयनमयुक्तम् । किं तर्हि?द्रोणकलशेऽवनेयम्। तदुच्यते–द्रोणकलशे हिरण्यं निधाय अपोऽभ्यवनयेदभिपूरयेदित्याहुः । (१)'सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत्। तत्सुवर्णं हिरण्यमभवदिति'श्रुत्यन्तरात् सुवर्णं सोमस्य प्रियशरीरम् । अभि रुपर्यर्थः । सुवर्णस्योपरि वसतीवर्य्याख्या हैयङ्गवीनमिश्रिता अपोऽवनयेदासिञ्चेत् । चमसानामुन्नयनकाले तेषु च हिरण्यं निधायाऽभ्युन्नयेदभिपूरयेदित्याहुर्ब्रह्मवादिनो ब्रूयुः ॥ ३ ॥

अस्मिन् पक्षे प्रागुक्तस्य प्राणोपदासस्य परिहारो यथा भवति तथा दर्शयति—

प्राणा वा आपोऽमृतं हिरण्यममृत एवास्य प्राणान् दधाति स सर्वमायुरेति ॥ ४ ॥

आपः प्राणा वै प्राणरूपा एव तद्धेतुत्वात्।(२)'अन्नमयं हि सौम्य मन आपोमयः प्राण' इति हि वयमधीमहे । हिरण्यञ्चाऽमृतं मरणरहितं तस्य तैजसत्वेनाऽत्यन्ताग्निसंयोगेऽपि विनाशाभावात् । अत्र चाऽपां हिरण्यस्य च समुच्चयविधानादस्य यजमानस्य प्राणानमृते मरणाभाव एव दधाति निदधाति स्थापयति । अतः स यजमानः सर्वं सम्पूर्णं ब्रा-

---

१. तै. ब्रा. १. ४. ७. ४. २. छान्दो. उ. ६. ७. ६.

क्षणकल्पं शतवर्षलक्षणं आयुरेति प्राप्नोति ॥ ४ ॥

अथ नाराशंसस्योपशोषणे प्रायश्चित्तं विधित्सुः पूर्ववत्तस्य शोषणमनर्थहेतुरिति दर्शयति—

यस्य नाराशंस उपवायति नाराशंसमेवास्योपवीयन्तं प्राणोऽनूपदस्यति प्राणो हि सोमः ॥ ५ ॥

सवनमुखेष्वग्नौ समुद्धृताः पुनर्भक्षिताः पुनर्वसतीवरीभिः'आप्यायस्व' इति मन्त्रेण पूरिताश्चमसा नाराशंसाः। सामान्याभिप्रायमेकवचनम्। यस्य यजमानस्य नाराशंस उपवायति उपशुष्यति 'ओवै शोषणे भौवादिकः। उपवायन्तमुपशुष्यन्तं नाराशंसमनु पश्चादस्य यजमानस्य प्राण उपदस्यत्युपशुष्यति क्षयमुपगच्छति। नाराशंसात्मकः (१)शुष्यमाणः सोमो हि यस्मात् प्राणसंस्कृतः तस्मादित्यर्थः ॥ ५ ॥

तत्र कर्त्तव्यमाह—

यमध्वर्य्युरन्ततो ग्रहं गृह्णीयात्तस्याऽऽप्तुमवनयेत् ॥ ६ ॥

यमध्वर्य्युरन्ततः समीपे नाराशंसशोषणसमीपकाले गृह्णीयात् तस्यैकदेशमग्नौ हुत्वा प्राणसंस्कृतं नाराशंसमाप्तुं प्राप्त्यर्थं हुतशेषं चमसे यथाऽऽसिञ्चेत्। तथा चाध्वर्युसूत्रम्(२)'यदि नाराशंस उपदस्येद्यमध्वर्य्युः पूर्वं ग्रहं गृह्णीयात्तं वषट्कृतानुवषट्कृते हुत्वा चमसाध्वर्य्यवे प्रयच्छेत्तेनैनं स आप्याययतीति' ॥ ६ ॥

तदेतद्ग्रहावनयनं प्रशंसति—

प्रायश्चित्त्यै वै ग्रहो गृह्यते प्रायश्चित्त्येवाऽस्मै प्रायश्चित्तिं करोति ॥ ७ ॥

नाराशंसोपशोषणसमये ग्रहो गृह्यते स न केवलं होमार्थं तथैव गृह्यते। अपि तु सन्निधानात् प्रायश्चित्त्यै प्रायश्चित्तार्थमपि। अतः प्रायश्चित्तार्थं गृहीतेन ग्रहेणैवाऽस्मै यजमानाय प्रायश्चित्तिं प्रायो विनाशस्तस्य समाधानं ज्ञानं चित्तिर्नाराशंसोपशोषणजनितदोषस्योपशमनं करोति ॥ ७ ॥

(३)यदि पीतापीतौ सोमौ सङ्गच्छेयातामन्तः परिध्य-

---

१. शुष्यमाण इत्यपपाठः। २. आप. श्रौ. १४. २८. १.

३. इदमेव वाक्यमापस्तम्बश्रौतसूत्रे हुताहुतसंसर्गप्रायश्चित्ततया हुताहुतपदघटितमाम्नातं (आप. श्रौ. १४. ३०. २.) तत्र द्रष्टव्यम्।

क्षारान्निर्वर्त्य जुहुयात् 'हुतस्य चाऽहुतस्य चाऽहुतस्य हुतस्य च। पीतापीतस्य सोमस्येन्द्राग्नी पिबतं सुतं स्वाहे'ति सैव तस्य प्रायश्चित्तिः ॥ ८ ॥

ग्रहचमसादिस्थं सोमं प्रथममग्नौ हुत्वा पश्चात् सदसि भक्षयन्ति अध्वर्य्युर्ग्रावषट्कर्त्तारो होत्रादयोऽन्ये चमसिनश्च। तत्र यदि पीतापीतौ सौमौ सङ्कल्पेयातां पीतशेषः सोमोऽपीतेनाऽभक्षितेन सोमेन होमार्थमासादितेन वा यदि संसृष्टो भवेत्तदाऽन्तःपरिधि परिधीनामन्तर्मध्येऽङ्गारान्निर्वर्त्य पृथक्कृत्य 'हुतस्य च'इति संसृष्टं सोममङ्गारेषु जुहुयात्। सैषाऽऽहुतिरेव तस्य संसर्गदोषस्य प्रायश्चित्तिः। मन्त्रार्थस्तु—मन्त्रेण विलक्षणस्याग्नौ हुतस्य अहुतस्य चानेन क्रमेण संसृष्टस्य पीतापीतस्य होमानन्तरं पीतेन पीतावशेषितेन संसृष्टस्याऽपीतस्य च सोमस्यैकदेशमेतदेव विपर्य्यस्योच्यते—अहुतस्य हुतस्य चेति। एवमुभयविधस्य पीतापीतस्य हुतशेषस्सोमः पीतः। अहुतः सोमोऽपीतः। तदुभयात्मकस्यैकदेशं सुतमभिषुतं रसं हे इन्द्राग्नी पिबतं तदर्थं स्वाहाऽहं तं सोममग्नौ प्रक्षिपामीति ॥ ८ ॥

यदि भक्षणायाऽऽनीतो हुतशिष्टः सोमः केशकीटादिभिर्जुष्टः स्यात् तदा कर्त्तव्यमाह—

प्रजापतये स्वाहेत्यभक्षणीयस्य जुहुयादुत्तरार्ध्यपूर्वार्ध्यौ उपरवः ॥ ९ ॥

प्रजापतये स्वाहा'इति मन्त्रेणाऽभक्षणीयस्य भक्षणानर्हस्य केशादिभिर्दूषितस्य सोमस्य। कर्मणि षष्ठी॥ अभक्षणीयं सोमं जुहुयात् प्रक्षिपेत्। कुत्र होमः ? इत्यपेक्षायामाह—उत्तरार्ध्यपूर्वार्ध्यौ उपरव इति। उपरवा नाम दक्षिणहविर्धानस्याऽधस्तात् परोक्षं खाताश्चत्वारो गर्त्ताः।तत्रोत्तरार्द्धे भवौ द्वौ गर्तावुत्तरार्ध्यौ। पूर्वार्द्धे पूर्वदिक्स्थैशान्यां दिशि वर्त्तमान उपरवेऽभक्षणीयः प्रक्षेप्यः। अत्र यज्जुहोति तदाहवनीये इति जुहोतिचोदनाया आहवनीय एव होमाधारत्वेन प्राप्यते यद्यपि तथापि(१)'पदे जुहोती'त्यत्र यथा आहवनीयस्य बाध एवमत्रापि द्रष्टव्यः ॥ ९ ॥

अभिवृष्टस्य सोमस्य भक्षणमन्त्रं विधत्ते—

'इन्दुरिन्दुभवागा'दित्यवदृष्टस्य भक्षयेत् ॥ १० ॥

---

१. अयं बाधविचारः पूर्वमीमांसायां दशमाष्टमाह्निके (१०. ८. ८.) द्रष्टव्यः।

इन्दुरित्यादिना मन्त्रेणाऽवघृष्टस्य वर्षणेन दूषितस्य सोमस्य क्रियाग्रहणं कर्त्तव्य'मिति कर्मणः सम्प्रदानत्वा(१)"चतुर्थ्यर्थे बहुल"मिति षष्ठी। तं सोमं भक्षयेत ॥ १० ॥

अस्य च मन्त्रस्य शेषं दर्शयति—

'तस्य त इन्दविन्द्रपीतस्येन्द्रियावतस्सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि' ॥ ११ ॥

अयमर्थः—इन्दुरयं रसात्मकः सोम इदममृतमयं शुस्थानं सोम प्रवागादवाप्नोत् । हे इन्दो तस्य तथाविधस्य ते तवांशमहं भक्षयामि। कीदृशस्य तव? इन्द्रपीतस्येन्द्रेण पीतस्येन्द्रियावतो वीर्यवतः सर्वगणस्य सर्वैर्ऋत्विग्गणैरर्पितस्योपहूतस्य 'अध्वर्युरुपह्वयस्व'इत्यादिभिः कृतोपह्वानस्य। भक्षयिता विशेष्यते-सर्वगणः समानभक्षैरन्यैर्ऋत्विग्गणैश्चक्षुरादीन्द्रियगणैर्वा युक्तोऽन्यैर्ऋत्विग्भिर्मन्त्रेणाऽनुज्ञातः ॥११॥

चमसहोमानन्तरं तद्भक्षणं कर्त्तव्यम्। कृते च तस्मिन्नध्वर्युणा स्तोत्रोपाकरणं कार्यम्। यद्यध्वर्युश्चमसभक्षणात्पूर्वं स्तोत्रमुपाकुर्य्यात् तदा कर्त्तव्यं प्रायश्चित्तमाह—

"हिरण्यगर्भः समवर्त्तताग्र"इत्याज्येनाऽभ्युपाकृतस्य जुहुयादाग्नीध्रं परेत्य "भूतानां जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां तस्मै त इन्दो हविषा विधेम स्वाहे"ति सैव तस्य प्रायश्चित्तिः ॥ १२ ॥

अभ्युपाकृतस्याऽभाक्षितं चमसमभिलक्ष्योपाकृतं प्रारब्धं स्तोत्रं यस्य स तथोक्तः। तादृशस्य यजमानस्याऽनुपाकरणदोषापगमनार्थमाग्नीध्रीयधिष्ण्यं परेत्य प्राप्य तस्मिन् 'हिरण्यगर्भ' इति मन्त्रेणान्येन द्रव्येण जुहुयात्। 'भूतानां जात'इत्यादिस्तस्य मन्त्रस्य शेषः।तस्य दोषस्य सैवाऽऽहुतिः प्रायश्चित्तिरुपशमहेतुः। मन्त्रस्याऽयमर्थः-अत्र सर्वस्य भूतभौतिकप्रपञ्चस्य सृष्टेः पुरा हिरण्यगर्भः हिरण्मयस्याऽण्डस्य गर्भभूतः प्रजापतिः समवर्त्तत परस्माद्ब्रह्मणः सकाशादजायत। स च जातो जातमात्र एव भूतानां स्वात्मना सृज्यानां सर्वेषां भूतजातानामेकोऽसाधारणः पतिरासीदधिपतिरभवत्। स च पृथिवीं विस्तीर्णां द्यामुतापीमां भूमिं च दाधार धृतवान्। तस्मै हिरण्यगर्भाय हे इन्दो सोम ते तव सम्बन्धिना हविषा विधेम परिचरेम।'तस्मा' इति कर्मणि चतुर्थी॥१२॥

१. पा. सू. २. ३. ६२.

अथ सोमाभिषवार्थग्राव्णां भेदे कर्त्तव्यमाह—

यदि ग्रावाऽपि शीर्यते पशुभिर्यजमानो व्यृध्यते पशवो वै ग्रावाणो द्युतानस्य मारुतस्य साम्ना स्तुयुः ॥१३॥

यद्यभिषवसमये ग्रावाऽपि शीर्यते विशीर्णो भिन्नो भवेत्तदा यजमानः पशुभिर्गवादिभिर्व्यृध्यते पशवो हीयन्ते। ग्रावाणः पशव एव खलु। पशवो यथा क्षीरादिरसप्रदा एवं सोमरसप्रदातृत्वात् ग्राव्णां पशुत्वम्। तथा च तद्भेदनेन पशुहानिर्युज्यते। तदैतत्प्रायश्चित्तं कर्त्तव्यम्। मरुत्सम्बन्धिनो द्युतानस्यैतत्संज्ञस्य ऋचः साम्ना। तत्साम च (१)'वृत्रस्य त्वा श्वसथात्'इत्यस्यामुत्पन्नम्। तेन साम्ना होतारः स्तुवीरन् ॥१३॥

ग्राव्णां भेदे साम्नः सम्बन्धो योग्य इत्याह—

मारुता वै ग्रावाणः स्वेनैवैनाꣳस्तद्रूपेण समर्द्धयति॥१४॥

मारुता मरुद्देवत्याः खलु ग्रावाणः 'मरुतो नशतोपाक्षया' इति हि ग्राव्णां योजनमन्त्रः। तस्मान्मारुतस्य साम्नः करणेनैनान् ग्राव्णः स्वेनैव रूपेण समर्द्धयति समृद्धान् पूर्णावयवान् करोति ॥ १४ ॥

अथ सोमस्याऽभिदाहे प्रायश्चित्तं विधत्ते—

यदि सोममभिदहेद्ग्रहानध्वर्य्युः स्पाशयेत स्तोत्राण्युद्गाता शस्त्राणि होताऽथ यथापूर्वं यज्ञेन चरेयुः पञ्च दक्षिणा देयाः पाङ्क्तो यज्ञो यावान्यज्ञस्तमेवारभतेऽवभृथादुदेत्य पुनर्दीक्षते तत्र तद्यद्यदास्यं स्यात् पुरा द्वादश्या दीक्षेत यदूर्द्वादशीमतिनयेदन्तर्द्धीयेत ॥ १५ ॥

यदि सदोहविर्धानादीनि प्रमादादग्निना दह्येरन् तदा सोमादिकं सर्वं यज्ञसम्भारमादाय तत्समीपे पुनरन्यद्देवयजनमध्यवसाय यज्ञशेषोऽनुष्ठेयः। यदि सोममपि हविर्द्धानादिभिः सहाऽग्निरभिदहेत् तदाध्वर्युर्ग्रहानूर्द्धपात्राणि वायव्यानि स्पाशयेत, एतावदनुष्ठितमेतावन्नेति कृताकृतविभागं जानीयात्। तथोद्गाता स्तोत्राणि होता च शस्त्राणि। अथाऽनन्तरमन्यद्देवयजनमध्यवसाय यथापूर्वं पूर्ववदन्यं सोममाहृत्याभिषुत्य पुनरवशिष्टेन यज्ञेन चरेयुर्यजेयुः। क्रतुसंकल्पावसरे यावत्यो दक्षिणादातव्यत्वेन संकल्पितास्तासां स्थाने पञ्चैव दक्षिणा गावो दे-

---

१. सा. सं. पू. ४. १. ४. २.

याः। यज्ञस्य पाङ्क्तत्वं पूर्वमुक्तम्। तथा सति यावान् यत्परिमाणको यज्ञः तत्परिमाणमेव यज्ञं पञ्चसंख्योपेतया दक्षिणया आरभते गृह्णाति। ततोऽवभृथादनन्तरं उदेत्य उदयनीयादुदवसानीयान्तं कृत्वा पुनस्तस्यैव क्रतोरनुष्ठानाय दीक्षेत। यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति श्रुतेः। यद्दक्षिणाद्रव्यं पूर्वस्मिन् यज्ञे दास्यन् स्यात् तत्र तस्मिन् पुनः क्रियमाणे यज्ञे तद्दद्यात् यज्ञप्राप्तेरूर्ध्वं या द्वादशी द्वादशसंख्यापूरणी रात्रिः तस्या द्वादश्याः पुरा पुरस्ताद्दीक्षेत प्रायश्चित्तरूपस्य यज्ञान्तरस्य दीक्षा कार्या। यद्यदि द्वादशीं रात्रिमतिनयेत् दीक्षया अतिक्रामयेत् द्वादशादूर्ध्वं दीक्षेतेत्यर्थः, तदा स यज्ञोऽन्तर्धीयेत अन्तर्हितोऽदृश्यो भवेत्। पुनरनुष्ठानेन प्राप्तुं न शक्यते इत्यर्थः ॥ १५ ॥

इति ताण्ड्यमहाब्राह्मणे वेदार्थप्रकाशसहिते नवमाध्यायस्य नवमः खण्डः ॥

अथ दशमः खण्डः ॥

प्रवर्ग्येण चरत्सु महावीरस्य भेदने प्रायश्चित्तं विधत्ते—

यदि महावीरो भिद्येत तं भिन्नमभिमृशेत् (१)"य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः। सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्त्ता विहुतं पुनः॥ मा भेम निष्ठ्या इव नेन्द्र त्वदरणा इव। वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि। अमन्महीदनाशवो नुग्राभश्च वृत्रहन्। सकृत्सुते महता शूर राधसानुस्तोमं मदेमही"ति महावीरं भिन्नमभिमृशेत् सैव तस्य प्रायश्चित्तिः ॥ १ ॥

यदि प्रवृञ्जनसमये महावीरः त्रुट्येत्, प्रादेशमात्रे मृन्मये यस्मिन् पात्रे बहुलं घृतमानीय संतप्ते तस्मिन्नाज्ये पयः आनीय प्रवृज्यते स प्रवर्ग्यपात्रविशेषो महावीरः, स यदि भिद्येत भिन्नो भवेत् तदा तं भिन्नं महावीरं 'य ऋते चिदभिश्रिष' इति तृचेनाऽभिमृशेत् सैव तस्य भेदने प्रायश्चित्तिः। पुनर्महावीरमभिमृशेदिति वचनमुपसंहारार्थम्।

ऋचामयमर्थः—अभिश्रिषः अभिश्लिष्यति दृढीभवति अनेनेति अभिश्लिदभिन्नस्य सन्धायकं द्रव्यम्। रलयोरेकत्वस्मरणात् रेफः। सन्धायकात् अन्यस्मात् द्रव्यात् ऋते चित् ऋतेऽपि। (२)'अन्यारा-

१. ऋ. सं. ५. ७. १२. २. पा. सू. २. ३. २९.

दितरर्त्ते' इति पञ्चमी। भिन्नस्य सन्धायकं जतुप्रभृतिकं द्रव्यमन्तरेणापि यः मघवा इन्द्रः सन्धिं सन्धातव्यं भिन्नं वस्तु सन्धाता स्वसामर्थ्येनैव भिन्नस्य पुनरेकीकर्त्ता। कदा? जत्रुभ्य आतृदः पुरा। अंसमध्यदेहयोः सन्धयः जत्रूणि। अत्र तत्सादृश्यात् महावीरस्योपरिभागो लक्ष्यते।'षष्ठ्यर्थे चतुर्थी वक्तव्ये'ति चतुर्थी। जत्रूणां आतृदः आतर्दनाद्विंसनाद्भेदनात् पुरा पूर्वमेव।'उतृदिर् हिंसानादरयोः, इति धातोः(१)"सृपितृदोः कसु"निति कृत्यार्थे तृदः कसुन्प्रत्ययः।(२)"क्रातोसुन्कसुन" इत्यव्ययत्वात् "अव्ययादाप्सुप" इति पञ्चम्या लुक्। मघवा इन्द्रः पुरूवसुर्बहुधनः विहुतं विनष्टं पुनर्निष्कर्त्ता निःशेषेण कर्त्ता पुनरुत्पादयितेत्यर्थः। हु कौटिल्ये (३)हु हुरेश्छन्दसी'ति निष्ठायां हुभावः। हे इन्द्र अरणा इव रणन्तीति रणाः स्तोतारः अस्तोतारो यथा त्वत्तो बिभ्यति एवं वयं निष्टया हिंसाया इव त्वत्तो भा भेम भीता मा भूम। अद्रिवः अद्रिणात्यनेनेत्यद्रिर्वज्रः तद्वन्निन्द्र प्रजहितानि प्रकर्षेण हातव्यानि वनान्यरण्यानि त्वत्प्रसादात् दुरोषासः उषितुं दग्धुं बाधितुमशक्याः सन्तो वयं नाऽमन्महि न जानीमः। तत्प्रसिद्धं त्वदीयं रक्षणं अमन्महीत् इच्छन्दोऽवधारणे। अज्ञासिष्य एव कथंभूताः? आशवः व्यापनशीलाः। हे वृत्रहन्। अनुग्राभः त्वया अनुगृह्यमाणाश्च अपि वा हे शूर ते तव सम्बन्धिना महता प्रभूतेन हेतुना स्तोमं त्वदीयं स्तोत्रमनु पश्चात् सकृद्युगपत् एकहेलयैव सुष्टु मदेमहि हृष्यामः॥ १॥

निखातस्य यूपस्य यज्ञमध्ये विरोहणकृतां हानिं दर्शयति—

असुर्य्यं वा एतस्माद्वर्णं कृत्वा तेज इन्द्रियं वीर्यमन्नाद्यं प्रजाः पशवोऽपक्रामन्ति यस्य यूपो विरोहति स ईश्वरः पापीयान् भवितोः॥ २॥

यस्य यजमानस्य यज्ञमध्ये यूपो विरोहति अष्टाश्रित्वाद्यूपात्पुनः शाखान्तरमुत्पद्यते एतस्माद्यजमानात् असुर्यं असुरस्य स्वभूतं माया-

---

१. पा सू. ३. ४. १७. भावलक्षणेऽर्थे वर्तमानयोः सृपितृदोः धात्वोः तुमर्थे कसुन् प्रत्ययस्स्यादिति सूत्रार्थः॥

२. पा. सू. १. १. ४०. क्त्वाप्रत्ययान्तं तोसुन्प्रत्ययान्तं, कसुन् प्रत्ययान्तं चाव्ययं स्यादित्यर्थः।

३ पा. सू. २. ४. ८२. ४. पा. सू. ७. २. ३१. ५. पा. सू. ३. ४. १३.

मयं वर्णं रूपं कृत्वा तेजआदीन्यपक्रामन्ति अपगच्छन्ति । तेजः शरीरकान्तिः, इन्द्रियं अक्षयोग्यं, वीर्यं बलकर्म, अन्नाद्यं प्रशस्तमन्नं, प्रजाः पुत्रभृत्यादयः पशवो गवाद्याः एवमेतेषां अपक्रमणात् स यजमानः पापीयान् भवितोः ईश्वरो निकृष्टो भवितुं समर्थः स्यात् । (१)'ईश्वरे तोसुन्कसुना" विति भवतेस्तुमर्थे तोसुन् प्रत्ययः ॥ २ ॥

तत्र प्रायश्चित्तत्वेन पशुयागः कर्त्तव्य इत्याह—

त्वाष्ट्रं पशुं बहुरूपमालभेत त्वष्टा वै पशूनां रूपाणां विकर्त्ता तमेव तदुपधावति स एनं तेजसेन्द्रियेण वीर्य्येणाऽन्नाद्येन प्रजया पशुभिः पुनस्समर्द्धयति सैव तस्य प्रायश्चित्तिः ॥ ३ ॥

त्वाष्ट्रं त्वष्टृदेवत्यं बहुरूपं नानारूपं पशुं छागं आलभेत संज्ञपयेत् बहुरूपेण पशुना त्वष्टारं यजेतेत्यर्थः । नानारूपस्य त्वष्टुश्च सम्बन्धयोग्यतामाह—त्वष्टा खलु पशूनां गवादीनां यानि परस्परं विभिन्नानि रूपाणि तेषां विविधं कर्त्ता । तथा च तैत्तिरीयकम्—(२)यावच्छो वै रेतस·'स्सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत् प्रजायत' इति । तस्मेन बहुरूपेण पशुना तं त्वष्टारमेव उपधावत्युपगच्छति । स च त्वष्टाऽनेन पशुना प्रीतस्सन् एनं यजमानं तेजआदिभिः पुनः समर्द्धयति समृद्धं करोति । तस्य यूपविरोहस्य सैव प्रायश्चित्तिः ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति ताण्ड्यमहाब्राह्मणे नवमाध्यायस्य दशमः खण्डः ॥१०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे

नवमोऽध्यायः ॥

---

१. पा. सू. ३. ४. १३. २. तै. सं. १. ५. ९.

अथ दशमोऽध्यायः ॥

प्रथमः खण्डः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ व्यूढद्वादशाहं विधातुकामः तदीयदशरात्रगतान् त्रिवृदादिस्तोमान् क्रमेण प्रशंसिष्यन् प्रथमं त्रिवृतं स्तौति—

अग्निना पृथिव्यौषधिभिस्तेनाऽयं लोकस्त्रिवृद्वायुनाऽन्तरिक्षेण वयोभिस्तेनैष लोकस्त्रिवृद्योऽयमन्तरादित्येन दिवा नक्षत्रैस्तेनाऽसौ लोकस्त्रिवृदेतदेव त्रिवृत आयतनमेषाऽस्य बन्धुता ॥ १ ॥

अयं पुरोवर्त्ती लोक अग्निना देवतया पृथिव्या औषधिभिस्तत्रोत्पन्नाभिस्तेनैतन्त्रितयेन त्रिवृत् त्रिगुणः।तथाऽन्तरिक्षेण वायुना तदधिष्ठातृदेवतया वयोभिः पक्षिभिः तेनैतन्त्रितयेन योऽयमन्तरा द्यावापृथिव्योर्मध्ये लोक एष भूसन्निहितस्त्रिवृत् त्रिगुणः। तथा दिवा द्युलक्षणस्थानेनाऽऽदित्येन तदधिष्ठात्रा देवतया नक्षत्रैस्तत्स्थैरुडुभिस्तेनैतन्त्रितयेन।एवं उपरि दृश्यमानो लोकः योऽयं अन्तरा स्वर्गश्च पृथिवी चान्तरिक्षलोक इत्यर्थः। तथा सूर्य्येण दिवा स्वर्गेण नक्षत्रैश्चाऽसौ स्वर्गो लोकस्त्रिवृत् त्रिगुणः।एवं त्रयाणां लोकानां प्रत्येकं त्रिवृत्त्वान्नवसंख्याको यः समुदायः एतदेव त्रिवृतः ऋङ्नवकात्मकस्य त्रिवृत्स्तोमस्य आयतनं स्थानम्।एषैवास्य त्रिवृतो बन्धुता बन्धुसमूहः। त्रिगुणास्त्रयो लोकास्त्रिवृतः परिजनभूता इत्यर्थः। (१)'ग्रामजनबन्धुभ्यस्तल्' इति तल् प्रत्ययः ॥ १ ॥

एतद्वेदनमपि फलवदित्याह—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ २ ॥

एवमुक्तप्रकारेण यस्त्रिवृतं वेद सोऽपि आयतनवान् स्थानवान् बन्धुमान् बान्धवैर्युक्तश्च भवति ॥ २ ॥

तस्यैव त्रिवृतो ब्रह्मवादिभिः कृतां प्रतिष्ठारूपतां प्रदर्श्योपपादयति—

तमु प्रतिष्ठेत्याहुस्त्रिवृद्ध्येवैषु लोकेषु प्रतिष्ठितः ॥३॥

---

१. पा. सू. ४. २. ४३.

तमु तमेव त्रिवृतं प्रतिष्ठा प्रतिष्ठात्मक इति ब्रह्मवादिनः आहुः। कुतो हतोः? त्रिवृच्चेव त्रिवृस्तोम एव खलु एषु पूर्वमुक्तेषु भूरादिषु प्रत्येकं त्रिगुणलोकेषु प्रतिष्ठितः। तदायतनत्वप्रतिपादनात् तत्रैवाऽऽश्रितो वर्त्तते। ततस्तस्य प्रतिष्ठात्वम् ॥ ३ ॥

अथ पञ्चदशस्तोमं पूर्ववत् प्रशंसति—

अर्द्धमास एव पञ्चदशस्याऽऽयतनमेषाऽऽस्य बन्धुता॥४॥

मासस्यार्द्धमर्द्धमासः। (३)'अर्द्धन्नपुंसक'मित्येकदेशिसमासः। अर्द्धमासेऽपि पञ्चदशसंख्या विद्यते। अतः पञ्चदशस्य पञ्चदशस्तोमस्यार्द्धमास एव आयतनं स्थानम्। एष एवार्द्धमासः अस्य पञ्चदशमुपपादयतीति बन्धुता बन्धुसमूहः। निर्दिश्यमानप्रति निर्दिश्यमानयोरेकतामापादयन्ति सर्वनामानि पर्य्यायेण तत्तल्लिङ्गतामुपाददत इति वचनादत्राऽपि निर्दिश्यमानापेक्षया एषेति स्त्रीलिङ्गता ॥ ४ ॥

वेदनं प्रशंसति—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ ५ ॥

स्पष्टम् ॥ ५ ॥

अथाऽस्य पञ्चदशस्य ओजोबलरूपत्वमभिधायोपपादयति—

तं चौजो बलमित्याहुरर्द्धमासशो हि प्रजाः पशव ओजो बलं पुष्यन्ति ॥ ६ ॥

तं पञ्चदशस्तोमं ओजोरूपं बलरूपं चेत्याहुः ब्रह्मवादिनः बलहेतुः शरीरे वर्त्तमानो रसविशेषः, ओजो बलं प्रसिद्धम्।अर्द्धमासश अर्द्धमासेन हि क्षीरादिरसोपजीवनसहितेन प्रजाः मनुष्याः पशवश्च ओजो बलं च पुष्यन्ति पोषयन्ति वर्द्धयन्ति। अतस्तदायतनोभयात्मकत्वमुपपन्नम्॥६॥

अथ सप्तदशस्तोमं प्रशंसति—

संवत्सर एव सप्तदशस्याऽऽयतनं द्वादश मासाः पञ्चर्त्तव एतदेव सप्तदशस्याऽऽयतनमेषाऽस्य बन्धुता ॥ ७ ॥

सप्तदशस्तोमस्य संवत्सर एवाऽऽयतनम्। कथं तस्य सप्तदशसंख्यायोगः? तदाह-द्वादश मासाश्चैत्राद्याः। हेमन्तशिशिरयोः समासेनैकत्वात् पञ्चर्त्तवः। एवं सप्तदशावयवः संवत्सरः तस्मादेतदेव सप्तदशस्याऽऽयतनमित्युक्तस्योपसंहारः। गतमन्यत् ॥ ७ ॥

---

१. पा. सू. ४. २. ४३.

अथ पूर्ववद्वेदनं प्रशंसति—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ ८ ॥

स्पष्टम् ॥ ८ ॥

अथाऽस्य सप्तदशस्य प्रजातिरूपत्वं विधायोपपादयति—

तमु प्रजातिरित्याहुः संवत्सरं हि प्रजाः पशवोऽनु-प्रजायन्ते ॥ ९ ॥

तं सप्तदशस्तोमं प्रजातिः प्रजोत्पत्त्यात्मक इत्याहुर्ब्रह्मवादिनः कुतः ? हि यस्मात् संवत्सरमनु सम्वत्सरानन्तरमेव गर्भरूपाः प्रजाः पशवश्च प्रजायन्ते उत्पद्यन्ते । अतः संवत्सरायतनसप्तदशस्य प्रजात्यात्मकत्वमु-पपन्नम् ॥ ९ ॥

अथैकविंशस्तोमं प्रशंसति—

आदित्य एवैकविंशस्याऽऽयतनं द्वादश मासाः पञ्च-वर्त्तस्त्रय इमे लोका असावादित्य एकविंश एतदेवैक-विंशस्याऽऽयनमेषाऽस्य बन्धुता ॥ १० ॥

एकविंशस्य स्तोमस्य आदित्य एवाऽऽयतनं आश्रयः मासाद्यपेक्षया तस्यैकविंशत्वेन उभयोः सादृश्यात् । गतमन्यत् ॥ १० ॥

तद्वेदनं प्रशंसति—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

अथाऽऽस्य स्तोमस्य देवतल्पत्वं विधाय तद्वेदनेन सह स्तौति—

तमु देवतल्प इत्याहुः प्र देवतल्पमाप्नोति य एवं वेद ॥ १२ ॥

स्पष्टम् ॥ १२ ॥

अथ त्रिणवस्तोमं प्रशंसति—

त्रिवृदेव त्रिणवस्याऽऽयतनमेषाऽस्य बन्धुता ॥ १३ ॥

त्रिवृत्स्तोम एव त्रिणवस्तोमस्याऽऽश्रयः यतोऽयं तिवृत् समु-दायात्मकः । समुदायश्च समुदाय्याश्रय एवेति प्रसिद्धम् ॥ १३ ॥

अथैतद्वेदनं प्रशंसति—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ १४ ॥

स्पष्टोऽर्थः ॥ १४ ॥

तस्य च पुष्टिरूपत्वं विधाय प्रशंसति—

तमु पुष्टिरित्याहुस्त्रिवृत्त्वैष पुष्टः ॥ १५ ॥

तं त्रिणवस्तोमं पुष्टिः अभिवृद्धिः तद्रूप इत्याहुर्ब्रह्मवादिनः । हि यस्मादेष त्रिणवः पुष्टोऽभिवृद्धः त्रिवृदेव त्रिणवस्तोम एव त्रिरावृत्त्या पुष्टस्त्रिणव इति व्यपदिश्यते । अतोऽस्य पुष्टिरूपता युक्ता ॥ १५ ॥

अथ त्रयस्त्रिंशस्तोमं प्रशंसति—

देवता एव त्रयस्त्रिंशस्याऽऽयतनं त्रयस्त्रिंशदेवताः प्रजापतिश्चतुस्त्रिंश एतदेव त्रयस्त्रिंशस्याऽऽयतनमेषाऽस्य बन्धुता ॥ १६ ॥

त्रयस्त्रिंशस्य स्तोमस्य देवता आयतनं त्रयस्त्रिंशत्संख्याका हि देवताः । अष्टौ वसवः, एकादश रुद्राः, द्वादशाऽऽदित्याः, इन्द्रश्चेति द्वात्रिंशत् । प्रजापतिस्त्रयस्त्रिंशत्संख्यापूरकः । एतदेव त एव देवाः त्रयस्त्रिंशस्याऽऽयतनमित्युक्तोपसंहारः । एषैवाऽस्य स्तोमस्य बन्धुता बन्धुसमूहः त्रयस्त्रिंशदेवा एवाऽस्य परिजनभूता इत्यर्थः ॥ १६ ॥

एतद्वदनं फलवदित्याह—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ १७ ॥

स्पष्टम् ॥ १७ ॥

अथाऽस्य स्तोमस्य नाकरूपत्वमुपपादयति—

तमु नाक इत्याहुर्न हि प्रजापतिः कस्मै चनाऽकम् ॥१८॥

तमु तमेव त्रयस्त्रिंशस्तोमं नाकः, कं सुखं अकं दुःखं नास्त्यस्मिन् अकमिति नाकः, दुःखलेशेनाऽसंस्पृष्टः सुखात्मक इत्याहुः । न खलु प्रजापतिः सर्वं सृष्ट्वा कस्मैचन कस्मैचिदपि पुरुषाय अकं दुःखहेतुर्भवति । अतस्तदायतनोऽपि स्तोमः नाकात्मक इत्यर्थः । (१)'नञ्राण्नपान्नवेदानासत्या' इत्यादिना प्रकृतिभावस्य निपातनात् (२)'नलोपो नञः' इति नाक इत्यत्र नञो नकारस्य लोपो न भवति ॥ १८ ॥

अथ चतुर्विंशादयः स्तोमा छन्दोमास्तान् प्रशंसति—

छन्दांस्येव छन्दोमानामायतनमेषैषां बन्धुता ॥ १९ ॥

छन्दोभिर्गायत्र्यादिभिर्मीयमानाश्चतुर्विंशादयः स्तोमाश्छन्दोमाः । तेषां छन्दांस्येव गायत्र्यादय एवाऽऽयतनम् । तत्र चतुर्विंशस्य चतुर्विंशदक्षरात्मिका त्रिष्टुबायतनम् । अष्टाचत्वारिंशस्य तृतीयस्य छन्दोमस्याष्टाचत्वारिंशदक्षरा जगती आयतनम् । एषां छन्दोमानामेषा बन्धुता एषां गायत्र्यादय एव बन्धुसमूहः ॥ १९ ॥

---

१. पा. सू. ६. ३. ७५. २. पा. सू. ६. ३. ७३.

एतद्वेदनं प्रशंसति—

आयतनवान् बन्धुमान् भवति य एवं वेद ॥ २० ॥

स्पष्टम् ॥ २० ॥

अथ तेषां छन्दोमानां पुष्टिरूपत्वं विधाय प्रशंसति—

तानु पुष्टिरित्याहुः पशवो हि छन्दोमाः ॥ २१ ॥

तानेतांश्चतुर्विंशादीन् पुष्टिः पुष्ट्यात्मका इत्याहुः । हि यस्मात् पशवश्छन्दोमाः पशुसाधनभूताः । पशवश्च क्षीरादिप्रदानेन पुष्टिहेतव इति युक्तं छन्दोमानां पुष्टिरूपत्वम् ॥ २१ ॥

इति ताण्ड्यमहाब्राह्मणे वेदार्थप्रकाशसहिते
दशमाध्यायस्य प्रथमः खण्डः ॥

अथ द्वितीयः खण्डः ॥

अथ द्वादशाहं विधित्सुस्तत्प्रकृतिभूतस्याऽग्निष्टोमस्य ज्योतिष्टोमत्वं निर्वक्तुमुपक्रमते—

प्रजापतिः प्रजा असृजत सोऽताम्यत्तस्मै वाग्ज्योतिरुदगृह्णात्सोऽब्रवीत्को मेऽयं ज्योतिरुदग्रहीदिति स्वैव ते वागित्यब्रवीत्तामब्रवीद्विराजं त्वा च्छन्दसां ज्योतिष्कृत्वा यजान्ता इति ॥ १ ॥

पुरा प्रजापतिः सर्वकारणभूतः स्रष्टा स्रष्टव्याः प्रजाः प्रजोपलक्षितं सर्वं जगदं असृजत सृष्टवान् । सृष्ट्वा च सः प्रजापतिरताम्यत् अश्राम्यत् व्यापारबाहुल्यात् । एवं श्रान्तस्य तस्मै, षष्ठ्यर्थे चतुर्थी, तस्य प्रजापतेर्ज्योतिस्तेजः वाग्देवता उदगृह्णात् उत्कृष्टा गृहीतवती । स प्रजापतिरब्रवीत्—मे मदीयं ज्योतिस्तेजः कोऽयमुदग्रहीदिति । ततो वाक् प्रजापतिमब्रवीत् । किमिति ? तदुच्यते–हे प्रजापते ते तव स्वैव स्वभूतैव वागहं त्वदीयं ज्योतिरुदग्रहीषमिति । ततस्तां वाचं प्रजापतिरब्रवीत्–हे वाक्ज्योतिः ! मदीयेन ज्योतिषा मुक्तां त्वा त्वां छन्दसां गायत्र्यादीनां मध्ये विराजं विराडात्मकं छन्दः कृत्वा यजान्तै यजेरन् यजान्ता इति यजेर्लेटि (१)'लेटोऽडाटा'वित्याडागमः (२)'वैतोऽन्यत्र इत्यैत्वम् ॥ १ ॥

---

१. पा.सू. ३. ४. ९४. २. पा. सू. ३. ४. ९६.

इत्थं विराजो ज्योतिरात्मकत्वमुक्तम् । अथाऽग्निष्टोमस्य ज्योतिष्टोमत्वं निर्वक्ति—

तस्माद्यो विराजꣳ स्तोमꣳसम्पद्यते तं ज्योतिष्टोमोऽग्निष्टोम इत्याचक्षते विराड्वै छन्दसां ज्योतिः ॥२॥

यस्मादुक्तप्रकारेण विराड् ज्योतिरात्मिका तस्मात् यस्तोमः, अत्र स्तोमशब्देन स्तोमवान् याग उच्यते, यः सोमयागो विराजं सम्पद्यते । यत्र संस्तुतानां सर्वासां स्तोत्रीयाणां दशसंख्याविभागे अन्ततो दशसंख्ययैव परिसमाप्यते नावशिष्यते स यागः विराजं सम्पद्यते । दशाक्षरा विराडिति श्रुतेर्दशसंख्यैव विराट् तस्या अत्र सद्भावात् तं स्तोमं स्तोमवन्तं सोमयागं ज्योतिष्टोमोऽग्निष्टोम इत्याचक्षते ज्योतीरूपविराट्सम्पत्तेः ज्योतिष्टोमः, अन्तिमे स्तोत्रे 'यज्ञायज्ञा वो अग्नय' इत्यस्यामृचि गीयमानस्याऽग्निष्टोमस्य सद्भावादग्निष्टोम इत्युभयथा अभिज्ञा ब्रह्मवादिनः कथयन्ति । अस्य चाऽग्निष्टोमस्य संस्तुतस्य विराट्सम्पत्तिः षोडशेऽध्याये 'तस्य नवतिशतं स्तोत्रीया' इत्यत्राऽस्माभिः प्रदर्शिता । पूर्वमाख्यायिकया यद्विराजो ज्योतीरूपत्वमुक्तं तदेव विविच्यते—छन्दसां गायत्र्यादीनां मध्ये विराट्छन्दो हि ज्योतिः ज्योतिरात्मिकेति ॥ २ ॥

एतद्ब्राह्मणार्थं जानतोऽपि ज्योतिर्भवतीत्याह—

ज्योतिः समानानां भवति य एवं वेद ॥ ३ ॥

समानानां सदृशानां ज्ञातीनां मध्ये ,एवंवेदिता ज्योतिः ज्योतिष्मान् तेजस्वी भवति । इत्थं विराट्सम्पत्त्या ज्योतिष्टोमत्वं प्राप्तो योऽग्निष्टोमः षष्ठाद्यध्यायैर्विस्तरेण विहितः स इह द्वादशाहे प्रकृतितयाऽस्माभिरीरितः ॥ ३ ॥

अथ द्वादशाहमध्ये यो दशरात्रः तत्साधनभूतानां त्रिवृदादिस्तोमानां गायत्र्यादिछन्दसाञ्च सृष्टिमाह—

अनुष्टुप् च वै सप्तदशश्च समभवतां साऽनुष्टुप् चतुरुत्तराणि छन्दांस्यसृजत षडुत्तरान् स्तोमान् सप्तदशस्तावेतान्मध्यतः प्राजनयताम् ॥ ४ ॥

गायत्र्यादीनां मध्ये येयमनुष्टुप् सा (१)'वाग्वा अनुष्टुबि'ति श्रुतेः वाङ्रूपत्वात् उत्पत्तिं नोपक्षते सप्तदशस्य स्तोमस्य प्रजापतिः '(२)प्रजा-

१. तै. सं. ५. १. ३. २. तै. ब्रा. १. ५. १०. ६. ता. ब्रा. २. १०. ५.

पतिर्वै सप्तदश' इति श्रुतेः। अतस्तस्याऽप्युत्पत्त्यपेक्षा नाऽस्ति। वायूपा अनुष्टुप् च प्रजापत्यात्मकः सप्तदशश्च स्त्रीपुंसौ समभवताम्। मिथुनीभूतयोस्तयोर्मध्ये साऽनुष्टुप् समानाकृतीनि चतुरुत्तराणि उत्तरोत्तरं चतुःसंख्यातिरिक्तानि छन्दांसि गायत्र्यादीन्यसृजत सृष्टवती। सप्तदशस्तोमस्तु स्वसमानजातीयान् षडुत्तरान् उत्तरोत्तरं षट्संख्ययाऽधिकान् स्तोमान् त्रिवृदादीनसृजत। छन्दसां मध्ये गायत्री चतुर्विंशत्यक्षरा। ततश्चतुराधिकयेनोष्णिगष्टाचत्वारिंशदक्षरा भवति। पुनश्चतुराधिकये सति द्वात्रिंशदक्षराऽनुष्टुप् सम्पद्यते। ततोऽक्षरचतुष्टयेन षट्त्रिंशदक्षरा बृहतीत्यादि चतुरुत्तरत्वं छन्दसां द्रष्टव्यम्। स्तोमेष्वपि त्रिवृत्स्तोमो नवस्तोत्रीयात्मकः। ततः षड्भिः स्तोत्रीयाभिराधिक्ये पञ्चदशस्तोमो निष्पद्यते। पुनः षडाधिक्ये एकविंशस्तोम इत्यादि षडुत्तरत्वं स्तोमानामप्यूहनीयम्। तावनुष्टुप्सप्तदशावेतान् पूर्वोक्तान् विराजं मध्यतः उष्णिगनुष्टुभोर्मध्ये प्राजनयतां उत्पादितवन्तौ। त्रिंशदक्षरा हि विराट् द्वाभ्यामक्षराभ्यामधिका उष्णिगेव विराट् भवति। तथा चोक्तं—द्वाभ्यां विराट् स्वराजाविति ॥ ४ ॥

अथ सृष्टानां स्तोमानां मध्ये स्तोमद्वयस्याहर्विशेषसम्बन्धं प्रदर्शयन् तयोरह्नोरहरन्तरात् पूर्वप्रयोज्यत्वमाह—

त्रिवृच्च त्रिणवश्च राथन्तरौ तावजश्चाऽश्वश्चान्वसृज्येतां तस्मात्तौ राथन्तरं प्राचीनं प्रधुनुतः ॥ ५ ॥

त्रिवृच्च त्रिणवश्चेत्येतौ द्वौ स्तोमौ राथन्तरौ राथन्तरेऽहनि प्रयोज्यौ। पृष्ठषडहे प्रथमतृतीयपञ्चमानि त्रीण्यहानि राथन्तराणि। अन्यानि त्रीणि बार्हतानि। तदुक्तं सूत्रकृताऽश्वलायनेन (१)'अभिप्लवपृष्ठ्याहानि। रथन्तरपृष्ठान्ययुजानिबृहत्यृपृष्ठानीतराणी'ति। अतः एतौ स्तोमौ तृतीयस्याऽह्नः सप्तदशस्याऽवरुद्धत्वात् प्रथमपञ्चमयोरह्नोः प्रयोज्यत्वाद्राथन्तरौ तौ स्तोमावनु पश्चात् तयोः सृष्टयनन्तरं अजश्चाश्वश्चेत्येतौ पशू असृज्येतां सृष्टावभूताम्। तस्मात्पश्चात् सृष्टत्वात् तावजाश्वौ राथन्तरमहः प्राचीनं प्राक्तनं बार्हता द्वितीयादेरह्नः पूर्वं प्रयोज्यं प्रधुनुतः प्रक्षिपतः स्थापयत इत्यर्थः ॥ ५ ॥

अथाऽन्ययोः स्तोमयोरहर्विशेषसम्बन्धं दर्शयन् तस्याऽहर्विशेषस्य पश्चाद्भाविनोऽपि दीप्तिर्भवतीत्याह—

पञ्चदशश्चैकविंशश्च बार्हतौ तौ गौश्चाऽविश्चान्वसृ-

---

१. आश्व. श्रौ. उ. १. ५. १-३.

ज्येतां तस्मात्तौ बार्हतं प्राचीनं भास्कुरुतः ॥ ६ ॥

पञ्चदशश्चैकविंशश्चेति द्वौ स्तोमौ बार्हतौ बार्हतेऽहनि प्रयोज्यौ तावनु पश्चात् गौश्चाऽविश्चेत्येतौ पशू असृज्येतां सृष्टावभूताम्। तस्माद्बार्हतयोः पञ्चदशैकविंशयोरनन्तरं सृष्टत्वात् तौ पशू बार्हतं द्वितीयचतुर्थादिकमहः प्राचीनं प्राक्तनं, अञ्चुगतिपूजनयोः, यथा पूजितं भवति तथा भास्कुरुतः भासा दीप्त्या युक्तं कुरुतः ॥ ६ ॥

एवं वाग्रूपानुष्टुभः सकाशात् प्रजापतेः आत्मनः सप्तदशाख्योक्तां सृष्टिं जानतः फलमाह—

एवं वै विद्वांसमाहुरपि ग्राम्याणां पशूनां वाच आजानाति ॥ ७ ॥

एवमुक्तां सृष्टिं विद्वांसं जानन्तं पुरुषं आहुर्ब्रह्मवादिनः, किमिति ग्राम्याणा ग्रामे भवानां गवादीनां पशूनामपि च वाचः अव्यक्तानि वाक्यानि आजानाति अभिजानातीति। एवं विद्वान् पुरुषः मनुष्यवाक्यस्येव पशूनां वाक्यस्याऽपि आकारणादिकमर्थं जानातीत्यर्थः ॥७॥

इति ताण्ड्यमहाब्राह्मणे दशमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीयः खण्डः ॥

अथ द्वादशाहमृद्धिफलकं विधित्सुराह—

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स आत्मन्नृत्व्यमपश्यत्तत ऋत्विजोऽसृजत यदृत्व्यादसृजत तदृत्विजामृत्विक्त्वं तैरेतं द्वादशाहमुपासीदत्सोऽराधनोत् ॥

अस्य जगतः सृष्टेः प्रागवस्थायां प्रजापतिः सर्वस्य स्रष्टा अकामयत ऐच्छत्। किमिति ? बहु स्यां नानाविधकार्य्यात्मना अहं बहुर्भवेयम्, तदर्थं प्रजायेय प्रजारूपेणोत्पद्येयेति। एवं कामयमानः स प्रजापतिः आत्मन् आत्मनि स्वस्मिन् ऋत्व्यं ऋतौ ऋतुकाले भवं गर्भस्य कारणं बीजमपश्यत् दृष्टवान्। ततस्तस्मात् आत्मन ऋत्व्यात् प्रजापतिर्ऋत्विजोऽसृजत यद्यस्मात् ऋत्व्यात् सृष्टवान् तस्मात् ऋत्विजां याजकानां ऋत्विक्त्वं ऋत्विगिति नाम सम्पन्नम्। एवमृत्विजः सृष्ट्वा तैः सृष्टैः एतं द्वादशाहं, अत्राहःशब्देन सवनत्रयात्मकः सोमयागः उक्तः, तमेतं द्वादशाहसंज्ञं सोमयागं उपासीदत् उपागच्छत् अन्वतिष्ठदित्यर्थः। तदनु-

ष्ठानेन स प्रजापतिरराध्नोत् प्रजादिभिः समृद्धोऽभवत्। राधसाधसंसिद्धाविति धातुः ॥ १ ॥

एवं द्वादशाहः समृद्धिहेतुरित्युक्तम्। अथ तस्मिन् द्वादशाहे या द्वादश दीक्षा साऽपि समृद्धिहेतुः। किमु वक्तव्यं द्वादशाहस्य समृद्धिहेतुत्व इत्यभिप्रायेणाऽऽह—

पिता नोऽरात्सीदिति मासा उपासीदꣳस्ते दीक्षयैवाऽराध्नुवन्नुपसत्सु त्रयोदशमदीक्षयन् सोऽनुव्यमभवत् तस्मादुपसत्सु दिदीक्षाणोऽनुव्यं भवत्येव च हि त्रयोदशं मासं चक्षते नैव च ॥ २ ॥

संवत्सरात्मकः प्रजापतिः नोऽस्माकं पिता अरात्सीत् अनेन द्वादशाहेन समृद्धोऽभूदिति बुध्वा मासाश्चैत्राद्या मासदेवता अपि एनं द्वादशाहमुपासीदन् अनुष्ठानमुपागच्छन् ते दीक्षयैव द्वादशदिवसनिष्पाद्येन दीक्षासंस्कारेणैव अराध्नुवन् समृद्धा अभवन्। द्वादशभिर्दीक्षादिवसैरेव समृद्धास्ते मासा उपसत्सु, द्वादशाहस्य द्वादश दीक्षाः, द्वादशोपसदो द्वादश प्रसुत, इति स्थितिः। येषु दिवसेषु सायंप्रातःकालयोः प्रवर्ग्योपसदोरनुष्ठानं ते दिवसा उपसद इत्युच्यन्ते। तेषूपसद्दिवसेषु त्रयोदशसंख्यापूरकं संसर्पाहस्पत्याख्यं मासं अदीक्षयन्। समृद्धा मासाः तमपि दीक्षया समस्कुर्वन्। स त्रयोदशो मासः अनुव्यं अनुपूर्वात् वेतेर्गतिकर्म्मणः सम्पदादिलक्षणो भावे क्विप्। ततो द्वितीयैकवचने(१)एरनेकाच' इति यण्। अनुव्यमनुगमनं प्रति अभवत् अजायत द्वादशानां मासानामनुगन्ता त्रयोदशो मासो जात इत्यर्थः। यस्मात्ते पूर्वदीक्षया समृद्धाः अतः पश्चाद्भाविनो मासस्य त्रयोदशस्य युक्तमनुगन्तृत्वम्। यस्मादेवं तस्मादुपसत्सु दिदीक्षाणो दीक्षां कृतवान् पुरुषोऽनुव्यं भवति अनुगमनं प्रति समर्थो भवति। सर्वेषां पूर्वदीक्षिणामनुयायी भवतीति। तस्मादुपसत्सु त्रयोदशेन न दीक्षितव्यम्। तथा चाध्वर्युसूत्रम्(२) एको द्वादशाहेन यजेत त्रयष्षड् द्वादश त्रयोदश वा। तेषामुपसत्सु त्रयोदशं दीक्षयन्ति। तस्मात् द्वादशाहे त्रयोदशेन न ब्रह्मणा भवितव्यमित्येक"इति। अत एव मासान्तरवत् प्राधान्याभावात् कदाचिदेव त्रयोदशं मासं नैव चक्षते क्वचिदेव संवत्सरेऽस्तीति कथयन्ति, न चैनं सर्वस्मिन् संवत्सरे। एवमुक्तेन प्रकारेण द्वादशाहेन

---

१. पा. सू. ६. ४. ८२, २. आप. श्रौ. २१. १. ११-१३

समृद्धिकामो यजेतेति विधिरुन्नेतव्यः ॥ २ ॥

अथ विहिते तस्मिन्नधिकारिविशेषानाह—

एको दीक्षतैको हि प्रजापतिरराध्नोद्द्वादश दीक्षेरन् द्वादश हि मासा अराध्नुवꣳश्चतुर्विंशतिर्दीक्षेरꣳश्चतुर्विंशतिर्ह्यर्द्धमासा अराध्नुवन् ॥ ३ ॥

तस्मिन् द्वादशाहे एक एव दीक्षेत एकेनैव यजमानेन द्वादशाहोऽनुष्ठेयः । हि यस्मात् प्रजापतिः एक एव यजमानः सन् अराध्नोत्, तस्मादयमेकयजमानकर्तृको द्वादशाहः । द्वादश यजमानाः संहत्य द्वादशाहमनुष्ठाय समृद्धा अभूवन्निति हि पूर्वमुक्तम् । अतः संहतानामपि द्वादशानामद्याऽप्यनुष्ठानं गम्यते । अथ वा चतुर्विंशतिसंख्याका यजमानाः द्वादशाहाय दीक्षेरन् चतुर्विंशतिसंख्याका ह्यर्द्धमासाः सकृदनुष्ठानेन पूर्वमराध्नुवन्, एकैकस्मिन् मासे द्वौ द्वावर्द्धमासाविति मासानां समृद्धिरेव । तदवयवानामर्द्धमासानामपि सैव समृद्धिरित्यभिप्रायेणेयं स्तुतिः ॥ ३ ॥

इतोऽधिकस्य दीक्षिणं प्रतिषेधति—

यदि पञ्चविंशो दीक्षेतेमे पञ्चेमे पञ्चेमे पञ्चेमे चत्वारोऽसावेक इति निर्दिशेयुर्यस्मा अराद्धिकामाः स्युस्तमेवाऽराद्धिरन्वेति सर्व इतरे राध्नुवन्ति ॥ ४ ॥

यदि चतुर्विंशतेरधिकः पञ्चविंशः पञ्चविंशतिसंख्यापूरकोऽन्यः पुरुषो दीक्षेत तदा पञ्चशः पञ्चशः विंशतिसंख्याकान् यजमानांश्चतुर्द्धा पृथक् कुर्यात । अवशिष्टानां पञ्चानां मध्ये इमे चत्वार इति चत्वारः पृथक् कर्त्तव्याः । अथ यस्मै यजमानाय अराद्धिकामाः असमृद्धिकामाः स्युः—असमृद्धिरस्मै भूयादिति कामयेरन्, तं असौ देवदत्त एकोऽस्मद्यो बहिर्भूत इति निर्दिशेयुः विभजेयुः । तमेव यजमानं अराद्धिरसमृद्धिरन्वेति अनुगच्छति । इतरे सर्वे यजमाना राध्नुवन्ति संसिध्यन्ति । तस्मात् पञ्चविंशो न दीक्षितव्य इत्यर्थः । यदि बहवो मिलित्वा द्वादशाहेन यजेरन्, तत्रैको गृहपतिः इतरे सहदीक्षणो यजमानाः । यजमानकर्म्मणां मध्ये यानि केवलं क्रत्वर्थानि यूपाञ्जनक्रतुयाज्यादीनि तानि गृहपतिरेव कुर्य्यात्, नेतरे । यानि पुरुषार्थानि क्रतुफलभोक्तृत्वेयोग्यतासम्पादकानि च दीक्षासंस्कारादीनि तानि

सर्वे कुर्युः । तथा च भगवानापस्तम्बः(१)सर्वे याजमाने स्थानिनः । सर्वे याजमानं कुर्युः । गृहपतिरेव परार्थानि यथा यूपाञ्जनमृतुयाज्या-मिति । गृहपतिरेव सामिधेनीकल्पेनाऽवदानकल्पेनेति प्रक्रामेयुर्यानि चा-न्यान्येवंरूपाणि स्यु"रिति ॥ ४ ॥

एवं सति स्वस्य गृहपतित्वं सहदीक्षिणोऽन्यांश्च यजमानान् यः कामयेत तस्य तत्प्राप्त्युपायं दर्शयति—

यो वै देवानां गृहपतिं वेदाऽश्नुते गार्हपतं प्र गार्ह-पतमाप्नोति ॥ ५ ॥

यो वै देवानां गृहपतिं सहदीक्षिणश्च वेद जानाति स गार्हपतं गृहपतित्वं सह दीक्षिणश्चाऽश्नुते । एतस्यैव विवरणं गार्हपतमाप्नो-तीति ॥ ५ ॥

कोऽसौ देवानां गृहपतिः ? के वा सह दीक्षिणः ? इत्युभयं दर्शयति—

संवत्सरो वै देवानां गृहपतिः स एव प्रजापति-स्तस्य मासा एव सह दीक्षिणः ॥ ६ ॥

संवत्सरः खलु देवानां मध्ये गृहपतिः कालात्मकस्य तस्य कथं गृहपतित्वमित्याशङ्क्याऽऽह—स एव संवत्सरः प्रजापतिः प्रजापतिरेव संवत्सरात्मना वर्त्तमानो गृहपतिर्जात इत्यर्थः । तस्य संवत्सरात्मनः प्रजापतेः मासा एव सह दीक्षिणः सह दीक्षमाणा अन्ये यजमाना अभवन् ॥ ६ ॥

एतदेवोपसंहरति—

विन्दते सह दीक्षिणोऽश्नुते गार्हपतं प्र गार्हपत-माप्नोति य एवं वेद ॥ ७ ॥

एवमुक्तमर्थं यो वेद जानाति स वेदिता सहदीक्षिणः सह दीक्ष-माणानन्यान् यजमानान् विन्दते लभते स्वयं च गार्हपतं गृहपतित्व-मश्नुते ॥ ७ ॥

अथ द्वादशाहं बृहत्यात्मना तुष्टुवानस्तस्य प्रथमं स्वराज्यप्राप्ति-हेतुतामाह—

यो वै छन्दसां स्वराजं वेदाऽश्नुते स्वाराज्यं प्र स्वा-राज्यमाप्नोति बृहती वाव छन्दसां स्वराडश्नुते स्वा-राज्यं प्र स्वाराज्यमाप्नोति य एवं वेद ॥ ८ ॥

---

१. आप. श्रौ. २१. १. १८, १९; २२. २. ३.

यो वै यः छन्दसां गायत्र्यादीनां मध्ये स्वराजं स्वयमेव राजमानां दीप्यमानां वेद स स्वाराज्यं स्वायत्तदीप्तिमत्तामश्नुते । तस्यैव विवरणम्–प्र स्वाराज्यमाप्नोतीति । का सौ छन्दसां स्वराडुच्यते ? बृहती खलु छन्दसां मध्ये स्वराट् स्वयमेव राजमाना यान्वित्यहरन्यानि छन्दांसि वर्षीयांसि कस्माद्बृहत्युच्यत इत्यादिना बृहत्याः सर्वलोकव्यापकत्वस्य चाऽन्येषां छन्दसां बृहत्यन्तर्भावस्य चोक्तत्वादिति । स्पष्टमन्यत् ॥८॥

अथ स्वाराज्यप्राप्तिहेतुभूतं बृहत्यात्मना द्वादशाहं प्रशंसति—

तां वा एतामन्नाद्याय व्यावृज्याऽऽसते यदेतं द्वादशाहं द्वादश दीक्षा द्वादशोपसदो द्वादश प्रसुतः षट्त्रिंशदेता रात्रयो भवन्ति षट्त्रिंशदक्षरा बृहती ॥ ९ ॥

तां पूर्वोक्तां स्वराड्रूपामेवेतां बृहतीमन्नाद्याय अन्नाद्यफलाय व्यावृज्य विभज्य आसते अनुतिष्ठन्ति यत् ये यजमाना एतं द्वादशाहमासते । कथं बृहत्या विभाग इति ? उच्यते–अथ द्वादशाहस्य द्वादश रात्रयो दीक्षाः दीक्षया पयोव्रतादिनियमात्मिकया युक्ता भवन्ति । ततो द्वादश रात्रयः उपसदः । ततो द्वादश प्रसुतः सुत्याः । एवं षट्त्रिंशत्सङ्ख्याका एता रात्रयो दिवसाः भवन्ति । बृहती च षट्त्रिंशदक्षरा । ततो बृहतीमेवैवं त्रेधा विभज्य द्वादशाहं कुर्वाणाः अन्नाद्यायाऽनुतिष्ठन्तीत्यन्वयः । अतः स्वराडात्मिकया बृहत्या संस्तुतत्वात् द्वादशाहोऽपि स्वराज्यहेतुरित्युक्तो भवति ॥ ९ ॥

अथोक्तं दीक्षादिकमवयुत्य प्रशंसति—

जायते वाव दीक्षया पुनीत उपसद्भिर्देवलोकमेव सुत्ययाऽप्येति ॥ १० ॥

"ब्राह्मणो वा एष जायते यो दीक्षत" इति श्रुत्यन्तरात् द्वादशदिवसानुष्ठितया दीक्षया पुनर्यजमानो जायते । ततः कृताभिरुपसद्भिः पुनीते शुध्यति । ततः शुद्धः सन् सुत्यया द्वादशदिवसकृतया तत्साध्येन सोमयागेन देवलोकं देवानां लोकं स्वर्गादिकं अप्येत्यपि गच्छति । अनेन देवलोकप्राप्तिरपि द्वादशाहस्य फलमित्युक्तं भवति ॥१०॥

अथाऽनेन संवत्सरसम्बन्धीन्द्रियवीर्यप्राप्तिरपि भवतीत्याह—

एतावद्वाव संवत्सर इन्द्रियं वीर्यं यदेता रात्रयो द्वादश पौर्णमास्यो द्वादशैकाष्टका द्वादशाऽमावास्या यावदेव संवत्सर इन्द्रियं वीर्यं तदेतेनाऽऽप्त्वाऽवरुन्धे द्वादशाहेन ॥ ११ ॥

यदेता वक्ष्यमाणाः या रात्रयः एतावदेव संवत्सरे वर्त्तमानं बलं वीर्य्यं बलसाध्यं वीरकर्म च संवत्सरस्य सारभूता रात्रयः इत्यर्थः। काः पुनरेताः ? (१)द्वादश पौर्णमास्यः द्वादशमासात्मके संवत्सरे द्वादशसंख्याकाः पौर्णमास्यो भवन्ति। एकाष्टकाश्च द्वादश भवन्ति। यद्यपि माघकृष्णाष्टम्येवैका। तथा चाऽध्वर्युसूत्रम्-(२)या माघ्याः पूर्णमास्याः उपरिष्टाद्याष्टका तस्यामष्टमी ज्येष्ठया सम्पद्यते तामेकाष्टकेत्याचक्षत" इति, तथापि तत्सामान्यात् चैत्रादिमासगताः सर्वा एव कृष्णाष्टम्योऽत्रैकाष्टकाशब्देनोच्यन्ते। तथाऽमावास्याश्च द्वादश भवन्ति। एवं संवत्सरे यावदेव षट्त्रिंशद्दिवसात्मकमिन्द्रियं तत्सर्वमेतेन द्वादशाहेन षट्त्रिंशद्दिवससाध्येन आप्त्वा प्राप्याऽवरुन्धे स्वात्मनि निदधाति ॥ ११ ॥

अथ द्वादशाहस्य विराट्सम्पत्तिमाह—

त्रिंशदक्षरा वा एषा विराट् षडृतव ऋतुष्वेव विराजा प्रतितिष्ठत्यृतुभिर्विराजि ॥ १२ ॥

द्वादशाहस्य हि दीक्षोपसत्सुत्या मिलित्वा षट्त्रिंशदहानि भवन्ति। तत्र यानि त्रिंशत् सा विराट्(२) "त्रिंशदक्षरा विराट्" इति श्रुतेः। यान्यवशिष्टानि षट् ते षडृतवः। स्पष्टमन्यत् ॥ १२ ॥

पुनः षट्त्रिंशत्सङ्ख्यामवयुत्य स्तौति—

द्वात्रिंशदक्षरा वा एषाऽनुष्टुब्वागनुष्टुप् चतुष्पादः पशवो वाचा पशून्दाधार तस्माद्वाचा सिद्धा वाचाहूता आयन्ति तस्मादु नाम जानते ॥ १३ ॥

अथ द्वादशाहस्य यान्यादितो द्वात्रिंशदहानि एषा द्वात्रिंशदक्षरानुष्टुबेव। यान्यवशिष्टानि तानि चत्वारि तानि चतुष्पादः पशवः। अनुष्टुप् च वाग्रूपा। तया पूर्वप्रयुक्तया वाचा चतुष्पादः पशून् दाधाराऽऽत्मनि धारयति। यस्मादेवं तस्मादेव कारणात् पशवो वाचा सिद्धाः वाग्व्यवहारे लब्धाः वाचा नामधेयात्मकेन शब्देन आहूताः आकारिताश्च सन्तः पशवः आयन्ति आगच्छन्ति। यस्मादेव पशून् वाचा दाधार तस्मादेव कारणात्ते पशवः स्वं स्वं नाम जानते अवगच्छन्ति ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे वेदार्थप्रकाशसहिते दशमाध्यायस्यतृतीयः खण्ड

---

१. आप. गृ. २१. १० २. तै. सं. ७. ४. ३.

अथ चतुर्थः खण्डः ॥

एवं द्वादशाहं विधाय समुदायेन बहुशः स्तुतिः कृता । अथ तस्य आद्यन्तयोर्यावतिरात्रौ तौ स्तुतिमुखेन विधत्ते—

भूतं पूर्वोऽतिरात्रो भविष्यदुत्तरः पृथिवी पूर्वोऽतिरात्रो द्यौरुत्तरोऽग्निः पूर्वोऽतिरात्र आदित्य उत्तरः प्राणः पूर्वोऽतिरात्र उदान उत्तरः ॥ १ ॥

भूतं इतः पूर्वं सृष्टेरूर्ध्वं उत्पन्नं यावत्पदार्थजातमस्ति स एव पूर्वः द्वादशाहस्य प्रथमोऽतिरात्रः । भविष्यदितः परमुत्पत्स्यमानं यावदस्ति विकारजातं स एवोत्तरः द्वादशाहस्याऽन्त्योऽतिरात्रः । तथा पृथिव्यग्निप्राणानां प्राथम्यात् प्रथमोऽतिरात्रस्तत्स्थानीयः । द्यौरादित्य उदान इत्येतेषां स्वपूर्वापेक्षयोत्तरत्वात् चरमातिरात्रस्य तदात्मकत्वम् । अत एवंविधावतिरात्रौ आद्यन्तयोः कर्त्तव्याविति विधिरुन्नीतो भवति ॥ १ ॥

अथ प्रथमादतिरात्रादूर्ध्वमुत्तमान्त्यपूर्वे अग्निष्टोमसंस्थे द्वे अहनी कार्य्ये इति विधित्सुराह—

चक्षुषी अतिरात्रौ कनीनिके अग्निष्टोमौ यस्मादन्तरा अग्निष्टोमावतिरात्राभ्यां तस्मादन्तरे सत्यौ कनीनिके भुङ्क्तः ॥ २॥

यावेतौ पूर्वोक्तावतिरात्रौ तौ चक्षुषी यज्ञस्य चक्षुषो गोलकस्थानीयौ । उभयोः समीपेऽनुष्ठीयमानौ यावग्निष्टोमौ ते कनीनिके नेत्रमध्ये वर्त्तमानकृष्णमण्डलस्थानीयौ । एवं सति यस्मादतिरात्राभ्यां अन्तरा मध्ये अग्निष्टोमावनुष्ठेयौ तस्मादन्तरे चक्षुर्मण्डलस्य अन्तरा मध्ये सत्यौ वर्त्तमाने कनीनिके भुङ्क्तः पुरुषं पालयतः । भुजपालनाभ्यवहारयोः । (१) 'भुजोऽनवने' इति पर्य्युदासादात्मनेपदाभावः ॥ २ ॥

अथाऽनयोरतिरात्रयोश्शयनं न कार्य्यमिति विधत्ते—

संवत्सरस्य वा एतौ दंष्ट्रौ यदतिरात्रौ तयोर्न स्वप्तव्यं संवत्सरस्य दंष्ट्रयोरात्मानं नेदपिदधानीति ॥ ३ ॥

यत् यौ पूर्वोक्तावतिरात्रौ एतौ संवत्सरस्य दंष्ट्रौ(२) "संवत्सर-

---

१. पा. सू. १.३.६६. २. तै. ब्रा. १.१.९.

प्रतिमा वै द्वादश रात्रयः" इति श्रुतेः संवत्सरस्य द्वादशाहस्य दंष्ट्रस्थानीयौ। तयोर्न स्वप्तव्यं स्वापो न कार्य्यः। संवत्सरस्य दंष्ट्रयोः स्वापान्नैवाऽऽत्मानमपिदधानि अपिदध्यां प्रक्षिपेयमिति बुद्ध्या ॥ ३ ॥

अथ पक्षान्तरमाह—

तदाहुः कोऽस्वप्तुमर्हति यद्वाव प्राणो जागर तदेव जागरितामिति ॥ ४ ॥

तत्तत्र विषये अभिज्ञा ब्रह्मवादिन आहुः लोके—को नाम पुरुषः अस्वप्तुं स्वापमकर्त्तुमर्हति ? स्वापस्याऽवश्यम्भावित्वात्। तर्हि कथं पूर्वोक्तदोषपरिहारः ? उच्यते-यद्वाव यदेव प्राणो देहे वर्त्तमानः प्राणवायुर्जागर्त्ति कदाचिदपि न स्वपिति। स हि जाग्रत्स्वप्नसुषुप्तिषु तिसृष्वप्यवस्थासु सर्वदा प्रबुद्ध एव वर्त्तते। तदेव प्राणकर्त्तृकं जागरणमस्य यजमनस्य जागरितं जागरणमिति उक्तदोषो न भविष्यति ४

अथ पूर्वोक्तानां चतुर्णामहामन्तराले उक्थसंस्थान्यष्टावहानि कर्त्तव्यानीति विधित्सुराह—

गायत्रीं वा एतां ज्योतिःपक्षामासते यदेतं द्वादशाहमष्टौ मध्य उक्था अग्निष्टोमावभितो मासा स्वर्गं लोकमेत्याऽऽजरसं ब्रह्माद्यमन्नमत्ति दीप्यमानः ॥ ५ ॥

यत् य एतं द्वादशाहं आसते अनुतिष्ठन्ति ते एतां वक्ष्यमाणां ज्योतिःपक्षां गायत्रीमेवाऽऽसते। कैषा गायत्री ? किं वा तस्याः पक्षभूतं ज्योतिः ? तदुभयमुच्यते ये द्वादशाहस्य मध्ये अष्टावुक्थाः उक्थसंस्थाः सैषा गायत्री। अष्टाक्षरा च गायत्रीत्युभयोरष्टसंख्यासाम्यात्। अभितः पार्श्वयोरुक्थानां पुरस्तात् परस्ताच्च यावग्निष्टोमौ क्रियमाणौ तावेवास्याः गायत्र्याः पक्षौ(१) अग्निर्देवतानां ज्योतिर्विराट्छन्दसां ज्योतिरिति श्रुतेः। तस्मिन् ज्योतिष्टोमस्य समाप्तत्वादग्निष्टोमोऽपि ज्योतिः। तस्मादेषा गायत्री ज्योतिःपक्षा। एवं ज्ञात्वाऽनुतिष्ठन् देहावसाने भासा दीप्त्या सह स्वर्गं लोकमेति गच्छति। अस्मिंश्च लोके आजरसं यावज्जीर्य्यते तावत्पर्य्यन्तं ब्रह्माद्यं ब्राह्मणजात्या अदनीयं प्रशस्तमन्नं अत्ति भुङ्क्ते। दीप्यमानः मध्ये मध्ये ज्वरादिभिः तप्यमानः सन्। एतदुक्तं भवति—द्वादशाहस्य प्रथममतिरात्रे तत एकमहरग्निष्टोमः ततोऽग्निष्टोमातिरात्राविति क्रमेण कर्त्तव्यानीति ॥ ५ ॥

---

१. तै. सं. ७. १.१.

अथैतेष्वहःसु आद्यन्तावतिरात्रौ मुक्त्वा यो मध्ये दशरात्रः क्रमेण कर्त्तव्यः तत्राऽऽदितः त्रिष्वहस्सु पृष्ठस्तोत्रे विकल्पेन रथन्तरं साम कार्य्यमिति विधत्ते—

त्रिष्पुरस्ताद्रथन्तरमुपयन्ति त्र्यावृद्वै वाक् सर्वामेव वाचमवरुध्य सर्वमन्नाद्यं द्वादशाहं तन्वते ॥ ६ ॥

पुरस्तात् पूर्वस्मिन् भागे दशाहस्याऽऽदितः त्रिष्वहःसु रथन्तरं त्रिरुपयन्ति त्रिवारं प्रयुञ्जीरन्। त्र्यावृद्वै त्रिधा आवर्त्तमाना खलु वाक् सुप्तिङ्कृदन्तरूपेण यद्वा वेदत्रयरूपेण त्रिधा वर्त्तमाना एव रूपावर्त्तनेन रथन्तरस्य त्रिरूपामनेन सर्वां कृत्स्नामेव वाचं सर्वमन्नाद्यञ्चाऽवरुध्य द्वादशाहं तन्वते विस्तारयन्ति ॥ ६ ॥

अस्मिन् पक्षे रथन्तरस्य नैरन्तर्य्येण प्रयोगाज्जामितादोषमाशङ्क्य परिहरति—

जामि वा एतद्यज्ञे क्रियत इत्याहुर्यत् त्रिष्पुरस्ताद्रथन्तरमुपयन्तीति सौभरमुक्थानां ब्रह्मसाम भवति तेनैव तदजामि ॥ ७ ॥

पुरस्ताद्रथन्तरं पूर्वस्मिन्नह्यहे रथन्तरं साम नैरन्तर्य्येणोपयन्तीति यत् एतद्यहे जामि नीरसमेव क्रियते प्रयुक्तस्यैव पुनः पुनः प्रयोगादिति ब्रह्मवादिन आहुः। तत्रायं जामितादोषपरिहारः उक्थानां तृतीयसवनगतानां स्तोत्राणां मध्ये ब्रह्मसाम ब्रह्मणःस्तोत्रनिर्वर्तकं साम तत् सौभरं कार्य्यम्। तेन प्रयुक्तेन सौभरेणैव एतदहरजामित्वदोषरहितं सारवदेव भवति ॥ ७ ॥

ननु दशरात्रस्य प्रथमेऽहन्यग्निष्टोमसंस्थे तृतीयसवने उक्थानि न सन्ति। तत्र कथमजामित्वमित्यत आह—

प्रत्नवत्यः प्रायणीयस्याऽह्नः प्रतिपदो भवन्ति तेनो एव तदजामि ॥ ८ ॥

प्रतिपद्यन्ते प्रारभन्तेऽनेनाह्नेति प्रायणीयं पृष्ठ्यमहः। तस्य प्रायणीयस्याऽह्नः प्रत्नवत्यः (१)'अस्य प्रत्नामनुद्युत'मित्याद्या ऋचः प्रतिपदो बहिष्पवमानस्य प्रारम्भार्था भवति। तेनो तेन उ तेनैव प्रत्नवतीनां प्रतिपत्वेनैव तत् प्रायणीयमहरजामि तत्रत्यानां प्रतिपदां प्रत्नवत्त्वलक्षणेन विशेषणेन योगात् अहरन्तरस्य तद्योगाभावाच्च अस्याप्यह्नो

१. सा. सं. १२. १६. १.

जामित्वदोषो न भवतीत्यर्थः ॥ ८ ॥

अथ दशरात्रस्योपरिभागे अष्टमनवमदशमेष्वहःस्वपि रथन्तरस्य त्रिरुपायनं विधत्ते—

त्रिर्वैवोपरिष्टाद्रथन्तरमुपयन्ति व्यावृद्ध्यै वाक् सर्वामेव वाचमवरुध्य सर्वमन्नाद्यं द्वादशाहादुत्तिष्ठन्ति ॥९॥

उपरिष्टाद्दशरात्रस्योपरितनेष्वपि त्रिष्वप्यहःसु एवमेव रथन्तरं त्रिरुपयन्ति त्रिवारमुपगच्छेयुः । अन्यत् पूर्ववद्व्याख्ययेम । सर्वां वाचं सर्वमन्नाद्यं प्राप्य द्वादशाहादनुष्ठिताद्यागादुत्तिष्ठन्ति उत्क्रामन्ति तं परिसमापयन्तीत्यर्थः । अत्रापि पूर्ववत् । जामित्वशङ्कापरिहरश्च पूर्ववद्योजनीयः । दशमेऽहन्यपि प्रत्नवत्यः प्रतिपद इति व्याख्यास्यति । अतः पूर्ववदजामित्वम् ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे वेदार्थप्रकाशे दशमाध्यायस्य चतुर्थः खण्डः ॥

अथ पञ्चमः खण्डः ॥

अथाऽस्मिन् द्वादशाहे आद्यन्तावतिरात्रौ दशममहश्च । अन्तर्मध्ये यो नवरात्रः तं स्तोतुं त्रेधा विभजति—

त्रयो वा एते त्रिरात्रा यदेष द्वादशाहो गायत्रमुखः प्रथमो गायत्रमध्यो द्वितीयो गायत्रोत्तमस्तृतीयः ॥ १ ॥

अत्र द्वादशाहशब्दः तदवयवे नवरात्रे वर्त्तते । यत् एष द्वादशाहो द्वादशाहावयवो नवरात्रः एते त्रयस्त्रिंशद्रात्राः । तत्र त्रिरात्रो गायत्रमुखः गायत्रीछन्दस्कमहर्मुखे प्रथमतो यस्य स तथोक्तः । द्वितीयस्त्रिरात्रो गायत्रमध्यः तत्र मध्यमस्याह्नो गायत्रत्वात् । तृतीयस्तु गायत्रोत्तमः तृतीयमहर्हि तत्र गायत्रम् । अत्र प्रथमं पदशस्त्रं गायत्रीछन्दस्कत्वञ्चाभिप्रेत्य गायत्रमुख इत्यादि व्यपदेशः । एतत्(१) छन्दांसि वा अन्योन्यस्य लोकमभ्यध्याय"न्निति छन्दसां व्यूहनविधानसमये विस्पष्टं दर्शयिष्यामः।१।

अस्त्वेवम् , ततः किं जातम् ? अत आह—

यस्माद्गायत्रमुखः प्रथमः तस्मादूर्द्धोऽग्निर्दीदाय यस्माद्गायत्रमध्यो द्वितीयस्तस्मात्तिर्यङ् वायुः पवते यस्माद्गायत्रोत्तमस्तृतीयस्तस्मादवाङादित्यस्तपति ॥ २ ॥

---

१. ता. ब्रा.१०.५.१३.

यस्मात्प्रथमस्त्रिरात्रो गायत्रमुखो भवति तस्मात्तेजोरूपाया गायत्र्याः प्रथमतः प्रयुक्तत्वात् तत्प्रदेशादारभ्य ऊर्ध्वं ऊर्ध्वाभिमुखः सन् अग्निर्दीप्तिमान् ज्वलति । यस्मात् द्वितीयस्त्रिरात्रो गायत्रमध्यः तस्माद्गायत्र्या मध्यतः प्रयोगात् द्यावापृथिव्योर्मध्ये तिर्यङ्डिति तिरश्चीनो वायुः पवते । यस्मात् तृतीयस्त्रिरात्रोत्तमः तस्माद्गायत्र्या उपरिस्थितत्वादादित्यो द्युलोकस्योपर्यवस्थाय अवाक् अवाङ्मुखस्तपति प्रकाशयति ॥ २ ॥

अथ प्रकारान्तरेण एतेषां त्रिरात्राणां गायत्रीसम्बन्धं स्तौति—

तेजसा वै गायत्री प्रथमं त्रिरात्रं दाधार पदैर्द्वितीयमक्षरैस्तृतीयम् ॥ ३ ॥

यैषा गायत्री चतुर्विंशत्यक्षरात्मिका अग्निना तेजसैव प्रथमं त्रिरात्रं दाधार धारयति । पदैः पादैर्द्वितीयं त्रिरात्रम् । अक्षरैरात्मीयैश्चतुर्विंशत्यक्षरैस्तृतीयं त्रिरात्रं धारयति ॥ ३ ॥

किञ्च तस्यास्तेजः ? के पादाः ? कियन्ति वा तदीयान्यक्षराणि ? कथं वा तैस्त्रयस्त्रिरात्रा धृता ? इति सर्वमेतदर्शयति—

त्रिवृद्वै गायत्र्यास्तेजस्त्रिवृत्प्रायणीयमहस्तेन प्रथमस्त्रिरात्रो धृतस्त्रिपदा गायत्री त्रिरात्रो मध्ये तेन द्वितीयस्त्रिरात्रो धृतश्चतुर्विंशत्यक्षरा गायत्री चतुर्विंशः उत्तममहस्तेन तृतीयस्त्रिरात्रो धृतः ॥ ४ ॥

त्रिवृत्स्तोमो हि गायत्र्यास्तेजः ; प्रजापतिमुखायोः सहोत्पत्तेः अग्निना सहोत्पन्नत्वाच्च त्रिवृतस्तेजोरूपत्वम् । दशरात्रस्य प्रायणीयं प्रथममहस्त्रिवृत् त्रिवृत्स्तोमकम् त्रिवृदेव स्तोमो भवतीति विधास्यमानत्वात् । तेन त्रिवृदात्मकेन गायत्र्यास्तेजसा प्रथमस्त्रिरात्रो धृतः त्रिवृतस्तृचः त्रयात्मकत्वेन त्रिसंख्यायुक्तत्वात् अष्टाक्षरास्त्रयः पादा अस्यामिति त्रिपदा गायत्री (१)'संख्यासुपूर्वस्ये'ति पादशब्दस्यान्त्यलोपः । (२)"पादोऽन्यतरस्या"मिति ङीपि प्राप्ते(३) "टाबृचीति" टाप् । (४)"पादःपत्" इति पद्भावः, । मध्ये प्रथमतृतीययोस्त्रिरात्रयोरन्तराले त्रिरात्रस्तिस्रो रात्रयः । तेनोभयोस्त्रिरात्रयोगेन गायत्र्याः पादैर्द्वितीयस्त्रिरात्रो धृत इत्युच्यते चतुर्विंशत्यक्षरात्मिकायाः ।

---

१. पा. सू. ५. ४. १४०. २. पा. सू. ४. १. ८.
३. पा. सू. ४. १. ९. ४. पा. सू. ६. ४. १३०.

एवं प्रथममध्यमोत्तमानां त्रिरात्रगतानामहां गायत्रत्वं(१) "गायत्रो वा ऐन्द्र वायवो गायत्रं प्रायणीयमह"रित्यादिना शाखान्तरे स्पष्टमाम्नातम्। यद्वा प्रथमे त्रिरात्रे त्रीण्यपि प्रातःसवनानि गायत्राणि। मध्ये तु माध्यन्दिन-सवनानि। उत्तमे त्रिरात्रे तु तृतीयसवनानि गायत्राणि एतदेका गायत्री। सप्तमम्महश्चतुर्विंशस्तोमकम्। अत एतदुभयं संख्याद्वारेण सम्बद्धम्। तेन सप्तमाह्नः सम्बन्धेन तृतीयस्त्रिरात्रोऽक्षरैर्धृत इत्युच्यते ॥ ४ ॥

अथोक्तप्रकारेण गायत्र्यास्त्रिरात्रयव्याप्तिं स्तौति—

तेजसा वा एते प्रयन्ति तेजो मध्ये दधति तेजोऽभ्युद्यन्ति, ज्योतिषा वा एते प्रयन्ति ज्योतिर्मध्ये दधति ज्योतिरभ्युद्यन्ति, चक्षुषा वा एते प्रयन्ति चक्षुर्मध्ये दधति चक्षुरभ्युद्यन्ति, प्राणेन वा एते प्रयन्ति प्राणं मध्ये दधति प्राणमभ्युद्यन्ति, ये गायत्र्या प्रयन्ति गायत्रीं मध्ये दधति गायत्रीमभ्युद्यन्ति ॥ ५ ॥

ये यजमाना गायत्र्या गायत्रीछन्दसा प्रयन्ति प्रगच्छन्ति प्रथमं त्रिरात्रमारभन्ते एते तेजसा वै तमसो निवर्त्तकमालोकादिकं तेजस्तेनैव प्रयन्ति प्रारभन्ते। ये गायत्रीं मध्ये दधति द्वितीयं त्रिरात्रं माध्यन्दिनसवनेषु धारयन्ति एते तेज एव मध्ये दधति स्थापयन्ति। ये गायत्रीमभिलक्ष्योद्यन्ति उद्गच्छन्ति गायत्रैस्तृतीयसवनैस्तृतीयं त्रिरात्रं समापयन्ति। एते पूर्वोक्तं तेजोऽभिलक्ष्योद्यन्ति उदयनं समापनं कुर्वन्ति। एवमुत्तरेषु त्रिषु पर्य्यायेषु योज्यम्। तेजसा तेजःशब्दाभिधेयेन अग्न्यादिना अन्यं प्रकाशं ज्योतिः चष्टे पश्यतिकर्म्मणः चक्षुर्ज्योतिरन्यं ज्ञानं चक्षुः प्राणापानादिपञ्चवृत्त्यात्मकः प्राणः। गायत्र्याश्च तेजआदिसम्बन्धः 'तेजो वै गायत्री' 'ज्योतिर्वै गायत्री'त्यादिवाक्यशेषैरधिगन्तव्यः ॥ ५ ॥

अथैनं द्वादशाहं वस्त्रात्मकत्वेन रूपयन् विस्तार्य्यमाणस्य तस्य प्रान्तदार्ढ्यहेतुशङ्कुसगन्तयैतां गागत्रीं स्तौति—

तन्त्रं वा एतद्वितायत यदेष द्वादशाहस्तस्येतै मयूखा यद्गायत्र्यसंख्याथाय ॥ ६ ॥

तायते विस्तार्यत इति तन्त्रं वस्त्रम्। एतदेव वै एतद्वितायते विस्तीर्यते। (२)तनोतेर्यकी"ति अनुनासिकस्याकारः। यत् य एष द्वादशाहस्तस्य

---

१. तै. सं. ७. २. ८. २. पा. सू. ६. ४. ४४.

विस्तारितस्य असंव्याथाय संव्याथस्सञ्चलनं, व्यथ भयचलनयोरिति धातुः, चलनाभावाय दाढर्याय एते मयूखाः प्रान्तेषु निखातव्याः शङ्कवः। यत् यैषा गायत्री सर्वेद्वादशाहं व्याप्नुवती गायत्री कृत्स्नमेव द्वादशाहं द्रढयतीत्यर्थः ॥ ६ ॥

अथोक्तिप्रत्युक्त्या सदृष्टान्तं द्वादशाहो गायत्र्यां प्रतिष्ठित इति प्रदर्शयति—

गिरिक्षिदौच्चामन्यवेति होवाचाऽभिप्तारी काक्षसेनिः कथं द्वादशाह इति यथाऽरान्नेमिः पर्य्येत्येवमेनं गायत्री पर्य्येत्यविस्रंसाय यथाऽरा नाभौ धृता एवमस्यां द्वादशाहो धृतः ॥ ७ ॥

उच्चामन्युपुत्रो गिरिक्षिन्नामकः काश्चिदृषिः। हे औच्चामन्यव गिरिक्षित्! इति तं सम्बोध्य काक्षसेनिः कक्षसेनस्य पुत्रः अभिप्तारी नाम ऋषिः इति ह इति खलु पूर्वमुवाच। इतिशब्दपरामृष्टमेव प्रदर्श्यते-कथं द्वादशाह इति कथं केन प्रकारेण स्थितोऽसौ द्वादशाह इति उच्चामन्यवं काक्षसेनिः पप्रच्छ। तस्योत्तरमेतत्-यथा अरान् रथचक्रमध्यस्थान् कीलकान् नेमिर्बहिर्वलयः पर्य्येति परितो व्याप्नोति एवमेनं द्वादशाहं गायत्री पर्येति परितो व्याप्नोति। किमर्थम्? अविस्रंसाय विस्रंसनाभावाय शैथिल्याभावाय यथा वा अरा नाभौ चक्रमध्ये धृताः सम्बद्धा एवमस्यां द्वादशाहो धृतः ॥ ७ ॥

अथैतमनुष्टुप्रूपेण स्तौति—

अनुष्टुभं वा एतामन्नाद्याय व्यावृञ्जतेऽसते यदेतं द्वादशाहम् ॥ ८ ॥

यत् यमेतं विहितं द्वादशाहमासते अनुष्टुभं द्वात्रिंशदक्षरात्मिकामेवैतां व्यावृज्य विभज्य अन्नाद्याय अन्नञ्च तदाद्यञ्च अन्नाद्यं तदर्थं आसते अनुतिष्ठन्ति ॥ ८ ॥

कथं द्वादशाहमनुतिष्ठद्भिरनुष्टुभो विभागः क्रियते? इति तदर्थं तद्विभागमाह—

अष्टाभिर्वा अक्षरैरनुष्टुप् प्रथमं द्वादशाहस्याऽहरुद्यच्छत्येकादशभिर्द्वितीयं द्वादशभिस्तृतीयम् ॥ ९ ॥

द्वात्रिंशदक्षरात्मिकाऽनुष्टुप् अष्टाभिरात्मीयैरक्षरैर्द्वादशाहस्य प्रथममहः उद्यच्छति उद्गृह्णाति व्याप्नोति। तस्याऽहो गायत्रत्वात् तत एव

कादशभिरात्मीयैरक्षरैर्द्वितीयमहरुद्यच्छति । तस्याऽहस्त्रैष्टुभत्वात् त्रिष्टुभश्च पादा एकादशाक्षरा इति तद्योगः द्वादशभिरवशिष्टैरक्षरैस्तृतीयमहरुद्यच्छति, जागतं हि तदहः । अतो जागतपादयोगात्तदभिप्रायेणेदम् ॥ ९ ॥

अत्र प्रथमेऽह्नि नियुक्तानामष्टानामक्षराणामन्त्यमक्षरमुपादाय तत्प्रभृति पुनरेकादशाक्षराणि द्वितीयेऽह्नि विनियुज्यन्ते । तत्रापि अन्त्यमक्षरमुपादाय तदारभ्य द्वादशाक्षराणि तृतीये सम्बध्यन्ते । एवमेकैकमक्षरमादाय विनियोगे सति त्र्यक्षरमवशिष्यते । तान्येवाक्षराणि चतुर्थ्यादीनि त्रीण्यहानि व्याप्नुवन्तीत्याह—

अक्षरं त्र्यक्षरमुच्छिष्यते तदेवोत्तरं त्रिरात्रमनुविदधाति ॥ १० ॥

उक्तप्रकारेण अन्त्यमक्षरमादाय परिगणनायां त्र्यक्षरमक्षरत्रयमुच्छिष्यते अवशिष्यते । तदेवाक्षरत्रयं द्वितीयत्रिरात्रमनुक्रमेण विदधाति करोति । न त्वनुष्टुभि विद्यमानानि सर्वाण्यक्षराणि गतानि ॥ १० ॥

छन्दांस्येवाऽस्यास्तृतीयं त्रिरात्रं वहन्ति ॥ ११ ॥

अस्याः अनुष्टुभः सम्बन्धीनि यानि गायत्रीत्रिष्टुब्जगत्यात्मिकानि छन्दांसि तान्येव तृतीयं त्रिरात्रं वहन्ति निर्वहन्ति । (१)'अनुष्टुप् च वै सप्तदशश्च समभवता'मित्यादिना छन्दसामनुष्टुभः सकाशात् सृष्टिरुक्ता । तैश्च गायत्र्यादिभिश्छन्दोभिर्मीयमानानि सप्तमादीन्यहानि । चतुर्विंशत्यक्षरा हि गायत्री । सप्तममहश्चतुर्विंशस्तोमकम् । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् अष्टममहरष्टाचत्वारिंशस्तोमकम् । अष्टाचत्वारिंशदक्षरा जगती अष्टाचत्वारिंशस्तोमकञ्च नवममहः । अत एतानि छन्दांसि तृतीयं त्रिरात्रं वहन्तीत्युच्यते एतेषाञ्चानुष्टुप्प्रभवत्वात् अनुष्टुबेव व्याप्नोतीति कृत्स्नस्य नवरात्रस्य अनुष्टुप्रूपता । अतो द्वादशाहमनुतिष्ठन्त एतामनुष्टुभमेव विभज्य आसत इति पूर्ववदन्वयः ॥ ११ ॥

अथोक्तं नवरात्रस्याऽनुष्टुभो व्यापने यत्प्रतित्रिरात्रव्याप्तिवैलक्षण्यं तत्प्रशंसति—

तां वा एतां प्रतीचीं तिरश्चीं पराचीमासतेऽन्नाद्याय तस्मात्प्रत्यञ्चं तिर्यञ्चं पराञ्चं प्रजाः पशुमुपजीवन्ति॥१२॥

तां पूर्वोक्तामेतामनुष्टुभं प्रतीचीं प्रतिमुखं अञ्चन्तीं प्रत्यक्षीभूतां

---

१ ता. ब्रा. १०. ३. ४.

प्रथमे त्रिरात्रे प्रयुञ्जते ; तत्र अष्टावेकादश द्वादशेति आनुष्टुभाक्षरसंख्यया भूयस्त्वेनोपलम्भात् । द्वितीये तु त्रिरात्रे तिरश्चीं तिरोऽञ्चतीं अन्तर्धानं प्राप्नुवन्तीं आसते तत्र हि त्रीण्येकाक्षराणि विभज्य प्रत्यहं एकैकमक्षरमानुष्टुभं संयोजितम् । अतोऽक्षरस्याऽल्पीयस्त्वात् तस्यास्तिर्यक्त्वम् । अथ तृतीये त्रिरात्रे पराञ्चीं परावृत्तां परोक्षमेवाऽनुष्टुभमासते; तत्र हि अनुष्टुभः सकाशादुत्पत्तेः । छन्दोभिर्गायत्र्यादिभिः स्तोमसंख्या साम्यमनुष्टुभो व्याप्तिहेतुरिति वर्णितं आत्माभिमुखं तिर्यञ्चं तिरश्चीनं अन्यथावृत्तमुखं पराञ्चं परावृत्तं पारोक्षस्थितञ्चोपजीवन्ति ॥ १२ ॥

अथ छन्दसां व्यूहनप्रकारं विधित्सुराह—

छन्दांसि वा अन्योन्यस्य लोकमभ्यध्यायन् गायत्री त्रिष्टुभस्त्रिष्टुब्जगत्या जगती गायत्र्यास्तानि व्यौहन् यथा लोकं ततो वै तानि यं यं काममकामयन्त तमसन्वन् ॥ १३ ॥

छन्दांसि वै गायत्रीत्रिष्टुब्जगत्यात्मकानि छन्दांसि अन्योन्यस्य लोकं स्थानं अभ्यध्यायन् एतेषां हि क्रमेण प्रातःसवनादीनि सवनानि स्थानतया कल्पन्ते गायत्रं प्रातःसवनं ॥ १३ ॥

यत्कामो व्यूढ़च्छन्दसा द्वादशाहेन यजते सोऽस्मै कामः समृध्यते ॥ १४ ॥

द्वादशाहेन यजते स कामः काम्यमानोऽर्थः अस्मै यजमानाय समृध्यते । एतदुक्तं भवति-द्वादशाहस्तावत् द्विविधः-सत्रात्मकोऽहीनात्मकश्च । पुनरपि प्रत्येकं द्वेधा भवति-समूढो व्यूढश्चेति । यत्रोक्तं व्यूहनं न क्रियते स समूढः, अपरस्तु व्यूढः । स कामप्राप्तिहेतुरिति अस्मिन् ब्राह्मणे प्राधान्येन प्रतिपाद्यत्वात् श्रूयते ॥ १४ ॥

अथैतं द्वादशाहं देवानां स्थानत्वेन स्तौति—

ओको वै देवानां द्वादशाहो यथा वै मनुष्या इमं लोकमाविष्टा एवं देवता द्वादशाहमाविष्टा देवता ह वा एतेन यजते य एवं विद्वान् द्वादशाहेन यजते ॥ १५ ॥

योऽयं द्वादशाहः स देवानामोकः स्थानं वै । तदेवोपपाद्यते-यथा खलु मनुष्या इमं लोकमाविष्टाः एवं देवता द्वादशाहमाविष्टाः । तथा सति

य एवं विद्वान् जानन् द्वादशाहेन यजते स देवतायुक्तेनैव एतेन द्वादशाहेन यजते ॥ १५ ॥

अथैतं गृहत्वेन प्रशंसति—

गृहा वै देवानां द्वादशाहो नाऽगृहताया भय्यम् ॥१६॥

देवानां द्वादशाहो गृहस्थानीय एव, सर्वदा तत्रैव वासात्। अत एवं जानता द्वादशाहेन यष्ट्वा अगृहताया अगृहत्वात् गृहराहित्यात् न भय्यं न भेतव्यं भीतिस्तस्य न जायते, सर्वत्र गृहलाभादित्यर्थः । (१)भय्यप्रवय्ये च छन्दसी"ति बिभेतेर्हेतुभये यत् प्रत्ययो निपात्यते ॥ १६ ॥

एवं द्वादशाहं बहुधा प्रशस्य अथ तस्याऽग्निष्टोमसाध्यतां जानतः फलमाह—

यो वै द्वादशाहमग्निष्टोमेन कल्पमानं वेद कल्पतेऽस्मै प्रातःसवनेनैव प्रथमस्त्रिरात्रः कल्पते माध्यन्दिनेन द्वितीयस्तृतीयसवनेन तृतीयोऽग्निष्टोमसाम्नैव दशममहः कल्पते ॥ १७ ॥

यः खल्वेवं द्वादशाहमग्निष्टोमेन अग्निष्टोमसंस्थेन ज्योतिष्टोमेन कल्पमानं निष्पाद्यमानं वेद जानाति अस्मै जानते यजमानाय अग्निष्टोमस्य यत्प्रातःसवनं तेनैवं द्वादशाहिकस्य दशरात्रस्य प्रथमस्त्रिरात्रः कल्पते कॢप्तो भवति । अग्निष्टोमकेन माध्यन्दिनसवनेनैव दशरात्रस्य द्वितीयस्त्रिरात्रः कल्पते । तृतीयसवनेन तृतीयस्त्रिरात्रस्तस्मिन् तृतीयसवने यदन्तिममग्निष्टोमसाम तेनाऽग्निष्टोमसाम्नैव दशममहरविवाक्याख्यं कल्पते कॢप्तो भवति ॥ १७ ॥

इममुक्तमर्थं वेदितुरपि फलमाह—

कल्पतेऽस्मै य एवं वेद ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमाध्यायस्य पञ्चमः खण्डः ॥

---

१. पा. सू. ६. १. ८३.

अथ षष्ठः खण्डः ॥

द्वादशाहस्य दशरात्रस्य पञ्चभिरध्यायैः स्तोत्रीयाः सामानि च विधास्यन् तत्र पृष्ठ्यषडहे या स्तोत्रीयाः सामानि च तेषामसाङ्कर्य्याय प्रत्यहं विभिन्नानि रूपाणीतः परं षड्भिः खण्डैः प्रदर्श्यन्ते। तत्राऽऽदितस्त्रिभिः स्तोत्रीयाणां रूपाणि, ततस्त्रिभिः साम्नां रूपाणीति विवेकः। एवं प्रदर्शितरूपैरुपेताः स्तोत्रीयाः तद्युक्तानि सामानि चोत्तरत्र विधेयानि। तथोत्तरत्र गायत्र्यः सत्यस्त्रिष्टुभो रूपेण त्रिष्टुभः सत्यो जगत्या रूपेणेत्यादिना छन्दसामपि प्रत्येकमसाधारणरूपवत्त्वं सिद्धवदाम्नायते। अतोऽनेन खण्डेन सहस्तोमछन्दःसाम्नां साधारणानि रूपाणि षड्क्षरसंम्बन्धीन्यभिधीयन्ते। तत्र प्रथमस्याऽह्नस्तदीयस्तोमादेश्च रूपाणि दर्शयति—

एति प्रेत्याशुमद्वीतिमद्वुक्मत्तेजस्वद्युज्जानं प्रथमस्याऽह्नो रूपं त्रिवृतः स्तोमस्य गायत्रस्य छन्दसो रथन्तरस्य साम्नः ॥ १ ॥

आ इति प्र इति एवमेतदुपसर्गद्वयं प्रथमस्य त्रिवृत्स्तोमकस्य प्रायणीयस्याऽह्नो रूपमहरन्तराद्यावर्त्तकम्। अत एव(१) "अग्न आयाहि वीतये"(२) 'आ नो मित्रावरुणा'(३) 'प्र सोमासो विपश्चितः'(४) 'प्र सोमासो मदच्युत' इत्यादिकमुक्तरूपद्वयोपेतं तस्मिन्नहनि प्रयुज्यमानस्य त्रिवृत्स्तोमस्य गायत्रस्य छन्दसो रथन्तरस्य साम्नश्चैतदेव रूपम्। अत एतेषामप्यसाधारणरूपत्वसिद्धिः। एवमाशुमदित्यादावपि योज्यम्। अशू व्याप्तावित्यस्माद्धातोर्निष्पन्न आशुशब्दः। स चाऽस्मिन्नहनि(५) 'अश्वन्न त्वा वाजिन'(६) 'अश्वायन्तो मघवन्निन्द्र वाजिन' इत्यादिषु दृश्यते। तदभिप्रायेणेदमाशुमदिति आशुमत् आशुधातुनिष्पन्नशब्दयुक्तम्।

यद्वा आशुरश्वः अर्थपरोऽयमाशुशब्दः। आशुशब्दार्थयुक्तमित्यर्थः। वीतिमत् वीगत्यादिषु' एतद्धातुनिष्पन्नेन शब्देन युक्तम्। तथा हि-वीतियुक्तं दृश्यते-'अग्न आयाहि वीतये, 'प्रसोम देव

---

१. सा. सं. उ. १. १. ४. १.
२. सा. सं. १. १. ५. १.
३. सा. सं. उ. १. २. १९. १.
४. सा. सं. उ. १. २. २१. १.
५. सा. सं. उ. १. १. १०. १.
६. सा. सं. उ. १. १. ११. २.

वीतये' इति । तथा रुक्मत्, रुचिधातुयुक्तम्, तेजस्वत् तेजःप्रतिपादकशब्दोपेतम् । युञ्जानं युजिधातुयुक्तं एतान्यपि रूपाणि प्रथमेऽहनि विनियुज्यमानासु स्तोत्रीयास्वन्यत्र विद्यमानायां गायत्र्यां द्रष्टव्यानि, अहरादिषु साधारणत्वात् रूपाणाम् । अत एवाऽन्यत्र गायत्र्यां 'दविद्युतत्या रुचे'ति रुचिधातुयोगो दृश्यते । अस्मिंश्चाऽहनि(१) 'अयं सूर्य इवोपदृगि'ति तेजःप्रतिपादकसूर्यशब्दश्रवणात् तदभिप्रायेण तेजस्वदिति रूपम् (२)'ब्रह्माणस्त्वा युजा वयं' (३)"आ त्वा ब्रह्म युजा हरी" इति युजिधातुयोगाश्च दृष्टः । एतदभिप्रायेण तेजस्वदिति रूपं 'ब्रह्माणस्त्वा-युजा वय'मित्युपन्यस्तम् । यद्वा युञ्जानं योजनमेव कुर्वन्ति सम्बन्धो नियोगः लोटो लिटश्च मध्यमपुरुषप्रयोगः । एतावत् प्रथमस्याऽह्नो रूपं त्रिवृदादेश्च ॥ १ ॥

अथ पृष्ठ्यषडहे द्वितीयस्याऽह्नः तदीयस्तोमादीनाञ्च साधारणानि रूपाणि दर्शयति—

वृषवद्वृत्रहवद्रयिमद्विश्ववदुपस्थितं द्वितीयस्याऽह्नो रूपं पञ्चदशस्य स्तोमस्य त्रैष्टुभस्य छन्दसो बृहतः साम्नः ॥२॥

वृषवत् वृषिधातुनिष्पन्नशब्दयुक्तं द्वितीयस्य पार्ष्ठिकस्याऽह्नो रूपं पञ्चदशस्तोमादेश्चैतदेव रूपम् । अत एवास्मिन् द्वितीयेऽहनि(४) । "वृषा पवस्व धारया" (५)"वृषा शोणो" इत्यादिकाः वृषशब्दवत्यः स्तोत्रीया विनियुज्यन्ते । एवमुत्तरेष्वपि रूपेषु योज्यम् । वृत्रहवत् वृत्रहननलिङ्गयुक्तम् । तथा हि तत्र मन्त्रवर्णः-(६)"हन्ति वृत्राणि दाशुषे"(७)"जघ्निर्वृत्रमभित्रिय"मिति । तथा रयिमत् रयिशब्दयुक्तम् । तथा च(८) "रयिं वीरवतीमिष"मिति दृश्यते । तथा विश्ववद्विश्वशब्दोपेतम्, अत एव तत्र दृश्यते(९) "अभि विश्वानि काव्ये"ति । उपस्थितमित्यनेन तिष्ठतिधातुर्निर्दिष्टः, तद्युक्तमपि द्वितीयस्याऽह्नो रूपम्; तथा हि तस्मिन्नहनि दृश्यते (१०)"महिम्ने सोम तस्थिर" इति । यद्वा उपस्थितं प्राप्तं विद्यमानस्यैव कथनं वर्त्तमानकालापदर्शिनो लटः प्रयोग इति यावत् ॥ २ ॥

---

१. सा. सं. उ. १. २. १६. २.
२. सा. सं. उ. १. १. ६. ३.
३. सा. सं. उ. १. १. ६. २.
४. सा. सं. उ. २. १. १०. १.
५. सा. सं. उ. २. १. ११. १.
६. सा. सं. उ. २. १. १३. २.
७. सा. सं. उ. २. १. १५. २.
८. सा. सं. उ. २. १. ५. ३.
९. सा. सं. उ. २. १. १. १.
१०. सा. सं. उ. २. १. १. ३.

अथ तृतीयस्याऽह्नः सप्तदशस्तोमादेश्च रूपाणि दर्शयति—

उद्वत्त्रिवद्विराड्वद्गोमदृषभवत् तृतीयस्याऽह्नो रूपं सप्तदशस्य स्तोमस्य जागतस्य छन्दसो वैरूपस्य साम्नः ॥३॥

उद्वत् उच्छब्दयुक्तं त्रिवृत् त्रित्वसंख्यायोगश्च तृतीयस्य पार्ष्ठिकस्याऽह्नो रूपं तदीयस्य सप्तदशस्तोमादेश्च तदेव रूपम्। अत एव तस्मिन्नहनि(१) 'तिस्रो वाच उदीरते' इति रूपत्रयं दृश्यते। तथा दिक्शब्दवत्त्वञ्चाऽपरं रूपम्। तस्मादेव दिशं विशं हसिति दिक्शब्दयोगो दृश्यते। गोमत् गोशब्दत्वञ्चाऽन्यद्रूपम्(२) 'गावो मिमन्ति धेनव' इति हि तत्र त्यो मन्त्रवर्णः। ऋषभवत् अर्थपरोऽयं निर्देशः ऋषभशब्दार्थवत्त्वप्रपरं रूपम्। "(३)इन्द्र स्वर्दृशे ववंसग" इति तत्र दृश्यते। यद्वा शोभनशब्दो ववंसगः ववनीयगामी वृषभ इव इन्द्रः कदाऽस्मद्यङ्गं प्राप्नोतीति ॥ ३ ॥

अथ चतुर्थस्याऽह्नः एकविंशस्तोमादेश्च रूपाणि दर्शयति—

राजन्वज्जनवद्वत्सूर्य्यवद्विराडनुतोदवच्चतुर्थस्याऽह्नो रूपमेकविंशस्य स्तोमस्याऽऽनुष्टुभस्य छन्दसोराजस्य वै साम्नः ॥ ४ ॥

राजन्वत् राजन्शब्द युक्तं, यद्वा राजतिधातुयुक्तं एवमादिकं चतुर्थस्य पार्ष्ठिकस्याऽह्नोऽसाधारणं रूपं एकविंशस्तोमादेश्च एतदेव रूपम्। तथा हि मन्त्रवर्णे दृश्यते(४)–"राजानावनभिद्रुहा"(५) "पवमानो अजीजन" इत्यादौ। तथा सूर्य्यवत् सूर्य्यशब्दयोगोऽप्यन्यद्रूपम्(६) 'उषाः सूर्य्यो न रश्मिभि"रिति' हि तत्र मन्त्रवर्णः। तथा विराट्छन्दसो ऽनुतोदवत् अनुतोदयुक्तं अन्यद्रूपम्, तत्र हि(७)"पिबा सोममिन्द्रमन्दतु त्वे"त्यादिका विराट्मत्स्वाहावोजीयाउसहो हाउ वलं हाविन्द्रोहाउवयो हाउ बृहतं हाउ स्वार्हाउ ज्योतिर्हाउ दा ३ ध इत्यादिभस्तोमः प्रतिपादमनुतोद्यतेऽवधीयते। यद्वा अनुतोदोऽभ्यासः स च चतुर्थेऽहनि विहिते महावैराजसामादौ दृश्यते। तथा हि 'पिबा सोममिन्द्र मन्दतु त्वे'त्यादिकं त्रिरभ्यस्यते ॥ ४ ॥

अथ पञ्चमस्याऽह्नस्त्रिणवस्तोमादेश्च रूपाणि दर्शयति—

चित्रवच्छुशुमत् पङ्क्तिः शाक्करी द्व्यक्षरा गो-

१, २. सा. सं. २. २. १४. १.
३. सा. सं. उ. २. २. १२. २
४, सा सं. उ. ३. १. ७. २.
५. सा सं. ३. १. २. १,
६. सा सं ३. १. ३. ५.
७. सा सं. पू. ५. १. १. ८.

मदृषभवद्वज्र्यभिमत्पञ्चमस्याऽह्नो रूपं त्रिणवस्य स्तोमस्य पाङ्क्तस्य छन्दसः शाक्करीणाꣳसाम्नः ॥ ५ ॥

चित्रवत् चित्रशब्दयुक्तं शिशुमत् शिशुशब्दयुक्तं एतदादिकं पञ्चमस्याऽह्नो रूपं त्रिणवस्तोमादेश्चैतदेव रूपं शाक्वर्य्य इति एकस्यैव "विदा-मघवन्नि"त्यस्यां गीयमानस्य साम्नः संज्ञा। स्त्रीत्वं बहुत्वापेक्षया शाक्वर्य्याश्रयस्य साम्न इत्यर्थः। तथा पङ्क्तिछन्दोऽप्यस्याऽह्नो रूपम् अत एव(१)"इन्द्रो मदाय वावृध" इत्यादिका पङ्क्तिर्दृश्यते। सप्तपदा शाक्वरी। सा च विदा-मघवन्नित्यादिका पञ्चमेऽहनि विधित्सिता। तथा ह्यूनाक्षरा द्वाभ्यामक्षराभ्यां न्यूनाऽप्यन्या ऋगस्याऽह्नो रूपम्। गोमत् गोशब्दयुक्तं ऋषभवत् ऋभशब्दयुक्तम्।(२)अनूपे गोमान् गोभिरक्षा "इत्यादिकमपि पञ्चमस्याऽह्नो रूपं तथा वज्रवत् वज्रयुक्तं अभिमत् अभिशब्दयुक्तं(३) वज्रं हिन्वन्ति सायकं (४)"अभि व्रतानि पवते पुनान" इति हि तत्रत्यौ मन्त्रवर्णौ। एतावत्सर्वं पञ्चमस्याऽह्नस्त्रिणवस्तोमादेश्च रूपम् ॥ ५ ॥

अथ षष्ठस्याऽह्नस्त्रयस्त्रिꣳशस्तोमादेश्चाऽसाधारणानि रूपाण्याह—

परिवत्प्रतिवत्सप्तपदा द्विपदा विनाराशꣳसा गोमदृषभवत् षष्ठस्याऽह्नो रूपं त्रयस्त्रिꣳशस्य स्तोमस्य सर्वेषां छन्दसां रूपं रेवतीनां साम्नः ॥ ६ ॥

परिवत् परिशब्दयुक्तं प्रतिवत् प्रतीत्यनेन युक्तञ्च षष्ठस्याऽह्नोऽहरन्तराद्यावर्त्तकं रूपं अत एवैतदुभयं तस्मिन्नहनि दृश्यते(५) "भिन्धि विश्वा अप द्विषः परिबाधैः" इति(६) "प्रति वां सूर उदिते" इति प्रतिशब्दस्य त्रयस्त्रिꣳशस्तोमस्य तस्मिन्नहनि प्रयुज्यमानस्य तथा सर्वेषां गायत्र्यादीनां छन्दसां तथा रेवतीनां(७) "रेवतीर्नः सधमाद" इति अस्यामुत्पन्नं साम रेवत्यः। "आपो वो रेवत्य" इति श्रुतेः अप्त्वेन संस्तुतत्वात् अप्शब्दवदस्यापि स्त्रीत्वं बहुत्वञ्च, रेवत्याख्यस्य साम्नोऽप्येतदेव रूपम्। एवमुत्तरेष्वपि योजना। सप्तपदा सप्तभिः पदैरुपेता। "सप्त पदया यजती"ति ब्राह्मणे विशेषदर्शनात्। होत्रा साम्ना योज्येत्यवगच्छति(८) "वृषन्निन्द्र वृषपाणास इन्दवः" सुष्टुमायातमद्रिभिः अयं जायत

---

१. सा. सं. ३. २. १४. १. २. सा. सं. ३. २. १२. २.
३. सा. सं. ३. २. १५. २. ४. सा सं उ. ३, २. २०. ३.
५. सा. सं. उ. ४. १. ९. १. ६. सा. सं. उ. ४. १. ८. १.
७. सा. सं. उ. ४. १. १४. १.
८. ऋ. सं. २. २. ४. १. इयं पादसप्तकविशिष्टा ऋग्वेदे पठिता।

धनुषोधारीत्यादिकाः सप्तपदाश्चाऽत्र विनियुज्यन्ते। द्विपदा पादद्वयात्मिका(१)अग्ने त्वं नो अन्तमः, (२)इमा नु कं भुवना सीषधेमे"त्यादिका विनाराशंसाः, नराः शस्यन्ते अनयेति नाराशंसा स्तुतिः तद्वाहिता ऋक् अस्याह्नो रूपम्, तथा गोमत् गोशब्दयुक्तं ऋषभवत् ऋषभशब्दयुक्तञ्च(३)'गोभिरञ्जानो अर्षसि' (४)सुदुघामिव गोदुह" इत्यादिकम्॥६॥

अथोक्तानां षडहसम्बन्धिनां रूपाणां नानात्वं स्तौति—

यस्मादेषा समाना सती षडहविभक्तिर्नानारूपा तस्माद्विरूपः संवत्सरः॥ ७॥

यस्मादेषोक्ता षडहविभक्तिः षडहस्य विभक्तिर्विभागः समाना सती षडहविभक्तित्वेन सदृशी भवत्यपि नानारूपा उक्तप्रकारेण परस्परं विभिन्नरूपा तस्मात् संवत्सरो विरूपो विभिन्नरूपः उक्तप्रकरेण विलक्षणान्यहानि षड्ऋतुस्थानीयानि। अतो वसन्तादीनां परस्परं विभिन्नधर्मत्वात् उक्तं संवत्सरस्य विरूपत्वम्॥ ७॥

एतद्वेदनं प्रशंसति—

विरूपमेनमनुप्रजायते य एवं वेद॥ ८॥

एनं वेदितारमनु पश्चात् विरूपं विविधरूपमपत्यादि प्रजायते उत्पद्यते य एवमुक्तां विलक्षणां षडहविभक्तिं वेद जानीयात्॥ ८॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमाध्यायस्य षष्ठः खण्डः॥

अथ सप्तमः खण्डः॥

अथाऽस्मिन्नेव पृष्ठ्ये षडहे अग्निविभक्तिवैचित्र्यं प्रदर्य स्तौति—

अग्न इति प्रथमस्याऽह्नो रूपमग्निविभक्तेरग्निमिति द्वितीयस्याऽग्निनेति तृतीयस्याऽग्निरिति चतुर्थस्य॥ १॥

अग्निविभक्तेः अग्निशब्दस्य या विभक्तयस्तासां मध्ये अग्न इति सम्बुध्यन्तं प्रथमस्याऽह्नो रूपम्। (५)'अग्न आयाहि वीतये'इति हि तस्मिन्नहनि इष्यते। अग्निमिति द्वितीया विभक्तिः द्वितीयस्याऽह्नो रूपम्(६)"अग्निं दूतं वृणीमह" इति तत्र मन्त्रवर्णः। अग्निनेति तृतीया तृतीयस्याह्नो रूपम्

१. सा. सं. उ. ४. १. २२. १. २. सा. सं. उ. ४. १. २३. १.
३. सा. सं. उ. ४. १, २. २. ४. सा सं. उ. ४. १. १५. १.
५. सा. सं. उ. १. २. १६. २. ६. सा. सं. उ. २. १. ६. १.

अत एव तत्राऽपि (१)"अग्निनाऽग्निः समिध्यत" इति दृश्यते। अग्निरिति प्रथमैव चतुर्थस्याऽह्नो रूपम्। (२)"जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः" इति तत्र दर्शनात् ॥ ९ ॥

अथ पञ्चमस्याऽह्नोऽसाधारणाग्निविभक्तिं विवक्षुराह—

देवा वै श्रियमैच्छंस्तान्न प्रथमेऽहन्यविन्दन्न द्वितीये न तृतीये ताश्चतुर्थेऽहन्यविन्दन् विन्दते श्रियं य एवं वेदाऽग्नेरिति पञ्चमस्य तेनो श्रीः प्रत्युपोदितेत्याहुः॥२॥

देवाः खलु पुरा श्रियं सम्पदं ऐच्छन्। तदर्थं द्वादशाऽहमन्वतिष्ठन्। तत्र च तां श्रियं प्रथमेऽहनि नाऽविन्दन् नाऽलभन्त। तथा द्वितीये चाऽहनि नाऽविन्दन्। तृतीये चाऽहनि नाऽविन्दन्। एवं प्रथमे त्रिरात्रे अलब्धा तां चतुर्थेऽहन्यविन्दन्। एवमुक्तश्रियो लाभं यो वेद असौ श्रियं सम्पदं विन्दते लभते। एवं चतुर्थेनाऽह्ना श्रियः प्राप्तौ सत्यां अग्नेः इति विभक्तिः पञ्चमस्याऽह्नो भवतीति यत् तेनो तेनैव सा प्राप्ता श्रीः प्रत्युपोदिता प्रत्याख्यातेत्याहुर्ब्रह्मवादिनः। (३)"तव श्रियो वर्षस्येव विद्युतोऽग्नेश्चिकित्व" इति हि पञ्चमेऽहनि दृश्यते। तत्र चाग्नेः इति सम्बन्धः प्रतीयते। तस्मात् सम्बन्धः प्रत्याख्यात इति तेषां ब्रह्मवादिनामभिप्रायः ॥ २ ॥

एतद्वेदनस्य फलमाह—

अप्रतिवाद्येनं भ्रातृव्यो भवति य एवं वेद ॥ ३ ॥

एवमुक्तं प्रतिवचनं यो वेद भ्रातृव्यः शत्रुः एनमप्रतिवादी भवति अनेनोक्तं प्रतिवक्तुं न शक्नोति ॥ ३ ॥

आरम्भावसानयोः सारूप्यार्थं तमेव सम्बुद्ध्य षष्ठस्याऽह्नो रूपमित्याह—

अग्न ईति षष्ठस्य येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति ॥४॥

(४)'अग्ने सख्ये मा रिषामा वयं तवे'ति षष्ठेऽहनि दर्शनात् अग्न इत्येतदेव षष्ठस्याऽह्नो रूपम्। तथा च येनैव रूपेण प्रयन्ति षडहं प्रारभन्ते तेनैव रूपमभिलक्ष्य तेनैव रूपेणोद्यन्ति षडहं समापयन्ति ॥ ४ ॥

उक्तविभक्तिनानात्वं प्रशंसति—

यस्मादेषा समाना सत्यग्निविभक्तिर्नानारूपा तस्मा-

---

१. सा. सं. ब्र. २. २. ५. १. २. सा. सं. ३. ३. १. ६. १.
३. सा. सं. उ. ३. २. ७. १. ४. सा. सं. उ. ३. १. ६. १.

यथर्त्वादित्यस्तपति ॥ ५ ॥

एषोक्ताऽग्निविभक्तिः समाना अग्निविभक्तित्वेन सरूपा सती यस्मा-न्नानारूपा सम्बुद्ध्यादिविभक्तिभेदेन परस्परं विलक्षणाकारा तस्मा-द्धेतोर्यथर्तु ऋतावृतौ वसन्तादिके आदित्यो नानारूपः सन् तपति सर्वं जगद्भासयति ॥ ५ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमाध्यायस्य सप्तमः खण्डः ॥

अथाऽष्टमः खण्डः ॥

अथाऽस्मिन् षड्हे विभक्तेर्नानात्वं प्रदर्श्य स्तौति—

इन्द्रेति प्रथमस्याऽह्नो रूपमिन्द्रविभक्तेरिन्द्रमिति द्वितीयस्येन्द्रेणेति तृतीयस्येन्द्र इति चतुर्थस्येन्द्रादिति पञ्चमस्येन्द्रेति षष्ठस्य येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति यस्मादेषा समाना सतीन्द्रविभक्तिर्नानारूपा तस्माद्यथर्त्वोषधयः पच्यन्ते ॥ १ ॥

इन्द्रविभक्तेः इन्द्रशब्दस्य विभक्तीनां मध्ये इन्द्रेति सम्बुध्यन्तं प्रथमस्याऽह्नो रूपम्। तथाच तत्रत्यो मन्त्रवर्णः—(१)"आ याहि सुषमा हि त इन्द्र सोम"मिति। इन्द्रमिति द्वितीया विभक्तिर्द्वितीयस्याऽह्नो रूपम्। (२)"इन्द्रमिद्गाथिनो बृह"दिति हि तत्र दृश्यते। इन्द्रेणेति तृतीयस्य (३)"इन्द्रेण सं हि दृक्षस" इति तत्र दर्शनात्। इन्द्र इति प्रथमान्तं चतुर्थस्य। "(४)इन्द्रो दधीचो अस्थभि"रिति हि तत्र मन्त्रो दृश्यते। इन्द्रादिति पञ्चमस्य, (५)"इन्द्रात्परितन्वं मम" इति तत्रत्यान्मन्त्रवर्णात्। इन्द्रेति सम्बुध्यन्तमेव षष्ठस्य (६)"यद्वीडाविन्द्र यत्स्थिरं"इति हि तत्र दृश्यते शिष्टं सिद्धप्रायम् ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमाध्यायस्याऽष्टमः खण्डः ॥

---

१. सा. सं. उ. १. १. ६. १. २. सा. सं. उ, २. १. ८. १.
३. सा. सं. उ. २. २, ७. १. ४. सा. सं. उ. ३. १. ८. १.
५. सा. सं. ५. १. ९. ३. ६. सा. सं. उ. ४. १. ९. ३.

अथ नवमः खण्डः ॥

इत्थं स्तोत्रीयागतानि रूपाणि दर्शयित्वा साम्नामपि पृष्ठषडहे विधास्यमानानां रूपाणीत उत्तरं त्रिभिः खण्डैः प्रदर्श्यन्ते । तत्र प्रथमं स्वराश्रयाणि रूपाणि षडहस्य दर्शयति—

यदृचा प्रस्तौति तत्प्रथमस्याऽह्नो रूपं स्वरविभक्तेर्यत्पुरस्तात् स्तोभं तद्द्वितीयस्य यदुभयतः स्तोभं तत् तृतीयस्य यदनुतुन्नं तच्चतुर्थस्य यदभ्यारब्धं तत्पञ्चमस्य यदिहकारेणाऽभ्यस्तं तत् षष्ठस्याऽह्नो रूपम् ॥ १ ॥

स्वरविभक्तेः स्वराणां विभक्तयो विभज्यमाना एकदेशाः स्वरविभक्तयः, जातावेकवचनम्, स्वरविभक्तीनां मध्ये ऋचा स्तोभादिवर्जितया केवलयैवर्चा प्रस्तोता साम प्रस्तौतीतियत् तत् प्रथमस्याऽह्नो रूपम् । तथाहि—प्रथमेऽहनि माध्यंदिनसवने विधास्यमानानि आश्वं सोमसाम औशनादीनि ऋचैव प्रस्तूयन्ते । यत् पुरस्तात् ऋक्प्रारम्भात् पूर्वमेव स्तोभयुक्तं साम तत् द्वितीयस्याऽह्नो रूपं तथैव तस्मिन्नहनि यौक्ताश्वं, आयास्यं वासिष्ठ बृहदित्येवमादीनि सामानि पुरस्तात् स्तोभान्येव विधास्यन्ते । यदुभयतःस्तोभं पादस्याद्यन्तयोः स्तोभयुक्तं साम तत् तृतीयस्याऽह्नो रूपम् । हाउ अभिसोमास आयवो हाउ इत्यादिकमुभयतः स्तोभं गौतमस्य तत्र विधानात् यत् अनुतुन्नं अनुपादः स्तोभैस्तुद्यमानं साम तच्चतुर्थस्याऽह्नो रूपम् । स्वराडनुतोदवाथत्यत्रैव एतत्साम प्रदर्शितम् । यत्सामाऽभ्यारब्धं अभि उपर्य्यधः एकस्या ऋच उपर्य्यभ्यारब्धव्यं भवति तत् पञ्चमस्याऽह्नो रूपम् सर्वाण्यपि सामानि एकैकस्यामृचि समाप्यन्ते, शाक्करसाम तु त्रिसृष्वृक्षु समाप्यत इत्यभिप्रायेण अभ्यारब्धव्यमित्युक्तम् । एवं तिस्रः तिस्र एकैका स्तोत्रीयेति पञ्चमेऽह्नि पृष्ठस्तोत्रम् । तथा चाऽश्वलायनसूत्रम्—नव प्रकृत्या तिस्रो भवन्तीति । यत्साम इहकारेणाऽभ्यस्तं पुनः पुनरिहकारेण इहशब्दोच्चारणेन स्तोभयुक्तेन दीदिहीत्तेति नवभिर्ऋग्भिः स्तोत्रीयास्तृचो निष्पद्यन्ते भद्रं दीतिश्रौषं इत्यादिकं तत् षष्ठस्याऽह्नो रूपमुक्तम् ॥ १ ॥

स्वरविभक्तेर्नानात्वं प्रशंसति—

स्वराणां यस्मादेषां समाना सती स्वरविभक्तिर्नानारूपा तस्माद्यथर्त्तु वायुः पवते ॥ २ ॥

स्वराणां मध्ये यैषा स्वरविभक्तिरुक्ता सा समाना सती सामावयत्वेन सदृशी भवन्ती यस्मान्नानारूपा उक्तप्रकारेण प्रत्यहं विभिन्नरूपा तस्माद्यथर्तु ऋतावृतौ वीप्सालक्षणेऽर्थे यथाशब्दस्याऽव्ययीभावः प्रत्यृतु वायुर्नानाकारः पवते गच्छति ॥ २ ॥

इति ताण्डमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमाध्यायस्य नवमः खण्डः ॥

अथ दशमः खण्डः ॥

अथ तस्मिन् षडहे निधनविभक्तेर्नानात्वं प्रदर्श्य स्तौति—

पदानिधनं प्रथमस्याऽह्नो रूपं निधनविभक्तेर्बहिर्निधनं द्वितीयस्य निर्ऽनिधनं तृतीयस्येनिधनश्चतुर्थस्याऽथकारणिधनं पञ्चमस्य यदिहकारेणाभ्यस्तं तत् षष्ठस्याऽह्नो रूपं निधनानां यस्मादेषा समाना सती निधनविभक्तिर्नानारूपा तस्मादिमे लोकाः सह सन्तो नानैव ॥ १ ॥

निधनानि तावत् द्विविधानि-अन्तर्निधनानि बहिर्निधनानि च। (१)"इहकार इडाथकारौ गीतश्च निधनस्वरं हीषीस्वरश्च ह्यक्षरं देवताश्चारण्ये गेयेषु तान्यन्तस्सामनिधनानी"त्यादिना सूत्रकारेण अन्तनिधनान्युक्तानि। सर्वत्र तावच्चत्वार एव सामान्ताः स्वरो निधनमिडावागित्यादिना बहिर्निधनान्यपि सूत्र एवोक्तानि। तदुभयमत्राऽनुसन्धातव्यम्। अयमर्थः-निधनविभक्तीनां मध्ये पदनिधनं पादे पादे क्रियमाणेन निधनेन युक्तं साम प्रथमस्याऽह्नो रूपम्। तथा यौधाजयं बहिर्निधनं ऋगक्षराद्बहिर्भूतं निधनं यस्य तत् द्वितीयस्याऽह्नो रूपम्। तथा यौक्ताश्ववादिकं दिश इति निधनं यस्य तद्दिङ्निधनं तृतीयस्याह्नो रूपम्। तथा क्षुल्लकवैष्टम्भमहावैष्टम्भं ई इति निधनं यस्य तदीनिधनं चतुर्थस्याह्नो रूपम्। तथा महावात्सप्रमहावैराजे अथकारः अथेति शब्दो निधनं यस्य तदथकारणिधनं पञ्चमस्याह्नो रूपम्। इहकार इडाथकारौ गीतश्च निधनस्वरमित्यादिना सूत्रकृता अथकारस्यान्तर्णिधनत्वमुक्तम्। तच्च शाक्वरे साम्नि दृश्यते ईन्द्रा ग्नूम्नायना १ इषा इत्यादि। तथा इडा इहा यत् साम भद्रं दीदिहा श्रौषादिकं इह कारणिधनेनाऽभ्यस्तं तत् षष्ठस्याऽह्नो रूपं नाना

१. लाट्या. श्रौ. ७. ८. ५.

सम्बन्धिनी एषा निधनविभक्तिः समाना सती यस्मादुक्तप्रकारेण नानारूपा तस्मात् भूरादयस्त्रयो लोकाः सहसन्त एकरूपाः सन्तोऽपि नानैव नानारूपा एव भवन्ति ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमाध्यायस्य दशमः खण्डः ॥

अथैकादशः खण्डः ॥

अथेडाविभक्तेर्नानात्वं प्रदर्श्य स्तौति—

द्रवदिडं प्रथमस्याऽह्नो रूपमिडाविभक्तेरूर्द्धेडं द्वितीयस्य परिष्टुब्धेडं तृतीयस्येडाभिरैडं चतुर्थस्याऽध्यर्द्धेडं पञ्चमस्य यदिहकारेणाऽभ्यस्तं तत् षष्ठस्याऽह्नो रूपमिडानां यस्मादेषा समाना सतीडाविभक्तिर्नानारूपा तस्मात्समानाः सन्तः पशवो नानारूपाः ॥ १ ॥

इडाविभक्तेः इडाविभक्तीनां इडाप्रभेदानां मध्ये द्रवदिति हि क्षिप्रनाम द्रवन्तीडा यस्य तद्द्रवदिडं कालेयगौतमादिकं तत्प्रथमस्याऽह्नो रूपं इडाभिरैडाभिशब्देन युक्ता इडा यस्य पृश्निसामादेः तत्तथोक्तं इडा २३ भा ३४३ तुं २३४५ इ डा भा २३४५ ई इति ऊर्ध्वेडा यस्येति तत् । माधुच्छन्दसादेः तत् द्वितीयस्याऽह्नो रूपम्(१) । अर्धमधिकंयस्याः सा अध्यर्द्धा अध्यर्द्धा इट् इडेत्येवं रूपा यस्य वार्षवाम्रादेः तदध्यर्द्धेडं पञ्चमस्याऽह्नो रूपं, यद्यपि वार्षवाम्रादेरध्यर्द्धरूपा ऊ३२३पा एवाऽध्ययने दृश्यते तथापि सूत्रकारेण (२)"उपा स्थानेष्वन्यानि निधानी"त्यपक्रम्य इडा परिष्टुब्धा इडा यस्य संज्ञैरवभृथाच्छावाकसाम भवतीत्यादेः तद्गौरवादिपरिष्टुब्धेडं तत्र हिउप ३ होवा हो ५ इडा २३ भा २४३ पो २३४५ इ डा इति हि तत्र दृश्यतेऽनादेश इत्यादिना अध्यर्द्धत्वमध्यर्द्धोपानामित्येतेन अध्यर्द्धोपास्थाने इट् इडत्येवं रूपा अध्यर्द्धेडा प्रयोगकाले प्रयोज्येत्युक्तत्वात् वार्षवाम्रयोरप्यध्यर्द्धेडत्वम् यत्साम इहकारेणाऽभ्यस्तं आवर्त्तमानिहकारयुक्तं वारवन्तीयादिकं तत् षष्ठस्याऽह्नोरूपं इडानां सम्बन्धिन्येषा उदाहृतेडाविभक्तिः समाना

---

१. अत्र पतितमनुमीयते । २. लाट्या. श्रौ. ७. १. १०

सदृशी सत्यपि यस्मान्नानारूपा द्रव्यदुर्द्धतादिभेदेन विभिन्नाकारा तस्मात् पशवः समानाकृतयः सन्तोऽपि नानारूपाः ॥ १ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
दशमस्याध्यायस्यैकादशः खण्डः ॥

अथ द्वादशः खण्डः ॥

अथाऽस्य षडहस्य प्रत्यहं विशिष्टफलहेतुतां ब्रह्मवादिनां प्रश्नप्रत्युक्तिभ्यां दर्शयति—

भरद्वाजायना वै सत्रमासत तानपृच्छन् किं प्रथमेनाऽह्ना कुरुतेति प्रैवैमेति किं द्वितीयेनेत्यवसमेवाऽकुर्म्महीति किं तृतीयेनेति पर्य्येवाप्सवामहीति किं चतुर्थेनेति सतैव सदप्यदध्मेति किं पञ्चमेनेति प्राणानेव विच्छिन्दन्त एमेति किमुषष्ठेनेतीदमेवाऽगच्छामेति इति ॥१॥

भारद्वाजायनाः भरद्वाजगोत्राः खलु पुरा ऋषयः सत्रं सत्रात्मकमेतं द्वादशाहमासत अन्वतिष्ठन् । सत्रमासीनान् यजमानान् अन्ये तु ब्रह्मवादिनोऽपृच्छन्–हे ऋषयो यूयं प्रथमेन पार्ष्ठिकेनाऽह्ना तु किं कुरुत किं फलं प्राप्नुथेति । तान् प्रत्येवमब्रुवन्–प्र एवैमेति पदच्छेदः एतेर्लेटि लङि रूपमेतत् प्रैवैमैव यज्ञस्य प्रायणमेव केवलमकार्ष्मेति । अथ द्वितीयेनाऽह्ना किं कुरुतेति पुनस्ते ब्रह्मवादिनोऽपृच्छन् अवसं अन्नमेव कुर्म्महि निष्पादितवन्तो वयमिति प्रत्यवोचन्त । अथ तृतीयेनाऽह्ना किं कुरुतेति ब्रह्मवादिभिः पृष्टे तस्येदमुत्तरम्–परि सर्वत एवाऽप्सवामहि प्राप्नुवन्तः स्म इति । पुनश्चतुर्थेनाऽह्ना किं कुरुतेति ब्रह्मवादिनां प्रश्नः । तस्येदमुत्तरं सतैव विद्यमानेन निष्पन्नेन एते सुपांसुलुगिति तृतीयाया आकारः अन्वादेशः विषयादेतादेशः एतेन चतुर्थेनाऽह्ना सत् विद्यमानं सर्वं फलमध्यदध्म अपिहितवन्तः स्थापितवन्तः प्राप्तवन्तो वयमिति । पञ्चमेनाऽह्ना किं कुरुतेति ब्रह्मवादिभिः पृष्टे सत्येतान् विद्विषां प्राणानेव विच्छिन्दन्तः वियोजयन्तः एतान् प्राणानेव प्राप्ताः स्म इति प्रत्यब्रुवन् । अथ षष्ठेनाऽह्ना किं कुरुतेति ब्रह्मवादिभिः पुनः पृष्टे तस्येदमुत्तरम्–इदमेव स्थानं इहलोकावस्थानमेव प्राप्तवन्तः स्म इति ॥ १ ॥

अथ यदृचा प्रस्तौतीत्यादिना यैषा स्वरविभक्तिः पूर्वं प्रदर्शिता तत्रैकैकमनूद्य स्तौति—

यस्य पदेन प्रस्तौत्यथ स्वारमभि वाव तेन देवाः पशूनपश्यन् यत् पुरस्तात् स्तोभमथ स्वारमुदेव तेनासृजन्त यदुभयतःस्तोभमथ स्वारमेभ्य एव तेन लोकेभ्यो देवाः पशुभ्योऽन्नाद्यं प्रायच्छन् यदनुतुन्नमथ स्वारमुपैव तेनाशिक्षन्यस्य मध्ये निधनमथ स्वारं गर्भाँस्तेनादधत तानि हवतास्वारेण प्राजनयन् ॥ २ ॥

यस्य प्रथमेऽहनि विहितस्य साम्नः पदेन ऋचः पादेनैव स्तोभरहितेन प्रस्तौति प्रस्तोता प्रस्तावभागं ब्रूयात् अथाऽनन्तरं स्वारं स्वर्य्यमाणं स्वरिति विशिष्टं उद्गीथभागञ्चोद्गाता ब्रवीति तेन साम्नास्तूयमाना देवाः पशुनेवाऽभ्यपश्यन् यजमानाय दातुमभ्यजानन् यत् पुरस्तात्स्तोभं ऋचः पुरस्तात् क्रियमाणेन स्तोभेन युक्तं अथानन्तरं स्वारं स्वर्य्यमाणं द्वितीयेऽहनि विनियोज्यं साम तेन स्तुता देवा उदसृजन्तैव पूर्वदृष्टान् पशून् यजमानैः प्राप्तुं व्यमुञ्चन् प्रायच्छन्नित्यर्थः यदुभयतःस्तोभं आद्यन्तयोः स्तोभं आद्यन्तयोः स्तोभयुक्तं अथानन्तरं स्वर्य्यमणि स्वारं तृतीयेऽहनि विनियोज्यं साम तेन साम्ना स्तुताः देवा एभ्य एव भूरादिभ्यो लोकेभ्य एव दृष्टेभ्यः पशुभ्यः सकाशादन्नाद्यं क्षीरादिकं अदनीयमन्नं प्रायच्छन् प्रकर्षेण दत्तवन्तः यदनुतुन्नं प्रथमं अनुतोदवत् अथाऽनन्तरं स्वारं स्वरितयुक्तं चतुर्थेऽहनि विनियोज्यं साम। तेन स्तुता उपैवाशिशिक्षन् शिक्षयितुमैच्छन् यजमानान् शक्तान् कर्त्तुमैच्छन्नित्यर्थः। शिक्षतेः(१) 'सनि मीमाघुरभलभशकपेत्यादिना सन् प्रत्यये परतः(२) "अत्र लोपोऽभ्यासस्ये"त्यभ्यासलोपः। यद्वा शिक्ष इति दानकर्म्मा यजमानैर्यद्यत्प्रार्थितं तत्तत् प्राप्नुयुरित्यर्थः। यस्य साम्नो मध्ये निधनं इड़ा अथेत्यादिकं अथानन्तरं स्वारं स्वरितयुक्तं तेन साम्ना स्तूयमाना देवाः गर्भान् दधन् प्रजासु गर्भाणां निक्षेपणमकार्षुः हवताइ हवताइ हाइहकारवता स्वारेण स्वर्य्यमाणेन साम्ना तान् पूर्वमाहितान् गर्भान् प्राजनयन् प्रकर्षेण उदपादयान् ॥ २ ॥

पदनिधनं प्रथमस्येत्यादिना येषां निधनविभक्तिरुक्तास्तानवयुत्य

---

१. पा. सू. ७. ४. ५४. २. पा सू ७. ४. ५८.

स्तौति—

इमं वाव देवा लोकं पदनिधनेनाऽभ्यजयन्नमुं बहिर्णिधनेनान्तरिक्षं दिङ्निधनेनाऽमृतत्वमीनिधनेनागच्छन् ब्रह्मवर्चसमथनिधनेनाऽवारुन्धताऽस्मिन्नेव लोक इहनिधनेन प्रत्यतिष्ठन् ॥ ३ ॥

देवाः खलुः पुरा इममेव भूर्लोकं पदनिधनेन क्रियमाणेन निधनेन तद्वता साम्ना अभ्यजयन् अमुं स्वर्गलोकं बहिर्णिधनेन ऋगक्षराद्बहिर्भूतनिधनयुक्तेन साम्नाऽभ्यजयन्। अथ दिङ्निधनेनाऽगच्छन् प्राप्नुवन् दिश इति निधनवता साम्ना अन्तरिक्षमभ्यजयन्। तथा अमृतत्वं कदाचिदपि मरणराहित्यं ईनिधनेन ईकारनिधनेन साम्ना आगच्छन् प्राप्नुवन् अथनिधनेन अथकारणिधनेन साम्ना ब्रह्मवर्चसं ब्राह्मं तेजः अवारुन्धत प्राप्नुवन्। तथा इहनिधनेन इहकारनिधनेन साम्ना अस्मिन्नेव भूर्लोके प्रत्यतिष्ठन् चिरकालावस्थायिनोऽभूवन ॥ ३ ॥

अथ द्रवदिडं प्रथमस्याऽङ्गो रूपमित्यादिना यैषा इडा विभक्तिर्नानारूपोक्ता तामवयुत्याऽनुवादेन स्तौति—

इमं वाव देवा लोकं द्रवदिडेनाऽभ्यजयन्नमुमूर्ध्वेडेनान्तरिक्षं परिष्टुग्घेडेन प्रतिष्ठामिडाभिरैडेनाऽवारुन्धत प्रतिष्ठाया ऽध्यर्द्धेडेन व्यजयन्ताऽस्मिन्नेव लोक इहेडेन प्रत्यतिष्ठन् ॥ ४ ॥

इममेव भूर्लोकं देवाः पुरा द्रवदिडेन हो इडा इति युक्तेन साम्नाऽभ्यजयन्। ऊर्ध्वेडेन अमुं द्युलोकमभ्यजयन्। परिष्टुग्घेडेन परितः स्तोमयुक्तेडाशब्दोपेतेन साम्ना अन्तरिक्षलोकमभ्यजयन्। इडाभिरैडेन साम्ना प्रतिष्ठां प्रतिष्ठानं अवारुन्धत प्राप्नुवन्। प्रतिष्ठाय च अध्यर्द्धेडेन अर्द्धाधिकयेडया युक्तेन साम्ना अजयन्त ऊर्ध्वमभ्यजयन्त अभितो जयन्त अभितो जयं प्राप्नुवन् अस्मिन्नेव भूर्लोके इहेडेन इहकारयुक्तषडहोपेतेन साम्ना प्रत्यतिष्ठन् प्रतिष्ठिता अभवन् ॥ ४ ॥

अथैतामिडाविभक्तिं प्रकारान्तरेण स्तोष्यन् वाङ्निधनात् इडा निधस्याऽतिशयं दर्शयति—

न वाक् संवत्सरमतिवदतीडैव संवत्सरमतिवदति गर्भेण संवत्सरे पर्य्यावृत्य प्रजायेते तेनाऽतिवदति ॥५॥

वाक् वाड्निधनं संवत्सरं द्वादशमासात्मकं कालविशेषं नातिवदति अतिक्रम्य न वदति। किन्तु ततः पूर्वमेव वदति जननादूर्ध्वं पञ्चसु मासेषु हि बालानां जल्पितं भवति। इडैव इडानिधनमेव तु संवत्सरमतिवदति। एतदेव विव्रियते गर्भेणेति इडेति गोनामसु पाठात्(१) 'पशवो वा इडे'ति श्रुतेश्च इडाशब्देन पशुरेवोच्यते। स च गर्भेण गर्भरूपेणाऽवस्थितस्सन् संवत्सरे मासदशके सम्पूर्णे पर्य्यावृत्य योनिदेशं प्रति स्वकीयं शिरः प्रतिनिवृत्य प्रजायते उत्पद्यते। तेन प्रकारेण इडानिधनं संवत्सरमतिवदतीति ॥ ५ ॥

अस्त्वेवम्। ततः किम्? अत आह—

ता वा एताश्चतस्रः षडहं पराच्य इडा अतियन्त्येषा नूतैषा विषूच्येषा प्रतीच्येतद्धीडम् ॥ ६ ॥

एतास्ताः पूर्वोक्ताः पराच्यः पराक् उपरिभागे वर्त्तमानाश्चतस्रः इडाः परिष्टुब्धेडाद्याः षडहत्रिवृदादि षट्पृष्ठकं अतियन्ति अतीत्य गच्छन्ति प्राप्नुवन्तीत्यर्थः। द्रुवदिड्रौद्धे तु रथन्तरस्य बृहतश्चोभयोः प्रकृतावेव सम्बन्धात् तद्विषये एवेति न ताभ्यां षडहव्याप्तिः। एषा नु एषा खल्विडा ऊता प्रोता षाडहिकेषु सामसु सम्बद्धा। तथैषा विषूची विष्वक् सर्वत्राऽञ्चती साम्नामधस्तादुपरिष्टाच्च वर्त्तमाना। एषैव प्रतीची प्रत्यञ्चती प्रत्येकं स्तोमानि प्राप्नुवती भवति। एतदिदं परिदृश्यमानं जगत्सर्वं ऐडमु ऐडमेव इडाप्रभवमेव इडायाः पशुरूपत्वात् पशुभिश्च सर्वं जगत् पुष्टं भवतीति इडाजगतोस्सम्बन्धः ॥ ६ ॥

यद्येवं इडानिधनमेव स्यात् न तर्हि वाङ्निबन्धनाशीर्भवेदित्याशङ्क्य सम्पत्या तदपि लभ्यत इत्याह—

संवत्सरोऽग्निर्वाक् संवत्सरो यदग्निर्विभज्यते वाचमेव तद्विभजन्ति ॥ ७ ॥

अग्निस्तावत् संवत्सरः, तन्निष्पाद्यत्वात् वाक् च संवत्सरात्मिका, सम्वत्सरे पूर्णे एव शिशवो व्यक्तवर्णा वाचं प्राप्नुवन्ति। (२)"तस्मादेकहायना मनुष्या वाचं वदन्ती"ति श्रुत्यन्तरात्। अतो वाचः सम्वत्सरात्मकत्वम्। एवं परम्परया अग्निरेव वागित्युक्तं भवति। युक्तश्चैतत्—अग्नेर्वाचोऽधिष्ठातृत्वात्, श्रूयते हि "अग्निर्वाग्भूत्वा मुखं प्राविश"दिति। एवं सति यदग्निर्विभज्यते अग्न इति प्रथमस्याऽङ्गो

---

१. तै. सं. २. ६. ८. १. २. तै. सं. ६. १. ६. ७.

रूपमित्यादिनोक्तेन प्रत्यहं अग्निशब्दो विभक्तिभेदेन भिद्यते तेन वा-
यमेव तद्विभजन्ति वाग्विभक्तिरेव सा एषा विभक्तिः। अतो वाङ्निध-
नाश्रितमपि फलं सम्पद्यत इत्यर्थः ॥ ७ ॥

तत्र विभज्यमानाग्निशब्दगतां संख्यामनूद्य प्रशंसति—

द्वे द्वे अक्षरे विभजन्ति द्वौ द्वौ हि मासावृतुरथो मासानामेव तद्रूपं क्रियते ॥ ८ ॥

अग्निविभक्तौ च द्वे द्वे अक्षरे अग्निरिति द्वे अक्षरे इन्द्र इति द्व्यक्षरञ्च विभजन्ति। कुतः? हि यस्मात् द्वौ द्वौ मासौ चैत्रादिकौ सम्भूय ऋतू वसन्तादिक ऋतुर्भवति। अथो अपि च तदक्षरद्वयविभ-
जनात् मासानां द्वन्द्वशो वर्त्तमानानामेव रूपं क्रियते ॥ ८ ॥

अथोक्तां षडहविभक्तिमनूद्य स्तौति—

**षडहानि विभजन्ति षड्वै ऋतवः ऋतूनां धृत्या ऋतू-
नां प्रतिष्ठित्या अथो ऋतूनामेव तद्रूपं क्रियते षड्वै पुरुषा
यानाग्निरनुविहियते ॥ ९ ॥**

दशरात्रस्याऽऽदितः षट्संख्यान्यहानि विभजन्ति एति प्रेत्याशुम-
दित्यादिना पूर्वोक्तेन साधारणरूपेण विभजन्ति विभक्तानि कुर्वन्ति। ऋतवश्च षट्सङ्ख्याका भवन्ति। यथा च तत् षडहविभजनं ऋतूनां धृत्यै स्थैर्य्याय भवति तथा तेषामृतूनां प्रतिष्ठित्यै प्रतिष्ठानाय च भव
ति। अथो अपि च तद्विभजनं ऋतूनामेव रूपं क्रियते ऋतवोऽपि परस्परं विभक्ताकारा विभज्यमानान्यहानि च परस्परं विलक्षणानि भवन्ति इति तद्वैलक्षण्यमेव ऋतुवैलक्षण्यकारणमित्यर्थः। यस्मादे-
तानि विभज्यमानान्यहानि षट्संख्यानि अत एव कारणात् सदसि निविष्टा(१) होतृमैत्रावरुणाद्या षट्कर्त्तारः पुरुषाः षट् षट्संख्या-
का भवन्ति यान् होत्रादीननुलक्ष्य समपि अग्निर्विहियते होत्रीयादिषु धिष्ण्यवेषु आग्नीध्रीयादाहृत्याऽग्निः, प्रक्षिप्यते ॥ ९ ॥

ननु सर्वासां देवतानां मध्ये अग्नेरिन्द्रस्य चोभयोरेव विभक्तिरु-
क्ता, कुतो नान्यासामित्यत आह—

**यदिदं बहुधाग्निर्विहियते षड्वावादित्याः सर्वाः-
प्रजाः प्रत्यङ् तस्मादेते एव देवते विभक्तिमानशाते
नातोऽन्या काचन ॥ १० ॥**

---

१. होता, मैत्रावरुणः पोता, नेष्टा, ब्राह्मणाच्छंसी अच्छावाकः इति षट्।

यस्मात् इदमयमग्निर्बहुधा बहुप्रकारं विहियते यस्माच्च असौ द्युलोकस्थः आदित्यः सर्वा इमाः भूर्लोकवर्त्तिनीः प्रजाः प्रत्यङ् प्रत्यञ्चन् प्रत्येकं पूर्वस्यां दिश्युद्यन् भवति। श्रुत्यन्तरञ्च भवति(१) "तस्मात् सर्व एव मन्यते मां प्रत्युदगादिती"ति। इन्द्र एव आदित्यः तस्माद्धेतोः एते एव अग्निरिन्द्रश्चेति देवते विभक्तिं षडहे प्रत्यहं विभागं आनशाते प्राप्नवत्यौ। अतोऽन्या एतद्व्यतिरिक्ता काचन काचिदपि देवता न प्राप्नवतीति।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ १०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे दशमाध्यायस्य द्वादशः खण्डः॥

दशमाध्यायः समाप्तः॥

---

१. ते. सं. ६. ५. ७.

अथैकादशोऽध्यायः ॥

प्रथमः खण्डः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

इत्थं द्वादशाहं विधाय समुदायशोऽवयवशश्च तत्प्रशंसा कृता । तदवयवे पृष्ठ्यषडहे स्तोत्रीयाणां तदाश्रितानां साम्नाञ्च रूपाणि प्रदर्शितानि । अथ तद्रूपविशिष्टाः स्तोत्रीयाः सामानि च दाशरात्रिकाणि विधास्यन्ते । द्वादशाहस्य यावाद्यन्तावतिरात्रौ तौ पूर्वोक्तात् ज्योतिरतिरात्रान्न विशिष्यते । अतस्तौ वर्जयित्वायानि मध्ये दशाऽहानि—पृष्ठ्यः षडहस्त्रयश्छन्दोमाः दशममहरविवाक्यश्चेति तेषु प्रथमेऽहनि अग्निष्टोमसंस्थे सर्वेष्वपि स्तोत्रेषु त्रिवृदेव स्तोमः । द्वितीयादीन्यष्टावहान्युक्थसंस्थानि पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशचतुश्चत्वारिंशाष्टाचत्वारिंशस्तोमकानि । दशममहस्तु चतुर्विंशस्तोमकमग्निष्टोमसंस्थम् । तत्राऽग्निष्टोमसाम्नि तु त्रयस्त्रिंशस्तोमः । अथैषामहामितः परैर्दशभिः प्रकरणैः स्तोत्रीयाः सामानि च विदधानः प्रदर्शितान् स्तोमांश्च क्रमेण विधत्ते । तत्र प्रथमेऽहनि बहिष्पवमानस्य स्तोमकल्पिं विधित्सुराह—

स्तोमो युज्यते सत्रियेभ्योऽहर्भ्यः प्रस्रवतीभिश्चोपवतीभिश्च ॥ १ ॥

दशरात्रस्य प्रथमेऽहनि बहिष्पवमाने योऽयं विधास्यमानस्त्रिवृत्स्तोमः सोऽसौ प्रस्रवतीभिः प्रस्रशब्दयुक्ताभिः(१) "अस्य प्रस्रामनुद्युत" मित्यादिभिः । उपवतीभिः(२) "उपशिक्षापतस्थुषः" इत्यादिभिः स्तोत्रीयाभिः प्रयुज्यते सम्बध्यते निष्पद्यते इत्यर्थः । किमर्थम् ? सत्रियेभ्यः, द्वादशाहप्रभृतिविश्वसृजामयनपर्यन्तानि सत्राणि । तत्सम्बन्धिभ्यः विधिरितो दशरात्रश्च सर्वसत्रसम्बन्धी भवति । तत्र तत्र "द्वादशाहस्य दशाऽहानीति" विधिदर्शनात् ईदृग्भ्योऽहर्भ्यः अहरर्थम् ।

---

१. सा. सं. उ. १. २. १६. १. २. सा. सं. उ. १. २. १८. १.

एतच्च(१)नव भवन्ति, नवाहस्य युक्त्या" इत्यनेन विशदीकरिष्यते अग्निर्वो यजति तनूनपातं यजतीत्यादाविव ॥ १ ॥

प्रत्नवतीभिश्चोपवतीभिश्चेति पाठाद्योऽनुष्ठानक्रमोऽवगतस्तमनूद्य स्तौति—

यत्प्रत्नवत्य उपवतीभ्यः पूर्वा युज्यन्ते ब्रह्म तत्पूर्वं क्षत्राद्युज्यते ब्रह्म हि पूर्वं क्षत्रात् ॥ २ ॥

उपवतीभ्यः पूर्वे प्रत्नवत्यो युज्यन्ते सम्बध्यन्ते इति यत् तत्तेन ब्रह्म हि पूर्वं क्षत्रात् ब्राह्मणजातिरेव क्षत्रात् क्षत्रियजातेः पूर्वं युज्यते सम्बध्यते। युक्तञ्चैतत् क्षत्रात् क्षत्रियजातेः पूर्वं हि ब्रह्म ब्राह्मणजातिः। सृष्टिसमये हि (२)प्रजापतिमुखात् ब्राह्मणजातावुत्पन्नायां पश्चादुरसो बाहुभ्याञ्च क्षत्रियस्योत्पत्तेः ॥ २ ॥

एतदेव पौर्वापर्यं प्रकारान्तरेण स्तौति—

मनस्तत्पूर्वं वाचो युज्यते मनो हि यद्धि मनसाऽभिगच्छति तद्वाचा वदति ॥ ३ ॥

उपवतीभ्यः पूर्वाः प्रत्नवत्यः इति यत् तत् तेन वाचः पूर्वं मन एव युज्यते। मनो हि मनः खलु वाचः शब्दात् पूर्वं प्रथमभावि भवति। यद्धि यत् खलु मनसा अभिगच्छति अभिप्राप्नोति विषयीकरोति तदेव वाचा वदति, न खलु कश्चित्प्रेक्षावान् मनसाऽविषयीकृतं वस्तु वक्तुं शक्नोति। तस्मादेतयोः पौर्वापर्यनियमादत्रत्येन पौर्वापर्येण तदेव क्रियत इत्यर्थः ॥ ३ ॥

अथ पुनः प्रकारान्तरेण स्तौति—

बृहत्तत्पूर्वं रथन्तराद्युज्यते बृहद्धि पूर्वꣳ रथन्तराद्विजित्या तु वै रथन्तरं पूर्वं योगमानशे ॥ ४ ॥

तत्तेन प्रत्नवतीनां पूर्वयोगेन रथन्तरात् पूर्वमुत्पन्नं बृहत्सामैव युज्यते। बृहत्साम हि रथन्तरात् पूर्वं प्रजापतेरजायत। नन्वेवं बृहतः प्रथमभावित्वं प्रथमेऽहनि बृहत्सामैव पृष्ठस्तोत्रीयं स्यात्। उभयसामसु च संसवादिषु बृहदेव पूर्वं सम्बध्येतेत्याशङ्कायामिदमुच्यते—विजित्या त्विति। तुशब्दः पक्षव्यावृत्त्यर्थः। "प्रजापतिरकामयत बहु स्यां प्रजायेयेति। स तूष्णीं मनसा ध्याय'दित्यादौ बृहत एव प्रथमभावित्वं प्रतीयते। तथाऽपि यन्वित्याद्युबृहत् पूर्वं प्रजापतेः समभवदि-

---

१. ता. ब्रा. ११. १. ६. २. तै. सं. ७. १. १. द्रष्टव्यम्।

त्यादिना कस्मात् पूर्वं रथन्तरं योगमानश इत्यन्तेन पूर्वं प्रजापतेर्मनसि समुद्भूतमपि बृहत्तिरस्कृत्य सृष्टिसमये रथन्तरस्यैव प्रथमसर्जनात् प्रथमयोग इति पूर्वमुक्तम्। तदेवाऽत्र विजित्येत्युच्यते। विजित्या विजयेनैव रथन्तरं बृहतः पूर्वं दशरात्रस्य प्रथमेऽहनि योगं सम्बन्धमानशे प्राप। तृचत्रयात्मको हि त्रिवृत्स्तोमस्तेषु तेषु प्रदेशेषु समाम्नातामेकैकामृचमादाय तृचीकृताः ते तृचाः स्युरिति ॥ ४ ॥

विधत्ते—

सम्भार्य्यास्तृचा भवन्ति यथाऽऽशिष्ठान्वहिष्ठान्त्सम्भरेदेवमेवैतान् सम्भरन्ति गत्यै ॥ ५ ॥

एते तृचाः सम्भार्य्याः सम्पाद्या भवन्ति। यद्यपि तृतीय एव तृचः सम्भार्य्यस्तथापि तद्योगात्(१) प्राणभृन्न्यायेन सर्वेऽपि तृचाः सम्भार्या इति व्यपदेशः। यथा खलु लोक आशिष्ठान् भोक्तृतमान् भक्षणसमर्थान् वहिष्ठान् वोढृतमांश्च अनड्वह अन्विष्य एकत्र सम्भरन्ति समूहीकुर्वन्ति; गत्यै गमनाय दशरात्रस्याऽन्तप्राप्त्यर्थम् ॥ ५ ॥

अथ सत्रियेभ्य इति यदुक्तं पूर्वं तत् स्तोत्रीयासङ्ख्यानुवादेनोपपादयति—

नव भवन्ति नवाहस्य युक्त्या ऋचचैवाऽहर्युनक्ति यथा प्रार्थस्य शम्या अवदध्यादेवमेवैतन्नवाहस्य शम्या अवदधाति गत्यै ॥ ६ ॥

एवं त्रिषु तृचेषु नवस्तोत्रीया भवन्ति। एतच्च नवाहस्य अविवाक्यात् पूर्वभाविना नवरात्रस्य युक्त्यै योजनाय भवति। एतदेव विवियते—ऋचचैवाहर्युनक्तीति। अत्रत्यया एकैकया ऋचा नवस्वहःसु एकैकमहर्योजितवान् भवति। अपिच प्रार्थस्य प्रकर्षेण इयर्त्ति गच्छतीति प्रार्थोऽनड्वान् तस्य युजे योजनाय। यथा शम्या अवदध्यात् युगच्छिद्रेषु प्रक्षेप्यान् कीलकान् प्रोतान् कुर्य्यात् एवमेवैतत्। एतेन नवर्चेन नवाहस्य योजनाय शम्या एवाऽवदधाति। तथा सति गत्यै समाप्तिपर्य्यन्तं गमनायैतत्सम्पद्यते ॥ ६ ॥

---

१. 'प्राणभृत उपदधाति' इत्यत्र प्राणभृच्छन्दः प्राणभृदप्राणभृत्समुदायमभिधत्ते। तत्रैक एव मन्त्रः प्राणशब्दघटितः। अन्ये त्वतथाभूताः। तथापि तत्समुदायः प्राणभृच्छब्देनोच्यते तद्वत्।

अथाऽस्मिन्नहनि विधित्सितं स्तोमं बहिष्पवमानस्य विधाय प्रशंसति—

त्रिवृदेव स्तोमो भवति तेजसे ब्रह्मवर्चसाय ॥ ७ ॥

सिद्धप्रायमेतत् । तेजः (२)प्रकाशः । ब्रह्मवर्चसं श्रुताध्ययनादिजन्यं ब्राह्मं तेजः । अग्निना सहोत्पन्नत्वात् त्रिवृत्स्तोमः तस्योभयस्य कारणं भवतीत्यर्थः ॥ ७ ॥

इति ताण्ड्यमहाब्राह्मणे सायणाचार्यविरचिते माधवीये एकादशाध्यायस्य प्रथमः खण्डः ॥

अथ द्वितीयः खण्डः ॥

प्रथमेऽहनि बहिष्पवमानस्य स्तोत्रीयाः स्तोमाश्च विहिताः । अथाज्यानां विधित्सुराह—

उभाभ्यां वै रूपाभ्यां बहिष्पवमान्यो युज्यन्ते यत्सामा स्तोमो भवति तदाज्येषु ॥ १ ॥

उभाभ्यां बृहद्रथन्तराभ्यां रूपाभ्यां खलु बहिष्पवमानस्य स्तोत्रीयाः युज्यन्ते बृहत्तत् पूर्वं रथन्तरादिति हि पूर्वमुक्तम् । अतः प्रस्तवस्त्यो बार्हतं रूपं उपवत्यो राथन्तरमिति रूपवद्वययोगः आज्येषु आज्यस्तोत्रेषु उत्तरस्यैव साम्नो रूपं भवति यत्सामा यत्सामपृष्ठकस्तोमवान् यागो भवति प्रथमेऽहनि होतुः पृष्ठस्तोत्रे यत्साम क्रियते तस्यैव साम्नो रूपमाज्येषु भवति नान्यस्येत्यर्थः । अत एव वक्ष्यति राथन्तरमेव तद्रूपं निर्द्योतयति स्तोम इति ॥ १ ॥

अथाऽऽज्यानि लिङ्गविशेषयुक्तानि विधत्ते—

निराहावन्त्याज्यानि भवन्ति युक्तमेव तैराह्वयति २

निराहावन्ति निष्कृष्य समूहात् पृथक्कृत्य सम्बुध्याभिमुखीकृत्याऽऽह्वानं निराहवः, तद्वन्त्याज्यानि आज्यस्तोत्राणि भवन्ति निराहावन्तीत्यत्र एको वकारलोपश्छान्दसः । तैराह्वानलिङ्गकैराज्यैर्बहिष्पवमान्या युक्तं योजितमेव प्रथममहराह्वयति ॥ २ ॥

---

१. शरीरकान्तिः, इति. क.

कानि पुनस्तथाविधानीति ? तान्याह—

(१)"अग्न आयाहि वीतय" (२)"आ नो मित्रावरुणा" (३)"ऽऽयाहि सुषमा हि त" (४)"इन्द्राग्नी आगतꣳसुत" मिति राथन्तरमेव तद्रूपं निर्द्योतयति स्तोमः इति ॥३॥

एते चत्वारस्तृचाश्चत्वार्य्याज्यस्तोत्राणि। एषु च आकारो दृश्यते; एति प्रेत्याशुमत्विति परिगणितत्वात्। तच्च राथन्तरं रूपं तदेकमेव राथन्तरं रूपं निर्द्योतयति प्रकाशयति स्तोमश्चाऽऽज्येष्वपि त्रिवृदेव। स चैकैकस्मिन्नाज्ये तृचस्याऽऽवर्त्तनेन पूरणीय इत्यर्थः। एवं प्रातःसवनिकेषु पञ्चसु स्तोत्रेषु स्तोत्रीयाणामेव विधानादत्र गातव्यं साम प्राकृतमेव गायत्रम् ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे एकादशाध्यायस्य द्वितीयः खण्डः ॥

---

(१) क. अग्न आयाहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥
ख. तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥
ग. स नः पृथुश्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यम् ॥ (सा.सं.उ.१.१.४.)

(२) क. आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू।
ख. उरुशꣳसा नमोवृधा मह्ना दक्षस्य राजथः। द्राघिष्ठाभिः शुचिव्रता ॥
ग. गृणाना जमदग्निना योनावृतस्य सीदतम्। पातꣳसोममृतावृधा ॥
(सा. सं. उ. १. १. ५.)

(३) क. आ याहि सुषमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिस्सदो मम ॥
ख. आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नश्शृणु ॥
ग. ब्रह्माणस्त्वा युजा वयꣳसोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे ॥
(सा. सं. उ. १. १. ६.)

(४) क. इन्द्राग्नी आगतꣳसुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता।
ख. इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः। अया पातमिमꣳसुतम् ॥
ग. इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे। ता सोमस्येह तृम्पताम् ॥
(सा. सं. १. १. ७.)

अथ तृतीयः खण्डः ॥

अथ माध्यन्दिनपवमानस्य सामानि विधास्यन् स्तोत्रीयांस्तावद्विधाय स्तौति—

"प्र सोमासो विपश्चित" इति गायत्री भवति प्रेत्या "अभिद्रोणानि बभ्रव" इत्यभिक्रान्त्यै "सुता इन्द्राय वायव" इति संस्कृत्यै "प्र सोम देव वीतय" इति प्रेत्यै "प्र तु द्रवे"ति प्रेत्यै प्र वा एतेनाऽह्ना यन्ति ॥ १ ॥

(१)'प्र सोमास' इति गायत्रीछन्दस्का प्रथमा स्तोत्रीया भवति। सा च प्रशब्दयोगात् प्रेत्यै प्रायणाय दशरात्रप्रारम्भायोचिता(२)"अभिद्रोणानि बभ्रव" इत्यस्यां तु अभीत्युपसर्गो दृश्यते। तेन चाऽभिक्रमणं स्मार्यते। अतः सा अभिक्रान्त्यै अभिक्रमणाय दशरात्रस्याऽभितः आक्रमणाय भवति। (३)'सुता इन्द्राय वायव'इत्यत्रस्थ(४) सुतशब्देनाऽभिषुतसोमवाचिना अभिषवाख्यः संस्कारो बुद्धावुपस्थाप्यते। अतस्सा संस्कृत्यै प्रवृत्तस्य दशरात्रस्य संस्कारगुणातिशयाधानाय भवति। (५)"प्र सोम देव वीतये' (६)"प्र तु द्रवे"त्यनयोः प्रशब्दयोगात् प्रायणं बुद्धिस्थं भवति। अतस्तदुभयं प्रेत्यै प्रायणाय दशरात्रस्याऽऽरम्भाय योग्यम्। एतेन त्रिवृत्स्तोमकेन प्रथमेनाऽह्ना प्रयन्ति वै प्रायणमेव कुर्वन्ति यजमानाः। अतः प्रायणस्य प्रतिपादिका स्तोत्रीया योग्येति भावः॥ १ ॥

अथ "प्र सोमास" इत्यस्यां स्तोत्रीयायां गातव्यं साम विधत्ते—

गायत्रं भवति ॥ २ ॥

तच्चैकर्चमित्युत्तराग्रन्थे एकस्या ऋच एवाऽध्ययनादवसीयते ॥ २ ॥

अस्य च गायत्रस्य स्तुतिप्रकारविधायकं ब्राह्मण सार्थवादं पूर्वमा-

---

१. प्र सोमासो विपश्चितोऽपो नयंत ऊर्मयः। वनानि महिषा इव ॥

२. अभिद्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ॥

३. सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्तु विष्णवे ॥
(सा. सं. उ. १. २. १९.)

४. सुतशब्दोऽभिषुतसोमवाची तेन. इति ख. पु.

५. प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा।
अंशोः पयसा मदिरो न जागृवेरच्छाकोशं मधुश्चुतम्। (सा. सं.उ. १.२.२०.१)

६. प्र तु द्रव परिकोशं निषीद गृभिः पुनानो अभिवाजमर्ष। अश्वं नस्वा वाजिनं मर्जयन्तोऽच्छा बर्हीं रशनाभिर्नयन्ति ॥ (सा. सं. उ. ११. १०. १.)

स्तातमत्राऽप्यतिदिशति—

यदेव गायत्रस्य ब्राह्मणम् ॥ ३ ॥

यदेव प्रकृतावग्निष्टोमे विहितस्य गायत्रस्य ब्राह्मणं(१) "इमे वै लोका गायत्रं त्र्यावृद्गेय"मित्यादि तदेवाऽस्याऽपि विहितस्य गायत्रस्य ब्राह्मणम् । प्रकरणभेदाद्ब्राह्मणस्याऽसम्बन्धशङ्का स्यात् । तन्मा भूदित्यर्थमयमतिदेशः ॥ ३ ॥

अथाऽ'भिद्रोणानी'त्यस्यां गातव्यं साम विधत्ते—

आश्वं भवति ॥ ४ ॥

स्पष्टम् । एतदप्येकर्चम् ॥ ४ ॥

अथैतत् प्रवृत्त्युपन्यासेन प्रजातिहेतुरिति स्तौति—

अश्वो वै भूत्वा प्रजापतिः प्रजा असृजत स प्राजायत बहुरभवत्प्रजायते बहुर्भवत्याश्वेन तुष्टुवानः॥५॥

पुरा खलु प्रजापतिः सर्वकारणभूतः स्रष्टा अश्वः अश्वरूपी भूत्वा प्रजाः स्रष्टव्या असृजत सृष्टवान् । पुनरपि स प्राजायत बहुप्रजारूपेणोदपद्यत । ततः बहुरनेकविधोऽभवत् । अतः आश्वेनाऽश्वसम्बन्धिना साम्ना तुष्टुवानः स्तुतवान् यजमानः प्रजायते पुत्रपौत्रादिरूपेणोत्पद्यते ततो बहुरनेको भवति ॥ ५ ॥

अथैतस्य निधनविभक्तिमनूद्य स्तौति—

एकाक्षरं निधनमुपयन्ति रथन्तरस्याऽनतिवादाय ॥ ६ ॥

रा २३४५न् इति एकाक्षरं हि अस्य साम्नो निधनं तदुपयन्ति । रथन्तरस्य साम्नोऽनतिवादायाऽतिवादाभावाय भवति । अस्ति हि रथन्तरस्यैकमेवाऽक्षरं निधनम् । तद्यत्राऽपि अनेकाक्षरं निधनं स्यात् रथन्तरस्याऽतिवादो भवेत् । अत उभयोरेकाक्षरत्वेन साम्यादतिवादाभावः सिध्यतीत्यर्थः ॥ ६ ॥

एतद्वेदनं प्रशंसति—

अनतिवाद्येनं भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥

य एवमुक्तमर्थं जानाति एनं वेदितारं भ्रातृव्यः शत्रुरनतिवादी अतीत्य वादी न भवति एतद्वचनस्योपरि भ्रातृव्यवचनं नोत्पद्यत इत्यर्थः॥७॥

अथ"सुता इन्द्राय वायव" इत्यस्यां गातव्यं साम विधत्ते—

सोमसाम भवति ॥ ८ ॥

---

१. ता. ब्रा. ७. १. १.

सोमेन दृष्टं साम सोमसाम तदप्येकर्चम् ॥ ८ ॥

अथास्य साम्नः सोमसम्बन्धमेवाऽऽख्यानेन प्रदर्शयन् राज्यादिहेतुत्वेनेदं स्तौति—

यथा वा इमा अन्या ओषधय एवꣳ सोम आसीत्स तपोऽतप्यत स एतत्सोमसामाऽपश्यत्तेन राज्यमाधिपत्यमगच्छद्यशोऽभवद्राज्यमाधिपत्यं गच्छति यशो भवति सोमसाम्ना तुष्टुवानः ॥ ९ ॥

यथा वा यथा खलु इमाः इदानीं दृश्यमानाः अन्या ओषधयः लतागुल्माद्याः, एवमेव सोमः पुरा अविशिष्ट आसीत् । स सोमस्तपोऽतप्यत् ईश्वरस्मरणात्मकं तपश्चक्रे । तत ईश्वरानुग्रहात् स सोम एतत्सोमसामाऽपश्यत् दृष्टवान् । दृष्ट्वा च तेन स्तुत्वा राज्यं राज्ञः कर्म्म आधिपत्यं ओषधीनामाधिपतित्वञ्चाऽगच्छत् प्राप्नोत् । ततो यशो यशस्वी अभवत् । अतोऽन्योऽपि सोमसाम्ना तुष्टुवानः स्तुवन् राज्यमाधिपत्यं च गच्छति यशो यशस्वी च भवति ॥ ९ ॥

"प्र सोम देव वीतय" इति तृचे गातव्यसामविधायकं प्राकृतं तद्ब्राह्मणं चातिदिशति—

यौधाजयं भवति यदेव यौधाजयस्य ब्राह्मणम् ॥१०

(१)"देवा वै यशस्कामास्सत्त्रमासतताऽग्निरिन्द्रो वायु"रित्युपक्रम्य "अथेन्द्रो यौधाजयं प्रावृहते"त्यादि यदेव प्राकृतस्य यौधाजयस्य ब्राह्मणं तेदवाऽस्यापि ब्राह्मणं द्रष्टव्यम्, तत्रोक्तं सर्वमस्यापि भवतीत्यर्थः ॥ १० ॥

अथ "प्र तु द्रवे"ति तृचे गातव्यं साम विधाय पूर्ववत्तद्ब्राह्मणमप्यतिदिशति—

औशनं यदौशनस्य स्तोमः ॥ ११ ॥

भवति, ब्राह्मणमिति पदद्वयमनुषज्यते । औशनं भवति यदेव प्रकृतावौशनस्य ब्राह्मणमाम्नातम् । "(२)अथ वायु रौशनं प्रावृहते"त्यादिना तदेवास्याऽप्यौशनस्य ब्राह्मणं भवति । स्तोत्रीयाभिर्माध्यन्दिनस्य पवमानस्य त्रिवृत्स्तोमो निष्पन्न इत्यर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये वेदार्थप्रकाशे
एकादशाध्यायस्य तृतीयः खण्डः ॥

---

१. ता. ७. ५. ६–१२. २. ता. ब्रा. ७. ५. १६.

अथ चतुर्थः खण्डः ॥

होतृमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां क्रमेण चत्वारि पृष्ठस्तोत्राणि । तेषां स्तोत्रीयाः सामानि च प्राकृतान्येव । तत्र होतुः पृष्ठस्य स्तोत्रीयं प्रगाथविधमनूद्य स्तौति—

"अभि त्वा शूर नो नुम" इत्यभीति रथन्तरस्य रूपꣳ राथन्तरꣳ ह्येतदहः ॥ १ ॥

(१)"अभि त्वा शूरे"त्येषा हि रथन्तरस्य योनिः । ततोऽभिशब्दस्योत्पत्तावेव रथन्तरेण सम्बन्धादभिशब्दो रथन्तरस्य रूपम् । एतत्प्रायणीयमहश्च राथन्तरं रथन्तरपृष्ठकम् । हि यस्मादेवं तस्मादभिशब्दयुक्तः प्रगाथोऽस्मिन्नहनि सम्बन्धयोग्य इत्यर्थः ॥ १ ॥

अथ द्वितीयस्य पृष्ठस्य स्तोत्रीयं तृचमुपादाय स्तौति—

"कया नश्चित्र आभुव" इति कवत्यस्तेन प्राजापत्याः को हि प्रजापतिः प्रजापतेराप्त्यै ॥ २ ॥

(२)"कया नश्चित्र" इत्याद्याः कवत्यः कशब्दोपेतास्तिस्र ऋचो भवन्ति । यतः कवत्यस्तेन प्राजापत्याः प्रजापतिदेवताकाः । कुत एतत् ? को हि कशब्दाभिधेयः खलु प्रजापतिः । एवं कवत्यो भवन्तीति यत् तत् प्रजापतेराप्त्यै प्राप्तये सम्पद्यते ॥ २ ॥

अथ तृतीयस्य पृष्ठस्य स्तोत्रीयं तृचमनूद्य स्तौति—

(३)"तं वोदस्ममृतीषहं वसोर्मन्दानमन्धसोऽभिवत्सं न

---

१. अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ १ ॥
न त्वा वाꣳ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ (सा.सं.उ. १. १. १.)

२. कया नश्चित्र आभुवदूती सदा वृधः सखा । कया शचिष्ठया वृता ॥ १ ॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढाचि दारुजे वसु ॥ २ ॥
अभीषुणः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥ ३ ॥
(सा, सं. उ. १. २. १२)

३. तं वो दस्म मृतीषहं वसोर्मन्दानमन्धसः ।
अभिवत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्हवामहे ॥ १ ॥
युक्षः सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजꣳ शतिनꣳ सहस्रिणो भक्षू गोमन्तमीमहे ॥ २ ॥
(सा. सं. १-१-१३)

स्वसरेषु धेनव" इत्यभीति रथन्तरस्य रूपꣳ राथन्तरꣳ ह्येदनहः ॥ ३ ॥

"तं वोदस्म"मित्यस्मिन्तृचे अभिवत्समिति अभिशब्दो विद्यते। अभीत्येतद्रथन्तरस्य रूपमित्यादि पूर्ववद्व्याख्येयम् । ऋचस्तु उत्तरास्वेव व्याख्याता इति न पुनर्व्याख्यायन्ते ॥ ३ ॥

अस्मिन्नेव तृचे कञ्चित्पादमादाय तदभिप्रायमाह—

'इन्द्रं गीर्भिर्हवामह' इति हवन्त एवैनम् ॥ ४ ॥

'इन्द्रं गीर्भिर्हवामह' इत्यनेन पादेन एनमिन्द्रं हवन्त एव आह्वयन्त एव ॥ ४ ॥

अथ चतुर्थस्य पृष्ठस्य स्तोत्रीयं प्रगाथमनूद्य स्तौति—

(१)"तरोभिर्वो विदद्वसु"मिति स्तोमो वै तरो यज्ञो विदद्वसुः स्तोमेन वै यज्ञो युज्यते यत्तरोभिर्वो विदद्वसुमित्याह यज्ञमेव तद्युनक्ति ॥ ५ ॥

"स्तोमो वै देवेषु तरो नामाऽऽसी"दित्यादिना तरःशब्दस्य स्तोमवाचकत्वं विदद्वसुशब्दस्य यज्ञवाचकत्वं च पूर्वमुक्तम् । तरत्यनेन यज्ञमिति तरः स्तोमः वसूनां लम्भकत्वात् यज्ञो विदद्वसुः । अत्र मन्त्रे यद्यपि शब्दद्वयमर्थान्तरपरं तथाऽपि शब्दसामान्येन स्तुतिः । स्तोमेन च त्रिवृदादिना यज्ञो युज्यते सम्बध्यत इति च प्रसिद्धम् । तथा सति यथा तरोभिर्वो विदद्वसुमिति तरोभिः करणैः सम्बन्धं विदद्वसुमाह तत्तेन यज्ञमेव विदद्वसुवाच्यं तरःशब्दवाच्येन स्तोमेन युनक्ति सम्बद्धं करोति ॥ ५ ॥

अथ प्रथमे स्तोत्रीये प्रकृतमेव सामविधिमनूद्य स्तौति—

रथन्तरं भवति ब्रह्म वै रथन्तरं ब्रह्म प्रायणीयमहर्ब्रह्मण एव तद्ब्रह्माऽऽक्रम्य प्रयन्ति ॥ ६ ॥

ऋगन्तरवत् 'तं वोदस्म मित्यस्या अप्यृचः प्रतीकमात्रग्रहणे कर्तव्ये अस्या अभिशब्दवत्त्वेन स्तुतेः कर्तव्यतया तस्य चोत्तरार्धे एव सत्वात् तदर्थं समग्राया अनुवादः ॥

१. तरोभिर्वो विदद्वसुमिन्द्रꣳ सबाध ऊतये ।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ १ ॥
न यं दुध्रा वरन्ते न स्थिरासुरोमदेषु शिप्रमन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ २ ॥

ब्रह्म ब्राह्मणजातिरेव रथन्तरं प्रजापतिमुखात्सहोत्पत्तेः। प्रयन्त्यनेनेति प्रायणीयं प्रथममहः। तच्च ब्रह्म तस्मिन्नहनि रथन्तरस्य करणात् ब्रह्मण एव सकाशात् ब्रह्माऽऽक्रम्याऽधिष्ठाय प्रयन्ति प्रायणमुपक्रमं कुर्वन्ति ॥ ६ ॥

प्रकारान्तरेण प्रशंसति—

इयं वै रथन्तरमस्यामेव प्रतिष्ठाय सत्रमासते ॥७॥

इयं दृश्यमाना भूमिरेव रथन्तरं, तथा सति अस्यामेव पृथिव्यां प्रतिष्ठाय सत्रमासतेऽनुतिष्ठन्ति ॥ ७ ॥

अथ मैत्रावरुणपृष्ठस्तोत्रनिर्वर्तकं साम विधाय स्तौति—

वामदेव्यं भवति पशवो वै वामदेव्यं पशूनामवरुध्यै प्राजापत्यं वै वामदेव्यं प्रजापतावेव प्रतिष्ठाय सत्रमासते ॥ ८ ॥

शान्तिहेतुतया पशुसाधनत्वात् वामदेव्यस्य पशुत्वम्। 'कया नश्चित्र' इति वामदेव्याधारस्यर्चस्य प्राजापत्यत्वात् तदाश्रितं सामाऽपि प्राजापत्यमित्युक्तम्। स्पष्टमन्यत् ॥ ८ ॥

अथ तृतीयस्य पृष्ठस्तोत्रस्य साम विधाय स्तौति—

नौधसं भवति ब्रह्म वै नौधसं ब्रह्म प्रायणीयमहर्ब्रह्मण एव तद्ब्रह्माऽऽक्रमन्ते ॥ ९ ॥

नोधा नाम ऋषिस्तेन दृष्टं साम नौधसं तद्बृह्म परिबृढम्। यद्वा बृहत्प्रतिरूपकत्वेन राथन्तरेऽहनि प्रयोज्यत्वात् ब्रह्मेति व्यपदेशः। प्रायणीयमहश्च परिबृढं मुख्यत्वात्। एवं सति नौधसं भवतीति यत्तेन ब्रह्मणः सकाशादेव ब्रह्माऽऽक्रमन्ते अवलम्बन्ते ॥ ९ ॥

अथ चतुर्थस्य पृष्ठस्य साम प्रदर्श्य तच्च रथन्तरञ्चोभयं संयुज्य स्तौति—

कालेयं भवति समानलोके वै कालेयश्च रथन्तरञ्चैतं वै रथन्तरं पशवः कालेयमस्याञ्चैव पशुषु च प्रतिष्ठाय सत्रमासते ॥ १० ॥

कालेयं सामाऽच्छावाकपृष्ठस्तोत्रं भवति। कालेयश्च रथन्तरञ्चैते सामनी समानलोके समानायतने रथन्तरं यत्र प्रयुज्यते तत्र कालेयमपि प्रयोज्यमित्यर्थः। इयं खलु पृथिवी रथन्तरं साम पशवश्च कालेयं तत्साधनत्वात् ईदृशयोरुभयोः प्रयोगात् अस्याञ्चैव पृथिव्यां पशुषु

गवादिषु च प्रतिष्ठाय चिरकालं स्थित्वा सत्रमासते अनुतिष्ठन्ति॥१०॥

अस्य साम्नो निधनस्याऽहरानुरूप्यं दर्शयति—

द्रुवादिडं तथा ह्येतस्याऽह्नो रूपꣳ स्तोमः ॥ ११ ॥

(१)हो ५ इडेति हिप्रगेयेन इडाशब्देन युक्तं एतत्साम तथा हि तथा खल्वेतस्य प्रायणीयस्याह्नो रूपं पूर्व्वमुपन्यस्तं तत् द्रुवादिडं प्रथमस्याऽह्नो रूपमिति एतेषु चतुर्षु पृष्ठस्तोत्रेषु उक्त एव त्रिवृत् स्तोमो वेदितव्यः११

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाश
एकादशाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमः खण्डः ॥

अथाऽऽर्भवपवमानस्य स्तोत्रीया विधाय तत्र तासामानुरूप्यञ्च दर्शयति—

"प्र सोमासो मदच्युत" इति गायत्री भवति मदवद् वै रसवृत्तृतीयसवनं मदमेव तद्रसं दधात्य "या पवस्व देवयु"रित्येति रथन्तरस्य रूपꣳ राथन्तरꣳ ह्येतदहः॥१॥

"पवतेऽहर्य्यतो हरि"रिति बृहतो रूपं बृहदेव तदेतस्मिन्नहनि युनक्ति तद्युक्तꣳ इव आरभन्ते ॥ २ ॥

"प्र सुन्वानायाऽन्धस"इति प्रवत्यो भवन्ति प्राणिनीषण्यामिव ह्येतदह "रभिप्रियाणि पवते च नोहित"इत्यभीति रथन्तरस्य रूपꣳराथन्तरꣳ ह्येतदहः ॥ १ ॥

(२) "प्र सोमास" इत्येषा एका स्तोत्रीया गायत्री प्रथमा भवति। तत्तृतीयसवनं तन्मदवद्वै मदयुक्तमेव रसवत् रसयुक्तं भवति तत्राऽऽशिरावनयनेन मदकररसजननात् 'विश्वे देवाः सोमस्य मत्सन्' 'ऋभवो देवाः सोमस्य मत्सन्नित्यादिनिविन्मन्त्रवर्णाच्च तृतीयसवनस्य मदहेतुत्वं गम्यते। तत्तेन मदवत्या गायत्र्याः प्रयोगेन मदवत् मदकरमे-

---

१. निधनमिदं तृचस्याऽन्ते द्रष्टव्यम् ।

२. प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् । सुता विदथे अक्रमुः ॥ १ ॥
(सा. सं. उ. १. २. २१. १)

व रसं तृतीयसवने दधाति, (१)"अया पवस्वे"ति अपरा स्तोत्रीया। तत्र चाऽऽकारो विद्यते। आ इति च रथन्तरस्य रूपं एति प्रेत्याशुमादिति गणनात् एतत्प्रायणीयमहश्च राथन्तरम्। अतो रथन्तररूपयुक्तमत्र परिप्रयोगार्हमित्यर्थः॥ १॥

(२)पवते हर्य्यत इत्यन्या स्तोत्रीया। तत्र च पवत इति वर्त्तमानकालाभिधायिना पवनस्य स्थितिः प्रतीयते। तच्च बृहतो रूपं उपस्थितं द्वितीयस्याऽह्नो रूपमित्यादिना बृहतस्तद्रूपत्वस्योक्तत्वात्। तत्तेन स्तोत्रीयाकरणेन बृहत्सामैव एतस्मिन् प्रथमेऽहनि युनक्ति पूर्वस्मिन्नहनि युक्तं सम्बद्धं तत्साम इवः परेद्युरारभन्ते प्रयोक्तुं, परिगृह्णन्ति, प्रशब्दवत्त्वेन स्तौति। (३)"प्रसुन्वानोय"त्येषाऽपरा स्तोत्रीया। यद्यप्येकर्च्चमेव तत्र सामद्वयं गौरीवीतं गौतमञ्चाऽत्र गीयते, तथाऽपि उत्तराभ्यां सह मिलित्वैतत्प्रशस्यते प्रवत्यः प्रशब्दयुक्ता भवन्ति तत्प्रायणीयमहः प्रणिनीषेण्यमिव हि प्रणतव्यत्वेनेष्टं खलु 'अभिप्रियाणी'त्यपरः स्तोत्रीयः स्तृचः। अभीति रथन्तरस्य रूपं, तद्योन्या'मभित्वा शूरे'ति दृष्टत्वात्। गतमन्यत्॥ १॥

अथाऽग्निष्टोमसाम्नः स्तोत्रीयां दर्शयति—

"यज्ञा यज्ञा वो अग्नय" इत्यग्निर्वै यज्ञो यज्ञ एव तद्यज्ञं प्रतिष्ठापयति॥ २॥

यज्ञा यज्ञाव इत्यस्मिन् प्रगाथे यज्ञायज्ञेति द्वौ यज्ञशब्दौ दृश्येते। तयोरेकः यज्ञशब्दोऽग्निवाचकः, अपरस्तु क्रियाया इत्याभिप्रायेण व्याचष्टे-अग्निर्वै यज्ञ इति। योऽयं यज्ञः यज्ञशब्दाभिधेयः क्रतुः सोऽग्निर्वै अग्निरेव तन्निष्पाद्यत्वात् यज्ञशब्दस्योपरि पुनर्यज्ञशब्दोच्चारणात् यज्ञे संस्तुते अग्नावेव तत्तेन यज्ञं प्रतिष्ठापयति॥ २॥

अथ प्रसोमास इत्याद्यायां स्तोत्रीयायां गायत्रं साम विधाय इमे वै लोका गायत्रं त्र्यावृदुगेयामित्यादिकं तद्ब्राह्मणञ्चाऽतिदिशति—

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम्॥ ३॥

---

१. अया पवस्व देवयु रेभन्पवित्रं पर्येषि विश्वतः। मधोर्धारा असृक्षत॥ १॥

२. पवते हर्यतो हरिरति ह्वराꣳसि रꣳह्या। अभ्यर्षन्स्तोतृभ्यो वीरवद्यशः॥ २॥

३. प्रसुन्वानायाऽन्धसो मर्तो न वष्ट तद्वचः।
अपश्वानमराधसꣳ हता मखं न भृगवः॥ ३॥

(सा. सं. पू. ६. २. १. ९. सा. सं. उ. १. २. २२)

व्याख्यातमेतत् ॥ ३ ॥

अथ तस्यामेव स्तोत्रीयायां सामान्तरं विधाय निधनद्वारा तत्प्रतिष्ठाहेतुरिति स्तौति—

सꣳहितं भवति द्व्यक्षरणिधनं प्रतिष्ठायै प्रतिष्ठायैव सत्रमासते ॥ ४ ॥

गायत्रं संहितञ्चैते द्वे अपि च सामनी एकर्च्चे तत्र सहितं द्व्यक्षरणिधनं द्वे अक्षरे निधनं यस्य तत्तथोक्तं क्र२ ३ ४ ५ मुः इति हि तस्य निधनमधीयते । तच्च मनुष्यपादद्वयसाम्यात् प्रतिष्ठायै प्रतिष्ठानाय भवति । एवमनेन निधनेन प्रतिष्ठायैवाऽनन्तरं प्रतिष्ठिताः यजमानाः सत्रमासते ॥ ४ ॥

'अया पवस्वे' त्यस्यां गातव्यं साम विदधाति—

सफं भवति ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

एतत्सामनिर्वचनद्वारेण लोकत्रयप्राप्तिहेतुरेतत्सामेति दर्शयति—

सफेन वै देवा इमान् लोकान् समाप्नुवन् यत्समाप्नुवꣳस्तत्सफस्य सफत्वमिमानेवैतेन लोकान् समाप्य सत्रमासते ॥ ६ ॥

सफेन खलु साम्ना साधनेन देवाः पुरा इमान् पृथिव्यादिकान् लोकान् समाप्नुवन् सम्यगाप्तवन्तः यद्यस्मात्समाप्नुवन् तत्तस्मात् समाप्तिसाधनत्वात् सफस्य साम्नः सफत्वं सफमिति संज्ञा सम्पन्ना । सम्पूर्वादाप्नोतेः सफशब्दो व्युत्पादनीयः । पृषोदरादित्वाद्वर्णविकारः । यस्मादेवं तस्मादिदानीन्तना अपि यजमानाः एतेन सफेन साम्ना इमानेव लोकान् समाप्य सम्यगवाप्य सत्रमासते ॥ ६ ॥

"पवते हर्य्यतो हरि"रित्यस्यां गातव्यं साम विदधाति—

आक्षारं भवति ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

इदं साम भ्रातृव्यापनोदनहेतुरिति प्रतिपादयिषुराह—

अष्टौ वा एताः कामदुघा आसꣳस्तोमेका समशीर्य्यत सा कृषिरभवद्दृश्यतेऽस्मै कृषौ य एवं वेद ॥ ८ ॥

पुरा खलु एता गायत्रीत्रिष्टुबाद्याः अष्टौ अष्टसंख्याः सत्यः कामदुघाः कामस्य काम्यमानस्याऽभिमतस्य सर्वस्य फलस्य दोग्ध्र्यो गो-

रूपा आसन्। तासां मध्ये एका समशीर्त्यत संशीर्णा प्रध्वस्ताऽभूत्। ततः सा कृषिः व्रीहियवादिहेतुः कर्षणाक्रियाऽभूत्। अत इदानीं गायत्र्यादीनि चतुरक्षराधिकानि सप्तैव छन्दांस्युपलभ्यन्ते। एवं कृषेरुत्पत्तिं यो वेद जानाति तस्मै जानते कृषौ कर्षणाक्रियायां ऋध्यते ऋद्धिः समृद्धिर्भवति ॥ ८ ॥

अथ प्रतिपित्सितं भ्रातृव्यापनोदनमेव दर्शयति—

तासु देवासुरा अस्पर्द्धन्त ते देवा असुरान् कामदुघाभ्य आक्षारेणाऽनुदन्त नुदते भ्रातृव्यं कामदुघाभ्य आक्षरेण तुष्टुवानः ॥ ९ ॥

तासु पूर्वोक्तासु कामदुघासु देवासुराः देवाश्चाऽसुराश्चाऽस्पर्द्धन्त परस्परं स्पर्द्धां कृतवन्तः। ते स्पर्द्धमाना देवाः अनेनाऽऽक्षारेण साम्ना तानसुरान् कामदुघाभ्योऽनुदन्त प्रैरयन् ताभिरसुरान्वियोजितवन्त इत्यर्थः। यत एवं अतो हेतोरिदानीमपि आक्षारेण तुष्टुवानः स्तुतवान् यजमानो भ्रातृव्यं शत्रुं कामदुघाभ्यः सकाशात् नुदते प्रेरयति (१)निर्गमयति ॥ ९ ॥

अथ प्रसङ्गादिदं साम कस्यचिद्यजमानविशेषस्य ब्रह्मसामत्वेन विधित्सुः(२)अन्वर्था आक्षारसंज्ञां निर्वक्ति—

एभ्यो वै लोकेभ्यो रसोऽपाक्रामत्तं प्रजापतिराक्षारेणाऽऽचारयद्यदाचारयत्तदाक्षारस्याऽऽक्षारत्वम् ॥ १० ॥

एभ्यस्त्रिभ्यो लोकेभ्यः सकाशात् पुरा रसः क्षीराद्यात्मकः अपाक्रामत् अपागच्छत्। तमपक्रान्तं रसं प्रजापतिः प्रजानां पालयिता देवः आक्षारेणानेनाऽऽक्षारयत् आसमन्तादासिक्तवान्। यद्यस्मादनेनाऽऽक्षारयत् तत्तस्मादस्य साम्न आक्षारमिति नाम सम्पन्नम् ॥ १० ॥

अस्त्वेवम्, किं ततः? इत्याह—

तस्माद्यः पुरा पुण्यो भूत्वा पश्चात्पापीयान् स्यादाक्षारं ब्रह्म साम कुर्वीताऽऽत्मन्येवेन्द्रियं वीर्यं रसमाक्षारयति ॥ ११ ॥

यस्मात् आक्षारणसाधनमेतत्साम तस्माद्यो यजमानः पुरा पूर्वस्मिन् काले पुण्यः धनादिभिः श्रेष्ठः भूत्वा पश्चात्परस्मिन् काले पापीयान् पापिष्ठो

---

१. विगमयति इति क. पु। २. तदर्थ. इति. ख. पु.

दरिद्रतमः स्यात् भवेत् स आक्षारं साम ब्रह्मसाम कुर्वीत । कृतेन च तेन साम्ना आत्मनि स्वस्मिन्निन्द्रियं इन्द्रस्य सम्बन्धि वीर्यं रसं पयःप्रभृतिकञ्च आक्षारयति (१)आश्रोतयति ॥ ११ ॥

अथ प्रकृतमेवाऽनुसरन् सफमाक्षारञ्चोभयं संयुज्य धृतिहेतुत्वेन स्तौति—

जनुषैकर्चौ भवतोऽह्नो धृत्यै यद्वा एतस्याऽह्नोऽधृतं तदेताभ्यां दाधार ॥ १२ ॥

जनुषा जन्मना स्वभावतः एतौ सामविशेषौ एकर्चौ एकस्यामेवर्चि गेयौ भवतः । तथा चोभयोः साम्यात् सामद्वयमपि पादद्वयवत् अस्य प्रायणीयस्याऽह्नो धृत्यै धारणाय भवति । एतदेव विभ्रियते-यद्वा इत्यादिना । यत् खलु एतस्य प्रायणीयस्याऽह्नो ऽधतमधारितं अनाश्रितं भवति तदेताभ्यां सामभ्यां दाधार स्तोता धारयति ॥ १२ ॥

अथ "प्रसुन्वानाये"त्यस्यामृचि गौरीवितगौतमे गातव्ये तत्राऽऽद्यं विदधाति ।

गौरीवितं भवति ॥ १२ ॥

स्पष्टम् ॥ १३ ॥

अहर्निषु क्रतुषु पूर्वोत्तरयोरह्नोरिदं साम सन्धानहेतुरिति दर्शयिष्यन् तदर्थमस्य साम्नोऽतिरिक्ततामाह—

गौरीवितिर्वा एतच्छाक्त्यो ब्राह्मणोऽतिरिक्तमपश्यत्तद्गौरीवितमभवत् ॥ १४ ॥

(२)शाक्त्यः शक्तिगोत्रः गौरीवितिर्नाम ऋषिः पुरा ब्रह्मणः परमेष्ठिनः शब्दब्रह्मात्मिकाया वाचो विभज्यमानायाः एतत्सामातिरिक्तमपश्यत् तत्साम गौरीविताख्यं अभवत् "देवा वै वाचं व्यभजन्त तस्या यो रसोऽत्यरिच्यत । तद्गौरीवितमभव"दिति हि ब्राह्मणम् ॥१४॥

किमतः ? तदाह—

अतिरिक्तं वा एतदतिरिक्तेन स्तुवन्ति यद्गौरीवितेनाहीनाञ्छ्वस्तनवद्भवत्यपि प्रजाया उपक्लृप्तम् ॥ १५ ॥

---

१. आसेचयति इति क. पु.

२. गुरीवितस्याऽपत्यं गौरीवितिः । शाक्त्यनामा इति ख. पु. तत् परमेष्ठिनोऽतिरिक्तं गुरिवीतापत्यशाक्त्यदृष्टं साम । अतस्तस्य गौरीवितमिति नाम सम्पन्नम् इति पाठभेदो दृश्यते ख. पु ।

एतद्गौरीवितं उक्तप्रकारेणाऽतिरिक्तं वै अधिकमेव खलु अतोऽतिरिक्तेनाऽधिकेन अत्र स्थित्वैव अहरन्तरं व्याप्तुं शक्तेन साम्ना स्तुवन्ति अहीनानहःसमूहान् "अह्नः समूहे खो वक्तव्यः"। यद्गौरीवितेन साम्नाऽहीनान् सन्तनोति तेन प्रजायाः पुत्रपौत्रादिरूपायाः उपकल्पितं सम्पादितं धनादिकं श्वस्तनवत् श्वः परेद्युरपि वर्त्तमानं भवति सर्वदाऽवस्थितं भवति। न कदाचित् क्षीयत इत्यर्थः॥ १५॥

अथैतत्प्रजातिहेतुत्वेन स्तौति—

वृषा वा एतद्वाजिसाम वृषभो रेतोधा अद्य स्तुवन्ति श्वः प्रजायते॥ १६॥

वाजि वाजवत् बलवद्वा एतत्साम वृषा वै वर्षणसमर्थः पुङ्गवः। स च वृषभो रेतोधा रेतसः पुत्रपौत्राद्युत्पत्तिहेतुभूतस्य वीर्य्यस्याऽऽधाता भवति। अतो वृषसंस्तुतेनाऽनेन साम्ना अहीनेषु अद्याऽस्मिन्नहनि स्तुवन्ति। तेन च रेत एव निषिक्तं भवति। श्वः परेद्युः प्रजायते तदेव निषिक्तं रेतः प्रजारूपेणोत्पद्यते॥ १६॥

अथाऽस्याऽऽधारभूताया ऋचश्छन्दोद्वाराऽपि प्रजाहेतुत्वमाह—

अनुष्टुभि छन्दसां क्रियतेऽनुष्टुभि छन्दसां योनिः स्वायामेव तद्योनौ रेतो धत्ते प्रजात्यै॥ १७॥

छन्दसां गायत्र्यादीनां मध्ये अनुष्टुभि अनुष्टुप्छन्दस्कायामृचि "प्र सुन्वानाये"त्यस्यां क्रियते। तत्कस्य हेतोः? हि यस्मात् छन्दसां गायत्र्यादीनामनुष्टुप् योनिर्भवति। "अनुष्टुप् च वै सप्तदशश्च समभवता"मित्यादिना छन्दसामनुष्टुप्योनित्वं पूर्वमेव प्रदर्शितम्। तत्तस्मात्सर्वच्छन्दसां योनावनुष्टुभि गौरीवितस्य करणात् स्वायां स्वकीयायां आत्मीयायामेव योनौ रेतो धत्ते आधत्ते प्रजात्यै पुत्रादिरूपेणोत्पत्यै॥ १७॥

एतद्वेदनं प्रशंसति—

प्रजायते बहुर्भवति य एवं वेद॥ १८॥

स्पष्टोऽर्थः॥ १८॥

अधुनाऽस्य साम्नोऽहःसमूहे प्रयुज्यमानस्य पूर्वोत्तरयोरह्नोः सन्धायकत्वं दर्शयति—

द्व्युदासं भवत्येतौ वा उदासौ स्वर्गस्य लोकस्याऽवसानदर्शौ पूर्वेण पूर्वमहः सꣳस्थापयन्त्युत्तरेणोत्तरमह्ररभ्यतिवदन्ति॥ १९॥

एतत्साम ह्युदासं ह्युदासावुत्क्षेपौ यस्मिन् तथाविधं भवति । ततश्च किम् ? एतौ खलूदासौ स्वर्गस्य लोकस्याऽवसानदर्शौ पारदश्वानौ तयोः पूर्वेण पूर्वमनुष्ठीयमानमहः संस्थापयन्ति परिसमापयन्ति, उत्तरेणोदासेन उत्तरमागाम्यहरभिलक्ष्याऽतिवदन्ति इदमहरतिक्रम्य वदन्ति ॥ १९ ॥

अथैतेनोदासद्वयेन यजमानानां स्वर्गलोकाध्यवसानं भवतीति दर्शयति—

तद्यथाऽद्यः पूर्वेद्युः स्पष्टं तृणोदकमन्ववस्यन्तो यन्त्येवमेव ताभ्यां स्वर्गं लोकमन्ववस्यन्तो यन्ति ॥२०॥

तदिति वाक्यालङ्कारे । यस्मादेतावुदासौ स्वर्गस्य लोकस्याऽवसानदर्शौ, अतोऽस्माद्धेतोः यथा पूर्वेद्युः पूर्वस्मिन् दिवसे यागकाले तृणोदक समीपस्थानि तृणान्युदकानीति चाऽन्ववस्यन्तः अध्यवस्यन्तो यन्ति, एवमेवैताभ्यामुदासाभ्यां यजमानाः स्वर्गं लोकमन्ववस्यन्तः अनुक्रमेण पश्यन्तो यन्ति गच्छन्ति ॥ २० ॥

अथाऽस्यामेव स्तोत्रीयायां सामान्तरं विधत्ते—

गौतमं भवति ॥ २१ ॥

गौतमेन दृष्टं साम गौतमं एतदप्यत्रैकर्चम् ॥ २१ ॥

तदेतत् स्वर्गे चिरकालस्थितिहेतुत्वेन स्तौति—

सामाऽऽर्षेयवत् स्वर्गाय युज्यते स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ २२ ॥

आर्षेयवत् ऋषिसम्बन्धवत् साम स्वर्गाय युज्यते स्वर्गप्राप्त्यै युक्तं भवति । ततोऽनेन तुष्टुवानः स्तुतवान् स्वर्गात् लोकान्न च्यवते न प्रच्युतो भवति ॥ २२ ॥

अथ सामान्तरस्य पूर्वमुक्तं ब्राह्मणमत्राऽप्यतिदिशति—

यदु चैवाऽऽनुष्टुभस्य मध्ये निधनस्य ब्राह्मणं तदु चैतस्य ॥ २३ ॥

प्रकृतौ हि "पुरोजितीवो अन्धस" इत्यस्मिन्नानुष्टुभे तृचे श्यावाश्वान्धीगवे द्वे सामनी विहिते । अत्रान्धीगवं मध्येनिधनं दशाक्षरम् । "मध्यतो निधनमुपयन्ती"ति तत्र श्रवणात् । आनुष्टुभस्य अनुष्टुभि क्रियमाणस्य मध्येनिधनस्याऽऽन्धीगवस्य यदु चैव यदेव च ब्राह्मणं 'मध्येनिधनमैडं भवत्येतेन वै तृतीयसवनं प्रतिष्ठित'मित्यादिकं,

तदु तदेव चैतस्य गोतमस्याऽपि ब्राह्मणं तत्र प्रतिपादितं सर्वं अनेनाऽपि शेषत्वेनाऽन्वयित इत्यर्थः ॥ २३ ॥

अथ "अभिप्रियाणी"ति तृचे गेयं साम विदधाति—

कावं भवति ॥ २४ ॥

स्पष्टोऽर्थः ॥ २४ ॥

अथैतल्लोकप्राप्तिहेतुरित्याह—

लोकबिन्दु साम विन्दते लोकं कावेन तुष्टुवानः ॥२५॥

लोकबिन्दु लोकस्य लम्भकं एतत्साम। अतोऽनेन कावेन तुष्टुवानः स्तुतवान् लोकमभिलषितं स्थानं विन्दते विदलृलाभ इत्यस्माद्धातोः बिन्दुरिच्छुरिति उप्रत्ययान्तो निपातितः ॥ २५ ॥

अस्य निधनं प्रदर्श्य स्तौति—

स्वारमु स्वरेण स्वरेण हि देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्रयच्छति ॥२६॥

स्वरेण स्वरितेन स्वारं स्वरनिधनञ्चैतद्भवति ततः किम्? उच्यते-स्वरेण स्वर्य्यमाणेन वषट्कारेण स्वरितान्तेन स्वाहाकारेण वा खलु देवेभ्यः अन्ततो मन्त्रावसानेऽन्नाद्यं अत्तुं योग्यञ्चरुपुरोडाशादिकमन्नं प्रदीयते। तत्तस्मादत्रापि अन्ततः अहरवसाने तृतीयसवने देवेभ्यः स्वरेणैव कावसम्बन्धिना क्रियमाणेनाऽन्नाद्यं देवेभ्यः प्रयच्छति ॥२६॥

एवमार्भविकस्य त्रिवृत्स्तोमस्य नवस्तोत्रीयास्तत्रत्यानि सामानि च विहितानि। अथाऽग्निष्टोमसाम विधत्ते—

यज्ञायज्ञीयं भवति ॥ २७ ॥

स्पष्टम् ॥ २७ ॥

तदेतत् स्तौति—

वाग्यज्ञायज्ञीयं वाचि यज्ञः प्रतिष्ठितो वाच्येव तद्यज्ञमन्ततः प्रतिष्ठापयन्ति तं वाचोऽधि इव आरभन्ते ॥२८॥

वाङ्निधनत्वाद्यज्ञायज्ञीयं साम वागात्मकम्। वाचि च वेदात्मिकायां यज्ञः प्रतिपाद्यत्वेन प्रतिष्ठितः। यस्मादेवं तस्मादन्ततोऽहरवसाने आश्रयभूतायां वाच्येव यज्ञं प्रतिष्ठापयन्ति निदधति तं पूर्वेद्युः प्रतिष्ठापितं यज्ञं वाचोऽधि वाचः सकाशादेव श्वः परेद्युरारभन्ते पुनरादत्ते ॥ २८ ॥

तस्याऽग्निष्टोमसाम्नः स्तोमकल्पिं प्रदर्श्य स्तौति—

त्रिवृदेव स्तोमो भवति तेजसे ब्रह्मवर्चसाय ॥ २९ ॥

गतार्थः ॥ २९ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
एकादशाध्यायस्य पञ्चमः खण्डः ॥

अथ षष्ठः खण्डः ॥

त्रिवृदग्निष्टोमस्य दाशरात्रिकस्य प्रथमस्याऽह्नः स्तोमकल्पिर्विहिता। अथ पञ्चदशस्तोमकस्य उक्थ्य द्वितीयस्याऽह्नः स्तोमकल्पिरभिधीयते। तत्र बहिष्पवमानस्य प्रतिपत्तृचं विदधाति—

"पवस्व वाचो अग्रिय" इति द्वितीयस्याऽह्नः प्रतिपद्भवति ॥ १ ॥

प्रतिपद्यते प्रारभ्यतेऽनयेति प्रतिपत्। पवस्व वाचो अग्रिय इति प्रथमतृच इत्यर्थः ॥ १ ॥

वृत्तवर्त्तिष्यमाणयोरह्नोः सन्धानहेतुरित्येतत् स्तौति—

पवस्वेति वै राथन्तरꣳ रूपमग्रिय इति बार्हतमुभे रूपे समारभते द्विरात्रस्याऽविस्रꣳसाय ॥ २ ॥

अस्यामृचि यत्पवस्वेति पवनप्रतिपादकं पदं तत् खलु राथन्तरं रथन्तरसम्बन्धिरूपं युञ्जानं प्रथमस्याऽह्नोरूपमित्यादिना तद्रूपस्योक्तत्वात्। अग्रिय इति पदं तु बार्हतं बृहतो रूपं अग्रे भवोऽग्रियः बृहच्च रथन्तरादग्रे जातत्वादग्रियं भवतीति शब्दसामान्येन तद्रूपता। तथा च पवस्व वाचो अग्रिय इति प्रतिपदा बृहद्रथन्तरयोः साम्नोः स्वरूपे स्वभूते उभे द्वे अपि रूपे समारभते परिगृह्णाति। द्विरात्रस्य पूर्वमनुष्ठितस्याऽह्नोऽस्याऽनुष्ठास्यमानस्य च अहर्द्विरात्रस्य ह्यहस्याऽविस्रंसायाऽशैथिल्याय सन्धानायेत्यर्थः। राथन्तरं हि पूर्वमहः। अत्र च तद्रूपान्वयात् सन्धानं भवति ॥ २ ॥

अथ तस्यैव बहिष्पवमानस्य द्वितीयं तृचं विधत्ते—

'पवस्वेन्दो वृषासुत' इत्यनुरूपो भवति वृषण्वद्वा एतदैन्द्रं त्रैष्टुभमहर्यत् द्वितीयं तदेव तदभिवदति ॥ ३ ॥

"पवस्वेन्दो वृषासुत" इति तृचोऽनुरूपाख्यो द्वितीयो भवति । तदेतत् द्वितीयमहस्तदैन्द्रं इन्द्रदेवत्यं त्रैष्टुभं त्रिष्टुप्छन्दस्कं वृषण्वत् वृषशब्दयुक्तं च भवति । वृषवद्बृहद्रथन्तरवद्रायिमद्विश्ववदुपास्थितमिति रूपस्य द्वितीयेऽहनि परिगणितत्वात्तदेव वृषण्वद्रूपम् । तत् पवस्वेन्दो वृषा सुत इति मन्त्रवाक्यं अभिवदति अभिलक्ष्य ब्रवीति ॥ ३ ॥

अथाऽस्य तृचस्याऽनुरूप इति संज्ञां निर्वक्ति—

पूर्वमु चैव तद्रूपमपरेण रूपेणाऽनुवदति यत्पूर्वं रूपमपरेण रूपेणाऽनुवदति तदनुरूपस्याऽनुरूपत्वम् ॥ ४ ॥

"पवस्व वाचो अग्रिय" इति प्रथमतृचेन प्रतिपाद्यं यदर्थरूपं पूर्वमु च पूर्वभावि, तदेव च रूपं अपरेण द्वितीयतृचप्रतिपाद्येन पश्चाद्भाविना रूपेणाऽनुवदति तृचः प्रतिपादयति । इत्थम्भावे तृतीया । यद्यस्मात् पूर्वं रूपं अपरेण रूपेणाऽनुवदति तत्तस्मादनुवाद्यरूपवाचकत्वादनुरूपस्य द्वितीयस्य तृचस्याऽनुरूपत्वं अनुरूप इति संज्ञा ॥ ४ ॥

एतद्वेदनफलमाह—

अनुरूप एनं पुत्रो जायते य एवं वेद ॥ ५ ॥

य एवमनुरूपत्वं वेद जानाति एनमनुरूपः अस्य स्वानुरूप आत्मीयैर्गुणैः सदृशः पुत्रो जायते ॥ ५ ॥

विहितं तृचद्वयं सहाऽनूद्य स्तौति—

स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥६॥

उक्तयोः स्तोत्रीयानुरूपयोस्तृचयोः करणं प्राणापानानां प्राणवायूनामपानवायूनाञ्च ऊर्द्ध्वाधोवर्त्तिनामवरुध्यै अवरोधनाय शरीरे निरोधनाय भवति ॥ ६ ॥

अथ विहितमनुरूपं तृचं अर्थवादसम्बन्धार्थं विधित्सुः तेन तृचद्वयेन संयुज्य विधाय स्तौति—

वृषण्वन्तस्तृचा भवन्तीन्द्रियस्य वीर्य्यस्याऽवरुध्यै ॥७॥

'वृषा सोमः, वृषा ह्यसी'ति द्वौ तृचौ, पूर्वोक्तः 'पवस्वेन्दो वृषा सुत' इति तृचश्चेत्येते वृषण्वन्तः वृषशब्दयुक्तास्वयस्तृचा भवन्ति। वृषशब्दाच्च सेचनसामर्थ्यं प्रतीयते । अत एतत्तृचत्रयं इन्द्रियस्य रेतोरूपवीर्य्यस्यावरुध्यै अवरोधनाय भवति ॥ ७ ॥

अथ 'पवमानस्य ते वय'मिति बहिष्पवमानस्याऽन्त्यं तृचं विधत्ते—

तृच उत्तमो भवति ॥ ८ ॥

स्पष्टोऽर्थः ॥ ८ ॥

तदेतत् प्रतिपत्सारूप्येण स्तौति—

येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ९ ॥

येनैव प्राणेन प्रयन्ति प्रारभन्ते तमभिलक्ष्य उद्यन्ति समापयन्ति प्रथमोत्तमयोस्तृचयोः पवमानसोमदेवताकत्वात्तृचात्मनैवाऽवस्थानाद्धोभयोः सारूप्यमित्यैकयव्यपदेशः ॥ ९ ॥

अथाऽस्य स्तोत्रस्य स्तोमकल्पिं विदधाति—

पञ्चदश एव स्तोमो भवति ॥ १० ॥

पञ्च तृचा अनुक्रान्तास्ते पञ्चदशस्तोत्रीयास्तृचा भवन्तीति पञ्चदश एव स्तोमोऽस्य भवति ॥ १० ॥

तदेतत्प्रतिष्ठाहेतुरित्याह—

ओजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं पञ्चदशः ॥ ११ ॥

तत्तथा सति पञ्चदशस्तोमे कृते सति ओजस्येव ओज इति बलनाम बले बलात्मक एव वीर्य्ये प्रतितिष्ठति प्रतिष्ठितो भवति। कुतः? पञ्चदशः स्तोमो यतः ओजः बलात्मकं वीर्य्यं रेतोरूपं प्रजायते वीर्यवतोऽङ्गादुत्पन्नत्वात् ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
एकादशाध्यायस्य षष्ठः खण्डः ॥

अथ सप्तमः खण्डः ॥

अथाऽऽज्यानि विधित्सुराह—

उभाभ्यां वै रूपाभ्यां बहिष्पवमान्यो युज्यन्ते
यत्सामा स्तोमो भवति तदाज्येषु ॥ १ ॥

उभाभ्यां बार्हतरथन्तराभ्यां रूपाभ्यां खलु बहिष्पवमान्यः बहिष्पवमानस्तोत्रीया युज्यन्ते। 'पवस्वे'ति वै राथन्तरं रूपम्, 'अग्निय' इति बार्हतमुभे रूपे समारभत इति प्रागुक्तम्। आज्येषु आज्यस्तोत्रेषु तत्तस्यैव साम्नो रूपं भवति यत्सामा यत्सामपृष्ठकः स्तोमः, स्तोमवान् यागो भवति। अस्मिन् द्वितीयेऽहनि होतुः पृष्ठस्तोत्रे यद्बृहत्साम क्रियते तस्यैव साम्नो रूपमाज्येषु भवति नाऽन्यस्येत्यर्थः ॥ १ ॥

किं तद्रूपं यत् बृहतोऽसाधारण्येनाऽऽज्येषु भवेदित्याशङ्क्य तद्विशिष्टान्येवाऽऽज्यानि विधत्ते—

निराहोपस्थितान्याज्यानि भवन्ति ॥ २ ॥

निराहो निराहावो निष्कृष्य सम्बोध्याऽऽहानं तदुपस्थितं समीपे स्थितं सार्थकम्, न तु शब्दतः, एतत् येषु तानि निराहोपस्थितानि तादृशान्याज्यस्तोत्राणि भवन्ति । उपस्थितत्वलिङ्गञ्च बृहत एवाऽसाधारणं रूपं न रथन्तरस्येति 'उपस्थितं द्वितीयस्याऽह्नो रूप'मित्यादिना प्रत्यपादि ॥ २ ॥

कानि पुनस्तथाविधान्याज्यानि ? तानि दर्शयति—

अग्निंदूतं वृणामिहे मित्रं वयꣳ हवामह इन्द्रमिन्द्राथिनो बृहदिन्द्रो अग्ना नमो बृहदिति बार्हतमेव तद्रूपं निर्द्योतयति स्तोमः ॥ ३ ॥

एषु चतुर्ष्वपि उपस्थितात्मकं बार्हतं रूपं दृश्यते । इन्द्रमिन्द्राथिनो बृहत् 'इन्द्रो अग्ना नमो बृह'दिति बृहच्छब्दो दृश्यते । स च शब्दसामान्यात् बृहत्सामाऽवगमयति । तत्तेन बार्हतमेव रूपं निर्द्योतयति प्रकाशयति स्तोमश्चामीषामुक्तः पञ्चदश एव भवति । एवं प्रातःसवनिकेषु पञ्चसु स्तोत्रेषु उक्तासु स्तोत्रीयासु प्राकृतमेव गायत्रं साम गातव्यम् सामान्तरस्य विध्यभावात् ॥ ३ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
एकादशाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

अथाऽष्टमः खण्डः ॥

अथ माध्यन्दिनपवमानस्य त्रयः स्तोत्रीयास्तृचा विधित्सिताः तत्र प्रथमं विदधाति—

वृषा पवस्य धारयेति गायत्री भवत्यह्नो धृत्यै ॥ १ ॥

'वृषा पवस्व धारये'ति गायत्री गायत्रछन्दस्का प्रतिपद्भवति प्रथमस्तृचो भवतीत्यर्थः । धारयेति शब्देन धृञ् धारण इत्यस्य धातोः प्रत्यभिज्ञानात् एषा प्रतिपत् अस्य द्वितीयस्याऽह्नो धृत्यै धारणाय स्थैर्य्याय भवति ॥ १ ॥

ननु गायत्रं वै प्रथममहस्त्रैष्टुभं द्वितीयं जागतं तृतीयमित्यादिना द्वितीयस्याऽह्नस्त्रैष्टुभत्वं प्रतीयते । कुतस्तत्र गायत्र्यो विनियोज्यन्त इति, तत्राऽऽह—

वृषण्वत्यस्त्रिष्टुभो रूपेण त्रैष्टुभꣳ ह्येतदहः ॥ २ ॥

इमा विहिता गायत्र्यो वृषण्वत्यो वृषच्छन्दयुक्ता भवन्ति। वृषण्वत्वञ्च त्रिष्टुभो रूपम्, तस्मात्त्रिष्टुभो रूपेण युक्तत्वात् द्वितीयेऽहनि विनियोगार्हाः। एतदहश्च त्रैष्टुभं हि त्रिष्टुप्सम्बद्धम्। हिशब्दः प्रसिद्धौ। सा च पूर्वमेव दर्शिता ॥ २ ॥

अथाऽपरं स्तोत्रीयं तृचं विदधाति—

पुनानस्सोमधारयेति धृत्यै ॥ ३ ॥

पूर्ववद्योज्यम् ॥ ३ ॥

अथाऽन्यं स्तोत्रीयं तृचं विधत्ते—

वृषाशोणो अभिकनिक्रदद्गा इति ॥ ४ ॥

स्पष्टम् ॥ ४ ॥

अस्य त्रैष्टुभे द्वितीयेऽहनि सङ्गतिमाह—

वृषण्वत्यस्त्रिष्टुभो रूपेण समृद्धा वृषण्वद्वा एतदैन्द्रं त्रैष्टुभमहर्यत् द्वितीयं तदेव तदभिवदति ॥ ५ ॥

यत् वृषा शोण इत्याद्या वृषण्वत्यो वृषशब्दयुक्ताः अतस्त्रिष्टुभो रूपेण समृद्धाः सम्पूर्णाः एतदहश्चैन्द्रं इन्द्रदेवत्यं त्रैष्टुभं त्रिष्टुप्छन्दस्कं वृषण्वद्वै वृषच्छन्दयुक्तमेव वृषवद्वृत्रहवदित्यादिना वृषशब्दस्य तद्रूपत्वेनोक्तत्वात्। दशरात्रस्य यत् द्वितीयमहः एतदिति सम्बन्धः तद्वृषा शोण इत्यादिकं मन्त्रवाक्यं तदेव वृषण्वदेव द्वितीयमहरभिवदति अभिलक्ष्य ब्रवीति ॥ ५ ॥

अथ वृषा पवस्वेति प्रथमे तृचे गातव्यं साम विधाय पूर्वमाम्नातं तद्ब्राह्मणञ्चातिदिशति।

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥ ६ ॥

सिद्धमेतत् ॥ ६ ॥

अथाऽस्मिन्नेव तृचे पुनरावृत्ते गातव्यं सामान्तरं दर्शयति—

यौक्ताश्वं भवति ॥ ७ ॥

युक्ताश्वेन दृष्टं साम यौक्ताश्वम् ॥ ७ ॥

अथाऽस्य कामप्राप्तिहेतुतां विवक्षुराख्यायिकामाह—

युक्ताश्वो वा आङ्गिरसः शिशू जातौ विपर्य्यहरत्तस्मान्मन्त्रोऽपाक्रामत्स तपोऽतप्यत स एतद्यौक्ताश्वमपश्यत्तं मन्त्र उपावर्त्तत तद्वाव स तर्ह्यकामयत कामसनि साम यौक्ताश्वं काममेवैतेनाऽवरुन्धे ॥ ८ ॥

पुरा युक्ताश्वो नामाऽऽङ्गिरसोऽङ्गिरोगोत्रजात ऋषिः जातौ जातमात्रौ शिशू बालौ स्तनन्धयौ विपर्य्यहरत विपरिहृतवान् बाधितवान्। अकार्य्यस्य करणात् तस्मादृषेर्मन्त्रो वेदोऽपाक्रमदपागमत्। स मन्त्रराहित्येन हीनः सन् पुनस्तत्प्राप्तये तपोऽतप्यत प्रायश्चित्तात्मकं तपस्तेपे। तेन च तपसा विशुद्धः स ऋषिः एतद्यौकाश्वं सामाऽपश्यत्। यस्मात् एतस्य साम्नो द्रष्टारं तमपक्रान्तो मन्त्रः पुनरुपावर्त्तत, तत् ततोऽनन्तरं तर्हि तस्मिन् काले स खल्वकामयत। किमिति? यदेतद्यौकाश्वं एतत्साम कामसनि कामप्रदम्। षणु दाने। 'छन्दसि वनसनरक्षिमथा'मितीन्प्रत्ययः। तस्मादनेन साम्ना यः स्तौति स कामं काम्यमानमभिलषितमेव फलं एतेन साम्नाऽवरुन्धे लभते ॥ ८ ॥

अथ पुनानस्सोमधारयेति तृचे द्विरभ्यस्ते द्वे सामनी क्रमेण गेये दर्शयति—

आयास्ये भवतः ॥ ९ ॥

अयास्येन दृष्टे सामनी आयास्ये। प्रथममिड़ानिधानमायास्यम्, द्वितीयं त्रिणिधनमायास्यम् ॥ ९ ॥

एतत्सामद्वयं निन्दितान्नोपजीवन(१)जन्यस्य पापस्य निष्कृतिहेतुरित्यभिप्रायेणाऽऽह—

अयास्यो वा आङ्गिरस आदित्यानां दीक्षितानामन्नमाहनात्तꣳ शुगार्च्छत् स तपोऽतप्यत स एते आयास्ये अपश्यत्ताभ्याꣳ शुचमपाहताऽप शुचꣳ हत आयास्याभ्यां तुष्टुवानः ॥ १० ॥

पुरा खल्वयास्यो नामाऽऽङ्गिरसः अङ्गिरोगोत्रज ऋषिः दीक्षितानां प्राप्तदीक्षाणां प्रारब्धयज्ञानामादित्यानां अदितेः पुत्राणां अन्नमाहनात् अभुंक्त। तं ऋषिं शुक् शोक आर्च्छत् प्राप्नोत् अभोज्यस्य भक्षणात्। दीक्षितान्नं हि प्रतिषिद्धत्वादभोज्यं हि स्मर्य्यते 'न दीक्षितवसनं परिदधीत, नाऽस्य पापं कीर्त्तयेत्, नाऽन्नमश्नीया'दिति। शुगार्त्तस्स ऋषिः तपोऽतप्यत। तत्तेन तपसा एते आयास्ये सामनी अपश्यत्ताभ्यां साम्भ्यां अभोज्यभोजनवशादुपजातां शुचं शोकमपाहत अवर्ज्जयत्। अत इदानीमपि आयास्याभ्यां तुष्टुवानः स्तुतवान् यजमानः शुचमपहते अपहन्ति अभोज्यभोजनजन्यं पापं विनाशयतीत्यर्थः ॥ १० ॥

---

१. जातस्य.

अथैनयोः स्तवनं वृष्टिहेतुरपीति दर्शयति—

एभ्यो वै लोकेभ्यो वृष्टिरपाक्रामत्तामयास्य आयास्याभ्यामच्यावयत् च्यावयति वृष्टिमायास्याभ्यां तुष्टुवानः ॥ ११ ॥

पुरा एभ्यः पृथिव्यादिभ्यस्त्रिभ्योऽपि लोकेभ्यो वृष्टिः अपाक्रामदपागच्छत्, त्रिष्वपि लोकेष्वनावृष्टिर्जातेत्यर्थः। तामपक्रान्तां वृष्टिं अयास्य ऋषिः आयास्याभ्यामेताभ्यां सामभ्यां साधनभूताभ्यामच्यावयदवर्षयत्। स्पष्टमन्यत् ॥ ११ ॥

अथाऽन्नाद्यहेतुत्वेनैते स्तौति—

अन्नाद्यं वाव तदेभ्यो लोकेभ्योऽपाक्रामत्तदयास्य आयास्याभ्यामच्यावयत् च्यावयत्यन्नाद्यमायास्याभ्यां तुष्टुवानः ॥ १२ ॥

तत्तत्र वृष्ट्युपक्रमणसमयेऽन्नाद्यं वाव अदनीयमन्नमेवैभ्यो लोकेभ्योऽपाक्रामत्, वृष्टिमन्तरेण तस्याऽनुत्पत्तेः। निगदसिद्धमन्यत् ॥ १२ ॥

अथ वृषाशोण इति तृतीये तृचे गातव्यं साम विदधाति—

वासिष्ठं भवति ॥ १३ ॥

वसिष्ठस्येदं वासिष्ठम् ॥ १३ ॥

इममेव सम्बन्धं प्रदर्शयन् इदं विशिष्टफलहेतुरित्याह—

वसिष्ठो वा एतेन वैडवः स्तुत्वाऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्याऽनुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः स्तोमः ॥ १४ ॥

वैडवो वीडुपुत्रो वसिष्ठः खलु पुरा एतेन साम्ना स्तुत्वा अञ्जसा आर्जवेन ऋजुगामिनैव मार्गेण स्वर्गं लोकमपश्यत् सम्यगद्राक्षीत्। अत एतत्सामेदानीं प्रयुज्यमानं स्वर्गस्य लोकस्याऽनुख्यात्या अनुख्यानार्थं सम्यग्दर्शनाय भवति। अपि च तुष्टुवानः स्तुतवान्। स्वर्गाल्लोकात् सम्यक् दृष्टान्न च्यवते न प्रच्युतो भवति, सर्वदा तत्रैवावतिष्ठत इत्यर्थः। एवं त्रयस्तृचा आवृत्या सह पञ्चदश स्तोत्रीयास्तृचाः सम्पन्नाः। अतः पञ्चदशस्तोमो निष्पन्न इत्यर्थः ॥ १४ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाश
एकादशाध्यायस्याष्टमः खण्डः ॥

अथ नवमः खण्डः ॥

अथ होतुः पृष्ठस्य स्तोत्रीयं तृचं प्रदर्श्य तास्मिन्नहनि तदानुगुण्यं दर्शयति--

'त्वामिद्धि हवामह' इति त्वामिति बृहतो रूपं बार्हतꣳ ह्येतदहः ॥ १ ॥

त्वामिद्धीत्ययं प्रगाथस्तोत्रीयो भवति । प्रथमस्य पृष्ठस्तोत्रस्य त्वामिति युष्मच्छब्दरूपस्योपलक्षणं त्वामिद्धीति बृहतो योन्यां त्वामिति युष्मच्छब्दः श्रूयते । अतस्तद्बृहतो बृहत्साम्नो रूपं उत्पत्तिशिष्टत्वात् । एतत् द्वितीयमहश्च बार्हतं बृहत्पृष्ठत्वात् । अतोऽस्मिन्नहनि त्वामिद्धीति प्रगाथस्य करणं युक्तमिति भावः ॥ १ ॥

अथ ब्रह्मणः पृष्ठस्तोत्रस्याऽऽधारभूतं तृचं विधाय स्तौति—

अभिप्रवः सुराधसमिति युञ्जते वै पूर्वेणाऽह्ना ह्येतेन प्रयन्ति ॥ २ ॥

पूर्वेण प्रथमेनाऽह्ना यज्ञे युञ्जते प्रारभन्ते । यथा देशान्तरं गच्छन् रथे अश्वान् युङ्क्ते, एवं यज्ञसमाप्तिं गन्तुं तस्योपक्रम एव क्रियते । तेनाऽह्ना युक्तं यज्ञं एतेन द्वितीयेनाऽह्ना अभिप्रयन्ति उद्दिश्य प्रकर्षेण गच्छन्ति । अतोऽस्याह्नः अभिप्रायणसाधनत्वादभिशब्दयुक्तोऽयं तृचः सङ्गत इत्यर्थः ॥ २ ॥

अथाऽच्छावाकपृष्ठस्य स्तोत्रीयं तृचं विधाय तस्य पूर्वोत्तरयोरह्नोः सन्धानहेतुतामाह—

त्वामिदाह्यो नर इत्यद्य चैव ह्यश्च समारभते द्विरात्रस्याऽविस्रꣳसाय ॥ ३ ॥

त्वामिदाह्य इत्यस्मिन् तृचे इदाह्यश्चेति शब्दद्वयं श्रूयते । तयोरयमर्थः-इदानीं ह्यः पूर्वेद्युरिति एवं कालद्वयवाचिना तेन अद्य च अद्यतनञ्चैव द्वितीयमहः ह्यः पूर्वमहश्च समारभते । समित्येकीभावे एकीकृत्योभयं गृह्णातीति । किमर्थम् ? द्विरात्रस्याऽहर्द्वयस्य अविस्रंसनाय विस्रंसनाभावार्थं सन्धानार्थमित्यर्थः ॥ ३ ॥

अथाऽऽद्ये तृचे साम विधाय तस्य द्वितीयेनाऽह्ना सङ्गतिमाह—

बृहद्भवति बर्ष्म वै बृहद्बर्ष्म द्वितीयमहर्बर्ष्मण एव तद्बर्ष्माऽऽक्रमन्ते ॥ ४ ॥

तदेतद् बृहत्साम तद्वर्ष्म वै ब्रह्मणः शरीरभूतं द्वितीयमहश्च यज्ञस्य वर्ष्म शरीरं तत्तथा सति बृहतो द्वितीये ऽहनि सम्बन्धात् वर्ष्मण एव सकाशात् वर्ष्माऽऽक्रमन्ते ॥ ४ ॥

अथ द्वितीयस्मिंस्तृचे साम विधाय तस्य सन्तानहेतुतामाह—

इयेतं भवति साम्नोर्विवाहो यज्ञस्य सन्तत्यै ॥ ५ ॥

अभिप्रवः सुराधसामित्यस्मिन् तृचे इयैतं ब्रह्मसाम भवति । इयैतं हि रथन्तरप्रभवं नौधसं बृहत्प्रभवम्, अतो राथन्तरेऽहनि इयैतस्य बार्हतेऽहनि नौधसस्य प्रयोगे प्राप्ते इमौ वै लोकौ सहास्तामित्यादिनाऽनयोः साम्नोर्विवाहो विविधं प्रायणं विपर्यस्य प्रयोग उक्तः । स च यज्ञस्य पूर्वोत्तरयोरहोर्व्यासज्य वर्त्तमानस्य सन्तत्यै सन्तानाय भवति । राथन्तरं हि पूर्वमहः बार्हतमुत्तरं रथन्तरपक्षीयस्य इयैतस्याऽत्र प्रयोगात् सन्ततिरिति द्रष्टव्यम् ॥ ५ ॥

अथ तृतीये प्रगाथे साम विधाय ऋषिसम्बन्धप्रतीतेस्तत्साम चिरकालं स्वर्गावस्थितिहेतुरिति स्तौति ।

माधुच्छन्दसं भवति सामार्षेयवत्स्वर्गाय युज्यते स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ ६ ॥

सिद्धमेतत् ॥ ६ ॥

अस्मिन् साम्नि विद्यमानां ऊर्ध्वस्वरविशिष्टामिडामनूद्याऽस्मिन्नहनि तत्सङ्गतिमाह—

ऊर्ध्वेडं तथा ह्येतस्याऽहो रूपꣳस्तोमः ॥ ७ ॥

औ२३४५१डा इत्येवं रूपा इडा यस्य तदूर्ध्वेडं साम । तथा हि तथैव खल्वेतस्य द्वितीयस्याहो रूपमुपन्यस्तं द्रवदिडं प्रथमस्याहो रूपमित्यादिना अत्र त्रीणि पृष्ठस्तोत्राण्यनुक्रान्तानि । मैत्रावरुणपृष्ठस्तोत्रं तु चोदकत एव प्राप्तम् । तेनैतेषु चतुर्षु स्तोत्रेषु पञ्चदश एव स्तोमो भवति ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाश
एकादशाध्यायस्य नवमः खण्डः ॥

अथ दशमः खण्डः ॥

अथाऽऽभवपवमानस्यैकं स्तोत्रीयं तृचं विदधाति--

यस्ते मदो वरेण्य इति गायत्री भवति ॥ १ ॥

गायत्रस्तृचो भवतीत्यर्थः ॥ १ ॥

अस्य तृचस्य मदशब्दयुक्तत्वेन तृतीयसवनस्याऽऽनुरूप्यं दर्शयति—

मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥ २ ॥

प्रसोमासो मदच्युत इति गायत्री भवतीत्यस्य वाक्यशेषवत् एतदपि व्याख्येयम् ॥ २ ॥

अन्यां स्तोत्रीयां विधायाऽस्मिन्नहनि तस्याः सङ्गतिमन्नाद्यहेतुतांश्चाह-

पवस्व मधुमत्तम इति पवन्त इव ह्येतेनाऽह्ना मधुमत्तम इत्यन्नं वै मधवन्नाद्यमेव तन्नाद्यजमाने दधाति ॥ ३ ॥

पवस्व मधुमत्तम इत्यस्मिन् पूञ् पवन इत्यस्माद्धातोर्निष्पन्नः पवस्वेति शब्दः श्रूयते । एतेन द्वितीयेनाऽह्ना पवन्त इव हि । इवेत्यवधारणे । पवन्ते शोधयन्त्येव खलु वनुष्ठातारः । अतोऽस्मिन्नहनि तत् पवनप्रतिपादकं मन्त्रवाक्यं सङ्गतम् । तथा मधुमत्तम इति च पदं तत्र श्रूयते । लोके च अन्नं वै अन्नमेव मधु मधुरमिति प्रसिद्धम् । अतोऽन्नवाचिमधुशब्दयुक्तेन तत्तेन मन्त्रवाक्येन यजमाने अन्नाद्यं अदनीयमन्नमेव दधाति ॥ ३ ॥

अथाऽपरां स्तोत्रीयां विधाय तया वीर्यप्राप्तिमाह—

इन्द्रमच्छ सुता इम इतीन्द्रियस्य वीर्यस्याऽऽवरुध्यै ॥४॥

अस्यामृचीन्द्रशब्दः श्रूयते । तेन च इन्द्रसम्बन्धि वीर्यं प्रत्यभिधायते अतः फलस्य इन्द्रियस्य इन्द्रेण सृष्टस्य तद्दत्तस्य वा वीर्यस्याऽपत्यकारणस्यं रेतोरूपस्याऽवरुध्यै अवरोधनाय प्राप्तये एषा भवति ॥ ४ ॥

अथाऽपरं स्तोत्रीयं तृचं विदधाति—

अयं पूषा रयिर्भग इति ॥ ५ ॥

अस्य तृचस्याऽऽनुष्टुभत्वात् त्रैष्टुभेऽहन्यसङ्गतिमाशङ्क्य त्रैष्टुभेन रूपेण योगात्सङ्गतिमाह—

अनुष्टुभः सत्यास्त्रिष्टुभो रूपेण त्रैष्टुभꣳह्येतदहः ॥६॥

अनुष्टुभः सत्यः अनुष्टुप्छन्दस्का भवन्त्योऽप्येतास्त्रिष्टुभो रूपेण

रयिशब्दादिना युक्ताः। रयिशब्दयोगश्च त्रिष्टुभो रूपमिति वृषवद्वृत्रहवदित्यादिना प्रागुक्तम्। अतोऽस्मिन् त्रैष्टुभेऽहनि सङ्गता इत्यर्थः ॥६॥

अथाऽन्यं जागतं तृचं विधाय तस्याऽपि त्रैष्टुभरूपयोगात् त्रैष्टुभेऽहनि सङ्गतिरित्याह—

वृषामतीनां पवते विचक्षण इति जगत्यः सत्यस्त्रिष्टुभो रूपेण त्रैष्टुभꣳ ह्येतदहः ॥ ७ ॥

अत्र वृषशब्दस्त्रिष्टुभो रूपम्। अन्यत् पूर्ववद्योज्यम् ॥ ७ ॥

अथ प्रथमे तृचे एकं साम विधाय प्राकृतिकं तद्ब्राह्मणञ्चाऽतिदिशति—

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥ ८ ॥

व्याख्यातमेतत् ॥ ८ ॥

अथ पुनरावृत्ते तस्मिन्नेव तृचे सामान्तरं विदधाति—

हाविष्मतं भवति ॥ ९ ॥

हविष्मता ऋषिणा दृष्टं साम हाविष्मतम् ॥ ९ ॥

इममेव सम्बन्धं प्रदर्शयन् समृद्धिहेतुरेतत्साम इत्याह—

हविष्माꣳश्च वै हविष्कृच्चाऽङ्गिरसावास्तां द्वितीयेऽहनि हविष्मानराध्नोन्नवमेऽहनि हविष्कृत् ॥ १० ॥

पुरा खलु हविष्मांश्च हविष्कृच्चेति द्वौ आङ्गिरसौ आङ्गिरोगोत्रावृषी आस्तामभवताम्। तयोर्मध्ये हविष्मान् द्वादशाहमनुतिष्ठन् द्वितीयेऽहनि अनेन साम्ना स्तुत्वा अराध्नोत् समृद्धोऽभवत्। हविष्कृच्च नवमेऽहनि आत्मना दृष्टेन हाविष्कृतेन साम्ना अराध्नोदित्येतत् प्रासङ्गिकम् ॥१०॥

अथैतत्प्रकारान्तरेण स्तौति—

अयꣳ हविष्मानित्येव जातमहर्जातꣳ सोमं प्राह देवेभ्यः साम्नैवास्मा आशिषमाशास्ते साम हि सत्याशीः ॥ ११ ॥

अस्य साम्नोऽवसाने हविष्मतेति पदं श्रूयते। तद्विशिष्टं जातमुत्पन्नमेतदहः। अयं यजमानो हविष्मान् हविषा युक्त एवेति जातमुत्पन्नं अभिषवादिभिः संस्कृतं सोमं देवेभ्यो हविर्भागं प्राह प्रब्रूते। अपि चाऽस्मै यजमानायाऽनेनैव साम्नाऽऽशिषम्, अप्राप्तस्य फलस्य प्राप्तिराशीः, तामाशास्ते इतोतेति शेषः। साम हि साम खलु सत्याशीः सत्या अवित-

था आशीः फलप्राप्तिर्यस्मिन् तत्तथोक्तं ऋग्यजुःसाम्नां मध्ये सामैव अवितथफलहेतुः। अतो हेतोः साम्नैवाऽऽशिषमाशास्त इति ॥ ११ ॥

अथ पवस्व मधुमत्तम इत्यस्यामृचि गातव्यं साम विधाय शब्दसामान्येन तस्य धृतिहेतुतामाह—

शङ्कु भवत्यह्नो धृत्यै यद्वा अधृतꣳ शङ्कुना तद्धार ॥ १२ ॥

शङ्कु शङ्कुसंज्ञं साम पवस्व मधुमत्तम इत्यस्यां गातव्यं भवति। तच्चाऽस्याऽह्नो धृत्यै धारणाय स्थैर्याय भवति। यत् खलु लोके अधृतं अधारितं चञ्चलं भवति तच्छङ्कुना दार्ढ्याय निखातव्येन कीलकेन दाधार धारयति लौकिकः पुरुषः, तद्वदिदमपि साम शङ्कुशब्दवाच्यत्वाद् धृतिहेतुरित्यर्थः ॥ १२ ॥

अथाऽस्य साम्नो ब्रह्मवादिभिः कृतं संज्ञान्तरमनुवदन् तस्य निर्वचनञ्च प्रदर्शयन् पृथिव्यादिलोकप्राप्तिहेतुरेतत्सामेति दर्शयति—

तदु सीदन्तीयमित्याहुरेतेन वै प्रजापतिरूर्ध्व इमान् लोकानसीदद्यदसीदत्तत्सीदन्तीयस्य सीदन्तीयत्वमूर्ध्व इमान् लोकान् सीदति सीदन्तीयेन तुष्टुवानः ॥ १३ ॥

तदु शङ्कुसाम सीदन्तीयशब्दवाच्यम्, एतदपि तस्य नामेति ब्रह्मवादिन आहुः। तस्यैतन्निर्वचनं एतेन खलु साम्ना साधनेन प्रजापतिर्विधाता ऊर्ध्वं उत्थितः सन् इमान् लोकान् दृश्यमानान् लोकानसीदत् अगच्छत् व्याप्नोत्, यद्यस्मात्कारणादनेन साम्नाऽऽसीदत् तत्तस्मादस्य सीदन्तीयस्य सीदन्तीयशब्दवाच्यस्य साम्नः सीदन्तीयत्वं सीदन्त्यनेनेति व्युत्पत्त्या सीदन्तीयमिति नाम सम्पन्नम्। यश्च इदानीमपि सीदन्तीयेनाऽनेन तुष्टुवानः स्तुतवान् भवति सोऽप्यूर्ध्वमुत्थितः सन् इमान् लोकान् सीदति व्याप्नोति ॥ १३ ॥

इन्द्रमच्छेत्यस्यां गातव्यं साम विदधाति—

सुज्ञानं भवति ॥ १४ ॥

सुज्ञानाख्यं साम कर्त्तव्यम् ॥ १४ ॥

राथन्तरबार्हतयोरेतयोरह्नोः सन्तानाय उभाभ्यां रूपाभ्यां भाव्यमित्यभिप्रायेणाऽऽह—

स्वर्यद्वै राथन्तरꣳरूपꣳ स्वर्णिधनं बार्हतम् ॥ १५ ॥

अस्मिन् सुज्ञाने सुवर्विद ए३ उपा २३४५ इति समाप्तौ दृश्यते। स्व

र्वत् स्वश्शब्दयुक्तं हि राथन्तरं रूपम्। 'ईशानमस्य जगतः स्वर्दृशमि'ति तद्योन्यां दृष्टत्वात् स्वर्णिधनं स्वरिति सुज्ञानस्य निधनम्। असौ लोको बृहदि'ति श्रुतेः बार्हतं बृहत्सम्बन्धिरूपम्। अतो रूपद्वययुक्तमेतत्साम द्विरात्रस्य सन्तत्यै भवतीत्यभिप्रायः। नन्वस्मिन् ऊपा इति निधनं दृश्यते न स्वरिति, कथं स्वर्णिधनत्वम्? नैष दोषः; यतः सूत्रकारेण ऊपास्थानेष्वन्यानि निधनानीति प्रकृत्य स्वःकाशिते दैवोदाससुज्ञानयोश्चेत्यूपास्थाने स्वरिति निधनस्य विहितत्वात् ॥ १५ ॥

एतदेवाऽभिप्रेत्याह—

स्वर्णिधनं भवति तथा ह्येतस्याऽह्नो रूपम् ॥ १६ ॥

एतत्सुज्ञानं स्वरिति बर्हिर्णिधनयुक्तं भवति। तथा खल्वेतस्य द्वितीयस्याऽह्नो रूपं पूर्वमुक्तं पदनिधनं प्रथमस्याह्नो रूपम्, बर्हिर्णिधनं द्वितीयस्येति ॥ १६ ॥

अथ शङ्कुसुज्ञाने संयुज्य प्लवात्मना रूपयन् अञ्जसा स्वर्गप्राप्तिसाधने इत्याह—

प्लवौ वा एतावुपोहन्ते स्वर्गस्य लोकस्य समष्ट्यै ॥ १७ ॥

ये शङ्कुसुज्ञाने सामनी विहिते एतौ प्लवापेक्षया पुंलिङ्गता। एते प्रयुञ्जाना उद्गातारः प्लवौ दुस्तरस्य यज्ञात्मकसमुद्रस्य पारप्राप्त्यर्थं प्लवरूपावेवोपोहन्ते प्रेरयन्ति। किमर्थम्? स्वर्गस्य लोकस्य समष्ट्यै यजमानस्य प्राप्त्यर्थम् ॥ १७ ॥

अयं पृषेत्यस्य तृचस्याऽऽद्यायामृचि गातव्यं विधाय पूर्वमाम्नातं तद्ब्राह्मणञ्चाऽतिशति—

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥ १८ ॥

गौरीवितिर्वा एतच्छास्त्रो ब्रह्मणोऽतिरिक्तमपश्यदित्यादिकं गौरीवितस्य प्रागाम्नातं ब्राह्मणं यत् तदेवास्याऽपि ब्राह्मणम् ॥ १८ ॥

अथाऽस्मिन्नेव तृचे सामान्तरं विदधाति—

क्रौञ्चं भवति ॥ १९ ॥

स्पष्टम् ॥ १९ ॥

तदेतत् स्तौति—

वाग्वै क्रौञ्चं वाग्द्वादशाहो वाच्येव तद्वाचा स्तुवते यज्ञस्य प्रभूत्यै ॥ २० ॥

वागात्मकं खलु कौञ्चं साम । द्वादशाहश्च वाग्रूपः(१)'तस्मादेकहायना मनुष्या वाचं वदन्ती'ति वाग्वदनसाधनत्वात् सम्वत्सरस्य तावद्वागात्मताऽवगम्यते, (२)'सम्वत्सरप्रतिमा वै द्वादशरात्रयः' इति श्रुतेः द्वादशाहस्य सम्वत्सरप्रतिरूपत्वात् वागात्मकत्वं द्रष्टव्यम् । तत्तथा सति उभयोर्वाग्रूपत्वात् वाच्येव वाक् संस्तुत एव द्वादशाहे वाचा वाग्रूपेण कौञ्चेण स्तुवत उद्गातारः । किमर्थम् ? यज्ञस्य प्रवृत्तस्य द्वादशाहात्मकस्य प्रभूत्यै प्रभूत्यर्थ(३)माधिक्यार्थं स्वत एव वाग्रूपे यज्ञे पुनर्वाचा स्तुवतः प्रभूतिः२०

अथ वृषामतीनां पवत इत्यन्त्ये तृचे गेयं साम विधत्ते—

यामं भवति ॥ २१ ॥

प्रो अयासीदित्यस्यामुत्पन्नं साम यामम् । तदस्मिंस्तृचे ऊहेन कार्य्यम् ॥ २१ ॥

इदं स्वर्गस्य लोकस्याऽऽधिपत्यहेतुरित्यभिप्रेत्याह—

एतेन वै यमोऽनपजय्यममुष्य लोकस्याऽऽधिपत्यमाऽऽप्नुताऽनपजय्यममुष्य लोकस्याऽऽधिपत्यमऽश्नुते यामेन तुष्टुवानः ॥ २२ ॥

एतेन खलु साम्ना साधनेन पुरा यमो वैवस्वत अनपजय्यं केनाप्यपजेतुमशक्यं अबाध्यममुष्य स्वर्गलोकस्याऽऽधिपत्यमधिपतित्वं आप्नुत प्राप्नोत् । अत इदानीन्तनोऽपि यामेन तुष्टुवानः स्तुतवान् अनपजय्यममुष्य लोकस्याऽऽधिपत्यमश्नुते प्राप्नोति ॥ २२ ॥

तथेदं साम स्वर्गलोकावगतिहेतुः तत्र चिरकालावस्थितिहेतुश्चेत्याह—

एतेन वै यमी यमꣳ स्वर्गं लोकमगमयत् स्वर्गस्य लोकस्याऽनुख्यात्यै स्वर्गात् लोकान्न च्यवते तुष्टुवानः स्तोमः ॥ २३ ॥

एतेन खलु साम्ना पुरा यमी यमस्य[2] पत्नी यमं स्वर्गं लोकमगमयत् । अत इदं साम स्वर्गस्य लोकस्याऽनुख्यात्यै अनुख्यानाय सन्दर्शनाय भवति । अपि च एतेन तुष्टुवानः तस्मात् स्वर्गलोकान्न च्यवते । उक्तप्रकारेण स्तोत्रीयाणां परिगणने सति पञ्चदशाख्यस्तोमो निष्पद्यते ॥ २३ ॥

इति ताण्ड्यमहाब्राह्मणे एकादशाध्यायस्य दशमः खण्डः ॥

---

१. तै. सं. २. तै. सं. ३. आधिपत्यार्थमिति. क. ख. पु.

अथैकादशः खण्डः ।

अथाऽस्याऽह्न उक्थसंस्थत्वादितः परं त्रीण्युक्थस्तोत्राणि कर्त्तव्यानि । तत्र मैत्रावरुणोक्थस्य स्तोत्रीयं तृचं विदधाति—

एह्यूषु ब्रवाणि त इत्येहिवत्यो भवन्ति तृतीयस्याऽह्न उपह्वाय सन्तत्यै ॥ १ ॥

एह्यूष्वित्याद्यास्तिस्र एहिवत्य एहीत्यनेन शब्देन युक्ताः प्रथमस्योक्थस्य स्तोत्रीया भवन्ति । ताश्च एहीत्यागमनप्रतिपादनात् तृतीयस्याऽऽगामिनोऽह्नः उपह्वाय उपह्वानाय भवन्ति । उपह्वः किमर्थ इति तत्राह—सन्तत्या इति । उभयोर्द्वितीयतृतीययोरह्नोः सन्तानार्थं भवति॥१॥

सा कस्मात्कारणादित्यत आह—

अपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदेति सलोमत्वाय ॥ २ ॥

उक्थान्युक्थस्तोत्राणीति यत् एतद्यज्ञकाण्डं यज्ञभागः अपच्छिदिव वै अपच्छिन्नमेव खलु, यज्ञायज्ञीयेनैव प्रकृतस्याऽऽह्नः परिसमाप्तत्वात् उत्तरस्य चाऽनारब्धत्वात् । अतोऽस्य सन्तानार्थं एह्यूषु ब्रवाणि त इत्यादीन्युक्थानि उक्थस्तोत्राणि एति प्राप्नोति करोतीति यत् सलोमत्वाय सारूप्याय अपच्छेदाभावेनैकरूप्याय भवति । अथ वा एति आइति आभिमुख्यवाची उपसर्गोऽस्मिंस्तृचे दृश्यते । ईदृश आकार इति यत् विच्छिन्नयोः परस्पराभिमुख्यप्रतिपादनात् सलोमत्वाय सारूप्यायैव तद्भवति ॥ २ ॥

अथ द्वितीयस्योक्थस्य स्तोत्रीयं तृचं विदधाति—

एवाह्यसि वीरयुरिति समानं वदन्तीदमित्थमसदिति ॥ ३ ॥

एवाह्यसि इति तृचः स्तोत्रीयः कार्यः । तास्तिस्र ऋचः समानं सदृशमेवार्थं वदन्ति प्रतिपादयन्ति, इदमहरित्थमनेन प्रकारेणाऽसत् अभूदिति । तत्र हि एवशब्दपर्य्यायः एवंशब्दो बहुकृत्वोऽभ्यस्यते तदाभिप्रायेणेदमित्थमसदिति समानं वदन्तीति व्यपदेशः ॥ ३ ॥

अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं विदधाति—

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमं वाजानां सत्पतिं पतिं यज्ञानमेवैतया वर्द्धयन्ति ॥ ४ ॥

इन्द्रं विश्वा इति तृचः तृतीयस्योक्थस्य स्तोत्रीयः । तत्र च अवीवृधन्नवर्द्धयन् इति वृधिधातोर्भूतकालसम्बन्धिता दृश्यते । एतर्हि एतस्मिन् काले तृतीयस्योक्थस्य समये जेतव्यानसुराञ्जित्वा देवाः पुरा अवर्द्धन्त समृद्धा अभूवन् । हि यस्मादेवं तस्मादभूतकालसम्बन्धिवृधिधातुयुक्तस्तृचः सङ्गत इत्यर्थः । हि अपि चैतया वृधिधातुयुक्तया ऋचा यजमानमेव वर्द्धयन्ति ॥ ४ ॥

अथ प्रथमे मैत्रावरुणोक्थे साम विदधाति—

साकमश्वं भवत्युक्थानामभिजित्या अभिक्रान्त्यै ॥ ५ ॥

साकमश्वसाम सामप्रहृयूष्विति तृचे गातव्यम् । किमर्थम् ? उक्थानामुक्थस्तोत्राणामभिजित्यै अभिजयार्थम् । अभिजित्य चाऽभिक्रान्त्यै अभिक्रान्तिराक्रान्तिः शत्रूणामभिभवस्तदर्थम् ॥ ५ ॥

कुतोऽस्य साम्नस्तदुभयहेतुतेत्यत आह—

एतेन ह्यग्र उक्थान्यभ्यजयन्नेतेनाभ्यक्रामन् ॥ ६ ॥

एतेन खलु साम्ना अग्रे पुरा देवा उक्थान्यभ्यजयन् एतेनैवाऽभ्यक्रामञ्छत्रून् । 'देवा वा अग्निष्टोममभिजित्योक्थानि नाऽशक्नुवन्नभिजेतुमि'त्यादि ब्राह्मणमनुसन्धेयम् ॥ ६ ॥

अथ ब्रह्मण उक्थस्तोत्रे साम विदधाति—

आमहीयवं भवति कॢप्तिश्चाऽन्नाद्यञ्च समानं वदन्तीषु क्रियत इदमित्थमसदिति ॥ ७ ॥

एवाह्यसीति तृचे आमहीयवं साम कार्य्यमिदमहरित्थमनेन प्रकारेणाऽसदित्यभवदिति शब्दसामान्येन वदन्तीषु प्रतिपादयन्तीषु कॢप्तिः सामर्थ्यं चाऽन्नाद्यं अन्नुमर्हमन्नञ्च क्रियते तदुभयहेतुरेतत्साम इत्यर्थः ॥ ७ ॥

अथ स्तोमछन्दोभ्यां संहताभ्यां ब्रह्मक्षत्रयोः सङ्गतिर्भवतीत्याह—

क्षत्रं वा एतदहरभिनिर्वदति यत्पञ्चदशं यद्गायत्रीषु ब्रह्मसाम भवति ब्रह्म चैव तत्क्षत्रञ्च सयुजी करोति ब्रह्मैव क्षत्रस्य पुरस्तान्निदधाति ब्रह्मणे क्षत्रञ्च विशञ्चाऽनुगे करोति ॥ ८ ॥

यत्पञ्चदशं पञ्चदशस्तोमकं अहः एतदहः क्षत्रं क्षत्रियजातिमेवाऽभिलक्ष्य निर्वदति निर्वक्ति । गायत्रं छन्दो ब्राह्मणजातिः तेन सह प्रजापतिमुखादुत्पत्तेः । एवं सति गायत्रीष्वृक्षु पञ्चदशस्तोमकं ब्रह्मसाम

भवतीति यत् तत्तेन ब्रह्म ब्राह्मणजातिमेव च क्षत्रं क्षत्रियजातिमेव च सयुजौ संयुक्ते करोति। अपि च गायत्रीणामृचां साम्न आधारतया प्रथमभावित्वात्, स्तोमस्य च स्तोत्रीयासङ्घात्मकस्य पञ्चदशस्य पञ्चाद्भावित्वात्, क्षत्रस्य क्षत्रियजातेः पुरस्तात् पूर्वस्मिन् भागे ब्रह्मैव ब्राह्मणजातिमेव निदधाति, न तावत् पुरस्तान्निधानमात्रं ब्राह्मणजातेः, अपि तु ब्रह्मणे षष्ठ्यर्थे चतुर्थी ब्रह्मणः क्षत्रञ्च विशञ्च क्षत्रियजातिं वैश्यजातिञ्च अनुगे अनुगन्त्र्यौ करोति ॥ ८ ॥

अथाऽस्मिन्नहनि गायत्रीषु ब्रह्मसामकरणं ब्राह्मणजातेरभिवृद्धिहेतुश्चेत्याह—

ब्रह्म वै पूर्वमहः क्षत्रं द्वितीयं यद्गायत्रीषु ब्रह्मसाम भवति ब्रह्म तद्यशसार्द्धयति ब्रह्म हि गायत्री ॥९॥

पूर्वं प्रायणीयमहर्ब्रह्म वै ब्राह्मणजातिरेव, गायत्रीरथन्तरसम्बन्धात्। तयोश्च ब्राह्मणजात्या सहोत्पन्नत्वात्। द्वितीयमहः क्षत्रं क्षत्रियजातिः। तया सहोत्पन्नानां त्रिष्टुबादीनामत्र सद्भावात्। अतः क्षत्रसंस्तुते द्वितीयेऽप्यहनि गायत्रीष्वृक्षु ब्रह्मसाम भवतीति यत् तत्तेन ब्रह्म ब्राह्मणजातिं यशसा कीर्त्या अर्द्धयति समृद्धं करोति। कुत एतत्? हि यस्माद्ब्राह्मणजातिरेव गायत्री, छन्दसां मध्ये गायत्र्याख्यं छन्दः ॥ ९ ॥

अथ तृचस्याऽर्थद्वारा समृद्धिहेतुतामाह—

तदु समानं वदन्तीषु क्रियते समृद्ध्यै ॥ १० ॥

तदु तद्ब्रह्मसाम समानं वदन्तीषु एकरूपमेवाऽर्थं प्रतिपादयन्तीषु 'एवाह्यसि, एवा शूर, एवा ते राधसि'त्यादिना एवशब्देनैवं शब्दपर्यायेण सदृशस्याऽर्थस्य तत्र प्रतिपादनात् तासु क्रियते। एकस्यैव शब्दस्य भूयोऽभ्यासात्तत्साम समृध्यै समृध्यर्थमेव भवति ॥ १० ॥

अथ तृतीये उक्थस्तोत्रे विकल्पेन सामनी विधत्ते—

आष्टादंष्ट्रे भवतः ॥ ११ ॥

अष्टादंष्ट्रेण ऋषिणा दृष्टे सामनी आष्टादंष्ट्रे। तयोरन्यतरत् इन्द्रं विश्वा इत्यस्मिंस्तृचे अछावाकसामत्वेन गातव्यम् ॥ ११ ॥

तयोः साम्नोराद्यौ स्तोभौ वृत्रहननसम्बन्धाविति प्रतिपादयन् वीर्यवत्त्वं प्रतिपादयति—

ऐयाहा इति वा इन्द्रो वृत्रमहन्नैयादोहोवेति न्यगृह्णाद्वार्त्रघ्ने सामनी वीर्यवती ॥ १२ ॥

ऐयाहा इति पूर्वमाष्टादंष्ट्रे विद्यमानस्तोभः। शब्दानुकरणमेतत्। एवं शब्दं कुर्वन् खलु पुरा इन्द्रो वृत्रमसुरमहन् हतवान्। ऐयादो हो वेति द्वितीयस्य स्तोभः। एतदपि शब्दानुकरणम्। ऐयादो हो वेति शब्दायमानस्तमसुरं न्यगृह्णात् निगृहीतवान्। अत एते सामनी वार्त्रघ्ने वृत्रहननसाधने वीर्यवती वीर्य्योपेते ॥ १२ ॥

किं तत इत्याह—

ओज एवैताभ्यां वीर्यमवरुन्धे ॥ १३ ॥

यस्मादुक्तप्रकारेण वीर्योपेते तस्मादेताभ्यां सामभ्यां ओजो बलरूपं वीर्य्यं शत्रुहननसामर्थ्यमवरुन्धे लभते ॥ १३ ॥

अथैषामुक्थानां पूर्ववत् स्तोमं विधाय तत्साध्यफलमाह—

पञ्चदश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्यं पञ्चदशः ॥ १४ ॥

पूर्वोक्तः पञ्चदश एवैषां स्तोमो भवति। तत्तेन ओजस्येव ओजोरूपे बलात्मक एव वीर्य्ये प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति, यतः पञ्चदशः स्तोमः ओजो वीर्यं ओजोरूपवीर्य्यात्मकः वीर्यवतोऽङ्गात् बाहुलक्षणात् प्रजापतिना सृष्टत्वात्। अतः पञ्चदशस्तोमेन वीर्ये प्रतिष्ठायुक्तेतिभावः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १४ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे एकादशाध्यायस्य एकादशः खण्डः ॥

एकादशाध्यायः समाप्तिमगमत् ॥

द्वादशोऽध्यायः ॥

अथ प्रथमः खण्डः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ तृतीये दाशरात्रिकेऽहि बहिष्पवमानस्य सप्तदशस्तोमस्य प्रथमं तृचं विदधाति—

दविद्युतत्यारुचेति तृतीयस्याऽह्नः प्रतिपद्भवति ॥ १ ॥

प्रतिपद्यते अनेनेति प्रतिपदाद्यस्तृचः । तृतीयस्य सप्तदशस्तोमस्योक्थसंस्थस्य पार्ष्टिकस्याऽह्नो बहिष्पवमानस्य दविद्युतत्येत्याद्यस्तृचः कार्य्यः ॥ १ ॥

अनुष्ठितयोरह्नोस्तृतीयस्य चाऽह्नः सन्धायकानि रूपाणि दविद्युतत्येत्यस्यां दर्शयन् त्रिरात्रसन्धानं दर्शयति—

दविद्युतती वै गायत्री परिष्टोभन्ती त्रिष्टुब्गवाशीर्जगती त्रीणि रूपाणि समारभते त्रिरात्रस्याऽविस्रꣳसाय ॥ २ ॥

गायत्रीत्रिष्टुब्जगतीत्येतानि त्रीणि छन्दांसि क्रमेणैतेषां त्रयाणामह्नां रूपाणि । अत्र च दविद्युततीति गायत्र्याभिधीयते । दविद्युततीत्यस्यं दीप्यमानेति हि शब्दार्थः । गायत्री च अग्निना सहोत्पत्तेस्तेजोरूपत्वात् दीप्यमाना भवति । अतः शब्दसामान्येन दविद्युततीशब्देन गायत्र्येवोपस्थाप्यते, परिष्टोभन्तीशब्देन त्रिष्टुब्ऽयक्षराधिकेन गायत्रपादेन । स्तोभतीति त्रिष्टुप् परितः स्तोभतीति परिष्टोभन्ती । अतोऽनेन पादेन त्रिष्टुबेवोपस्थाप्यते । परिष्टोभन्त्या कृपेति ह्यत्र द्वितीयः पादः, सोमाः शुक्रागवाशिर इति तृतीयः । जगती च गवाशीः गोविकारेण पयसा आशिरा आश्रयतासाधनेन युक्ता । तृतीयसवनं हि जगत्या (१)अपात्तरसम् । तत्र चाशिरावनयनं रसवत्त्वाय क्रियते । अतो गवाशिर इति पदेन जगती सन्निधाप्यते । एतेषां त्रयाणां छन्दसामस्यामृचि प्रतिपादनात् तानि त्रीणि रूपाणि त्रयाणामह्नां रूपाणि समारभते स-

---

१. आयतनं.

मूहीकृत्य प्रयुङ्क्ते। किमर्थम्? त्रिरात्रस्य अनुष्ठितयोरनुष्ठीयमानस्य त्रयाणामहामविस्रंसाय स्रंसनाभावाय परसम्बन्धाय दार्ढ्यायेति यावत्॥ २॥

अथाऽनुरूपाख्यं तृचं विधत्ते—

एते असृग्रमिन्दव इत्यनुरूपो भवति॥ ३॥

अनुरूपाख्यो द्वितीयस्तृचो भवतीत्यर्थः॥ ३॥

एते असृग्रमिन्दव इति पदत्रयेण देवमनुष्यपितृसृष्टिरूपोऽर्थः पर्यवसाने वृत्या प्रतिपाद्यत इत्याह—

एत इति वै प्रजापतिर्देवानऽसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄंस्तदेव तदभिवदति॥ ४॥

एतत् ज्योतिष्टोमप्रकरण एव व्याख्यातम्। प्रजापतिस्सृष्टिसमये एतैः पदैर्यदेवाऽर्थरूपं ससर्ज तदेवार्थरूपं तत् पादत्रयमभिवदति॥ ४॥

अथाऽस्य तृचस्यानुरूपां संज्ञामिब्रुवन् तद्वेदनफलमाह—

पूर्वमुचैव तद्रेपमपरेण रूपेणाऽनुवदति यत्पूर्वꣳ रूपमपरेण रूपणोऽनुवदति तदनुरूपस्याऽनुरूपत्वमनुरूप एनं पुत्रो जायते य एवं वेद॥ ५॥

एतत् पवस्व वाचो अग्रिय इति द्वितीयस्याऽङ्गः प्रतिपद्भवतीति खण्डे व्याख्यातम्॥ ५॥

अथ विहितावेतौ तृचावनूद्य फलान्तरहेतुतामाह—

स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुद्ध्यै॥ ६॥

एतदपि तत्रैव व्याख्यातम्॥ ६॥

अथ तृचान्तरं विधत्ते—

राजा मेधाभिरीयते पवमानो मनावधꣳअन्तरिक्षेण यातव इति॥ ७॥

राजा मेधाभिरिति बहिष्पवमानस्य तृतीयस्तृचः॥ ७॥

तृतीयेऽन्यस्य तृचस्य सङ्गतिं वक्तुं अवशिष्टपादद्वयस्याऽनुवादः। तामेव सङ्गतिं दर्शयति—

अन्तरिक्षदेवत्यस्तृचो भवत्यन्तरिक्षदेवत्यमेतदहर्यत्तृतीयं तदेव तदभिवदति॥ ८॥

यत्तृतीयमहरन्तरिक्षदेवत्यं अन्तरिक्षदेवतार्थं अतो अन्तरिक्षेण यातव इति तन्मन्त्रवाक्यं तदेवाऽन्तरिक्षदेवत्यमभिवदति ॥ ८ ॥

अथ पञ्चर्चं साम बहिष्पवमानस्य विधत्ते—

पञ्चर्चो भवति पञ्चपदा पाङ्क्तः पाङ्क्तमन्नमन्नाद्यस्याऽवरुध्यै ॥ ९ ॥

पञ्चानामृचां समुदायो भवति पञ्चपदा । पञ्चभिरष्टाक्षरैर्वोपेता पङ्क्तिः । अन्नञ्च लेह्यशोष्यादिभेदेन पांक्तं पंचसंख्यायुक्तम् । अतोऽसौ पञ्चर्चः तन्त्वा नृम्णानीत्यादिकः पञ्चर्चः अन्नाद्यस्यावरुध्यै सम्पद्यते॥९॥

अथाऽन्त्यं तृचं विधत्ते—

तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युपयन्ति ॥ १० ॥

द्वितीयस्याऽह्नो बहिष्पवमानविधावेतदपि व्याख्यातम् ॥ १० ॥

अथाऽस्य स्तोत्रस्य विहिताभि ऋग्भिः सिद्धां स्तोमकल्पिं ब्रुवन् विशिष्टफलहेतुतामाह—

सप्तदश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥११॥

सप्तदशस्तोत्रीयात्मक एवाऽस्य स्तोत्रस्य स्तोमो भवति । किमर्थम? प्रतिष्ठायै प्रतिष्ठार्थम् । द्वादशमासाः पञ्चर्तव इति संवत्सरात्मकः सप्तदशः संवत्सरेणैव च पुरुषस्य प्रतिष्ठानात् । सप्तदशस्य तद्धेतुत्वं तथा प्रजात्यै प्रजात्यर्थं प्रजापतिर्वै सप्तदश इति श्रुतेः । प्रजोत्पत्तिरपि सप्तदशस्तोमसाध्येत्यर्थः ॥ ११ ॥

इति ताण्ड्यमहाब्राह्मणे सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वादशाध्यायस्य प्रथमः खण्डः ।

अथ द्वितीयः खण्डः ।

अथ होतुराज्यस्य स्तोत्रीयं तृचं दर्शयति—

अग्निनाग्निः समिध्यत इत्याग्नेयमाज्यं भवति ॥१॥

आग्नेयमग्निदेवत्यं होतुराज्यं स्तोत्रं अग्निनाऽग्निरित्यादिकस्तृचो भवतीत्यर्थः ॥ १ ॥

अस्मिंस्तृचे विद्यमानस्याऽग्निनाग्निरित्यग्निशब्दद्वयस्य पर्यवसितमर्थमाह—

पूर्व एव तदहनी समिद्धे तृतीयमहरभिसमिन्धे ॥२॥

तत्तेनाऽग्निरिति शब्देन समिद्धे सम्यग्दीप्ते पूर्व एवाऽहनी अभिलक्ष्य तृतीयमिदमहः समिन्धे सन्दीपयति। अयमर्थः—अग्निनेति तृतीयान्तेन पदेन 'अग्न आयाहि वीतये' 'अग्निं दूतं वृणीमह' इत्याज्याभ्यां यदनुष्ठितं पूर्वमहर्द्वयं तदेवोपलक्ष्य तेन सह पुनरग्निशब्दाभिधेयमेतदहः समिन्द्ध इति ॥ २ ॥

अथ द्वितीयमाज्यस्य स्तोत्रीयं तृचं विधत्ते—

मित्रꣳहुवे पूतदक्षमिति राथन्तरम्मैत्रावरुणम् ॥ ३॥

मित्रं हुव इति तृचः राथन्तरं रथन्तरसम्बन्धि मैत्रावरुणेन यदाज्यस्तोत्रमनुशस्यते तद्भवतीत्यर्थः ॥ ३ ॥

कुतोऽस्य रथन्तरसम्बन्धितेत्यत आह—

हुव इति वै राथन्तरꣳ रूपम् ॥ ४ ॥

प्राकृतिके राथन्तरे प्रगाथे 'गव्यन्तस्त्वा हवामह'इति ह्वयति धातुः श्रूयते। तस्य च रथन्तरसम्बन्धात्तद्रूपत्वम्। तथा अत्राऽपि हुव इति श्रूयते। तथा चोक्तप्रकारेण राथन्तरमेव रूपम् ॥ ४ ॥

नन्वस्मिन्नहनि वैरूपसामैव पृष्ठस्तोत्रम्, न रथन्तरम्; तत्कथमस्मिन्नहनि राथन्तरमाज्यं विधीयत इति तत्राऽऽह—

रथन्तरमेतत्परोक्षं यद्वैरूपं राथन्तरमेव तद्रूपं निर्द्योतयति ॥ ५ ॥

यद्वैरूपं साम एतत् परोक्षं परोक्षेण वर्त्तमानं राथन्तरमेव रथन्तरादस्योत्पत्तेः। तथा चैतरेयके 'बृहच्च वा इदमग्रे रथन्तरञ्चाऽऽस्ताम्'त्युपक्रम्य 'तद्रथन्तरं गर्भमधत्त तद्वैरूपमसृजते'त्याम्नातम्। यद्यस्मात्परोक्षं रथन्तरमेव वैरूपं तत्तस्माद्राथन्तरमेव तद्रूपं निर्द्योतयति प्रकाशयति ॥ ५ ॥

अथ ब्रह्मण आज्यस्तोत्रं दर्शयति—

इन्द्रेण सꣳहि दृक्षुस इत्यैन्द्रम् ॥ ६ ॥

इन्द्रेणेति तृच ऐन्द्रमिन्द्रदेवत्यं तृतीयमाज्यस्तोत्रीयं कार्य्यमित्यर्थः॥

सं हि दृक्षुस इति शब्दार्थद्वारेण तृतीयेऽहन्येतस्य तृचस्य सङ्गतिमाह—

समिव वा इमे लोका ददृशिरेऽन्तारिक्षदेवत्यमेतदहर्य्यत्तृतीयं तदेव तदभिवदति ॥ ७ ॥

दृशिधातोः कर्मणि लण्मध्यमैकवचने व्यत्ययेन कसप्रत्यये दृक्षुस इति रूपं भवति। हि यस्मादतः संदृश्यते सम्यग्दर्शनेन विषयीक्रियत इति

तस्याऽर्थः । इमे पृथिव्यादयस्त्रयो लोकाः सन्दृशिर इव वै संदृश्यन्त इव खलु । तदन्तर्वर्तित्वादन्तरिक्षमपि संदृश्यते । एतदेवाऽत्र संदक्षुस इति पदेनोपस्थाप्यते । एतदहरान्तरिक्षदेवत्यं अन्तरिक्षदेवतार्थं यदेतत्तृतीयमहस्तदेवाऽस्याऽह्नो दैवतमन्तरिक्षं तत् संदक्षुस इति पदमभिवदति ॥ ७ ॥

अथ चतुर्थमाज्यस्तोत्रं विधत्ते—

ता हुवे ययोरिदमिति राथन्तरमैन्द्राग्नम् ॥ ८ ॥

ता हुव इति तृचः राथन्तरं रथन्तरसम्बन्धि ऐन्द्राग्नं इन्द्राग्निदेवत्यं चतुर्थमाज्यस्तोत्रं कार्य्यमित्यर्थः ॥ ८ ॥

प्रथमाज्य(१)स्तोत्रवदत्राऽपि प्रथमतो राथन्तरं रूपं प्रदर्शयन् वैरूपस्य च राथन्तरात्मकत्वमभिधाय राथन्तरस्य वैरूपेऽहनि सङ्गतिमाह—

हुव इति वै राथन्तरं रूपं रथन्तरमेतत्परोक्षं यद्वैरूपं राथन्तरमेव तद्रूपं निर्द्योतयति स्तोमः ॥ ९ ॥

पूर्ववद्योज्यम् । अथैतेषु चतुर्ष्वाज्यस्तोत्रेषु स एव सप्तदशः स्तोमः कार्य्य इत्यभिप्रायेणोक्तं स्तोम इति ॥ ९ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्य द्वितीयः खण्डः ॥

अथ तृतीयः खण्डः ।

अथाऽस्मिन्नेव तृतीयेऽहनि माध्यन्दिनस्याऽऽद्यं पवमानस्तोत्रीयं तृचं दर्शयति ।

उच्चा ते जातमन्धस इति गायत्री भवति ॥ १ ॥

उच्चा त इत्येषा गायत्री गायत्रछन्दस्का प्रतिपद्भवति (२)इदमादिकः प्रथमतृच इत्यर्थः ॥ १ ॥

तृतीयेऽहन्यस्य तृचस्य सङ्गतिमाह—

उद्ब्रह्मा एतदहर्यत्तृतीयं तदेव तदभिवदति ॥ २ ॥

यत्तृतीयमहः एतदुद्ब्रह्मै उच्छब्दवदेव पूर्वाभ्यामहोभ्यामूर्ध्वमस्य वर्तमानत्वात् ऊर्ध्ववाचिन उच्छब्दस्य तद्रूपता युक्ता । अत एव पूर्व

---

१. स्तोत्रवदस्याऽपीति. ख. पु. । २. प्रतिपदादिकस्तृच इत्यर्थ इति. क. ख. पु. ।

उद्वत्त्रिवद्विग्वदित्यादिना तृतीयेऽहनि रूपत्वेनोद्वत्वं परिगणितम्। तदुद्वत्वलक्षणं रूपमेव तदुच्चा त इति वाक्यं वदति। यद्यप्यस्मिन् उदिति पृथक्पदं न(१) श्रूयते तथाऽप्युच्चा त इत्यत्र प्रथमपदस्याऽवयवभूतो य उच्छब्दः तदपेक्षयैवेयं स्तुतिर्द्रष्टव्या ॥ २ ॥

अथैतस्मिन् तृचे पदान्तरस्य श्रवणात् पवमानस्याऽऽरम्भयोग्यस्तृच इति दर्शयति—

अन्धस्वती भवत्यहर्वा अन्धोऽह्न आरम्भः ॥ ३ ॥

अन्धस्वती अन्धशब्दयुक्ता उच्चा ते जातमन्धस इत्येषा भवति। अन्धः इति सकारान्तमन्ननाम। अत्र तु तत्साधनेऽहनि वर्त्तत इति व्याचष्टे—अहर्वा अन्ध इति। यदिदं दशरात्रस्य तृतीयमहः एतदेवाऽन्धश्शब्दसामान्येन स्तुतिः। तथा सत्यन्धशब्दप्रयोगादह्न एव आरम्भ उपक्रमः कृतो भवति ॥ ३ ॥

अथाऽन्यं प्रगाथं विधत्ते—

अभि सोमास आयव इति ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

बृहद्रथन्तरयोः प्रत्येकं असाधारणमन्यत्र सिद्धं तद्रूपद्वयं तदस्मिन्नहनि प्रदर्शयन् तयोस्साम्नोरस्मिन्नहनि सम्बन्धमाह—

अभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोः सह रूपमुपैत्युभौ हि वर्णावेतदहः ॥ ५ ॥

अभि सोमास इत्यत्र यो अभीति शब्दः एतद्रथन्तरस्य रूपम्, अभित्वा शूरेति तद्योन्यां दृष्टत्वात्, तथाऽस्मिन्प्रगाथे प्रहिन्वान ऋतं बृहदिति बृहच्छब्दः श्रूयते। स च बृहत्साम्नो वाचकत्वात्तस्यैव बृहतो रूपम्। एवं सत्युभयोर्बृहद्रथन्तरयोः सह सहितं संहतं रूपमस्मिन् तृतीयेऽहन्युपैति। हि यस्मात् एतत्तृतीयमहरुभौ वर्णौ बृहद्रथन्तरयोरुभयोरपि यावाकारौ तादृगाकारद्वयात्मकमित्यर्थः। सृष्टिसमये बृहद्रथन्तरे मिथुनीभूय पश्चाद्रथन्तराद्बृरूपस्योत्पत्तेः तत्पृष्ठकस्य तृतीयस्याऽह्नः उभयवर्णात्मकत्वम्। अत्र चैतरेयकं सृष्टिप्रतिपादकं ब्राह्मणं पूर्वमेवोदाहृतम् ॥ ५ ॥

अथ तृचान्तरं विधत्ते—

तिस्रो वाच ईरयति प्रवह्निरिति तृतीयस्याऽह्नो रूपं तेन तृतीयमहरारभन्ते ॥ ६ ॥

---

१. गृह्यत इति. ख. पु.।

तिस्रो वाच इत्ययमन्त्यस्तृचः कार्य्यः । तत्र तिस्र इति त्रिशब्दः श्रूयते । तच्च तृतीयस्याऽह्नो रूपं प्रत्यभिज्ञापकत्वात् । अत एव उद्वन्त्रिवद्दिग्वदित्यादिना पूर्वं त्रित्वयोगस्य तृतीयेऽहनि रूपत्वमुक्तम् । तेन कारणेन त्रित्वसंख्यावाचकेन तिस्र इत्यनेन तृतीयमेवाऽहरारभन्ते अवलम्बन्ते ॥ ६ ॥

ननु गायत्रं प्रथममहस्त्रैष्टुभं द्वितीयं जागतं तृतीयमिति प्रसिद्धत्वात् कथमस्य त्रैष्टुभस्य तृचस्य जागतेऽहनि सङ्गतिरिति तत्राह--

त्रिष्टुभः सत्यो जगत्यो रूपेण जागतꣳ ह्येतदहः ॥७॥

तृतीयस्याऽह्न इव जागतस्य छन्दसोऽपि त्रित्वं रूपम्, छन्दसां मध्ये तस्य तृतीयत्वात् । यस्मादेतास्त्रैष्टुभः सत्योऽपि रूपेण जगत्याः सम्बन्धिना त्रित्वादिलक्षणेन युक्ताः तस्मादेता जगत्यः एतदहश्च जागतम् । अतोऽस्मिन्नहनि विनियोगार्हा इत्यर्थः ॥ ७ ॥

अथोच्चा त इति प्रथमे तृचे पूर्ववद्गायत्रं साम विधाय प्राकृतिकं तद्ब्राह्मणञ्चाऽतिदिशति--

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥ ८ ॥

सिद्धमेतत् ॥ ८ ॥

अथ पुनरावृत्तेऽस्मिन्नेव तृचे सामान्तरं विधत्ते--

वैष्टम्भं भवति ॥ ९ ॥

यत् क्षुल्लकवैष्टम्भमिति सम्प्रदायप्रसिद्धं तदस्मिन् तृचे कार्य्यमित्यर्थः ॥ ९ ॥

अथाऽस्यैतत्संज्ञानिर्वचनद्वारेण अहर्दार्ढ्यहेतुतामाह--

अहर्वा एतदव्लीयत तदेवा वैष्टम्भैर्व्यष्टभ्नुवꣳस्त-द्वैष्टम्भस्य वैष्टम्भत्वम् ॥ १० ॥

एतत्तृतीयमहः खलु पुरा अव्लीयत अहिंस्यत व्लीनातिर्हिंसाकर्म्मा शिथिलावयवं जातमित्यर्थः । तत्तदवस्थमहः देवाः वैष्टम्भैरस्य साम्नोऽवयवैर्व्यष्टभ्नुवन् विष्टब्धं विशेषेण स्थिरमकुर्वन् । तत्तस्मात् विष्टम्भनसाधनत्वादस्य वैष्टम्भस्य साम्नो वैष्टम्भत्वं वैष्टम्भमिति संज्ञा संजाता ॥ १० ॥

अथाऽस्य निधनं दिशां धृतिहेतुरित्याह—

दिश इति निधनमुपयन्ति दिशां धृत्यै ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

अभि सोमास आयव इति प्रगाथं तृचीकृत्य तत्राऽऽद्यायां पौरुमद्गाख्यं साम गातव्यमिति विधत्ते--

पौरुमद्गं भवति ॥ १२ ॥

स्पष्टोऽर्थः ॥ १२ ॥

तदेतत्साम पापक्षयहेतुरिति प्रतिपिपादयिषुराह—

अहर्वा एतदव्लीयमानं तद्रक्षाꣳस्यन्वसचन्त तस्माद्देवाः पौरुमद्गेन रक्षाꣳस्यपाघ्नन्नप पाप्मानꣳहते पौरुमद्गेन तुष्टुवानः ॥ १३ ॥

वैष्टम्भेन विष्टब्धत्वात् अव्लीयमानमहिंस्यमानमेतदहः रक्षांस्यन्वसचन्त समाप्नुवन्नित्यर्थः । षच समवाये इति धातुः । ततोऽनन्तरं देवाः पौरुमद्गेनाऽनेन साम्ना सङ्गतानि रक्षांसि तस्मादह्नोऽपाघ्नन् (१)अपगमय्य अबन्धिषुः । यस्मादेवं तस्मादिदानीमपि पौरुमद्गेनाऽनेन साम्ना तुष्टुवानः स्तुतवान् यजमानः पाप्मानमपहते विनाशयति॥१३॥

अथाऽस्य संज्ञानिर्वचनद्वारेण(२) पापनिवृत्तिपुरस्सरं शुद्धिहेतुतामाह—

देवाश्च वाऽसुराश्चाऽस्पर्द्धन्त ते देवा असुराणां पौरुमद्गेन पुरोऽमज्जयन्यत् पुरोऽमज्जयꣳस्तस्मात्पौरुमद्गं पाप्मानमेवैतेन भ्रातृव्यं मज्जयति ॥ १४ ॥

देवाश्चाऽसुराश्च पुरा अस्पर्द्धन्त स्पर्द्धाम(३)कुर्वन्। तत्र ते स्पर्द्धमाना देवाः पौरुमद्गेनाऽनेन साम्ना साधनेन असुराणां पुरः पुराणि निवासस्थानानि अमज्जयन् अशोधयन् असुरैर्व्ययोजयन्नित्यर्थः । यद्यस्मादनेन साम्ना पुरोऽमज्जयन् अशोधयन् तस्मात्पौरुमद्गं एतत्साम पौरुमद्गसंज्ञं जातमित्यर्थः । यत एवं ततो हेतोरिदानीमपि(४) एतेन साम्ना स्तुवन् पाप्मानं पापरूपमेव भ्रातृव्यं शत्रुं मज्जयति शोधयति अपगमयतीत्यर्थः । टुमस्जो शुद्धाविति धातुः ॥ १४ ॥

अथैतस्मिन्नेवाऽभि सोमास इति तृचे सामान्तरं गेयमिति विधत्ते-

गौतमं भवति ॥ १५ ॥

स्पष्टोऽर्थः ॥ १५ ॥

---

१. अपहिंसिषुः इति क. पु.
२. पापनिवृत्तिं परपस्परमिति क. ख. पु. ।
३. कृतवन्त इति. क. ख. पु. ।
४. तुष्टुवान एतेनेति क. ख. पु. ।

अस्य साम्नः पूर्वमाम्नातं ब्राह्मणमत्राऽप्यतिदिशति—

यदेव गौतमस्य ब्राह्मणम् ॥ १६ ॥

गौतमं भवति सामार्षेयवत् स्वर्गाय युज्यत इत्यादिकं तदेव चाऽत्रापि द्रष्टव्यमित्यर्थः ॥ १६ ॥

अथाऽस्मिन् साम्नि पादस्याऽऽद्यन्तयोः स्तोममाम्नायते हावभिसोमास आयवो हा ऊ इति । तदेतदस्मिन्नहनि सङ्गतिमाह—

उभयतः स्तोत्रं तथा ह्येतस्याऽह्नो रूपम् ॥ १७ ॥

उभयतः पादस्य आद्यन्तयोः स्तोभो यस्य तत्तथोक्तम् तथैव खल्वेतस्य तृतीयस्याऽह्नो रूपमुक्तं प्राक्—यदुभयतः स्तोभं तत्तृतीयस्येत्यादिना ॥ १७ ॥

अथाऽस्मिन्नेवाऽऽवृत्ते तृचे सामान्तरं विधत्ते—

अन्तरिक्षं भवति ॥ १८ ॥

पिबा सुतस्य रसिन इत्यस्यामुत्पन्नं सामाऽन्तरिक्षम्, तत्तस्मिन् तृचे गातव्यमित्यर्थः ॥ १८ ॥

साम्नोऽह्नश्च सङ्गतिं दर्शयति—

अन्तरिक्षदेवत्यमेतदहर्यत्तृतीयमन्तरिक्ष एव तदन्तरिक्षेण स्तुवते प्रतिष्ठायै ॥ १९ ॥

यदेतत्तृतीयमहः एतदन्तरिक्षदेवत्यं अन्तरिक्षदेवतार्थं अन्तरिक्षमस्य देवतेत्यर्थः । तथा सति अन्तरिक्षदेवत्यत्वात् अन्तरिक्षे अन्तरिक्षात्मक(१) एवैतस्मिन्नहनि अन्तरिक्षेण साम्ना स्तुवते स्तुवन्ति । निराधारेऽन्तरिक्षे स्तवनात् तच्च प्रतिष्ठायै प्रतिष्ठानाय (२)आस्पदाय भवति॥१९॥

नृभिर्ह्यमाण इति द्विपदा अभि सोमास इत्यस्याऽवसान आम्नाता प्रहिन्वान इति पूर्वेण पादेनाऽभ्यस्तायां तस्यामेकं साम गेयमिति विधत्ते—

आष्कारणिधनं काण्वं भवति ॥ २० ॥

आष्कार आष् इति शब्दो निधनं यस्य तथाविधं काण्वं नृभिर्ह्यमाण इत्यस्यां गातव्यम् । पूर्वयोरह्नोः प्रयुक्तयोर्बृहद्रथन्तरयोर्ये निधने तद्विलक्षणत्वमस्य निधनस्य प्रतीयते ॥ २० ॥

अतो निधनानां बहुत्वात्समृद्धिर्भवतीत्याह—

असिति वै राथन्तरं रूपं हासिति बार्हतं तृतीयमेव तद्रूपमुपयन्ति समृध्यै ॥ २१ ॥

---

१. इत्येतस्मिन्निति क. ख. पु. । २ अभ्यादानायेति. क. ख. पु. ।

अस् इति राथन्तरं रथन्तरसम्बन्धिरूपम्, हासिति बार्हतं बृहतः सम्बन्धि। तयोर्ह्यते निधने। एतदाष् इति रूपं तृतीयमेव उभयविलक्षणमन्यदेव त्रिसंख्यापूरकमुपयन्ति उपगच्छन्ति प्रयुञ्जते। तथा सति निधनबहुत्वापादकमेतत्तृतीयस्य निधनस्योपायनं समृध्यै यजमानस्य पश्वादिभिः समर्द्धनाय अभिवृद्ध्यै सम्पद्यते॥ २१॥

अथ तिस्रो वाच इत्यस्मिन् त्रैष्टुभेऽन्तिमे तृचे एकं साम विदधाति—

आङ्गिरसाꣳ संक्रोशो भवति॥ २२॥

अङ्गिरसां संक्रोश इति साम्नः संज्ञा। तदस्मिन् तृचे गेयमित्यर्थः२२॥

एतत्संज्ञार्थं ब्रुवन् अस्य स्वर्गप्राप्तिसाधनतामाह—

एतेन वा आङ्गिरसः संक्रोशमानाः स्वर्गं लोकमायन् स्वर्गस्य लोकस्याऽनुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः स्तोमः॥ २३॥

अङ्गिरसो नाम केचिदृषयः। ते पुरा एतेन खलु साम्ना साधनेन संक्रोशमानाः संहत्य शब्दं परस्पराह्वानरूपं प्रियवाक्यं वदन्तः स्वर्गं लोकमायन्। अतोऽस्य साम्नोऽङ्गिरसांसंक्रोश इति संज्ञेत्यभिप्रायः। अत एतत्साम स्वर्गस्य लोकस्याऽनुख्यात्यै अनुख्यानाय अनुक्रमेण सम्यगनुभवाय भवति। अपि च तुष्टुवानः स्तुतवानपि स्वर्गात् लोकान्न च्यवते न प्रच्युतो भवति। स्तोमश्च पूर्वोक्तः सप्तदश एव विहितेषु सामसु क्रियमाणेषु सम्पद्यत इत्यर्थः॥ २३॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्य तृतीयः खण्डः॥

अथ चतुर्थः खण्डः॥

अथ होतुः पृष्ठस्य स्तोत्रीयं तृचं विधत्ते—

यद्याव इन्द्र ते शतमिति शतवत्यो भवन्ति॥ १॥

यद्यप्येष प्रगाथस्तथापि(१) प्रग्रथनेन त्रित्वात् शतवत्यः शतशब्दयुक्ता भवन्तीति बहुवचनम्॥ १॥

किं तत इत्याह—

शतवद्वै पशूनाꣳरूपꣳ सहस्रवत्पशूनामेवैताभी रूपमवरुन्धे॥ २॥

१. प्रगाथेनेति. क. ख. पु.।

पशूनां गवादीनां रूपं स्वरूपं शतवत् शतसंख्यायुक्तं तथा सहस्रवत् सहस्रसंख्यायुक्तञ्च भवति पशूनां नानारूपत्वात्। एताभिः शतवतीभिर्ऋग्भिः पशूनामेव तदपरिमितं रूपमवरुन्धे लभते ॥ २ ॥

अथ ब्रह्मणः पृष्ठस्य स्तोत्रीयं तृचं विदधाति—

वयङ्त्वा सुतावन्त इति सतोबृहत्यो वर्षीयश्छन्द आक्रमतेऽनपभ्रंशाय ॥ ३ ॥

वयं घत्वेत्येतास्तिस्रः सतोबृहत्यः स्तोत्रीया भवन्ति। यद्यप्येतास्तिस्रो बृहत्यस्तृतीयपादस्य द्वादशाक्षरत्वात्, सतोबृहत्यास्तु प्रथमतृतीयौ द्वादशाक्षरौ, अयुजौ जागताविति हि तल्लक्षणम्, तथाऽप्येतासां सतोबृहतीत्वम्। तथा सति बृहत्याः सकाशात् वर्षीयो वृद्धतरं सतोबृहत्यात्मकं छन्द आक्रमते अवष्टभ्नोति। किमर्थम्? अनपभ्रंशाय। न्यूनस्य छन्दस आक्रमणं अपभ्रंशः। सामावयवस्य(१) भ्रंशोऽपगमः स्यात् तदभावार्थम् ॥ ३ ॥

अथाऽच्छावाकपृष्ठस्य स्तोत्रीयं तृचं दर्शयन् तस्य प्रतिष्ठाहेतुतामाह—

तरणिरित्सिषासति वाजं पुरन्ध्या युजा। आव इन्द्रं पुरुहूतं न मे गिरेत्यावदक्षरमुद्धतामिव वै तृतीयमहर्यदेव तावदक्षरं भवत्यहरेवैतेन प्रतिष्ठापयति ॥ ४ ॥

तरणिरित्सिषासतीति प्रगाथस्तृचीकृतोऽच्छावाकपृष्ठस्य स्तोत्रीयः तत्र च आव इन्द्रं पुरुहूतं न मे गिरेत्यम्नायते। यद्यपि आव इति उपसर्गो युष्मदादेशश्च पदद्वयम्, तथाऽपि सादृश्यात् आवदक्षरं अवति धातुनिष्पन्नं आव इत्येकं पदं बुद्धौ सन्निधीयते। तृतीयमहश्च उद्धतामिव उत्सादितमिवाऽप्रतिष्ठितं यदेतत् पूर्वोक्तमावदक्षरं भवति एतेनाऽहरेव प्रतिष्ठापयति। अवतेर्हि रक्षणमर्थः। तेन च तत्कार्य्यस्थापनं लक्ष्यते। अतोऽनेन प्रतिष्ठाप्रतिपादनमुपपन्नम् ॥ ४ ॥

अथ पृष्ठस्तोत्रस्य निर्वर्त्तकं साम दर्शयति—

पञ्चनिधनं वैरूपं पृष्ठं भवति दिशां धृत्यै ॥ ५ ॥

दिशं विशं हस् इत्यादीनि पञ्च निधनानि यस्य तत्पञ्चनिधनं वैरूपं यद्याव इति तृचे क्रियमाणं प्रथमं पृष्ठस्तोत्रं भवति। दिशं विशं हस् अश्वाशिशुमतीति देवतावाचकं वाक्यद्वयं(२) स्वाध्यायपाठे वैरूपस्य यो-

१. ऋष इति. क, ख. पु.। २. स्वकीयपाठे इति ख. पु.।

ना उपरिष्टादाम्नातं प्रयोगसमये उत्तरार्द्धर्चस्य प्रथमपादात् पूर्वं दिशं विशमिति प्रयोक्तव्यम्। अथवा शिशुमतीति द्वितीयपादात् पूर्वं एतत्पाद द्वयं देवतावाक्यद्वयं च मिलित्वा चत्वारि निधनानि, इट् इडेति पञ्चमं निधनम्। तदुक्तं सूत्रकृता–देवतापदं देवतापदमिति वैरूपे निधनानि इति। तानि पञ्च निधनान्यस्मिन् साम्नि प्रयुज्यमानानि दिशां प्राच्यादीनां मध्यदिक्सहितानां पञ्चानां धृत्यै धारणाय सम्पद्यते ॥ ५ ॥

अपि चाऽन्नाद्यहेतुश्चैतत्सामेत्याह—

पञ्चपदा पाङ्क्तः पाङ्क्तमन्नमन्नाद्यस्याऽवरुध्यै ॥ ६ ॥

अस्मिन् साम्नि पञ्च निधनानि दृश्यन्ते। पङ्क्तिश्च पञ्चपदा पञ्चभिः पादैरुपेता पाङ्क्तं अन्नं पङ्क्तिसम्बद्धं पञ्चसङ्ख्योपेतं आदेयं पेयं खाद्यं लेह्यं शोष्यमित्यादिभेदेन। एवं परम्परया पञ्चसंख्याद्वारेण एतत्साम अन्नाद्यस्याऽवरुध्यै अवरोधनाय प्राप्तये भवति ॥ ६ ॥

प्रकारान्तरेणैतत्साम स्तौति—

दिशां वा एतत्साम यद्वैरूपं दिशो ह्येवैतेनाऽभिवदति॥७॥

दिशां सम्बन्धि ह्येतत् साम यद्वैरूपाख्यम्। तस्मादेतेन साम्ना दिश एवाऽभिवदति दिशं विशमिति तत्र श्रवणात् ॥ ७ ॥

एवं साम दिक्सम्बन्धेन प्रशस्य ऋतुसम्बन्धेनाऽपि प्रशंसति—

अथ यत्पञ्चनिधनं तेनर्तूनां पञ्च ह्यृतवः ॥ ८ ॥

अथशब्दः प्रकारान्तरद्योतनार्थः। यद्यस्मात्पञ्चनिधनं पञ्चभिर्निधनैरुपेतं वैरूपम्, तेन कारणेन ऋतूनां सम्बन्धि तद्भवति। ननु वसन्ताद्याः षडृतवः। कथं पञ्चसंख्याया ऋतुसम्बन्ध इति तत्राऽऽह–पञ्च हृतव इति पञ्चसंख्याका अपि ऋतवो भवन्ति, हेमन्तशिशिरयोस्समासेनैकत्वात् ॥ ८ ॥

अस्तु दिशां ऋतूनां सम्बन्ध्येतत्साम ततः किमित्यत आह—

ऋतुभिश्च वा इमे लोका दिग्भिश्चाऽऽवृतास्तेष्वेवोभयेषु यजमानं प्रतिष्ठापयति यजमानं वा अनुप्रतितिष्ठन्तमुद्गाता प्रतितिष्ठति य एवं विद्वान् वैरूपेणोद्गायति॥९॥

ऋतुभिर्वसन्ताद्यैः कालविशेषैः दिग्भिः प्राच्यादिभिः इमे पृथिव्यादयो लोका आवृता आवेष्टिताः। अत ऋतवो दिशश्च प्राप्तव्याः। तेष्वेवोभयेषु ऋतुषु दिक्षु च यजमानं प्रतिष्ठापयति उद्गाताऽनेन साम्ना प्रतिष्ठितं

करोति, प्रतितिष्ठन्तं यजमानमनु पश्चादुद्गाता स्वयमपि प्रतितिष्ठति य उद्गाता एवं विद्वान् उक्तप्रकारं ब्राह्मणार्थज्ञानन् वैरूपेणोद्गायति उद्गानं करोति ॥ ९ ॥

दिक्छन्दवत्त्वमनूद्य स्तौति—

दिग्वद्भवति भ्रातृव्यस्याऽपनुत्यै ॥ १० ॥

दिग्वत् दिक्छन्दोयुक्तमेतत्साम भवति भ्रातृव्यस्य शत्रोरपनुत्यै दिग्भ्यः सकाशादपनोदार्थम् ॥ १० ॥

अथाऽस्य प्रथमं निधनमनुवदन् प्राक्प्रदर्शितं दिग्धारणमनेन लभ्यमित्याह—

दिशं विशमिति निधनमुपयन्ति दिशां धृत्यै ॥ ११ ॥

दिशं विशमिति प्रथमं निधनमुपयन्ति ब्रुवन्त्युद्गातारः । दिक्छन्देन सन्निधापितानां सर्वासां दिशां धृत्यै धारणायैतन्निधनं सम्पद्यत इत्यर्थः ॥ ११ ॥

अथ निधनान्तरं दर्शयति—

हसित्युपरिष्टाद्दिशां निधनमुपयन्ति तेन बार्हतम् ॥ १२ ॥

दिशामुपरिष्टाद्दिशं विशमित्यस्मादूर्ध्वं हस् इति निधनमुपयन्ति । तेनैतत्साम बार्हतं बृहतः सम्बन्धि भवति । हसिति हि तस्य निधनं रथन्तरादुत्पत्तेर्वैरूपस्य प्राग्दर्शितत्वात् राथन्तरञ्च भवति ॥ १२ ॥

किमतस्तदाह—

राथन्तरो वा अयं लोको बार्हतोऽसावुभे एव तद्बृहद्रथन्तरयो रूपेणाऽपराध्नोति ॥ १३ ॥

अयं भूलोको राथन्तरो वै रथन्तरसम्बन्धी, असौ द्युलोको बार्हतो बृहतस्सम्बन्धी तत्तथा सति बृहद्रथन्तरयोः सम्बन्धिना रूपेणाऽस्मिन् साम्नि हसिमानेन उभे एव द्यावापृथिव्यौ अपराध्नोति अपेत्यर्थं वीत्यस्यार्थे व्यपराध्नोति लोकद्वयेऽप्यसान्दिग्धः समृद्धो भवति ॥ १३ ॥

रूपद्वयकरणस्य प्रयोजनान्तरमाह—

अनड्वाहौ वा एतौ देवयानौ यजमानस्य यद्बृहद्रथन्तरे तावेव तद्युनक्ति स्वर्गस्य लोकस्य समष्ट्यै ॥ १४ ॥

अनड्वाहौ अनड्वाहाविव एतौ वाहनभूतौ यजमानस्य देवयानौ देवलोकप्राप्तिसाधनौ यत् ये बृहद्रथन्तरे तत्तथा सति बृहद्रथन्तरयोः

सम्बन्धिना रूपेण वैरूपगतेन तावेव देवयानौ वाहौ युनक्ति योजयति । किमर्थम् ? स्वर्गस्य लोकस्य समष्ट्यै सम्प्राप्त्यै ॥ १४ ॥

अथ निधनान्तरमनूद्य स्तौति—

अश्ववद्भवति प्रजात्यै ॥ १५ ॥

अश्वा शिशुमतीत्यश्वशब्दयुक्तं निधनं भवति प्रजात्यै प्रजातिरुत्पत्तिः पुत्रादीनामुत्पत्त्यर्थम् । अश्वा शिशुमतीति शिशुभिर्बालैरश्वैरुपेता बडवा प्रतीयते । अतः प्रजातिहेतुता युक्तेत्यर्थः ॥ १५ ॥

नन्वेतस्मिन् साम्नि बहूनां निधनानां प्रयोगे नीरसत्वं स्यादित्याशङ्क्याह—

यथा मण्डूक आट् करोत्येवं निधनमुपयन्त्यगतयामतायै ॥ १६ ॥

यथा खलु मण्डूको लोके वृष्ट्यनन्तरमाट् करोति आट् आट् इत्येवं शब्दं स्वरभेदेन विलक्षणमेव करोति एवं निधनमप्येते विभिन्नस्वरमेवोपयन्ति उपगच्छेयुः । किमर्थम् ? अयातयामतायै नीरसत्वाभावाय रासातिशयजननार्थमित्यर्थः ॥ १६ ॥

अथैतत्साम संवत्सरे प्रतिष्ठासाधनमित्याह—

द्वादश वैरूपाणि भवन्ति द्वादशमासाः संवत्सरः संवत्सर एव प्रतितिष्ठति ॥ १७ ॥

यद्याव इत्यस्यामृच्येव वैरूपमुत्पन्नम् । तत्तत्र च ऋगक्षरव्यतिरिक्तानि द्वादशसंख्यानि वैरूपाणि वैरूप्यापादकानि रूपाणि भवन्ति । तानि च तु वा हि है इत्यादीनि द्रष्टव्यानि । द्वादशसंख्याका मासाः संहताः संवत्सरो भवति द्वादशमासात्मकः संवत्सर इत्यर्थः । अतोऽस्मिन् साम्नि द्वादशसंख्यायोगात् द्वादशमासात्मके संवत्सर एव प्रतितिष्ठति यजमानः प्रतिष्ठितो भवति ॥ १७ ॥

अथाऽनेन संवत्सरव्याप्तिद्वारेणाऽन्नाद्येहेतुरप्येतत्सामेत्याह—

विरूपः संवत्सरो विरूपमन्नमन्नाद्यस्याऽवरुध्यै ॥ १८ ॥

उक्तप्रकारेण संवत्सरो विविधरूपः । अन्नमपि विरूपं व्रीहियवादिभेदेन विविधाकारम् । अतः संवत्सरान्नयोः सादृश्यात् संवत्सरे प्रतिष्ठानेनाऽन्नाद्यस्य अत्तुं योग्यस्याऽन्नस्याऽवरुध्यै अवरोधाय लाभाय भवति ॥ १८ ॥

अथ वयं घत्वेति तृचे गातव्यं साम दर्शयति—

महावैष्टम्भं ब्रह्मसाम भवत्यन्नाद्यस्याऽवरुध्यै ॥ १९ ॥

महावैष्टम्भाख्यं साम ब्रह्मणः पृष्ठस्तोत्रत्वेन कर्त्तव्यम्। तच्चाऽन्नाद्यस्याऽवरोधार्थं भवति ॥ १९ ॥

तत्कथमन्नेनाऽन्नाद्यस्याऽवरोधस्तदाह--

यदा वै पुरुषोऽन्नमत्त्यथाऽन्तरतो विष्टब्धः ॥ २० ॥

यदा वै यस्मिन् काले हि पुरुषो देही अन्नमत्ति भक्षयति अथाऽनन्तरमेव अन्तरतश्शरीरमध्ये विष्टब्धो विशेषेण स्तब्धो भवति। अतोऽन्नस्य विष्टम्भनहेतुत्वात् वैष्टम्भस्य साम्नो विष्टम्भहेतुभूतस्याऽन्नस्याऽवरोधकत्वम् ॥ २० ॥

अथाऽस्य निधनं प्रदर्शयन् तस्य प्रयोजनमाह—

दिश इति निधनमुपयन्ति दिशां धृत्यै ॥ २१ ॥

दिश इति निधनद्वारा दिशां वैष्टम्भसम्बन्धात्तासां धृति(१)र्द्धारणं नैश्चल्येनाऽवस्थानं वैष्टम्भेन कृतं भवतीत्यर्थः ॥ २१ ॥

अथाऽस्य साम्न आधारभूतानामृचां छन्दोद्वारेण स्तौति—

सतो बृहतीषु स्तुवन्ति पूर्वयोरह्नोः प्रत्युद्यमाय ॥ २२ ॥

सतोबृहतीषु ऋक्षु स्तुवन्ति यस्याः प्रथमतृतीयौ पादौ द्वादशाक्षरौ द्वावष्टाक्षरौ सा सतोबृहती। एतत्सतोबृहतीषु स्तवनं पूर्वयोः प्रथमद्वितीययोरह्नोः प्रत्युद्यमाय प्रतिरूपत्वेनोद्यमनाय उच्छ्रयणाय भवति। तत्र हि बृहतीषु ब्रह्मसाम भवति अस्मिन्नहनि तु सतो बृहतीष्विति अधिकाक्षरत्वात् ताभ्यामहोभ्यामेतदहरुच्छ्रितं भवति ॥ २२ ॥

अथ तरणिरित्सिषासतीति तृचे गातव्यं साम विधत्ते—

रौरवमच्छावाकसाम भवति ॥ २३ ॥

रौरवाख्यं साम अच्छावाकपृष्ठस्तोत्रत्वेन तरणिरित्सिषासतीति तृचे कार्य्यम् ॥ २३ ॥

अनेन साम्ना स्तवनस्य पश्वभिक्रमणहेतुत्वं विवक्षुस्तदर्थं रौरवेणाऽग्नेः सम्बन्धमाह—

अग्निर्वै रुरो रुद्रोऽग्निः ॥ २४ ॥

एतेन खलु साम्ना पुरा रुरोऽत्यर्थं शब्दायमानो रुद्रस्तीक्ष्णो रुद्रात्मको वा अग्निः पशुलक्षणं वीर्य्यं प्राप्नोत्। अत एवाऽस्य रौरवमिति संज्ञा अग्नेः पश्वाधिपत्यञ्च जातम् ॥ २४ ॥

एतच्च तदूदेवा यशो व्यभजन्त तस्याग्नौ रौरवं प्राबृहतेत्यादिना

---

१. रक्षणमिति क. ख. पु.।

प्रागाम्नातम्। किमतो भवति ? तदाह—

अग्निर्वा एतस्य पशूनपक्रमयति यस्य पशवोऽपक्रामन्त्यग्निरेव तस्य पशूनभिक्रमयति यस्य पशवोऽभिक्रामन्ति ॥ २५ ॥

यस्मादुक्तप्रकारेण रुद्रात्मकोऽग्निरनेन साम्ना पशून्(१)प्रापत् तस्मादग्निरेव एतस्य पशूनपक्रमयत्यपगमयति यस्य यजमानस्य पशवोऽपक्रामन्त्यपगच्छन्ति। यस्य च पशवोऽभिक्रामन्ति अभिमुखमाप्नुवन्ति यस्य यजमानस्याऽग्निरेव तस्य प्रशूनभिक्रमयति प्रापयति अपक्रमणाभिक्रमणयोरुभयोरग्निरेव कारयितेत्यर्थः॥ २५ ॥

इत्थमग्नेः पशुस्वामित्वं जानतो रौरवेण स्तुवतः फलमाह—

अभ्यभ्येवाऽस्य पशवः क्रामन्ति य एवं विद्वान् रौरवेण स्तुवते ॥ २६ ॥

एवमुक्तमर्थं विद्वान् जानन् यो रौरवेण स्तुवते स्तौति अस्य पशवोऽभ्यभ्येव क्रामन्ति सर्वदाऽभिमुखा एव प्राप्नुवन्ति। न तु कदाचित्पराङ्मुखा गच्छन्तीत्यर्थः॥ २६ ॥

अस्मिन् साम्नि विद्यमानमिडाविशेषं प्रदर्श्य तृतीयेऽहनि(२) तस्याऽऽनुरूप्यमाह—

परिष्टुब्धेडं तथा ह्येतस्याऽह्नो रूपꣳ स्तोमः ॥ २७ ॥

परिष्टुब्धा परितः स्तोभयुक्ता इडा औ २३ हो वा हो ५ इडा इत्येवंरूपा यस्य तत्परिष्टुब्धेडं इदं रौरवम्, तथा ह्येतस्य तृतीयस्याऽह्नो रूपं प्रागुक्तं 'परिष्टुब्धेडं तृतीयस्ये'ति। एतेषु पृष्ठस्तोत्रेषु स्तोमः पूर्वोक्त एव सप्तदशः कार्य्यः इत्यर्थः॥ २७ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्य चतुर्थः खण्डः॥

अथ पञ्चमः खण्डः॥

अथाऽस्मिंस्तृतीयेऽहन्यार्भवपवमानस्याऽऽद्यं स्तोत्रियं तृचं दर्शयित्वा तस्य(२) तत्राऽऽनुपूर्व्यमाह—

"तिस्रो वाच उदीरत" इति तृतीयस्याऽह्नो रूपं तेन

---

१. आप्नोदिति. क. पु. २. तत्राऽऽनुगुण्यमाहेति. क. पु.

तृतीयमहरारभन्ते ॥ १ ॥

'तिस्रो वाच' इत्ययमाद्यस्तृच आर्भवपवमानस्य । एतच्च उच्छब्द-त्रिशब्दयोगात् तृतीयस्याऽह्नो रूपम् । तेन तार्तीयरूपयुक्तेन तृचेन तृतीयमहरारभन्ते गृह्णन्ति ॥ १ ॥

एतदेवोपपाद्यते--

उद्वद्वा एतत् त्रिवदहर्यत् तृतीयं तदेव तदभिवदति ॥ २ ॥

एतदहरुद्वद्वै उच्छब्दयुक्तमेव, तथा त्रिवत् त्रिशब्दयुक्तं च । उद्ववत्त्रिवदित्यादिना तृतीयस्याऽह्नो रूपम् , तथा परिसङ्ख्यानात् । तदेवाह-तृतीयाहस्सम्बद्धं रूपं तन्मन्त्रवाक्यमभिवदति प्रकाशयति ॥२॥

अथाऽपरां स्तोत्रीयामृचं विदधाति—

"आ सोता परिषिञ्चते"ति परिवत्यो भवन्ति ॥ ३ ॥

आ सोतेत्याद्यास्तिस्र ऋचः परिवत्यः परिशब्दयुक्ता भवन्ति । स्तोमातिरेकपरिहाराय(१) तास्वेकस्यामेव यथाभ्यस्यमानं वाचस्साम गातव्यम् , अन्ये तु विकल्पिता इत्यर्थः ॥ ३ ॥

(२)तदेव प्रशंसति—

अन्तो वै तृतीयमहस्तस्यैताः पर्य्याप्त्यै ॥ ४ ॥

इदं तृतीयमहरन्तो वै । अनेनैकस्य त्रिरात्रस्य परिसमापनात्तस्याऽह्न एताः परिवत्य ऋचः परिसमाप्तिसूचकत्वात् पर्य्याप्त्यै परिसमाप्त्यै भवन्ति ॥ ४ ॥

अथाऽपरां स्तोत्रीयां विदधाति—

'सखाय आनिषीदते'त्युद्धतमिव वै तृतीयमहर्यदाह निषीदतेत्यहरेवैतेन प्रतिष्ठापयति ॥ ५ ॥

'सखाय आनिषीदते'त्येका स्तोत्रीया । सा च निषीदतेति निषदनलिङ्गात् अह्नः प्रतिष्ठाहेतुरित्याहोद्धतमित्यादिना । उद्धतमिव वा उत्खातमिव वै खल्वेतत् तृतीयमहर्निषीदत निषण्णा भवत यथास्थानमुपविशतेति तत्र वाक्यं यदाह, एतेन निषादनप्रतिपादकेनाऽहरेवेदं प्रतिष्ठापयति यथास्थानं प्रतिष्ठितं करोति ॥ ५ ॥

---

१. तिसृष्वेकस्यामेवर्चि विधास्यमानमिति. क. ख. पु.

२. तदेतत्प्रशंसतीति. क. पु.

(१)अथाऽपरां स्तोत्रीयां विधत्ते—

'सुतासो मधुमत्तमा' इत्यनुष्टुभः सत्यो जगत्यो रूपेण जागतꣳ ह्येतदहः ॥ ६ ॥

सुतासो मधुमत्तमा इति तिस्र ऋचः कार्याः। ताश्चाऽनुष्टुभः सत्यो रूपेण जगत्यो भवन्ति। तथा हि मधुमत्तमा(२) इत्यनेन अतिशयेन मधुरत्वं प्रतिपाद्यते। तच्च तृतीयसवनस्य रूपं आशिरावनयनेन मधुरत्वं रसातिशयस्य करणात्। तृतीयसवनञ्च जगत्याः स्थानम्। अतः परम्परया अतिशयेन माधुर्य्यं जगत्या रूपमिति तद्वाचको मधुमत्तमशब्दोऽपि जागतं रूपं भवति तद्युक्तत्वात् स्वभावतोऽनुष्टुभोऽपि जगत्यो भवन्ति। एतत्तृतीयमहश्च जागतम्। अत आसामस्मिन्नहनि सङ्गतिः ॥ ६ ॥

अथ तृचान्तरं विधत्ते—

"पवित्रं ते विततं ब्रह्मणस्पत" इति ॥ ७ ॥

स्पष्टोऽर्थः ॥ ७ ॥

विततशब्दसूचितां तृचस्य तृतीयेऽहनि सङ्गतिमाह—

विततमिव वा इदमन्तरिक्षमन्तरेमे अन्तरिक्षदेवत्यमेतदहर्य्यत्तृतीयं तदेव तदभिवदति ॥ ८ ॥

इमे द्यावापृथिव्यावन्तरा द्यावापृथिव्योर्मध्ये इदं दृश्यमानमन्तरिक्षं विततं विस्तृतमिव वै। अतोऽनेन विततशब्देनाऽन्तरिक्षमेव सूचितं भवति। शिष्टं स्पष्टम् ॥ ८ ॥

तिस्रो वाच इति प्रथमे तृचे गातव्यं साम विधाय प्राग्वदत्र ब्राह्मणञ्चाऽतिदिशति—

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥ ९ ॥

सिद्धमेतत् ॥ ९ ॥

अथ तस्मिन्नेव तृचे पुनरावृत्ते सामन्तरं विधत्ते—

पाष्ठौहं भवति ॥ १० ॥

पष्ठौहा ऋषिणा दृष्टं पाष्ठौहम्। "(३)दृष्टं साम"त्यण्प्रत्यये भसंज्ञायां "(४)वाह ऊट्" इत्यूड्भावे(५) "एत्येधत्यूट्सु"ति वृद्धिः ॥ १० ॥

अथैतत्साम निधनद्वारेण चतुर्थस्याऽहः सम्बन्धहेतुरिति दर्शयं-

---

१. अथाऽपरं स्तोत्रीयं तृचमिति. क. ख. पु. । २. इत्यनेनेति. नास्ति ख. ख. पु.। ३. पा. सू. ४.२.७. ४. पा. सू. ६. ४. १३२. ५. पा. सू. ६. १. ८९.

स्तस्योक्तमेव निर्वचनमभिप्रेत्य पष्ठवाहसम्बन्धमाह—

पष्ठवाड्वा एतेनाऽङ्गिरसश्चतुर्थस्याऽह्नो वाचं वदन्तीमुपाशृणोत्स होवाचेति निधनमुपैत्तदस्याऽभ्युदितं तदहरवसत् ॥ ११ ॥

पष्ठवाण्णामाऽङ्गिरसः पुरा एतेन (१)साम्नो निधनेन चतुर्थस्य वक्ष्यमाणस्याऽह्नः सम्बन्धिनीं वाचं स्तुतशस्त्रात्मिकां वदन्तीं शब्दायमानां तृतीयेऽहनि स्थित्वा उपाशृणोत् श्रुतवान् । तदनन्तरं स ऋषिः होवाचेति तां वाचं सम्बोध्य तदेव शब्दरूपमस्य साम्नो निधनमुपैत् उपागच्छत् । अस्य च पाष्ठौहस्य ह्यवसाने पुरा पष्ठवाक् होपेतन्निधनमेव हाऊ वा औ वा २३४५ इति व्यासेन अन्त्यवर्णलोपेन चाऽधीयते, तन्निधनं अस्य तृतीयस्याऽह्नस्सम्बन्धि अभ्युदितं चतुर्थस्याऽह्नो वाचमभिलक्ष्योदितं उच्चारितं तच्चतुर्थमहरवसत् अवासयत् ॥ ११ ॥

आ सोता परीत्यस्यां गातव्यं साम विधत्ते—

वाचः साम भवति ॥ १२ ॥

वाचो वाग्देवतायास्सम्बन्धितया दृष्टं साम वाचस्साम । तदस्यां गेयं भवति ॥ १२ ॥

यज्ञसमृद्धिहेतुतामाह—

वाग्वै द्वादशाहो वाच्येव तद्वाचा स्तुवते यज्ञस्य प्रभूत्यै ॥ १३ ॥

द्वादशाहस्य वागात्मकत्वं प्रागुक्तम् । तत्तथा सति वाचि वागात्मक एव द्वादशाहे वाचा दृष्टत्वात् सामाऽपि वाक् । वागात्मकेन साम्ना स्तुवते स्तुवन्ति । किमर्थम् ? यज्ञस्याऽस्य प्रभूत्यै प्रभूतिः समृद्धिः तदर्थाय ॥ १३ ॥

वाचस्साम्नश्चोक्तमेव सम्बन्धं प्रदर्शयन् आख्यायिकामुखेनाऽस्य साम्नो दर्शनहेतुतामाह—

निष्किरीयाः सत्रमासत ते तृतीयमहर्न प्राजानꣳस्तानेतत्साम गायमानान् वागुपाप्लवत् तेन तृतीयमहः प्राजानꣳस्तेऽब्रुवन्नियं वाव नस्तृतीयमहरदीदृशादिति तृतीयस्यैवैषाऽह्नो दृष्टिः ॥ १४ ॥

---

१. साम्ना साधनेनेति. क. पु. ।

निष्किरीयाः निष्किरो नाम शाखाविशेषो गोत्रविशेषो वा । तत्सम्बन्धिनो यजमानाः पुरा सत्रं द्वादशाहाख्यं आसताऽन्वतिष्ठन्। ते तत्रत्यं तृतीयमिदमहर्न प्राजानन्। तान् तथाविधान् यजमानानेतत्साम गायमानान् गानं कुर्वतः वाक् उपाप्लवत् उपागच्छत्। प्लुगतौ भौवादिकः तेन वाचा गीयमानेनाऽनेन साम्ना तृतीयमिदमहस्ते प्राजानन् प्रकर्षेणाऽनुष्ठानक्रममबुध्यन्त । ज्ञात्वा च ते पुनरब्रुवन् इयं खलु वाक् नोऽस्मान् तृतीयमहरदीदृशत् दर्शितवती । दृशेर्ण्यन्तात् लुङि चङीति ऋकारादेशस्य विकल्पे प्राप्ते "नित्यं छन्दसी"ति नित्यमृकारादेशे कृते च द्विवचनादिके कार्ये रूपमेतददीदृशदिति । यस्मादेवमब्रुवन् तस्मात्तृतीयस्याऽह्न एषा दृष्टिः दर्शनसाधनं चक्षुरिन्द्रियस्थानम् ॥ १४ ॥

अथ 'सखाय आनिषीदते'त्यस्यां गातव्यं साम विधत्ते—

शौक्तं भवति ॥ १५ ॥

शुक्तिना दृष्टं साम शौक्तम् ॥ १५ ॥

इममेव सम्बन्धं प्रदर्शयन् अस्य साम्न आर्जवेन स्वर्गप्राप्तिहेतुत्वं दर्शयति—

शुक्तिर्वा एतेनाऽऽङ्गिरसोऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्याऽनुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥ १६ ॥

शुक्तिर्नामाऽऽङ्गिरस ऋषिरेतेन साम्ना अञ्जसा ऋजुगामिना मार्गेण स्वर्गं लोकमपश्यत् अजानात्। दृष्ट्वा च तं लोकं प्राप्य चिरकालमतिष्ठदित्यर्थः । शिष्टं स्पष्टम् ॥ १६ ॥

'सुतासो मधुमत्तमा' इति तृच एकं साम विधाय पूर्वमाम्नातं तत् स्तावकं ब्राह्मणञ्चाऽतिदिशति—

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥ १७ ॥

एतदपि सिद्धं प्राक् ॥ १७ ॥

अथाऽस्मिन्नेवाऽऽवृत्ते तृचे सामान्तरं (१)विदधाति—

त्वाष्ट्रीसाम भवति ॥ १८ ॥

त्वष्टुर्दुहितरस्त्वाष्ट्र्यः । ताभिर्दृष्टं साम त्वाष्ट्रीसाम । तत् 'सुतासो मधुमत्तमा' इति तृचे गातव्यम् ॥ १८ ॥

अस्य साम्नस्त्वाष्ट्रीसम्बन्धं प्रतिपादयन् कामप्राप्तिहेतुतां विव-

---

१. विधीयत इति ग. पु. ।

श्रुराह—

इन्द्रं वा अक्ष्यामयिणं भूतानि नाऽस्वापयꣳस्तमेतेन त्वाष्ट्र्योऽस्वापयꣳस्तद्वाव तास्तर्ह्यकामयन्त ॥ १९ ॥

अक्ष्यामयिणं अक्ष्णोरामयो व्याधिरस्याऽस्तीत्यक्ष्यामयी, तथाविधमिन्द्रं खलु पुरा अन्यानि भूतजातानि नाऽस्वापयन् स्वापयितुं नाऽशक्नुवन्। एवं स्थिते त्वाष्ट्र्यः त्वष्टुर्दुहितर एतेन साम्ना अस्वापयन्। यथा खलु लोके गानविशेषैः अक्षिरोगादिनिमित्ते स्वापरहितान्बालान् स्वापयन्ति, एवमेव श्राव्येणैव सामगानेन (१)अक्ष्यामयं विस्मार्य्य स्वापमकारयन्नित्यर्थः। तस्मिन् काले तद्वाव तदेव खलु स्वापनं तास्त्वाष्ट्र्यः अकामयन्त। कामितञ्च तत् एतेन साम्ना निष्पन्नम् ॥ १९ ॥

किं तत इत्याह—

कामसनि साम त्वाष्ट्रीसाम काममेवैतेनाऽवरुन्धे॥२०॥

यदिदं त्वाष्ट्रीसाम एतत्कामसनि यद्यत्कामयते तस्य सर्वस्य सनि दातृ सकलकाम्यमानफलप्रदं साम। तस्मादेतेन साम्ना कामं काम्यमानमभिलषितं सर्व्वमेव फलजातं अवरुन्धे लभते ॥ २० ॥

तथेदं सामोत्कृष्टवस्तुजन्महेतुरिति विवक्षयाऽऽह—

इन्द्रो वृत्राद्बिभ्यद्गां प्राविशत्तं त्वाष्ट्र्योऽब्रुवञ्जनयामेति तमेतैः सामभिरजनयꣳजायामहा इति वै सत्रमासते जायन्त एव ॥ २१ ॥

इन्द्रः खलु पुरा वृत्रादसुरादबिभ्यत् भीतः सन् गां प्रविष्टवान्। तस्मिन् समये त्वाष्ट्र्यः त्वष्टुर्दुहितरोऽब्रुवन् तमिन्द्रं जनयाम प्रादुर्भूतं वृत्रस्य पुरस्तात् अवस्थाय योद्धुं शक्तं करवामेति। तमिन्द्रमेतैस्त्वाष्ट्रीसामभिरजनयन्। इदमेकं त्वाष्ट्रीसाम। अन्यान्यपि विद्यन्त इत्यभिप्रायेण बहुवचनम्। जायामहे उत्कृष्टरूपेण जाताः प्रादुर्भूताः प्रशस्ता भवाम इति खल्वभिप्रायेण सत्रमासते सत्रयागं कुर्व्वन्ति। अतोऽनेन साम्ना प्रयुक्तेन जायन्त एव उक्तप्रकारविशिष्टरूपा भवन्त्येव ॥ २१ ॥

अथ पवित्रन्त इत्यन्त्ये तृचे गातव्यं साम विधत्ते—

अरिष्टं भवति ॥ २२ ॥

स्पष्टम् ॥ २२ ॥

एतस्य साम्नः करणमहिंसाहेतुरिति प्रतिपिपादयिषुस्तदर्थं तावः

---

१. अक्ष्यामयाविनं स्वापयितुमकामयन्निति. क. ख. पु.।

दरिष्टसञ्ज्ञां (१)विवक्षुराह--

देवाश्च वा असुराश्चाऽस्पर्द्धन्त यं देवानामघ्नन्न स समभवद्यमसुराणाꣳसꣳसोऽभवत्ते देवास्तपोऽतप्यन्त त एतदरिष्टमपश्यꣳस्ततोयं देवानामघ्नत् सꣳसोऽभवद्यमसुराणां न स समभवदनेनाऽरिषामेति तदरिष्टस्यारिष्टत्वमरिष्टया एवाऽरिष्टमन्ततः क्रियते ॥ २३ ॥

देवाश्च वा असुराश्च पुरा अस्पर्धन्त स्पर्द्धमाना अयुध्यन्त। तत्र देवानां मध्ये यमसुरा अघ्नन् आयुधैः प्राहरन् स हतः न समभवत् संभूतः पुनरुत्थितो नाऽभूत्। तथा असुराणां मध्ये यं देवा अघ्नन् स पुनः समभवत् प्रहारं तिरस्कृत्य पुनरुत्थितोऽभूत्। एवं स्थिते देवास्तपोऽतप्यन्त अहिंसासाधनं किमिति तत्पर्य्यालोचने तदत्र तपःशब्दवाच्यं तदकुर्व्वन्नित्यर्थः। एवं तपस्तप्यमानास्ते देवा एतदरिष्टं साम अहिंसासाधनमपश्यन्त अपश्यन्। तत एतद्दर्शनानन्तरं देवानां मध्ये यमसुरा अघ्नन् स पुनः समभवत्तथा असुराणां मध्ये यं अघ्नन् देवाः स पुनर्न समभवत् पुनरुत्पन्नो नाऽभूत्। एतस्मिन्नन्तरे अनेन खलु दृष्टेन साम्ना वयं नारिषाम अरिष्टा असुरैर्हिंसिता नाऽभवामेत्यमन्यन्त। तत्तस्मात् अरेषणसाधनत्वात् अरिष्टस्य साम्नो अरिष्टमिति नाम सम्पन्नम्। रिष हिंसायामिति धातुः। एवञ्चारिष्ट्या एव अरिष्टिः अहिंसा। तदर्थमेवारिष्टं साम अन्ततः पवमानस्याऽन्ते क्रियते ॥ २३ ॥

अपि चेदं साम निष्पद्यमानस्य प्रथमस्य त्रिरात्रस्य धृतिहेतुरित्याह—

त्रीडं भवति त्रिरात्रस्य धृत्यै ॥ २४ ॥

तिस्रः इडा यस्मिन् तत्त्रीडम्, तादृशमेतत्साम भवति। अस्य ह्यवसाने हो इडा हो इडा हो २३४५ इडा इति इडाशब्दः त्रिरभ्यस्यते। तस्य त्रिरात्रस्य पूर्व्वे द्वे अहनी, इदमेकमिति त्रयाणामहां धृत्यै धारणाय भवति ॥ २४ ॥

तत्रोत्तमायामिडायां विद्यमानं किञ्चिद्धर्म्मविशेषमनूद्य तस्योत्तरेणाऽह्ना सन्तानहेतुतामाह—

द्रवन्तीमिडामुत्तमामुपयन्ति चतुर्थस्याऽह्नः सन्तत्यै स्तोमः ॥ २५ ॥

---

१. निर्विवक्षुरिति. क. ख. पु.।

तासूत्तमामन्त्यामिडां द्रवन्तीं द्रुतमुच्चार्य्यमाणामुपयन्ति उपगच्छन्त्युद्गातारः। किमर्थम्? चतुर्थस्य वक्ष्यमाणस्याऽङ्गस्सन्तत्यै सन्धानायसम्बन्धार्थम्। स्तोमः पूर्व्वोक्तस्सप्तदश एव। एवं सामसु क्रियमाणेषु निष्पद्यत इत्यर्थः॥ २५॥

इति ताण्डयमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्थ पञ्चमः खण्डः॥

अथ षष्ठः खण्डः॥

अथ प्राकृतमेवाऽग्निष्टोमसाम तत्र न किञ्चिद्वक्तव्यमस्तीत्यभिप्रायेण त्रयाणामुक्थ्यानां स्तोत्रीयास्तृचः प्रदर्श्यन्ते। तत्र प्रथमस्योक्थस्तोत्रस्य स्तोत्रीयं तृचमाह—

प्रमꣳहिष्ठाय गायतेति॥ १॥

स्पष्टोऽर्थः॥ १॥

तदेतद्रूपं प्रशंसति—

यद्गायतेति महस एव तद्रूपं क्रियते॥ २॥

यद्गायतेति गातॄणां बहुत्वं तन्महसस्तेजस एव रूपं तेन क्रियते। लोके हि तेजस्विनामेव राज्ञां बहवो गायका भवन्तीति॥ २॥

अथ द्वितीयस्योक्थ्यस्य स्तोत्रीयं तृचं प्रदर्श्य तृतीयसवनयोग्यतां दर्शयति—

'तं ते मदङ्गणीमसी'ति मद्वद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति॥ ३॥

व्याख्यातमेतत् 'प्रसोमासो मदच्युत' इत्यत्र॥ ३॥

अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं दर्शयति—

'श्रुधीहवं तिरश्च्या' इति श्रुत्या एव॥ ४॥

श्रु श्रवण इत्यस्मान्निष्पन्नस्य श्रुधीशब्दस्य कीर्त्तनात् अयं तृचः श्रुत्यै श्रवणायैव बाधिर्य्याभावाय सम्पद्यते॥ ४॥

अथ प्रथमे उक्थ्ये यो विहितस्तृचस्तस्मिन् गेयं साम दर्शयति—

प्रमꣳहिष्ठीयं भवति॥ ५॥

प्र मंहिष्ठाय गायतेति योनाद्युत्पन्नं साम प्रमंहिष्ठाशब्दयोगात् प्रमंहिष्ठीयम्। तदत्र प्रमंहिष्ठेति तृचे कर्त्तव्यम्॥ ५॥

तदेतत्स्तौति—

प्रमꣳहिष्ठीयेन वा इन्द्रो वृत्राय वज्रं प्रावर्त्तयत्तमस्तृणुत भ्रातृव्यवान् प्रमꣳहिष्ठीयेनोक्थानि प्रणयेत स्तृणुते भ्रातृव्यं वसीयाꣳ आत्मना भवति ॥ ६ ॥

प्रमंहिष्ठीयेनाऽनेन साम्ना खलु पुरा इन्द्रो वृत्राय वृत्रं हन्तुं वज्रं प्रावर्त्तयत् प्राक्षिपत्। तदनन्तरं तं अस्तृणुत अहिंसीत्। स्तृ हिंसायामिति धातुः। अत इदानीमपि भ्रातृव्यवान् विद्यमानशत्रुर्यजमानः प्रमंहिष्ठीयेनाऽनेन साम्ना उक्थानि प्रणयेत। सामान्याभिप्रायं बहुवचनम्। प्रथममुक्थस्तोत्रं स्तुवीत। ततो भ्रातृव्यं शत्रुं प्रति प्रयुक्तेनाऽनेन साम्ना स्तृणुते हिनस्ति। अपि च वसीयान् वसुमत्तमः श्रेष्ठश्चाऽऽत्मना स्वयमेव भवति ॥ ६ ॥

अथ 'तं ते मदं गृणीमसी'ति विहिते तृचे गातव्यं साम दर्शयति—

हारिवर्णं भवति ॥ ७ ॥

हरिवर्णेन ऋषिणा दृष्टं साम हारिवर्णम् ॥ ७ ॥

अथाऽस्य साम्नो निधनं शोकापहतिहेतुरिति विवक्षुस्तदर्थमाख्यायिकमाह—

इन्द्रश्च वै नमुचिश्चाऽसुरः समदधातां न नो नक्तन्न दिवाऽहनन्नाऽऽर्द्रेण न शुष्केणेति तस्य व्युष्टायामनुदित आदित्येऽपां फेनेन शिरोऽछिनदेतद्वै न नक्तं न दिवा यत् व्युष्टायामनुदित आदित्य एतन्नाऽऽर्द्रन्न शुष्कं यदपां फेनस्तदेनं पापीयां वाचं वददन्नवर्त्तत वीरहन्न दुहो दुह इति तन्नर्चा न साम्नाऽपहन्तुमशक्नोत् ॥ ८ ॥

इन्द्रश्च नमुचिर्नामाऽसुरश्च पुरा समदधातां सन्धानमकुर्व्वाताम्। नावयोरन्यतरोऽपि नक्तं रात्रौ न हनन् न हन्तव्यः, दिवा अहन्यपि तथा न हन्तु, तथाऽऽर्द्रेण च न हन्तु, नाऽपि शुष्केण नीरसेन वज्रादिनेति। एतत् उक्तं भवति—इन्द्रः सर्वानसुरान्जित्वा सर्व्वेभ्योऽसुरेभ्योऽधिकं नमुच्याख्यमसुरं बलात् जग्राह। स चाऽसुरः इन्द्रादधिकबलः सन् तमेव जग्राह। गृहीत्वा च त्वां विसृजामि, यदि त्वं मां अहोरात्रयोः आर्द्रेण शुष्केण मा हन्या इति। एवमात्मकं सन्धायकं वाक्यमिन्द्रं प्रत्युक्तवानिति।

तस्याऽयमभिप्रायः—अहोरात्रव्यतिरिक्तकालोऽपि नाऽस्ति आर्द्रशुष्कविलक्षणं साधनमपि नाऽस्ति, यस्मिन् काले तेन साधनेन मां हन्यादिति । एतच्च तैत्तिरीयकेऽतिस्पष्टमाम्नातम्-'इन्द्रो वृत्रं हत्वा । असुरान् पराभाव्य । नमुचिमासुरं नाऽलभत । तं शच्या गृह्णात् । तौ समलभेतां सोऽस्मादभिसृततरोऽभवत् । सोऽब्रवीत् सन्धां सन्दधावहै । यत् वाचः क्रूरमस्यामि । न मा शुष्केण नार्द्रेण हनः । न दिवा न नक्तमि'त्यादिना । एवं सन्धानानन्तरमिन्द्रः व्युष्टायामुषसि जातायां आदित्ये चाऽनुदिते उदयमप्राप्ते योऽन्तरालः कालः तस्मिन् तस्य नमुचेः शिर अपां विकारेण फेनेन वज्रीकृतेनाऽच्छिनत् द्वैधीकृतवान् अवधीदित्यर्थः । एवं कृते पूर्वकृतस्य सन्धानस्याऽविहतिरुच्यते-एतद्वा इत्यादिना । एतद्वै एतत् खलु न नक्तं न रात्रिः न दिवा यद्व्युष्टायामुषसि जातायामादित्ये चाऽनुदिते । एतच्च नाऽऽर्द्रो न शुष्कः यदपां फेनः । एवं पूर्वकृतसन्धानाविरोधेन नमुचौ हते एतमिन्द्रमनु पश्चात् तन्नमुचिहननं पापीयां निकृष्टां वाचं वदत् अकथयत् अवर्त्तयत । काऽसौ पापी वाक् उच्यते? हे वीरहन् वीरस्य शत्रुभूतस्य नमुचेर्हन्तः, अद्रुहो द्रुह इति वीप्सायां द्विर्वचनम्, द्रोहं कृतवानसि इति । एवमाक्रुश्यमाण इन्द्रः तद्वचनं ऋचा ऋगात्मकेन मन्त्रेण हन्तुं नाऽशक्नोत् । तथा साम्ना गानविशिष्टेन मन्त्रेण अपहन्तुं विनाशयितुं नाऽशक्नोत् ॥ ८ ॥

तर्हि केनाऽपहतवानिति तदाह—

हारिवर्णस्यैव निधनेनाऽपाहत ॥ ९ ॥

हरिश्रियां इत्येवं रूपेण हारिवर्णस्य निधनेनैव तत्पापीयां वाचं प्रकटयन्नमुचिहननं अपाहत अपहतवान् । ततः तेजस्वी श्रीमांश्चाभूत् ॥ १० ॥

(१)अतोऽद्याप्येनेन निधनेन एतत् फलं भवतीत्याह—

अपशुचꣳहते हारिवर्णस्य निधनेन श्रियꣳ हरश्चोपैति तुष्टुवानः ॥ १० ॥

अद्यतनोऽपि तुष्टुवानः स्तुवन् हारिवर्णस्य निधनेन हरिश्रियामित्यनेन प्रयुज्यमानेन शुचं शोकमपहते हरिश्रियामिति पदद्वयेनोपस्थापितं श्रियं सम्पदञ्च हरस्तेजश्चेत्येतत् द्वयं उपैति उपगच्छति प्राप्नोति ॥ १० ॥

---

१. अतोऽद्यापीति. क. पु. ।

अथ तृतीये तृचे गेयं साम दर्शयति—

तैरश्चयं भवति ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

आख्यायिकया ऽस्य साम्नस्संज्ञां (१)निर्ब्रुवन् पापापहतिहेतुतामाह—

आङ्गिरसः स्वर्गं लोकं यन्तो रक्षाꣳस्यन्वसचन्त तान्येतेन तिरश्चाऽङ्गिरसस्तिर्य्यङ् पर्य्यवैद्यात्तिर्य्यङ्पर्यवैत्तस्मात्तैरश्चयं पाप्मा वाव स तानसचत तं तैरश्चयेनाऽपाघ्नताऽपपाप्मानꣳहते तैरश्चयेन तुष्टुवानः ॥ १२ ॥

पुरा कृतयागानुष्ठानात् स्वर्गं लोकं यन्तो गच्छन्तोऽङ्गिरसो रक्षांसि राक्षसा अन्वसचन्त अन्वगच्छन् समवेताः संसृष्टा अभूवन् । षच समवाय इति धातुः । तानि रक्षांसि अङ्गिरसस्तिर्य्यङ् तिरोऽञ्चन् एतत्संज्ञ ऋषिः तिरसा तिरोऽञ्चता तिर्य्यक् वर्त्तमानेनैतेन साम्ना पर्य्यवैत्(२) परितोऽगच्छत् । यत् यस्मादनेन साम्नाऽङ्गिरसस्तिर्यङ् पर्यवैत परितोऽगच्छत् , तस्मात्तैरश्चयं तिरश्चसम्बन्धादस्य साम्नः तैरश्चयमिति नाम सम्पन्नम् । अस्तु प्रकृते किमायातम् ? उच्यते—पाप्मा वाव सः पापमेव सः पूर्वोक्तरक्षोरूपेण वर्त्तमानः तानङ्गिरसोऽसचत समवेतस्सङ्गतोऽभूत् । तं पाप्मानं तैरश्चयेन साम्ना अपाघ्नत अपहतवन्तः । तस्मादद्यतनोऽपि तैरश्चयेन तुष्टुवानः पाप्मानमपहते ॥ १२ ॥

अथैतेषु त्रिषूक्थेषु स्तोमकल्पिं प्रदर्श्य विशेषफलहेतुतामाह—

सप्तदश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥ १३ ॥

गतार्थमेतत् ॥ १३ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्य षष्ठः खण्डः ॥

अथ सप्तमः खण्डः ॥

अथ दशरात्रस्य चतुर्थेऽहनि सर्व्वेष्वपि स्तोत्रेषु एकविंश एव स्तोमः । तत्र बहिष्पवमानस्य एकविंशतिसंख्या स्तोत्रीया ऋचः । तस्याऽऽद्यं स्तोत्रीयं तृचं दर्शयति—

१. निर्वचन्निति. क. पु. । २. परितो वाऽगच्छत् अजानादिति क. पु. ।

'प्र त आश्विनीः पवमानधेनव' इति चतुर्थस्याऽऽह्नः प्रतिपद्भवति ॥ १ ॥

प्र त आश्विनीरिति तृचः चतुर्थस्य दाशरात्रिकस्याऽह्नः प्रतिपद्भवति प्रथमस्तृचो भवति । बहिष्पवमानस्याद्यस्तृचः इत्यर्थः ॥ १ ॥

अस्मिन् चतुर्थेऽहनि तस्य तृचस्य सङ्गतिमाह—

आप्ते त्रिरात्रे रूपेण गायत्र्यो द्वितीयं प्रयन्ति प्रेति वै गायत्र्या रूपम् ॥ २ ॥

दशरात्रे दशममहर्विहाय त्रयस्त्रिरात्राः पूर्वं विभज्य स्तुताः । तत्र प्रथमे त्रिरात्रे गायत्रमहः प्रथमम्, त्रैष्टुभं द्वितीयम्, जागतं तृतीयम् । यस्मिन् त्रिरात्रे आप्ते समाप्ते सति गायत्रीत्रिष्टुब्जगतीनां गतैस्तृभिरहोभिः समाप्तत्वात् पुनरपि द्वितीये त्रिरात्रे गायत्रीत्रिष्टुब्जगतीभिरेव पूर्ववत् क्रमेणाऽह्नां कल्पयितव्यत्वात् विहितस्य तृचस्य जागतत्वात् तत्र मुख्यगायत्र्यसम्भवात्तत्सद्भावो भाक्त इत्यभिप्रायेणाऽऽह गायत्र्या रूपेण गायत्रीछन्दसो रूपेण द्वितीयं त्रिरात्रं प्रयन्ति प्रक्रमन्ते । किं तद्गायत्र्या रूपम्; यत्सद्भावादस्य तृचस्य गायत्रत्वं स्यादिति । तदुच्यते प्रेति प्र इत्ययमुपसर्गः खलु गायत्र्याऽनुरूपं एति प्रेत्याशुमदित्यादिना गायत्र्यादिस्तदूपस्याऽभिहितत्वात् ॥२॥

नन्वेवं मुख्यो गायत्र एव तृचः प्रथमं विधेयः । किमनया बकबन्धप्रयासकल्पनयेत्यत आह—

जगती प्रतिपद्भवति जागतमेतदहर्यत्तृतीयमगत्या एव तज्जगतीमभिसंक्रामन्ति ॥ ३ ॥

उक्ता जगतीछन्दस्कैव प्रतिपद्भवति । किमर्थं जागतं जगतीछन्दस्कमेतदहर्यत्तृतीयमनुष्ठितम्, तत्तथा सति जगत्या एव पूर्वास्मिन्नहनि प्रयुक्तात्वात्जगत छन्दस एव जगतीं जागतमेव छन्दोभिः संक्रामन्ति । यथा वृक्षमारूढः पुरुषः कस्याश्चिच्छाखायामवस्थितः (१)उन्नतत्वेन सदृशीं शाखां अभिक्रामति नाऽधस्तनीं नोपरितनीं एवमेव जगत्याः सकाशाज्जगतीमेवाऽभिसंक्रामन्ति ॥ ३ ॥

एतदेव व्यतिरेकमुखेन द्रढयति—

यदतोऽन्या प्रतिपत्स्यात् प्रतिकूलं वाऽनुकूलं वा स्यात ।४।

---

१. औन्नत्येन सदृशीमेवाऽन्यां शाखामतिक्रमितीति. क. ख. पु.

अतोऽस्या जगत्या अन्या अन्यच्छन्दस्का गायत्र्यादिका यत् यदि प्रतिपत्स्यात् तर्हि प्रतिकूलं वाऽनुकूलं वा स्यात्। छन्दोन्तरसंक्रमणपक्षे प्रातिकूल्यं भवेत्, आनुकूल्यमपि पाक्षिकम्। यथोन्नतायां वृक्षस्याऽग्रशाखायामवस्थितः पुमान् अधस्तादूदूरदेशे वर्त्तमानां शाखां पादेनाऽवष्टभ्नुवन् पादविश्लेषात्कदाचिदधः पतति कदाचित्तत्रैव तिष्ठति, तद्वत्। तस्माज्जगत्यैवाऽस्याऽहः प्रतिपदा भवितव्यमित्यर्थः ॥ ४ ॥

अथाऽनुरूपाख्यं बहिष्पवमानस्य द्वितीयं तृचं दर्शयति—

पवमानो अजीजनदित्यनुरूपो भवति ॥ ५ ॥

अयं तृचोऽनुरूपाख्यो द्वितीय इत्यर्थः। नन्वयं गायत्रस्तृचः स्तोत्रीयस्तु जागतः। कथं तेनाऽस्याऽनुरूप्यम्? देवताद्वारेति ब्रूमः। अत एवोत्तरत्राऽऽम्नास्यते—पूर्वमुचैव तद्रूपमिति। ननु पूर्वयोरहोः स्तोत्रीयानुरूपाणां छन्दसामपि सारूप्यं दृष्टम्, तद्वदत्राऽपि भवितव्यम्। सत्यं भवितव्यम्, यदि समूढद्वादशाहोऽभिहितः स्यात्। अस्मिंस्तु ब्राह्मणे व्यूढ एव द्वादशाहो विहितः। अतस्तदीयस्यैव दशरात्रस्य स्तोमकल्पत्रिरत्र विधीयते। तत्र च द्वितीये त्रिरात्रे जागतं प्रातस्सवनम्, गायत्रं माध्यन्दिनम्, त्रैष्टुभं तृतीयसवनं 'गायत्रमध्यो द्वितीय'इति हि प्रागाम्नातम्। तस्मादवश्यं जगत्या भाव्यमित्यभिप्रायेण पूर्वं जागतस्तृचो विहितः। एवं च द्वितीयस्य तृचस्य प्रथमेन छन्दसा सारूप्यसम्भवात् देवताद्वारैवाऽऽनुरूप्यमित्यभिप्रायः ॥ ५ ॥

अजीजनदिति जनिधातुयोगादयं तृचश्चतुर्थेऽहनि सङ्गत इत्याह—

जनद्वद्वा एतदहर्यच्चतुर्थमन्नाद्यञ्जनयति विराजञ्जनयत्येकविंशꣳ स्तोमञ्जनयति ॥ ६ ॥

यच्चतुर्थमहरेतत् जनद्वद्वै जनिधातुनिष्पन्नशब्दयुक्तमेव खलु, राजन्वज्जनद्वत्सूर्य्यवद्विराडनुतोदवदित्यादिना चतुर्थस्याऽहो रूपत्वेन तस्य परिगणितत्वात्। यद्यपि 'इक्स्तिपौ धातुनिर्देश' इति स्मरणात् जनिमदित्येव वक्तव्यम्, तथाऽपि 'पवमानो अजीजन'दिति मन्त्रदर्शनात्तदनुकरणेन जनद्वदिति निर्देशः। तस्मादस्मिंश्चतुर्थेऽहनि तल्लिङ्गयुक्तस्तृचस्सङ्गत इत्यर्थः। किञ्च जननेन जनिधातुयुक्तेन तृचेन अन्नाद्यमन्नयोग्यं चरुपुरोडाशादिकं यागपर्यन्तं जनयति, तथा विराजं विराट्छन्दसं अस्मिन्नहनि पृष्ठस्तोत्रे चिकीर्षितं जनयति। तथा एकविंशं एकविंशतिस्तोत्रीयात्मकं स्तोमं जनयति। अयमर्थः—पवमानः पूयमानस्सोमो अजीजनत् अजनयदिति दृश्यते। तच्च जननमपेक्षित-

मन्नाद्यादीनामेवेति (१)अर्थादध्यवसीयत इति ॥ ६ ॥

यत्प्रागवादिष्म देवतासारूप्यादस्य तृचस्य स्तोत्रीयेणाऽऽनुरूप्यमिति तत्प्रदर्शयन् अस्याऽनुरूपसंज्ञां निर्ब्रूवंक्ति—

पूर्वमु चैव तद्रूपमपरेण रूपेणाऽनुवदति तदनुरूपस्याऽनुरूपत्वम् ॥ ७ ॥

व्याख्यातमेतत् ॥ ७ ॥

एतद्वेदनफलमाह—

अनुरूप एनं पुत्रो जायते य एवं वेद ॥ ८ ॥

एतदपि सिद्धम् ॥ ८ ॥

(२)अन्तिमौ तृचौ संयुज्य स्तौति—

स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥ ९ ॥

गतमेतत् ॥ ९ ॥

अथ 'प्रयद्गाव आशुरषे'ति षड्चद्वयं विदधाति—

षड्चौ भवत ऋतूनां धृत्यै ॥ १० ॥

पूर्वोक्ततृचद्वयानन्तरमेतौ द्वौ षड्चौ भवतः। षड्चो यस्मिन् स तथोक्तः (३)'ऋक्पूरब्धूः पथामानक्षे' इत्यसमासान्तः। तत इतरेतरसम्बन्धयोगे द्वन्द्वः। एतच्च द्वितयं षट् संख्यायोगात् ऋतूनां वसन्तादीनां षण्णां धृत्यै धारणाय कल्पते। एवं बहिष्पवमानस्याऽष्टादशस्तोत्रीया गताः ॥ १० ॥

अथाऽन्त्यं तृचं विधत्ते—

तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ ११ ॥

'हिन्वन्ति सूर'मिति तृचः तिस्र ऋचो यस्मिन् स तथोक्तः ऋचि त्रेरुत्तरपदादिलोपश्छन्दसीति त्रिशब्दस्य सम्प्रसारणम्। उत्तरपदे ऋकारस्य लोपः। स उत्तमः बहिष्पवमानस्याऽन्तिमो भवति। शिष्टं स्पष्टम् ॥ ११ ॥

एवं स्तोत्रीयासु कृतासु यस्स्तोमस्सम्पद्यते तं स्तोमं विदधानः प्रतिष्ठाफलताञ्चाऽऽह—

एकविंश एव स्तोमो भवति प्रतिष्ठायै प्रतितिष्ठति ॥ १२ ॥

---

१. अर्थादध्यवसाय इति. क. पु. २. अथैमौ तृचाविति. क, ख, पु.

३. पा. सू. ५. ४. ७४.

एकविंशतिसंख्याक एव स्तोत्रीयाणां समूह एकविंशस्तोमो विधिः। पञ्चदशाध्यर्द्धमिति एकविंशतिशब्दार्द्धे प्रत्ययेति विंशतेर्द्धितीति त्रिशब्दलोपः। स एवाऽस्य बहिष्पवमानस्य स्तोमो भवति। किमर्थम्? प्रतिष्ठायै प्रतिष्ठार्थम्। अतो यजमानः प्रतितिष्ठति। प्रतिष्ठा आस्पदं तद्वान् भवति ॥ १२ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये सायणीचार्यविरचिते वेदार्थप्रकाशे द्वादशाध्यायस्य सप्तमः खण्डः ॥

अथाऽष्टमः खण्डः ॥

अथ तस्मिन्नेव चतुर्थेऽहनि चत्वार्याज्यस्तोत्राणि। तत्र प्रथमस्याऽऽज्यस्य स्तोत्रीयं तृचं विदधाति—

'जनस्य गोपा अजनिष्ट जागृविरि'त्याग्नेयमाज्यं भवति ॥ १ ॥

'जनस्य गोपा' इति तृचमाग्नेयमग्निदैवत्यं आज्यं प्रथमाज्यस्तोत्रं भवति ॥ १ ॥

अजनिष्टेति जनिधातुयोगात्पूर्ववच्चतुर्थेऽहनि(१) जनद्वल्लिङ्गात् अयं तृचस्सङ्गत इति प्रतिपादयंस्तस्य विशिष्टफलजननहेतुतामाह—

जनद्वद्वा एतदहर्यच्चतुर्थमन्नाद्यञ्जनयति विराजञ्जनयत्यकेविंशꣳ स्तोमञ्जनयति ॥ २ ॥

पूर्ववद्व्याख्येयम् ॥ २ ॥

अथ द्वितीयमाज्यस्तोत्रं दर्शयति—

'अयं वां मित्रावरुणे'ति बार्हतं मैत्रावरुणम् ॥ ३ ॥

अयं वां मित्रावरुणेति तृचे(२) बार्हतं बृहत्सामसम्बन्धि मैत्रावरुणं मित्रावरुणदेवताकं हि तृतीयमाज्यस्तोत्रं भवति। यदा ज्योतिष्टोमे पृष्ठस्तोत्रे बृहत्साम क्रियते, तदेवाऽस्य तृचस्य प्रातस्सवने प्रयोगात् बार्हतत्वम् ॥ ३ ॥

नन्वेवमत्र वैराजं साम पृष्ठस्तोत्रं कथमस्य तृचस्य तेन सङ्गतिरि-

---

१. जनद्वल्लिङ्गमेवाऽयं तृचस्स्यादिति. क. ख. पु.

२. मित्रश्च वरुणश्च देवता अस्येति मैत्रावरुणं बार्हतमपि भवति यदेति. ख. पु.।

ति तत्राऽऽह—

बृहदेतत्परोक्षं यद्वैराजं बार्हतमेव तद्रूपं निर्द्योतयति ॥४॥

यद्वैराजं साम एतत्परोक्षं(१) परोक्षेण रूपान्तरेण स्थितं बृहत्सामैव। तथा च तैत्तिरीयके 'बृहच्च वा इदमग्रे रथन्तरञ्चाऽऽस्ताम्'ति प्रक्रम्य 'ते द्वे भूत्वा रथन्तरञ्च वैरूपञ्च बृहदित्यमन्येतां तद्बृहमधत्त तद्वैराजमतिसृजते'ति बृहतस्सकाशाद्वैराजस्योत्पत्तिः श्रूयते । तस्माद्वैराजस्य बार्हतत्वाद्बार्हतं बृहत्सम्बन्ध्येव रूपं निर्द्योतयति निष्कृत्य प्रकाशयति॥

अथ तृतीयस्याऽऽज्यस्तोत्रीयं तृचं विधत्ते—

'इन्द्रो दधीचो अस्थभिरि'ति दाधीचस्तृचो भवति ॥५॥

'इन्द्रो दधीच' इति दाधीचो दधीचसम्बन्धी तृचः ऐन्द्रः तृतीये आज्यस्तोत्रीयः कार्य्यः। दध्यङ् शब्दात्तस्येदमित्यर्थे अणि भसंज्ञायां 'अच' इत्यकारलोपे चाविति दीर्घत्वम् ॥ ५ ॥

अत्रेन्द्रो दधीच इति(२) शब्दसूचकं साध्यं फलमाह—

दध्यङ्ह वा आङ्गिरसो देवानां पुरोधानीय आसीदन्नं वै ब्रह्मणः पुरोधा अन्नाद्यस्याऽवरुध्यै ॥ ६ ॥

दध्यङ्नाम आङ्गिरसोऽङ्गिरोगोत्र ऋषिर्देवानामग्न्यादीनां पुरोधानीयः पुरस्ताद्धारणीय आसीत् अभवत्। स चाऽत्र दधीच इति षष्ठ्यन्तेन पदेन मन्त्रैः प्रकाशितः ब्रह्मणो ब्राह्मणजातेः अन्नं वै अन्नमेव पुरोधाः पुरोधारणीयः। तस्माद्दधीच इत्यनेन पुरोधानस्मरणात् ब्राह्मणानां पुरस्ताद्धारणीयस्य अन्नाद्यस्याऽन्नुं योग्यस्याऽन्नस्याऽवरुध्यै अवरोधनाय प्राप्त्यर्थं एतत्तृचकरणं भवति ॥ ६ ॥

अथ चतुर्थमाज्यस्तोत्रं दर्शयति—

'इयं वामस्य मन्मन' इत्यैन्द्राग्नम् ॥ ७ ॥

'इयं वामस्येति' तृचः ऐन्द्राग्नं इन्द्रदेवताकं चतुर्थमाज्यस्तोत्रं भवति ॥ ७ ॥

तत्रत्यं किञ्चिल्लिङ्गमनूद्य चतुर्थेऽहनि सङ्गतिं प्रदर्शयन् अन्नाद्यफलमेतदिति स्तौति—

'इन्द्राग्नी पूर्व्यस्तुतिरभ्रादृष्टिरिवाऽजनी'त्यानुष्टुभी

---

१. पारोक्ष्येण रूपान्तरेणाऽवस्थितमिति. क. ख. घ.

२. शब्दसूचितामिति. क. ख. घ.

वै वृष्टिरानुष्टुभमेतदहर्यच्चतुर्थं समीच्यौ विराजौ दधात्यन्नाद्याय स्तोमः ॥ ८ ॥

अस्मिन् तृचे अभ्रादृवृष्टिरिवाऽजनीति वृष्टिशब्दः श्रूयते । सा च वृष्टिरानुष्टुभी वागनुष्टुबिति श्रुतेरनुष्टुब्वाग्रूपा मध्यमिकाया वाचस्सम्बन्धित्वात् वृष्टेरानुष्टुभत्वव्यपदेशः । एतदहरानुष्टुभमनुष्टुप्छन्दस्कं यच्चतुर्थं चतुस्सङ्ख्यापूरकं दाशरात्रिकं तृतीयमहः। अतो वृष्टिद्वारा तृचस्याऽनुष्टुप्सम्बन्धात्तत्र सङ्गत इत्यर्थः । अभ्रादृवृष्टिरित्यस्योपलक्षणायैवेन्द्राग्नी पूर्व्यस्तुतिरित्यादेरनुवादः । गायत्रीत्रिष्टुब्जगतीत्यतानि त्रीण्येव छन्दांसि पुरा आसन् । तानि षट्सङ्ख्यानि पृष्ठान्यहानि प्राप्तुमसमर्थान्यभवन्, ततो व्याप्त्युपायमालोच्य पुनरन्यानि त्रीणि छन्दांसि अजनयन् , गायत्र्यास्सकाशादनुष्टुप्, त्रिष्टुभः पङ्क्तिः, जगत्या अतिछन्दः । एवं गायत्र्याद्याः षट्संख्या भूत्वा पृष्ठानि षडहानि क्रमेण व्याप्नुवन् । अतश्चतुर्थस्याऽह्न आनुष्टुभत्वम् । ब्राह्मणञ्च भवति-'गायत्रं वै प्रथममहस्त्रैष्टुभं द्वितीयं जागतं तृतीयमानुष्टुभं चतुर्थमि'ति । छन्दसामुत्पत्तिश्चैतरेयके समाम्नायते—'सा गायत्री गर्भमधत्त । साऽनुष्टुभमसृजत । त्रिष्टुब्गर्भमधत्त । सा पङ्क्तिमसृजत । जगती गर्भमधत्त । साऽतिछन्दसमसृजते'ति । अत एव चतुर्थस्याऽह्न आनुष्टुभत्वम् । अत्र वृष्टिसम्बन्धितया अहस्सम्बन्धितया च अनुष्टुप्द्वयं प्रतीयते । अनुष्टुप्च द्वात्रिंशदक्षरा । तत्राऽन्तिमे पादे द्वे अक्षरे अहोरात्रस्थानीये । तत्र त्रिंशदक्षराण्येव शिष्यन्ते विराट् च त्रिंशदक्षरा। तथा सत्यनुष्टुप्द्वयसंयोजनेन द्वौ विराजावेव समीचौ सङ्गते दधाति विदधाति अन्नाद्यार्थम् । यद्यप्यत्र अनुष्टुभो विभागेन विराट्त्वं नोक्तम्, तथाऽप्यन्यत्र शाखान्तरे(१)"द्वात्रिंशद्वै ता स्तोत्रीयास्त्रिंशात्त्रिंशदक्षरा विराडि"त्यादौ विभागः श्रूयते । तत्सामान्यादत्राप्येवं विभज्य विराट्त्वं द्रष्टव्यम् । एवमुक्तेषु चतुष्वांज्यस्तोत्रेषु प्रागुक्त एकविंश एव(२) स्तोमो भवति । साम तु प्राकृतमेव गायत्रं नान्यत् ॥ ८ ॥

इति ताण्ड्यमहाब्राह्मणे माधवीये सायणाचार्यविरचिते वेदार्थप्रकाशे द्वादशाध्यायस्याऽष्टमः खण्डः ॥

---

१. द्वात्रिंशदेतास्तासां यास्त्रिंशदिति. क. ख. पु.

२. स्तोमः कार्य इति. क. ख. पु.

अथ नवमः खण्डः ॥

अथाऽस्मिन्नेवाऽहनि माध्यन्दिनपवमानस्य प्रथमं तृचं प्रदर्शयति—

"पवस्व दक्षसाधन" इति गायत्री भवति सिध्यै॥१॥

गायत्रछन्दस्का प्रतिपद्भवति गायत्रस्तृचो भवतीत्यर्थः । स च दक्षसाधन इति सिधि धातुनिष्पन्न इति श्रवणात् सिध्यै फलप्राप्त्यै सम्पद्यते ॥ १ ॥

अस्त्वेवम् । कोऽसावस्याऽहस्सङ्गतिरिति तत्राऽऽह—

यत् पवस्वेति तद्बृहतो रूपं बार्हतꣳ ह्येतदहः ॥२॥

'पवस्व वाचो अग्रिय' इति द्वितीयस्याऽहः प्रतिपद्भवतीति बार्हतेऽहनि दृष्टत्वात् 'पवस्व दक्षसाधन' इत्यत्र यत् पवस्वेति पदं तद्बृहतो रूपम् । एतच्चतुर्थमहश्च बार्हतं बृहत एव, वैराजात्मनावस्थानात् । अतोऽस्मिन्नहनि तृचस्य सङ्गतिः ॥ २ ॥

अथाऽन्यत्तृचं विधत्ते—

"तवाऽहꣳ सोमरारण सख्य इन्दो दिवे दिवे । पुरूणि बभ्रो निचरन्ति मामव परिधींरातिताꣳ इहीं"ति ॥ ३ ॥

तवाऽहमित्यादिकस्तृचोऽन्यस्तोत्रीयः । अतितां इहीति लिङ्गप्रदर्शनार्थं सर्वानुवादः ॥ ३ ॥

तस्य च लिङ्गस्य तात्पर्यं लिङ्गान्तरञ्च प्रदर्शयन् प्रयोजनञ्चाऽऽह—

अति ह्यायञ्छकुना इव पप्तिमेत्यति ह्यपतत् ॥४॥

हि यस्मादस्मिन् चतुर्थेऽहनि त्रिरात्रमत्यायन् अत्यक्रामन् तस्मादतिहीति अति पूर्वो गत्यर्थ इति धातुः यस्मिंस्तृचे स्तोत्रसङ्गत इत्यर्थः । तस्मिन्स्तृचे शकुना इव पप्तिमेति दृश्यते । शकुनाः पक्षिण इव पप्तिमवयमुत्पतनं कृतवन्तः स्म इति तस्यार्थः । अस्मिंश्चाहनि वर्त्तमानो यजमानः अत्यपताद्धि त्रिरात्रमतिक्रम्य इदमहरगच्छत् तस्मादप्येनेनाऽह्ना तृचस्सङ्गत इत्यर्थः ।

तृचान्तरं विधत्ते—

पुनानो अक्रमीदभीति ॥ ५ ॥

स्पष्टोऽर्थः ॥ ५ ॥

ननु प्रकृतौ माध्यन्दिनपवमानस्याऽन्त्यस्तृचस्त्रैष्टुभस्तस्य स्थाने

कथमसौ गायत्रस्तृचस्सङ्गत इति तत्राऽऽह—

गायत्र्यः सत्यास्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभां लोके क्रियन्ते ॥ ६ ॥

'पुनानो अक्रमीदि'त्याद्याः गायत्र्यस्सत्योऽपि त्रैष्टुभेन रूपेण योगात् त्रिष्टुभो भवन्ति। किञ्च त्रैष्टुभं रूपं विश्वामृधा विचर्षणिरिति विश्वशब्दः, गमदिन्द्रो वृषासुत इति वृषशब्दश्च वृषवद्वृत्रहवद्रयिमद्विश्ववदिति हि विराट् त्रिष्टुभो रूपे परिगणितम्। तस्मात्त्रिष्टुभामृचां लोके स्थाने क्रियन्ते ॥ ६ ॥

अथ प्रथमविहिते तृचे पूर्ववद्गायत्रं साम विधाय तदितिकर्त्तव्यताबोधकं ब्राह्मणञ्चातिदिशति—

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥ ७ ॥

सिद्धमेतत् ॥ ७ ॥

अथ पुनरावृत्ते(१) तस्मिंस्तृचे सामान्तरं विधत्ते—

चतुर्णिधनमाथर्वणं भवति चतूरात्रस्य धृत्यै ॥ ८ ॥

चत्वारि निधनानि आवत् सुवः ज्योतिः ई २३४५ इत्यवमात्मकानि यस्य तच्चतुर्णिधनमाथर्वणमाथर्वणा दृष्टं साम पवस्व दक्षसाधन इत्यस्मिन्नेव तृचे गेयम्। तच्चतुस्संख्यायोगाच्चतूरात्रस्याऽनेनाऽह्ना सहितस्य प्रायणीयादीनामह्नां चतुष्कस्य धृत्यै धारणाय भवति ॥ ८ ॥

अथ चतुस्संख्यायोगादेव चतुर्थेऽहनि सङ्गतमेतदित्याह—

चतुष्पदानुष्टुभाऽऽनुष्टुभमेतदहर्यच्चतुर्थम् ॥ ९ ॥

निधनगतचतुष्के चतुष्पदा पादचतुष्टयोपेता अनुष्टुप् स्मर्य्यते। एतच्चतुर्थमहश्चानुष्टुभं अनुष्टुप्छन्दस्कमिति प्रागुपपादितम्। अतोऽस्मिन्नहनि चतुर्णिधनं योग्यम् ॥ ९ ॥

एवं छन्दोद्वारेण प्रशस्य ऋषिद्वाराऽपि प्रशंसति—

भेषजं वाऽऽथर्वणानि भेषजमेव तत्करोति ॥ १० ॥

आथर्वणान्यथर्वसम्बन्धीनि कर्माणि मन्त्रजातानि च भेषजं वै भैषज्यसाधनानि खलु। तत्तस्मादथर्वसम्बन्धिना साम्ना भेषजं रोगाद्युपशमनं भैषज्यमेव करोति ॥ १० ॥

अथाऽस्मिन्नेव तृचे आवृत्ते सामान्तरं विधत्ते—

निधनकामं भवति ॥ ११ ॥

---

१. अस्मिन्नेवेति. क. पु.

स्पष्टोऽर्थः ॥ ११ ॥

एतत्सर्वकामावाप्तिहेतुरिति स्तौति--

एकं वा अन्येन निरुक्तेन निधनेन कामꣳ सनोत्यथैतन्निधनकामꣳ सर्वेषां कामानामवरुध्यै ॥ १२ ॥

निरुक्तेन निश्शेषेण स्पष्टमुक्तेनाऽन्येन निधनेन वागिडेत्यादिना एकमेव कामं सनोति सम्भजते। अथशब्दस्तुशब्दार्थः। एतत्साम निधनकामं काम्यमाननिधनवत्। अत एवाऽस्यैषा संज्ञा। तस्मात्काम्यमाननिधनत्वात् पुरुषोऽयं कामं कामयते। सर्वेषां कामानां काम्यमानानां फलानामवरुध्यै प्राप्त्यै भवति ॥ १२ ॥

'तवाऽहं सोमे'ति विहिते तृचे गातव्यं साम दर्शयति--

आष्टादꣳष्ट्रं भवति ॥ १३ ॥

अष्टादंष्ट्रेण ऋषिणा दृष्टं साम आष्टादंष्ट्रम्। तच्च द्वयमास्ति। तत्रोत्तरं साम तवाहं सोममित्यस्मिंस्तृचे गातव्यम् ॥ १३ ॥

अस्य साम्नस्तावकं यद्ब्राह्मणमाम्नातं स्तुत्यर्थं तदत्राऽप्यतिदिशति—

यदेवाष्टादꣳष्ट्रस्य ब्राह्मणम् ॥ १४ ॥

'इन्द्रो वृत्रमहन्नयादोहोवेति न्यगृह्णादि'त्यादिकं यद्ब्राह्मणमाम्नातं व्याख्यातञ्च तदत्राऽपि द्रष्टव्यमित्यर्थः ॥ १४ ॥

अथाऽऽवृत्तेऽस्मिंस्तृचे सामान्तरं विधत्ते—

आभीशवं भवत्यह्नो धृत्यै ॥ १५ ॥

द्वयोराभीशवयोर्मध्ये यदुत्तरमाभीशवं तदस्मिन् तृचे गेयम्। तच्चाऽह्नो धृत्यै धारणाय भवति ॥ १५ ॥

एतदेव (१)लोकप्रदर्शनेनोपपादयति—

यद्वा अधृतमभीशुना तदाधार ॥ १६ ॥

यत् खलु लोके अधृतं अधृष्टं शिथिलं भवति तदभीशुना शङ्कुना दाधार पुरुषो धारयति। एवमत्राऽपि अभीशुना शङ्कुना साम्ना अह्नस्सम्बन्धि यदधृतमधारितं शिथिलं तद्धारयति ॥ १६ ॥

अथाऽस्मिन् साम्नि दृश्यमानं गीतिविशेषमनुवदन्नस्मिन्नहनि सङ्गतिमाह—

अनुतुन्नं गायति तथा ह्येतस्याऽह्नो रूपम् ॥ १७ ॥

---

१. लोकप्रसिद्धेन निदर्शनेनेति. क. ख. पु.

अनुतुन्नमनुतोदयुक्तम् । अनुतोदो नामाऽभ्यासः । सकृत्प्रयुक्तस्यैव ऋगवयवस्य (१)पुनः पुनरुत्पादनं सख्य इन्द्रो ३ वा इवे १ दिवा इत्यादि तद्युक्तं गायति । तथा खल्वेतस्याऽह्नो रूपं विराडनुतोदवादिति हि चतुर्थस्याऽह्नो रूपं (२)प्राग्दर्शितम् ॥ १७ ॥

अथाऽस्मिन्नेव तृचे पुरनावृत्ते स्वःपृष्ठाख्यं साम विधत्ते—

चतुर्णिधनमाङ्गिरसं भवति चतूरात्रस्य धृत्यै ॥१८॥

आ २ वा २ ३ ४ और हो वा ऊ २ ३ ४ पा ऊ २ ३ ४ पा ई २३४ ही इति चत्वारि निधनानि यस्य तच्चतुर्णिधनमाङ्गिरसं अङ्गिरसा दृष्टं साम स्वःपृष्ठाख्यं तवाहमित्यस्मिंस्तृचे गातव्यम् । तच्च चतुस्संख्यायोगात् चतूरात्रस्य एतदन्तस्याऽहश्चतुष्टयस्य धृत्यै धारणाय भवति ॥

अस्मिन्साम्नि विद्यमानं किञ्चिल्लिङ्गमनूद्याऽह्ना सङ्गतिमाह—

स्वः पृष्ठं तथा ह्येतस्याऽह्नो रूपम् ॥ १९ ॥

अस्मिन् साम्नि उपाङ्गयं दृश्यते । तयोः स्थाने उपास्थानेष्वन्यानि निधनानीति प्रकृत्य स्वः पृष्ठे च पूर्वं उत्तरं इति गौतमधानञ्जय्यावित्यन्तरस्योपास्थाने स्वरित्ययमादेशो भवति । अन्यतरस्य स्थाने त्विडेति सूत्रकारणोक्तम् । तत्र हि इडानादेशे स्वः काशीत इति उभयमनुवर्त्तते । तस्मादेतत्साम स्वःपृष्ठम् । पृष्ठशब्दो मध्यवचनः स्वरिति पृष्ठे मध्ये यस्य तत् स्वःपृष्ठम् । स्वश्शब्दश्च ज्योतिर्मयः स्वर्गवाची । इदमह्नश्च विराडात्मकेन छन्दसा ज्योतिषा सम्बद्धम् । तस्मादत्रैतत्सङ्गतम् । एतदेवाऽऽह--तथा ह्येतस्याऽह्नो रूपमिति ॥ १९ ॥

'अथ पुनानो अक्रमीदि'त्यन्तिमे तृचे गेयं साम विधत्ते—

सत्रासाहीयं भवति ॥ २० ॥

स्पष्टोऽर्थः ॥ २० ॥

अस्य साम्नो भ्रातृव्याभिभवसाधनत्वं विवक्षुस्तदर्थमाख्यायिकया सत्रासाहीयसंज्ञां निर्वक्ति—

यद्वा असुराणामसोढमासीत्तद्देवाः सत्रासाहीयेनाऽसहन्त सत्रैनानसक्ष्महीति तत्सत्रासाहीयस्य सत्रासाहीयत्वम् ॥ २१ ॥

---

१. पुनः पुनर्गानमिति. क. ख. पु. २. प्रदर्शितामिति. क. ख. पु.

यद्वै यत् खलु असुराणां सम्बन्धि असोढं(१) परैरनभिभूतं आसीत् पुरा तद्देवाः सत्रासाहीयेन साम्ना साधनेनाऽसहन्त अभ्यभवन्। षह अभिभवे इत्यस्मादेव धातोर्निष्ठायां(२) 'तीषसहलुभे'त्यादिनाऽस्य विकल्पेनेदित्वात्(३) 'यस्य विभाषे' तीट्प्रतिषेधे(४) 'सहिवहोरोदवर्णस्ये'त्यकारस्य स्थाने ओकारः। तदनन्तरं देवा एनानसुरान् सत्रा सह युगपदेव सर्वान् असह्महि अभ्यभूमेत्येमन्यन्त। तत्तस्मात् सत्रासाहीयस्याऽस्य साम्नः सत्रासाहीयत्वं सत्रासाहीयमिति संज्ञा सञ्जाता ॥ २१ ॥

यस्मादेवं तस्मादद्यतनोऽपि स्तोता अनेन भ्रातृव्यमभिभवतीत्याह—

सत्रा भ्रातृव्यं सहते सत्रासाहीयेन तुष्टवानः ॥ २२ ॥

सत्रासाहीयेन तुष्टुवानः स्तुतवान् यजमानः सत्रा साकम्, साकं सत्रा समं सहेति निघण्टुः। सह युगपदेव यत्तेनैव भ्रातृव्यं शत्रुं सहते अभिभवति ॥ २२ ॥

अथाऽधारभूतानामृचां छन्दोद्वारेण स्तौति—

गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥ २३ ॥

'पुनानो अक्रमीदि'त्याद्यासु गायत्रीषु सत्रासाहीयेन स्तुवन्त्युद्गातारः। त्रिपदाश्च गायत्र्यः। लोके च त्रिपदाः पृष्ठ्यादयः प्रतिष्ठिता दृष्टाः। अतस्तत्स्तवनं प्रतिष्ठायै यजमानस्य प्रतिष्ठानाय सम्पद्यते ब्रह्मवर्चसाय च। तेजोविशेषो हि ब्रह्मवर्चसं गायत्री तु तेजोरूपेणाऽग्निना सह प्रजापतिभ्यादुत्पन्ना। तस्मात्तेजोरूपेति ब्रह्मवर्चसहेतुरित्यर्थः। अपि च प्राणापानव्यानरूपेण वृत्तित्रयरूपः। प्राणापानवायुरत्र त्रिपदा गायत्री। अत्र चाऽऽद्यन्तयोस्तृचयोर्गायत्रत्वात् येनैव प्राणेन गायत्रीरूपेण प्रयन्ति स्तोत्रं प्रारभन्ते तमेवाऽभिलक्ष्योद्यन्ति समापयन्ति। एवं सत्युपक्रमोपसंहारयोरैकरूप्यं जायत इत्यर्थः ॥ २३ ॥

यदुक्तं प्राक् स्तोत्रीयाविधानसमये गायत्र्यः सत्यस्त्रिष्टुभो रूपेण तस्माल्लोके क्रियन्त इति, तदत्र विवृणोति—

वृषण्वत्यो गायत्र्यो भवन्ति तदु त्रैष्टुभाद्रूपान्नयन्ति स्तोमः ॥ २४ ॥

'गमदिन्द्रो वृषा सुतमि'ति वृषण्वत्यो वृषण्वच्छब्दयुक्ता गायत्र्यो भ-

---

१. परैरधृतमिति. क. पु. २. पा. सू. ७. २. ४८.
३. पा. सू. ७. २. १५. ४. पा. सु. ६. ३. ११२.

वन्ति। तदु तस्मादेव कारणात्त्रैष्टुभाद्रूपान्नयन्ति नाऽपगच्छन्ति 'पवस्व दक्षसाधनः' 'तवाहं सोमे'ऽत्यनयोस्त्रिरावृत्तयोः प्रत्येकं सामत्रयं विहितम्। तत्रैकैकस्य साम्नस्तिस्रस्तिस्रः स्तोत्रीया इत्यष्टादश सम्पद्यन्ते। अन्तिमस्य सत्रासाहीयस्य तिस्र इत्येकविंश एव स्तोमो भवति ॥२४॥

इति ताण्ड्यमहाब्राह्मणे माधवीये सायणाचार्यविरचिते
वेदार्थप्रकाशे द्वादशाध्यायस्य नवमः खण्डः ॥

अथ दशमः खण्डः ॥

अथ पृष्ठाना(१)माद्यस्य स्तोत्रस्य स्तोत्रीयं तृचं दर्शयति—

'पिबा सोममिन्द्र मन्दतु त्वा यन्ते सुषाव हर्य्यश्वाद्रिः। सोतुर्बाहुभ्याꣳ सुयतो नार्वे''त्ययतामिव वै चतुर्थमहस्तस्यैव यत्यै ॥ १ ॥

प्रथमस्य पृष्ठस्तोत्रस्य 'पिबा सोममिन्द्रे'ति वैराजस्तृचः स्तोत्रीयः। तत्र च सुयतो नार्वेति सुष्ठु यमनं प्रतीयते। चतुर्थमहश्चायतमिव वै अनियतमसम्बद्धमिव खलु। प्रथमस्य त्रिरात्रस्य समाप्तत्वात्। तेन सह सम्बन्धानुपपत्तेः। आगामिनश्चाह्नोऽननुष्ठितत्वादेवाऽभावात्। अतो नियमनसापेक्षस्य तस्यैवाऽह्नो यत्यै नियमनाय भवति ॥ १ ॥

प्राकृतमेव द्वितीयं पृष्ठमिति मन्वानो ब्रह्मणः पृष्ठस्य स्तोत्रीयं तृचं दर्शयति—

विश्वाः पृतना अभिभूतरन्नर इत्यतिजगती वर्षीयसश्छन्द आक्रमतेऽनपभ्रꣳशाय ॥ २ ॥

विश्वाः पृतना इत्यतिजगती द्वापञ्चाशदक्षरा अतिजागतस्तृचो (२)ब्रह्मसामाधारतया कार्य्य इत्यर्थः। एवं वर्षीयो वृद्धतरं छन्दश्चतुर्थमहश्चाऽऽक्रमते अवलम्बते। किमर्थम्? अनपभ्रंशाय अपभ्रंश अधःपतनं भृशुभ्रंशु अधःपतन इति धातुः अनधःपाताय ॥ २ ॥

एतदेव विवृणोति—

अपभ्रꣳश इव वा एष यज्ज्यायसश्छन्दसः कनीयश्छन्द उपैति यदेषा चतुर्थेऽहन्यतिजगती क्रियते ऽनपभ्रꣳशाय ॥ ३ ॥

---

१. माद्यस्तोत्रीयमिति. क. ख. पु. २. ब्रह्मसाम्न आधारेति. ख. पु.

तृतीयमहर्जागतम्। इदं चतुर्थमहरानुष्टुभम्। जगती चाऽष्टाचत्वारिंश दक्षरत्वात् ज्यायसी। तथा सति ज्यायसो बृहतराच्छन्दसः तृतीयेऽहनि प्रयुक्तत्वात् कनीयोऽल्पीयो न्यूनतरमानुष्टुभं छन्दश्चतुर्थेऽहन्युपैत्युपगच्छति एषोऽपभ्रंश इव वै अधःपात इव खलु। यथा खलूच्चतात्(१) ध्वजाग्रात् अधोदेशे पतति तद्वत्। एवं सति चतुर्थेऽहनि अतिजगती जगत्या अपि चतुर्भिरक्षरैरधिकं छन्दः क्रियत इति यत् तदनपभ्रंशाय अपभ्रंशाभावार्थम् ॥ ३ ॥

अथ चतुर्थस्य पृष्ठस्तोत्रस्य स्तोत्रीयं तृचं दर्शयति—

यो राजा चर्षणीनामिति ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

अत्र राजशब्देन सूचितं फलमाह—

राज्ये ह्येतर्हि वाचोऽगच्छन् राज्यमेवैतया यजमानं गमयन्ति ॥ ५ ॥

एतर्हि एतस्मिंश्चतुर्थस्याह्नोऽनुष्ठानसमये राज्ये जनपदे खलु वाचः एतैर्ह्यादशाहोऽनुष्ठीयत इति। एवं रूपाणि वाक्यान्यगच्छन्। एतया राजशब्दयुक्तया स्तोत्रीयया तद्राज्यमेव यजमानं गमयन्ति स्तोतारः॥५॥

अथ वैराजं विधित्सुस्तस्य निधनं द्युलोके सूर्यस्य दृढावस्थितिहेतुरिति स्तौति—

छन्दोभिर्वै देवा आदित्यꣳ स्वर्गं लोकमहरन् स नाऽऽध्रियत तं वैराजस्य निधनेनादृꣳहꣳस्तस्मात् पराङ् चार्वाङ् चादित्यस्तपति पराङ् चार्वाङ्चेकारः ॥ ६ ॥

छन्दोभिर्गायत्र्यादिभिः खलु पुरा देवाः आदित्यं सूर्यं स्वर्गं लोकमहरन् प्रापयन्। आप्नुवन् स आदित्यस्तत्र नाऽऽध्रियत नावातिष्ठते धृङ् अवस्थान इति धातुः। एवमधृतं तमादित्यं वैराजस्य साम्नो निधनेन ईहत्यैवं अदृंहन् दृढीकृतवन्तः दृढं स्थापितवन्त इत्यर्थः। हि यस्मादयमीकारः पराङ् च चार्वाङ् भवति। अकारवत् कण्ठस्थानोऽपि न भवति उकारवच्चोष्ठ्योऽपि भवति। उभयोरन्तयोर्लब्धत्वादुभयोरन्तरालवृत्तीसन् उभयनिर्देशमलभत इति पराङ्त्वमर्वाङ्त्वं चेकारस्य। तस्मादेव कारणादादित्योऽपि पराङ्च पराङ्मुखः स्वर्गादुपरितनानपि लोकान्

१ वृक्षादिति क. ख. पु.

अर्वाङ्च अवाङ्मुखश्च सन् अधस्तनानपि लोकान् तपति प्रकाशयति

अथ तस्मिन् साम्नि प्रस्तावानन्तरं मत्स्वा हाऊ(१) इत्यादिका ये दश विष्टम्भास्ताननूद्य स्तौति—

प्रस्तावं प्रस्तुत्य विष्टम्भान्विष्टभ्नोति मुखत एव तदन्नाद्यं धत्ते मुखं हि साम्नः प्रस्तावः ॥ ७ ॥

होइ या होइ या ३४३ पिब इति प्रस्तावभागः । तं प्रस्तुत्य उच्चार्य्य मत्स्वाहाऊ इत्यादिकान् विष्टम्भनोति विष्टम्भसंज्ञकानेतान् ब्रूयात् तत्तथा सति मुखतो मुखप्रदेशे आस्य एव अन्नाद्यं धत्ते धारयति । प्रस्तावभागः खलु साम्नो मुखं तत्र विष्टम्भानां धारणात् ॥ ७ ॥

एतदेव विवृणोति—

दशकृत्वो विष्टभ्नोति दशाक्षरा विराड् वैराजमन्नमन्नाद्यस्याऽवरुध्यै ॥ ८ ॥

मत्स्वा हाऊ ओजो हाऊ सहो हाऊ बलं हाऊ इत्यादिभिर्दशकृत्वो दशधारं विष्टभ्नोति एतदादिकान् दशसंख्याकान् विष्टम्भान् कुर्य्यात् विराड्दशाक्षरा दशेन्द्रियवता किं तेन दशविधत्वादन्नञ्च वैराजं विराट्सम्बन्धि। एवं संख्याद्वारेण दशकृत्वो विष्टम्भनमन्नाद्यस्याऽवरुध्यै अवरोधनाय भवति ॥ ८ ॥

एवमुत्तरयोरपि पादयोः प्रारम्भे एते विष्टम्भाः कार्य्याः इत्याभिप्रायेणाऽऽह—

त्रिंशत्कृत्वो विष्टभ्नोति भूयसोऽन्नाद्यस्याऽवरुध्यै ॥ ९ ॥

विराजो हि दशाक्षरास्त्रयः पादाः । तत्र प्रतिपादं दशकृत्वो विष्टम्भने सति त्रिंशत्कृत्वः त्रिंशद्वारं विष्टभ्नोति(२) विष्टम्भं कृतवान् भवति तच्च भूयसो बहुतरस्याऽन्नाद्यस्याऽवरुध्यै भवति ॥ ९ ॥

अत एवंगुणविशिष्टं साम पिबा सोममिति तृचे विधाय समुच्चित्य स्तौति—

वैराजꣳ साम भवति विराट्सु स्तुवन्ति वैराजा विष्टम्भाः समीचीर्विराजो दधात्यन्नाद्याय ॥ १० ॥

वैराजाख्यं साम 'पिबा सोम'मित्यस्मिन् तृचे पृष्ठस्तोत्रतया कार्य्यम् ।

---

१. इत्यादिकान्दश विष्टम्भानाद्यानन्नूद्येति. क. ख. पु. ।

२. विष्टम्भः कृतो भवतीति. क. ख. पु.

अतस्सामैव विराट् तथा विराट्सु विराट्छन्दस्कास्वृक्षु स्तुवन्ति विष्टम्भाश्च वैराजाः दशसंख्यायोगादयमप्यन्या विराट्। अत एव विराजः समीचीः समन्तात्समूहीकृताः दधाति अग्न्याद्यर्थम् ॥ १० ॥

अथाऽस्मिन् साग्नि इष्यमाणं गानविशेषं प्रदर्श्य स्तौति—

अनुतुन्नं गायति रेतोधेयायाऽनुतुन्नाद्धि रेतो धीयते ॥ ११ ॥

अनुत्वा अनुत्वेत्यादिकोऽभ्यासोऽनुतोदस्तद्युक्तं गायति। किमर्थम्? रेतोधेयाय रेतसः अपत्यहेतोर्वीर्य्यस्य आधानाय निषेकार्थम्। कथमनुतोदाद्रेतस आधानमित्याशङ्क्य लोकप्रसिद्धिमेव तत्र प्रमाणयति—अनुतुन्नाद्धीति। अनुतुन्नात् योन्यां(१) शेफसः प्रक्षेपणप्रतिक्षेपणरूपादनुतोदनात् पुनः पुनरभ्यासात् खलु लोके रेतो धीयते आधीयते निषिच्यते अतोऽत्रापि क्रियमाणोऽनुतोदो रेतोधेयाय भवतीति ॥ ११ ॥

अथ वैराजस्तोत्राङ्गमग्निमन्थनं विधत्ते—

दक्षिण ऊरावुद्गातुरग्निं मन्थन्ति दक्षिणतो हि रेतः सिच्यते ॥ १२ ॥

उद्गातुर्दक्षिणे ऊरौ अधरारणिं तिरश्चीं स्थापयित्वा तत उत्तरारण्या अग्निं मन्थन्ति दक्षिणतश्शरीरस्य दक्षिणार्द्धाद्धि रेतः सिच्यते तस्माद्वीर्य्यवति दक्षिणे ऊरुदेशे अग्निर्मन्थनीयः ॥ १२ ॥

तस्य कालं विधत्ते—

उपाकृतेऽहिङ्कृते मन्थन्ति जातमभिहिङ्करोति ॥ १३ ॥

उपाकृते अध्वर्य्युणा स्तोत्रोपाकरणे कृते, अहिङ्कृते हिङ्कारे चाऽकृते मन्थन्ति। जातमग्निमभिलक्ष्य हिङ्करोति जातस्याऽग्नेरुपरि हिङ्कारं कुर्य्यात्(२) 'वैराजस्य स्तोत्र उपाकृते उपर्यनूरु शकलमिधाय तृणे च तस्योपरि तिरश्चीमरणिं निधायाऽभ्यात्मं प्रजननं कृत्वा त्रिः प्रदक्षिणमभिमन्थेदि'त्यादिकं सूत्रमत्राऽनुसन्धेयम् ॥ १३ ॥

अस्तु जातस्य तस्योपरि हिङ्कारः, किं तत इत्याह—

तस्माज्जातं पुत्रं पशवोऽभिहिङ्कुर्वन्ति ॥ १४ ॥

यस्मादेवमुद्गाता जातमभिहिङ्कृतवान् तस्मादेव जातमुत्पन्नं पुत्रमभिहिङ्कुर्वन्ति पशवः ॥ १४ ॥

---

१. रेतस इति. क. ख. पु. २. लाट्या. श्रौ. १. १. ५.

जातस्याऽग्नेः कस्मिन्नग्नौ प्रहरणमिति ब्रह्मवादिभिः कृतां मीमांसामाह—

तस्मै जातायाऽमीमाꣳसन्त गार्हपत्ये प्रहरामा३ आग्नीध्रा ३ आहवनीया ३ इति ॥ १५ ॥

तस्मै जातायाऽग्नये तदर्थं ब्रह्मवादिनोऽमीमांसन्त पूजितविचारवचनो मीमांसाशब्दः विचारितवन्त इत्यर्थः। कथमिति किमेतमग्निं गार्हपत्ये प्रहराम? स हि सर्वेषामग्नीनां योनिः, किंवा आग्नीध्रे? आग्नीध्रीयाधिष्ण्यगतेऽग्नौ प्रहराम प्रक्षिपामः सोमे ह्याग्नीध्रीयो मुख्यः आहवनीयोद्वाने तत एवोद्धारात्। श्रूयते हि "यदाहवनीये उद्वायेदाग्नीध्रीदुद्धरे"दिति। अथवा आहवनीये प्रहराम? स हि सर्वासामाहुतीनामाधारतया प्रधानभूत इत्येवं ब्रह्मवादिनः संशयापन्ना आसन्। त्रिष्वपि वाक्येषुविचार्यमाणानामिति प्लुतिः ॥ १५ ॥

एवं विदुषां संशयं दर्शयित्वा तत्र कर्त्तव्यं पक्षमाह—

आहवनीये प्रहरन्त्येतदायतनो वै यजमानो यदाहवनीये स्वमेव तदायतनं ज्योतिष्मत्करोति ॥ १६ ॥

तमग्निमाहवनीये प्रहरन्ति प्रक्षिपेयुः आहवनीयोऽग्निरिति यत् एतदायतनो वै एतदायतनं स्थानं यस्य तथाविधः खलु यजमानः। तत्तथा सति स्वं स्वकीयमेवाऽऽयतनं ग्राह्यमाणेनाऽग्निना ज्योतिष्मत्करोति अतिशयेन ज्योतिर्युक्तं विदधाति ॥ १६ ॥

एतद्वेदनं फलवदित्याह—

ज्योतिष्मान् ब्रह्मवर्चसी भवति य एवं वेद ॥ १७ ॥

स्पष्टोऽर्थः ॥ १७ ॥

जातेनाऽग्निना होमं विधत्ते—

अभिजुहोति शान्त्यै ॥ १८ ॥

यजमानस्य देहशान्त्यै अभिजुहोति ॥ १८ ॥

प्रहृतस्याऽग्नेरुपरि आज्येन होमं विधत्ते—

आज्येनाऽभिजुहोति तेजो वा आज्यं तेज एव तदात्मन्धत्ते ॥ १९ ॥

प्रहृतमग्निमभि आज्येन जुहोति(१)"तृतीया च होऽछन्दसी"ति जुहोतेः

---

१. पा. सू. २. ३. ३.

कर्म्मणि तृतीया। आज्यं जुहुयादित्यर्थः। अग्नेस्तेजसो वृद्धिहेतुत्वादाज्यं तेज एव। तथा च(१) यदाज्येन जुहोति तत्तेन तेज एवात्मन्धत्ते ॥१९॥

तस्मिन् होमे मन्त्रं विधाय तस्य विशिष्टफलहेतुतां दर्शयति—

"प्रेद्धो अग्ने दीदिहि पुरो न" इति विराजाऽभिजुहोत्यन्नं विराडन्नाद्यस्याऽवरुध्यै ॥ २० ॥

'प्रेद्धो अग्ने' इति विराजा विराट्छन्दसा ऋचा अभिजुहोति। गतमन्यत् ॥ २० ॥

अथ तृतीयस्य पृष्ठस्तोत्रस्य 'विश्वाः पृतना' इति यस्तृचो विहितस्तत्र गातव्यं साम विधत्ते—

त्रैशोकं ब्रह्मसाम भवति ॥ २१ ॥

त्रिशोकेन दृष्टं साम त्रैशोकम्। तद्ब्रह्मसाम ब्रह्मणः स्तोत्रे पृष्ठत्वेन कार्य्यम् ॥ २१ ॥

अथाऽस्याऽऽधारभूतानामृचां छन्दोद्वारेण स्तौति—

अतिजगतीषु स्तुवन्त्यहꣳ उत्क्रान्त्या उद्ग्रा एतेनाऽह्ना क्रामन्ति ॥ २२ ॥

अतिजगतीषु द्वापञ्चाशक्षरासु जगतीमतीत्य वर्त्तमानासु ऋक्षु 'विश्वाः पृतना' इत्यादिषु स्तुवन्ति। किमर्थम्? अहꣳस्य चतुर्थस्य उत्क्रान्त्यै उत्क्रान्तिरूर्ध्वगतिः। स्वर्गस्य प्राप्तिरिति यावत्। उत्क्रान्तिसाधनतायाइत्यर्थः। जगत्या अप्यूर्द्धगतेन छन्दसा योगादेतेन चतुर्थेनाऽह्ना उत्क्रामन्ति वै ऊर्ध्वं गच्छन्ति स्वर्गप्राप्त्यर्थम् ॥ २२ ॥

अथैतन्निधनद्वारा पापक्षयहेतुरिति स्तौति—

दिवेति निधनमुपयन्ति पाप्मनोऽपहत्या अपपाप्मानꣳहते त्रैशोकेन तुष्टुवानः ॥ २३ ॥

'ओ इदी २३४ वा' इति ह्यस्य निधनमुपयन्ति उपगच्छन्त्युद्गातारः पाप्मनः पापस्याऽपहत्यै अपक्षयार्थम्। द्युशब्दस्य दीप्तिवचनत्वात्तमोविदारकत्वम्। पापं तेन विनाश्यत इत्यर्थः। यस्मादेवं तस्मादनेन त्रैशोकेन साम्ना तुष्टुवानः स्तुवन् पाप्मानमपहते अपहन्ति विनाशयति ॥ २३ ॥

अथ चतुर्थस्य पृष्ठस्तोत्रस्य साम विधत्ते—

भारद्वाजस्य पृष्ठन्यच्छावाकसाम भवति ॥ २४ ॥

---

१. यदाज्यं जुहोति तत्तेनेति. क. ख. पु.।

भारद्वाजस्य पृश्नीति पदद्वयसमुदायात्मिका साम्नः संज्ञा । तत्सञ्ज्ञं साम अच्छावाकसाम(१) अच्छावाकस्य पृष्ठस्तोत्रं 'यो राजा चर्षणीना'मिति तृचे कार्य्यम् ॥ २४ ॥

अथैतत्स्तौति—

अन्नं वै देवाः पृश्नीति वदन्त्यन्नाद्यस्याऽवरुध्यै ॥ २५ ॥

नानावर्णमन्नमेव देवाः पृश्नीति प्राप्तवर्णत्वात् पृश्निशब्दाभिधेयमिति वदन्ति । अत एतत् पृश्नि क्रियमाणं साम अन्नाद्यस्य प्राप्त्यै भवति ॥२५॥

अथाऽस्य साम्नोऽह्ना सङ्गतिमाह—

इडाभिरैडं तथा ह्येतस्य[2]द्वो रूपꣳस्तोमः ॥ २६ ॥

इडा २३ भा ३४३ औ २३४५ इत्येतेन युक्तमिडाभिरैडम् । तथा हि तादृशमेव खल्वेतस्य चतुर्थस्याऽह्नो रूपमिडाभिरैडश्चतुर्थस्येति एतेषु पृष्ठस्तोत्रेषु पूर्वोक्त एव एकविंशः स्तोमः कार्य्यः ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्य दशमः खण्डः ॥

एकादशः खण्डः ॥

अथाऽऽर्भवपवमानस्य प्रथमं तृचं दर्शयति—

'परिप्रिया दिवः कविरि'ति परिवत्यो भवन्त्यन्तो वै चतुर्थमहस्तस्यैताः पर्याप्त्यै ॥ १ ॥

'परिप्रिया दिवः कवि'रित्याद्यास्तिस्रस्तोत्रीयाः परिवत्यः परिशब्दयुक्ता भवन्ति । चतुर्थमहश्चान्तो वै चतूरात्रापेक्षयाऽन्त एव । अतस्तस्याऽन्त्यस्याऽह्नः पर्य्याप्त्यै परिसमाप्त्यै एताः परिवत्यो भवन्त्यनुगुणा इत्यर्थः ॥ १ ॥

अथ द्वितीयं तृचं दर्शयन् अनेनाऽह्ना सङ्गतिमप्याह—

त्वꣳह्यङ्ग दैव्येति त्वमिति बृहतो रूपं बार्हतꣳ ह्येतदहः

त्वं ह्यङ्गेत्ययमार्भवस्य द्वितीयस्तृचः । कथमस्याऽह्ना सङ्गतिरिति ? उच्यते—तत्र त्वमिति युष्मच्छब्दो दृश्यते तद्बृहतो बृहत्साम्नो रूपम्,

---

१. अच्छावाकपृष्ठस्तोत्रत्वेनेति, क. पु. ।

तद्योन्यां 'त्वामिद्धि हवामहे' इति युष्मच्छब्ददर्शनेन तद्रूपत्वावगतेः। एतच्चतुर्थं महरपि बार्हतं बृहत्प्रभवेन वैराजेन साम्ना युक्तत्वात्। अतस्त्वमिति बृहतो रूपेण युक्तस्तृचश्चतुर्थेऽहनि सङ्गत इत्यर्थः ॥ २ ॥

अथ तृचान्तरं विधत्ते—

सोमः पुनान ऊर्मिणा व्यंवारं विधावति। अग्रे वाचः पवमानः कनिक्रददिति ॥ ३ ॥

सोमः पुनान ऊर्मिणेत्ययमार्भवस्य तृतीयस्तृचः ॥ ३ ॥

अग्रे वाच इति पदद्वयसूचितमर्थमुपादाय स्तौति—

अग्रꣳ ह्येतर्हि वाचोऽगच्छन्नग्रमेवैतया यजमानं गमयन्ति ॥ ४ ॥

एतर्हि एतस्मिन् काले चतुर्थस्याऽह्नोऽनुष्ठानसमये (१)अग्रे प्रशस्तं वाचोऽगच्छन्। अत एतया स्तोत्रीयया यजमानमेवाऽग्रं श्रैष्ठ्यं गमयन्ति प्रापयन्ति ॥ ४ ॥

अथाऽन्यं तृचं विधत्ते—

"पुरो जितीवो अन्धस" इति विराजौ वैराजꣳ ह्येतदहः॥५॥

'पुरोजितीवो अन्धस' इत्यार्भवस्य चतुर्थस्तृचः। तस्मिन् तृचे द्वे विराजौ भवतः—पद्या चाऽक्षर्या चेति उत्तरत्र प्रदर्शयिष्यते। एतदहश्च वैराजं विराट्सम्बद्धम्। अतोऽस्मिन्नहनि अयं तृचः सङ्गत इत्यर्थः ॥५॥

(२)अथाऽपरं तृचं विधत्ते—

'सोमः पवते जनिता मतीना' मिति प्रातस्सवने षोडशिनं गृहीतं तं तृतीयसवने प्रजनयन्ति ॥ ६ ॥

'सोमः पवते जनिते'ति जनिधातुयुक्तस्तृचः पञ्चमः। प्रातस्सवने धाराग्रहाणामुत्तमः षोडशी ग्रहो गृह्यते। तं गृहीतं षोडशिनं तृतीयसवने प्रजनयन्ति होमयोग्यं जनिधातुयुक्तेनाऽनेन तृचेनोत्पादयन्ति। सहि षोडशी तृतीयसवने हूयते। तस्माद्धोमायोत्पादयन्तीत्यर्थः ॥ ६ ॥

ननु जागतं तृतीयसवनम्; अयञ्च त्रैष्टुभस्तृचः कथमसौ तत्र सङ्गच्छत इत्यत आह—

त्रिष्टुभः सत्यो जगत्यो रूपेण तस्माज्जगतीनां लोके क्रियन्ते ॥ ७ ॥

---

१. अग्रं पुरस्तादिति. क. ख. पु. २. अथाऽनन्तरमिति. क. पु.।

सोमः पवत इत्याद्यास्त्रिष्टुभः सत्योऽपि जागतेन रूपेण योगाज्जगत्यः। तस्माज्जगतीनां स्थाने प्रयुज्यन्ते। किंतज्जोगतं रूपम्? उच्यते 'आतिष्ठति वृषभो गोषु जान' इति गोशब्दवत्त्वम्। तथाहि पूर्वं परिगणितं दिग्वद्रोमदृषभवत्तृतीयस्याऽह्नो रूपमित्यादिना ॥ ७ ॥

अथ परिप्रियेति प्रथमे तृचे पूर्ववद्गायत्रं साम विधाय तस्तावकं ब्राह्मणमप्यतिदिशति—

गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥ ८ ॥

सिद्धमेतत् ॥ ८ ॥

अथाऽऽवृत्ते(१) तस्मिंस्तृचे सामान्तरं विधत्ते—

और्णायवं भवति ॥ ९ ॥

ऊर्णायुना दृष्टं साम और्णायवम्। तदस्मिन् परिप्रियेति तृचे गातव्यम् ॥ ९ ॥

इदं(२) स्वर्गप्राप्तिसाधनमिति प्रतिपिपादयिषुस्तदर्थमाख्यायिकामाह—

अङ्गिरसो वै सत्रमासत तेषामासः स्पृतः स्वर्गो लोक आसीत्पन्थानं तु देवयानं न प्राजानꣳस्तेषाङ्कल्याण आङ्गिरसो ध्यायमुदव्रजत् स ऊर्णायुं गन्धर्वमप्सरसां मध्ये प्रेङ्खयमाणमुपैत्स इयामिति यां यामभ्यदिशत्सैनमकामयत तमभ्यवदत्कल्याणा३ इत्यासो वै वः स्पृतः स्वर्गो लोकः पन्थानं तु देवयानं न प्रजानीथेदꣳ साम स्वर्ग्यं तेन स्तुत्वा स्वर्गं लोकमेष्यथ मा तु वोचोहमदर्शामिति ॥ १० ॥

अङ्गिरसः खलु पुरा ऋषयः सत्रयागमन्वतिष्ठन्। तेषामाङ्गिरसां तद्यागफलभूतः स्वर्गाख्यो लोक आसः पर्य्याप्तः स्पृतः प्रियहेतुश्चासीत्। स्पृ प्रीतिचलनयोरिति धातुः। (३)देवयानं देवा यान्त्यनेनेति देवयानः तं देवयानं तु पन्थानं स्वर्गस्य मार्गं न प्राजानन् (४)नाऽवबुध्यन्त। एवमजानतां मध्ये कल्याणनामाऽऽङ्गिरसः ध्यायं, ध्यैचिन्तायामित्यस्मात् ण

१. तास्मन्नेवेति क. पु.। २. प्रतिपादयितुमिति. क. ख. पु.।
३. देवयानः देवान् प्रतिपद्यतेऽनेनेति देवयान इति. क. ख. पु.
४. नाऽबुध्यन्तेति. क. पु.।

मुल् प्रत्ययः। ध्यात्वा ध्यात्वा कोऽसौ देवयानः पन्था इति विचार्य्य विचार्य्य उदव्रजदूर्द्धमगच्छत्। स कल्याण आङ्गिरसः कियन्तं देशं गत्वा अन्तरिक्षलोके ऊर्णायुं(१) एतत्संज्ञं गन्धर्व्वं अप्सरसां मध्ये प्रेङ्खयमाणं (२)दोलया विहरन्तं उपैत् उपागच्छत्। स गन्धर्व्व इयां प्राप्नुयामिति यां यां स्त्रियमभ्यदिशत् अभ्यध्यायत् सा सा एनं गन्धर्व्वमकामयत। एवमप्सरोभिः सह क्रीडन् गन्धर्व्वस्तं कल्याणमाङ्गिरसमभिलक्ष्य अवदद्व्रवीत्-कल्याणा ३ इति हे कल्याण इति सम्बोध्य '(३)दूराद्धूते चे'ति प्लुतः। एवं सम्बोध्येदमब्रवीत्-वो युष्माकं यज्ञफलभूतः स्वर्गो लोक आप्तो वै प्राप्तः स्पृतः प्रीतिकरश्चाऽभूत्। देवयानं तु पन्थानं यूयं न प्रजानीथ। तत्रेदं साम स्वर्ग्यं स्वर्गाय हितं स्वर्गप्राप्तिसाधनम्। तेन साम्ना स्तुत्वा स्वर्गं लोकमेष्यथ प्राप्स्यथ। यदि त्वां कश्चिदप्राक्षीत् तस्मै अहमेवाऽदर्शमिति अदर्शं अज्ञासिषमिति मा वोचः, अपि तु ऊर्णायुः गन्धर्व्वः प्रावोचदिति ब्रूहीति ॥ १० ॥

एवं गन्धर्व्वेणोक्तः किं कृतवानिति तदाह—

स ऐत्कल्याणः सोऽब्रवीदासो वै नः स्पृतः स्वर्गो लोकः पन्थानं तु देवयानं प्रजानीम इदꣳ साम स्वर्ग्यं तेन स्तुत्वा स्वर्गं लोकमेष्याम इति कस्तेऽवोचदित्यहमेवाऽदर्शमिति तेन स्तुत्वा स्वर्गं लोकमायन्नहीयत कल्याणोऽनृतꣳ हि सोऽवदत्स एषः श्वित्रः ॥ ११ ॥

एवं गन्धर्वेणोक्तः स कल्याणः ऐत् पुनराङ्गिरसां समीपमागच्छत् आगत्य च सोऽब्रवीत् नः अस्माकं स्वर्गो लोक आप्तः स्पृतश्च किल। देवयानं तु पन्थानं न प्रजानीमो वयम्। इदमौर्णायवं साम स्वर्ग्यं स्वर्गसाधनं देवयानस्य पथो लम्भकम्, तेन स्तुत्वा वयं स्वर्गं लोकमेष्यामो गमिष्याम इति। एवं कल्याणेनोक्ते अङ्गिरसः अपृच्छन् ते तव कः पुरुषोऽवोचदुक्तवानिति। न कश्चिदवोचत् अहमेवैतत् साम स्वर्गसाधनत्वेनादर्शमज्ञासिषमिति कल्याणः प्रत्यब्रवीत्। ततस्तेनौर्णायवेन स्तुत्वा स्वर्ग-

---

१. एतन्नामकमप्सरसमिति. ख. पु.।

२. शब्दायमानं गन्धर्वं इयामित्यस्य साम्नो निधनेनैनमुपैत्। उपेत्य च यामप्सरसमभ्यादिशत्। सा एवमकामयत। तदनन्तरं ऊर्णायुनामा सः कल्याणमाङ्गिरसमभिलक्ष्येति. ख पु.।

लोकमायन्नङ्गिरसोऽगच्छन्। कल्याणस्त्वाङ्गिरसोऽहीयत हीनो भूमावेव परित्यक्तोऽभूत्। हि यस्मात् सोऽनृतं वितथमवदत्। तस्मादहीयत। स एषोऽसत्यवादी शिवत्रः श्वेतकुष्ठी दृश्यते ॥ ११ ॥

तस्मादेतेन साम्ना स्तवनं स्वर्गसाधनमित्युपसंहरति—

स्वर्ग्यं वा एतत्साम स्वर्गलोकः पुण्यलोको भवत्यौर्णायवेन तुष्टुवानः ॥ १२ ॥

स्वर्गलोकः स्वर्गो लोको यस्य स तथोक्तः पुण्यः पुण्यात्मक उत्तमः स्वर्गादन्योऽपि लोको यस्य स पुण्यलोकः और्णायवेन तुष्टुवानः स्तुवन्नुभयविधो भवति। गतमन्यत् ॥ १२ ॥

'त्वं ह्यङ्ग दैव्ये'ति पूर्वविहिते तृचे गातव्यं साम विधत्ते—

बृहत्कं भवति ॥ १३ ॥

बृहत्को नाम ऋषिः तत्सम्बन्धि साम बृहत्कम। तदस्मिन्स्तृचे गातव्यम् ॥ १३ ॥

तदेतत् स्तौति—

सामाऽऽर्षेयेण प्रशस्तं त्वꣳ हीत्यन्नाद्यस्याऽवरुध्यै हीति वा अन्नं प्रदीयते षोडशिनमु चैवैतेनोद्यच्छति ॥ १४ ॥

आर्षेयेण ऋषिसम्बन्धेन युक्तं साम प्रशस्तमुत्कृष्टम्। अस्य च स्तौत्रीयासु त्वं हीति शब्दः श्रूयमाणः अन्नाद्यस्याऽवरुध्यै अवरोधनाय भवति। कथम्? लोके हि हीत्यनेन शब्देन खलु अन्नं प्रदीयते बालानां भोजयितारः मुखस्य विदारणार्थं हीति शब्दमुच्चारयित्वा अन्नमादयन्ति। तत्सामान्यादत्रापि हिशब्देनाऽन्नाद्यस्याऽवरोधो भवति। अपि च षोडशिनमेव ग्रहमेतेनोद्यच्छति होमार्थमुद्गमयति। त्वं ह्यङ्ग दैव्येत्याभिमुख्यकरणात् पूर्वयोः सवनयोः शयानं अत्र होमायोद्बोधयतीत्यर्थः ॥ १४ ॥

अथ 'सोमः पुनान ऊर्म्मिणे'ति तृचे गातव्यं साम विधत्ते—

आतीषादीयं भवति ॥ १५ ॥

आतीषादीयाख्यं सामाऽस्मिन्स्तृचे गेयम् ॥ १५ ॥

अथैतदायुर्हेतुरिति स्तौति—

आयुर्वा आतीषादीयमायुषोऽवरुध्यै ॥ १६ ॥

यदेतदातीषादीयाख्यं साम तदायुर्वै आयुषोऽभिवृद्धिहेतुत्वादायुरेव। अत एतत्साम आयुषोऽवरोधनार्थमत्र कार्यम् ॥ १६ ॥

यावति काले इवासनिरोधः कर्तुं शक्यते तावन्तं कालमस्य सा-
मनो निधनमावर्त्तनीयमिति विधाय स्तौति—

आतमितोर्निधनमुपयन्त्यायुरेव सर्वमाप्नुवन्ति ॥ १७ ॥

आतमितोः आतमनात् इवासे निरुध्यमाने यावता कालेन ग्लानि-
र्भवति । तमु ग्लान इति धातुः, तावत्कालपर्य्यन्तं आतीषादीयस्य नि-
धनं क्रदेदेभ्येति रूपं पुनः पुनः उपयन्त्युपगच्छन्ति । तथा च सर्वं
सम्पूर्णमेवायुः प्राप्नुवन्ति ॥ १७ ॥

अथ 'पुरोजितौ' इति तृचे गातव्यं साम विधत्ते—

नानदं भवति ॥ १८ ॥

नानदाख्यं सामाऽस्मिंस्तृचे कार्यम् ॥ १८ ॥

अथैतदहः सन्ततिहेतुरित्याह—

**ज्यायोऽभ्यारम्भमतिहाय पञ्चममहः षष्ठस्याऽह्न आ-
रम्भस्तेन षष्ठमहरारभन्ते सन्तत्यै ॥ १९ ॥**

अस्य साम्न आधारभूते तृचे प्रथमाऽनुष्टुबुत्तरे गायत्र्यौ च । गा-
नसमये पूर्वमानुष्टुभं पादमारभ्य अनुष्टुभौ कार्य्ये । एवमेव षष्ठेऽहनि
पादमात्रस्याऽऽरम्भः । पञ्चमेऽहनि जगत्या वृद्धतरं पादात्मकं शक्वर्य्याख्यं
छन्दोऽभ्यार्भ्यते । एतदभिप्रेत्याऽत्र स्तुतिः क्रियते । ज्यायोऽभ्यारम्भं
चतुर्थेऽहि प्रयुज्यमाना विराट् छन्दसो ज्यायः अधिकतरं शक्वर्याख्यं छ-
न्दोऽभ्यारभ्यते गानार्थमुपादीयते । यस्मिंस्तादृशं पञ्चममहः परिहाय
अतिक्रम्य षष्ठस्याऽह्नः पादमात्राभ्यासयुक्तस्य आरम्भ उपक्रमो भवति
तेनाऽऽनुष्टुभप्रगाथकरणेन षष्ठमहरेवाऽऽरभन्ते सन्तत्यै सन्तानार्थम् अ-
विच्छेदार्थम् ॥ १९ ॥

अथाऽस्य साम्नः प्रस्तावभागस्य परिमाणविशेषं विधाय स्तौति—

षोडशात्तरेण प्रस्तौति षोडशिनमु चैवैतेनोद्यच्छति ॥ २० ॥

प्रथमतः षोडशभिरक्षरैः प्रस्तोता प्रस्तावभागं ब्रूयात् । तेन प्रस्ता-
वेन षोडशिनमेव ग्रहं होमायोद्यच्छति ॥ २० ॥

अथाऽस्मिंस्तृचे सामान्तरं विधत्ते—

आन्धीगवं भवति ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

अस्मिंस्तृचे (१)विराट्द्वयं सम्पादयन् अन्नाद्यहेतुरेतत्सामेति स्तौति—

पद्या वा अन्या विराडक्षर्य्याऽन्याऽस्माल्लोकात्पद्यया

---

१. विराद्द्वयं सम्पाद्याऽन्नाद्यहेतुरिति. क. पु. ।

विराजाऽन्नाद्यमवरुन्धेऽमुष्मादक्षय्ययोमयोरनयोर्लोकयोरन्नाद्यमवरुन्ध आन्धीगवेन तुष्टुवानः ॥ २२ ॥

अत्र हि 'पुरोजिती' इत्याद्यानुष्टुबुत्तरे गायत्र्यौ। अतो दशपादा भवन्तीति तैर्निष्पद्यमाना पद्या अन्या विराट्। एतासु विद्यमानाक्षरपरिगणनायामशीतिसंख्यान्यक्षराणि भवन्ति। तत्र दशसंख्यया विभागे अन्ततो दशा (२)क्षराण्येव तिष्ठन्ति। तैरक्षरैर्निष्पद्यमाना अन्या विराट्। (३)ततः पद्यया विराजा अस्मादूर्लोकादेव अन्नाद्यमवरुन्धे लभते। अमुष्मात् स्वर्गाल्लोकादक्षय्यया विराजा अन्नाद्यमवरुन्धे यस्मादान्धीगवेन तुष्टुवानः स्तुतवान् अनयोरुभयोर्द्यावापृथिव्योर्लोकयोरन्नाद्यं अदनीयं प्रशस्तमन्नमवरुन्धे लभते ॥ २२ ॥

अथ 'सोमः पवते' इति तृचे गेयं साम दर्शयति—

वात्सप्रं भवति ॥ २३ ॥

यत्सप्रिणा दृष्टं साम वात्सप्रम्। तत् 'सोमः पवत' इति तृचे कार्यम्[२] वैराजस्य साम्न इव (४)अस्याऽप्यनुतोदवत्त्वात् साम्येनाऽस्मिन् वैराजं प्रतिष्ठितमित्यभिप्रेत्य स्तौति—

एतस्मिन्वै वैराजं प्रतिष्ठितं प्रतितिष्ठति वात्सप्रेण तुष्टुवानः ॥ २४ ॥

अयमभिप्रायः—अनुतोदो नामाऽभ्यासः। स च त्रित्वविशिष्टो वैराजस्य त्रिषु पादान्तेष्वधीयते वात्सप्रेऽपि तथाऽधीयते। उभयत्र चतुष्कृत्वोऽभ्यासः सूत्रकृता विकल्पेनोक्तः—'तस्य पदान्तांश्चतुरभ्यस्येयुस्तथा चातुर्थिकस्य वात्सप्रस्ये'ति। तस्येति प्राकृतं वैराजं परामृश्यते। तत्र च निदानकारेण व्यवस्था दर्शिता—'तेन वात्सप्रं सामाऽऽदध्यात् यदि वैराज त्र्यनुतोदं वात्सप्रमपि त्र्यनुतोदम्। यदि चतुरनुतोदं वात्सप्रमपि चतुरनुतोदमि'ति। सूत्रकृताऽप्युक्तम्—'समर्धि त्वि'ति। वैराजवात्सप्रयोः समर्धि साम्यं कुर्य्यादिति तस्याऽर्थः। एतदेवाभिप्रेत्य एतस्मिन् खलु वात्सप्रे वैराजं साम प्रतिष्ठितमिति कथनम्। यस्मादेवं तस्माद्वात्सप्रेणानेन तुष्टुवानः स्तुवन् प्रतितिष्ठति ॥ २४ ॥

अथाऽस्य साम्नः ऋषिसम्बन्धप्रदर्शनपुरस्सरं श्रद्धाफलतया स्तौति—

वत्सप्रीर्भालन्दनः श्रद्धां नाऽविन्दत स तपोऽतप्यत

---

२. अक्षराण्यवशिष्यन्त इति. क. पु. ३. तयोरिति. क. ख. पु.
४. अस्याऽप्यनुनोदादिति. क. ख. पु.।

स एतद्वात्सप्रमपश्यत्स श्रद्धामविन्दत श्रद्धा विन्दामहा इति वै सत्रमासते विन्दते श्रद्धाम् ॥ २५ ॥

(१)ऋषिः श्रद्धां सर्ववस्तुविषयामभिरुचिं नाऽविन्दत नाऽलभत। लब्धुमर्थं स ऋषिः तपस्तप्तवान्। तेन च तपसा स ऋषिरेतद्वात्सप्रं सामाऽपश्यत्। तेन साम्ना साधनेन श्रद्धामप्यविन्दत श्रद्धां विन्दामहै लभामहा इति खलु सत्रमासते द्वादशाहाख्यं यज्ञं कुर्वन्ति। तेनैतद्वात्सप्रं प्रयुञ्जानाः श्रद्धामभिरुचिं सर्ववस्तुगोचरां विन्दते लभते ॥ २५ ॥

अथैतदीयस्य निधनस्य अह्ना सङ्गतिं दर्शयन् प्रशंसति-

ईनिधनं तथा ह्यतस्याऽह्नो रूपं निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥ २६ ॥

ई इति निधनं यस्य तत्तथोक्तं वात्सप्रमपि ईकारनिधनम्। तथाहि नथैव खल्वेतस्याऽह्नो रूपं पुरा विहितम् दिनिधनं तृतीयस्य निधनं चतुर्थस्येति। किञ्च पवमानाः पवमानस्तोत्राणि निधनान्ताः निधनं ऋगक्षरव्यतिरिक्तं ई सा वाक् ई इत्यादिकं येषां ते निधनन्ताः तादृशानि भवन्त्यह्नो धृत्यै पवमानस्तोत्रस्यैतस्याऽह्नो धारणार्थम्। स्तोत्रं हि पुरस्तात् क्रियमाणेन हिङ्कारेण ऋगक्षरव्यतिरिक्तेनावसानप्रयुक्तेन निधनेन उभयतः परिगृहीतत्वाद्धृतं भवति। तद्वारा अह्नरपि अन्यथाऽभिधानस्थानेन निधनेन वियोगात् धृतमपि स्तोत्रं प्रशिथिलं स्यादित्यह्नोऽपि शैथिल्यं भवेत्। एवं सप्तसु सामसु तृचेषु क्रियमाणेषु एकविंशतिस्तोत्रीया निष्पद्यन्ते। तथा च एकविंश एवाऽस्य स्तोत्रस्य स्तोमो भवति ॥ २६ ॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्यैकादशः खण्डः ॥

अथ द्वादशः खण्डः ॥

अथोक्थानां प्रथमस्य स्तोत्रीयं तृचं दर्शयति-

'अग्निं वो वृधन्त'मिति ॥ १ ॥

अयं तृचः प्रथमस्य मैत्रावरुणस्योक्थस्य स्तोत्रीय इत्यर्थः ॥ १ ॥

अस्मिंस्तृचे वृधन्तमिति वृधि धातुः श्रूयते। तत्सूचितमर्थमाह—

अवर्द्धन्त ह्येतर्हि यजमानमेव तया वर्द्धयन्ति ॥ २ ॥

---

१. भालन्दनः भलन्दनस्य पुत्रः वत्सप्रीर्नाम।

एतर्हि एतस्मिन् काले तृतीयसवनावसाने अवर्द्धन्त । हि यस्माद्देवाश्चरुपुरोडाशादिभिर्वृद्धाः समृद्धाः अभूवन्, तस्मादेतया वृधिधातुयुक्तयर्चा यजमानमेव वर्द्धयन्त्युद्गातारः ॥ २ ॥

अथ द्वितीयस्य ब्रह्मण उक्थस्य स्तोत्रीयं तृचं दर्शयति—

"वयमु त्वामपूर्व्ये"त्यपूर्व्वाꣳ ह्येतर्हि प्रजापतेस्तनूमगच्छन्नपूर्व्वमेवैतया यजमानं गमयन्ति ॥ ३ ॥

'वयमु त्वा'मिति तृचो द्वितीयस्योक्थस्य स्तोत्रीयः कार्य्यः। तत्सम्बन्धिना(१) अपूर्वशब्देन सूचितोऽर्थः प्रतिपाद्यते । एतर्ह्येतस्मिन् काले अपूर्व्वा अदृष्टपूर्व्वा खलु प्रजापतेस्सर्वकारणभूतस्य विधातुस्तनुं शरीरं हि अगच्छन् आप्नुवन् देवाः । तस्मादपूर्वशब्दयुक्तयैतया स्तोत्रीयया अपूर्वं अभूतं दिव्यं फलमेव यजमानं गमयन्ति प्रापयन्ति ॥ ३ ॥

अथ तृतीयमच्छावाकोक्थस्य स्तोत्रीयं तृचं विधत्ते—

"इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदमि"ति ज्यैष्ठꣳ ह्येतर्हि वाचोऽगच्छन् ज्यैष्ठ्यमेवैतया यजमानं गमयन्ति ॥४॥

'इममिन्द्र सुतं पिबे'ति तृतीयस्योक्थस्य स्तोत्रीयस्तृचः कार्य्यः । एतर्ह्येतस्मिन्नन्तरे ज्यैष्ठ्यमतिशयितं प्राशस्त्यं वाचोऽगच्छन् स्तुतशस्त्ररूपाणां सर्वासां वाचां प्रयुक्तत्वात् । अतो ज्यैष्ठ्यलिङ्गयुक्तया स्तोत्रीयया यजमानं ज्यैष्ठ्यमतिशयितं प्राशस्त्यमेव गमयन्ति ॥ ४ ॥

अथ 'अग्निं व' इति प्रथमस्योक्थस्य विहिते तृचे गेयं साम दर्शयति—

सैन्धुक्षितं भवति ॥ ५ ॥

सिन्धुक्षिता दृष्टं सैन्धुक्षितम् । तत्साम तस्मिंस्तृचे कार्यम् ॥ ५ ॥

अथोक्तमृषिसम्बन्धं दर्शयन् विशिष्टफलहेतुतयैतत् स्तौति—

सिन्धुक्षिद्वै राजन्यर्षिर्ज्योगपरुद्धश्चरन् स एतत् सैन्धुक्षितमपश्यत् सोऽवागच्छत् प्रत्यातिष्ठदवगच्छति प्रतितिष्ठति सैन्धुक्षितेन तुष्टुवानः ॥ ६ ॥

सिन्धुक्षिन्नाम राजन्यो राजपुत्रः ऋषिः ज्योक् चिरकालं अपरुद्ध अज्ञानेनाऽऽवृतश्चरन् सञ्चरणशीलश्चाऽऽसीत् । स ऋषिरेतत् सैन्धुक्षितं नाम सामाऽपश्यत् तपसो बलात् दृष्टवान् । तदनन्तमनेन साम्ना साधनेन अवागच्छत् सर्वमजानात्, तथा प्रत्यातिष्ठत्(२) प्रतिष्ठातत्परोऽभव-

१. अपूर्वसम्बन्धेनेति. ग. पु. २. प्रतिष्ठितश्चेति. क. ख. पु.

द्राज्ये । अतोऽद्यतनोऽपि सैन्धुक्षितेन स्तुवन्नवगच्छति प्रतितिष्ठति च ॥
'वयमु त्वामपूर्व्ये'ति द्वितीयस्योक्थस्य विहिते तृचे गेयं साम दर्शयति-

सौभरं भवति बृहतस्तेजः ॥ ७ ॥

'बृहतो वा इन्द्रो वृत्राय वज्रं प्राहरत्तस्य तेजः परापतत् तत् सौभरमभवदि'ति ब्राह्मणात् सौभरं साम बृहत्साम्नस्तेजः । एतदस्मिन् 'वयमुत्वामि'ति तृचे कार्य्यम् ॥ ७ ॥

अथैतत् स्तौति--

पन्नामिव वै चतुर्थमहस्तदेतेन बृहतस्तेजसोत्तभ्नोति सौभरेण ॥ ८ ॥

पन्नं अधस्तात् पतितमिव खल्वेतत् चतुर्थमहरतीतेष्वहःसु(१) बृहतीष्वेतत्पृष्ठस्तोत्रं क्रियते । बृहती च षट्त्रिंशदक्षरा । अस्मिन्नहनि ततोन्यूनासु विराट्सु प्रथमं पृष्ठस्तोत्रं विहितम् । तस्मादधः पतितमिव वै तदहः । एतेन सौभरेण बृहतस्तेजसा तच्चतुर्थमहरुत्तभ्नोति उत्तभ्नं उपर्य्यवस्थापितं करोत्युद्गाता ॥ ८ ॥

अथ तृतीयस्योक्थस्य विहिते 'इमामिन्द्रसुतमि'ति तृचे गेयं साम दर्शयति--

वासिष्ठस्य प्रिय भवति ॥ ९ ॥

वासिष्ठस्य प्रियमिति समुदायः साम्नस्संज्ञा । तत्तस्मिंस्तृचे गातव्यम्९
(२)अथैतां संज्ञां निर्ब्रुवन् स्तुवतः फलमाह--

एतेन वै वासिष्ठ इन्द्रस्य प्रेमाणमगच्छत् प्रेमाणं देवतानां गच्छति वासिष्ठेन तुष्टुवानः स्तोमः ॥१०॥

एतेन खलु साम्ना पुरा वसिष्ठ ऋषिः इन्द्रस्य प्रेमाणं प्रियत्वमगच्छत् प्राप्नोत् । प्रियशब्दादिमनीचि(३) प्रियस्थिरस्फिरोरुबहुलेत्यादिना प्रादेशः । तस्मादस्य साम्नो वसिष्ठस्य प्रियमिति नाम सम्पन्नम् । तस्मादद्यतनोऽपि वासिष्ठेनाऽनेन स्तुवन् यजमानो देवानां प्रेमाणं प्रियत्वं गच्छति । एषु च त्रिषु स्तोत्रेषु पूर्वोक्त एवैकविंशस्तोमः कार्य्यः ॥१०॥

इति ताण्ड्यमहाब्राह्मणे सायणीये वेदार्थप्रकाशे
द्वादशाध्यायस्य द्वादशः खण्डः ॥

---

१. बृहतीष्वेव पृष्ठस्तोत्रमिति. क. ख. पु.
२. तथैतत्संज्ञामर्थान्निर्ब्रुवन्निति. क. ख. पु. ३. पा. सू. ६. ४. १५७.

अथ त्रयोदशः खण्डः ॥

इत्थं पञ्चदशस्तोत्राणि गतानि । अथैतस्य चतुर्थस्याङ्गः षोडशिमत्वात् तत्र षोडशिस्तोत्रे बृहत्साम द्विपदासु स्तोतव्यमिति विधित्सुराह—

इन्द्रश्च बृहच्च समभवतां तमिन्द्रं बृहदेकया तन्वात्यरिच्यत तस्या अबिभेदनया माऽभिभविष्यतीति सोऽब्रवीत् षोडशी तेऽयं यज्ञक्रतुरस्त्विति स षोडश्यभवत्तदस्य जन्म ॥ १ ॥

देवानां मध्ये इन्द्रश्च साम्नां मध्ये बृहत्साम च समभवतां प्रजापतेरुरसो बाहुभ्याञ्च सम्भूतौ सहोत्पन्नावभूताम् । (१)एवं सहोत्पत्त्यनन्तरं तमिन्द्रं बृहत्साम एकया तन्वा एकेन (२)शरीरावयवेनाऽत्यरिच्यत अतिरिक्तमधिकमभूत् । ततस्स इन्द्रः तस्या बृहतस्तन्वा अतिरिक्ताया अबिभेत् भीतवान् । अनयाऽतिरिक्तया तन्वा मां बृहत्सामाऽभिभविष्यति पराभविष्यतीति । एवं (३)भीतस्सन् इन्द्रोऽब्रवीत्— हे बृहत् ते तव येयमतिरिक्ता तनूः अयं षोडशी नाम यज्ञक्रतुरस्त्विति षोडशस्तोत्राणि षोडश शस्त्राणि च यस्माऽसौ षोडशी षोडश्याख्यः सोमयागो भवत्वित्यर्थः । एवमिन्द्रोणोक्ते तदनन्तरं स षोडश्यभवत् उक्तस्तोत्रपञ्चदशकापेक्षया अतिरिक्ता या बृहतस्तनूः सा षोडशी षोडशस्तोत्रशस्त्रवान् यज्ञक्रतुरभवत् । अस्य षोडशिनस्तदेव जन्मोत्पत्तिबृहतः सम्बन्धिन्यतिरिक्ता तनूः विहितानां पञ्चदशानां स्तोत्राणां यत् षोडशसंख्यापूरकं स्तोत्रं तदात्मना जातेत्यर्थः ॥ १ ॥

तस्माद्बृहत्साम षोडशिस्तोत्रतया कार्य्यमित्याह—

अतिश्रिया भातृव्यꣳरिच्यते यो गायत्रीषु द्विपदासु बृहता षोडशिना स्तुते ॥ २ ॥

यच्छब्दश्रवणात्तच्छब्दाध्याहारः । सोऽयं श्रिया सम्पदा भ्रातृव्यं शत्रुमतिरिच्यते अधिको भवति । यो गायत्रीषु द्विपदासु बृहता षोडशिना षोडशिसाम्ना स्तुते स्तावयतीत्यर्थः ॥ २ ॥

---

१. सहोत्पन्नमिति. म. पु. २. शरीरेणाऽनेनेति. ग. पु.
३. भूतस्स इन्द्र इति. क. ख. पु.

काः पुनस्ताः द्विपदा इत्यत आह—

"उप नो हरिभिः स्तुत"मित्येता वै गायत्र्यो द्विपदा एतासु स्तोतव्यम् ॥ ३ ॥

"उप नो हरिभिः सुत"मित्याद्याः उत्तराग्रन्थे समाम्नाताः। एता एव गायत्र्यो द्विपदाः। यद्यपि तास्त्रिपदा गायत्र्यः तथाप्युप नो हरिभिः सुत'मिति प्रथमपाद एव तृतीयपादात्मना पुनः पुनरभ्यस्यते इति तासां द्विपदात्वम्। एतासु द्विपदासु बृहता साम्ना स्तोतव्यमित्येकः पक्षः॥३॥

अथ पक्षान्तरं विधित्सुः सामान्तरस्योत्पत्तिमाह—

इन्द्रः प्रजापतिमुपाधावद्वृत्रꣳ हनानीति तस्मा एतामनुष्टुभमपहरसं प्रायच्छत्तया नाऽस्तृणुत यदस्तृता व्यनदत्तन्नानदस्य नानदत्वम् ॥ ४ ॥

इन्द्रः पुरा वृत्रं असुरं हन्तुं स्वयं(१) अशक्नुवन् प्रजापतिं स्रष्टारं (२)स्वपितरमुपाधावदुपागच्छत्। किं कुर्व्वन्? वृत्रमसुरमहं हनानि हननसमर्थो भवामि यथाऽहं हन्तुं शक्ष्यामि तथा मां कुर्व्विति ब्रुवन्। तस्मा उपगतायेन्द्राय अपहरसं अपगतहरसं(३) तेजःप्रतिपादकेन हरशब्देन विधुरामेतां प्रत्यस्मा इत्यादिकमनुष्टुभमृचं प्रायच्छत् प्रादात्-अनया वृत्रं जहीति। तत इन्द्रस्तां तस्मिन् वृत्रे प्राक्षिपत्। तया स नाऽस्तृणुत नाऽहिंस्यत। स्तृहिंसायामिति धातुः। स चाऽस्तृतो अहिंसतः सन् यत् व्यनदत् विशेषेण शब्दमकारोत् तन्नानदं सामाऽभवत्। यस्मादेवं नदनाज्ञातं तत्तस्मान्नानदस्य साम्नो नानदत्वं नानदमिति नाम सम्पन्नम्॥४॥

इत्थं पक्षान्तरोपयुक्तं साम प्रदर्श्य अथ (४)तस्याऽऽधारभूताः स्तोत्रीया ऋचो विवक्षुराह—

तं पुनरुपाधावत्तस्मै सप्तानाꣳ होत्राणाꣳ हरो निर्म्माय प्रायच्छत् तमस्तृणुत ॥ ५ ॥

तं प्रजापतिमिन्द्रः पुनरुपाधावत् उपागच्छत् त्वद्दत्तयाऽनुष्टुभा नाऽसा वृत्रो हत इति ब्रुवन्। ततस्तस्मै इन्द्राय प्रजापतिः सप्तानां होत्राणां होतृमैत्रावरुणादयः सप्त षड्कर्तारः तेषामार्त्विज्यानि होत्रशब्देनोच्यन्ते सप्तसंख्यानां होतृमैत्रावरुणादिसम्बद्धानां कर्म्मणां हरस्तेजो निर्म्मायोत्पाद्य एकीकृत्य प्रायच्छत्। ततस्तेन हरसा तं वृत्रम-

---

१. अपराद्धस्वामिति. ग. पु. २. स्वामिनमिति. क. पु.

३. कामः तेजप्रतिपादकेनेति. क. पु. ४. तत्साधनभूता इति. क. ख. पु.

स्तृणुत अवधीत् ॥ ५ ॥

एतद्वेदनफलमाह—

स्तृणुते तं यं तुस्तूर्षते य एवं वेद ॥ ६ ॥

यं शत्रुं तुस्तूर्षते हिंसितुमिच्छति तं स्तृणुते हिनस्ति स पुरुषः य एवं पूर्वोक्तमर्थं वेद जानाति ॥ ६ ॥

किन्तत इत्याह—

तस्माद्धरिवतीषु स्तुवन्ति हरिवतीः शंसन्ति हरिवतीषु ग्रहो गृह्यते हरो ह्यस्मै निर्म्माय प्रायच्छत् ॥ ७ ॥

यस्मादिन्द्रो हरसा प्रजापतिदत्तेन वृत्रमवधीत् तस्मात् कारणात् हरिवतीषु हरिशब्दयुक्तासु एकदेशविकृतमनन्यवद्भवतीति न्यायेन हरिशब्देन हरश्शब्दः प्रत्यभिज्ञायते । अत एतासु हरिवतीषु 'असाविसोम इन्द्र' इत्याद्यासु नानदेन षोडाशिसाम्ना स्तुवन्तीत्येतत्पक्षान्तरम्। तथा हरिवतीः हरिशब्दयुक्ता एव ये होतारः शंसन्ति तथा हरिवतीषु चक्षुरादिशत्रुहननमित्याद्यास्वृक्षु पठ्यमानासु अध्वर्युणा ग्रहः षोडश्याख्यो गृह्यते । तस्मादिन्द्राय हरो हि हरश्शब्दवाच्यं खलु तेजो निर्म्माय पुरा प्रजापतिः प्रायच्छत् दत्तवान् ॥ ७ ॥

सप्तानां होत्राणां हरो निर्म्माय प्रायच्छदिति यदुक्तं तस्योपपादकं लिङ्गं अस्मिन् षोडशिस्तोत्रे दर्शयति—

एकविंशायतनो वा एष यत् षोडशी सप्त हि प्रातस्सवने होत्रा वषट्कुर्व्वन्ति सप्त माध्यन्दिने सवने सप्त तृतीयसवने ॥ ८ ॥

यत् यस्षोडशी एषः एकविंशायतनो वा एकविंशस्तोमस्याऽऽयतनभूत आश्रयभूतः । तत् कुतो हेतोः ? प्रातस्सवने सप्तसंख्याकाः होत्राः होतृमैत्रावरुणादयः ऋत्विजो वषट्कुर्व्वन्ति प्रस्थितयाज्याद्याभिर्वषट्कृत्य यजन्ते । तथोत्तरयोस्सवनयोरपीत्येकविंशतिसंख्या होत्रा भवन्ति । हि यस्मादेवं तस्मात् षोडाशिन एकविंशायतनत्वम् ॥ ८ ॥

इत्थं बृहद्रथन्तरादाख्यं(१) सामद्वयं विकल्पेन षोडाशिसाम कर्त्तव्यमित्युक्तम्, अथ स्वाभिमतं पक्षान्तरं दर्शयति—

गौरीवितं भवति ॥ ९ ॥

गौरीवितं साम 'इन्द्रं जुषस्व प्रवहे'ति तृचे षोडाशिसाम कार्य्यम् ।९।

---

१. सामद्वितयमिति. क. ख. पु.

अथाऽस्य साम्नः ऋषिसम्बन्धप्रदर्शनपुरस्सरमुत्पत्तिं दर्शयन् स्तौति—

गौरीवितिर्वा एतच्छाक्त्यो ब्रह्मणोऽतिरिक्तमपश्यत्तद्गौरीवितमभवदतिरिक्तं वा एतदतिरिक्तेन स्तुवन्ति यद्गौरीवितेन षोडशिनꣳस्तवस्तनवान् भवत्यपि प्रजाया उपक्लृप्तः ॥ १० ॥

अतिरिक्तं वा एतदित्यन्तं पूर्ववद्व्याख्येयम् । यद्गौरीवितेन साम्ना षोडशिनं षोडशिस्तोत्रं प्रणयति अतिरिक्तेनाऽधिकेनैव तेन स्तुवन्ति तस्मादाधिक्यवता साम्ना स्तवनात् स्तवस्तनवान् श्वः परस्मिन् दिवसे भवं स्तवस्तनं तद्वान् प्रजायाः पुत्रपौत्रादिरूपायाः उपक्लृप्तः उपकल्पितः उपभोग्यश्च भवति ॥ १० ॥

पूर्वं नानदं साम षोडशिस्तोत्रतया कार्य्यमिति विहितम्, पश्चात्पश्चान्तरत्वेन गौरीवितमपि । एवं सत्यष्टदोषग्रस्तो विकल्पस्स्यादिति मन्वानः एकस्मिन्नेव प्रयोगे देशभेदेनैते सामनी व्यवस्थापयितुमाह—

विशालं लिब्जया भूत्याऽभ्यधादिति होवाचोपोदितिर्गोपालेयोऽनुष्टुभि नानदमकर्गौरीवितेन षोडशिनमस्तोष्टाऽञ्जसा श्रियमुपागान्न श्रिया अवपद्यत इति ॥ ११ ॥

लिब्जया लिप उपदेहे उपदेह उपचयः लेपेन उपचयेन जाता लिब्जा तया (१)सम्पूर्णया विभूत्या सम्पदा विशालं विस्तृतं यथा भवति तथा अभ्यधात् अभिहितवानुक्तवानिति खलु । गोपालेयो गोपालपुत्र उपोदितिर्नाम ऋषिरुवाच पुरा प्रोक्तवान् । अभिधानप्रकार उच्यते—अनुष्टुभि चतुर्थेऽहनि आर्भवपवमाने पुरोजितीति योऽयं आनुष्टुभस्तृचस्तस्मिन्नानदं साम अकः कृतवान् गौरीवितेन साम्ना च षोडशिनमस्तोष्ट षोडशिस्तोत्रं कृतवान् । एवं सामद्वयं व्यवस्थया कृत्वा अञ्जसा आर्जवेन श्रियं सम्पदं उपागात् उपागच्छत् । उपगतया च तया श्रिया नाऽवपद्यते न कदाचिद्धीयत इति ॥ ११ ॥

कोऽसावभिदध्यादिति तमाह—

एष वै विशालं लिब्जया भूत्याऽभिदधाति योऽनु-

---

१. उपचयेन जातया सम्पूर्णयेति क. ख. ५.

ष्टुभि नानदं कृत्वा गौरीवितेन षोडशिना स्तुतेऽस्रसा श्रियमुपैति न श्रिया अवपद्यते ॥ १२ ॥

एष वै एष खलु विशालं विस्तृतं लिङ्गजया ऽपचितया भूत्वा ऐश्वर्य्येण अभिदधाति यो यजमानः अनुष्टुभि आनुष्टुभे तृचे नानदं साम कृत्वा गौरीवितेन षोडशिना षोडशिसाम्ना स्तुते तदनन्तरमञ्जसाऽऽजवन श्रियमुपगच्छति। न च तया श्रिया वियुज्यते ॥ १२ ॥

इत्थं सामद्वयं व्यवस्थाप्य षोडशिसाम्ना स्तोत्रीयाः कामना भेदेन विभिन्नाः प्रदर्शयन्नेकं पक्षमाह—

शक्वरीषु षोडशिना स्तुवीत यः कामयेत वज्री स्यामिति ॥ १३ ॥

षट्पञ्चाशदक्षरा ऋचः शक्वर्य्यः। शक्वरीषु षोडशिना षोडशिसाम्ना स्तुवीत। यो यजमानः वज्री स्याम् (१)वज्रवान् वीर्य्यवान् भवेयमिति स शक्वरीषु षोडशिना स्तुवीत ॥ १३ ॥

तदेतदुपपादयति—

वज्रो वै षोडशी वज्रः शक्वर्य्यो वज्रेणैवाऽस्मै वज्रꣳ स्तृणोति वज्री भवति ॥ १४ ॥

षोडशिनः शक्वरीणाञ्च वज्रवद्वृत्रहननसाधनत्वाद्वज्रत्वम्। अत्र च शक्वरीषु षोडशिसाम्ना स्तवनात् वज्रेण वज्रात्मकेनैव षोडशिना शक्वर्य्याख्यं वज्रं अस्मै यजमानाय स्तृणोति बलयति संयोजयति तर्पयति वा। स्तृप्रीतिबलयोरिति धातुः। स च यजमानो वज्री वज्रवान् भवति ॥ १४ ॥

अथ फलान्तराय स्तोत्रीयान्तरं विधत्ते—

अनुष्टुप्सु षोडशिना स्तुवीत यः कामयेत न मा वागतिवदेत् ॥ १५ ॥

अनुष्टुप्सु अनुष्टुप्छन्दस्कासु ऋक्षु षोडशिसाम्ना स्तुवीत मा मां वाक् परैः प्रयुज्यमानं वाक्यं नाऽतिवदेत् अतिक्रम्य न ब्रूयादिति यो यजमानः कामयेत, सोऽनुष्टुप्सु षोडशिना स्तुवीत ॥ १५ ॥

अथैतदुपपादयति—

वज्रो वै षोडशी वागनुष्टुब्वज्रेणैवाऽस्मै वाचꣳ

---

१. वज्रवानिव भवेयमिति. क. ख. पु.

स्पृणोति नैनं वागतिवदति ॥ १६ ॥

अस्मै यजमानाय वज्रेणैव वाचं स्पृणोति प्रीणयति । अत एनं वाङ्नाऽतिवदति । शिष्टं सिद्धम् ॥ १६ ॥

काः पुनस्ता अनुष्टुभ(१) इति तत्राऽऽह—

"असावि सोम इन्द्र त" इत्येतासु स्तोतव्यम् ॥१७॥

'असावि सोमं' इत्याद्यास्तिस्रोऽनुष्टुभ एतासु गौरीवितेन षोडशिसाम्ना स्तोतव्यम् ॥ १७ ॥

अथाऽन्नाद्यकामस्य षोडशिस्तोत्रीया दर्शयति ।

विराट्स्वन्नाद्यकामः षोडशिना स्तुवीत वज्रो वै षोडशी वैराजमन्नं वज्रेणैवाऽस्मा अन्नꣳस्पृणोत्यन्नादो भवति ॥ १८ ॥

विराट्छन्दस्कासु ऋक्षु अन्नाद्यकामः अन्नञ्च तदद्यं अन्नाद्यं तत्कामनो यजमानः षोडाशिसाम्ना स्तुवीत । वज्ररूप एव षोडशी । अन्नञ्च वैराजं विराट्सम्बद्धं अस्मै यजमानाय वज्रेणैव अन्नं स्पृणोति । तदनन्तरं स यजमानोऽन्नादो भवति ॥ १८ ॥

काः पुनस्ता विराज इत्यत आह—

"प्र वो महे वृधे भरध्वमि"त्येतासु स्तोतव्यम् ॥ १९ ॥

'प्र वो मह' इत्याद्यास्तिस्रो विराज इत्येतासु गौरीवितेन स्तोतव्यम्॥१९॥

एतासु विद्यमानान्यक्षराणि विभज्य स्तौति —

त्रयस्त्रिꣳशदक्षरा वा एता विराजो यदेकविंशतिः प्रतिष्ठा सा यद्द्वादश प्रजातिः सा ॥ २० ॥

एताः 'प्रवो मह' इत्याद्या विराजः त्रयस्त्रिंशदक्षरा वै त्रयस्त्रिंशदक्षराः खलु, प्रतिपादमेकादशाक्षरत्वात् । तत्र एकविंशतिः आदितः एकविंशतिसङ्ख्याकान्यक्षराणीति यत् सा प्रतिष्ठा स्तोमानां मध्ये एकविंशः प्रतिष्ठाहेतुः । तत्साहश्यात्ततोऽवशिष्टानि यत् द्वादशाक्षराणि सा प्रजातिः प्रजानामुत्पत्तिः गर्भाधानादूर्ध्वं द्वादश मासात्मके सम्वत्सरे पूर्णे हि प्रजाः प्रजायन्ते ॥ २० ॥

एतद्वेदनफलमाह—

प्रतिष्ठाय प्रजायते नो षाऽन्तस्थायाऽऽर्तिमार्च्छति य एवं वेद॥२१॥

---

१. इत्यत आहेति. क. ख पु.

प्रतिष्ठाय उत्कृष्टे स्थाने प्रतिष्ठितो भूत्वा ततः प्रजायते पुत्रादिरूपेणोत्पद्यते नो नैव च अन्तस्थायां अन्तर्मध्ये अवस्थितायां प्रजायां जीर्यते हीयते अपक्षीयते । ज्यावयोहानाविति धातुः । य एवमासु विराट्सु उक्तां प्रतिष्ठां प्रजातिञ्च वेद ॥ २१ ॥

एवं कामनाभेदेन स्तोत्रीयाणां विकल्पा उक्ताः । अथ नित्यप्रयोगे 'इन्द्र जुषस्वे'त्याद्यास्तिस्र ऋचो गौरीवितस्य षोडशिसाम्नस्स्तोत्रीयाः कार्य्या इत्यभिप्रेत्य तत्रत्यानुपसर्गान्विदधाति—

अथ वा एता एकपदास्त्र्यक्षरा विष्णोश्छन्दो भुरिजः शाक्वर्य्यः ॥ २२ ॥

'इन्द्रं जुषस्वे'त्याद्यास्तिस्र ऋचः पञ्चपदाः पादाय पञ्चाक्षराः । तत्र प्रथमायामृचि प्रथमपादात् ऊर्द्धं प्रवहेति त्रीण्यक्षराण्याम्नातानि । द्वितीयपादात्परमपि हरिहेति अक्षरत्रयमाम्नातम् । तथा तृतीयपादात्परमपि मतिर्नेत्यक्षरत्रितयम् । अविशिष्टौ पञ्चाक्षरौ द्वौ पादौ । आदितः पञ्चाक्षरात्रयः पादा इति पञ्चाक्षरपादाः पञ्चपादाः प्रथमाः । तत्राऽऽद्येषु त्रिषु पादेषु प्रवहहरिहमतिन्न इत्येतास्त्र्यक्षरा एकपदाश्शाक्वर्य इति च उपसर्गा इति चाऽऽख्यायन्ते एवमुत्तरयोरपि । तथा च प्रत्यृचं त्रयस्त्रय उपसर्गा इति तृचेन भवन्ति एतास्तैर्विरहिता 'इन्द्र जुषस्वे'त्याद्याः पञ्चविंशत्यक्षरा गायत्र्यो भवन्ति । तैः सहिताश्चतुस्त्रिंशदक्षरा अनुष्टुभो भवन्ति । अत्र निदानकारः 'तस्यैता ऋचः पञ्चविंशत्यक्षरा पञ्चपदाः [1]पञ्चाक्षरपादाः नवोपसर्गाक्षराणि आदितस्त्रयाणां पादानां त्रीणि त्रीण्युपसर्गाक्षराणि पादान्तेषु भवन्ति । तेऽष्टाक्षरास्सम्पद्यन्ते । पञ्चाक्षरावुत्तरौ दशाक्षरो वैकः ताश्चतुस्त्रिंशदक्षरास्सम्पद्यन्त", इत्यादिना इममेवार्थं बहुधा प्रपञ्चितवान् । तत्र या एताः प्रवहाद्या (१)उपसर्गास्ते प्रदर्श्यन्ते अथे इत्यादिना । अथेति पक्षान्तरपरिग्रहे 'इन्द्रं जुषस्वे'त्यादीनां तिसृणां आदितस्त्रिभ्यः पञ्चाक्षरपादेभ्य ऊर्द्धं यानि प्रवहेत्यादीनि त्रीण्यक्षराणि एतास्त्र्यक्षरा एकपदा विष्णोश्छन्दसः विष्णुसम्बन्धीनि छन्दांसि भुरिजः शाक्वर्य्यः भुरिजनामिकाः शाक्वरीविशेषाः ॥ २२ ॥

एतासां शीघ्रफलसाधनत्वमाह—

एताभिर्वा इन्द्रो वृत्रमहन् क्षिप्रं वा एताभिः पाप्मानꣳ हन्ति क्षिप्रं वसीयान् भवति ॥ २३ ॥

---

१. उपसर्गा इति नाऽस्ति क. ख. पु.

एताभिः शक्वरीभिः वज्रं पुरा इन्द्रो वृत्रमसुरं हतवान्। आभिर्वृत्रशकं हन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते इति निरुक्तम्। यस्मादेवं तस्मादेकपदाभिर्भुरिजशक्वरीभिः क्षिप्रं पाप्मानं हन्ति विनाशयति। क्षिप्रं शीघ्रं वसीयान् वसुमत्तरः श्रेष्ठश्च भवति ॥ २३ ॥

अथैता एकपदाः 'इन्द्र जुषस्वे'त्याद्याश्च संयुज्य स्तौति—

चतुस्त्रिꣳशदक्षराः सꣳस्तुतो भवति त्रयस्त्रिꣳशद्देवताः प्रजापतिश्चतुस्त्रिꣳशो देवतानां प्रजापतिमेवोपयन्त्यरिष्ट्यै ॥ २४ ॥

प्रत्यृचं प्रवहाद्यास्तिस्रस्तिस्र एकपदाः ताश्च संस्तुताः प्रत्यृचं नवनवाक्षराणि सम्पद्यन्ते। पञ्चाक्षरैः पञ्चभिः पादैः पञ्चविंशत्यक्षराणि सम्पद्यन्ते। ता उभयोर्मिलित्वा प्रत्यृचं चतुस्त्रिंशदक्षरास्संस्तुतः सह स्तुतः स्त्रिचतुस्त्रिंशदक्षरात्मकस्समुदायो भवति। तस्याऽऽदितः त्रयस्त्रिंशदक्षरैः त्रयस्त्रिंशत्संख्याका देवताः प्राप्नोति—अष्टौ वसवः, एकादशरुद्राः, द्वादशाऽऽदित्याः, इन्द्रश्च वषट्कारश्चेति। त्रयस्त्रिंशदेतासां देवतानां प्रजापतिश्चतुस्त्रिंशत् संख्यापूरको भवति चतुस्त्रिंशेनाऽक्षरेण चतुस्त्रिंशं प्रजापतिमेवोपयन्ति उपगच्छन्ति अरिष्ट्यै अहिंसायै ॥ २४ ॥

अथोद्गातृणा षोडशिस्तोत्रसमये हिरण्यधारणं विधत्ते—

हिरण्यꣳ सम्प्रदायꣳ षोडशिना स्तुवते ज्योतिष्मानस्य षोडशी भवति ॥ २५ ॥

हिरण्यं सुवर्णं सम्प्रदायं अन्योन्यस्मै प्रदाय प्रदाय उद्गातारः षोडशिसाम्ना स्तुवते। अस्य साम्नः यां यां भक्तिं यो यो भूते स स हिरण्यं भूत्वा तया भक्त्या स्तुवीतेत्यर्थः। तदुक्तं सूत्रकृता—'यो यस्सामाङ्गं ब्रूयात् स स हिरण्यं धारयेदि'ति। अत्र सम्प्रदायमिति णमुल्प्रत्ययान्तस्तेन एकमेव हिरण्यं एकैकस्मै गानसमये दातव्यमिति गम्यते। 'षोडशिसाम्ना स्तोष्यमाण' इत्यादिना षोडशिस्तोत्राङ्गत्वेन यदुक्तं सूत्रकारेण तत्सर्वमत्राऽनुसन्धेयम्। स्वस्वभक्तिगानसमये उद्गातृभिर्हिरण्यस्य धारणादस्य यजमानस्य षोडशी ज्योतिष्मान् तेजस्वी भवति ॥ २५ ॥

अथैतस्मिन् षोडशिस्तुतिकाले अश्वस्य स्थापनं विधत्ते—

अश्वः कृष्ण उपतिष्ठति साम्येक्षयाय भ्रातृव्यलोकमेव स विधमꣳस्तिष्ठति ॥ २६ ॥

कृष्णः कृष्णवर्णोऽश्वः सदसः पूर्वस्मिन् परस्मिन्वा द्वारे प्रत्यङ्मुखः प्राङ्मुखो वा उपतिष्ठति यथा उपस्थितो भवति तथा कुर्य्यादित्यर्थः। तदुक्तं सूत्रकारेण-'अश्वः कृष्णः पूर्वस्यां सदसो द्वारि प्रत्यङ्मुखस्तिष्ठेदिति शाण्डिल्योऽपरस्यां प्राङ्मुख इति धानञ्जय्य' इति। किमर्थमश्वस्योपस्थानं साम्येक्ष्याय साम्यमीक्षणं साम्येक्ष्यं साम्यदर्शनायेत्यर्थः। अपि च स उपस्थितोऽश्वः भ्रातृव्यलोकं शत्रुनिवासस्थानमेव विधमन् विविधमुखवायुना अपगमयंस्तिष्ठति ॥ २६ ॥

अथ द्विप्रकारोऽयं षोडशी विहृतोऽविहृतश्च। तत्र विहृतस्य 'इन्द्र जुषस्वे'त्याद्यास्तोत्रीया विहिताः। अविहृते 'त्व सावि सोम इन्द्र त, इत्याद्यास्तिस्रोऽनुष्टुभः स्तोत्रीयाः। अथैतासां अनुष्टुभं स्तोतुमाह—

एकाक्षरं वै देवानामवमं छन्द आसीत्सप्ताक्षरं परमं नवाक्षरमसुराणामवमं छन्द आसीत् पञ्चदशाक्षरं परमं देवाश्च वा असुराश्चाऽस्पर्द्धन्त तान् प्रजापतिरानुष्टुभो भूत्वाऽन्तराऽतिष्ठत्तं देवासुरा व्यह्वयन्त स देवानुपावर्त्तत ततो देवा अभवन् पराऽसुराः ॥ २७ ॥

देवानामवमं न्यूनतमञ्छन्द एकाक्षरं एकमेवाऽक्षरं यस्य तथाविधमासीत्। परमं अधिकं छन्दः सप्ताक्षरमासीत्। असुराणान्तु अवमं नवाक्षरमासीत् परमं पञ्चदशाक्षरम्। एवं सप्तभिः छन्दोभिस्सहिता देवाश्चाऽसुराश्चाऽस्पर्द्धन्त। तान् स्पर्द्धमानानुभयविधानन्तरा तेषाम्मध्ये प्रजापतिस्तेषां पिता अनुष्टुभः पादो भूत्वा अतिष्ठत् स्थितवान्। सप्ताक्षरं हि देवानां परमं छन्दः असुराणान्नवाक्षरन्यूनं अष्टाक्षरं तूभयसाधारण्येन मध्येऽवास्थितम्। आनुष्टुभः पादश्चाष्टाक्षरः इति तद्रूपो भूत्वा प्रजापतिर्मध्यस्थोऽभवदित्यर्थः। तं मध्ये स्थितं प्रजापतिं देवाश्चाऽसुराश्च व्यह्वयन्त विविधमाह्वयन्। स च देवैरसुरैश्चाऽऽह्वयमानः प्रजापतिः देवानुपावर्त्तत[1] उपागच्छत्, नाऽसुरान्। ततोऽनन्तरं देवा अभवन् (१)समृद्धा अभवन्। असुराः पराभवन् पराभूताः पराजिताः आसन्। आनुष्टुभेन प्रजापतिना सहायेन देवानामभिवृद्धिर्जातेति अनुष्टुप्समृद्धिहेतुः। अतोऽनुष्टुभस्तोत्रीयाः समृद्धिहेतव इत्यर्थः ॥ २७ ॥

एतद्वेदनं प्रशंसति—

भवत्यात्मना पराऽस्य भ्रातृव्यो भवति य एवं वेद ॥२८॥

---

१. भूष्णवस्समृद्धा इति. क. ख. पु.

गतमतेत् ॥ २८ ॥

अथ देवैः केन छन्दसा आसुरं छन्दोऽपहृतमिति उभयं विविच्य दर्शयति—

ते देवा असुराणामेकाक्षरेणैव पञ्चदशाक्षरमवृञ्जत द्व्यक्षरेण चतुर्दशाक्षरं त्र्यक्षरेण त्रयोदशाक्षरञ्चतुरक्षरेण द्वादशाक्षरं पञ्चाक्षरेणैकादशाक्षरꣳ षडक्षरेण दशाक्षरꣳ सप्ताक्षरेण नवाक्षरमष्टाभिरेवाऽष्टावृञ्जत ॥ २९ ॥

ते प्रजापतिसहायेन समृद्धा देवाः स्वकीयेनैकाक्षरेणैव छन्दसा असुराणां पञ्चदशाक्षरं यत्परमं छन्दस्तदवृञ्जत अपावर्जयन्। द्व्यक्षरेणात्मीयेन छन्दसा आसुरं चतुर्दशाक्षरं छन्दोऽवृञ्जत । एवमुत्तरत्रापि योज्यम् । अष्टाक्षरस्य छन्दसोऽन्तरालवर्त्तित्वेनोभयसाधारणत्वात् अष्टाभिरेवाऽक्षरैः आसुराण्यष्टाक्षराण्यवृञ्जत ॥ २९ ॥

एतद्वेदनफलमाह—

एवमेव भ्रातृव्यादृभूतिं वृङ्क्ते य एवं वेद ॥ ३० ॥

यथा देवाः स्वकीयैश्छन्दोभिः असुराणाञ्छन्दांसि क्रमेणाऽवर्जयन् एवमेव भ्रातृव्यात् शत्रोः भूतिमैश्वर्य्यं वृङ्क्ते वर्जयति य एवमुक्तं ब्राह्मणार्थंजानाति ॥ ३० ॥

अथ प्रकारान्तरेण तद्वेदनस्य फलमाह—

अपरुद्धयज्ञ इव वा एष यत् षोडशी कनीयस्विन इव वै तर्ह्हि देवा आसन् भूयस्विनोऽसुराः कनीयस्वी भूयस्विनं भ्रातृव्यं वृङ्क्ते य एवं वेद ॥ ३१ ॥

यत् योऽयं षोडशी नाम यज्ञक्रतुः एषः अपरुद्धयज्ञ इव वै। इवेत्यवधारणे । शत्रुभिरवरुध्यमानेन आक्रम्यमाणेन क्रियमाणो यज्ञोऽपरुद्धयज्ञः। तादृश एव खलु । तत्कस्य हेतोः ? तस्मिन् काले असुरैः सह युद्धसमये कनीयस्विनः (१)कनीयांसि एकाक्षरादीनि सप्ताक्षरान्तानि छन्दांसि आसुरेभ्यश्छन्दोभ्यो (२)न्यूनाक्षरत्वात् अल्पीयांसि तद्वन्तो देवाः अल्पा एवाऽऽसन्। नवाक्षरादीनि पञ्चदशाक्षरान्तानि छन्दांसि बह्वक्षरत्वात् भूयांसि तद्वन्तो असुरा महान्त आसन्। एवञ्च सति अधिकबलैस्तैरुपरुध्यमाना देवाः षोडशिनमाहृत्य (३)तत्रत्येनाऽऽनुष्टुभेन प्रजा-

---

१. अल्पीयांसीति. क. ख. पु. २. अल्पाक्षरत्वादिति. क. ख. पु.

३. मध्यवर्त्तिनेति. क. ख. पु.

पतिना तानधिकानसुरानभ्यभवन्। तस्मादेष षोडशी अवरुद्धयज्ञ इति य एवं वेद जानाति, स वेदिता कनीयस्वी अल्पीयानपि भूयस्विनं अधिकं भ्रातृव्यं शत्रुं वृङ्क्ते वर्जयति ॥ ३१ ॥

अथ यदुक्तं सूत्रकारेण 'हविर्द्धानं गत्वा षोडशिग्रहमवेक्षेतोद्गाता यस्मादन्य' इति तन्मन्त्रविहितमवेक्षणं विधत्ते—

"यस्मादन्यो न परो ऽस्ति जातो य आबभूव भुवनानि विश्वा। प्रजापतिः प्रजया सम्विदानस्त्रीणि ज्योतींषि सचते स षोडाशी"त्युद्गाता ग्रहमवेक्षते ॥३२॥

यस्मात्प्रजापतेस्सर्वकारणभूतादन्यो व्यतिरिक्तः परो जात उत्पन्नो नाऽस्ति, यश्च विश्वानि सर्व्वाणि भुवनानि भूतजातानि आबभूव (१)कारणात्मना व्याप्तोऽभूत्। भूप्राप्ताविति धातुः। स प्रजापतिः, प्रजानामीश्वरो देवः प्रजया आत्मीयया, सामान्याभिप्रायमेकवचनम्। स्वात्मनस्सृष्टव्येन सर्व्वेण(२) कार्य्यजातेन सम्विदानः ऐकमत्यं गच्छन् त्रीणि ज्योतींषि चन्द्रसूर्य्याग्निरूपाणि, अथवा गार्हपत्यदक्षिणाग्न्याहवनीयात्मकानि तेजांसि सचते व्याप्नोति। स एव प्रजापतिः षोडशी षोडशिग्रहात्मना कार्य्यरूपेण वर्त्तत इति मन्त्रार्थः। अनेन मन्त्रेण उद्गाता खरे आसादितं षोडशिग्रहमवेक्षते ॥ ३२ ॥

एतद्वेदनं प्रशंसति—

ज्योतिष्मानस्य षोडशी भवति य एवं वेद ॥ ३३ ॥

स्पष्टमेतत् ॥ ३३ ॥

अथ पूर्ववदेतस्मिन् स्तोत्रे स्तोमकल्पं विधाय (३)स्तौति—

एकविंश एव स्तोमो भवति प्रतिष्ठायै प्रतितिष्ठति॥३४॥

पूर्वेषु स्तोत्रेषु यः स्तोमो विहितः स एवैकविंशोऽस्याऽपि स्तोत्रस्य स्तोमो भवति प्रतिष्ठायै प्रतिष्ठानार्थम्। अत एतेनैकविंशेन स्तोमेन (४)स्तुतेन यजमानः प्रतितिष्ठति ॥ ३४ ॥

---

१. कारणत्वेनेति. क. पु. २. कर्मजातेनेति क. पु.
३. प्रस्तौतीति. क. पु. ४. कृतेनेति. क. पु.

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरन्धरेण (१)सायणाचार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे ताण्ड्यमहाब्राह्मण द्वादशाध्यायस्य त्रयोदशः खण्डः ॥
द्वादशाध्यायः समाप्तिमगमत् ॥

---

१. सायणामात्येनेति क. पु.

सर्वविधपुस्तकप्राप्तिस्थानम्—
जयकृष्णदास-हरिदास गुप्तः-
चौखम्बा संस्कृत सीरिज आफिस,
विद्याविलास प्रेस, बनारस सिटी।

९५ संस्कारदीपकः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । सम्पूर्णः । (कर्मकाण्ड वि० १) रु० ८—

९६ वर्षकृत्यदी[illegible] । [illegible]निर्णयव्रतोद्यापनसहितः । म० म० पं० नित्यानन्दपन्त पर्वतीय विरचितः । (कर्मकाण्ड वि० २) रु० २—

९७ श्रौतसूत्रम् । श्रीमन्महर्षि-लाट्यायनप्रणीतमग्निष्टोमान्तम् । (कर्म० वि० १०) रु० २-

९८ नलचम्पूः अथवा दमयन्तीकथा । महाकविश्रीत्रिविक्रमभट्टविरचिता । विषमपद प्रकाशाख्य[illegible]व्याख्यासहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१५) रु० १-

९९ श्रीम[illegible]श्रीनिम्बार्कं महामुनीन्द्रविरचित वेदान्तपारिजात सौरभा-ख्य[illegible]भाषण श्रीश्रीनिवासाचार्यचरणप्रणीत श्रीवेदान्तकौस्तुभभाष्येण च [illegible]म् । (श्रीनिम्बार्कभाष्यम्) (वेदान्त वि० १०) रु० ३—

१०० वाग्वल्लभः । सर्वथाऽपि नवीनोऽपूर्वः प्रौढः परमोपयोगितया नियतमुपादेयमछन्दोनिबन्धः, श्रीमता दैवज्ञाग्रेसरेणागमनिगमैकप्रवीणेन कविपङ्क्तिवेन दुःखभञ्जनाबदुषा विरचितः, तत्सुतेन बहुशास्त्रपारगेण कविचक्रवर्तिना [illegible] पण्डितप्रवरेण दुःखया वरवर्णिन्या टीकया सोपेतः । (छन्दः शास्त्र वि० ४) रु० २—

१०१ सिद्धान्तलक्षणम् । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य श्रीशिवदत्तमिश्र-विरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्याय विभागे ४)) रु० १—

१०२ वेदभाष्यभूमिकासंग्रहः । (सायणाचार्यविरचितानां स्ववेदभाष्यभूमिकानां संग्रहः) । [वेद० वि० ५] रु० २-

१०३ माधवीयधातुवृत्तिः । श्रीमत्सायणाचार्यविरचिता । (व्या० वि० १२) रु० ९—

१०४ बौधायनधर्मसूत्रम् । श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम् । [कर्म०वि० ११] रु० ४—

१०५ ताण्डयमहाब्राह्मणम् । सायणाचार्यविरचितभाष्यसहितम् । (प्रथमोभागः) (वेद वि० ६) रु० ९—

१०६ न्यायमञ्जरी । जयन्तभट्टकृता । न्याय-व्याकरणाचार्येण पं० सूर्यनारायणशास्त्रिणा कृतया टिप्पण्या समेता । द्वितीयोभागः । [न्या० वि० १९] रु० ३—

१०७ [illegible]रशास्तिलकम् । श्रीमद्रावणभट्टकृतपदार्थादर्शटीकासहितम् । (तन्त्रशा० वि० १) रु० ९—

[illegible]टीका । म० म० श्रीशङ्कुनविरचिता । (वेद० वि० ७) रु० २—

[illegible] । श्रीमज्जगदीशतर्कालङ्कारविरचिता । [illegible]कृष्णकान्त-विद्यावागीशकृत[illegible] भ्रान्तीटीकया श्रीमद्रामभद्रसिद्धान्तवागीशविरचितया रामभद्रीटीकया च [illegible] न्यायाचार्य शास्त्रतीर्थ पं० ढुण्ढिराजशास्त्रि-कृतया छात्रोपयुक्तया [illegible] मूलकारिकार्थेन च सहिता । (न्या वि० १६) रु० ४—

११० योगदर्शनम् (पातञ्जलदर्शनम्) भगवत्पतञ्जलिरचितं, राघवानन्दसरस्वत्कृत-"पातञ्जलरहस्याख्य"टिप्पनीयुक्तं [illegible] दर्शनकाननपञ्चाननवाचस्पतिमिश्रवि-रचितया "तत्त्ववैशारद्या"-ख्यया भूषितेन विज्ञानभिक्षुनिर्मित"योगवार्त्तिक"-समुद्भासितेन मधुपुरीनिवासिपरमहंसस्वामिहरिहरानन्दारण्यकृतभास्वतीवृत्त्या सहितेन भगवच्छ्रीकृष्णद्वैपायनव्यासदेवोपज्ञ-"सांख्यप्रवचन" भाष्येणोद्भोसि-तम्, प्रदेशविशेषेषु श्रीमन्भाष्यसम्प्रदायाचार्य्य-दार्शनिकसार्वभौम-साहित्य-[illegible]चार्य-तर्करत्न-न्यायरत्न-गोस्वामिदामोदरशास्त्रिणा विहितया टिप्पन्या "पातञ्जलप्रभा"नामिकया भूमिकया च संवलितम्, एतदीयसंशोधनसम्पादन-कार्यकृतं च । (योगशास्त्रविभागे ३) रु० [illegible]